BHAVAN'S LIBRARY

This book is valuable and
NOT to be ISSUED
out of the Library
without Special Permission

अथातो ब्रह्मजिज्ञासा ॥ १ ॥

इदमत्र विचार्यते । वेदान्तानां विचार आरम्भणीयो नवेति ।

अलङ्कुर्वन्तु मत्स्वान्तं मायावादतमोहराः ॥ ६ ॥
तत्पुत्रान् सह सूनुभिर्निजगुरून् श्रीकृष्णचन्द्राह्वयान् ॥
भक्त्या नौमि पितामहं यदुपतिं तातं च पीताम्बरम् ॥
वन्दे च व्रजराजमन्वयमणिं यद्दोर्विपा माद्दशो-
ऽप्यासीन्मूर्ध्नि कृपापरः प्रभुवरः श्रीबालकृष्णः स्वयम् ॥ ७ ॥
श्रीवल्लभाचार्यपदाम्बुजाते भक्त्या मुदाऽन्तर्हृदि संनिवेश्य ॥
भाष्यप्रकाशे प्रयतेऽतिदीनो निःसाधनस्तत्करुणाबलेन ॥ ८ ॥
आचार्यवाचः प्रणमामि भाष्यसुबोधिनीस्था इतराश्च यास्ताः ॥
मत्स्वान्त आगत्य कृतावलुप्ता मदीयवाचां रचयन्त्वलङ्कृतिम् ॥९॥

अथ स्वालौकिकानुभावप्रकटनहृदयस्य भगवत आज्ञया तद्धर्मायिभूताः श्रीमदाचार्यास्तस्यानुभावस्य सर्ववेदान्ततात्पर्यगोचरत्वज्ञापनाय वेदार्थतामरसतरणेर्भगवतो बादरायणस्य सूत्राणि व्याकरिष्यमाणाः, ' सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुरिति ' भाष्यलक्षणात् सूत्रोपन्यास एवानुसरणसिद्धेः स्वकृतेरादित एव भाष्यत्वाय सूत्रीयाथशब्देनैव मङ्गलसिद्धेश्च सूत्रमेवादौ पठन्ति * अथातो ब्रह्मजिज्ञासेति * ननु मङ्गलाचरणान्तरादर्शनाच्छिष्टाचारविरोधः शङ्कनीयः । महाभाष्ययोगभाष्ययोर्ग्रन्थकृत्कृतस्याथशब्दातिरिक्तस्य मङ्गलस्यादर्शनेन, शाबरभाष्यं च ' अथातो धर्मजिज्ञासा ' इति स्य भाष्यारम्भदर्शनेन च विरोधाभावादिति । . . .
अधिकारिविषयसम्बन्धप्रयोजननिरूपणद्वारा शास्त्रारम्भः . . . नीयः । शास्त्रप्रवृत्त्यावश्यकत्वहेतुरूपा सङ्गतिश्च निरूपणीया । न्यथा प्रेक्षावत्प्रवृत्त्यभावेन शास्त्रवैयर्थ्यं स्यात् । शास्त्रस्य . . . विचारणीयम् । अन्यथा वेदान्तानुपयुक्तत्वं, प्रामाणिकानादरणीयत्वं च स्यात् । तदिदं सर्वं हृदि कृत्वा भगवता श्रीबादरायणाचार्येणेदमधिकरणरूपं सूत्रं प्रणीयते, न तु ब्रह्मविचारप्रतिज्ञामात्रमत्र क्रियत इत्याशयेनाहुः * इदमित्यादि *

विषयो विषयश्चैव पूर्वपक्षस्तथोत्तरम् । सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्' इति लक्षणाद् विषयादियञ्चकघटितं वाक्यमधिकरणम् । तेनास्मिन् सूत्रे, इदं वक्ष्यमाणं बुद्धिस्थं विचार्यते । अग्रिमसूत्रेषु वेदान्तानां विचारणीयत्वादुपोद्घातेन चिन्त्यत इत्यर्थः । विषयादिकमाहुः * वेदान्तानामित्यादि * नन्वत्रायं विषयाद्युपन्यासो न युक्तः । असौत्रत्वात् । किन्तु, ब्रह्मजिज्ञासा कार्या न वा ? ब्रह्म जिज्ञास्यं न वा ? इत्येवं सूत्रानुसरणाद् युक्तं इति चेन्न । तथोपन्यासे, तपसा ब्रह्म विजिज्ञासस्वेतिश्रुत्या तपस एवोपदेशात् तद्विहाय व्यासपादैः किमिति वेदान्तवाक्यानि विचार्यन्ते, तयः कुतो नोपदिश्यन इत्याशङ्का स्यात् श्रुतिविरुद्धत्वं च भायात् । एवमुपन्यासे त्वधीतवेदस्य, वेदान्तविज्ञानसुनिश्चितार्था इतिश्रुतिस्फुरणादस्यां च श्रुतावर्थनिश्चयं प्रति वेदान्तविज्ञानस्य हेतुताकथनात् तस्य च विचारसाध्यत्वात् तत्स्फूर्त्याशङ्कानुदयाद् युक्त इति ।

किञ्च । जिज्ञासापदस्य च यौगिकार्थ एव प्रायः प्रसिद्ध इति ब्रह्मज्ञानेच्छा कर्तव्या न वा, ब्रह्मज्ञानेच्छाविषयं कार्यं न वेति प्रथमतो बोधे, ततस्तायम्मात्रस्यापुरुषार्थत्वात् तत्रानुपपत्तौ भातायां यत्नाद् विचारं लक्षयित्वा ततस्तत्कर्तव्यत्वादिकं विचार्यम् । तदपि वेदान्तैरेव वक्ष्यमाणरीत्या विचार्यम् । अन्यथाऽऽकस्मिकता स्यात् । अत आवश्यकत्वादपि युक्तः ।

किञ्च । व्यासप्रवृत्तिबीजबोधनार्थत्वेनापि युक्तः । तथाहि । प्रथमस्कन्धे चतुर्थाध्याये 'द्वापरे समनुप्राप्ते' इत्यारभ्य, 'एवं प्रवृत्तस्य सदा भूतानां श्रेयसि द्विजाः !' इत्यन्तेन सर्वेषां श्रेयोऽर्थं प्रवृत्तिर्व्यासचरणानामुक्ता । पञ्चमे च, जिज्ञासितमधीतं च यत्तद् ब्रह्म सनातनमिति नारदेन ब्रह्मविचारान्तायाः कृतेस्तथात्वं बोधितम् । तथाच ज्ञानविधिनार्थज्ञानार्थं प्रवृत्तानपि यदा जैमिनीयादिदर्शनैरेकदेशीयविरुद्धज्ञानवतो दृष्टवांस्तदा भारतकरणोत्तरमत्र प्रवृत्तः । वेदार्थनिश्चयो वेदान्तार्थनिश्चयं विना न भविष्यतीति । अत एवाग्रे वेदान्तवाक्यैरेव ब्रह्मविचारदर्शनम् । ब्रह्मण· सर्ववेदार्थत्वस्याग्रे सूत्रेषु स्थाप्यत्वाच्च । तदर्थं वेदान्तविचारावश्यकत्वमवश्य साधनीयम् । तेन तत्र हेत्वाकाङ्क्षोपशमात् । अतस्तदुद्बोधकतयाऽयं विचारोऽपि वेदगतपञ्चम्यन्तब्रह्मपदादेव बोध्यत इति सौत्रत्वाद् युक्त इति ।

किं तावत् प्राप्तम् । नारम्भणीय इति । कुतः ।
साङ्गोऽध्येयस्तथा ज्ञेयो वेदः शब्दाश्च बोधकाः ।
निःसन्दिग्धं तदर्थश्च लोकवद् व्याकृतेः स्फुटाः ॥

तत्र विषयो यथापाततः प्रतिपन्नः सन्दिग्धोऽर्थः । तादृशश्चात्र वेदान्तविचारो न तु वेदान्ताः । तेषामग्रिमसूत्रेषु विचार्यत्वात् । विषयः संशयः । एकधर्मिकविरुद्धकोटिद्वयावगाहि ज्ञानम् । तदाकारश्चात्र, आरम्भणीयो न वेत्यनेनोक्तः । पूर्वपक्षः प्रतिवादिमतम् । तदाहुः * नारम्भणीय * इति । तत्र पृच्छन्ति * कुत * इति । वेदान्तविज्ञानसुनिश्चितार्था इति श्रुतावर्थनिश्चयं प्रति वेदान्तविज्ञानस्य हेतुताबोधनाद् विचारं विना च तदसम्भवात् स आवश्यक इति कुतो नेत्युच्यत इत्यर्थः । एवं प्रश्ने प्रतिवादी अनारम्भणीयतामुपपादयन् गृह्णाति * साङ्ग * इत्यादि । अयमर्थः । वेदान्तविचारस्यारम्भणीयत्वं वदता सिद्धान्तिना विधिप्रयुक्तताऽऽरम्भणीयत्वं वक्तव्यम् । तत्र विचारे प्रत्यक्षविधेरदर्शनात् कथञ्चित् कुतश्चिद् वैधत्वं साधनीयम् । ततश्च कर्मादिविधिभ्यस्तत्सिद्ध्यसम्भवादध्ययनादिविधिभ्यः साधनीयम् । तत्र, स्वाध्यायोऽध्येतव्य इत्येकः । अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयेदित्यपरः । साङ्गो वेदो ध्येयो ज्ञेयश्चेत्यन्यः । एते त्रयः पूर्वकाण्डस्थाः । श्रोतव्य इत्यादिरुत्तरकाण्डस्थश्चेतरः ।

तत्र भाट्टास्तावदेवं मन्यन्ते । अध्ययनविधेरक्षरग्रहणमात्रपर्यवसानेऽदृष्टकल्पनापत्तेरर्थज्ञानरूपदृष्टफलार्थतैव युक्ता । न च विमतं वेदाध्ययनमर्थज्ञानहेतुरध्ययनत्वाद् भारताध्ययनवदित्यनुमानेनाध्ययनस्य स्वाध्यायसंस्कारद्वाराऽर्थज्ञानहेतुत्वप्राप्तेर्न तावत्पर्यन्तं विधिव्यापारो युक्त इति वाच्यम् । विमतं वेदाध्ययनं नार्थज्ञानहेतुर्वेदाध्ययनत्वादाधुनिकाध्ययनवदिति प्रत्यनुमानेन तद्बाधात् । न च लोकेऽवगतसामर्थ्यानां शब्दानां वेदेऽपि बोधकत्वाल्लिखितपाठादिनाऽप्यर्थज्ञानसम्भवाद्यार्थबलादेव तत्प्राप्तेरर्थज्ञानांशे तस्यापूर्वविधित्वाभावान्न तत्पर्यन्तं विधिव्यापारो युज्यत इति वाच्यम् । अर्थज्ञानांशेऽस्य नियमविधित्वाङ्गीकारात् । न च यथाऽवघातनिष्पन्नैरेव तण्डुलैर्दर्शपूर्णमासापूर्वसिद्धिर्न पेषणादिनिष्पन्नैस्तथाऽध्ययनावगतेनैवा-

र्थेन क्रत्वपूर्वसिद्धिर्न तु प्रकारान्तरावगतेनेति फलांशे नियमविधित्वं न युक्तम्, अनारभ्याधीतत्वेन श्रुत्याद्यभावेन च क्रत्वर्थताया अशक्यवचनत्वादिति वाच्यम्। वैदिकशब्दानां विलक्षणत्वेन पूर्वोक्तरीत्या सम्यगर्थज्ञानाभावे गृहस्थादीनां द्रव्यादियज्ञासिद्धेः सर्वधर्मलोपप्रसङ्गात्। अतः पूर्वोक्तदूषणेनापूर्वविधित्वनियमविधित्वयोरशक्यवचनत्वेऽपि, वसन्ते ब्राह्मणमुपनयीतेत्यादिवाक्येषु द्वितीयानिर्देशेन तेषां संस्कार्यत्वावगमात् संस्कारस्य च कार्यान्तरयोग्यतासम्पादनरूपत्वादुपनयनसंस्कृतानां त्रैवर्णिकानां कार्यान्तरापेक्षत्वेन तत्सन्निधिपठितस्याध्ययनस्य चानिर्दिष्टकर्तृकतया कर्त्रपेक्षत्वेन परस्पराकाङ्क्षासन्निधियोग्यत्वैस्त्रैवर्णिकानां यज्ञरूपकार्यान्तराधिकारनियमार्थत्वस्याध्ययनविधौ सुखेन सम्भवात्। एवञ्चाधानाग्निहोत्रादिविषयत्रैवर्णिकेषु विद्वत्सु सत्सु नानेनाधिकुर्वन्ति। अन्यथा चतुर्थादेरप्याक्षिपेरन्। सोऽयमधिकारो वक्ष्यमाणेऽपशूद्राधिकरणेऽध्ययनविधिप्रसादलभ्य इत्यध्ययनविधिरर्थज्ञानपर्यवसायीति।

प्राभाकरास्तु, 'सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः' इत्याचार्यकरणे विहितेनोपनयीतेत्यात्मनेपदेनोपनयनरूपस्य माणवकसंस्कारस्याचार्यत्वसिद्धिप्रयोजनताप्रत्ययेऽपि, 'उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते' इति स्मृतौ [illegible]नोपनयनस्याध्यापनाङ्गताप्रतीतेस्तत् कथमध्यापनस्योपकरोतीत्यपेक्षायां, शिष्यमिति, तमध्यापयेदिति च द्वितीयोक्तकर्मत्वलिङ्गादुपनेयासत्तिद्वारेति निश्चीयते। उपनीतोऽपि नाकिञ्चित्करोऽङ्गमिति तद्व्यापारापेक्षायां वाक्यान्तर उपनयनं प्रक्रम्य विहितं वेदाध्ययनमेवाध्यापनोपकारकत्वादुपनीतव्यापारतयाऽध्यवसीयते। तदेवं स्वाङ्गमुपनयनं प्रयुञ्जानोऽध्यापनविधिस्तद्द्वारेणाध्ययनं प्रयुङ्क्ते। ततश्चाध्ययनस्यापि प्रयोजने विचार्यमाणे स्वसमवेतत्वेनान्तरङ्गत्वादर्थज्ञानमेव तथात्वेन निश्चीयते, न त्वाचार्यत्वसिद्धिर्बहिरङ्गत्वात्। न च प्रथमावगतत्वेनाचार्यत्वसिद्धेरेवाध्ययनप्रयोजनं, न तु पश्चादवगतमर्थज्ञानमिति वाच्यम्। तत्सिद्धिं विनाऽप्यध्ययनानुष्ठानसम्भवेन प्रथमं तदनवगमात्। न च शाब्दाद्यवगतो नियोग एव प्रयोजनमस्त्विति वाच्यम्। अर्थज्ञानस्यापि प्रतीयमानत्वेन त्यागायोगात्। नचैवमध्ययनस्यार्थज्ञानार्थत्वेऽध्ययन-

विधिनैवार्थज्ञानप्राप्तिः किमिति नाद्रियत इति शङ्क्यम् । अध्ययनविधेरधिकारशून्यत्वादाचार्यकरणविधिप्रयुक्त्याध्यापनलाभात्तदङ्गीकारे विश्वजिदादिवन्नियोज्यफलकतापत्तेः । अतोऽध्यापनविधिप्रयुक्तमेवाध्ययनमर्थज्ञानं च, नाध्ययनविधिप्रयुक्तमित्याहुः ।

एवं मीमांसकमतद्वयेऽप्यर्थज्ञानस्य वैधत्वात् तदाक्षिप्तविचारस्यापि वैधत्वम् ।

रामानुजाचार्यास्तु, अध्ययनविधिना स्वाध्यायाख्यस्य वेदस्याक्षरराशेर्ग्रहणं विधीयते । तत्रेतिकर्तव्यताकाङ्क्षायामध्यापनविधिना, 'श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि । युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान्' इत्यादिभिश्चापेक्षितानि विधीयन्ते । तेनाचार्योच्चारणानूच्चारणरूपमध्ययनमक्षरराशिग्रहणफलकमित्यवगम्यते । तच्च चतुर्वर्गफलस्य विधिवाक्ये कर्मत्वेन बोधितस्य स्वाध्यायस्य कार्यान्तरयोग्यतासम्पादनरूपः संस्कारः । तेनाध्ययनविधिरक्षरग्रहणमात्रपर्यवसायी । अध्ययनगृहीतं च स्वभावादेवार्थबोधकमिति स्वाध्यायस्यापि तथात्वात् तत्रापाततोऽवगम्यमानानामर्थानां स्वरूपप्रकारविशेषनिर्णयाय वेदवाक्यविचाररूपमीमांसाद्वयश्रवणेऽधीतवेदः पुरुषः स्वत एव प्रवर्तते । तत्र कर्मस्वरूपनिरूपणे तेषामल्पास्थिरफलत्वं दृष्ट्वाऽध्ययनगृहीतस्वाध्यायैकदेशोपनिषद्वाक्येषु चाऽमृतत्वरूपानन्तस्थिरफलापातप्रतीतेस्तन्निर्णयफलकवेदान्तविचाररूपशारीरकमीमांसायामधिकरोतीत्याहुः ।

शैवास्तु, अध्ययनविधेरक्षरग्रहणमात्रपरत्वमङ्गीकृत्याध्ययनेनाऽऽपाततोऽर्थप्रतीतेस्तदनु ब्रह्मस्थूलोपासनभूतज्योतिष्टोमादिविधायकानां सूक्ष्मोपासनभूतदहरादिविद्याविधायकानां चेतरेतरविरोधाभासं पश्यंस्तद्विचारं पुरुषार्थाकाङ्क्षी पुरुषः स्वयमेव प्रवर्ततेऽतो नानिबन्धनो विचार इत्याह ।

भास्कराचार्यास्तु स्वाध्यायविधेरर्थावबोधपर्यवसितत्वेऽपि ब्रह्मज्ञानं तेनाक्षेप्तुं न शक्यम् । यज्ञेन दानेनेति, शान्तो दान्त उपरतस्तितिक्षुः श्रद्धान्वितो भूत्वा आत्मन्येवात्मानं पश्येदिति श्रुत्या ब्रह्मज्ञानस्योपायान्तरसापेक्षत्वात् । कर्मावबोधनसमर्थेषु पुरुषेष्वध्ययनविधेः कृतार्थत्वेनोपायान्तराक्षेपाक्षमत्वात् । श्रवणायापि बहुभिर्यो न लभ्य इत्यादिश्रुतेर्ब्रह्मणो दुर्ज्ञेयत्वाच्च । अतो ब्रह्मजिज्ञासा न त-

त्कारिता । किन्तु, श्रोतव्यो मन्तव्यः, सोऽन्वेष्टव्यः स विजिज्ञासितव्यः, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदित्यादिवेदान्तविधिकारिता वास्त्वित्याहुः ।

तत्राध्ययनविधेरर्थज्ञानार्थत्वकल्पनमसङ्गतम् । यं यं क्रतुमधीते तेन तेनास्येष्टं भवतीतिवाक्येनाक्षरग्रहणमात्रेऽपि फलबोधने तदतिहाय फलान्तरकल्पनस्यायुक्तत्वात् । वाक्यबलेनाऽदृष्टद्वारकत्वस्याप्यदुष्टत्वात् । तेन तेन क्रत्वध्ययनेनास्याध्येतुरिष्टं मनोवाञ्छितं भवतीति दृष्टफलार्थत्वस्यापि शक्यवचनत्वाच्च । नच प्रत्यक्षविरोधः । इदानीन्तनाध्ययनस्य व्यङ्गत्वेनादोषात् । नच व्यङ्गत्वे मानाभावः । स्वाध्यायपदस्य वेदे योगरूढ्या सुष्ठ्वामन्ताद्ध्यायो यस्येति योगस्यापि ग्राह्यत्वे देशकालगुरुशिष्यनिष्ठानां शोभनगुणानां पाठार्थानुष्ठानेषु शङ्काराहित्यरूपस्य समन्तत्वस्य च ग्रहणेन स्वाध्याय इति समाख्याया एव तत्र मानत्वात् । नचैवं सत्यर्थज्ञानस्यापि प्राप्तेः कथं तदर्थत्वकल्पनस्यासङ्गतिरिति शङ्क्यम् । तत्तस्य माणवकाधिकारत्वेनाङ्गीकारात् । वेदस्य गुरुमुखाद् ग्रहणदशायां तं प्रति स्वाध्यायत्वस्य भावित्वेन तदानीमभावात् । वेदमनूच्याऽऽचार्योऽन्तेवासिनमनुशास्ति सत्यं वद धर्मं चर स्वाध्यायान्मा प्रमद इति तैत्तिरीयाणां शिक्षोपनिषच्छ्रुत्या तथा निश्चयात् । आधानाग्निहोत्रादिविधीनामपि तत्र तदापेक्षकत्वस्याध्ययनविधिप्रसादलभ्यत्वोपगमेन प्रसादस्य च माणवके सामर्थ्याभावादभावेन तेषामप्याक्षेपकतायां कौण्ठ्याच्च । आश्रिते चैकवाक्यत्वे, क्षेपश्चेति विध्यन्तरस्यापि संग्राह्यत्वात् तद्बलादेवार्थज्ञानमङ्गीकार्यम् । अन्यथा तद्वैयर्थ्यादिति । अत एव प्राथमिकाध्ययनस्यापि तदर्थत्वमसङ्गतम् । किन्त्वध्यापनप्रयुक्तत्वं यदुक्तं तन्मात्रं युक्तम् । ज्ञातुर्नियोज्यस्याचार्यत्वकामिनस्तत्रैव विधौ सत्त्वेन लिङ्प्रयोगेण च तत्र विधित्वस्यासन्दिग्धत्वात् । फलानामार्थवादिकार्थेऽप्यनुशासनात् । यशसा ज्ञानस्वातन्त्र्याणां त्रैवर्णिकानामध्ययनस्यावश्यकत्वबोधनेन वाक्यसार्थक्यसिद्धेः । एवञ्च यद्यप्यध्यापनविधावध्यापनमात्रं श्रुतं, तथापि, साङ्गो वेदोऽध्येयो ज्ञेयश्चेतिश्रवणाद् गुरुणाङ्गपाठनेऽर्थज्ञापने च तदसिद्ध्या वैयर्थ्ये वाक्यस्य प्रसक्ते तद्वारणाय तथाध्यापनमङ्गीकरणीयम् । आचार्यलक्षणस्मृतौ वेदस्य सकल्पं सरहस्यं चेति विशेषणाच्च । एवं साङ्गे-

ऽधीने ज्ञाते च तस्य स्वाध्यायः सिद्ध्यति। तत्रोक्तं फलमपि सम्पद्यत इति वाक्यत्रयैकवाक्यतयाऽवसीयते। तस्मात् प्राथमिकाध्ययनमध्यापनप्रयुक्तम्, अर्थज्ञानं च प्रत्यक्षश्रुतिलभ्यमिति भाट्टप्राभाकरयोः पूर्वोक्तकल्पना असङ्गतैव। कृत्यप्रत्यययोर्विध्यर्थकत्वपक्षेऽप्युक्त एव प्रकारो युक्तः। अन्यथा विधिकौण्ठ्यप्रसङ्गात्। एवञ्च रामानुजाचार्यैरध्ययनविधेरक्षरग्रहणपर्यवसायित्वं, स्वाध्यायस्य च स्वभावादर्थबोधकत्वं यदुक्तं तदप्युक्तदिशैव युक्तम्। नत्वन्यथापि। एवमेव भास्कराचार्योक्ते स्वाध्यायविधेरर्थावबोधपर्यवसितत्वेऽपि बोध्यम्। शैवस्तु विचारसार्थक्यमात्रमाह, न तु शास्त्रप्रयोजकं कञ्चन विधिमपीति तन्मतेऽनैश्वरत्वमेवायाति। तेन तत्तूदासीनप्रायम्। एवं वेदान्तश्रवणविधावपि श्रवणपदेन शब्दग्रहणं मननपदेनावबोधोऽन्वेषणादिजिज्ञासापदाभ्यां चेच्छा विधीयत इति बोद्धव्यम्। नचेच्छाया अविधेयत्वम्। तिस्रः खलु एषणा एषितव्या इति चरके पतञ्जलिनाऽभिधानात्। अतस्तद्विजिज्ञासस्व तद् ब्रह्मेति विधिरपि तथा। एवञ्च मैत्रेये ये विधय उक्ताः, आत्मेत्येवोपासीत, स म आत्मेति, तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण इति। तेऽपि ज्ञान एव, न विचारे। ये चापि मध्वाचार्यैर्जिज्ञासासूत्रे, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्युक्तास्तेऽपि सर्वे ज्ञान एव पर्यवस्यन्ति।

यत्तु शैवः। किमयं श्रोतव्य इति विधिर्नियमः परिसंख्या वा? नाद्यः। वेदान्तश्रवणं स्वविषयमात्रावगतिसाधनं शास्त्रश्रवणत्वाद् वैद्यकशास्त्रश्रवणवदित्यनुमानेनापि प्राप्ततयाऽपूर्वत्वाभावात्। न द्वितीयः। अवघातवद् दृष्टफलस्योपायान्तरस्याप्राप्तत्वात्। नेतरः। तथा सति श्रोतव्या एव वेदान्ता नाध्येया इति स्यात्। ततश्च विचारस्याप्ययोगात् पुरुषार्थासम्भवः। एवञ्च वेदाध्ययनादेरपि निष्फलतेति महाननर्थः स्यादिति विकल्पितवान्। तत्तुच्छम्। हेतोः साधारण्येनानुमानतोऽप्राप्तावपूर्वविधित्वस्य स्थिरत्वात्। कथं साधारणतेति चेद्? वेदान्तश्रवणं न स्वविषयावगतिसाधनं शास्त्रश्रवणत्वात् सूत्रश्रवणवदित्येवमवधेहि। किञ्च, श्रवणपदं शब्दग्रहणमात्रपरं वा, वाक्यार्थज्ञानपरं वा। आद्ये विधिवैयर्थ्यापत्तिः। स्वाध्यायविधिनैव चरितार्थत्वात्। नचाध्ययननियमाभावाय पुनर्विधानमिति वाच्यम्। आचारविरोधात्। त्रैवर्णिकाधिकारस्यापि स्या-

अर्थज्ञानार्थं विचार आरम्भणीयः। तस्य च ब्रह्मरूपत्वात् तज्ज्ञाने पुरुषार्थो भवतीति न मन्तव्यम्। विचारं विनापि वेदादेव साङ्गादर्थप्रतीतेः।

गापत्तेश्च। द्वितीये तु निराबाधं विधित्वम। अन्यथा वाक्यभेदस्योपत्तेरिति।

अतः पूर्वकाण्डविधेरर्थज्ञानमात्रार्थत्वेनोत्तरकाण्डीयस्यापि ब्राह्मणश्रमणन्यायेन विशेषार्थतया विचारस्याविधत्वान्नारम्भणीयः। ननु सन्देहाभावायाध्ययनादिविधौ विचार आक्षेप्य इत्यत आह। * शब्दाश्चेत्यादि *।

विशेषबोधनाय स्वोक्तं विभजते *अर्थज्ञानेत्यादि* सर्वोऽपि प्रयोजनमुद्दिश्य कार्यमारभते। तत्रास्य विचारस्य प्रयोजनं वेदार्थज्ञानं वाऽन्यद् वा। तत्रान्यस्यादर्शनाद्, वेदान्तविज्ञानसुनिश्चितार्था इतिवाक्यबोधितमाद्यमेवादर्तव्यम्। तत्रापि तस्य स्वतोऽपुरुषार्थत्वात् प्रयोजनान्तरमेष्टव्यम्। तच्च प्रयोजनमनन्तविधमप्यैहिकामुष्मिकपुरुषार्थेऽन्तर्भूतत्वात् पुरुषार्थरूपम्। तच्च वेदार्थज्ञानेन भवतीति तदर्थं विचार आरम्भणीयो, न तु स्वतःपुरुषार्थत्वात्। वेदार्थश्च, सर्वे वेदा यत्पदमामनन्तीति, वेदैश्च सर्वैरहमेव वेद्य', वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे, परोक्षवादा ऋषयः परोक्षं च मम प्रियमित्यादिश्रुतिस्मृतिभिर्ब्रह्मरूपः। नच वेदोऽखिलो धर्ममूलमित्यादिस्मृतिभिर्धर्मरूप इति वाच्यम्। यज्ञो वै विष्णुरिति, धर्मो यस्यां मदात्मक इति श्रुतिस्मृतिभ्यां धर्मस्यापि ब्रह्मरूपत्वबोधनात् तद्रूपेणैवार्थत्वात्। ब्रह्मणस्तु ज्ञानादेव पुरुषार्थसिद्धिः। ब्रह्मविदाप्नोति परम, आनन्दं ब्रह्मेत्युपक्रम्य, य एवं वेद प्रतितिष्ठति, अन्नवा अन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्या। दहरविद्यायां दहरपुण्डरीकवेश्मास्थतस्याकाशस्यैतदमृतमभयमेतद्ब्रह्मेत्यनेन ब्रह्मत्वमुक्त्वा, एवंवित् स्वर्गं लोकमेतीत्येवंविधेषु वाक्येष्वैहिकामुष्मिकपुरुषार्थस्य ज्ञानमात्रेण श्रावणात्, तावतापि पुरुषार्थसिद्धेर्ब्रह्म * न मन्तव्यं * न विचार्यमित्यर्थः। न च श्रोतव्य

नचार्थज्ञानमविहितम्, अविचारिताश्च शब्दा नार्थं प्रत्याय-यन्तीति वाच्यम् । ज्ञेयश्चेति विधानात् । 'गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः । अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः' इति बाधोपलब्धेश्च । शब्दश्चक्षुरादिवन्न सन्दिग्धार्थप्रतिपादकः । तदर्थश्च व्याकरणादिना निश्चीयते । यथा लौ-

---

इति विधिना श्रवणं विधाय तदर्थमननाय मन्तव्य इति विध्यन्तरदर्शनादवबोधसामान्यस्य तदर्थत्वेनाशक्यवचनत्वाद् युक्तिभिरनुचिन्तनमेव मननपदार्थो वक्तव्य इति विचारोऽपि प्राप्त एवेति वाच्यम् । तस्य शारीरपरत्वात् । प्रियत्वलिङ्गेन[1] तथा निश्चयात् । नच वाक्यार्थः शारीरः परमात्मा वेति सन्देहे लिङ्गादिभिस्तन्निश्चितार्थबोधार्थमेव विचार आक्षेप्य इति वाच्यम् । वेदे साङ्ग इति विशेषणादधीतनिगमनिरुक्तव्याकरणस्य विचारं विनापि तैरेव तत्सम्भवात् । तेषु श्रुतीनामेवोदाहृतत्वात् । न च मास्तु वाक्यार्थज्ञानार्थं विचारापेक्षा । पदार्थज्ञानार्थं स्यादावश्यकः । शब्दानां प्रायशोऽनेकार्थत्वेनानेकवृत्तिकत्वेन च कया वृत्त्या कमर्थमत्र बोधयन्तीति निश्चयाभावात्, तदर्थज्ञानस्य चाविहितत्वेन तद्विचारादिति शङ्कनीयम् । अध्ययनवत् साङ्गस्य वेदस्य विधानेन गुरुमुखादेव पदार्थज्ञानस्यापि सिद्धेः । नच विषयभावाद् गुरुणार्थो न वक्तव्य इति शङ्का कार्या । वाक्यान्तरे बाधोपलब्धेः । तदिदमुक्तं, *नचार्थेत्यादिना* नापि सन्देहाभावाच्च तदपेक्षा । शब्दस्य निःसन्दिग्धार्थबोधकत्वात् । न हि गौरित्युक्ते सत्त्वान्तरबोधो भवति । अतोऽनेकार्थत्वादिसङ्करेऽपि व्याकरणोक्तस्वरादिना सुखेन तन्निरासात् । किञ्च । लोके प्रत्यक्षादिसंक्रमाच्च तथा व्याकरणापेक्षेति तद्विरुद्धमपि क्वचिन्निर्णीयते । अत एव लौकिकशब्दार्थनिर्णायकत्वेऽपि न तत्र तेषामङ्गत्वप्रसिद्धिः । वेदे तु तेषामङ्गत्वस्य शास्त्रप्रसिद्धत्वात् प्रमेयस्य चा-

---

१ न वारे पत्युः कामाय पतिः प्रियो भवति किं तर्हि आत्मनः कामाय सर्वं प्रियं भवतीतिश्रुत्युक्तलिङ्गेनेत्यर्थः ।

किकवाक्ये तथा वेदेऽपि । न च तद्विरुद्धं निर्णेतव्यम् । प्रमामात्राकृतत्वमसङ्गात् । तस्माद् वेदार्थज्ञानार्थं विचारो नारम्भणीयः ।

स्यादेतत् ।

न वेदार्थज्ञानमात्राय विचारः । किन्तु ब्रह्मज्ञानाय । तस्य चात्मरूपत्वात् तस्य चाविद्यावच्छिन्नत्वाद् देहात्मभावदृढमतीतेस्तदतिरिक्तस्य ब्रह्मणोऽभावान्न वेदमात्रादसम्भावनाविपरीतभावनानिवर्तकं ज्ञानमुत्पद्यते ।

स्यन्तालौकिकत्वेन विचारवादिनोऽपि तेषामाश्रयणीयत्वात् तद्धेतुन्यायेन तैरेवार्थज्ञानसिद्धेः कृतमजागलस्तनप्रायेण विचारेणेति । तदिदमुक्तं * नचेत्यादिना * ।

अथैकदेशी स्वमतेन विचारकर्तव्यतामुपपादयति * स्यादेतदिति * वक्ष्यमाणप्रकारेण विचारस्यारम्भणीयत्वमुपपद्यतामित्यर्थः । तदाह * न वेदार्थेत्यादि * । * तस्येति * ब्रह्मणः । पटोलपत्रं पित्तघ्नं नाडी तस्य कफापहेत्यादिषु विशेषणमात्रस्यापि तत्पदेन ग्रहणदर्शनात् । अयमर्थः । अनुपपद्यमानत्वान्मास्तु वेदार्थमात्रत्वेन ब्रह्मज्ञानाय विचारः । परं स्वात्मत्वेन ब्रह्मज्ञानाय विचारो न प्रतिक्षेप्तुं शक्यः । नच सन्दिग्ध एव विषये विचारस्य प्रवृत्तेरात्मनश्चाहंप्रत्ययगोचरत्वेनासन्दिग्धत्वादेवमप्यविचार्यत्वमेवेति शङ्क्यम् । अहंप्रत्ययस्य स्थूलोऽहं कृशोऽहं बधिरोऽहं गच्छाम्यहं श्वसिम्यहं जानाम्यहमित्यादौ देहाद्युपाधिगोचरत्वेन विपर्यस्तत्वात् तेन सन्देहानिवृत्तेरभावात् । नच देहादिरेवात्मेति युक्तम् । देहस्यावस्थाभेदेषु परिणामान्तरदर्शनेन नश्वरत्वनिश्चयात् । अहंवित्तिवेद्ये त्वात्मनि, यः कृशः पूर्वं स इदानीं स्थूल इति पूर्वापरकाले ऐक्यभानेन तदभावात् । नच सोऽहमिति प्रत्यभिज्ञया देहादेरात्मत्वं वक्तुं शक्यम् । प्रत्यभिज्ञायाः सोऽयं दीपस्तदिदं जलमितिवत् सजातीयविषयत्वेन पूर्वापरकालकतदैक्यानिश्चायकतया तदविषयत्वात् । एवं तत्तदिन्द्रियनाशेऽपि जीवनदर्शनाच्छ्वासोच्छ्वासयांर्यदिरागच्छतः

प्रत्युत देहात्मभावदृढप्रतीतिः श्रुतेरुपचरितार्थत्वं स्तुतित्वं वा कल्पयिष्यतीति ।

मैवम् ।

प्राणस्यापि ज्ञानादर्शनेनाचेतनत्वनिश्चयाद् बुद्धिमनसोरपि करणत्वेन सिद्धतया कर्तृत्वेनासिद्धत्वाद् विषयपार्थक्यस्य सर्वानुभवसाक्षिकत्वात् सर्वेषामिदङ्काराऽऽस्पदत्वाच्च । नचेदङ्कारास्पदानामात्मत्वं युज्यते । पुरोऽवस्थित एव विषये तथाप्रयोगदर्शनात् । आत्मनश्च प्रत्यग्वित्तिवेद्यत्वेन तथात्वाभावात् । नचैवं सिद्धं देहादिभ्यो विवेके सन्देहाभावादजिज्ञास्यत्वम् । तस्याविद्यावच्छिन्नत्वाद् विदुषां शास्त्रपरिपक्वबुद्धीनामप्यहंप्रत्यये विविक्तात्मस्वरूपस्यागोचरत्वात् सुखदुःखादीनां प्रादेशिकत्वस्य चाभिमानेन तथा निश्चयात् तेषामपि देहात्मभावदृढप्रतीतेरविद्यासम्बन्धरहितस्य केवलस्यात्मनः प्रत्ययाभावेन दर्शनान्तरेऽपि व्यापकतया प्रतिपन्नस्य तस्यैव बृहत्त्वेन बृंहयितृत्वेन च तद्व्यतिरिक्तस्य ब्रह्मणोऽभावाद् विविक्तात्मस्वरूपज्ञानाय विचार आवश्यकः । नच वेदमात्राद् विविक्तात्मस्वरूपविषयासम्भावनाविपरीतभावनानिवर्तकं ज्ञानं सिद्ध्यति । प्रत्यक्षापेक्षया शब्दस्य निर्बलत्वात् । प्रत्युत प्रबलप्रमाणेन देहात्मभावदृढप्रतीत्या शास्त्रपक्वबुद्धिरपि दर्शनान्तराभिमानेन विविक्तात्मस्वरूपबोधिकाया श्रुतेः कल्पनोपदेशतयोपचरितार्थत्वं वा, उपासनाङ्गतया स्तुतित्वं वा कल्पयिष्यति । अतोऽसम्भावनाद्यपनयनेन श्रुतावुपचारादिनिवृत्त्यर्थं वेदार्थभूतात्मत्वेन ब्रह्मज्ञानाय विचार आवश्यक इति ।

एवमुक्तमेकदेशिमतं चोदकः प्रतिक्षिपति * मैवमिति * यदुक्तं, न वेदार्थज्ञानमात्राय विचारः, किन्तु ब्रह्मज्ञानायेति । तत्र किं दर्शनान्तरवद्व्यत्युदासीनात्मत्वेन ब्रह्मज्ञानाय वेदान्तविचारः । ततश्च वेदार्थज्ञानमानुषङ्गिकमिति तत्र मनीषितम्, उत वेदार्थभूतात्मत्वेन तदर्थं स इति । तत्राद्यस्तु दर्शनान्तरैरेव सिद्धो, न विवक्षितपदवीमधिरोहति । द्वितीयश्चेत् तदापि तत्र सङ्गच्छत इत्यर्थः ।

अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते ।
तपसा वेदयुक्त्या तु प्रसादात् परमात्मनः ॥

न हि स्वबुद्ध्या वेदार्थं परिकल्प्य तदर्थं विचारः कर्तुं शक्यः ।

उक्तरूपस्यात्मनो वेदार्थत्वाभावे हेतुं कारिकया गृह्णाति *अलौकिक इति*। हिशब्दो हेतौ। अलौकिकत्वादित्यर्थः। किं तेनेत्याह *न युक्त्येति*। कथं तर्हि तत्प्रतिपत्तिरित्यत आह *तपसेत्यादि* तपोऽनशनादिरूपम्। वेदोक्ता युक्तिर्वेदयुक्तिः। न्यग्रोधफलमाहरेत्यादिरूपा। परमात्मप्रसादो मुख्यं साधनम्। अन्यथा तेषां प्रकृतिवैचित्र्याद्विचित्रा वाचः स्रवन्ति ह्यौत्पत्तिकन्यायेनान्यदेव बुद्ध्यन्तेति। एतदेव विभजते *न हीत्यादि*। अयमर्थः। भवान् हि श्रुतीनामनुपचरितार्थत्वाय दर्शनान्तरं आत्मगमकत्वेन स्वीकृतस्याहंप्रत्ययस्य प्रादेशिकग्राहकत्वं प्रदर्श्य तस्याविद्याख्योपाध्यवच्छिन्नात्मग्राहकत्वेन भ्रमत्वं च प्रदर्श्य येन तन्निश्चयाभावात् कर्तृत्वभोक्तृत्वाद्यंशेऽपि तस्य भ्रमत्वं साधयितुं चिदेकरसस्यात्मनो ज्ञानाविषयत्वं च साधयितुमध्यासभाष्यसूचितां विषयत्वेन जडत्वेन व्याप्तिमङ्गीकृत्यैवमाह। अहंवित्तौ प्रकाशमानस्यात्मनो ज्ञानान्तरविषयत्वेन जडत्वापत्तिः। सर्वास्वर्थवित्तिषु प्रकाशाश्रयत्वेन सिद्धस्यात्मनो घटमहं जानामीत्यादौ विषयत्वायोगः। चैत्रो ग्रामं गच्छतीत्यादौ क्रियाफलस्य संयोगस्योभयनिष्ठत्वेऽपि ग्रामादौ परसमवेतक्रियाफलशालित्वस्य कर्मत्वेन स्वसमवेतक्रियाफलशालिन आत्मनः परत्वाभावेन आत्मानमहं जानामीत्यादौ विषयस्यात्मनः कर्मलक्षणानाक्रान्ततया कर्मत्वायोगः। तस्य कर्तृभेदाङ्गीकारे कर्मभूतस्य तस्यानात्मत्वप्रसङ्गः। अप्रकाशमानत्वस्यैव जडत्वेन स्वस्मिन्नप्रकाशमानतयापि जडत्वापत्तिः। अनुभवबलेन कर्मकर्तृविरोधे परिहृते सिद्धे चाभेदे प्रकाशाश्रयरूपकर्तृत्वेनैव प्रकाशत इत्यङ्गीकारेऽपि यस्मिन्नर्थात्मानौ प्रकाशेते तस्य ज्ञानरूपप्रकाशस्य स्वयमप्रकाशमानतया जडत्वे विषयाप्रकाशकत्वप्रसङ्गः। तस्याप्रकाशमानत्वेऽपि निलीय चक्षुरा-

दिवत् प्रकाशकत्वे तत्फलस्यैवैतत्फलस्यैव स्वयम्प्रकाशतया आ-श्रयतयाऽस्य जडत्वापत्तिः । पूर्वज्ञानफलस्यैतस्य जडत्वे पतज्ज्ञान-फलस्याग्रिमस्यापि जडत्वापत्तिः । परम्पराङ्गीकारेऽनवस्था जगदा-न्ध्यापत्तिश्चेत्यतः फलरूपा संवित् स्वयंप्रकाशाऽभ्युपेतव्या, न तु विलीय चक्षुरादिवत् प्रकाशिका । ततः स्वयंप्रकाशत्वस्यैव चेत-नत्वेन तदाश्रयतया प्रकाशमानस्यात्मनो विषयत्वेन जडत्वाप-त्तिस्तदवस्था । नचार्थात्मानौ विना केवलायाः संविदः प्रकाशा-भावात् संविदर्थात्मनां परस्परप्रकाशकत्वमेवेति परतःप्रकाश-त्वमेव चेतनत्वम् । ततश्च संवित्तुल्यत्वान्नात्मनोऽपि जडत्वमिति शङ्क्यम् । तथा सत्यर्थस्यापि चेतनत्वापत्तेः । अथ संविदर्थात्मनां प-रस्पराविनाभावाद्यात्यन्तभेद इति विभाव्यते, तदा तु संविद इव तयोरपि स्वयम्प्रकाशत्वं सिद्धमित्यर्थात्मनोः संविदतिरेकेणानिर्वा-च्यत्वात् संविदेव केवला सिद्ध्यति, न त्वर्थात्मभ्यां साहिता । वस्तु-तस्तु संविदोऽर्थसहभावोऽपि न नियतः । अतीतानागतस्थले व्यभि-चारात् । नच तत्राभाव एव विषय इति वाच्यम् । तस्याऽसत्त्वा-त् । नच सोऽपि सन्निति वाच्यम् । सत्त्वस्य निर्वक्तुमशक्यत्वात् । सत्त्वं हि सत्ताख्यसामान्यसमवायो वा, अर्थक्रियाकारित्वं वा प्रका-शमानत्वं वाऽभ्युपेयम् । तत्र नाद्यौ । सत्तायां सत्तासमवायाभावेन अर्थक्रियाकारित्वेऽर्थक्रियाकारित्वाभावेन च तयोरसत्त्वेन तद्योगिनो-ऽप्यसत्त्वासिद्धेः । सत्तान्तराद्युपगमेऽनवस्थापाताच्च । न तृतीयः । मरुमरीचिकादेरपि तोयाद्यात्मना सत्त्वापातात् । नच मरुमरीचिका-दीनां तोयाद्यात्मना असत्त्वेऽपि स्वरूपेण सत्त्वात् प्रकाशमानत्वं नानु-पपन्नमिति वाच्यम् । तथापि सत्त्वस्य प्रकाशमानत्वातिरिक्तधर्मान्तर-त्वेन प्रकाशमानत्वस्य तत्त्वाभावात् । अथ भावधर्म एव सत्त्वम् । अभावोऽपि भाव एव । भावान्तरमभावोऽन्यो न कश्चिदनिरूपणादि-ति भावस्यैव भावान्तरात्मनाऽभावरूपत्वादिति विभाव्यते । तदापि स भावधर्मः को वा । व्यवहारयोग्यत्वमिति चेत् । को नाम तत्र व्यवहारः । अभिलाप इति चेत् । नह्योग्यत्वस्य खपुष्पेऽपि तुल्यत्वा-त् । अतोऽभावस्य खपुष्पतुल्यत्वेनातीतानागतस्थलेऽर्थवियुक्तैव सं-वित् । एवमर्थसहभावानियमे सिद्धे यत्र सहभावाभिमानस्तत्राप्यर्थ-सत्ताया निर्वक्तुमशक्यत्वादर्थस्यानिर्वाच्यत्वमेव । तथैवात्मनो ह्या-

पक्वत्वेनाहम्प्रत्यये प्रादेशिकत्वस्थूलत्वकृशत्वादिना भासमानस्य चन्द्रसद्भावे चन्द्रान्तरवद् भानात् तस्याप्यनिर्वाच्यत्वम्। तत्र सतो बाधाभावादसतश्चाभानात् सत्त्वासत्त्वयोरेकत्र विरोधेन सदसद्रूपतया अशक्यवचनत्वात् सदसद्विलक्षणत्वमेव। तथाच सति विषयत्वेन भासमानानां मरुमरीचितोयतुल्यत्वात् संविदेव केवला सती सिद्ध्यतीति सैवात्मा। तस्या अविषयत्वेऽपि तत्रैव कर्तृत्वभोक्तृत्वाद्यध्यस्यन्ते। अप्रत्यक्ष आकाशे मालिन्यवदिति।

तदसङ्गतम्। विषयत्वेन जडत्वेन व्याप्तेः प्रत्यक्षबाधितत्वात्। आत्मनश्चेतनत्वस्योभयसंमतत्वात्, तस्य च प्रत्यग्वित्तिवेद्यत्वात्, प्रत्यग्वित्तिगोचरत्वेन विषयत्वस्य व्यापकतया जडत्वेन विषयत्वेन व्याप्तेरेव प्रत्यक्षसिद्धत्वाच्च। नच प्रत्यग्वित्तिश्चिदेकरसात्माग्राहकतया तदविषयत्वमेवेति वाच्यम्। तेन रूपेणाविषयत्वेऽपि प्रत्यक्त्वादिना रूपान्तरेण विषयत्वात्। अन्यथा विषयाभावेन तद्वित्तिलोपप्रसङ्गात्। सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यग्रसः प्रमाणैरेतैरवगत इति तापनीये प्रत्यक्त्वस्यापि तत्प्रमाणत्वेनैव श्रावणाच्च। नच तत्राहङ्कारस्यैव विषयत्वं, नात्मन इति वाच्यम्। स्याद्वादिमते आत्मन एव तथा भानात्। सांख्यादिमते च तस्य जडत्वेन तस्यां प्रतीतावहन्त्वचैतन्ययोः सामानाधिकरण्याभानप्रसङ्गात्। भासमाने च सामानाधिकरण्ये तस्याहङ्कारविषयताया निवृत्तत्वात् प्रत्यक्त्वेनेतराविषयतया पारिशेष्यादात्मविषयत्वस्यैव सिद्धेः। नचैवं सति तत्स्वरूपतयाऽप्यात्मभानप्रसङ्गः। साधनान्तरवैकल्येन तथाऽऽधारयितुमशक्यत्वात्। लोकेऽपि मणिपरीक्षादौ तथा निर्णयात्। अन्यथा सांख्यादिशास्त्रतो नित्याऽनित्यवस्तुविवेकस्याप्यसम्भवे त्वदभिमतविचाराधिकारस्यासम्भवापत्तेः। अतोऽनिच्छतापि प्रत्यग्वित्तिवेद्यत्वमात्मनोऽङ्गीकार्यम्। नचैवं परतःप्रकाशत्वेन जडत्वापत्तिः। इदानीं तथात्वेऽपि, अत्रायमात्मा स्वयंज्योतिर्भवतीति श्रुतेः स्वप्न एव तस्य स्वतःप्रकाशत्वेन जाग्रति तदभावेऽपि भस्मच्छन्नाग्निवददोषात्। जाग्रति तथाऽभ्युपगमस्योक्तश्रुतिविरुद्धत्वाच्छ्रौते मते चित्स्वरूपत्वे सति स्वयम्प्रकाशसंविदाश्रयत्वस्यैव चेतनत्वात् तेनैवार्थतौल्यस्य परिहारात् कर्मकर्तृविरोधस्यानुभवबलेनैव परिहृतत्वाच्च। एवमाश्रयाश्रयिभावेन सिद्धे

आत्मसंविदोर्भेदे विषयत्वेनार्थोऽपि भिन्न एव । नच सत्त्वस्यानिर्वाच्यत्वात् तयोर्मिथस्तयोरनिर्वाच्यत्वं शक्यम् । सत्त्वनिर्वचनस्य तथाव्याघातकत्वात् । अन्यथा संविदोऽप्यसत्त्वापातात् । प्रकाशस्वरूपत्वमेव सत्त्वमिति चेत् सिद्धमेव तर्हि तद्योगित्वादात्मनः सत्त्वम् । असत आश्रयत्वायोगात् । नच तत्प्रकाशस्वरूप एवात्मा, न तु तद्योगीति वक्तुं युक्तम् । प्रत्यक्षत्वस्य तथाभानात् । अहं जानामीति, ज्ञानवानहमित्येवमात्मधर्मत्वेनैव तस्य भानाच्च । एवं सिद्धे प्रकाशभिन्नस्यात्मनः सत्त्वे, सिद्धे चानारोपितरूपेण विषयत्वादर्थस्यापि सत्त्वम् । असतोऽविषयत्वात् । खपुष्पं पश्याम्यनुभवामि प्रत्येमीत्याद्यप्रत्ययाद् मरीचितोयादीनां चारोपितरूपेण विषयत्वात् । न चाभावे सत्ताव्यभिचारः । तस्यापि भावत्वात् । अननुभूयमानप्रतियोगिरूपेणैव तथाभावव्यवहारात् । अन्यथा निष्प्रतियोगिकत्वेनापि तस्य प्रत्ययापत्तेः । नचैवं संविदोऽर्थाविनाभावेऽर्थं विना संविदप्रकाशात् स्वतःप्रकाशत्वहानिः । दीपादेस्तेजोरूपत्वस्येव संविदः प्रकाशस्वरूपत्वस्यैव स्वतःप्रकाशपदार्थत्वात् । अत एवात्मनोऽपि तथात्वात् । नचात्मनो व्यापकत्वेन सर्वत्र सत्त्वात् तत्रारोप्यमाणस्य शरीरादेर्मरीचिकादावारोप्यमाणतोयादेरिव सत्त्वदेशस्याशक्यवचनत्वादसत्त्वमास्थाय प्रतीयमानत्वमात्रेण सदसद्विलक्षणत्वानिर्वाच्यत्वं चाश्रीयत इत्यपि साम्प्रतम् । वस्तुपरिच्छेदास्थातुर्मते तत्समवाय्यादीनां सत्त्वेन तेषामेव देशत्वसिद्धेः । तदनास्थातुर्मते च ब्रह्मकार्यत्वाद् ब्रह्मण एव तथात्वसिद्धेः । एवं सिद्धे देशे शरीरादीनां च सिद्धत्वे तेषामात्मन्यारोपोऽपि सुकरः । अन्यथा खपुष्पादेरिव दुष्करः स्यात् । अप्रत्यक्ष आकाशे मालिन्याध्यासवदप्रत्यक्ष आत्मनि शरीराध्यासोपपादनमप्यसङ्गतम् । बालानामवकाशरूपेण बुद्धानां वस्तुस्वभावेनैव चाकाशस्यापि प्रत्यक्षत्वात् । अतः कल्पनाया असङ्गतत्वात् तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति, भोक्ता भोग्यं प्रेरितारं च मत्वेत्यादिश्रुतिविरोधाच्च, न कर्तृत्वभोक्तृत्वादिरहित आत्मा । नच स वेदार्थः । ब्रह्मणो वेदार्थत्वात् । किन्तु स्वबुद्ध्या तथा कल्पित इति, न तदर्थे विचारः शक्यवचनः । तदिदमुक्तं, न हीत्यादि ।

अथ सत्यं ज्ञानमनन्तं ब्रह्म, अस्थूलमनण्वित्यादिश्रुतिभ्यो-

ब्रह्म पुनर्यादृशं वेदान्तेष्ववगतं तादृशमेव गन्तव्यम् ।

अणुमात्रान्यथाकल्पनेऽपि दोषः स्यात् । 'योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते । किं तेन न कृतं पापं चौरेणात्मापहारिणा ' नैषा तर्केण मतिरापनेया इति श्रुतेश्च ।

नच विरुद्धवाक्यानां श्रवणात् तन्निर्द्धारार्थं विचारः । उभयोरपि प्रामाणिकत्वेनैकतरनिर्द्धारस्याशक्यत्वात् । अचिन्त्याऽनन्तशक्तिमति सर्वभवनसमर्थे ब्रह्मणि विरोधाभावाच्च ।

ऽधिगत इति वदन्ति । तत्राह * ब्रह्मेत्यादि * यथा हीदमस्थूलत्वादिकं वेदान्तेषूच्यते, तथा सर्वकामः सर्वगन्धः सर्वरसः, विश्वतश्चक्षुरुत विश्वतोमुख इत्यादिकमप्युच्यत इति तादृशमपि मन्तव्यं न तु निर्विशेषमात्रम् । न च तत्र स्वरूपान्यथाकल्पनं युज्यते । प्रतिज्ञाहानिदोषात् । प्रतारकत्वापत्तेश्च । नच श्रोतुर्मन्दत्वे कश्चिदुपायो विधेय इति तदर्थं किञ्चित्कल्पनेऽप्यदोष इति वाच्यम् । तथा सति श्रुत्यभिप्रेतात्मस्वरूपाज्ञानेन श्रोतुर्योऽन्यथा सन्तमितिश्रुत्युक्तदोषापत्तेः । तथा वक्तुरपि, नैषा तर्केणेतिश्रौतनिषेधातिक्रमदोषापत्तेः । श्रुतिविरोधदोषापत्तेश्च । तदिदमुक्तम् * अणुमात्रान्यथेत्यादि * । ननु विरुद्धवाक्यश्रवणे श्रोता सन्दिग्ध । सन्देहे चावश्यमनिष्टम् । अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यतीतिस्मरणात् । यस्य स्यादद्धा न विचिकित्सास्तीतिश्रुतेश्च । अतस्तन्निवारणायार्थनिर्द्धार आवश्यकः । स च विचाराधीन इति तदर्थं स कार्य एवेत्यत आह * नचेत्यादि * विचारः कथं कार्यः ? किमेकतरबाधेन, किंवोभयसामञ्जस्येन । यद्याद्यः पक्षस्तदा तद्बाधनायाप्रामाणिकत्वं तस्य वक्तव्यम् । तथा सत्यन्यत्रापि तदापात इत्युपचारनिवृत्त्यर्थं यतमानस्याऽप्रामाणिकत्वापत्त्या वृश्चिकभिया पलायमानस्य विषमाशीविषमुखे निपातः । अथ द्वितीयस्तदा, परास्य शक्तिर्विविधैव श्रूयते, स हैतावानासेत्यादिश्रुतिभिर्ब्रह्मसामर्थ्येनैव विरोधस्य परिहारं विचारस्य वैफल्यमेवेति युक्त्या वेदार्थः सर्वथा न प्रतिपत्तुं शक्य

अत एवोपनिषत्सु तत्तदुपाख्याने बोधाभावे औपाधिकबोधे च तपस एवोपदेशः। नच तपःशब्देन विचारः। तस्य पूर्वानाधिक्यात् तप एव। नचोपाख्यानानां मिथ्यात्वम्। तथा सति सर्वत्रैव मिथ्यात्वं भवेद् विशेषाभावात्। न ह्यप्रामाणिकोक्ते विधौ वा उपाख्याने वा ब्रह्मस्वरूपे वा कस्य चिदपि विश्वासो यथा

इत्यतो वेदार्थज्ञानायोपायान्तरमेषणीयम्। तदपि श्रुतिविरुद्धम्। तत्र प्रमाणमाह। * अत एवेत्यादि * तैत्तिरीये भृगोर्बोधाऽभावे वरुणेन तपसा ब्रह्म विजिज्ञासस्वेति, छान्दोग्ये इन्द्रप्रजापतिसंवादे इन्द्रस्यौपाधिकबोधे प्रजापतिना, वस द्वात्रिंशतं वर्षाणि ब्रह्मचर्यमिति साधनान्तरस्य तपस एवोपदेशः कृत इत्यर्थः। ननु तप सन्ताप इतिवत्, तप आलोचन इत्यपि धातुरिति तन्निष्पन्नोऽयं शब्दो विचारार्थक एव मन्तव्यः। तथा सति श्रुत्यैव विचारस्य प्राप्तिरित्यत आह * नच तप इत्यादि *। * तप एवेति * तप एव तपःशब्देनोच्यते इत्यर्थः। अयं भावः। विचारो ह्येकतरबाधेन वा, ब्रह्मणः सामर्थ्यादिप्रदर्शनेन वा साधनीयः। न तु श्रोतरि तेन कोऽपि विशेषः सम्पाद्यः। तथा सति पठितवेदस्य साधनान्तरश्रवणं विनाऽपि विचारे वेदार्थः स्फुरेदेवेति पूर्वानाधिक्यादुपसदनवैयर्थ्यापत्तिः। गुरुवाक्योत्तरं विचार इत्यङ्गीकारे गुरोः खलत्वापत्तिः। उपसदनोत्तरमपि तस्यैवायोग्योपदेशेन दयाराहित्यप्राकट्यात्। तपसाऽङ्गीकारे तु तेन शिष्ये विशेषाधानादधिकारसम्पत्तौ साङ्गवेदवाक्येभ्य एव स्फूर्तिर्नच कोऽपि पूर्वोक्तदोष इति तपःशब्दो रूढ एवादरणीयः। तदेतदुक्तं, तप एवेति। अन्यथा छान्दोग्यविरोधस्यापरिहार इत्यपि बोधयितुं मात्रधारणमुक्तम्। ननु सत्यमुपनिषत्सु तप उपदिश्यते, तथाप्युपाख्यानेषु। न तु ज्ञानसाधनत्वेन क्वापि पृथग् विधीयते। उपाख्यानानि तु विद्यास्तुत्यर्थमसदपि बोधयन्तीति, न तदनुरोधे निर्बन्धः कार्य इत्यत आह * नचोपेत्यादि *। तथाच श्वेतकेतूपाख्यानस्थयुक्तीनां त्रिवृत्करणादीनां च मिथ्यात्वं स्यात्। तथाच सर्वो वेद एवोच्छिद्येतेत्यर्थः। तत्र हेतुमाह * न हीत्यादि *। सिद्धं यदन

लोके । तस्माद् वेदे अक्षरमात्रस्याप्यसत्यार्थज्ञानस्याभावाद् वैदिकानां न सन्देहोऽपि । किं पुनर्विरुद्धार्थकल्पना ।

विद्यासु च तदश्रुतेः । यदि वेदार्थज्ञाने विचारस्योपयोगः स्याद् अङ्गत्वेन व्याकरणस्येव विद्यासु श्रवणं स्यात् ।

स्वातन्त्र्ये च पुराणादेरिव मीमांसाया अपि प्रकारभेदेन प्रतिपादकत्वं स्यात् । तं त्वौपनिषदं पुरुषं पृच्छामीति तु तेषां निषेधः । अन्यथाज्ञानं नोपनिषदुक्तं फलं समर्पयति । तस्मा नारम्भणीय एव ब्रह्मविचारः ।

अनेन धर्मविचारोऽप्याक्षिप्त एव ।

स्वोक्ते प्रत्यक्षसंवादमप्याह * तस्मादित्यादि * । *वैदिकानामिति* प्राज्ञवैदिकानाम् ।

प्रकारान्तरेणापि विचारानर्थक्यमाह * विद्यास्वित्यादि * स्वोक्तं व्याचष्टे * यदीत्यादि * चरणव्यूहे, शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षडङ्गान्युक्त्वा, तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयत इत्येवोच्यते । तस्मात् साङ्गो वेदो ध्येयो ज्ञेयश्चेति विधावपि नाक्षेपो युक्त इत्यर्थः । एवं विधित्रयेऽपि विचाराक्षेपस्याशक्यवचनत्वाद् विधिप्रयुक्त्याऽऽरम्भणीयत्वं निवारितम् । ननु माऽस्त्वङ्गमध्यपातस्तथापि पुराणादिवत् स्वातन्त्र्येणैवारम्भणीयः । नचाऽप्रामाणिकत्वम् । प्रतिपदमनुपदं छन्दो भाषा धर्मो मीमांसा न्यायस्तर्क इत्युपाङ्गानीति तत्रैवोपाङ्गेषु पाठात्, स्मृतावपि 'पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ' इति विद्यासु गणनाच्चेति चेत्तत्राह *स्वातन्त्र्ये चेत्यादि* । * तस्मादिति * वेदार्थज्ञानार्थं ब्रह्मज्ञानार्थं वाऽनुपयोगात् ।

ननु मास्तु ब्रह्मविचारस्यारम्भणीयत्वं, धर्मविचारे तु दोषाभावात् तदारम्भे को दोष इत्यत आह * अनेनेत्यादि * स तृतीयमतप्यत, स एतं दीक्षितवादमपश्यदित्यादौ तपस एव कथनेनेत्यर्थः ।

न ह्येतन्निराकर्तुः सोऽयमतिभार इति पूर्वपक्षः ।

सिद्धान्तस्तु ।

सन्देहवारकं शास्त्रं बुद्धिदोषात् तदुद्भवः ।
विरुद्धशास्त्रसम्भेदादङ्गैश्चाशक्यनिश्चयः ॥
तस्मात् सूत्रानुसारेण कर्तव्यः सर्वनिर्णयः ।
अन्यथा भ्रश्यते स्वार्थान्मध्यमश्च तथाविमः ॥

परम्परया पाठवदर्थस्यापि गुरुमुखादेव श्रवणेऽपि मन्दमध्यमयोः सन्देहो भवेत् । समानधर्मदर्शनात् । पद्मादिपाठवत् । तत्र यथा लक्षणानामुपयोग एवमेव मीमांसाया अपि ।

नन्विदमपि शास्त्रम् ऋष्युक्तत्वात् प्रामाणिकमतः कथं निराक्रियत इत्यत आह * नहीत्यादि * गुरोर्मते एव निराकृते शिष्यस्य का वा गणनेत्यर्थः । एवञ्च यथा मीमांसाकरणात् पूर्वमङ्गैरेव सन्देहनिवृत्तिस्तथेदानीमपि भविष्यतीति व्यर्थं तत्करणमिति केवलवैदिककृतः पूर्वपक्षो निरूपितः ।

उत्तरं वक्तुं गृह्णन्ति * सिद्धान्त इत्यादि * । ननु शब्दस्य निःसन्दिग्धमर्थप्रतिपादकत्वात् सन्देह एव कथमित्यत आहुः * बुद्धीत्यादि * । तन्निवृत्तिर्व्याकरणादिभिरेव भविष्यतीत्यत आहुः * विरुद्धेति * । * सर्वनिर्णय इति * पूर्वोत्तरकाण्डार्थनिर्णयः । कथमिदमित्यपेक्षायां व्याचक्षते * परम्परयेत्यादि * । * समानधर्मदर्शनादिति * अर्थे समानधर्मदर्शनात् । यथा अक्ताः शर्करा उपदधातीत्यत्राञ्जनकरणत्व घृततैलवसादिषु समानम् । तथाच यथा संहिताध्ययनदशायां, देवाय ते यजमानाय शीकाय ते स्वाहेत्यादौ सन्देहाभावेऽपि पदपाठकाले, देवय ते शीकय त इति ह्रस्वश्रुत्या सन्देहे, अथादावुत्तरे त्रिमात्रं ह्रस्वव्यञ्जनपर इत्यधिकारस्थस्य, देवाशीकेत्यादेः । अपुश्च मे मिथुश्चरन्तं सुश्चन्द्रदस्म इत्यादेः पदपाठे, अपु च मिथु चरन्तं, सुचन्द्रेति पाठात् सन्देहे, अपुमिथुपूर्वः शकारश्चपरः, सुपूर्वश्चन्द्रपर इति । उत स्वानासो दिवि षन्तु, आपो हिष्ठा म योभुव

तदुक्तम् ।

असन्दिग्धेऽपि वेदार्थे स्थूणाखननवन्मनः ।
मीमांसानिर्णयः प्राज्ञे दुर्बुद्धेस्तु नतो द्रढयमिति ॥

तथाच निर्णये येन केन चिद्वक्तव्ये हरिः स्वयं व्यासो विचारं चिकीर्षुस्तत्कर्तव्यतां बोधयति । ब्रह्मजिज्ञासा कर्तव्ये-

---

इत्यादेः पदपाठे, उत स्वानाग्नः, दिवि सन्तु, आपः हि स्थ इति पाठात् सन्देहे, स्वानासोऽदिव्यापोहीत्यादिसूत्रस्योपयोग इति लक्षणानां प्रातिशाख्यसूत्राणां सन्देहनिवृत्तावुपयोगः । तथाऽर्थश्रवणेऽपि वाजिभ्यो वाजिनामस्त्यत्र किमामिक्षाऽन्नवन्तो विश्वेदेवा वाजिनामानोऽन्ये वा वाजिनयागदेवताः । गायत्र्यां सविता, सूर्यो वा परब्रह्म वा । आकाशादेव समुत्पद्यन्त इत्यत्र भूताकाशो वा ब्रह्म वेति सन्देहः समानधर्मदर्शनान्मन्दादीनां भवेदिति तन्निवृत्त्यर्थं मीमांसाद्वयस्याप्युपयोग इति ज्ञानविधावुपाङ्गभूतयोस्तयोरप्याक्षेपो युक्त एवेत्यर्थः ।

अस्मिन्नर्थे प्राचां संमतिमाहुः * तदुक्तमित्यादि * । * द्रढयमिति * सन्देहाभावो दार्ढ्यं चेत्यर्थः । एतेन शास्त्रप्रयोजनमारम्भसमर्थनायोक्तम् । विचारकर्तव्यतासमर्थनेनोपोद्घातरूपा अधिकरणसङ्गतिरपि बोधिता । अतः परं प्रयोजनवत्त्वेऽपीदं शास्त्रं कया सङ्गत्या आगतम् । श्रुतौ च तपस उपदेशात् तदेव च कुतो नोक्तमित्याकाङ्क्षायां शास्त्रसङ्गतिं वदन्त एव सूत्राक्षराणि व्याकुर्वन्तः प्रथमतो वाक्यार्थमाहुः *तथाचेत्यादि* । उक्तरीत्या वेदार्थनिर्णयस्यावश्यकत्वात् तन्निर्णये येन केन चिद्वक्तव्ये ,यदा कालवशात् तप आदीनामसम्भवं व्यञ्जनया तेषामसाधकत्वं च दृष्टवांस्तदा जगद्दुःखदूरीकरणार्थं हरिः स्वयं व्यासरूपेणावतीर्य वेदव्यासादिकार्यं कृत्वा सर्ववेदार्थनिर्णयार्थं ब्रह्मविचारं चिकीर्षुस्तत्कर्तव्यतां बोधयति । ब्रह्मजिज्ञासा कर्तव्येति । धर्मादिवद् व्यासोक्तत्वादपि कर्तव्यता । अत इदानीं तपो न वेदार्थज्ञानसाधनं, किन्त्विदमेव साधनम् । किञ्च

ति । व्यासोक्तत्वादपि कर्तव्यता । कर्तव्यपदाध्याहारे स्वातन्त्र्यं न भवति । अन्यथा, अथ योगानुशासनमितिवत् स्वतन्त्रता स्यात् । तथाच ज्ञानानुपयोगः । तथाहि । तं त्वौपनिषदं पुरुषं पृच्छामीति केवलोपनिषद्वेद्यं ब्रह्म, न शास्त्रान्तरवेद्यम् । तद् यदि मीमांसा स्वतन्त्रा स्यात् तज्जनितं ज्ञानं न ब्रह्मज्ञानं भवेत् ।

अथवा, अध्याहारकरणापेक्षयाऽथशब्द एवाधिकारे व्याख्येयः । वेदाध्ययनानन्तर्यं तु सिद्धमेव । न ह्यनधीत एव वि-

---

तापसानाम् ऋषीणामपि स्वभावभेदाल्लोकानां सन्देहं यदा दृष्टवाँस्तदा करुणया कृतवानिति तदुक्तरीत्या प्रयतने प्रसादोऽपि भविष्यति, तेन वेदार्थबोधश्चेति नास्य गतार्थत्वम् । कृपैव च सङ्गतिरित्यर्थः । ननु सूत्रे कर्तव्यपदाभावादध्याहारस्य च दोषत्वात् किमित्येवं व्याख्यायत इत्याकाङ्क्षायामाहुः * कर्तव्यपदेत्यादि * * भवेदित्यन्तम् * अत उक्तदोषनिवृत्त्यर्थमध्याहृत्य व्याख्यायत इत्यर्थः । अत्र सर्वसंमतत्वादेवमध्याहारपक्ष उक्तो भाष्यार्थश्च ।

अतः परं पदानामर्थं वदिष्यन्तः पूर्वोक्तः पक्षो वक्ष्यमाणदोषग्रामात्र साधुरित्याशयेन पक्षान्तरमाहुः । * अथवेत्यादि * । अधिकारो नाम नियमविशेष इति केचित् । यथा, आकडारादेका संज्ञेति । प्रारम्भ इत्यन्ये । यथा, अथ योगानुशासनमिति । प्राधान्येन निरूपणमित्यपरे । प्रस्ताव इति कैयटे, अथ शब्दानुशासनमित्यत्र व्याख्यातः । नत्रेदंतानियमस्य पूर्वप्रक्रमसापेक्षत्वात् पूर्वं च कस्याप्यप्रकृतत्वात् सोऽत्र न युज्यते । अतः प्रारम्भादेः प्रस्तावाव्यतिरेकात् प्रस्ताव व्याख्येयः । तथाच ब्रह्मजिज्ञासारूपं शास्त्रमधिक्रियते प्रस्तूयत इति व्याख्याने कल्पनागौरवादिदं तदपेक्षयाऽज्याय इत्यर्थः । नन्वधिकारार्थत्वे आदृते कर्तव्यपदाध्याहाराभावेन ब्रह्मजिज्ञासाया विध्यनाभिमतत्वाद् वैदिकाधिकारिणोऽप्राप्तेः शूद्रादिरनधीतवेदोऽपि ब्रह्मजिज्ञासायामधिकुर्यादिति कथं ज्याय इत्यत आहुः । * वेदेत्यादि * । अधीतवेदवाक्यानामेव विचारदर्शनादेव विचारकस्येदानीन्तनस्यापि वेदाध्ययनानन्तर्यं स्वभावादेव सिद्धमिति न वैदिकाधिका-

चारमर्हति । तत्रैतत् स्यात् स्वतन्त्रेति । तत्र प्रतिविधास्यामः। वेदार्थब्रह्मणो वेदानुकूलविचार इति । किमत्र युक्तम् । व्याख्यानमिति । व्याख्यानतो विशेषप्रतिपत्तेः । यथा कर्मणि दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामः । अथातो दर्शपूर्णमासौ व्याख्यास्याम इति ।

रिणोऽप्रमितिरित्यतो व्याय इत्यर्थः । ननु तर्ह्यथशब्दनाक्षिप्ततया पुराणादिवत् स्वातन्त्र्य तु सिद्धम्। तथा सति पूर्वोक्तो ज्ञानानुपयोगरूपो दोषस्तु स्यादित्याकाङ्क्षायां, तत्रैतत् स्यादित्यादिनाऽनूद्य प्रतिविधानप्रकारमाहुः । * तत्रेत्यादि * । अनुपदमेव वक्ष्याम इत्यर्थः । ननु प्रक्षालनपङ्कन्यायेनैतदपेक्षया तदादरणमेव युक्तमित्यत आहुः । * वेदार्थेत्यादि * । वेदार्थभूतं यद्ब्रह्म तत्सम्बन्धी सपरिकरतज्ज्ञापका वेदानुकूलो वदवाक्यानां विरोधपरिहारादिना तेषूपचारादिद्योतनपरका विचारो मीमांसारूपं इति हेतोः। अत्र हि सर्ववेदार्थत्वेन ब्रह्म जिज्ञास्यम् । अन्यथा वेदवेदान्तयोरैकशास्त्र्य न स्यात् । तदभावे च जैमिन्याद्युक्तादिशा मुमुक्षुप्रवृत्तिप्रतिघाते शास्त्रवैयर्थ्यमापद्येत । विचारस्य च यदि वेदानुकूलत्व न स्यात् तदाप्यास्तिका न प्रवर्तेरन् । अत आवश्यकत्वात् स्वातन्त्र्येऽपि विरोधाभावाद्वेदानुकूलत्वेन तज्ज्ञानज्ञानस्य ब्रह्मज्ञानरूपत्वात् प्रतिविधानमेव युक्तमित्यर्थः । अथ प्रकारो भाष्यानामपि सम्मतस्तद्बाधकस्कान्दवचनोपन्यासादवगन्तव्यः । अध्याहारपक्षेऽप्येवं वक्तु शक्यत्वात् न ज्यायांस मन्यमानोऽनुयुङ्क्ते । * किमत्र युक्तमिति * स्वतन्त्रताप्रतिविधानस्यात्राप्यपक्षितत्वेन प्रतिपत्तिगौरवदोषस्यात्रापि सत्त्वादध्याहारकरणाथशब्दव्याख्यानपक्षयोर्मध्ये किं युक्त, तद्वक्तव्यमित्यर्थः । तत्रोत्तरमाहुः । *व्याख्यानमिति* । अथशब्दव्याख्यानपक्ष एव युक्त इत्यर्थः । तत्र हेतुमाहुः ।*व्याख्यानत इत्यादि* । ननु कात्र विशेषप्रतिपत्तिरित्यत आहुः । * यथेत्यादि * तथा च यथा कल्पसूत्रेण प्रयोगप्रकारादिबोधनात् तत्पदार्थसन्देहनिवृत्तिस्तथानया मीमांसया ब्रह्मणीति तत्र यथाऽथिकारोऽथशब्दस्तथात्रापीति

अथैवं तर्हीमानि सिद्ध्यन्ति प्रयोजनानि । अधिकाकाङ्क्षा न भवेत् । अध्याहारश्च । पुरुषार्थश्च सिद्ध्येत् । उच्छेदश्च न भवेदिति । कथम् । अथशब्दोऽर्थचतुष्टये वर्तते । मङ्गले, अधिकारे, आनन्तर्ये, अर्थान्तरोपक्रमे च । तत्र श्रुतिमात्रेणैव मङ्गलसिद्धेरर्थान्तरस्य पूर्वोक्तस्याभावान्नात्र तत्कल्पनम् । अथावशिष्यते आनन्तर्ये वाऽधिकारे वेति । आनन्तर्ये त्वध्ययनस्य स्वतःसिद्धत्वादधिकाकाङ्क्षा भवति । तथा तदभावान्न विचारः सिद्ध्येत् ।

फलासूक्तसौख्यरूपविशेषस्य प्रतिपत्तिरित्यर्थः ।

नन्वध्याहारपक्षेऽपीदं सुवचमतः सर्वसंमतत्वादध्याहारपक्ष एव युक्तो, नाऽथशब्दस्याधिकारव्याख्यानपक्ष इत्यत आहुः * अथैवमित्यादि * । *एतर्हीति* व्याख्यानपक्षे । अत्र चोदयति *कथमिति* । उक्तं विभजते * अथेत्यादि * । तत्र मङ्गले, 'ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा । कण्ठं भित्त्वा विनिष्क्रान्तौ तेन माङ्गलिकावुभाविति' । अधिकारे यथा, अथैष ज्योतिरिति वेदे । अथ योगानुशासनमित्यादि च लोके । आनन्तर्ये यथा, भुक्त्वा अथ व्रजतीति । अर्थान्तरोपक्रमे यथा पूर्वं किञ्चिदुक्त्वा पुनर्विकल्पान्तरे क्रियमाण उच्यते, अथायमपर इति । यद्यपि कोशे, 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथेति । अथाथो संशये स्यातामधिकारे च मङ्गले । विकल्पानन्तरप्रश्नकार्त्स्न्यारम्भसमुच्चये' इत्यर्थान्तरमप्युक्तम् । गौडो मतान् अथैनं ब्रूम इति प्रतिज्ञायामपि दृश्यते । तथापि प्रश्नकस्य सन्देहस्य कस्याप्यनुक्तत्वेन, अथ शक्तोऽसि भोक्तुमित्यादिवत् प्रश्नसंशयरूपशङ्कावाक्याभावेन च प्रश्नसंशययोर्वक्तुमशक्यत्वात् स्वसमाप्तस्य स्वसंनिकृष्टस्याभावेन असंशयस्य, अविज्ञानं विजानतामिति-श्रुतेः कृत्स्नस्य ब्रह्मणो विचारयितुमशक्यत्वेन कार्त्स्न्यस्य च प्रकृतविरुद्धत्वाद् विकल्पस्य पक्षान्तरासम्बन्धेनारम्भस्योपक्रमात्मकत्वेन चार्थान्तरोपक्रमानतिरेकात् समुच्चयनियमङ्गाधिकारयोरप्ययोगान्तर-

सापेक्षत्वेन विकल्पानुपपत्तेश्च नाधिकारिविशेषणत्वमित्याशयः। नन्वेवं कर्मज्ञानयोः समुच्चय इति चेत् —

सापेक्षत्वेन विकल्पतुल्यकक्षत्वादुपयुक्तविचारफलकार्त्स्न्यप्रतिज्ञयोरपि प्रसंगाव्यतिरेकादथशब्दोऽर्थचतुष्टये सम्भावितो वर्तते। तत्रान्यार्थकृतस्य पटहमृदङ्गादिध्वनेरिवाथशब्दस्यापि श्रवणमात्रेण मङ्गलसिद्धेः स्मृतिव्याकोपपरिहारात् तस्याः स्वरूपश्रवणमात्रकार्यत्वेन मङ्गलस्यार्थान्तरबोधनाप्रतिरोधकत्वाच्च न तन्मात्रफलत्वं युक्तम्। पूर्वं कस्याप्यर्थस्यानुक्तत्वादर्थान्तरोपक्रमस्यापि फलत्वं न युक्तम्। यत् पुनरानन्तर्यप्रस्तावरूपमर्थद्वयमवशिष्यते, तत्रानन्तर्यं यस्य कस्य चिदानन्तर्यं तु स्वभावादेव प्राप्तमिति, न तस्य वक्तव्यम्। यदि च शाबरभाष्योक्तमध्ययनानन्तर्यमङ्गीक्रियते, तर्ह्यनधीतवेदो विचारेऽधिकरोतीति। तदा तस्य विचारार्थकजिज्ञासापदेनैवार्थात् सिद्धेरथशब्दोक्तानन्तर्यप्रतियोगिनोऽधिकाकाङ्क्षा भवति, अध्ययनातिरिक्तात् कस्मादनन्तरं ब्रह्म विचारयितव्यमिति। तस्यां च सत्यामध्ययनातिरिक्तस्य कस्यापि तन्मतेऽदर्शनाच्च प्रकृतविचारसिद्धिरित्यर्थः। ननु संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति वदद्भिः प्राचीनवृत्तिकारैर्द्वयोर्मीमांसयोरैकशास्त्र्यमङ्गीकृतम्। ततश्चाग्नेयादिषट्कभेदवदध्यायभेदवच्चावान्तरप्रमेयभेदेन भेदेऽपि प्रयोजनैक्याद्, अथाऽतो धर्मजिज्ञासेत्यारभ्य, अनावृत्तिः शब्दादित्यन्तमेकं शास्त्रमतः कर्मविचारानन्तर्यमस्त्वेति रामानुजाचार्याः।

आराधनाराध्यभूतयोर्धर्मब्रह्मणोः प्रतिपादकत्वेनैकशास्त्र्यम्। अथाऽतो ब्रह्मजिज्ञासेति पृथगारम्भस्त्वथातः शेषलक्षणमित्यादिवदवान्तरपरिच्छेदार्थ इति तदेकदेशी नव्यः शैवः।

पूर्वं धर्मजिज्ञासा कार्या, पुरुषमात्रविषयत्वात्। ब्रह्मज्ञानं तु कस्य चिदेव मुमुक्षोरिति धर्मविचारानन्तरं चतुर्णां प्रतिपन्नाश्रमान्तराणां सा। सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदिति सूत्रयतः सूत्रकारस्यापि ज्ञानकर्मसमुच्चयादेव मोक्षप्राप्तिरभिप्रेतेति ज्ञायते। अपरिज्ञाते च कर्मणि केन समुच्चयः, केन नेति न ज्ञातुं शक्यम्। ज्ञाते तु तस्मिन् नित्यकाम्यनिषिद्धानां हेयोपादेयविभागविज्ञानात् काम्यनिषिद्धे हेये, नित्येन समुच्चय इति सुखेन ज्ञातुं शक्यते। किञ्च। तृतीये, कर्मसमृद्ध्यर्थानामुद्गीथाद्युपासनानां चिन्तनात् तेषां च कर्माङ्गाश्रितपुरुषमात्रविषयत्वात् कर्माविज्ञानेन तच्चिन्ताया

४

तथा हि, न तावद्धर्मविचारानन्तर्यम् । विपर्ययसम्भवात् ।

अप्यनुपपत्तिरतोऽपि तदानन्तर्यमिति भट्टभास्कराचार्याः ।

किञ्च, तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण इति श्रुतौ तर्कोपकरणेन शब्देन परमात्मानं सम्यग् ज्ञात्वा प्रज्ञाख्यभावनाविधानात्, पतञ्जलिनाऽपि, स तु दीर्घकालादरनैरन्तर्यसत्काराऽऽसेवितो दृढभूमिरिति सूत्रयता दीर्घकालासेवितस्याव्यवधानासेवितस्य ब्रह्मचर्यतपःश्रद्धायज्ञादिरूपसत्कारासेवितस्य योगस्य दृढभूमित्वकथनाच्च क्रियमाणाया भावनाख्योपासनाया दृढत्वाय यज्ञोपयोगः कैश्चिदिष्यते ।

तत्तत्फलार्थं विहितानामपि कर्मणां, तमेतं वेदानुवचनेनेत्यादिश्रुत्या, एकस्य तूभयत्वे संयोगपृथक्त्वमितिन्यायेन क्रत्वर्थत्वादिरूपस्य वीर्यवत्त्ववद् ब्रह्मभावनार्थत्वं कैश्चिदिष्यते ।

तथापरैः श्रेयःपरिपन्थिकल्मषनिबर्हणद्वारा यज्ञोपयोग इष्यते ।

अन्यैः पुनर्महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः, यस्यैतेऽष्टाचत्वारिंशत् संस्कारा इति स्मृत्या यज्ञादिसंस्कृतस्य पुरुषस्य दीर्घकालादरनैरन्तर्यैर्ब्रह्मभावनामासेवमानस्य समूलकाषमविद्यावासनानिवृत्त्या प्रत्यगात्मवैशद्यात् पुरुषसंस्कारद्वारा यज्ञोपयोग इष्यते।

अपरैस्त्वृणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेद् इति स्मृत्या ऋणत्रयापाकरणेन कर्मणां ब्रह्मज्ञानोपयोग इष्यते इति नाना मतानि वाचस्पत्ये लिखितानि । अतः कर्मज्ञानसमुच्चयस्य बहुवादिसम्मतत्वात् पूर्वोक्तरीत्या धर्मविचारेणाधिकाकाङ्क्षापूरणसम्भवात् तदनन्तरं सुखेन ब्रह्मविचारसिद्धिरित्याकाङ्क्षायामाहुः । * तथा हि, नेत्यादि * । तदुक्तरीत्या समुच्चयाङ्गीकारेऽपि धर्मविचारानन्तर्यं नोपपद्यते । कुतः *विपर्ययसम्भवात्* हृदयस्याग्रेऽवद्यति अथ जिह्वाया अथ वक्षस इति वद् वेदवेदान्ताध्ययनक्रमनियामकप्रमाणाभावात् । न च पाठक्रमात् क्रमनियमः शङ्क्यः । आघारदर्शपूर्णमासवत् कर्मब्रह्मविचारयोरेकाङ्गिप्रयुक्ताङ्गत्वेन वा, पञ्चप्रयाजवदेकाङ्गिप्रयुक्तानेकाङ्गत्वेन वा, गोदोहनादिवदधिकृताधिकारत्वेन वा, तज्ज्यागवत् फलैक्येन वा कर्मैक्यं येन बोध्येत तादृशप्रमाणस्याप्यनुपल-

नच पाठतो नियमः । तत्रापि तथा ।
नचाऽऽचाराद् व्यवस्था । तत्राप्यनियमसम्भवात् । प्रत्यः

क्षात् । ननु, विद्यां चाविद्यां च यस्तद्वेदोभयं सह, सत्येन लभ्यस्तपसा ह्येष आत्मेत्यादिश्रुतिरेव क्रमे प्रमाणमिति वाच्यम् । समुच्चयमात्रबोधनेन चारितार्थ्यात् । किञ्च । धर्मो न यथाकथञ्चिज्ज्ञातो विधया समुच्चेयोऽपि तु निर्णीतस्वरूपः । निर्णयस्तु यथा कर्मस्वरूपविषयकः पूर्वतन्त्रात् तथा कर्मशेषभूतपुरुषस्वरूपविषयकस्तदाराध्यभूतब्रह्मस्वरूपविषयकश्चोत्तरतन्त्रात् । अतोऽभ्यर्हितत्वात् पूर्वं वेदान्तविचारेण तदवगन्तव्यम् । नानावादैरात्मस्वरूपे च विमतिपन्ने वैदिकानां वेदवाक्यैरेव तन्निरासस्यावश्यकत्वात् । ज्ञाते तयोः स्वरूपे कर्मणि सुखेन प्रवृत्तिसम्भवादिति । नचाध्ययनादिविधेः कर्मावबोधनसमर्थेषु पुरुषेषु चरितार्थत्वेन, शान्तो दान्त इत्यादिश्रुत्युक्तसाधनान्तरसापेक्षब्रह्मज्ञानोपायभूतशमाद्याक्षेपासामर्थ्यात् पूर्वं धर्मविचारस्यैव प्राप्तिरिति वाच्यम् । शान्तो दान्त इति श्रुतौ पश्येदिति पदाच्छमादीनां दर्शनसाधनत्वेन विचारे तदपेक्षाभावात् । प्रह्लादनारदादिवदाबाल्यान्मुमुक्षाशमादिमत्सु तद्प्रवृत्तौ तेषां विचारमात्रप्रसक्तेर्यथाकथञ्चित् प्रवृत्तौ वाऽभ्यर्हितस्यैव प्राप्त्या नियमभङ्गाच्च । तदेतदुक्तम् ।

नन्नु पूर्वं धर्मकाण्डं पठ्यते, अनन्तरं ज्ञानकाण्डमिति पाठस्य क्रमनियामकत्वमस्त्विति चेत् तत्राहुः * नचेत्यादि * पाठक्रमे विद्यमानेऽपि पूर्वकाण्डं न सर्वैरादित आरभ्य पठ्यते । अपि तु यतः कुतश्चित् । अतोऽध्यान्तरकाण्डक्रमानियमवज्ज्ञानकाण्डक्रमानियमस्यापि शक्यवचनत्वात् तत्रापि तथेत्यर्थः । ननु पाठः शिष्टाचारादनियतोऽस्तु, न तु विचारोऽपीत्यत आहुः * नचाचारेत्यादि * प्रत्ययाध्यवसायस्योभयत्र तौल्यात् तथेत्यर्थः । ननु धर्मस्य ब्रह्मबोधहेतुत्वात् तद्विचारोपयुक्तानां श्रुतिलिङ्गादीनां वेदचोदनार्थवादस्मृत्याः

---

१ कठोऽहिरितिरेश पपुद विप्रलम । कविर्होऽकोऽप दुमितभमस ररंभजन ।

मनसा तज्जननेऽपि तथा। तस्मात् प्रथमं शाब्दमेव ज्ञानमिति मन्तव्यम्। अनुभवसिद्धत्वात्। इदानीन्तनानामपि शमादिरहितानां निर्विचिकित्सितवेदार्थज्ञानोपलब्धेः। संन्यासानुपपत्तिश्च।

किञ्च। अध्याहारश्च कर्तव्यः। स च कर्तव्यादिपदानाम्। यदि तत् स्वार्थं, व्यर्थमेव वाक्यं स्यात्। परार्थत्वे त्वशक्यम्। न हि तैर्विचारः कर्तुं शक्यते। स्वकृतिवैयर्थ्यं च। असङ्गतिश्चास्य सूत्रस्य भवेत्।

हुः। * मनसेत्यादि * वाक्यसहकृतमनसा। यदि सर्वेषां साक्षात्कारस्तदा मननादिविधिवैयर्थ्यम्। यदि कस्य चित् तदा यस्य न साक्षात्कारस्तस्य वेदान्तार्थनिर्द्धारे तत्र विचारफलत्वेन वाच्यस्तथा सत्युक्तरीत्या वैराग्यादिसम्पादकत्वेन तस्य प्रागेवापेक्षितत्वात् पूर्वोक्तोऽन्योन्याश्रयादिदोषतादवस्थ्यमित्यर्थः। सिद्धमाहुः। * तस्मादित्यादि *। * मन्तव्यमिति * सर्वेषां भवतीति मन्तव्यम्। अनुभवसिद्धत्वं विशदयन्ति * इदानीमित्यादि * तथाच पूर्वोक्तं दूषणं दुरुद्धरमित्यर्थः। उक्तदार्ढ्याय दूषणान्तरमाहुः * सन्न्यासेत्यादि * गृहाद्वा प्रव्रजेद् वनाद्वा प्रव्रजेदिति श्रुतौ तत्तदाश्रमानन्तर्यकथनाद् दृढं वैराग्यं संन्यासाङ्गमिति ज्ञायते। श्रुत्यन्तरे च वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद् यतयः शुद्धसत्त्वा इति वेदान्तार्थनिश्चयानन्तरं सन्न्यासस्योक्तत्वात् तदङ्गभूतवैराग्यस्य वेदान्तार्थनिश्चयोत्तरत्वमेवायाति। ततः पूर्वभावित्वं च विचारस्येति तत्तदर्थं दृढवैराग्याभावात् संन्यासानुपपत्तिः। तथाचानन्तर्यपक्षे तन्निरूपकस्य वक्तुमशक्यत्वात् किमनन्तरमित्याकाङ्क्षायाः कथमपि न पूरणमित्यर्थः।

द्वितीयं दूषणं विवृण्वन्ति * किञ्चेत्यादि *। * तदिति * विचारकरणम्। तथाच स्वयमेव मनसि विचार्यमिति स्वार्थत्वे शास्त्रानर्थक्यमित्यर्थः। * अशक्यमिति * अशक्योपदेशरूपम्। तथाच फलाऽभावाद् वैयर्थ्यमित्यर्थः। * असङ्गतिरिति * परैः कर्तव्यमितिप्र-

किञ्चाधिकारपक्षे पुरुषार्थः सिद्ध्यति, नानन्तर्यपक्षे। उक्तन्यायात्।

किञ्च, तादृशस्याधिकारिणः श्रवणमात्रेण कृतार्थस्य समाधिनिरतस्य मननासम्भवाच्छास्त्रोच्छेदः। शास्त्रविरोधश्च। साधनानामग्रे स्वयमेव वक्तव्यत्वात्। अतोऽनेकदोषदुष्टत्वादधिकारार्थ एव श्रेयान्।

न च ज्ञातुमिच्छा जिज्ञासा नाधिकर्तुं शक्येति वाच्यम्। जिज्ञासापदस्य विचारार्थत्वात्।

तिज्ञाया अग्रिमसूत्रीयस्वयंकृतिविरुद्धत्वादसङ्गतिरित्यर्थः।

तृतीयं विवृण्वन्ति * किञ्चाधिकारेत्यादि *। * उक्तन्यायादिति * तदसम्भवापत्तेरित्यनेनोक्तान्न्यायात्। विचारव्यतिरेकेण ब्रह्मणः परमपुरुषार्थत्वज्ञानाद्यभावात् तदभावे चित्तशुद्ध्याद्यभावेन विचाराभावात् तथेत्यर्थः।

चतुर्थं विवृण्वन्ति * किञ्च, तादृशस्येत्यादि *। * तादृशस्येति * साधनचतुष्टयसम्पन्नस्य। *साधनानामिति* वैराग्यादिसाधनानाम्। * अग्रे इति * तृतीयाध्याये। तथाचानन्तर्यनिरूपकतया पूर्वसिद्धानां पुनः कथनानर्हत्वात्, कथनेन च पूर्वं तदभावनिश्चयात् सिद्धत्वाङ्गीकारे व्याख्येयशास्त्रविरोध इत्यर्थः। एतेन यन्माध्वैर्जातिकृतं गुणकृतं च ब्रह्मविद्यायामधिकारत्रैविध्यमङ्गीकृत्य तदानन्तर्यमथशब्दार्थो, न स्वध्ययनमात्रानन्तर्यमिति साधनाध्यायानुसारेणाङ्गीक्रियते, तदपि प्रत्युक्तम्। विचारब्रह्मविद्ययोरैक्याभावात्। अतो न तदुपन्यस्तश्रुतिस्मृतीनामपि विरोधः।

एवमथशब्दार्थं निर्णीय जिज्ञासाशब्दार्थं निश्चेतुमधिकारार्थविरुद्धं मतान्तरीयं तदर्थमनूद्य परिहरन्ति * न चेत्यादि *। * ज्ञातुमिच्छा जिज्ञासेति * 'धातोः कर्मण' इति धातुवाच्यस्यार्थस्येप्सितत्वस्मरणाज्ज्ञानप्रधानमेयमिच्छां वक्तुमशक्येत्यर्थः। * विचारार्थत्वादिति * जिज्ञासितं सुसम्पन्नमपि ते महदद्भुतमिति,

क्षत्वात् स्वदेहमपि पश्यन् दशमोऽहमिति मन्यते । न तथा प्रकृते । मनननिदिध्यासनविधीनामानर्थक्यप्रसङ्गात् ।

नचाधिकारिभेदः कल्पनीयः । शब्दज्ञाने तत्कल्पनायां प्रमाणाऽभावात् ।

आत्मसाक्षात्कारः कस्योपपाद्यते । किं देहविशिष्टात्मवेदिनो वा, देहात्मवेदिनो वा । तादृशस्यापि चक्षुष्मतोऽन्धस्य वा विविक्तात्मवेदिनो वा । तत्र नाद्यः । श्यामसुन्दरादिषु परेण बोध्यमानस्य दशमत्वस्य बाह्यत्वेन तद्विशिष्टस्य बाह्यस्यैव देहादेस्तथात्वसिद्धोक्तरीत्या तस्य ज्ञानस्यात्मविषयकत्वाभावात् । अत एव न द्वितीयः । अन्धस्यैतदज्ञानात् । तस्य प्रज्ञाचक्षुष्ट्वेन तथा ज्ञायमानस्यापि चाक्षुषफलत्वाच्च । न तृतीयः । तस्यात्मविस्मृत्यभावेन तत्र शब्दस्याऽकारणत्वात् । न च पूर्वविकल्पोक्तानामात्मनिष्ठमान्तरमेव दशमत्वं शब्दाद् भासत इति वाच्यम् । दशमत्वस्य वक्रेक्षाबुद्धिजन्यत्वेन तस्यां च बुद्धौ सङ्ख्याघटकानां परात्मनां भानाभावेन स्वस्यापि दशमत्वाभानप्रसङ्गात् । अतो नवमत्वादिवद् दशमत्वस्यापि बाह्यत्वमेव । कृशोऽहमितिवद् दशमोऽहमितिप्रत्ययस्यापि देहस्यैव विषयत्वाच्च । प्रकृते विचारे तु वेदान्तवाक्यैर्ब्रह्मत्वेनात्मसाक्षात्कारस्य तदभिप्रेतत्वेन तथा धर्मधर्मिणोरुभयोरप्यान्तरत्वान्न दृष्टान्तसाम्यम् । न हि समीपवर्तिभिरिन्द्रियैरग्राह्य आत्मा तद्बाह्येन बाह्येन शब्दप्रमाणेन साक्षात्कर्तुं शक्यते । अथ दर्शनाव्यवधानेन श्रवणस्य विचारोपकारकत्वमित्युच्यते तदा मनननिदिध्यासनविधिवैयर्थ्यम् । तथाच दृष्टान्तवैषम्यान्मनननिदिध्यासनविधिविरोधाच्चात्मसाक्षात्कारस्य न श्रवणफलत्वं विचारफलत्वं वा वक्तुं शक्यमित्यर्थः । ननु मुख्याधिकारिणः शब्दादपरोक्षं भवति, न तु मन्दादेरिति तादृशेषु मननाद्युपयोगान्न तद्विध्यानर्थक्यमिति चेत्तत्राहुः * नचेत्यादि * शब्दजन्ये ज्ञानेऽधिकारिभेदस्तदा कल्प्यो यदि स विधिविषयः स्यात् । न तु तथा । मन्दस्य पदशक्त्यादिज्ञानशून्य-

---

१ [illegible] ।

अत्यन्तासत्यप्यर्थे शब्दस्य ज्ञानजननात् प्रमाणसङ्करापत्तिश्च ।

तथा मननासामर्थ्येन, मध्यमस्य च विदितपदपदार्थसंसर्गतया-ऽऽकाङ्क्षादिमत्त्वेन दशमादिवदपरोक्षभवनसौकर्येण मननाद्यनुपयोगेन ताभ्यां तदसमाधानात् तत्कल्पनायां श्रुतार्थापत्तिरूपप्रमाणाभावादित्यर्थः । ननु विदितपदपदार्थसंसर्गस्यापि वाक्यतात्पर्याज्ञाने दशमादिवाक्यादप्यपरोक्षादर्शनान्मननादिना तज्ज्ञाने तद्दर्शनात् तात्पर्यज्ञानशून्येनाधिकारिणा तत्समाधातुं शक्यत एवेति कथं प्रमाणाभाव इत्यत आहुः * अत्यन्तेत्यादि * शब्दस्येतिषष्ठ्या करणत्वं द्योत्यते । तथाच खपुष्पं सुरभीत्युक्तेऽत्यन्तासतोऽपि ज्ञानं जायते । एवं गुर्वादिनोक्तवेदान्तवाक्ये अगोचरस्याप्यात्मनस्त्वदभिमतं ज्ञानं भविष्यतीत्युक्तविधिवैयर्थ्यं दुर्वारमतः प्रमाणाभाव इत्यर्थः । ननु विधिबलादेव ज्ञायते सर्वेषां न भवतीत्यतो न तदभाव इत्यत आहुः * प्रमाणेत्यादि * सङ्करो मर्यादाभङ्गेन जायमानं कार्यम् । यथा वर्णसङ्कर इति । तथाच तत्र यथा न वर्णस्यमेवमत्रापि दशमस्त्वमसीतिवाक्यस्य युष्मत्पदस्मारितपदार्थोल्लङ्घनेनासत्पदार्थविषयकज्ञानजनने तस्य ज्ञानस्य प्रमाणत्वं न स्यादिति तादृशज्ञानोपपादनप्रयासवैफल्यम् । किञ्चैवं भग्नायां प्रमाणमर्यादायां तं घटमानयेत्यत्रापि वाक्यार्थज्ञानं प्रत्यक्षं स्यात् । आत्मन इव घटस्यापि पूर्वमनुभूतत्वात् । चीत्कारेण गजानुमितिरपि न स्यात् । यद्वा, प्रमाणे ज्ञानेऽनुव्यवसीयमानयोः प्रत्यक्षत्वपरोक्षत्वजातिव्याघातकसङ्करापत्तिः स्यात् । नचेष्टापत्तिः । व्यवहारे भट्टनयमुपगच्छतस्तथा वक्तुमयुक्तत्वात् । भारत आजगरेऽपि, 'जातिरत्र महासर्प मनुष्यत्वे महामते । सङ्करात् सर्ववर्णानां दुष्परीक्ष्येति मे मतिरिति' युधिष्ठिरेण च ज्ञानत्वजातिबाधकतया सङ्करस्योपगतत्वाच्च । अतोऽनेकदूषणग्रासादधिकारिभेदवादापरोक्षयोः कल्पनमेवायुक्तमित्यर्थः । ननु मास्तु शब्दादपरोक्षं, तथाऽपि दशमस्त्वमसीतिवाक्यमदत्तचक्षुषा दशमोऽहमितिमननेनैवानुद्रष्टव्य इति श्रुतेस्तत्त्वमस्यादिवाक्यसहकृतमनसैव विविक्तात्मसाक्षात्कारो भावीत्यधिकारिभेदो नायुक्त इति चेत्तत्रा-

अत एव जिज्ञासितुमिच्छेदिति पुराविदां वचनानि । जिज्ञासापदेन चैतज्ज्ञापयति । ब्रह्मज्ञानं पुरुषार्थसाधनत्वादिष्टम् । तदिच्छापूरणाय विचार आरभ्यत इति । यस्मात् कर्मादिभ्यो ज्ञानमेव पुरुषार्थसाधनमिष्यतस्तज्ज्ञानाय विचारोऽधिक्रियत इति

जिज्ञासितमधीतं च यत्तद् ब्रह्म सनातनमिति, अजिज्ञासितमाङ्क्षर्मो गुरुं मुनिमुपाव्रजेदिति, जिज्ञासायां सम्प्रवृत्तो नाद्रियेत् कर्मचोदनामित्यादिषु जिज्ञासितजिज्ञासापदयोरिष्टेच्छावाचकत्वं वाक्यार्थेऽन्वयेन तत्र विचारार्थकत्वनिश्चयेन नयात्वात् । तथाचैवंविधासवाक्यग्राह्यतां रूढिमनादृत्य वृथा यौगिकादरणमप्रयोजकमित्यर्थः । अत्र शाबरभाष्यसम्मतिमाहुः * अत एवेत्यादि * । ननु विचारं प्रारम्भणीये, अथातो ब्रह्मविचार इत्येव कुतो नोक्तमित्याशङ्क्याहुः * जिज्ञासापदेनेत्यादि * । भृगुप्रपाठके, अधीहि भगवो ब्रह्मेतिश्रुतेर्ब्रह्मज्ञानेच्छयोपसन्नाय भृगवे, यतो वा इमानीति ब्रह्मलक्षणकथनपूर्वकं तद्विजिज्ञासस्वेतिपदेन तदिच्छापूरणाय विचारोपदेशादिहापि तथैव विचार आरभ्यत इति ज्ञापयतीत्यर्थः । नचात्र तपोऽनुपदेशाच्छ्रुतिविरोधः शङ्क्यः । तपस इदानीमसाधनतायाः प्रागुपपादितत्वात् । नच विचारस्याश्रौतत्वं शङ्क्यम् । लक्षणवस्तुपर्यालस्य प्रागुपपादितत्वात् । नच मन्तव्यादिप्रत्यक्षविधिमूलकत्वं परित्यज्य किमिति ज्ञानविध्याक्षिप्तमङ्गीक्रियत इति वाच्यम् । तथा सति तत्रात्मादिपदात् तावन्मात्रत्वेनैव विचारार्थत्वापत्त्याऽग्रिमसूत्राणां विरोधापत्तेः । तस्मादेतावदेवात्रार्थत्वेन ग्राह्यमित्येव युक्तम् । एवं जिज्ञासाशब्दार्थं निश्चित्य सिद्धान्तरीत्या सिद्धं वाक्यार्थं वदन्तोऽतःशब्दार्थमाहुः * यस्मादित्यादि * । अत्र केचन, क्षेमः सुभिक्षोऽयं देशोऽतोऽहमस्मिन् वसामीत्यादौ इयंकस्य गम्यमानस्य वा वृत्तस्य हेतुभावे अतःशब्दप्रयोगदर्शनात् प्रकृते च कर्मज्ञाने पूर्वं वृत्तमिति तस्य हेतुत्वमतःशब्दोऽत्रोपदिशतीत्याहुः । अयं तु बृहदारण्यकीयसमाप्तब्राह्मणस्यायाम्, अथातो व्रतमीमांसेत्यादिश्रुतौ, 'अथाऽतो गोभिलोक्तानामन्येषां चैव 'कर्मणाम् ।

अतःशब्दार्थः ।

अधिकारी तु वैराग्यिक एव । न हि वेदविचारस्य वेदाधिकार्यतिरिक्तः शक्यते कल्पयितुम् । न हि मन्दमतेर्वेदो ना-

---

अस्वप्नानां त्रिधिं सम्यग् दर्शयिष्ये प्रदीपवद्' इति कात्यायनादिस्मृतौ चातःशब्दस्य पूर्वावधौ प्रयोगदर्शनादत्राप्यतःशब्देन पूर्वावधिरेवोच्यते । तथाच, अतः—अस्मात्सूत्रादारभ्येत्यर्थमाहुः । तत्र पूर्वस्मिन् मते देशदृष्टान्ताद्धर्मज्ञानस्य न तेन रूपेण हेतुत्वं, किन्तु वृत्तत्वेन च चयम् । तत्त्वानन्तर्यपक्षदूषणादेवापास्तम् । धर्मज्ञानत्वेन हेतुत्वं तु प्रत्यक्षबाधितम् । द्वितीये तु, स्मृतौ कर्मणामस्पष्टत्वेन विशदीकृतत्वात् तदेवातःशब्देन गोचरीक्रियते, न तु पूर्वावधिरनुक्तासङ्गत्वात् । एवं श्रुतावपि पूर्वं, त एते सर्व एव समाः सर्वेऽनन्ता इत्यनेन ब्राह्मणानां वाङ्मनःप्राणानां साम्यबोधनाद्रूपास्यकेन कस्य कार्यं ब्रह्मत्वेन धार्यमित्यपेक्षायां यस्य यदनुत्कृष्टं तन्निध्यायनार्थं ब्रह्ममीमांसायाः प्रवर्तितत्वेन तदुत्कर्षज्ञापनमेव हेतुतयाभिप्रेयते, न तु पूर्वावधिरिति बोध्यम् । तेन मतद्वयमप्ययुक्तमिति ज्ञापनायोक्तमिति । *अतःशब्दार्थ इति * तथाच धर्मो यशःप्रदः सुखदश्चातः करोमीत्यादाविदेऽप्यतःपदप्रयोगदर्शनात्तदयमेवार्थो न त्वन्यविध इत्यर्थः । नन्वस्य प्रथमसूत्रत्वादत्र प्रेक्षावत्प्रवृत्तिसिद्ध्यर्थमधिकारिविषयसम्बन्धप्रयोजनानि वाच्यानि । तत्रानन्तर्यपक्षे विचारितधर्मो वा शमादिमान् वाधिकारी प्राप्यते । अधिकारपक्षे तु तदप्राप्त्या शास्त्रस्यानर्थक्यप्रसङ्गः, सर्वाधिकारकत्वं वा स्यादित्याशङ्कायामाहुः । * अधिकारी त्वित्यादि * तथाच ब्रह्मणो वेदार्थत्वात् तद्विचारेऽधिकृते ब्रह्मजिज्ञासापदादेव तत्प्राप्तेर्न पूर्वोक्तो दोष इत्यर्थः । नन्वेवं त्रैवर्णिकाधिकारोपगमे तेषां सर्वेषामधिकारस्याप्त्या, शान्तो दान्त इति श्रुतिविरोधात् तत्सङ्कोचः आवश्यक इति शमाद्यानन्तर्यपक्ष एव श्रेयानित्यत आहुः * नहि मन्देत्यादि * तथाच तत्र यथा मतिमत्त्वस्यार्थात् प्राप्तिस्तथाप्युपयुक्तस्य विशेषणस्य प्राप्तिरिति सङ्कोचस्यानावश्यकत्वादधिकारो न दुष्यतीत्यर्थः । ननु यद्येवं स्याच्छ्रुतिः

यातीति त्रैवर्णिके मतिमत्त्वमधिकारिविशेषणं कल्प्यते । अन्ध-पङ्ग्वादीनामिव कर्मणि गृहाद्यासक्तस्य मननाद्यसम्भवात् साक्षात्कारो न भविष्यति ।

नच धर्मन्यायेन गतार्थत्वमस्य । अप्रतिज्ञानादनुपलब्धेश्च । न च जगत्कारणं परमात्मा वा प्रकृतिर्वा परमाणवो वेति सन्देहे किञ्चिदधिकरणमस्ति ।

स्यादेतत् । अथातो धर्मजिज्ञासेति धर्मविचारं प्रतिज्ञाय नोदकवाक्यार्थस्य धर्मत्वमुक्त्वा प्रामाण्यपुरःसरं सर्वे सन्देहा निवारिताः । तत्र ब्रह्मज्ञानस्यापि धर्मत्वम् । आत्मेत्येवोपासीत,

---

किमिति यदेदित्याकाङ्क्षायामाहु । * अन्धेत्यादि * तथाच तेषां यथाऽऽज्यावेक्षणविष्णुक्रमप्रक्रमणादिकरणाशक्त्या तत्फलकर्मणो व्यङ्गत्वात् फलाजनकत्वं, तथैतदीयशाब्दज्ञानस्यापि व्यङ्गत्वात् साक्षात्काराजनकत्वमिति बोधयितुं फलोपकाराय यदति, आत्मन्येवात्मा न पश्येदिति । अतो विचार स्वरूपोपकारार्थं शमाद्यनङ्गीकारेऽपि न श्रुतिविरोध इत्यर्थः । ननु यदि त्रैवर्णिकाधिकारेणार्थादध्ययनानन्तर्यसिद्ध्या तदर्थं वेदार्थभूतब्रह्मविचारः प्रतिज्ञात इत्यायाति तदा शास्त्रवैयर्थ्यापत्तिः । धर्मजिज्ञासात्वत्र धर्मशब्दस्य वेदार्थमात्रोपलक्षकतया पूर्वतन्त्रन्यायेनैव वेदार्थज्ञानसिद्धेरित्यत आहुः * नचेत्यादि * । * धर्मन्यायेनेति * पूर्वमीमांसया । *अप्रतिज्ञानादिति* जैमिनिना ब्रह्मविचारस्याप्रतिज्ञानात् । अनुपलब्धेरित्यस्यैव विवरणम्, * न च जगदित्यादि *

एवमानन्तर्यपक्षे निरस्ते पूर्वमीमांसकोऽस्य त्रैवर्णिकाधिकारपक्षं सर्ववेदार्थज्ञानार्थत्वं च श्रुत्वा प्रत्यवतिष्ठते * स्यादेतदित्यादि * यदि त्रैवर्णिक एवाधीतवेदोऽधिकारी, यदि च सर्ववेदार्थ एव ज्ञातुमिष्टस्तदा धर्मत्वमात्रमेवाङ्गीकार्यमित्यर्थः । * प्रामाण्यपुरःसरमिति * औत्पत्तिकसूत्रे शब्दस्यान्यानपेक्षप्रामाण्यव्यवस्थापनपूर्वकम् । * सर्वं इति * शब्दस्वरूपविषयकास्तदर्थविषयका-

आत्मानं श्लोकमुपासीत, तद् ब्रह्मेत्युपासीत, आत्मा वारे द्रष्टव्य इत्यादिनोदनावाक्यार्थत्वात् । अयं हि परमो धर्मो यद्योगेनात्मदर्शनमिति स्मृतेश्च । सृष्ट्यादिवाक्यानां त्वर्थवादत्वम् । आरोपापवादविषयधर्मप्रतिपादकत्वेन विधेयोपासनाविषयस्तावकत्वात् ।

नच ज्ञानादीनामविधेयत्वं, प्रमाणवस्तुपरतन्त्रत्वेनाऽकृतिसाध्यत्वादिति वाच्यम् । न हि सर्वात्मना असाध्यम् । प्रकारभेदस्त्वप्रयोजकः । सर्वस्यापि कारणेषु पुरुषव्यापृतिः । तदत्र

श्च । ननूक्तं, जगत्कारणविचारो न कृत इति तन्निश्चायनार्थत्वान्न गतार्थत्वमिति तत्राह * सृष्ट्यादीत्यादि * तथाच पूर्वमीमांसकानां मते प्रवाहनित्यतोपगमेन जगतः स्वातन्त्र्यात् कर्तुरभावेनोपासनाविषयस्यात्मनः प्रशंसार्थं क्वचित् कर्तृत्वमारोप्यते । अन्यत्र च तदपोद्यते । क्वचित् सर्वकामत्वादिकं प्रतिपाद्यते । अन्यत्रापोद्यते । यदि तद्वास्तवं स्यान्नापोद्येतेति तर्केणारोपापवादविषयो यः कर्तृत्वादिधर्मस्तत्प्रतिपादकत्वेन तेषां विधेयस्तावकत्वनिश्चयात् सिद्धेऽर्थवादत्वे तेषां स्वार्थे तात्पर्याभावेन ब्रह्मणि विरुद्धधर्माधारत्वादिकल्पनस्याप्रयोजकत्वात् तदर्थत्वेऽपि गतार्थत्वमित्यर्थः । ननूपासनावाक्यशेषाणामस्त्वर्थवादत्वं, न तु ज्ञानवाक्यशेषाणामपि । ज्ञानस्य प्रमाणवस्तुभ्यां जायमानत्वेन तदर्थं कृत्यपेक्षाभावेन तस्य विध्यर्थत्वाभावात्, कृतिसाध्यत्वस्यैव विध्यर्थत्वात् । नच तद्व्यभिचारः आवश्यकार्थेऽपि जायमानत्वात् । अतस्तच्छेषाणां स्तावकत्वाभावेन तद्विचारस्यावश्यकत्वान्नास्या गतार्थत्वमिति शमाद्यानन्तर्यवादिनः शङ्कायामाह * नचेत्यादि * आदिपदेनेच्छाप्रयत्नौ । तेन तदन्वेष्टव्यम्, तद्विजिज्ञासितव्यम्, मन्तव्यो निदिध्यासितव्य इत्यादीनां सङ्ग्रहः । तद् दूषयति *नहीत्यादि* सन्निकर्षादिजनककृत्यपेक्षायास्तत्रापि सत्त्वात् तथेत्यर्थः । ननु तथापि कर्मवत् साक्षात्कृतिसाध्यत्वाभावात् कथं ज्ञानादीनां विधेयत्वमित्यत आह * प्रकारेत्यादि * ज्ञानादेरविधेयत्वसाधनायैवं प्रकारभेदो यः कल्प्यते स

तृप्तिसम्पादने प्रमाणसम्पादने वा पुरुषकृतिसाध्यत्वम् ।

अन्यथा सिद्धान्तेऽपि मननादिशास्त्रवैफल्यापत्तेः । साधनप्रतिपादकश्रुतिविरोधश्च । येनापि सर्वक्रियाफलत्वं निराकार्यं, तेनापि गुरूपसत्त्यादिना यतितव्यमेव ज्ञानार्थं । तस्माद् यत्रापि विध्यश्रवणं, तत्रापि विधिं परिकल्प्य तत्रस्थानां तच्छेषत्वं कल्प्यमिति, नार्थोऽनया मीमांसया । अन्यथा विरोधोऽपि ।

स्यादेतत् । ब्रह्मविचार एवारम्भणीयो, न धर्मविचारः । सर्ववेदव्यासकर्त्रा वेदव्यासेनाकृतत्वात् तुच्छफलत्वाच्च । कल्पोक्तप्रकारेण निःसन्दिग्धं करणसम्भवाच्च । आचारपरम्परयापि करणसम्भवाच्च । एतर्ह्यपि सन्देहे सूत्रभाष्यवार्त्तिका-

---

स्याविधेयताप्रयोजको न भवति । यतो धर्मस्यापूर्वात्मकत्वेन तस्य सर्वस्यापि कारणीभूते क्रियाकलाप एव यत्नात्मा पुरुषव्यापारो दृश्यते, न तु साक्षात् । तत्तस्मादत्र ज्ञानादौ तृप्तिसम्पादने बुद्धिजन्यायाः पदार्थान्तररूपाया बुद्ध्यवस्थाविशेषरूपाया वा तस्या उत्पादने प्रमाणसम्पादने वा, आवृत्तचक्षुरमृतत्वमिच्छन्निति, अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणेत्यादिश्रुतेस्तादृशचक्षुरादिसम्पादने वा तथात्वमिति, न ज्ञानादेरविधेयत्वमिति तस्योऽपि विधावित्यर्थः । अविधेयत्वोपगमे दूषणमप्याह * अन्यथेत्यादि * । साधनप्रतिपादकश्रुतयस्तु, तपसा ब्रह्म विजिज्ञासस्व, वसाऽपराणि पञ्च वर्षाणि शान्तो दान्त इत्याद्याः । * तत्रस्थानामिति * वाक्यानां ब्रह्मादिपदानां चेत्यर्थः । * अन्यथेत्यादि * विध्यकल्पने ऐकार्थ्याऽभावेन वाक्यभेदापत्तावैकशास्त्र्यविरोधः । अपिशब्दात् कर्मप्रतिपादनविच्छिन्नत्वाविरोधं, वेदोऽखिलो धर्ममूलमित्यादिस्मृतिविरोधश्च संगृह्यते । अत्रैकदेशी वितण्डया प्रत्याह * स्यादेतत् । ब्रह्मेत्यादि * । * सर्ववेदेत्यादि * तथाच जैमिनिस्तच्छिष्यः सामगो, न सर्वज्ञ इति तदुक्तं न प्रमाणमित्यर्थः । उपासनायामप्यनुपयोगमाह * आचारेत्यादि * सूत्रभाष्येति * कल्पसूत्रभाष्येत्यर्थः । * पूर्वयापी-

-नामेवानुवृत्तिः क्रियते, न मीमांसकस्य । तस्मात् साङ्गवेदाध्येतुर्निःसन्देहकरणसम्भवान्न पूर्वयाऽपि कृत्यम् ।

किञ्च परमकृपालुर्वेदः संसारिणः संसारान्मोचयितुं कर्माणि चित्तशुद्ध्यर्थं बोधितवानिति कूपेऽन्धपातनवदप्रामाणिकत्वमभिधातव्यं मीयते । विपरीतबोधिका तु पूर्वमीमांसा तस्मादपि न कर्तव्येति ।

मैवम् । किं विचारमात्रं न कर्तव्यं, पूर्वकाण्डविचारो वा । नाद्यः । तुल्यत्वात् समर्थितत्वाच्च ।

द्वितीये सामान्यन्यायेन सन्देहे निवार्ये लक्षणवत्तदुपयोगः । अनिष्टनया निरूपणं न मीमांसादोष । किन्तु विचारकाणां स्वभावभेदात् ।

किञ्च । आवश्यकत्वादपि । निवृत्तानामपि यागादिज्ञान-

त्वपिशब्दः पूर्वपक्षिगर्हार्थः । शेषमतिरोहितार्थम् ।

एवं केवलवैदिकरीत्या विचारद्वय आक्षिप्ते पूर्ववादी समाधत्ते । * मैवमित्यादि * । पूर्वयापि न कृत्यमिति न वक्तव्यम् । कुत इत्याकाङ्क्षायामपिशब्दस्य समुच्चायकत्वं मन्वानः पक्षद्वयं विकल्प्य प्रथममुभयनिषेधाभाव हेतुमाह * तुल्यत्वादिति * यत्रोभयोः समो दोष इति न्यायेन परिहारसाम्यात् तथापीष्टसिद्धेरभावेन दूषणसाम्याद्वा, अर्थाज्ञानादिरूपादिभिस्त्वया समर्थितत्वाच्चेत्यर्थः । * सामान्यन्यायेन सन्देह इति * अक्ताः शर्करा उपदधाति, निर्मन्थ्येनेष्टका पचन्तीत्यादौ घृततैलवसानां चिरनिर्मथिताऽचिरनिर्मथितप्रभृतीनां चाञ्जनपाककरणयोग्यतादेः सामान्येन जाते सन्देहे । ननु तुच्छफलत्वान्नोपयोग इत्युक्तं, तत्राह * अनिष्टनयेत्यादि * । * स्वभावभेदादिति * तेषां प्रकृतिवैचित्र्यादित्येकादशस्कन्धीयवाक्योक्तरीतिकात् तस्मात् । अनुपयोगिरूपं दूषणमुत्तरमीमांसायां हृदि कृत्वाह * किञ्चेत्यादि * । आवश्यकं विवृणोति * निवृत्तेत्यादि * तथाच त्रैवर्णिकाधिकारपक्षे शास्त्रवैयर्थ्यं-

स्यावश्यकत्वम् । चित्तशुद्ध्यर्थत्वात् । परमाश्रयभेदेन प्रकारभेदः कायिकादिभेदात् । तत्राद्यस्य वाचिको द्वितीयतृतीययोः कायिकश्चतुर्थस्य मानसिक इत्याश्रमिणाम् । तस्मादेकेनैव चरितार्थत्वात् किं द्वितीयेनेति प्राप्ते ।

उच्यते । उपासनाया धर्मत्वेऽपि न ब्रह्मणो धर्मत्वम् । ज्ञानरूपत्वात् । धर्मस्य च क्रियारूपत्वात् ।

स्यापरिहार्यत्वात् तद्विहाय पूर्वतन्त्रमेवादरणीयमित्यर्थः ।

अत्र समादधते * उच्यते * उपासनाया इत्यादि * त्रैवर्णिकाधिकारपक्षे स्यातां ब्रह्ममीमांसाया गतार्थत्वानुपयोगौ यद्युत्तरकाण्डस्य मुख्यतयोपासनारूपधर्मप्रतिपादकत्वं स्यात् । तदेव तु न । किन्तु ब्रह्मप्रतिपादकत्वं, ब्रह्मण एव सर्ववेदार्थत्वात् । सर्वे वेदा यत्पदमामनन्ति, वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे, मां विधत्तेऽभिधत्ते मामित्यादिवाक्येभ्यः । किं बहुना, धर्मोऽपि ब्रह्मात्मकत्वेनैव प्रतिपाद्यः । धर्मो यस्यां मदात्मक इति वाक्यात् । जैमिनिस्तु पुरःस्फूर्तिकमेवोवाचेति न दोषः । ब्रह्म च न शारीरमात्रं, येन सृष्ट्यादिवाक्येषु वाच्यो धेनुरथवत् तस्मिन् जगत्कर्तृत्वादीनामसम्भवतां धर्माणामारोपपक्षादादिभिर्विधेयोपासनाविषयस्तावकतयोपासनाशेषता सम्भवन्ती गतार्थत्वानुपयोगौ दृढीकुर्यात् । किञ्चोपासनाविषय आत्मनि निरङ्कुशजगत्कर्तृत्वादयो ये धर्माः स्तुत्यर्थमारोप्यन्ते, ते किमत्यन्तासन्तः खपुष्पवद् उत क्वचित् सन्तो रजतवत् । तत्राद्ये आरोप एव बाधितः । द्वितीये तु सिद्धमतिरिक्तेन ब्रह्मणा । तच्च पूर्वकाण्डे परोक्षवादत्वान्न स्फुटं प्रतिपादितमिति तत्प्रतिपादकमुत्तरकाण्डं न धर्मप्रतिपादकम् । अत उपासनाया धर्मत्वेऽपि नोत्तरमीमांसागतार्थत्वमित्यर्थः । नन्वस्त्वेवं, तथापि सृष्ट्यादिवाक्यानां विधिमन्त्रादिरूपत्वाभावादर्थवादत्वमेव वक्तव्यम् । ततश्च ब्रह्मस्तावकत्वात् तेषां न स्वार्थे प्रामाण्यमिति तद्विचारशास्त्रस्यानुपयोग इत्य

नचार्थवादानां धर्म इव ब्रह्मण्युपयोगः कर्तुं शक्यः । उत्पत्त्यंप्रकारफलभेदानामभावात् । प्रकृते तु माहात्म्यज्ञानार्थं तदुपयोगः । तस्य च ज्ञानोपयोगो यथा तथा वक्ष्यते चतुर्थे । उपासनादर्शनादिपदानां मनोव्यापारत्वमेव ।

विचारस्यापि यथा ज्ञानोपयोगित्वं, तथाग्रे वक्ष्यते ।

त आहुः । * नचेत्यादि * । स्यात् स्वार्थे अप्रामाण्यं, यदि कर्मणीव ब्रह्मण्युपयुज्येरन् । कर्माणि हि त्रेधा तेषामुपयोगः । यथा, असावादित्यो न व्यरोचतेत्यादीनां सौर्याद्युत्पत्तौ । यथाग्ना पत्नीं सोमेन आनादित्यत्र । अष्टाक्षरा गायत्रीत्यस्याग्नेयपुरोडाशेऽष्टाकपालत्वरूपे प्रकारे । यथा च, वायुर्वै क्षेपिष्ठेत्यादीनां भूत्यादिरूपे फले । न तथा ब्रह्मणि । नित्यत्वात् सदेकरसत्वात् स्वस्यैव फलत्वाच्च । अस्ति तु माहात्म्यज्ञानार्थमुपयोगः । माहात्म्यं च सदेव ज्ञानं फलाय, न त्वसत् । असत्त्वे तदधिष्ठानस्यासमर्थनायां ततः फलाभावप्रसङ्गात् । तदाहुः * तस्य चेत्यादि * माहात्म्यज्ञानेन भक्तिद्वारा साक्षात्कारोपयोग इति फलाध्याये प्रथमपादे, आदित्यादिमतय इतिसूत्रे वक्ष्यत इत्यर्थः । नन्वस्तु ब्रह्मणि माहात्म्यज्ञानार्थं सृष्ट्यादिवाक्योपयोगस्तथापि तेषां विध्युपयोगोऽवश्यं वक्तव्यः । नो चेदुपासनादिविधीनां प्ररोचनाभावेन व्यापारशैथिल्ये साफल्यवैयर्थ्यापत्तेः । एवं सिद्धे तेषां विधिशेषत्वे तेषु निरूप्यमाणं ब्रह्मापि तच्छेषमेवेत्युत्तरकाण्डस्य न तत्प्रतिपादकत्वम् । ततश्च सिद्धाद्युत्तरमीमांसाया गतार्थत्वानुपयोगावित्याकाङ्क्षायामाहुः * उपासनेत्यादि * । अस्त्वेवम् । तथापि विधेयानामुपासनाज्ञानादीनां मनोव्यापाररूपतया सविषयत्वेन विषयाधीनत्वात् नोद्देश्यस्य ब्रह्मणो न मुख्यत्वं हीयते । अहीयमाने च तस्मिन्निह प्रमाणगोचरस्य तस्य तत्तात्पर्यकोत्तरकाण्डविचारस्यावश्यकत्वात् तन्मीमांसाया गतार्थत्वानुपयोगावित्यर्थः । ननु तथापि ब्रह्मण आसंसारं प्रसिद्धानुभवत्वात् तज्ज्ञाने विचारस्यानुपयोगाद् वैयर्थ्यमस्य शास्त्रस्यानिवार्यमित्यत आहुः * विचारस्येत्यादि * । * अग्रे वक्ष्यत इति * तृतीयस्य द्वितीयपादे, उभयव्यपदेशाद्यधिकरणेषु वक्ष्यते ।

किञ्चौपनिषद्ज्ञानस्यापि कर्माङ्गयोगित्वम् । यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यवत्तरं भवतीति । अत एव ब्रह्मविदामेव जनकादीनां कर्मणि सर्वदेवसान्निध्यम् । अन्यथा आभासत्वमेव । नच ब्रह्मरूपात्मविज्ञाने देहाद्यध्यासाभावेन कर्तृत्वाभावात् कर्मानधिकार इति वाच्यम् । निरध्यस्तैरेव देहादिभिः कर्मकरणसम्भवात् । अत एव जीवन्मुक्तानां सर्वे व्यापाराः । तथाच स्मृतिः । 'नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् । पश्यञ्छृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् प्रलपन् विसृजन् गृह्णन्नुन्मिषन्निमिषन्नपि इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् । ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसा' इति । अतो ब्रह्मविदामेव कृतं कर्म शुभफलं भवति । अतो धर्मविचारकारणमपि ब्रह्म जिज्ञास्यमेव । तस्मान्न गतार्थत्वानुपयोगौ ।

ननु फलेप्सुरधिकारी । फलं च विचारस्य शाब्दं ज्ञानं, तस्य मननादिद्वाराऽनुभवः, तस्य चानर्थनिवृत्तिपूर्वकपरमानन्दावाप्तिः । तथाच विरक्तोऽनर्थजिहासुः परमेप्सुश्चाधिकारी कस्मान्न भवति । 'शब्दब्रह्मणि निष्णातो न निष्णायात् परे

उपासनाद्यर्थमेव न ब्रह्म जिज्ञास्यं, किन्तु पूर्वकाण्डोक्तेऽपि कर्मणि मुख्यफलार्थं तदवश्यं जिज्ञास्यमिति, नास्य गतार्थत्वानुपयोगावित्याहुः * किञ्चौपनिषदेत्यादि * निगदव्याख्यातमेतत् । तथाच त्रैवर्णिकाधिकारपक्षो दोषरहित इत्यर्थः ।

एवं त्रैवर्णिकाधिकारपक्षे स्थिरीकृते आनन्तर्यवादी पुनः शङ्कते । नन्वित्यादि । सिद्धान्ते ज्ञानविधिनार्थज्ञानप्राप्तस्तत्र कैमर्थ्याकाङ्क्षायामुक्तपद्धत्या, ब्रह्मविदाप्नोति परमिति श्रुत्युक्तपरप्राप्तिरूपफलार्थमिति वक्तव्यम् । अन्यथा प्रवृत्तिविघातापत्तेः । तत्कथनेन च सिद्धमस्मदुक्तेनाधिकारिणा । तदेतदुक्तं * कस्मान्न भवतीति *

यदि । 'श्रमस्तस्य फलं मन्ये ह्यधेनुमिव रक्षत' इति भगवद्वचनात् केवलस्य निन्दाश्रवणादिति चेत् । न । फलकामनाया अनुपयोगात् । अन्येनैव तत्समर्पणात् । नित्यत्वादर्थज्ञानस्य न फलेप्सुरधिकारी । निन्दार्थवादस्तु मननादिविधिशेष इति मन्तव्यम् ।

ननु ब्रह्मणो विचारे प्रतिज्ञाते विरोधनिराकरणादीनामप-

अथ वक्तव्यं, सूत्रे ब्रह्मजिज्ञासापदात् तज्ज्ञानस्यैव फलत्वं लभ्यत इति प्रणाडीसिद्धफलपर्यन्तता किमर्थमङ्गीकार्येति । तथा सति श्रीभागवतोक्तकेवलार्थविन्निन्दाशास्त्रविरोधापत्तिः । अतस्तदभावायोक्तफलपर्यन्तताऽवश्यमभ्युपेया । ततश्च मिदमुक्तनाधिकारिणेत्यनङ्गीक्रियमाणेऽपि वैराग्याद्यानन्तर्यपक्षेऽधिकारित्वलाद्यापतित इत्यर्थः ।

अत्र समादधते *नेत्यादि* विचाराधिकारत्वेन फलकामना तदीययुक्त्येन, यदि ब्रह्मजिज्ञासापदात् प्राप्येत । तत्तु न । अनन्यलभ्यस्य शब्दार्थत्वात् । अतस्त्रैवर्णिकोऽर्थजिज्ञासुरेवाधिकारी । फलकामना तु, ब्रह्मविदाप्नोति परमित्यादिवाक्यार्थे ज्ञात उत्पद्यत इति तेन समर्पिता । फलं चार्थज्ञानस्य नैकम् । भागवत्यां विद्यायामन्यत्र च, य एवं वेद प्रतितिष्ठतीत्यादिफलान्तराणामपि श्रावणात् । ततश्च भवदभिमताधिकार्यङ्गीकारेऽन्येषामनधिकारेण विचारे प्रवृत्तौ विहितायां तच्छास्त्रमेव व्यर्थं स्यात् । अतस्तदभावायार्थजिज्ञासोरेवाधिकारित्वं वक्तव्यम् । अर्थज्ञानं च नित्यम् । स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थमित्यादिष्वनर्थज्ञनिन्दाश्रवणात् । अतोऽर्थज्ञानस्य नित्यत्वं ज्ञात्वा यो जिज्ञासति स एव मुख्योऽधिकारी । न च निन्दार्थवादविरोधः । तस्य मननविधिशेषत्वात् । शब्दब्रह्मणि निष्णातकथनोत्तरं परकथनेन तथार्थस्य लाभात् । विचारं विना परनिष्णातासम्भवादिति । एवमत्राधिकारी प्रयोजनं चोक्तम् ।

अतः परं विषयसम्बन्धौ वक्तुमाशङ्कामुखेन मतान्तरमाहुः ।
* नन्वित्यादि * ब्रह्मजिज्ञासेत्यत्र, कर्तृकर्मणोः कृतीति त्रिरूपविधा-

तिज्ञानार्थत्वम् । न त्ववच्छेद्यत्वम् । निर्विचिकित्सज्ञानानुदयप्रसङ्गादिति चेत् ।

न । ब्रह्मण इति न कर्मणि षष्ठी, किन्तु शेषषष्ठी । तथाच ब्रह्मसम्बन्धि तज्ज्ञानोपयोगि सर्वमेव प्रतिज्ञातं वेदितव्यम् । नच गौणत्वापत्तिरजिज्ञास्यत्वं च स्यादिति वाच्यम् । ब्रह्ममात्रे

नात् कर्मषष्ठ्यङ्गीकार्या । यद्यपि, प्रतिपदविधाना च षष्ठी न समस्यत इति निषेधाद् ब्रह्मणो जिज्ञासेति चतुर्थीसमासः शङ्कितः । तथापि, कृद्योगा च षष्ठी समस्यत इति प्रतिप्रसवनात् समाससिद्धेरत्र कर्मषष्ठ्यां गृहीतायां ब्रह्मविचार एव प्रतिज्ञातो भवति । नच शेषषष्ठी युक्ता । यद्यपि सम्बन्धसामान्यपरिग्रहेऽपि जिज्ञासायाः कर्मापेक्षतया ब्रह्मणः कर्मत्वलाभस्तथाप्याक्षेपतः प्राप्त्यपेक्षया आभिधानिकग्रहणस्यैव न्याय्यत्वात् । तथा सति तद्व्यतिरिक्तानां विरोधनिराकरणादीनां ज्ञानपरिकरतया सिद्धावप्यप्रतिज्ञातार्थत्वम् । प्रतिज्ञा हि साध्यविशिष्टपक्षप्रतिपादकं वाक्यम् । तदत्र प्रथमसूत्रम् । तत्र च ब्रह्मण एव कर्मत्वेन जिज्ञास्यतया प्रतिज्ञानात् तदन्येषां तथात्वाऽभावात् । नचेष्टापत्तिः कर्तुं शक्या । तथा सति तेषामवचने निर्विचिकित्सब्रह्मज्ञानानुदयेन प्रतिज्ञावैयर्थ्यप्रसङ्गात् । तथाच कर्मषष्ठ्यङ्गीकारे द्वितीयाध्यायादीनामाकस्मिकत्वम् । शेषषष्ठ्यङ्गीकारे व्याकरणविरोधो, ब्रह्मण इतरतौल्याद् गौणत्वापत्तिश्चेत्युभयतःपाशा रज्जुरित्यर्थः ।

अत्र समादधते *नेत्यादि* कृद्योगे कर्मणि षष्ठ्यनुशासनेऽपि विभक्तीनां विवक्षाधीनत्वात् समासस्य सामर्थ्यमात्रापेक्षत्वाच्च ब्रह्मणः कर्मत्वे अविवक्षिते कर्मषष्ठ्यभावेन शेषषष्ठ्यामपि सामर्थ्यात् समाससिद्धेर्व्याकरणविरोधाऽभावः । सर्वेषां प्रतिज्ञातत्वसिद्ध्या, न कस्याप्याकस्मिकत्वम् । तर्हि गौणत्वाजिज्ञास्यत्वे स्यातामित्यत आहुः * नचेत्यादि * केन प्रकारेणाऽजिज्ञास्यत्वमापाद्यते । किं प्रकारत्वेन, उत रूपान्तरेण । तत्राद्यं स्वीकुर्मेति ब्रूमः । अध्ययनादिदशायां, सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिवाक्यार्थावधारणादेव तत्स्वरूपे सत्ता-

सन्देहाभावात् । सन्दिग्धस्यैव जिज्ञास्यता । गौणत्वं तु शब्दत एव, न त्वर्थतः ।

वेदप्रामाण्यं तु प्रतितन्त्रसिद्धत्वान्न विचार्यते । तस्माद् ब्रह्म जिज्ञासितव्यमिति सिद्धम् ॥ १ ॥

यां च सन्देहाभावात् । किन्तु यद् वेदे लक्षितं ब्रह्म तत् किम् । येन वेदे नानापदार्थानां लक्षितत्वेऽप्याम्नायस्याश्रयरूपं भासते विवृतत्वेऽप्येतज्जिज्ञासैव प्रस्तूयते । यदि तज्ज्ञानस्य मोक्षसाधनत्वेन, तर्हि कथं तज्ज्ञानस्यैव तथात्वम् । यदि वेदार्थत्वेन तज्ज्ञानस्य तथात्वं, तदा धर्मविचारेणैव गतार्थता । षोडशलक्षण्या सर्वस्यैव तस्य निर्णीतत्वात् । अत एव न वेदान्तार्थत्वेन । अतः सर्ववेदार्थत्वानिर्वाहकवक्ष्यमाणरीतिकगुणवत्तया जिज्ञास्यत्वं वक्तव्यम् । ततश्च तादृशगुणवत्त्वे तस्य जिज्ञास्यतासिद्धेर्न जिज्ञास्यत्वम् । नापि गौणत्वापत्तिः । गुणजातस्य ब्रह्मसम्बन्धित्वेन जिज्ञास्यतया ब्रह्मणो मुख्यत्वस्यैव सिद्धेः । शब्दतो गौणत्वं तु न स्वरूपमुख्यत्वविघातकम् । पुत्रः पित्रा सहागत इत्यादौ तथा दर्शनादिति । नन्वस्त्वेवं, तथापि वेदार्थस्य ब्रह्मणो वेदानुकूलो विचारोऽत्र प्रतिज्ञात इति तदर्थं वेदप्रामाण्यमपि विचारणीयम् । तदत्र कुतो न विचारितम् । यतो न विचारितं, ततो वेदार्थत्वेन विचार इति पक्षो न युक्त इत्यत आहुः * वेदेत्यादि * । * प्रतितन्त्रसिद्धत्वादिति * आस्तिकं तन्त्रमात्रं लक्ष्यीकृत्य सिद्धत्वात् । न हि नास्तिकनिग्रहायाचार्यस्य विचारे प्रवृत्तिः, किन्त्वास्तिकशिक्षणाय । ते तु सर्वे वेदप्रामाण्ये निर्विचिकित्सा इति प्रयोजनाभावान्न विचार्यते । तावता न वेदानुकूलविचारत्वहानिरित्यर्थः । सिद्धमाहुः * तस्मादित्यादि * ब्रह्मसम्बन्धिनां विचारेऽपि ब्रह्मणो विषयत्वस्यार्थतः सिद्धत्वात् तादृशगुणकत्वेन ब्रह्म जिज्ञास्यमिति सिद्धमित्यर्थः । अपेक्षितगुणवत्तयैवात्र ब्रह्म जिज्ञास्यं, न त्वशेषविशेषशून्यतयेति बोधयितुमेव युक्तेयत्र गमकमप्याहुः * किञ्चेत्यादि, इतीत्यन्तम् * न-

---

१ द्वितीयसूत्रावतरणे द्रष्टव्यम् ।

थाच प्रथमसूत्रे ब्रह्मविचारं प्रतिज्ञाय ब्रह्मणो येन रूपेण वेदार्थता तानि रूपाणि प्रकारांश्च वक्तुमग्रिमे कार्यलक्षणं प्रमाणं च वदतीत्य-तस्तथेत्यर्थः। एवं विषये निर्द्धारिते प्रतिपाद्यप्रतिपादकभावः सम्ब-न्धोऽप्यनुक्तसिद्ध एवेति प्रेक्षावत्प्रवृत्त्युपयुक्तं सर्वमत्र निरूपितम्। प्रकारभेदेन काण्डद्वयस्यापि ब्रह्मप्रतिपादकत्वैकवाक्यत्वसमर्थना-न्मीमांसाद्वयस्यैकशास्त्रत्वस्य सूचनेन वृत्तिकाराविरोधोऽपि बोधितः।

शाङ्करास्तु ब्रह्म जिज्ञास्यं न वेति सन्देहे, अहंवित्तिवेद्यत्वेन प्रत्यक्षस्यात्मन एव ब्रह्मत्वान्न जिज्ञास्यमिति पूर्वपक्षे कर्तृत्वादिशून्य-निर्विशेषचैतन्यैकरसत्वेन जिज्ञास्यत्वमङ्गीकृत्य केवलज्ञानादेव मोक्षं चाङ्गीकृत्य मोक्षं प्रति केवलज्ञानस्यैव हेतुत्वाज्ज्ञानकर्मसमुच्चयं नाङ्गीकुर्वन्ति। तन्मते पूर्वोत्तरकाण्डयोः स्वर्गमोक्षरूपप्रयोजनभेदात् कर्मब्रह्मस्वरूपाभिधेयभेदाच्छेषशेषिभावाभावेन परस्पराकाङ्क्षाभा-वाच्चैकवाक्यत्वाभावे उत्तरकाण्डस्य वेदान्त इति समाख्याया विरोधः नापि कर्मशेषभूतकर्तृस्वरूपप्रतिपादकत्वेनापेक्षा। कर्मानुपयुक्तक-र्तृभोक्तृभावशून्यात्मप्रतिपादकताऽभ्युपगमात्। नापि कर्मपोषक-त्वजनकविद्याप्रतिपादकत्वेन सा। यदेव विद्यया करोति तदेवास्य वीर्यवत्तरं भवतीति वाक्यस्योद्गीथविद्यामुपक्रम्य पठितत्वेन तन्मते तन्मात्रस्य तथात्वबोधकतया सर्वस्य काण्डस्य तथात्वसम्पादनाक्षम-त्वात्। मानवी ऋचौ धाय्ये कुर्यादितिवत्। न च वैदिकाभिधाने स्वरादिनियमयोगेनैकवाक्यत्वमिति शङ्क्यम्। अप्रयोजकत्वात् सु-श्लोकैकवाक्यलक्षणविरोधात्। न च यज्ञानां विविदिषोत्पादकत्वेन पू-र्वस्योत्तरकाण्डशेषतयास्त्येकवाक्यत्वसम्भव इति वाच्यम्। मत्प्रत्य-योक्तेरिच्छायामिष्यमाणपर्यन्तत्वं, वादेन जिगीषतीत्यादौ दृष्टं, केवला-या अपुरुषार्थत्वं चेति तावन्मात्रान्तत्वस्यासङ्गतत्वात्। इष्यमाणप-र्यन्तत्वस्य चानुपगमात्। अत एव वदतः, वेदमनूच्याचार्योऽन्तेवा-सिनमनुशास्तीति पृथक्समाप्तिश्रुतेः, वेदाः साङ्गोपनिषद इति पौ-राणिकपृथङ्निर्देशाच्चात्यन्तभेद एवास्थेयः। नचैवं वैदिकप्रसिद्धे-र्वेदान्तशब्दो रूढ एवेति वाच्यम्। तथा सति स्वाध्यायादिविधौ त-द्विनिवेशेन तदध्ययनार्थज्ञानविचाराणामवैधत्वापत्तेः। न च तद् विजिज्ञासस्व, तद् ब्रह्मेत्यादिविधिना विचारप्राप्तौ तेनाध्ययनाद्या-क्षेपान्न दोष इति वाच्यम्। तथा सति जिज्ञासुमात्रप्राप्तौ त्रैवर्णि-

कामाप्त्या अधिकारविरोधापत्तेः । अतस्तन्मते उपनिषदां वेदान्तत्वं न कथमपि सिद्ध्यतीत्यवधेयम् ।

रामानुजाचार्यास्तु ब्रह्मपदस्य निर्दोषपूर्णगुणपुरुषोत्तमवाचकत्वं, तस्य च स्थूलसूक्ष्मचिदचिच्छरीरविशिष्टतया वेदान्तार्थत्वेन जिज्ञास्यत्वं चोपगम्य यज्ञादीनां विविदिषोपयोगमात्रश्रवणेऽपि व्यासपादैराप्रायणात्तत्रापि हि दृष्टमित्यादिसूत्रेषु यावज्जीवं तत्करणविधानाद् ध्रुवानुस्मृतिरूपोपासनाभक्त्यादिनामकदर्शनसमानाकारज्ञानजनकत्वेन भावनात्मकोपासनया समुच्चयमङ्गीकुर्वन्ति ।

भास्कराचार्यास्तु ब्रह्म प्रसिद्धं न जिज्ञास्यम् । अथाप्रसिद्धं नतरामिति पूर्वपक्षे, सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादिषु जगत्कारणत्वश्रवणेन प्रसिद्धमपि ब्रह्म स्मृतिकारैस्त्रिगुणस्य प्रधानस्य परमाणूनां च तथात्वाङ्गीकाराद् विप्रतिपन्नमिति तन्निवृत्त्यर्थमत्र कारणकार्यजीवरूपवेदान्तोक्तस्वरूपं जिज्ञास्यमित्युपगम्य पूर्ववत् समुच्चयमङ्गीकुर्वन्ति । सूत्राणि च शारीरपदेनापर्यादिमतानुसृत्य निर्दिशन्ति । तन्मते पूर्वोत्तरकाण्डयोरभिधेयभेदेऽपि प्रयोजनैक्यादेकशास्त्रत्वात्, सर्वे वेदा यत्पदमामनन्ति, वेदैश्च सर्वैरहमेव वेद्यः, वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे, परोक्षवादा ऋषयः परोक्षं च मम प्रियं, मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्, एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम् । मायामात्रमनूद्यान्ते प्रतिषिध्य प्रसीदतीति श्रुतिस्मृतिविरोधो दुर्वारः । गीतायां, ब्रह्मसूत्रपदैरित्युक्तेस्तद्विरोधश्च ।

भिक्षुभाष्ये तु, आत्मेत्येवोपासीतेत्यादिविहितज्ञानविषयं किं ब्रह्म, किं वा तस्य ब्रह्मतानिर्वाहकं गुणजातं, कीदृशं तस्य ज्ञानं, कीदृशं च तस्य ज्ञानस्य फलमित्यादिकं विशिष्य मुमुक्षूणां जिज्ञासितं भवतीत्येवं जिज्ञासामुखेन संशयमधिकारिणं चोपन्यस्य शाखाभेदेन श्रुतीनामन्योन्यविरुद्धतायाः प्रतिभासनादिति जिज्ञासाजनकसंशयहेतुं चोपन्यस्य तन्निर्णयार्थं ब्रह्ममीमांसाशास्त्रस्यापेक्षितत्वमुक्त्वा ब्रह्मज्ञानस्य चोदनालक्षणतया, अयं तु परमो धर्मो यद्योगेनात्मदर्शनमित्यादिस्मृत्या च धर्मत्वेऽपि न पूर्वमीमांसया ब्रह्ममीमांसाया गतार्थत्वं कल्पसूत्रवद्विशेषतो निर्धारणार्थत्वादित्यनेन धर्मस्य सर्ववेदार्थत्वं, ब्रह्ममीमांसायाः पूर्वमीमांसाशेषत्वं च प्रकटीकृत्य, सत्यं ज्ञानमनन्तं ब्रह्म

विज्ञानमानन्दं ब्रह्मेत्यादिश्रुतिसिद्धत्वाद् ब्रह्मस्वरूपे जिज्ञासा नोपपद्यत इत्याशङ्क्य, ब्रह्मस्वरूपज्ञाने किं साङ्गत्यमिह जीवचैतन्यं, किं वा चैतन्यानन्तरमात्मजिज्ञासामरत्वादाकाङ्क्षितं ब्रह्ममीमांसाशास्त्रं वेदव्यासः प्रतिजानीत इत्युक्तम् ।

तन्मतेऽपि पूर्वोक्तवाक्यविरोधो जैमिनेरकुशलत्वापत्तिश्च । किञ्च शास्त्रं धर्मविशेषविचारार्थं प्रवर्तितमुत ब्रह्मविचारार्थम् । आद्ये धर्मविशेषजिज्ञासा ब्रह्मज्ञानजिज्ञासेति वा प्रतिज्ञां कुर्यात् । प्रकरणेन एव ज्ञायते न तस्यैव प्रतिज्ञानव्यर्थत्वात् । तत्प्रकरणेन व्यासस्याप्यकौशलमापद्यते । द्वितीये तु प्रतिपाद्यभेदात् पूर्वशेषत्वाभावेन फलसूत्रस्यापि विरोधः । सिद्धान्ते तु ब्रह्मणः सर्ववेदार्थत्वाज्जैमिन्युक्तधर्मस्य तथात्वमस्तु तथा शङ्कानिरासावश्यकत्वादोषः । तस्मादिदमपि पूर्वतुल्यम् ।

यत्तु शैवो रामानुजमतैकदेशमादायाराधनाराध्यभूतधर्मब्रह्मप्रतिपादकयोर्मीमांसाशास्त्रयोः फलैक्यादैक्यम् । यथा हि व्रीहिप्रोक्षण दर्शपूर्णमासापूर्वहेतुतया स्वर्गे समुच्चीयते, तथा कर्माणि ज्ञानप्रयोजकतया मोक्षे समुच्चीयन्तेऽतो गुणकर्मत्वादङ्गत्वं ज्योतिष्टोमादीनाम् । न च नित्यविधिप्राप्तानां तेषामितिकर्तव्यताविरोधात् कथं संस्कारतासिद्धिरिति शङ्क्यम् । करणतया स्वतन्त्रविध्यन्तरविहितसौत्रामण्यां बृहस्पतिसवादेरपि चयनवाजपेयाद्यङ्गत्ववदुभयविधिबलादुभयसिद्धेः । अतो ज्ञानोदयावधि कर्माणि कर्तव्यानि । न च विविदिषन्तीति श्रुत्या विविदिषोत्पत्तिपर्यन्तत्वं कर्मणां शङ्क्यम् । इच्छाया अपुरुषार्थत्वात् । अतः पूर्ववदेव शास्त्रैक्यमित्यङ्गीकृत्य ततो रामानुजाचार्यधृतेषु वाक्येषु परीक्ष्य, लोकान् कर्मचितानित्यादिवाक्यत्रयं विषयत्वेनोपन्यस्य ब्रह्म विचारार्हं न वेति सन्देहे, अयमात्मा ब्रह्मेति श्रुतिरहंवाच्यप्रत्यक्षसिद्धमात्मानं ब्रह्मेत्युपदिशतीति सन्देहाभावात् । किञ्च, विचारफलं विषयपरिच्छेदः । वेदान्तविचारजन्यं ज्ञानं चेद् ब्रह्म परिच्छिनत्ति तदा परिच्छेदातीतत्वभङ्गप्रसङ्गः । यदि न परिच्छिनत्ति, तदा प्रकाशाभावाद् ब्रह्मविषयज्ञानस्यासम्भवः । तस्मान्न विचार्यमिति पूर्वपक्षमुक्त्वा, विचारयोग्यं ब्रह्म, अयमात्मा ब्रह्मेति श्रुत्याऽहङ्कारयुक्तस्य संसारिण आत्मनो ब्रह्मत्वाभिधानादेव सन्देहसम्भवात् । निरस्तसमस्तोपप्लवकलङ्कस्य निरतिशयज्ञाना-

नन्दादिशक्तिमहिमातिशयवत्त्वं हि ब्रह्मत्वम्, अनाद्यज्ञानवासनावष्टम्भविजृम्भितविचित्रकर्मफलभोगानुगुणबहुशरीरप्रवेशनिर्गमव्यापारपरवशतिःसीमतापसहिष्णुत्वं जीवत्वमिति तयोर्लक्षणेनेतरेतरभेदनिश्चये नश्वरैश्वर्यदौर्घट्यस्फूर्तेः । किञ्च । अन्नं ब्रह्म, मनो ब्रह्म, विज्ञानं ब्रह्म, आदित्यो ब्रह्म, नारायणं परं ब्रह्मेत्यादयोऽन्यमन्यमर्थं ब्रह्मेत्याहुः । तत्र किं ब्रह्मेत्येवं सन्देहादपि विचारार्हं ब्रह्म । नचापरिच्छिन्नत्वाद् ब्रह्मणस्तद्विषयं ज्ञानं न सम्भवतीति शङ्क्यम् । ईदृगिदमिति ब्रह्मणः परिच्छेदासम्भवेऽपि लक्षणमुखेनेतरव्यावृत्ततामात्रेण परिच्छेदसम्भवात् । लक्षणेन परिच्छेदो हि सर्वत्र लक्ष्यविषयकेतरव्यावृत्तताज्ञानरूप एव दृष्ट इत्यनुपः । अत उपदिष्टस्य ब्रह्मणो लक्षणे वेदान्तवाक्यैर्निरूपिते परीक्षिते च सति तल्लक्षणशून्येभ्यः सजातीयविजातीयेभ्यः सर्वेभ्यो व्यावृत्तं ब्रह्म विज्ञायत इति तदर्थं युक्तः शास्त्रारम्भ इत्याह । एतन्मतेऽपि तेषां वाक्यानां विरोधः पूर्ववदेव । जीवलक्षणन्तु जीवप्रकरणे दूषयिष्याम. ।

किञ्च । ज्ञात्वा शिवं शान्तिमत्यन्तमेति, ईशं तं ज्ञात्वा अमृता भवन्ति, तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम्, आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ध्याननिमर्थनादेव पाशं दहति पण्डितः, ज्ञात्वा देवं मुच्यते सर्वपाशैरितिश्रुत्युक्तमोक्षप्राप्तिलिङ्गेन शिवस्य परब्रह्मत्वं यत्तेनोपगतं, तदप्यसङ्गतम् । ब्रह्मविदाप्नोति परमिति तदुपन्यस्ते फलवाक्ये, नारायणं परं ब्रह्मेतिश्रुत्युक्तनारायणरूपब्रह्मणस्यैव युक्तत्वात् । उभयत्रापि परब्रह्मपदोपबन्धसाम्यात् । लिङ्गापेक्षया श्रुतेर्बलिष्ठत्वात् । ऋतं सत्यं परं ब्रह्मेतिवाक्यस्यापि सन्दिग्धत्वात् । शिवशब्दादिपदानां च भगवद्वाचकत्वमेवेत्यादिकमस्माभिः प्रहस्ते निपुणतरमुपपादितम् । पुनरग्रेऽपि तत्र तत्रोपपादयिष्यते ।

माध्वास्तु शास्त्रं प्रवर्तनीया जिज्ञासा विषयः । कर्तव्या न वेति सन्देहः । तत्र प्रमाणाभावेन जीवव्यतिरिक्तस्य ब्रह्मणोऽभावाज्जीवस्य स्वप्रकाशत्वाद् अहंवित्तौ प्रकाशमानत्वात् तस्यापि ज्ञायमानत्वेनानुभवान्तरान्वेषणेऽनवस्थाप्रसङ्गात् क्वचिद् विश्रान्त्यङ्गीकारे आत्मन्येव तथात्वौचित्यात् । न च स्वप्रकाशसंविदाश्रयतयाऽऽत्मा भासत इति युक्तम् । औत्तरिकानुस्मृतिसिद्धसौषुप्तिकानुभ-

वाभावप्रसङ्गात् । तत्र संविदाश्रयत्वेनात्मप्रतीतेरभावात् । अतः स्वप्रकाशात्मानतिरिक्तस्य ब्रह्मणः सन्दिग्धत्वाभावेनाविषयतया तज्जिज्ञासाया अपि तथात्वान्न कर्तव्येति पूर्वः पक्षः ॥ सिद्धान्तस्तु, सर्वदेतदेवं, यदि स्वप्रकाशजीवाभिन्नं ब्रह्म स्यात् । न त्वेवम् । जिज्ञास्ये ब्रह्मपदप्रयोगात्, तद्धि जिज्ञासस्व, तद् ब्रह्मेति । ब्रह्मशब्दश्च गुणपूर्णतां वक्ति । अथ कस्मादुच्यते ब्रह्मेति, बृहन्तो ह्यस्मिन् गुणा इति श्रुतेः । तथाच कथं तस्य जीवाभेदः । जीवस्याल्पगुणत्वेनानुभवात् । न च ब्रह्मणि गुणाध्यासः । परमार्थतोऽब्रह्मत्वप्रसङ्गात् । न च देशाद्यपरिच्छिन्नत्वं ब्रह्मत्वम् । उक्तश्रुतिविरोधात् । देशाद्यपरिच्छेदेनापि जीवभेदसिद्धेः । जीवाणुत्वस्य वक्ष्यमाणत्वात् । जीवस्य स्वप्रकाशत्वेऽपि तद्भिन्नब्रह्मणः सन्दिग्धत्वाद् विषयत्वम् । अतस्तज्जिज्ञासा कर्तव्येत्याहुः । ब्रह्मशब्दश्च विष्णावेव रूढः । यमन्तःसमुद्रे कवयो वयन्ति, यदक्षरे परमे प्रजाः, यतः प्रसूता जगतः प्रसूती तोयेन जीवान् व्यससर्ज भूम्यामित्युपक्रम्य, तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनामिति श्रुतौ समुद्रान्तःस्थत्वलिङ्गेन जगत्कर्तारं परब्रह्मत्वविधानात् । यो देवानां नामधा एक एवेत्यादिश्रुतावेककारणैकस्य सर्वनामधारकत्वमुक्त्वाऽग्रे, अजस्य नाभावध्येकमर्पितं यस्मिन् विश्वानि भुवनानि तस्थुरिति विश्वाधारपद्मस्य नाभ्यर्पितत्वश्रावणात् । वेदे रामायणे चैव पुराणे भारते तथा, आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयत इति हरिवंशवाक्याच्चेत्यप्याहुः । तन्मतेऽप्युक्तत्वेनैव वेदार्थत्वाङ्गीकारान्नां त्रिधत्त इतिवाक्यविरोधः । यत्तु कर्मविधात्री श्रुतिर्मां मत्वा तद्विधत्ते, इन्द्राद्यभिधात्री च मामभिधत्त, चत्वारि वागितिश्रुत्या अहं विविधरूपत्वेन कल्प्यो, न सुरां पिबेदित्यादिश्रुत्याहमेवाप्रियाद्धोह्य इति व्याख्यानम् । तदप्यध्याहारवृत्तिसङ्कोचलक्षणादोषसम्भवादचिन्त्यम् । प्रकृतमनुसरामः । एवञ्चात्र सूत्रे शेषषष्ठ्या ब्रह्मसम्बन्धिनां जिज्ञास्यत्वबोधनेन साधारणाधिकारं ज्ञानकर्मसमुच्चय, उत्कृष्टाधिकारं च भक्तिमार्गीयः सर्वात्मभावः साधनमिति बोधितम् । इति प्रथमाधिकरणम् ।

एवं पूर्वाधिकरणे वेदार्थभूतब्रह्मणो जिज्ञास्यत्वे साधिते, कथं जिज्ञास्यमिति प्रकारविशेषाकाङ्क्षायां समन्वयाविरोधाभ्यां

किञ्च, तत्र किं लक्षणं किं प्रमाणकमिति जिज्ञासायामाह सूत्रकारः ।

जन्माद्यस्य यतः शास्त्रयोनित्वात् ॥ २ ॥

ननु कथमत्र सन्देहो, यावता, सत्यं ज्ञानमनन्तं ब्रह्मेत्याह श्रुतिरेव ।

तस्य वक्तव्यत्वात् तद्बोधकमग्रिमसूत्रमवतारयन्ति । *नन्वित्यादि* । तेषु वक्तव्येषु तदुपजीव्यतया उक्तजिज्ञास्यं लक्षणप्रमाणात्मकं प्रकारद्वयं पूर्वमाहेत्यर्थः । * जन्माद्यस्य यतः शास्त्रयोनित्वात् * । अत्र सर्वेऽपि योगविभागेन, शास्त्रयोनित्वादिति सूत्रं भिन्नमभ्युपगच्छन्ति । तन्न युक्तम् । अग्रिमसूत्रेषु साध्यहेतुनिर्देशपूर्वकमधिकरणरचनस्य दर्शनेनात्रापि तथैव युक्तत्वात्, साङ्ख्ये ब्रह्मपदस्य प्रकृतौ प्रयुक्तत्वेन तद्वारणाय विवक्षितब्रह्मणि शास्त्रोक्तकर्तृत्वप्रतिपादनस्यावश्यकत्वाच्च । न च सूत्रभेदेऽप्यधिकरणस्य सूत्रद्वयात्मकत्वाङ्गीकारात् प्रथमसूत्रे विशेषतः प्रमाणानुक्तावप्यथशब्देन धर्मविचारानन्तर्यं ब्रह्मविचारस्य बोधिते ब्रह्मणो वेदान्तवेद्यतोपस्थितेः सुखेनोक्तदोषपरिहारात् सूत्रैक्यं न युक्तमिति वाच्यम् । अथशब्दस्यानेकार्थत्वेनानन्तर्यस्याप्यनेकविधत्वेन धर्मविचारानन्तर्यस्योपपादनसापेक्षत्वेन चाहत्य ब्रह्मणो वेदान्तवेद्यत्वानुपस्थित्या जन्माद्यधिकरणरचनायामनाश्वासप्रसङ्गात् । अतः सूत्रैक्यमेव युक्तमिति । ये तु जन्माद्यधिकरणं, शास्त्रयोनित्वाधिकरणं च भिन्नमङ्गीकुर्वन्ति तेषां मते प्रथमस्य हेतुशून्यत्वाद् द्वितीयस्य च साध्यशून्यत्वात् साकाङ्क्षतयाऽनिर्दिष्टत्वेन तद्विवक्षितप्रमेयासाधकत्वं बोध्यम् ।

लक्षणं शङ्कते * नन्वित्यादि * यत् सन्दिग्धं तत् सम्यक् परिच्छेत्तुं लक्षणीयम् । अत्र ब्रह्मणि कथं सन्देहः । * यावतेत्यवधारणे हेत्वर्थे वा । तथाच ब्रह्मणः सत्ता स्वरूपलक्षणं च श्रुतित एव सिद्धम् । तदवधारणे ततो हेतोर्वा ब्रह्मणोऽखिलविशेषशून्यत्वेन सिद्ध्या सन्देहप्रयोजकप्रकाराभावात् सन्देह एव न घटत इत्यर्थः ।

प्रकारान्तरेणापि तदभावमाह ।

विरुद्धं चैतत् । स्वरूपलक्षणाकथने कार्यलक्षणस्य वक्तुमशक्यत्वात् । विवादाध्यासितत्वाच्च । न हि ब्रह्मणो जगत्कर्तृत्वं सर्वसम्मतम् । न चागमोऽस्तीति वेदमात्रस्य ब्रह्मप्रमाणकत्वं वक्तुं शक्यते ।

किञ्च । व्यर्थश्चैवं विचारः । लक्षणप्रमाणाभ्यां हि वस्तुज्ञानं भवति । तच्च स्वरूपलक्षणेनैव भवतीति किमनेन । तस्मादयुक्तमुत्पश्याम इति ।

उच्यते ।

विरुद्धमित्यादि यद्धि लोकाप्रसिद्धं तद्लौकिकया श्रुत्या निर्णेयम् । श्रुतिस्तु पूर्वं स्वरूपलक्षणमुक्त्वाऽग्रिमे प्रपाठके कार्यलक्षणं वक्ति । अतः प्रथममेव तत्कथनं श्रुतिविरुद्धम् । न च स्वरूपलक्षणं सन्देहाभावात् कार्यलक्षणमेवोच्यत इति युक्तम् । प्रत्यक्षप्रमाणादिष्वपि तस्यातिप्रसङ्गदर्शनेन स्वरूपलक्षणाकथने केवलतत्कथनस्याप्रयोजकत्वात् । कैश्चिन्मायाशबलस्यान्यैः शुद्धसत्त्वात्मकशरीरविशिष्टस्येतरैः सत्त्वादिगुणत्रयात्मकस्य प्रधानस्यापरैर्नित्यज्ञानेच्छाप्रयत्नधर्मकस्य तथात्वाङ्गीकारेण तस्य विवादाध्यासितत्वाच्च । तदेव विभजति *न हीत्यादि* ननु ब्रह्मणः कर्तृत्वस्य सर्वसम्मतत्वाभावेऽपि वेदस्य प्रमाणमूर्धन्यत्वात् तदुक्तकोटेरौत्कट्यात् सन्देहाभावाच्च लक्षणविचार उचित इतिचेत् तत्राह *न चेत्यादि* चोऽवधारणे । कर्तागमेन वेदरूपेण मूलशास्त्रेणेति इत्येतावता कृत्स्नस्य वेदस्यैव ब्रह्मणि प्रमाणत्वं न वक्तुं शक्यते । कल्पनोपदेशस्यापि तत्र शक्यसूचनत्वाद् अनुमानस्यापि तत्र प्रमाणत्वाच्चेत्यर्थः । अत्र, ब्रह्मप्रमाणत्वमिति पाठः प्रतिभाति । अथ वेदोक्तपक्षाग्रहस्तदा दूषणान्तरमाह *किञ्चेत्यादि* । *अयुक्तमिति* सूत्रोक्तं लक्षणमयुक्तमित्यर्थः । शेषमतिरोहितार्थम् ।

अत्र समाधातुं गृह्णते *उच्यत इत्यादि* प्रकारान्तरेणाश

सन्देहवारकं शास्त्रं वेदप्रामाण्यवादिनाम् ।
क्रियाशक्तिज्ञानशक्ती सन्दिह्येते परात्मने ॥

न हि श्रुतिं व्याख्यातुं प्रवृत्तः सूत्रकारः । किन्तु सन्देहं वारयितुम् । तत्र, सत्यं ज्ञानमनन्तं, नित्यशुद्धमुक्तस्वभावमिति श्रुत्या कर्तृत्वादिप्रापञ्चिकधर्मराहित्यं प्रतीयते । यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्तीति कर्तृत्वं च ।

तत्र सन्देहः । किं ब्रह्म कर्तृ, आहोस्विदकर्तृ? किं तावत् प्राप्तम् । अकर्तृ । कथम् । ब्रह्मविदाप्नोति परमिति प्रधानत्वा-

---

संशय उच्यते. * वेदप्रामाण्यवादिनाम् * सर्वे वेदा यत् पदमामनन्तीतिश्रुत्यनुसारेण ब्रह्मण्येव सर्वस्य वेदस्य प्रामाण्यमन्यत्र प्रमाणाभासत्वमितिवादिनां वेदे यः सन्देहस्तद्वारकमिदं वैयासं शास्त्रम् । तत्र कः सन्देह इत्यपेक्षायां, *परात्मने* ब्रह्मविदाप्नोति परमित्यत्राप्तिकर्मभूतो यः पर उक्तस्तस्मिन्ने क्रियाशक्तिज्ञानशक्ती स्वरूपलक्षणविरुद्धत्वाद् ब्रह्मणि सन्दिह्येते, स्तो न स्तो वेत्येवं सन्देहं इत्यर्थः । गृहीतं विभजन्ते * न हीत्यादि * यदुक्तं स्वरूपलक्षणाकथन इत्यादि, तदसङ्गतम् । यदि सूत्रकारः श्रुतिं व्याख्यातुं प्रवृत्तः स्याद् यथाक्रमं प्रतिपदं च व्याकुर्यात् । न तु तथा । किन्तु सन्देहं वारयितुम् । ततश्च यत् सन्दिग्धं तद्विवृणोति, व्याख्येयसमानार्थकैरन्यैश्च पदैर्विपक्षसपक्षबाधकसाधकतर्कोपन्यासेन सन्देहमपाकरोति । तत्र, सत्यमित्यादिके स्वरूपलक्षणे, यतो वेत्यादिकार्यलक्षणे च ब्रह्मपदादेकस्यैव लक्षणद्वयमुतोभयत्र सामान्यशब्दप्रयोगेऽपि लक्ष्यस्वरूपभेदेन तदवच्छेदकभेदाद् ब्रह्मभेदः । तत्र यदि भेदस्तदा कस्य वेदार्थत्वं कस्य न, उतोभयोर्वेति पुनः सन्देहसम्भव इति तद्वारणार्थमेकं ब्रह्म वक्तव्यम् । तथा सत्युक्तरीतिकाद् विरोधात् सन्देह इति प्रकारप्रश्नोत्तरत्वेन सन्देहबीजमुक्तम् । स्वरूपलक्षणस्य हृदि करणादकथनेऽप्यदोषश्च बोधितः । सन्देहाकारमाहुः * तत्रेत्यादि * तथाच

कम् । फलसम्बन्धात् । ऋचापि विवृतम् । सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति । फलार्थं च ब्रह्मज्ञानम् । फलं च फलवाक्योक्तधर्मज्ञानादेव, नान्यथा । कर्तृत्वं च परविवरणतयोक्तम् । परं किमित्युक्ते यः सर्वान्तर आनन्द इति । कथं सर्वान्तरमित्याकाङ्क्षायां परिचयार्थं भूतभौतिकसृष्टिमुक्त्वा गौणानन्तर्यं परिहृतम् । गौणोपासनाफलं च प्रधानशेषतयोक्तम् । तत्रान्यगतकर्तृत्वारोपानुवादोऽपि सम्भवति । ततश्च भृगुर्वै वारुणिरित्युपाख्यानेऽपि परिचायकत्वाद् गौणकर्तृत्वमेवानूद्यते, फलाश्रवणादिति पूर्वः पक्षः ।

परस्परविरुद्धार्थबोधकाभ्यां लक्षणाभ्यामेव सन्देहाल्लक्षणकरणं युक्तमित्यर्थः । पूर्वपक्षं विवृण्वन्ति * ब्रह्मेत्यादि * । अयमर्थः । शेषलक्षणे, कर्मफलार्थत्वादित्यनेनोपलक्षणविधया ज्ञानस्यापि फलशेषत्वे सिद्धे प्राधान्यं फलस्यैवेति तत्सम्बन्धादुक्तमेव प्रधानवाक्यं, न तु कार्यलक्षणवाक्यं तथा । नचैवं पूर्वकाण्डेऽस्तूत्तरकाण्डे तत् किमित्युपेयमिति वाच्यम् । ऋचापि विवृतम् । यदि तस्य प्राधान्यं न स्यात् किमिति विवृणुयादतोऽत्रापि तदाहृतम् । तथा सति ज्ञानं फलार्थं, फलं च फलवाक्योक्तधर्मज्ञानात् परत्वज्ञानादेव । अतः परत्वज्ञानार्थं कर्तृत्वं परविवरणतयोक्तम् । स्वरूपलक्षणे प्रापञ्चिकधर्मराहित्यप्रतीतेर्ब्रह्मणि कर्तृत्वस्याशक्यवचनत्वात् । तस्माद्वा एतस्मादित्यादिना यत् कर्तृत्वमुक्तं, तज्ज्ञेयात् फलरूपं परं पृथक्कृत्य तं विवरीतुमुक्तम् । ततस्तत्स्वरूपजिज्ञासायां सर्वान्तरत्वकथनपूर्वकमानन्द इति स्वरूपमुक्तम् । अन्यथा तन्निरूपणमसङ्गतं स्यात् । सर्वान्तरत्वं च तस्य परत्वनिर्वाहकतयोक्तम् । तत्रापि कथम्भावाकाङ्क्षायां तन्निष्कर्षार्थमाकाशादीनां भूतानामोषध्यादीनां भौतिकानां च सांप्रक्रमेण कर्तृत्वं प्रतिपाद्य तस्य सर्वान्तरत्वकथनेन चरमत्वाद्

सिद्धान्तस्तु ।

उत्पत्तिस्थितिनाशानां जगतः कर्तृ वै बृहत् ।
वेदेन बोधितं तद्धि नान्यथा भवितुं क्षमम् ॥
न हि श्रुतिविरोधोऽस्ति कल्पोऽपि न विरुध्यते ।
सर्वभावसमर्थत्वादचिन्त्यैश्वर्यवद् बृहत् ॥

वेदेनैव तानज्जगत्कर्तृत्वं बोध्यते। वेदश्च परमाप्तोऽक्षरमानमप्यन्यथा न वदति । अन्यथा सर्वत्रैवाविश्वासप्रसङ्गात् । न च कर्तृत्वे विरोधोऽस्ति । सत्त्वादिधर्मवत् कर्तृत्वस्याप्युपपत्तेः । सर्वथा निर्द्धर्मकत्वे सामानाधिकरण्यविरोधः । सत्यज्ञानादिपदा-

---

गौणमपर्यवसन्नं प्राणादीनामिवानन्दमयं निवारितम् । सर्वं वै तेऽन्नमाप्नुवन्ति येऽन्नं ब्रह्मोपासत इत्यादिनाऽन्नब्रह्माद्युपासनाफलं प्रधानशेषतया, अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरित्यादिनाऽनुवाकचतुष्टयेन कथितस्य स्वस्थब्रह्मानन्दावाप्तिसर्वभयाभावरूपप्रधानफलस्य शेषतया सर्वोत्कृष्टत्वज्ञापनायोक्तमिति कर्तृत्वं परासिद्धं सिद्ध्यति । तथापि स्वरूपलक्षणविरोधात् पूर्वकाण्डोक्तप्रजापतिगतस्य प्रकृतिगतस्य वा कर्तृत्वस्यारोपेणानुवादोऽपि सम्भवतीति द्वितीयप्रपाठकेऽपि फलाश्रवणेनामुख्यत्वात् तत्राप्येवं नेतव्यम् । तथाच नास्य लक्षणत्वमिति पूर्वपक्षार्थः ।

सिद्धान्तमाहुः * उत्पत्तीत्यादि * । * नादिति * कर्तृत्वम् । *अन्यथेति* गौणम् । * कल्प इति * कल्पसूत्रम् । *सर्वभावः* सर्वभवनम् । तत्र समर्थत्वादकर्त्रापि कर्त्रित्यर्थः । गृहीतं विभजन्ते * वेदेनेत्यादि * स्यादन्यगतकर्तृत्वारोपानुवादः कार्यलक्षणं यदि स्वरूपलक्षणं विरुद्ध्येत । तदेव तु न । विवरणेऽपि परस्य तृतीयान्तेन ब्रह्मपदेनैव विवृतत्वात् । न च तत्र वेदहिरण्यगर्भब्राह्मणजातिजीवा अर्थत्वेन ग्रहीतुं शक्याः । परपदविवरणात् सान्तत्वादिना ब्रह्मापक्षयोत्कर्षस्य तेष्वशक्यवचनत्वात् । परशब्दस्यान्यार्थकत्वोपगमेऽपि

नां धर्मभेदेनैव तदुपपत्तेः । नच कर्तृत्वं मनआदिधर्मो, देहाद्यध्यासकृतत्वादिति वाच्यम् । मायाश्रिके कर्तृत्वे तथैव । न त्वलौकिककर्तृत्वे । अत एवास्यैवमाह । अस्येति पुरोवर्ती प्रपञ्च इदमा निर्दिश्यते । अनेकभूतभौतिकदेवान्तर्गतमनुष्यानेकलोकाद्भुतरचनायुक्तब्रह्माण्डकोटिरूपस्य मनसाप्याकलयितुमशक्यरचनस्यानायासेनोत्पत्तिस्थितिभङ्गकरणं न लौकिकम् ।

विवरणोक्तब्रह्मशब्दानुरोधादेत एव परत्वेन ग्राह्याः । तत्प्राप्तिस्तु कर्मणापीति साधनान्तरेण ज्ञानेन को वा विशेषः स्यात् । अत उक्तार्थकत्वमादरणीयम् । उत्कृष्टं च किमित्यपेक्षायां विवरणानुरोधाद् ब्रह्मान्तरं कल्प्यम् । तच्चाप्रसिद्धं, स्वरूपलक्षणहीनं च । न च प्रकृतिः । साङ्ख्यमतेऽपि ज्ञानात्मकपुरुषापेक्षया तस्या हीनत्वात् परार्थत्वाच्च । अधीनत्वस्य वक्ष्यमाणत्वाच्च । अतो ब्रह्मापेक्षयान्यस्य परत्वेन वक्तुमशक्यत्वादुक्तलक्षणविशिष्टस्यैव ब्रह्मणः कर्तृत्वं वेदेन बोध्यते । नच तदारोपितमिति शक्यवचनम् । निरङ्कुशस्य तस्याऽध्यस्तासिद्धताया अनुपदमेव वक्ष्यमाणत्वात् ।

किञ्च । वेदः परमाप्तत्वादक्षरमात्रमपि मिथ्या न वदति । यदि क्वापि तथा वदेत्, स्वर्गकामो यजेतेत्यादिविध्यंशे स्वरूपलक्षणांशे चाविश्वसनीयः स्यात् । ततश्च सन्मार्गमात्रमुच्छिद्येत । अतो यद्यथा वदति तत्तथेति मन्तव्यम् । तेन कर्तृत्वं वेदोक्तत्वादपि वास्तवमित्येव सिद्ध्यति । नच कर्तृत्वाङ्गीकारे स्वरूपलक्षणविरोधोऽस्ति, येन तदनुरोधादवास्तवत्वं तस्य कल्प्येत । तदुक्तसत्यत्वादिधर्मवत् कर्तृत्वस्याप्युपपत्तेः । नच ब्रह्म यावद्धर्मरहितमिति वक्तुं शक्यम् । स्वरूपलक्षणविरोधात् । तत्र ब्रह्मणि सत्यत्वादिधर्माङ्गीकारात् । नचासत्यजडमात्रव्यावृत्तत्वमेव पदार्थः सत्यादिपदैरुच्यत इति वक्तुं युक्तम् । व्यर्थपौनरुक्त्यापत्तेः । तत्तद्भेदधर्मकत्वसिद्ध्या घटकुट्यां प्रभाताच्च । अतः सत्यादिपदानां स्वार्थत्यागोऽपार्थ एव । तदेतदुक्तं * धर्मभेदेनैव तदुपपत्तेरिति । स्फुटमग्रिमम् ।

ननु लक्षणद्वयस्यैकपरत्वे सर्वास्तु श्रुतिष्वेकमेव ब्रह्म प्रतिपा-

प्रतीतश्च निषेध्यम् । नाप्रतीतं, न श्रुतिप्रतीतम् । सत्यत्वादयश्च लौकिकाः । ततः सर्वनिषेधे तदज्ञानमेव भवेत् । नच सत्यत्वादिकं लोके नास्त्येव व्यवहारमात्रत्वात्, कारणगतमेवसत्यत्वं प्रपञ्चे भासत इति वाच्यम् । तर्हि कर्तृत्वं तथा कुतो नाङ्गीक्रियते । स्मृतिश्च स्वीकृता भवति, कर्ता कारयिता हरिरिति ।

नचारोपन्यायेन वक्तुं शक्यम् । तथा सत्यन्यस्य स्यात् । तत्र न प्रकृतेः । अग्रे स्वयमेव निषेध्यमानत्वात् । न जीवानामस्वातन्त्र्यात् । न चान्येषामुभयनिषेधादेव । तस्माद् ब्रह्मगतमेव कर्तृत्वम् । एवं भोक्तृत्वमपि । न वा काचिच्छ्रुतिः कर्तृत्वं निषेधति । विरोधभानात् कल्प्या तु लौकिकपरा । फलवाक्येऽप्यश्रुतानां गुणोपसंहारः कर्तव्यः ।

ध्यम् । तदा, अस्थूलादिवाक्येष्वपि तदेवं निरूप्यत इति निर्धर्मकत्वं बलादापतितमतः कर्तृत्वनिषेध एव युक्त इत्यत आहुः * प्रतीतमित्यादि * । युक्तः प्रतिषेधः । परन्त्वस्थूलादिवाक्ये लोकप्रतीता एव प्रतिषिद्ध्यन्त इत्यत्रापि प्रतीतमेव प्रतिषेध्यम् । अत एव नाप्रतीतम् । प्रसञ्जयितुमशक्यत्वेन प्रतिषेधानर्हत्वाच्च । न श्रुतिप्रतीतम् । तुल्यबलत्वात् प्रत्यायनवैयर्थ्यापाताच्च । श्रुत्युक्ताः सत्यत्वादयोऽपि यदि लौकिकत्वेनादृतास्ततो लोकश्रुतिप्रतीतसाधारण्येन सर्वनिषेधे ब्रह्माज्ञानमेव भवेत् । तथाच स्वरूपलक्षणवैयर्थ्यं सर्वनाशश्च स्यात् । नच तदभावाय लोकस्य व्यवहारमात्रत्वात् तत्रापि कारणगतमेव सत्यत्वमतो न तत् प्रतिषेध्यं, किन्तु कर्तृत्वमेवेति वाच्यम् । तदा तु धर्मसङ्कोचस्य तौल्यात् कर्तृत्वमपि तथाङ्गीकार्यम् । तेन फलपस्मृतिस्वीकाररूपगुणोऽपि भविष्यति । नन्वगत्या सत्यत्वं तथास्तु, न तु कर्तृत्वमपि । आरोपन्यायेन तस्य शक्यवचनत्वादित्यत आहुः * न चेत्यादि * । * अन्येषामिति * अभावकालस्वभावभूतग्रहलोकपालादीनाम् । ननु प्रकृते फलवाक्यविचारो भवतापि स्वीकृतस्तथा सति तद्विवरणोक्तं भोक्तृत्वं तत्रास्तु, कर्तृत्वं तु कथमङ्गीकर्तुं शक्यमित्यत आहुः * गुणोपसंहार इति * सूत्रकृताग्रे तथाङ्गीकारात्

तथाचायं सूत्रार्थः ।

जन्म आदिर्येषामित्यवयवसमासादतद्गुणसंविज्ञानो बहुव्रीहिः॥

तथेत्यर्थः । तस्माद् ब्रह्म कर्तृ इति सिद्धम् । एवं सिद्धान्तं व्याख्याय तस्य सूत्राविरोधित्वं बोधयितुं सूत्रं व्याकुर्वते *तथाचेत्यादि* एवं कर्तृत्वे सिद्धे वक्ष्यमाणरीतिकः सूत्रार्थ इत्यर्थः । अत्र सर्वेऽपि तद्गुणसंविज्ञान बहुव्रीहिमङ्गीकुर्वन्ति । तत्रोपसर्जनत्वेन पूर्वप्रयोगार्हस्यादिशब्दस्य परत्वाय राजदन्ताद्याकृतिगणीयत्व कल्पनीयमित्यरुच्या प्रकारान्तरेण व्याकुर्वन्ति । *जन्मेत्यादि *। जन्म आदिः प्रथमोऽवयवो येषां ते जन्मादि । सुपां सुलुगिति जसां लुगित्यवयवसमासादिति । भावप्रधानो निर्देशः । तथाचादिपदविशेष्यकावयवसमासत्वादतद्गुणसंविज्ञानो बहुव्रीहिरित्यर्थः । न च, अङ्गं प्रतीकोऽवयव इति कोशादवयवपदस्याङ्गवाचकत्वेनात्र च तदभावेन कथमवयवसमासत्वमिति शङ्क्यम् । एकदेशेऽप्यवयवपदप्रयोगात् । यथा पञ्चावयवमनुमानवाक्यमिति । कैयटेऽपि, एकाचो द्वे प्रथमस्येत्यत्र, एकोऽज् यस्य स एकाजिति विशिष्टावयवोपलक्षितस्यावयविन इत्यादिना, अज्समुदायविशिष्टस्य शब्दस्यैकोऽजवयव इत्यङ्गीकारश्च । तत्रैकस्याचो विशिष्टावयवत्ववदत्र आद्यादीनां समुदायावयवत्वेन तद्वाचकपदानां समासेऽवयवसमासत्वस्य सुखेन सम्भवात् ।

एतस्यातद्गुणसंविज्ञानत्वं त्वेवम् । तथाहि । उक्तसूत्रे कैयटेन तद्गुणसंविज्ञानपदं द्वेधा व्याख्यातम् । तस्य अन्यपदार्थस्य गुणो विशेषणम् । तस्य संविज्ञानं यत्रेति । स धर्मिपदार्थो गुणो यस्यान्यपदार्थस्य तस्य संविज्ञानं यत्रेति च । तत्रोदाहरणं तु शुक्लवाससमानयेति । तत्र शुक्लवासःसंयुक्तपुरुषानयने पृथगचोदितान्यपि वासांसि सम्बन्धसामर्थ्यादानयनेन सम्बध्यन्त इत्युक्तम् । इदं च लम्बकर्णमानयेत्यादावपि तुल्यम् । एवं चान्यपदार्थविशेषणस्य यत्र सम्बन्धसामर्थ्यात् कार्यसम्बन्धस्तत्र तद्गुणसंविज्ञानः । यत्र तस्य सम्बन्धसामर्थ्यात् कार्ये सम्बन्धाभावस्तत्रातद्गुणसंविज्ञानः । यथा चित्रगुमानयेत्यत्र । अत्र हि पुरुषानयने समासवाच्यपदार्थभूतानां चित्राणां गवां सन्निधानाभावान्न कार्येण सह सम्बन्ध इति । एवं

अथवा जन्मप्रभृति सर्वे भावविकारा आदिशब्देन गृह्यन्ते। तथाच जन्म च आदिश्चेत्येकवद्भावः। आदिशब्दश्च धर्मवाची। स च स्वसम्बन्धिनं लक्षयति। तस्योभयसापेक्षत्वादुत्पत्तेर्विद्यमानत्वादन्यानेव भावविकारानुपलक्षयतीत्यादिशब्देनान्ये भावविकाराः।

सति प्रकृतेऽन्यपदार्थभूतानां प्रधानानां स्थितिप्रलयाभिसंवेशानामेकदेशतया तद्विशेषणीभूतो य आदिस्तस्य प्रथमान्तस्यावर्त्तकतया जन्म विशेषणम्। स्वयं तु वर्तिपदार्थे विशेष्यः। तस्य धर्मरूपं यस्याधस्यं तदपेक्षाबुद्धिजन्यम्। तस्य निरूपत्वमपि स्थित्यादिजन्यमनः सोऽत्र सूत्रेऽर्थाद्दागातायां ब्रह्मकर्तृकभवनक्रियायां न सम्बध्यते। तदसम्बन्धे तद्द्वारा जन्मनोऽपि न सम्बन्ध इत्यस्य समासस्यातद्गुणसंविज्ञानत्वम्। इदं च तद्गुणसंविज्ञानस्य प्रथमलक्षणादूरे योध्यम्। द्वितीयलक्षणादरे तु तद्गुणकस्य विशेष्यस्यान्यपदार्थस्य संविज्ञानं समायाति। तच्च चित्रगुरित्यत्रापि वर्तत इति तद्वारणाय विशेषणसम्बन्धपूर्वक एव तस्य क्रियासम्बन्धो वक्तव्यः। तदाऽप्यत्र विशेष्यभूतानां स्थित्यादीनां विशेषणसम्बन्धपूर्वको न क्रियासम्बन्ध इति पूर्ववदेवातद्गुणसंविज्ञानत्वम्। यदि च संविज्ञानपदेन वर्तिपदार्थस्य तद्विशेष्यस्य वा प्रत्यक्षीभाव एवाद्रियते तदा तु विशेष्यविशेषणयोर्ज्ञातत्वेनास्माकं तत्प्रत्यक्षीभावाभावात् भाववृत्तसूक्ते, सो अङ्ग वेद यदि वा न वेदेति श्रावणाच्चातद्गुणसंविज्ञानत्वमिति न कोऽपि शङ्कालेशः। अत्रैतत्समासादरेण भाववृत्तसूक्ते, यदि वा नेतिवाक्ययोधितानाधानपक्षसूचनाज्जन्मस्थितिभङ्गादीनामाविर्भावादिरूपत्वबोधनेन भगवानेव तत्तद्रूपः क्रीडयाविस्तिरश्च भवतीति पुरुषसूक्तप्रकारो बोधितः। तथाच जन्म आविर्भाव आदिर्येषां प्रकाराणामित्यर्थो बोध्यः। प्रवाहसृष्टिबोधनाय प्रकारान्तरमाहुः *अथवेत्यादि*। प्रभृतिशब्दः पूर्वावधिवाचकः। *सर्वे इति * जायतेऽस्ति विपरिणमते वर्द्धतेऽपक्षीयते नश्यतीतिप्रतीतिसिद्धा यास्कोक्ताः षट्। कथं गृह्यन्त इत्यपेक्षायामाहुः। * तथाचेत्यादि। *

अथवा जन्मनो नादित्वम् । तदाधारस्य पूर्वमविद्यमानत्वात् । अन्ये त्वादिमन्तः । तदाधारस्य पूर्वं विद्यमानत्वात् । अत आदिशब्दः स्वाधारसद्धर्मवाची तद्धर्माणामुपलक्षकः । अथवा गमनप्रवेशयोर्भेदाज्जन्म आदिर्येषामिति । जात्यपेक्षयैकवचनम् ।

सर्वोऽपि द्वन्द्वो विभाषैकवद्भवतीत्येकवद्भावः । आदिशब्दश्च प्राथम्यरूपधर्मवाची । पूर्वतन्त्रे शब्दानां धर्मवाचकत्वस्य सिद्धत्वात् । स च स्वसम्बन्धिनं लक्षयति । तत्र कं लक्षयतीत्याकाङ्क्षायां तस्य यथोत्पत्त्याधारता तथाग्रिमेषु निरूपकता । प्राथम्यस्योभयसापेक्षत्वात् । अत उत्पत्तेरत्र कण्ठोक्तत्वेन विद्यमानत्वादन्यानेवोपलक्षयतीति तत्त्वार्थः । तेन विषयवाक्ययोर्दितौ स्थितिभङ्गौ प्रत्याहारन्यायेनान्येषामपि बोधकौ । कालादिगतमपि कर्तृत्वं भगवदीयमेव, न तु स्वतन्त्रमिति च बोधयितुमत्रादिपदोक्तिरिति तात्पर्यं सूचितम् । एवं व्याख्याने आदिपदस्य लाक्षणिकत्वम् । तथादिपदेन आदित्वधर्मवत्तया जन्मनोऽपि सङ्ग्रहीतुं शक्यत्वाज्जन्मपदवैयर्थ्यापत्तिरित्यरुच्या प्रकारान्तरेण व्याकुर्वन्ति * अथवा जन्मन इत्यादि * । बहिर्विद्यमाने जन्माधारे पश्चाज्जन्म चेत्तदा जन्म प्रत्याधारस्य तद्गतधर्मस्य चादिता सम्भवति । प्रकृते तु तन्नास्तीति जन्मनो नादित्वम् । अन्येषां तु भावविकाराणामुक्तयुक्त्यादिमतो हेतोरादिशब्दः स्वाधारसद्धर्मवाची आदित्वाधारभूतोऽस्तिपदवाच्यो धर्मस्तस्यान्यापेक्षया प्राथम्यात् तत्पूर्वकमेव तं वदन्नादित्वस्य सापेक्षतया तद्धर्माणां विपरिणामादीनामुपलक्षक इति न स्वार्थत्यागदोषो, नापि जन्मपदवैयर्थ्यदोष इत्यर्थः । अस्मिन् पक्षे असत्कार्यवाद आपतति । तथापि यदेतस्य कथनं तन्नृसिंहोत्तरतापिन्याद्युक्तमायिकसृष्टि प्रत्यपि भगवत एव कारणत्वमिति बोधयितुं, न तु पूर्वोक्तं पक्षं निराकर्तुमिति बोध्यम् । अथ मर्यादापुष्टिसंग्रहाय तद्गुणसंविज्ञानपक्षमभिसन्धायाहुः * अथवा गमनेत्यादि * गमनप्रवेशयोः पूर्वोत्तरावधिभूतसञ्चरप्रतिसञ्चरयोर्मध्ये कार्यस्वरूपस्य कारणतो भेदाज्जन्मादयो भवन्तीति जन्म आ-

. जन्म तु श्रुतत्वात् सिद्धम् ।

अथवा किमनया कुसृष्ट्या । जन्म आद्यस्य आकाशस्य यत इति । तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्येव विचार्यते । फलसम्बन्धित्वात् । तेनैकत्र सिद्धः शास्त्रार्थः प्रकारान्तरेऽपि । यतो वा इमानि भूतानीत्यत्र विस्फुलिङ्गवत् सर्वोत्पत्तिः । अत्र तु क्रमेणेति विशेषः । एतेन सर्व एव प्रकाराः सूचिता वेदितव्याः ।

दिर्येषां तत्तज्जातीयं जन्मादि । जातिरत्र विकारत्वं क्रियात्वं वा । अत्र, ब्राह्मणो जन्मतः श्रेयान्, न ब्राह्मणान्मे दयितं रूपमेतच्चतुर्भुजमित्यादाविव जात्यपेक्षयैकवचनम । तथाच यद्यपि, सुपां सुलुगिति जसो लोपे जन्मादीति सिद्ध्यति तथापि विकारान्तरसंग्रहेण न भवत्यतस्तदुपेक्षितम् । नपुंसकं तु सामान्ये । एतत्पक्षसंग्रहे बीजमाहुः । जन्म तु श्रुतत्वात् सिद्धमिति । जन्म तु, यस्मिन्निदं सं च विचैति सर्वमिति तैत्तिरीये श्रुतत्वाद् व्ययनात्मकबहिर्गमनरूपं सिद्धम् । तच्च सजातीयसंवलनवियोगादि संगृह्णत् समयनरूपं प्रवेशं च स्मारयतीति तद्गुणसंविज्ञानोऽपि युक्त इत्यर्थः ।

एवं पक्षत्रयेण व्याख्यायैतेषामत्र बोधनस्यानतिप्रयोजनत्वात् प्रतिपत्तिगौरवाच्चारुचिं सूचयन्तः प्रकारान्तरेण सूत्रं व्याकुर्वन्ति * अथवा किमित्यादि * । नन्वेवं सत्याकाशजनकत्वस्यैव लक्षणत्वमायाति, न तु सर्वभूतजनकत्वस्य तत्स्थित्यादिकर्तृत्वस्य च । तथा सति वाक्यान्तरे ब्रह्मभेदापत्तिरिति शङ्कायामाहुः * तेनेत्यादि * यद्वा, यतो वेति वाक्यं विषयत्वेनादरणीयं तदाप्ययं न्यायस्तु सर्वथाङ्गीकार्य एव । अन्यथा आकाशवाक्येऽपि ब्रह्मान्तरापत्तिः स्यात् । अतो जननप्रकारस्यैव भेदो न तु ब्रह्मण इति न कोऽपि दोष इत्यर्थः । यतो वेतिश्रुतौ, यत् प्रयन्त्यभिसंविशन्तीत्यस्य भागस्य यद् ब्रह्म प्रयन्ति प्रकर्षेणसृष्टिमार्गीयकर्तृःस्वराहित्येन प्रलये गच्छन्ति, अभितः संविशन्ति स्वपन्ति सुषुप्ताविव सत्सम्पन्ना भवन्तीत्यर्थो बोध्यः । एवं पक्षत्रयेण व्याख्याने बीजमाहुः * एतेने-

प्रश्नविचारे ब्रह्मणोऽप्यधिकृतत्वाद् ब्रह्मेत्यायाति । न स्वध्याहारः ।

शास्त्रं योनिः शास्त्रयोनिः । शास्त्रोक्तकारणत्वादित्यर्थः । शास्तीति शास्त्रं वेदः । सामान्यग्रहणं पूर्वकाण्डे पूर्वरूपेणावगतानां सङ्ग्रहार्थम् । यथाऽस्यैव कारणत्वं, नान्यस्य तथोपरिष्टाद् वक्ष्यामः । मतान्तरवज्जन्मादीनां न विकारित्वं किन्त्वा-

---

त्यादि * मूले एतच्छ्लिष्टप्रयोगेण वेदोक्ताः सर्व एव प्रकारा व्यासचरणैः संगृहीता ज्ञेयाः । तथाच क्वचित् साक्षात्, क्वचित् तटस्थत्वेन, क्वचित् किञ्चिद्द्वारा क्रमेणेति बोधनायास्माभिरपि तदाशयं स्फुटीकर्तुं पक्षत्रयेण व्याख्यानमित्यर्थः ।

नन्वत्र लक्ष्यानिर्देशात् प्रतिज्ञायां च सम्बन्धिविचारस्यैवाभिकृतत्वेन ब्रह्मणोऽनधिकृतत्वादत्र ब्रह्मानुवृत्तेरशक्यवचनत्वेन ब्रह्मपदं ब्रह्म वाऽध्याहार्यम् । कर्मषष्ठीपक्षे तु प्रकृतत्वादेव तत्प्राप्तेर्नायं दोष इत्यत आहुः * ब्रह्मेत्यादि * तथाचार्थादेव तत्प्राप्तेर्नोक्तदोष इत्यर्थः ।

एवं लक्षणबोधकं सूत्रांशं व्याख्याय प्रमाणबोधकमंशं व्याकुर्वन्ति * शास्त्र इत्यादि * शास्त्रे इति सप्तम्या वैषयिकमधिकरणं बोध्यते । शास्त्रविषयो योनिः शास्त्रयोनिः । विषयत्वं प्रतिपाद्यत्वम् । तदेतदभिसन्धायाहुः * शास्त्रोक्तेत्यादि * । * शास्तीति * राजवदाज्ञापयति । एतेन तद्विरोधेऽपराधोऽपि बोधितः । नन्वत्रोत्तरकाण्डार्थ एव विचार्यत इति शास्त्रशब्दस्य कुतः प्रयोग इत्यत आहुः * सामान्येत्यादि * । * पूर्वरूपेणावगतानामिति * भाष्यवृत्तसूक्तादीनाम् । एतेन वेदार्थतयैवात्र सूत्रकृतो ब्रह्म विवक्षितमिति श्लोके बीजं प्रदर्शितम् । ननु योनिशब्दो निमित्तवाची प्रायो दृश्यते इति साधारणेन कारणपदेन कुतो व्याख्यायत इत्यत आहुः * यथेत्यादि * । * उपरिष्टादिति * अग्रिमसूत्रे, तथाचातो व्याख्यात इत्यर्थः । अत्र केचिज्जन्मादिसूत्रस्थेन यत इति पदेनैव विषयश्रुतेः स्मारणात् सिद्धे शास्त्रप्रमाणकत्वे, शास्त्रयोनित्वसूत्रं व्यर्थमित्याहुः । तन्न । यत इत्य-

विर्भावतिरोभावावेव तथोत्तरत्र वक्ष्यते, तदनन्यत्वाधिकरणे। नामलीलाया अपि न पृथङ्निरूपणं प्रपञ्चमध्यपातात्।

केचित् पृथगुरूपनामप्रपञ्चकर्तृत्वं योगविभागेन प्रतिज्ञाय समन्वयादिसूत्रेष्वेव हेतून् वर्णयन्ति। अन्वयसिद्ध्यर्थं च अतति व्याप्नोतीत्यत। शास्त्रे योनित्वं प्राप्तं तदिति। नैतत् सूत्रकारसम्मतमिति प्रतिभाति।

स्य हेतुकोटौ प्रवेशो जन्माद्यस्येतिभागस्य प्रपञ्चवृत्तान्तपरतया ब्रह्मलक्षणत्वायोगेनासङ्गतत्वप्रसङ्गात्। नच लक्षणे प्रविष्टस्यैव यतःशब्दस्योक्तश्रुतिस्मारकत्वमित्यपि युक्तम्। श्रुतौ भूतानीति बहुवचनेन लक्षणस्य तद्विरुद्धत्वापत्तेः। नच जात्यपेक्षयैकवचनान्न विरोध इति वाच्यम्। तथा सति वाक्यान्तरासङ्ग्रहेण ब्रह्मभेदापत्तेः। तस्माच्छास्त्रयोनित्वादित्यवश्यं प्रणेतव्यम्। ननु तथापि साधारणशब्देन व्याख्यानमयुक्तम्। जन्मादीनामादिमत्तया असत्त्वेनाग्रिमसूत्रेऽपि तटस्थकारणताया एव सिद्धेरित्यत आहुः। मतान्तरेत्यादि। न्यूनताख्यरूपं प्रतिज्ञादोषं परिहरन्ति * नामेत्यादि *

शाङ्करमतमनुवदन्ति * केचिदित्यादि * तन्मते द्विसूत्रं जन्माद्यधिकरणम्। तत्र द्वाभ्यां प्रतिज्ञा। तत्र द्वितीयसूत्रे पञ्चम्यन्तयादन्वयसिद्ध्यर्थं तथा वर्णयन्तीत्यर्थः। तद् दूषयन्ति * नैतदित्यादि * शास्त्रयोनिरित्येतावतैव प्रतिज्ञासिद्धावपि स्यादित्यधिकरणकथनाद् अग्रिमसूत्रे पुनः साध्यपरामर्शाच्च तथेत्यर्थः। यत्पुनः शास्त्रस्य योनिरिति षष्ठीतत्पुरुषमङ्गीकृत्य महत ऋग्वेदादिशास्त्रस्य सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य सम्भवो, न सर्वज्ञादन्यतः सम्भवतीत्येवं ब्रह्मणः सर्वज्ञत्वं समर्थितम्। अस्य महतो भूतस्य निःश्वसितं यद् ऋग्वेद इत्यादिबृहदारण्यकीयश्रुतिमादाय पुरुषनिःश्वासवद् वेदसम्भवश्च तत उक्तः। तत्तु मध्वभाष्यव्याख्यात्रा जयतीर्थेनैव दूषितम्। इदं शास्त्रस्य निर्मितत्वं किमर्थमुपलभ्य रचितत्वं वा, निःसृतमात्रत्वं वा। नाद्यः। कणादाक्षचरणानुसरणप्रसङ्गात्।

श्रुत्यादिविरोधाच्च । न द्वितीयः । शास्त्रयोनित्वस्य सार्वज्ञ्यसाधकत्वाभावप्रसङ्गादिति । इदमपि युक्तम् । पूर्वविकल्पे वेदस्यानित्यत्वप्रसङ्गात् । द्वितीये निःश्वासस्याबुद्धिपूर्वकत्वेन तथात्वादिति । एतेन, विमतं ब्रह्म वेदगतसर्वविषयप्रकाशनशक्त्याधारः । वेदोपादानत्वात् । दीपगतप्रकाशनशक्त्याधारदीपोपादानवह्निवदिति विवरणोक्तमनुमानं, निःश्वासात्मकवेदोपादानत्वेनाबुद्धिपूर्वकनिःश्वासोपादानपुरुषदृष्टान्तसनाथेन प्रतिसाधनेनापास्तम् ।

यत्तु भामतीनिबन्धे, वर्णनित्यत्वपक्षेऽपि पदानामानुपूर्वीविशिष्टवर्णात्मकत्वाद् वाक्यानां च तादृशपदात्मकत्वादानुपूर्व्याश्च व्यक्तिधर्मत्वादानुपूर्व्युपगृहीतानां नित्यानामपि वर्णानां पदत्ववाक्यत्वयोरनित्यत्वेन लोके वेदे च न तयोः पौरुषेयत्वे विवादः । किन्तु वेदवाक्ये पुरुषस्वातन्त्र्यास्वातन्त्र्ययोः । तत्र स्वातन्त्र्यकोटिः काणादादीनाम् । द्वितीयां तु जैमिनीया वेदाध्ययनं प्रति गुरुशिष्यपरम्परानादित्वेन समर्थयन्ति । वैयासास्तु, अनाद्यविद्योपधानलब्धसर्वशक्तिज्ञानस्य परमात्मनो वेदजनकत्वेऽपि पूर्वपूर्वसर्गानुसारितादृक्तादृगानुपूर्वीविरचनेन । अतः पुरुषास्वातन्त्र्यमात्रमेव वेदे अपौरुषेयत्वमित्युक्तम् । तदप्यसङ्गतम् । वर्णवद् वैदिकपदादीनामपि नित्यत्वात् । वाचा विरूपनित्ययेति, वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम, वेदस्य चेश्वरात्मत्वादित्यादिश्रुतिपुराणवाक्येषु वेदपदादानुपूर्वीवैशिष्ट्य एव वेदत्वेन तादृशस्यैवेश्वरात्मकत्वात् । ईश्वरस्याविद्योपधानेन सार्वज्ञ्यलब्धेरप्यभ्युपगमैकशरणत्वात् । तादृशानुपूर्वीरचनया अस्वातन्त्र्ये राजाज्ञानुवादकराजदूतवदानुपूर्वीरचनामात्रेणेश्वरसार्वज्ञ्यासिद्ध्या व्याख्येयग्रन्थविरोधाच्च । अतः स्थितस्य गतिचिन्तनमात्रायायं प्रयासः । जगत्कर्तृत्वेनैवोभयविधतत्कर्तृत्वस्य, तेनैव सार्वज्ञ्यस्यापि सिद्धौ भाष्यकारस्याप्यपार्थ एव प्रयास इति दिक् ।

अन्यैस्तु शास्त्रं योनिः कारणं प्रमाणमस्येति व्याचक्षाणैर्बहुव्रीहिरङ्गीकृतः । सोऽप्ययुक्तः । लक्षणाप्रसङ्गात् । स्वारसिकार्थत्यागाच्च ।

विज्ञानेन्द्रभिक्षुणा तु शास्त्रं योनिः मूलप्रमाणं यस्मिन्निति सप्तम्यर्थं बहुव्रीहिमङ्गीकृत्योक्तम् । अत्र शास्त्रादितिविकल्पे यच्छा-

तस्मात् सर्वज्ञत्वं सर्वशक्तिमत्त्वं च सिद्धं जगत्कर्तृत्वेन ।

ननु न सर्वो वेदो ब्रह्मणो जगत्कर्तृत्वे मानम् । तपोयज्ञादियुक्तप्रजापतिप्रभृतीनामेव जगत्कारणत्वस्य पूर्वकाण्डे तत्तदुपाख्यानेष्ववगम्यमानत्वात् । नचावान्तरकारणत्वम् । परस्याश्रवणात् । उत्तरकाण्डे तु द्वयप्रतिपादनाद् विरोधः । सन्देहश्च ।

शास्त्रयोनित्वादित्युक्तं, तच्छास्त्राविरुद्धानुमानस्मृतियोगिप्रत्यक्षादिसंग्रहाय । अत एवाग्रे, उपपत्तेश्चेत्यादावनुमानम् । स्मृतेश्चेत्यादौ स्मृतिः । आचारदर्शनाच्चेत्यादावाचारदर्शनमुखेन योगिप्रत्यक्षादिकं च संगृहीतमिति । तदत्रैवाग्रे मया दृश्यम् ।

उक्तार्थं निगमयन्ति * तस्मादित्यादि * तथाचात्र निरङ्कुशजगत्कर्तृत्वेन शास्त्रप्रतिपाद्यत्वमिति लक्षणं सिद्धमित्यर्थः । तत्र धर्मादिवारणाय तृतीयान्तम् । प्रकृत्यादिवारणाय शेषम् । तेन लक्षणे विवादाध्यासितत्वदोषपरिहारः । प्राजापत्यादिवारणाय * निरङ्कुशेति ज्ञेयम् ।

अथानादिसृष्ट्यादिनो मीमांसका बीजाङ्कुरदृष्टान्तेन सृष्टिप्रवाहानादित्वं वदन्तस्तपोयज्ञाद्युपचितपुण्यविशेषलब्धशक्तीनां प्रजापतिप्रभृतीनां क्षेत्रज्ञानामेव तत्तत्कल्पेषु कारणत्वमभिमन्यमाना ब्रह्मणो निरङ्कुशं जगत्कर्तृत्वमसहमानाः प्रत्यवतिष्ठन्ते *ननु नेत्यादि* * तत्तदुपाख्यानेष्विति * प्रजापतिरकामयत प्रजाः सृजेयेति । स तपोऽतप्यत । स सर्पानसृजतेति । आपो वा इदमग्रे सलिलमासीत् । तस्मिन् प्रजापतिर्वायुर्भूत्वाऽचरदित्यादिषु तथैव पौराणेष्वपीत्यर्थः । * परस्येति * प्राजापत्यादिव्यतिरिक्तस्य । तथाच न पूर्वकाण्डस्य तत्र प्रामाण्यम् । ननु यथोपक्रमस्य सन्दिग्धत्वेन निर्णय उपसंहारेण भवति, तथावान्तरकाण्डेन निर्णय इति शङ्कायामाह *उत्तरेत्यादि* * द्वयप्रतिपादनादिति * यतो वा इमानीत्यादौ ब्रह्मणः कर्तृत्वस्य, नित्यशुद्धबुद्धेत्यादावकर्तृत्वस्य प्रतिपादनाद्विरोध, उभयत्रापि श्रौतत्वस्य साधारण्यादेकतरपक्षपातस्याशक्यत्वेन सन्देहश्चेति तस्याः प्रापदग्रांशोत्तरकाण्डेन तन्निर्णय इत्यर्थः । तर्हि तन्मीमांसया निर्ण-

मीमांसायाः सन्देहनिवारकत्वेऽप्येकांशस्याप्रामाण्यं स्यात् । उभयसमर्थने शास्त्रवैफल्यं वा । वेदप्रामाण्यादेव तत्सिद्धेः । बाधितार्थवचनं वेदे नास्तीत्यवोचाम ।

किञ्च । वेदान्ताः किं वेदशेषा, वेदा वा । नाद्यः । अनुपयोगात् । अनारभ्याधीतत्वेन तदुपयोगित्वे पूर्वकाण्डविचारेणैव गतार्थत्वम् । विद्याप्रवेशश्च । न द्वितीयः । यज्ञाप्रतिपादनात् । मन्त्रब्राह्मणत्वाभावाच्च । तस्माद् वेदोपरा वेदान्ता इति तेषां किं स्यादिति चेत् ।

योऽस्तीत्यत आह * मीमांसाया इत्यादि * तथाच मीमांसायाः कर्तृत्वाकर्तृत्वान्यतरप्रसाधकत्वे अप्रसाधितांशबोधकवेदान्ताप्रामाण्यापत्तिरुभयप्रसाधकत्वे मीमांसाया एव वैयर्थ्यमित्युभयथापि कौण्ठ्यान्न तस्या निर्णायकत्वमिति सर्वेष्वपि वेदे निरुक्तं जगत्कर्तृत्वं कुत्रापि कस्यापि न सिद्ध्यतीत्यनादिसृष्टिवाद एवादरणीय इत्यर्थः ।

एवं ब्रह्मस्वरूपविचारेण जगत्कर्तृत्व आक्षिप्तेऽपि यदि तद्बोधकप्रमाणप्राबल्यं स्यात् तदानुपलब्धस्य धर्मस्येव तत्सिद्धिः स्यादिति वेदान्तानां प्रामाण्यमाक्षिपति * किञ्चेत्यादि * यदि वेदशेषाः स्युस्तदा द्रव्यदेवतादि प्रकाशयन्त इतिकर्तव्यतां वा बोधयन्तो वेदार्थे यागे क्वचिदुपयुक्ताः स्युः । तत्तु न दृश्यते । अथानारभ्याधीता अपि स्मृतयो गृह्यसूत्राणि च यथा, मानवी ऋचौ धाय्ये कुर्याद्, यद्वै किञ्च मनुरवदत्तद्भेषजमिति, अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयीतेत्यादिवाक्येनाग्निसमिन्धनादावुपनयनादौ चोपयुज्यमानाः शेषभावं भजन्ते । तथैव वेदान्ता अपि, यदेव विद्यया करोतीत्यादिवाक्येन वेदोक्तकर्मसूपयुज्यमाना वेदशेषा इत्युच्यते तदा पूर्वमीमांसायां तृतीये शेषशेषिभावस्याद्ये स्मृतिपादे तत्प्रामाण्यस्य च विचारितत्वात् तथैव गतार्थत्वाद् व्यर्थेवोत्तरमीमांसा वेदान्तानां च स्मृतिवद् विद्यास्वेव प्रवेशो, न वेद इति । नापि धर्माद्यन्यतमपुरुषा

मैवम् । अस्ति तावद् वेदत्वम् । अध्ययनादिभ्यः स्मरणा-च्च । प्रमाणं स सर्वोऽपि वेदः स्वार्थे । स च न यज्ञश्चेद् ब्रह्म भवतु । नचैतावता अवेदत्वम् । अतिप्रसङ्गात् ।

र्थप्रकाशकत्वेन तत्र प्रवेशः । स्मृतावपि तौल्यात् । अत एव शिक्षोप-निषदि, वेदमनूच्याचार्योऽन्तेवासिनमनुशास्तीति वेदानुवचनानन्त-रमुपनिषदनुशासनं पठितम् । पुराणेऽपि साङ्गोपनिषद इति वेदेभ्यः पृथक् तासां ग्रहणश्चेति युज्यत इति, * विद्याप्रवेशश्चेति चकारेण समु-च्चीयते । यदि वेदास्तदा, आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थाना-मिति, तद्भूतानां क्रियार्थेन समाम्नाय इत्यादिपूर्वतन्त्रवाक्याद् वेदो-ऽखिलो धर्ममूलमित्यादिस्मृतिवाक्याच्च यागतच्छेषान्यतरप्रतिपादकाः स्युः । यथा, अग्निहोत्रं जुहोतीत्यादयः । तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा, वारुणो यवमयश्चरु इत्यादयश्च । ब्रह्म तु ज्ञानपेर इति नोभयरूपमिति तत्प्रतिपादकानां कथं वेदत्वम् ।

किञ्च । वेदो हि मन्त्रब्राह्मणसमुदायात्मकः । तत्र मन्त्रा नाम प्रयोगकालेऽनुष्ठानौपयिकार्थस्मारका वाक्यानि । तद्भिन्नं च ब्राह्मण-मिति, तच्चोदकेषु मन्त्राख्या, शेषे ब्राह्मणशब्द इति सूत्राभ्यां तल्लक्षणं निर्णीतम् । वेदान्तेषु तु विध्यनङ्गीकारेण प्रयोगाद्यभावात् तद्वाक्येषु मन्त्रत्वाद्यभावः । अत आर्यप्रसिद्धिमात्रेण वचनेऽपि वेदत्वे तेषामूषर-भूमिवद् वेदोपरत्वेनापार्थत्वात् तेषां विचारे किं फलं स्यात् । सर्वो-ऽपि प्रयोजनोद्देशेनैव प्रवर्तत इति फलाभावात् प्रवृत्तिविघाते तन्मी-मांसाऽप्यपार्थेति तत्साधिते ब्रह्मणो जगत्कर्तृत्वेऽत्यन्ताभिनिवेशो न कार्य इत्यर्थः ।

अत्र समादधते । * मैवमित्यादि * । न वेदान्तेषु वेदोपरत्वं, किन्तु वेदत्वमेव । अध्ययनाध्यापनज्ञानविधिभिर्वेदं पठन्तः पाठय-न्तोऽर्थं चावगच्छन्त आर्याः स्वरपूर्वक्रमनध्यायशूद्राऽश्रवणादिनिय-मान् पालयन्त एव तथा कुर्वन्तीत्याचारपरम्परया, 'स्वयम्भूरेष भग-वान् वेदो गीतस्त्वया पुरा । शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारकाः' इति पुराणोक्तस्य स्मरणस्यात्रापि तुल्यत्वेन च तन्निर्धारा-त् । किञ्चौत्पत्तिकसूत्रे बादरायणग्रहणं पूजार्थं कृत्वा अलौकिकेऽर्थे

शक्यते ह्यग्निहोत्रादीनामन्यतरदनन्तर्भाव्य तथा वक्तुम् । तस्माद् ब्रह्मापि प्रतिपादयन्तो वेदान्ता वेदत्वं न व्यभिचरन्तीति ।

मन्त्रब्राह्मणरूपत्वं चोपपादयामः । ऋगेव मन्त्रः । ब्रह्मप्रतिपादकं ब्राह्मणम् । तच्छेषाः सूत्रादिप्रतिपादकाः ।

परानपेक्षं वेदस्य प्रामाण्यं जैमिनिना प्रतिपादितम् । ततश्च सोऽलौकिकोऽर्थः को वेदस्यापेक्षायां यथा तन्मते यज्ञस्तथा व्यासमते ब्रह्म । अनुपलब्धार्थत्वस्योभयत्रापि तौल्यात् ।

किञ्च । यागप्रतिपादकत्वेन वेदत्वं मन्वानो भवान् पृच्छाम । किं यावद्यज्ञप्रतिपादकत्वं वेदत्वम्, उत यत्किञ्चित्तत्प्रतिपादकत्वम्, अथवा यथाकथञ्चित् तत्प्रतिपादकत्वमिति । नाद्यः । अग्निहोत्रादिप्रतिपादकस्य भागस्य तदितरयज्ञाप्रतिपादकत्वेनावेदत्वप्रसङ्गात् । न द्वितीयः । सर्वस्य तथात्वप्रसङ्गात् । मनुः पुत्रेभ्यो दायं व्यभजदित्याद्यर्थवादस्यापि तथात्वप्रसङ्गाच्च । तृतीयश्चेत् सिद्धं ब्रह्मप्रतिपादकत्वेऽपि वेदत्वम् । वक्ष्यमाणरीत्या तेषामपि यज्ञार्थत्वेन तथात्वादिति । तदेतदुक्तं *शक्यते हीत्यादिना* । अत्रान्यतममिति वक्तव्ये अन्यतरदिति प्रयोगस्तु, महाभाष्ये प्रत्ययः परश्चेत्यत्र निमित्तविचारं प्रकृत्य तदुदाहरणे तद्यथा बहुष्वासीनेषु कश्चित् कञ्चित् पृच्छति, कतरो देवदत्त इत्यत्रैवोपाध्यनङ्गीकाराद् बोध्यः ।

स्वरूपतः सन्देहं वारयन्ति । * मन्त्रेत्यादि * । तच्चोदकेत्यादिसूत्राणां विचारे ह्याम्नातत्वे सति कर्मसाधनत्वेन विधिविभितोच्चारणकः शब्दो मन्त्रः । तथात्वे सति मन्त्रभिन्नः शब्दो ब्राह्मणमिति तयोर्लक्षणम् । तदुभयात्मकत्वं च वेदलक्षणं सिद्ध्यति । न तु विधेयार्थस्मारको मन्त्र इति लक्षणम् । तस्य, वसन्ताय कपिञ्जलानालभेतेत्यत्राऽव्याप्तेः । एवं मननहेतुर्मन्त्र इत्यस्य ब्राह्मणेऽतिव्याप्तेः । अस्यन्तरत्यान्त उत्तमपुरुषान्त इत्यादीनां परस्परं प्रयोगकरणभूतः शब्द इत्यस्य प्रत्यगाशीर्मन्त्रे चाव्याप्तेः । किन्त्वभियुक्तानां यत्र मन्त्र इति समाख्यानं स मन्त्र इति लक्षणमङ्गीक्रियते । यदि तु चरणव्यूहानुरोधेन वसन्तायेत्यादीनां ब्राह्मणत्वमङ्गीकृत्य प्र

यद्यपि न विधीयते, तथापि तादृशमेव ज्ञानं फलायेति युक्तमुत्पश्यामः । पूर्ववैलक्षण्यन्तु भूषणाय ।

काण्डद्वयस्यान्योन्योपकारित्वाय साधारणग्रहणम् । यदेव विद्यया करोतीत्यादिना पूर्वशेषत्वं सर्वस्य । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्तीत्यादिना सर्वस्योत्तरशेषत्वम् । कर्मब्रह्मणोः क्रियाज्ञानयोर्धर्मिपरत्वेनैक्यात् कर्तृवाक्येषु सर्वत्र न विरोधः । तस्माच्छास्त्रयोनित्वं सिद्धम् ।

योगकरणभूतः शब्दो मन्त्र इति सौत्रमेव लक्षणमाद्रियते, तदपि जपोपासनादिप्रयोगं प्रत्यपि प्रत्यगाशीःप्रभृतिमन्त्राणां विषयत्वादिना करणत्वमस्त्येवेत्यदोषः । तच्चर्क्सामयजुष्वेव प्रसिद्धम् । निगदादीनामपि तत्रैव निवेशः । ब्राह्मणलक्षणमप्यत एव प्रसिद्धम् । वेदान्तेषु च, सत्यं ज्ञानमित्यादीनाम् ऋचाम्, अच्युतमसीत्यादीनां यजुषां, हावु हावु हावु इत्यादीनां साम्नां च विद्यमानत्वात् नान्येव मन्त्रः । ऋगित्युपलक्षणम् । तद्भिन्नं ब्रह्मप्रतिपादकं ब्राह्मणम् । ब्रह्मप्रतिपादकभागशेषाः, सृष्ट्यादिप्रतिपादकभागा ब्राह्मण एव निविशन्ते । ततश्च मन्त्रब्राह्मणसमुदायरूपत्वात् सिद्धं वेदान्तानां वेदत्वमिति ।

तर्हि वेदोपरत्वं कथं निवर्ततामित्यत आहुः । * यद्यपीत्यादि * । तथाच वेदे बाधितार्थवचनस्याभावादविधीयमानमपि ज्ञानं यथोक्तं फलं जनयिष्यत्येवेति नोपरत्वमित्यर्थः । ननु पूर्वमीमांसायां विहितस्यैव फलवत्त्वं साधितमिति कथं तथेत्यत आहुः । * पूर्वेत्यादि * । तथाच, गुणे त्वन्यायकल्पनेति तत्रैवोक्तत्वाद् वेदगुणभूतस्य जैमिनीयस्यैव निर्णयस्य हीनाधिकारिपरत्वं वेदविरोधे कल्पनीयमित्यर्थः ।

एवं भाट्टादिकृतं पूर्वपक्षं परिहृत्य काण्डद्वयस्यैकवाक्यत्वबोधनाय शास्त्रपदप्रयोग इति पर्यवसितं तदर्थमाहुः । *काण्डेत्यादि* । एकवाक्यत्वप्रकारमाहुः । * यदेवेत्यादि * । * इदं चतुर्थाध्याये, यदेव विद्ययेति हीतिसूत्रे व्युत्पादयिष्यते । * ऐक्यादिति * । अभिधेयप्रयोजनयोरैक्यात् । तथाच, यज्ञो वै विष्णुरिति श्रुतेर्धर्मो यस्यां म-

केचिदत्र जन्मादिसूत्रं लक्षणत्वादनुमानमिति वर्णयन्ति ।

द्यात्मकः, मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्, एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम्, मायामात्रमनूद्यान्ते प्रतिषिद्ध्य प्रसीदतीत्येकादशस्कन्धे भगवद्वाक्याच्च ब्रह्मवादेन सर्वस्य ब्रह्मात्मत्वात्तथानिरूपणनिर्वाहयात्मानि भिदा बाध इति वाक्याद् भेदबुद्धिबाधां विधातुंपूर्वकं यज्ञादिकरणं कर्मणोऽफलत्वम् । ते च वेदान्ताधीने इति पूर्वकाण्डस्य वेदान्तापेक्षित्वं, वेदानुवचनयागादिसाधनैर्भगवत्प्रसादाच्छुद्धे चेतसि विद्योदेतीति साधनावबोधकवेदभागापेक्षित्वं वेदान्तानाम् । यद्यप्युभयत्र पुरःस्फूर्त्या कर्म ज्ञानं च यथायथं प्रतीयते, तथापि पूर्वोक्तश्रुतिस्मृतीनां वक्ष्यमाणानां च तासां विचारे क्रियाज्ञानयोर्धर्म्यात्मकत्वेनाभिधेयस्यैक्यम् । समुच्चिताभ्यां तान्यां यथाधिकारं ब्रह्मभावः, परमा सिद्धि फलमिति प्रयोजनस्याप्यैक्यमित्येवं सिद्ध एकवाक्यत्वे सर्वत्र कर्तृत्वेनोच्यत इति न पूर्वोत्तरकाण्डयोर्विरोधः । शेषशेषिभावस्याविशिष्टत्वेऽपि पुरुषकर्मफलेषु यथा आशङ्कायाः फले पर्यवसानात् फलमेव पूर्वकाण्डे मुख्यं तथाऽत्राऽपीति फलवाक्यवद् वेदान्तानामेव मुख्यत्वज्ञापनाय कौशीतकिब्राह्मणे ऋचां मूर्द्धानं यजुषामुत्तमाङ्गं साम्नां शिरोऽथर्वणां मुण्डमिति मूर्द्धत्वादि श्राव्यते । तस्मादुपरत्वगन्धस्याप्यभावाद् ब्रह्मणः शास्त्रैककारणत्वं निष्प्रत्यूहमित्यर्थः ।

एवं सिद्धान्तमुक्त्वा आधुनिकानामन्येषां आभ्यक्तां ब्रह्मणः कर्तृत्वस्य शास्त्रैकप्रमाणकत्वांशे विप्रतिपत्त्यभावात् तन्मतानुवादमकृत्वा केषां चिद् वैशेषिकाद्यनुसारिणां मतमनुवदन्ति * केचिदित्यादि * । अग्रेऽर्थं बोध्यम् । वैशेषिकादिदर्शनाभिमानिनस्तावद् बाह्यानां मीमांसकानां कापिलानां च निरासाय निखिलजगदेककर्तारमीश्वरमनुमानेनैव साधयन्ति । तथाहि । जगत् कार्यं सावयवत्वाद्, महत्त्वे सति क्रियावत्त्वाद्, महत्त्वे सति मूर्तत्वाच्च घटादिवदिति जगतः कार्यत्वे सिद्धे, जगद् बुद्धिमत्कारणपूर्वकं कार्यत्वाद् घटादिवदितिसाधनेन जगतस्तथात्वे सिद्धे, स बुद्धिमान् को वेत्यपेक्षायामत्र

जगत्त्वेन क्षित्यादिवायुपर्यन्तानां विचित्राणां महाभूतानां महत्त्वात् तादृशां तेषां जगत्त्वेन तदुपादानोपकरणसम्प्रदानप्रयोजनाभिज्ञः कश्चिदेकः पुरुष आक्षेपः। कार्यत्वस्य तदुपादानोपकरणसम्प्रदानप्रयोजनाभिज्ञकर्तृकत्वव्याप्तत्वात् । एवञ्च क्षेत्रज्ञानां तादृशाभिज्ञत्वाभावेन प्रकृतेश्चेतनत्वाभावेन च जगत्कर्तृत्वनिवृत्तौ सुखेन जगत्कर्तुरीश्वरस्य सिद्धिरिति । एवं प्रमाणान्तरेणेश्वरस्य तज्जगत्कर्तृत्वस्य च सिद्धौ जन्मादिसूत्रस्यापि लक्षणत्वात् तदितरभेदसाधने पृथिवीत्ववदीश्वरत्वेनानन्तरव्यतिरिक्तः, जगज्जन्मादिकर्तृत्वाद् यन्नैवं तन्नैवमित्यनुमानरूपं सूत्रमित्येकं मतम् । तदसङ्गतम् । जगत्कर्तृसाधकस्य कार्यत्वस्य हेत्वाभासत्वात् । यथाहुर्भास्कराचार्याः । जगत् न बुद्धिमत्कारणपूर्वकं कार्यत्वाद् बीजोत्पन्नाङ्कुरवदिति साधारणो हेतुः । किञ्च जगता सहेश्वरसम्बन्धस्यात्यन्तापरिदृष्टत्वेन साध्यस्य पक्षधर्मत्वाभावादयं विरुद्धोऽपि । यस्य कस्यापि बुद्धिमतः साधने सिद्धसाधनत्वं च । तथा घटादिदृष्टान्तबलेन कार्यत्वसमानाधिकरणस्यानीश्वरासर्वज्ञशरीरेन्द्रियादिमत्कर्तृकत्वस्य सिद्ध्या विवक्षितेश्वरासिद्धिश्च । तादृशजीवसिद्ध्याऽर्थान्तरत्वेनापि तदसिद्धिश्च । नचैवं घटादिदृष्टान्तेन शब्दे कृतकत्वादनित्यत्वसाधने दृष्टान्तीयानां वाक्यत्वादीनामापत्त्याऽनुमानोच्छेदप्रसङ्गः । लिङ्गिनः शब्दस्य प्रमाणान्तरागोचरत्वेन शब्दे वाक्यत्वादीनां निवृत्त्या तदनुच्छेदात् । अत्यन्तापरिदृष्टे ब्रह्मणि त्वन्वयव्यतिरेकपरिशुद्धानां तेषां निवर्तकस्याभावेन तादृशधर्मापत्तेरनिवार्यत्वात् । अतः शास्त्रैकसमधिगम्यं ब्रह्मेति ।

रामानुजाचार्यास्त्वेतेषु दूषणेषु शैथिल्यं प्रदर्श्य प्रकारान्तरेण शास्त्रैकसमधिगम्यत्वं साधयन्ति । तथाहि । सावयवत्वादिलिङ्गकैः पूर्वोक्तानुमानैः कृत्वा सिद्धत्वेन जगतः कार्यत्वं न प्रत्याख्यातुं शक्यते । नच जगदकार्यम् अशक्यक्रियत्वाद् अशक्योपादानादिविज्ञानत्वाच्च, आकाशवदिति प्रतिपक्षसद्भावात् प्रत्याख्यातुं शक्यमिति वाच्यम् । आकाशे निरवयवत्वस्यानुकूलतर्कस्य सत्त्वेन तस्याकार्यत्वेऽपि जगद्रूपेषु महीमहीधरादिषु वाय्वन्तेषु तदभावेन तयोरप्रयोजकतयाऽऽकाशदृष्टान्तेन तेषामकार्यत्वस्य साधयितुमशक्यत्वात् । एवं निरवयवत्वेनोपाधिनैव क्षित्यादिवायुपर्यन्तानि अकार्याणि महाभूतशब्दवाच्यत्वाद् आकाशवदित्यपि प्रत्यनुमानं निरस्तम् । एवं सिद्धे

कार्यत्वे शरीराक्रियत्वशरीरोपादानादिविज्ञानत्वयोरपि कार्यत्वेनैव सिद्ध्या तयोरपि प्रतिपक्षत्वमेव । तथाहि । घटमणिकादिषु कृतेषु कार्यदर्शनानुमितकर्तृगतनिर्माणशक्तिज्ञानः पुरुषोऽदृष्टपूर्वं विचित्रसन्निवेशं नरेन्द्रभवनमालोक्य अवयवसन्निवेशविशेषेण तस्य कार्यत्वं निश्चित्य तदानीमेव कर्तृतज्ज्ञानशक्तिवैचित्र्यमनुमिनोति । अतस्तु भुवनादेः कार्यत्वे सिद्धे तावत्सर्वसाक्षात्कारनिर्माणादिनिपुणः कश्चित् सिद्ध्यत्येव । विवादाध्यासितं भूभूधरादिकं स्वनिर्माणसमर्थकर्तृपूर्वकं कार्यत्वात् सार्वभौमसदनवदिति प्रयोगात् । किञ्च सर्वचेतनानां सुखदुःखभोगस्य धर्माधर्मसाधनत्वेऽपि धर्माधर्मयोरचेतनत्वाच्चेतनाधिष्ठानमन्तरेण तयोः फलहेतुत्वानुपपत्तेः सर्वकर्मानुगुणसर्वफलदानचतुरः कश्चिदीश्वरः । वर्धकिनानधिष्ठितस्य वास्यादेरचेतनस्य देशकालाद्यनेकपरिकरसन्निधानेऽपि यूपादिनिर्माणसाधनत्वादर्शनात् । तथाच प्रयोगः । धर्माधर्मौ चेतनाधिष्ठितत्वेनैव फलोपधायकौ अचेतनत्वाद् वास्यादिवदिति । नच पूर्वानुमाने कार्यत्वस्य हेतोर्बीजोत्पन्नाङ्कुरदृष्टान्तेन साधारणत्वं शङ्क्यम् । अङ्कुरादौ सन्दिह्यमानत्वाहितत्वेन पक्षसमतया पक्ष एवान्तर्भावात् । एतेनैव सुप्तादिदृष्टान्तोऽपि प्रत्युक्तः । नच लाघवादुभयत्रापि प्रतिपक्षेऽज्ञानामेवाधिष्ठातृत्वमत्र कल्पयितुं शक्यम् । तेषां सूक्ष्मव्यवहितविप्रकृष्टदर्शनाद्यशक्तिनिश्चयात् । कल्पनाया दर्शनानुसारित्वस्यैव युक्तत्वात् । नचेश्वरेऽप्येतादृगव्याप्तिः । तत्र तन्निश्चायकप्रमाणाभावात् । अतः प्रमाणान्तरतो न तत्सिद्ध्यनुपपत्तिः । तथाचोक्तानुमानेन सिद्ध्यन् स्वाभाविकसर्वार्थसाक्षात्कारतन्नियमनसामर्थ्यसम्पन्न एव सेत्स्यतीति न तस्मिन्नन्वयव्यतिरेकपरिशुद्धमप्यनैश्वर्यं आपादयितुं शक्यम् । समर्थकर्तृपूर्वकत्वनियतकार्यत्वरूपहेतुबलादेव तन्निवृत्तेः । तथाहि, केनचित् क्रियमाणं किञ्चित् स्वोत्पत्तये कर्तुः स्वनिर्माणसामर्थ्यं स्वोपादानोपकरणविज्ञानं च निर्वाहकत्वेनापेक्षते । न त्वन्यासामर्थ्यमन्याज्ञानं वा । हेत्वभावात् । उक्तसामर्थ्यज्ञानाभ्यामेवोत्पत्तावुपपन्नायां सम्बन्धितया दृष्टानामकिञ्चित्कराणामन्येषां कल्पनायोगात् । अन्यथानुमानोच्छेदप्रसङ्गात् । अथ तदप्युपयोगीति चेत्, किं क्रियमाणवस्तुव्यतिरिक्ताज्ञानादिकं सर्वविषयं क्रियोपयोगि, उत कतिपयविषयम् । नाद्यः । कुलालादेरपि कि-

यमायावस्तुव्यतिरिक्ताज्ञानाद्यदर्शनात् । नापरः । सर्वेषु कर्तृषु तत्तदज्ञानाशक्त्यतियमेन सर्वेषामज्ञानादीनां व्यभिचारात् । नच निर्वाहकापेक्षाङ्गीकारे ईश्वरेऽपि शरीरेन्द्रियाद्यापत्तिरिति शङ्क्यम् । सङ्कल्पमात्रेण परशरीरगतभूतवेतालादिनिग्रहदर्शनात् । नच कथमशरीरस्य प्रवर्तनरूपः सङ्कल्प इति शङ्क्यम् । सङ्कल्पस्य मनोजन्यत्वेन शरीरानपेक्षत्वात् । मनसश्चेश्वरेऽभ्युपगमात् । पूर्वोक्तहेतुनैव ज्ञानशक्तिवन्मनसोऽपि प्राप्तत्वात् । नच मानसोऽपि सङ्कल्पः सशरीरस्यैव, तस्यैव समनस्कत्वादिति वाच्यम् । मनसो नित्यत्वेन देहाद्यपगमेऽपि तत्सद्भावेनानैकान्तिकत्वात् । अत ईदृशस्य विचित्रस्य जगतो निर्माणे पुण्यपापपरवशः परिमितशक्तिज्ञानः क्षेत्रज्ञो न समर्थ इति तद्विलक्षण ईश्वरः सङ्कल्पमात्रेण सर्वकरणसमर्थोऽनुमानेन सिद्ध्यति । प्रयोगान्तरेण च । जगद् एकचेतनाधीनम् अचेतनारब्धत्वात्, अरोगस्वशरीरवदिति । तस्मान्न पूर्वोक्तप्रकारेण शास्त्रैकसमधिगम्यत्वं ब्रह्मणः सिद्ध्यति ।

कथं तर्हि तत्सिद्धिरितिचेद्, उच्यते । नाचेतनारब्धत्वेन हेतुना ईश्वरसिद्धिः । तथाहि । यदत्र साध्यतया निर्दिष्टं, किं तदेकचेतनाधीनत्वम् । तत्र तावदेकचेतनायत्तोत्पत्तिस्थितिकत्वम् । दृष्टान्ते साध्यवैकल्यात् । अरोगस्यापि शरीरस्य पितृपुत्राद्यनेकचेतनभोग्यत्वात् तत्तददृष्टजन्यत्वेन तदुत्पत्तिस्थित्योस्तदधीनत्वेनैकचेतनाधीनत्वाभावात् । किञ्च । शरीरस्य स्थितिरपि, किं स्वावयवसमवेतता, उत प्राणनम् । आद्ये अवयवाधीनत्वान्न चेतनापेक्षा, घटादिवत् । द्वितीये क्षित्यादीनां शरीररूपत्वभावेन पक्षे असम्भव इति पक्षसपक्षानुगतस्थित्यनुपलम्भः । नाप्येकचेतनाधीनप्रवृत्तिकत्वं तत् । पक्षान्तर्भूतेषु गुरुतररथशिलामहीरुहादिष्वनेकचेतनसाध्यप्रवृत्तिकत्वेन व्यभिचारात् । नापि चेतनमात्राधीनत्वम् । सिद्धसाधनत्वात् । किञ्च उभयवाद्यभिसिद्धानां जीवानामेव नियामकत्वाभ्युपगमो युक्तः । लाघवात् । नच जीवानां पूर्वोक्तरीतिकोपादानादिविज्ञानतन्निर्माणशक्त्यभावः शङ्कनीयः । तपोयागादिभिस्तेष्वपि तादृशज्ञानसामर्थ्योपगमे बाधकाभावात् । एतदपेक्षयेश्वराख्यपुरुषकल्पनस्य तत्र सामर्थ्यविशेषकल्पनस्य चात्यन्तापरिदृष्टत्वेनातिगुरुत्वात् । अतोऽचेतनारब्धत्वलिङ्गकानुमानेन नेश्वरसिद्धिः ।

नापि कार्यत्वलिङ्गकेन । महीमहार्णवादीनां सावयवत्वेन कार्यत्वेऽप्यनेकत्वात् ते सर्वे एकदैवैकेन निर्मिता इत्यत्र प्रमाणाभावात् । न चैकघटवत् सर्वेषामेककार्यत्वं, येनैकदैवैकः कर्ता स्यात् । पृथग्भूतेषु कार्येषु कालभेदकर्तृभेददर्शनेन कर्तृकालैक्यस्य नियन्तुमशक्यत्वात् । नच जीवानां तादृशनिर्माणशक्त्यदर्शनेन तन्निवृत्तौ कार्यत्वबलेनैव तत्सिद्धिरिति वाच्यम् । पूर्वमशक्तानामपि पश्चात् पुण्यविशेषोपचयेन शक्तिदर्शनात् तद्विशेषोपचयेनातिशयितादृष्टसम्भावनया च तादृशविलक्षणकार्यकर्तृत्वस्यापि सम्भवादित्युक्तम् । किञ्च । युगपत् सर्वोच्छित्तिः सर्वोत्पत्तिश्च न प्रमाणपदवीमधिरोहतः । अदर्शनात् । क्रमेणैवोत्पत्तिविनाशयोः कल्प्यमानयोर्दर्शनानुगुण्येन तथा कल्पनायामपि विरोधाभावाच्च । अतो बुद्धिमदेककर्तृकत्वे साध्ये कार्यत्वस्यानैकान्तिकत्वम् । सार्वभौमसदनदृष्टान्तेन तथाऽवगमात् । महादिभूतसमूहनिष्ठत्वाच्च घटपटस्तम्भसमूहनिष्ठकार्यत्ववत् । साध्यतावच्छेदकराहित्येन दृष्टान्तस्य साध्यविकलत्वं च । सर्वनिर्माणचतुरस्यैकस्याप्रसिद्धेः । पक्षस्याप्रसिद्धविशेषणत्वं च । तादृशसाध्याप्रसिद्ध्या विवादाध्यासाभावात् । बुद्धिमत्कर्तृकत्वमात्रे साध्ये सिद्धसाधनत्वं च । किञ्च । सार्वज्ञ्यसर्वशक्तियुक्तस्य कस्य चिदेकस्य साधकमिदं कार्यत्वं युगपदुत्पद्यमानसर्ववस्तुगतं वा, क्रमेणोत्पद्यमानसर्ववस्तुगतं वा । आद्ये, आश्रयासिद्धत्वम् । द्वितीयेऽनेककर्तृकत्वसाधनाद् विरुद्धत्वम् । अपिच । सर्वेषां कार्याणां शरीराणां सुखाद्यन्वयदर्शनेन तन्मूलभूतं सत्त्वादिकमवश्याश्रयणीयम् । पुण्यस्य संयोगश्च कर्मभिरन्तःकरणविकारद्वारेण भवतीति विचित्रकार्यविशेषारम्भायैव ज्ञानशक्तिवत् कर्मसम्बन्धोऽप्यवश्याश्रयणीयः । ज्ञानशक्तिवैचित्र्यस्यापि कर्ममूलत्वाच्च । इच्छायाः कर्मारम्भहेतुत्वेऽपि विषयविशेषविनायास्तस्याः सत्त्वादिमूलत्वेन कर्मसम्बन्धोऽवर्जनीयः । एवं सिद्धे कर्मसम्बन्धे क्षेत्रज्ञा एव कर्तारः सिद्ध्यन्ति, न तु तद्विलक्षणः कश्चिदनुमानात् सिद्ध्यति ।

भवन्ति चात्र प्रयोगाः । तनुभुवनादिकं क्षेत्रज्ञकर्तृकं, कार्यत्वाद् घटवत् । ईश्वरः कर्ता न भवति प्रयोजनशून्यत्वाद् मुक्तात्मवत् । तथा, अशरीरत्वात् तद्वदेव । नच क्षेत्रज्ञानां स्वशरीराधिष्ठाने व्यभिचारः । तत्राप्यनादेः सूक्ष्मशरीरस्य भावात् । विमतं वि-

पयः कालो न लोकशून्यः कालत्वाद् वर्तमानकालवत् । किञ्च । ईश्वरः किमशरीरः सशरीरो वा कार्यं करोति । नाद्यः । मनसो नित्यत्वेऽपि अशरीरेषु मुक्तेषु मानसकार्यादर्शनादीश्वरेऽप्यकर्तृत्वापत्तेः । नेतरः । विकल्पासहत्वात् । नित्यमनित्यं वा । न तावन्नित्यम् । सावयवस्य नित्यत्वे जगतोऽपि नित्यत्वाविरोधादीश्वरासिद्धेः । नाप्यनित्यम् । तद्व्यतिरिक्तस्य तच्छरीरहेतोस्तदानीमभावात् । नच स्वयमेव हेतुरिति युक्तम् । अशरीरस्य तदयोगात् । नाप्यन्यशरीरेण शरीरवान् । अनवस्थानात् । किञ्च । सव्यापारो निर्व्यापारो वा । नाद्यः । अशरीरस्य तदसम्भवात् । न द्वितीयः । मुक्तात्मवदकर्तृत्वापातात् । कार्यं जगद् इच्छामात्रव्यापारिकर्तृकमित्युच्यमाने पक्षस्याप्रसिद्धविशेषणत्वम् । दृष्टान्तस्य साध्यहीनता च । अतो दर्शनानुगुण्येनेश्वरानुमानं दर्शनानुगुण्यपराहतमिति शास्त्रैकप्रमाणकः परमेश्वरः परब्रह्मभूतः पुरुषोत्तमः । शास्त्रं तु सकलेतरप्रमाणपरिदृष्टसमस्तविजातीयं सार्वज्ञसत्यसङ्कल्पत्वादिमिश्रानवधिकातिशयापरिमितगुणोदारं निखिलहेयप्रत्यनीकं स्वरूपं प्रतिपादयतीति, न प्रमाणान्तरावसितवस्तुसाधर्म्यप्रयुक्तदोषप्रसङ्ग इति ।

अत्रोदयनाचार्यैरीश्वरसाधने नवानुमानानि कुसुमाञ्जलौ दर्शितानि । 'कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः । वाक्यात् सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः' इति । अत्र कार्यादिपदानि भावप्रधानानि । तानि चैवं व्याख्यातानि । आयोजनं सर्गाद्यकालीनद्व्यणुकारम्भकपरमाणुद्वयसंयोगजनकं कर्म । धृतिर्धारणं गुरुत्ववतो ब्रह्माण्डादेः पतनाभावः । आदिपदाद् ब्रह्माण्डादेर्नाशः । पदं घटादिसम्प्रदायव्यवहारः । घटादिपदप्रयोगो वा । प्रत्ययो वेदजन्यं धर्मादिज्ञानम् । श्रुतिर्वेदः । वाक्यं पदसमूहः । सङ्ख्याविशेषः सर्गाद्यपरमाणुनिष्ठद्वित्वादिसङ्ख्याजन्यं परिमाणमित्यादि । प्रयोगास्तु क्षित्यादिकं कर्तृजन्यं कार्यत्वाद् घटवत् । अन्ये तु जन्यत्वादित्यपि प्रयुञ्जते । तथा, क्षितिः, उपादानगोचरापरोक्षज्ञानोपायेच्छातादृशकृतिजन्या, ज्ञानजन्या इच्छाजन्या, कृतिजन्या वा जन्यत्वाद् घटादिवदित्यपि । पूर्वोक्तं कर्म चेतनप्रयत्नपूर्वकं कर्मत्वाद् अस्मदादिशरीरजन्यक्रियावत् । उक्ता धृतिः, चेतनप्रयत्नपूर्विका धृतित्वाद् वियति विहङ्गमधृतिवत् । ब्रह्मा-

घटादि प्रयत्नवद्विनाश्यं विनाशित्वात् पाट्यमानपटवत् । उक्तव्य-
हारः स्वतन्त्रप्रयोज्यः, व्यवहारत्वात् आधुनिकलिप्यादिव्यवहारव-
त् । पूर्वोक्तं ज्ञानं कारणगुणजन्यं प्रमात्वात् प्रत्यक्षादिप्रमावत् ।
वेदः पौरुषेयो वेदत्वाद् यन्नैवं तन्नैवम् आकाशवत् । वेदः पौरुषेयो
वाक्यत्वाद् भारतादिवत् । द्व्यणुकपरिमाणं संख्याजन्यं परिमाण-
प्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्यपरिमाणकपालद्वयार-
ब्धघटपरिमाणवदिति । अत्र प्रथमे प्रयोगे कर्तृजन्यत्वं तु स्वोपा-
दानगोचरापरोक्षज्ञानचिकीर्षाकृतिमददृष्टाद्वारकजन्यत्वम् । अत्रा-
दृष्टाद्वारकेतिविशेषणाच्च जीवात्मनिरूपितादृष्टद्वारकजन्यत्वेन सिद्ध-
साधनमर्थान्तरं वा । जीवानां क्षित्याद्युपादानीभूतपरमाण्वादिगोच-
रापरोक्षज्ञानाभावेन तज्जन्यत्वे बाधाच्च तैरपि तथा । न च क्षिति-
घटादिसाधारणैकस्य साध्यस्याभावेन स्वपदार्थाननुगमात् कथं
व्याप्तिग्रह इति वाच्यम् । स्वपदार्थाननुगमस्यादोषत्वात् । अन्यथे-
च्छादिना ज्ञानाद्यनुमानं न स्यात् । स्वविशेष्यकस्वत्वप्रकारकज्ञान-
त्वादिनैव तत्र कार्यकारणभावात् । अत्र च सकर्तृकत्वादिसाध्यका-
नुमाने कर्तृत्वेनैव कारणता, ज्ञानजन्यत्वादिसाध्ये च ज्ञानत्वादिना ।
एवं कार्यताऽपि कार्यत्वेन जन्यत्वेन च । न च शरीरगौरवेणाप्रयो-
जकत्वं शङ्क्यम् । अवच्छेदककोटौ घटत्वादीनां प्रवेशे आनन्त्य-
गौरवाद् ध्वंसस्य जन्यत्वेन तस्य च जन्याभावत्वेनावच्छेदकतया
प्रवेशे शरीरगौरवाच्च । एवं तु विपक्षितविवेके जन्याभावत्वैक-
देशस्य जन्यत्वस्यैव प्रवेश इति शरीरलाघवात् सामान्यलाघवादेक-
त्वलाघवात् कल्पनालाघवादुपस्थितिलाघवाच्च जन्यत्वेनैव कार्यता,
न घटत्वादिना । कार्यत्वं च स्वसमवायिजन्यतात्वेन परम्परासम्ब-
न्धेन जातित्वमेवेति, न तत्रापि गौरवम् । न च विशिष्यान्वयव्यतिरे-
काभ्यां घटत्वकुलालत्वादिना विशिष्यकार्यकारणभावस्यावश्यक-
त्वात् सर्वमेतद्विरुद्धमिति वाच्यम् । कार्यमात्रवृत्तीनां जातीनां का-
र्यतावच्छेदकत्वमिति सिद्धान्तसमुद्घोषात् । न चाङ्कुरादौ हेतोर्वि-
पक्षगामित्वेनानैकान्तिकत्वं शङ्क्यम् । तत्र साध्यसन्देहस्यानन्याहित-
त्वेन तस्य पक्षसमत्वात् । नच शरीरजन्यत्वस्योपाधेर्विद्यमानत्वाच्छ-
रीराजन्यत्वस्य प्रतिसाधनस्य सत्त्वाच्च साध्यसन्देहस्यान्याहितत्वेना-
नैकान्तिकत्वं सिद्धमिति शङ्क्यम् । कर्मादिजन्यतायामपि गुरुभूत-

शरीरजन्यत्वस्यानवच्छेदकत्वाल्लघुभूतस्य जन्यत्वमात्रस्यैवावच्छेदकत्वेन तस्य च साध्यव्यापकत्वेनानुपाधित्वे हेतोरदुष्टत्वात् । एवञ्च कर्त्रादिजन्यतायामिव शरीरजन्यतायामपि जन्यत्वस्यैवावच्छेदकत्वादीश्वरे नित्यज्ञानादिकमिव नित्यशरीरवत्त्वस्याप्यङ्गीकारेण प्रतिसाधनदोषस्याप्यभावात् । अनुमानं च, क्षित्यादिकं शरीरजन्यं जन्यत्वाद् घटवत् । ईश्वरः शरीरी कर्तृत्वात् कुलालवदिति । अनुकूलतर्कश्चात्र कर्तृत्वजन्यत्वाभ्यामिव शरीरत्वजन्यत्वाभ्यामपि पूर्वोक्तयुक्तितुल्ययुक्तिकः कार्यकारणभाव एव । श्रुतिश्च, यतो वा इमानि भूतानि जायन्त इत्यादि, सहस्रशीर्षा पुरुष इत्यादि, आकाशशरीरं ब्रह्मेत्यादि च । श्रुतीनां चानुकूलतर्कविधया स्वतन्त्रतया च ब्रह्मणि प्रामाण्यमिति नवीनमतम् ।

साम्प्रदायिकमते शरीरस्य कुलालशरीरत्वादिनैव कारणत्वं, न तु शरीरत्वेनेतीश्वरस्यानित्यं शरीरं लोकानुग्रहेण व्यवहारप्रवर्तनार्थम् । अतोऽस्मदाद्यदृष्टजनितं रामकृष्णादिनामकं शरीरे भूतावेशन्यायेनावेशः । कार्यकरणानन्तरं च त्याग इति ।

अभिनवमते तु महेश्वरस्य विश्वमेव शरीरम् । तच्च नित्यानित्यपुञ्जघटितमित्यनित्यांशविरामेऽपि नित्यांशमादाय नित्यमेव । आकाशात्मकं च नित्यमेव । रामकृष्णादिनामकं त्वाविर्भावतिरोभावशालि भक्तानुग्रहेण कदाचित् क्वचिदाविर्भवति तिरोभवति च । अत एव तत्त्ववादिभिर्मूर्तमपि तन्नित्यं विभु चेत्यङ्गीक्रियते । सर्वत्र सर्वदा तथाभूतभक्तभावनया भक्तैः साक्षात्क्रियमाणत्वात् । तादृशसाक्षात्काराणां प्रमात्वे सम्भवति भ्रमत्वकल्पनस्यान्याय्यत्वात् । तदुक्तम्, औत्सर्गिकं धियां प्रमात्वमिति । विश्वात्मकं तु योगिप्रत्यक्षगम्यमपि विश्वरूपदर्शनादिषु श्रूयत एव सहस्रशीर्षेत्यादिभिः शरीरेऽङ्गीकृते तदनुसारिसकर्तृकत्वानुमानं निर्दुष्टमेव । एवमेकेनेश्वरेण सकलक्षित्यादिकार्यसम्भवे सति प्रमाणाभावाद् गौरवाच्च नानेकेश्वरसिद्धिः । किञ्चानेकेश्वराङ्गीकारे तेषामैकमत्यं वैमत्यं वा स्यात् । तत्राद्ये स्वातन्त्र्याभावादैश्वर्यहानिः । द्वितीये तु कार्यासिद्धिरिति कार्यदर्शनाद्, एकमेवाद्वितीयं ब्रह्मेत्यादिश्रुतिभ्यस्तादृशैः पुराणैश्चैकस्यैव सिद्धिरिति न पूर्वोक्तं किमपि दूषणम् । एवमेकेश्वरसिद्धौ कर्मत्वादिलिङ्गकान्यप्यनुमानानि तमेकमेव साधयन्तीति न कोऽपि

अन्ये पुनः श्रुत्यनुवादकमाहुः । सर्वज्ञत्वाय श्रुत्यनुसार्यनुमानं च ब्रह्मणि प्रमाणमिति ।

तत्तु, तं त्वौपनिषदं पुरुषं पृच्छामीति केवलोपनिषद्वेद्यत्वादुपेक्ष्यम् ।

कापि दोष इति मैथिलभवदेवमिश्राः ।

ज्ञानेन्द्रभिक्षुस्तु, बुद्धिप्रभृतिकार्यम् उपादानगोचरप्रत्यक्षजन्यं कार्यत्वाद् घटादिवत् । यदि स्वोपादानगोचरापरोक्षवृत्तेरेव कार्यहेतुत्वं लाघवात् । न तु चैतन्यस्य गौरवादिति । तदा तु बुद्ध्यादीनि सकारणकानि, उपादानगोचरप्रत्यक्षवृत्तीच्छाकृतिमज्जन्यत्वाद् घटादिवदित्येवं कारणीभूतसत्त्वस्य सिद्ध्यनन्तरं, तत्कारणसत्त्वं परस्य भोग्यम् इच्छादिमत्त्वाज्जीवोपाधिवदिति कारणसत्त्वभोक्तृत्वेनेश्वरोऽनुमेय इत्याह ।

एवञ्चाभिनवोक्तरीत्याऽनुमानस्य श्रुत्यनुसारित्वेन प्रामाण्याद् व्यासचरणानां च श्रुत्यर्थनिर्णयाय प्रवृत्तत्वात् सूत्रमनुमानोपष्टम्भकश्रुत्यनुवादकम् । अनुमानस्य ब्रह्मणि प्रामाण्येऽनङ्गीकृते, यतो वेत्यादिश्रुतौ केवलं कर्तृत्वस्योक्तत्वादुपादानादिगोचरापरोक्षज्ञानवत्त्वस्यासिद्धेः । अङ्गीकृते तु तस्मिन् कर्तृत्वस्योक्तज्ञानव्याप्यत्वात् सुखेन सर्वज्ञत्वस्य सिद्धेरिति ।

द्वितीयं मतमनुवदन्ति * अन्य इत्यादि * तदुभयमेकहेलया दूषयन्ति * तत्त्वित्यादि* । अयमर्थः । बृहदारण्यके शाकल्यब्राह्मणे उदानप्रतिष्ठोत्तरश्रवणानन्तरं तूष्णींभूते शाकल्ये तं प्रति याज्ञवल्क्येन, स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गोऽसितो न सज्जते न व्यथत इत्येतान्यष्टावायतनान्यष्टौ लोका अष्टौ पुरुषाः स यस्तान् पुरुषान् व्युदुह्य प्रत्युह्यात्यक्रामत् तं त्वौपनिषदं पुरुषं पृच्छामीति वाक्ये मूर्तामूर्तब्राह्मणवदेतावत्त्वादिनिषेधपूर्वकं करणाद्यग्राह्यो नित्योऽसङ्गो निर्दुःखः शरीराद्यानष्टौ पुरुषान् पृथिव्याद्यायतनेषु तत्तल्लोकेषु च विशेषेणोढ्वा आययित्वा पुनस्तत उपसंहृत्य, योऽतिक्रान्तवानेतादृश उपनिषद्वेद्यः पुरुषः पृष्टः ।

अन्ये पुनः श्रुत्यनुवादकमाहुः । सर्वज्ञत्वाय श्रुत्यनुसार्यनुमानं च ब्रह्मणि प्रमाणमिति ।

तत्तु, तं त्वौपनिषदं पुरुषं पृच्छामीति केवलोपनिषद्वेद्यत्वादुष्टम् ।

क्वापि दोष इति मैथिलभवदेवमिश्राः ।

ज्ञानेन्द्रभिक्षुस्तु, बुद्धिप्रभृतिकार्यम् उपादानगोचरप्रत्यक्षजन्यं कार्यत्वाद् घटादिवत् । यदि चोपादानगोचरापरोक्षवृत्तेरेव कार्यहेतुत्वं लाघवात् । न तु चैतन्यस्य गौरवादिति । तदा तु बुद्ध्यादीनि सकारणकानि, उपादानगोचरप्रत्यक्षवृत्तीच्छाकृतिमज्जन्यत्वाद् घटादिवदित्येव कारणीभूतमस्वस्य सिद्ध्यनन्तरं, तत्कारणसत्त्वं परस्य भोग्यम् इच्छादिमत्त्वाज्जीवोपाधिवदिति कारणसत्त्वभोक्तृतयेश्वरोऽनुमेय इत्याह ।

एवञ्चाभिनवोक्तरीत्याऽनुमानस्य श्रुत्यनुसारित्वेन प्रामाण्याद् व्यासचरणानां च श्रुत्यर्थनिर्णयाय प्रवृत्तत्वात् सूत्रमनुमानोपष्टम्भकश्रुत्यनुवादकम् । अनुमानस्य ब्रह्मणि प्रामाण्येऽनङ्गीकृते, यतो वेत्यादिश्रुतौ केवल कर्तृत्वस्योक्तत्वादुपादानादिगोचरापरोक्षज्ञानवत्त्वस्यासिद्धेः । अङ्गीकृते तु तस्मिन् कर्तृत्वस्योक्तज्ञानव्याप्यत्वात् सुखेन सर्वज्ञत्वस्य सिद्धेरिति ।

द्वितीयं मतमनुवदन्ति * अन्य इत्यादि * तदुभयमेकहेलया दूषयन्ति * तत्त्वित्यादि * । अयमर्थः । बृहदारण्यके शाकल्यब्राह्मणे उदानप्रतिष्ठोत्तरश्रवणानन्तरं तूष्णींभूते शाकल्ये तं प्रति याज्ञवल्क्येन, स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यतेऽशीर्यो न हि शीर्यतेऽसङ्गोऽसितो न सज्जते न व्यथत इत्येतान्यष्टावायतनान्यष्टौ लोका अष्टौ पुरुषाः स यस्तान् पुरुषान् व्युदुह्य प्रत्युह्यात्यक्रामीत् तं त्वौपनिषदं पुरुषं पृच्छामीति वाक्ये मूर्तामूर्तब्राह्मणवदेतावत्त्वादिनिषेधपूर्वकं करणाग्राह्यो नित्योऽसङ्गो निर्दुःखः शारीराद्यनष्टौ पुरुषान् पृथिव्याद्यायतनेषु तत्तल्लोकेषु च विशेषेणोढ्वेः स्थापयित्वा पुनस्तत उपसंहृत्य, योऽतिक्रान्तवानेतादृश उपनिषद्वेद्यः पुरुषः पृष्टः ।

अनभिगतार्थगन्तृत्वात् प्रमाणस्य । मननिदिध्यासनयोः श्रवणाङ्गत्वम् ।

रणत्वेन सिद्धिः क्रियते तेषु प्रकरणेषु सत्त्वस्य सर्वकारणतायाः अनिश्चायितत्वेनानुमानस्याप्रयोजकत्वात् । नच स्मृत्या तत्परिहरणीयमिति वाच्यम् । श्रुतिविरुद्धायास्तस्याः एवानादरणीयत्वात् । मैत्रायणीयश्रुतौ, तमो वा इदमग्र आसीदेकं तत्परे स्यात् तत्परेणेरितं विषमत्वं प्रयात्येतद्रूपं वै रजस्तद्रजः खल्वीरितं विषमत्वं प्रयात्येतद्वै सत्त्वस्य रूपमित्येवं परप्रेरणेन रजसः सत्त्वस्य च भवनकथनात् । तृतीयेऽपि प्रयोगे सत्त्वस्य परभोग्यत्वेनोपाधित्वाङ्गीकारात् तदुत्पत्तेः पूर्वं परस्य निरुपाधिकत्वेनेच्छाद्यभावात् प्रेरणस्याप्यसम्भवात् । नैयायिकादिवन्नित्यज्ञानेच्छादीनामीश्वरसमवेतत्वाङ्गीकारे शरीराभावप्रयुक्तदोषतादवस्थ्यात् सांख्यादिमतालम्बनाडम्बरवैयर्थ्याच्च । अतः श्रुत्यनुसारित्वाभावान्नानुमानं ब्रह्मप्रमितिजननायालम् । नापि योगिप्रत्यक्षम् । विदूरकाष्ठाय मुहुः कुयोगिनामिति द्वितीयस्कन्धवाक्यात् । यमेवैष वृणुते इति, धातुः प्रसादादिति श्रुतेश्च । नच गीतोक्तविश्वरूपदर्शनादिविरोधः । तस्य मूलरूपत्वाभावात् । कालोऽस्मीति तत्रैव निर्द्धारणात् । तथापि, रूपं परं दर्शितमात्मयोगादिति वाक्येन तस्यापि भगवद्बलेनैव दर्शनेन योगस्याप्रयोजकत्वाच्च । उपपत्तेश्चेत्यादौ यदुपपत्त्युपन्यसनं, तदपि न ब्रह्मस्वरूपज्ञापकतया, किन्तु हेत्वाभासैः परान्तरशङ्कानिरासकतयेति बोध्यते । आचारदर्शनादिति सूत्रन्तु कर्मविषये, न तु ब्रह्मविषय इति न किञ्चिदेतत् । अतस्तदुपेक्ष्यमेव ।

ननु श्रुत्युक्तं सच्चिदानन्दात्मकं शरीरमङ्गीकृत्यानुमाने दोषनिरासे दोषाभावात् कथमुपेक्ष्यत्वमित्यत आहुः * अनधीत्यादि * तथाच सिद्धसाधनत्वाच्छ्रुत्युक्तसकलविशेषविपर्ययकप्रमित्यजनकत्वाच्चाप्रामाण्यमित्यर्थः । ननु मन्तव्य इति श्रुत्या मननं विहितम् । तच्च युक्तिभिरनुचिन्तनम् । युक्तयश्चानुमानरूपा इति श्रुत्यनुकूलानुमानस्य प्रामाण्यं श्रुत्यैव सूच्यत इति कथं पूर्वोक्तमतस्योपेक्ष्यत्वमुच्यत इत्याशङ्कायामाहुः * मननेत्यादि * तथाच मननादेः

ज्ञानशक्त्योर्निरतिशयत्वं भज्येत । मृदादिसाधारण्यं च स्यात् ।

मतान्तरवत् कथमेवं सन्देहो यावता, यतो वा इमानीत्यादिभ्यो निःसन्देहश्रवणात् । एवं हि सः । पञ्चमी श्रूयते यत इति । पञ्चम्यास्तसिरिति । आरम्भ इत्यपि पञ्चमी, निमित्तत्वे न सन्देहः । पञ्चम्या निमित्तत्वकथनात् । उपादानत्वे कर्तृत्वे च सन्देहः । तद्वाचकाश्रवणात् कल्पनायां प्रमाणाभावात् । समवायित्वे पुनः सुतरां सन्देहः । एवं प्राप्त आह ।

तत्तु समन्वयात् ॥ ३ ॥

प्रयोजयेत् कर्तृ तदा यथायथं क्रियाशक्तेर्ज्ञानशक्तेश्च निरतिशयत्वभङ्गः । दण्डाद्यपेक्षया कर्तरि क्रियाशक्तेः प्रयोज्यापेक्षया प्रयोजके ज्ञानशक्तेराधिक्यदर्शनात् । यदि मृद्वत् समवायित्वं, यदि वा कुलालादिवत् कर्तृत्वं तदा तत्साधारण्यं, विकृतत्वमनात्मकामत्वं चेति । तथा चैतद्व्यतिरेकः फलमित्यर्थः । अत्र चोदयति * मतान्तरवदित्यादि * साङ्ख्यन्यायादिरूपस्य मतान्तरस्य स्मृतिरूपत्वात् तज्जनकानुमानदुष्टत्वस्य सम्भावितत्वात् तत्रोचितः सन्देहः । अत्र तु तदभावान्न तस्य सम्भावनेत्यर्थः । सन्देहोपपत्तिप्रकारमाहुः * एवमित्यादि * । * निमित्तत्वकथनादिति * विभाषा गुणेऽस्त्रियामित्याकारकसूत्रे अगुणादपि हेतोः पञ्चम्यङ्गीकृता । यथा धूमाद् वह्निमानित्यादौ । एवं प्रकृतेऽपि तत्कथनात् । तथा च तावन्मात्राङ्गीकारे उक्तरीत्या क्रियाज्ञानशक्त्योर्निरतिशयत्वभङ्गप्रसङ्गः । तन्निवृत्त्यर्थमुपादानत्वकर्तृत्वयोरङ्गीकारे प्रमाणाभावात् सन्देहः । समवायित्वांशे दूषितत्वात् समवायित्वे विकृतत्वप्राप्तेश्च तत्र सुतरां तथेत्येवं समवायित्वेऽप्यन्तं सन्दिग्धं सूत्रमाहेत्यर्थः । एतेनास्याधिकरणस्य पूर्वेण सह सामान्यविशेषभावः सङ्गतिरपि दर्शिता । * तत्तु समन्वयात् * । एवं पक्षत्रयेऽपि दोषा इति तान् विहाय धर्म्युपपत्त्यर्थं केवलं तटस्थकारणत्वमादरणीयमित्याशयेन पूर्वपक्षयुक्तिमाहुः

तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । निमित्तत्वस्य श्रुतिसिद्धत्वात् मतान्तरनिराकरणत्वेनाग्रे वक्ष्यते । तद् ब्रह्मैव समवायिकारणम् । कुतः । समन्वयात् सम्यगनुवृत्तत्वात् । अस्तिभातिप्रियत्वेन सच्चिदानन्दरूपेणान्वयात् । नामरूपयोः कार्यरूपत्वात् ।

निमित्तत्वस्येत्यादि ननु तुशब्दो विशेषावधारणपूजाऽप्राप्तिपादपूरणापार्थहेतुषु दृष्टस्तत् कथं व्यावृत्त्यर्थ एवात्र गृहीत इत्यत आहुः *मतान्तरेत्यादि* पाञ्चरात्रादिशैवमतेश्वरवादादौ तथा दर्शनादत्रापि तथेत्यर्थः । *तद् ब्रह्मैव समवायिकारणमिति* तद् अनुभूतं प्रसिद्धं वा समवायिकारणं ब्रह्मैवेत्यन्वयः । ननु सम्यगनुवृत्तं वस्तुनाऽऽरोपितानागन्तुकरूपेण सर्वं स्वरूपीकृत्य वर्तमानत्वम् । तज्जगति ब्रह्मणः कथम् । नहि जगति ब्रह्मणोऽनारोपितानागन्तुकेन ब्रह्मत्वेन रूपेणान्वयोऽनुभूयते, यथा पटे तन्त्वादेर्घटे वा मृद इत्याकाङ्क्षायां तदाहुः *अस्तीत्यादि* तेषु तेषु वस्तुषु तत्तत्पुरुषप्रतीतिविषयेणास्तित्वादिधर्मेणाव्यभिचारिणा सदादिरूपेणान्वयात् । यो हि यदन्वितः स स्वस्मिन् तद्विषयां प्रतीतिमाधत्ते, यथा घटादिः पृथिवीत्यादिप्रतीतिम् । तथाच सर्वमस्तीत्यादिप्रतीतिजनकत्वात् सदाद्यन्वितम् । ततश्च सदाद्यात्मकं सच्चिदानन्दात्मकं च ब्रह्मेति तेन रूपेण ब्रह्मान्वयोऽवगम्यत एवेत्यर्थः । ननु जगत्यस्त्यादिसमन्वयो न ब्रह्मणः समवायित्वगमकः । नामरूपयोरपि समन्वयात् । नच तयोर्नानात्वान्नान्वय इति शङ्क्यम् । तयोः प्रतिनियतरूपेणानन्वयेऽप्यवच्छेदकावच्छेदेनान्वयस्य निराबाधानुभवात् । नच रूपस्य व्यभिचारः शङ्क्यः । तस्य व्यवहार्यत्वपरत्वात् । अवकाशादिरूपेण व्यवहार्यत्वस्याकाशादावपि सत्त्वादिति चेत् तत्राहुः *नामरूपयोः कार्यरूपत्वादिति* नामरूपे कर्मणोऽप्युपलक्षणे । अयं वा इदं नाम रूपं कर्मेति श्रुतेः प्रपञ्चस्यैतत्त्रयात्मकत्वात् । तथाच, अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति श्रुतेर्नाम्नां रूपेषु निष्पन्ने कृत एव जगतः कार्यत्वेन प्रतीतिस्त एव कार्यस्य कार्यतापन्न-

कस्वरूपभूते । यदा हि पृथुबुध्नोदराकारोऽर्थो भवति तदा तत्र तादृशं रूपं घट इति नाम च भवति । तदपि न स्वतः किन्तु व्याकरणश्रुतेस्तत्करणोत्तरम् । यथा हि बालके जाते तदवयवानालोच्य व्यक्तौ निश्चितायां नाम नियमयति, एतन्नामाऽयमिति । तद्वत् । अतः कर्मापि मूलवस्तूत्तरकालीनं कार्यस्वरूप एव प्रविशतीत्यागन्तुकत्वान्न तत्र समन्वयः, किन्त्वन्वयमात्रं तेषामतो न ब्रह्मणः समवायित्वबाधकमित्यर्थः ।

ननु तथाप्यस्यादिसमन्वयस्य न ब्रह्मसमवायित्वगमकत्वम् । कार्यमात्रे प्रकृत्यात्मकानां सत्त्वरजस्तमसामनुवृत्तिदर्शनात् । यथाहुः सांख्याः । 'प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः । अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः' इति गुणानां स्वरूपं प्रदर्श्योक्तम् 'सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः । गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिरिति'। एतदर्थस्तु सत्त्वादयो गुणाः सुखदुःखमोहस्वरूपाः प्रकाशप्रवृत्तिनियमफलका यथाक्रमं बोध्याः । ते पुनरन्योन्याभिभवेनाऽन्योन्याश्रयेणान्योन्यजननान्योन्यमिथुनक्रियाद्वारा स्वत एव सन्तो यथा वर्तितैले अग्निविरोधिनी सहाग्निना रूपप्रकाशनं कार्यं कुरुतो, यथा च वातपित्तकफा दोषाः परस्परविरुद्धा अपि शरीरधारणलक्षणं कार्यं कुर्वन्ति, तथैते परस्परविरुद्धा अप्यनुवर्तन्ते, कार्यं च कुर्वन्तीति । तथा च प्रयोगः । महदादिकार्यं सुखदुःखमोहगुणकद्रव्यजन्यं कार्यत्वे सति सुखदुःखमोहगुणकद्रव्यत्वात् । यथैका रूपयौवनशीलवती स्त्री भर्तुः सुखदा सपत्नीनां दुःखदा पुरुषान्तरस्य मोहदेति तद्वदिति । न च सुखादीनामान्तरत्वेनानुभवात् स्त्र्यादीनां सुखादिगुणकत्वे मानाभावः शङ्कनीयः । स्त्रीचन्दनादिजन्यस्य सुखस्य तत्तदवयवेषु बहिरेवानुभवेन तज्जनकेषु स्त्र्यादिष्वपि तस्य बहिरेव सत्तानिश्चयात् । न च तस्यानुभवस्य भ्रान्तत्वं शङ्क्यवचनम् । तथा सति देहे मे सुखं, शिरसि मे वेदनेत्याद्यनुभवान्तरस्यापि बाधप्रसङ्गात् । एवं तु स्त्रीसुखं चन्दनसुखमित्याद्यभिलापोऽपि युज्यते । आन्तरत्वेनानुभवस्तु मानसस्यैव । एवं सिद्धं तेषां बाह्यत्वे स्त्र्यादिसंसर्गेण बहिरेव तेऽभिव्यज्यन्ते । घृतद्रवत्वादिवत् । तथा च प्रयोगः । विमताः सुखादयो न साक्षादात्मधर्माः । बाह्यत्वे सत्यात्मनि प्रतीयमानत्वात् ।

प्रकृतेरपि स्वमते तदंशत्वात् । अज्ञानात् परिच्छेदाभियत्वे ।

गौरत्वादिवदिति । तथा, रूपादयः सुखादिगुणकाः सुखादिजनकत्वात् । यद् यज्जनकं तत् तद्गुणकं, प्रकाशशैत्यादिजनकवह्निचन्द्रादिवदिति च । एवं सिद्धे तेषां तद्गुणकत्वे तेषां द्रव्याणां तद्गुणात्मकत्वमप्यनुमेयम् । तथाच प्रयोगः । विमताः सुखाद्यात्मकाः, सुखाद्यविनाभूतत्वात् । तन्मात्राविनाभूतमहाभूतवत् । तथा, सुखादयो द्रव्यसूक्ष्मावस्थारूपाः । तदविनाभूतत्वे सति तज्जनकत्वात् । महाभूताविनाभूततज्जनकतन्मात्रवदिति । नच प्रथमं क्षणे द्रव्यं यावद् गुणाशून्यमेवोत्पद्यत इति वाच्यम् । प्रत्यक्षबाधितत्वात् । अपाकजस्य रूपादेरुत्पत्तिदशायामप्यनुभवात् । एवं सुखादावपि बोध्यम् । पुत्राद्युत्पत्तिकाल एव पुरुषभेदेन सुखदुःखाद्युत्पत्तिदर्शनतस्तस्य बालादेस्तदानीमपि तज्जनकतया तद्गुणकत्वतदविनाभावयोर्निश्चयादिति । एवं मैत्रायणीये, तमो वा इदमेकमेवाग्र आसीत् तत्परे स्यात् तत्परेणेरितं विषमत्वं प्रयातीति । श्वेताश्वतरेऽपि, प्रधानक्षेत्रज्ञपतिर्गुणेश इति तमःशब्दवाच्यायाः प्रकृतेर्गुणानां च सुष्ट्याद्यौ सत्ताश्रवणात् पुराणेषु मन्वादिषु तथा स्मरणात् सिद्धे प्रकृतेः सत्त्वे सर्वस्य त्रिगुणत्वेन गुणमय्याः प्रकृतेरेव समन्वयस्य सिद्धत्वान्न ब्रह्मणः समवायित्वसिद्धिरित्यत आहुः * प्रकृतेरित्यादि * । 'आसीज्ज्ञानमयो ह्यर्थ एकमेवाविकल्पितम् । यदा विवेकनिपुणा आदौ कृतयुगे युगे । तन्मायाफलरूपेण केवलं निर्विकल्पितम् । वाङ्मनसागोचरातीतं द्विधा समभवद् बृहत् । तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका । ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते' इत्याद्येकादशस्कन्धीयभगवद्वाक्यैस्तस्या अंशत्वे जन्यत्वे च निश्चिते तद्रूपस्याप्यागन्तुकत्वेन तदन्वयस्यापि समन्वयत्वाभावान्न तेन ब्रह्मणः समवायित्वभङ्ग इत्यर्थः । ननु भवत्वेवं, तथापि तदन्वयस्य सांख्यैः साधितत्वात् तेनैव रूपेण ब्रह्मान्वयोऽस्तु किमस्यादिरूपान्वयाग्रहणेनेत्याशङ्कायामाहुः * अज्ञानादित्यादि * । अयमर्थः । प्राकृती या प्रीतिः सा आज्ञानिकी, न सु

ज्ञानेन बाधदर्शनात् । नानात्वं स्वैच्छिकमेव । जडजीवान्तर्यामिष्वेकैकांशप्राकट्यात् । कथमेवमिति चेत् । न । सद्रूपे घटरूपक्रियास्तत्र तारतम्येनाविर्भाववज्जडेऽपि भानत्वाविर्भावप्रतीतेस्तारतम्येनाविर्भावोऽङ्गीकर्तव्यः । भगवदिच्छाया नियामकत्वात् ।

वास्तवी । तत्र गमको देशतः कालतश्च परिच्छेदः । यथा कस्यचित् किञ्चित् प्रियं किञ्चिन्न । तदपि कदाचित् प्रियं, कदाचिन्न । तथा सति तस्या औपाधिकत्वात् । मैत्रेयीब्राह्मणे तथैव सिद्धत्वात् । वास्तवस्य नैसर्गिकानां वस्तुसद्भावे ज्ञानेन तद्बाधायोगाच्च । अतो वास्तवं प्रियत्वमात्मन्येवात्मन एव दृष्टं परिकमानन्दस्य तमिति बाधितत्वा इदं सर्वं यदयमात्मेत्यनेन सर्वस्यात्माभिन्नत्वं ज्ञापयति । तथा तैत्तिरीये, आनन्दं ब्रह्मणो विद्वानित्युपक्रम्य, एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमिति स य एवं विद्वानेते आत्मानं स्पृणुत इत्यात्मत्वानुसन्धानेन तत्कृततापाभावं च ज्ञापयति । अत एवमात्मानन्दज्ञानेन प्राकृतिकप्रियत्वादौ बाधदर्शनाच्च तद्रूपेणान्वय आद्रियते । किञ्चात्मत्वेन सर्वेषामौपाधिकप्रियत्वस्य बाधनाद्बाधितनैरूप्येण श्रुत्यविरोध इति तदन्वय एवाद्रियत इत्यर्थः । ननु यद्येवं तदा नानात्वमपि नादरणीयम् । तस्यापि प्राकृतिकत्वादित्यत आहुः * नानात्वमित्यादि * बहु स्यामिति श्रावणात् तन्न प्राकृतिकमित्यर्थः । ननु यदीदमप्राकृतं स्यादस्यास्यांशत्रयानुभूतिरनुभूयेत, सा तु न दृश्यतेऽतो न तथेत्यत आहुः * जडेत्यादि * जडे सदंशस्य, जीवे 'ज्ञानं त्वन्यतरो भाग' इति वाक्याज्ज्ञानांशस्य, अन्तर्यामिण्यानन्दांशस्य प्राकट्यात् । तथाच प्राकट्याभावहेतुकमदर्शनं नानुभूतिबाधकमित्यर्थः । अत्र चोदयति * कथमित्यादि * सर्वत्र त्रितयसद्भावेऽपि तत्र तत्रैकैकांशप्राकट्यं कथोपपत्त्याङ्गीक्रियत इत्यर्थः । अत्र समादधते * नेत्यादि * एवमाक्षेपो न युक्तः । यतोऽस्तीतिप्रत्ययगोचरे सद्रूपे एकस्मिन्नेवार्थे घट इति गुणित्वेन, रूपमिति तदुपसर्जनतया गुणत्वेन, क्रियेति विक्षणावस्थापितयाऽऽशुनष्टमिता:

शित्वेन यथा सदंशस्य तारतम्येनाविर्भावस्तथा जडेऽपि भानत्वप्रिय- त्वयोस्तारतम्येनाविर्भावोऽङ्गीकार्यः । नन्वेवमङ्गीकारे का वा युक्ति- रितिचेद् उच्यते । श्रीभागवते कंसस्यारिष्टदर्शनस्थले, अदर्शनं स्व- शिरसः प्रतिरूपेषु सत्स्वपीत्यासन्नमृत्योः शिरःप्रतिबिम्बादर्शनमु- क्तम् । तथा द्वितीयस्कन्धे, घ्राणं च गन्ध इत्यादिवाक्यैरिन्द्रियाणां सजातीयग्राहकत्वं च बोधितम् । एवं सत्युक्तस्थले यच्छिरसोऽग्रहणं तत्र हेतुत्वेन विषयस्य चक्षुषो वा आवरणं वक्तव्यम् । तत्र न शिर- सः । तस्यान्येन दर्शनात् । नापि चक्षुषः । तदानीं तेन विषयान्तरद- र्शनात् । अत उभयोपपत्त्यर्थं विषयनिष्ठज्ञानांशस्य चक्षुः प्रत्येवाव- रणमिति वक्तव्यम् । एवं लोकाञ्जनस्थले वैषयिकज्ञानांशावरणम् । सदंशावरणे तु स्पार्शनमपि तस्य न स्यादिति । एवमेकत्र ज्ञानांश- सिद्धावन्यत्रापि तथा सिद्ध्यति । एवं प्रियत्वांशेऽपि बोध्यम् । यद्वा पदार्थमात्रस्य ज्ञानेनैव प्रकाशाज्ज्ञानजनकत्वाच्च साङ्ख्योक्तप्रकारे- णैव ज्ञानाविनाभावानिर्वाहे ज्ञानात्मकत्वस्यापि सिद्धिः । परन्तु तत्र जडे सदंशवत् प्रकटम् । सन् घटः, सन् पट इतिवज्ज्ञानं घट इति सामानाधिकरण्याप्रतीतेः । प्रियत्वं तु ततोऽप्यप्रकटम् । तत्तदसाधा- रणत्वात् । जीवे तु चिदंशस्यापि प्राकट्यम् । चेतनत्वेनैव सदा प्र- तीयमानत्वात् । सदंशस्तु न्यग्भूतः । विशेषणतयैव प्रतीयमानत्वात् । प्रियत्वं तु ततो न्यग्भूतम् । उक्तयुक्तेः । अन्तर्यामिणि तु प्रियत्वमेव मुख्यमन्यदुभयं न्यग्भूतम् । तद्द्रष्टॄणां प्रियत्वेनैवानुभवगोचरत्वा- दिति । अत्र नियामिका तु, प्रजार्थेयेति भगवदिच्छैव । अन्यथा पूर्वो- क्ताकारेणैव नानाभावात् सुषुप्तिमुक्त्यवस्थाकारान्तरकथनस्य वैय- र्थ्यापत्तेः । उच्चनीचभावादिनाऽऽविर्भावस्यैव प्रकर्षपदार्थत्वेन विव- क्षितत्वादिति । एतेन कुष्ठित्वादिप्रणीतान्यपि भगवदिच्छैव हेतुरिति न तथापि समवायित्वे दोषप्रसक्तिः । क्रीडार्थं तथैव सुखदुःखोत्पादनात् । एतदप्येकादशस्कन्धीयविविक्तविद्याध्याये गुणदोषदर्शनस्य कर्मनिय- मार्थत्ववोधकवाक्यैरवसीयत इति नात्रापि शङ्कालेशः । अत एव न कचिदपि कुत्सितत्वं ब्रह्मविदां भासते । अत एवैकादश एवोक्तम्, 'किं वर्णितेन बहुना लक्षणं गुणदोषयोः । गुणदोषदृशिर्दोषो गुण- स्तूभयवर्जित' इति । नचैवं ब्रह्मणः समवायित्वे, सैषा विद्या जगतः सर्वांमस्यादितापनीयश्रुतिविरोधः । तस्याम्, न विलक्षणत्वाधिकरणे

न च साधारण्येन सर्वजगत् प्रति परमाण्वादीनामन्वयः सम्भवति । एकस्मिन्ननुस्यूते सम्भवत्यनेककल्पनाया अन्याय्यत्वात् । लोके कर्तृविशेषवदुपादानविशेषग्रहणेऽपि न ब्रह्मणि व्यभिचारः ।

समाधेयत्वात् । तत्रापि तस्मादात्मन एव त्रैविध्यं सर्वत्र योनित्वमपीति सप्रमाणत्वादिति । अत एव श्रीभागवतारम्भश्लोकेऽपि ब्रह्मणः समवायित्वं ग्राहयितुं, जन्माद्यस्य यतोऽन्वयादित्यनेनान्वय एव हेतुत्वेनोक्तः । न च तदितरतः इत्यनेन व्यतिरेकस्याप्युक्तत्वात् तस्यात्र कुतो नोक्तिरिति शङ्क्यम् । ब्रह्मणो व्यापकत्वेनाभावरूपस्य व्यतिरेकस्याभावाद्विशेषेणातिरिक्तत्वरूपो व्यतिरेकः कृत्स्नप्रसक्तिवारणाय विवक्षितः । स स्वनाशोपिनागन्तुकरूपबोधकेन समुत्सर्गेणैव बोधित इत्यतः पृथङ्नोक्तः । एवं च तु श्लोकेऽस्मिन्नन्वयव्यतिरेकाभ्यामित्यत्रापि बोध्यम् । एतदेवैकादशस्कन्धीये, 'यथा हिरण्यं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य । तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत्' इति वाक्येऽपि निष्कृष्य दृष्टान्तेन बोधितं ज्ञेयम् । प्रकृतमनुसरामः । नन्वेतावदेवोपपादनसापेक्षप्रधानान्वयोपगमापेक्षया तदनपेक्षः परमाणूनां भूतानां चान्वयो ज्यायान् प्रतिपत्तिसौकर्यात् । तदर्थमेव सर्वेषां प्रयत्नादित्याशङ्कायामाहुः *न चेत्यादि* । परमाण्वादीनामित्यादिपदेन, कालः स्वभावो नियतिर्यदृच्छेति श्रुत्युक्तानां कालादीनां संग्रहः । जगदन्तःपातिषु दिगाकाशादिषु परमाणूनामन्वयाभावात् । तेषां नित्यत्वाभ्युपगमेऽपि स्वभावान्वयस्त्ववश्यं वाच्यः । एवं मतान्तरे कालस्य प्रकृतेश्च वाच्यः । तथा सति विप्रतिपन्नानामनेकेषां परमाणूनां चानेकेषामन्वयकल्पनस्य न्यायविरुद्धत्वात् प्रतिपत्त्यसौकर्यात् । किन्त्वेकस्मिन् ब्रह्मणोऽन्वये सम्भवति तस्यैवानुस्यूतस्य समवायित्वं युक्तमित्यर्थः । एकस्मिन् समवायिनीति वार्थः । नन्वनेकसमवायिकल्पनस्यान्याय्यत्वे मृत्तन्त्वादेरपि समवायित्वं न स्यात् । तथा च प्रत्यक्षविरोध इत्यत आहुः *लोक इत्यादि*तथाच यथा लोके कुलालादीनां चतुर्मुखान्तानां कर्तृत्वेऽपि

अलीकप्रतीतेऽस्तित्वादिप्रतीतावपि समन्वयाभावान्न कार्यत्वव्यभिचारी । तस्माद् ब्रह्मण एव समवायित्वम् । एतद् सर्वं श्रुतिरेवाह । स आत्मानं स्वयमकुरुतेति । निमित्तत्वन्तु स्पष्टमेव सर्ववादिसम्मतम् ।

तत्सम्मते प्रकृतेरीश्वरस्य च सर्वनियामकत्वान्न कर्तृत्वं हीयते । एवं लोके तन्त्वादीनां परमाण्वन्तानां प्रकृत्यन्तानां वोपादानत्वेन ग्रहणेऽप्यस्मन्मते ब्रह्मणो मूलकारणत्वान्न समवायित्वहानिरित्यर्थः । ननु शुक्तिरजतादौ स्वाप्निकादौ चास्तित्वं प्रतीयत इति तेषु सदन्वयो वक्तव्यस्तथा सति तस्यापि ब्रह्मकार्यत्वे जगत्तुल्यतया सत्यत्वं स्यात् । तत्तु विशेषदर्शनबाधितत्वादशक्यवचनम् । ततश्च न तस्य ब्रह्मकार्यत्वमपि । अतोऽकार्येऽपि सदन्वयान्न तेन ब्रह्मणः समवायित्वसिद्धिरित्यत आहुः * अलीकेत्यादि * तथाचान्वयस्य न गमकत्वमपि तु समन्वयस्य । समन्वयस्त्वनारोपितानागन्तुकरूपेणान्वयः । अलीकप्रतीतरजतादौ तु सत्ता आरोपितेति सत आरोपितरूपेणान्वयान्न तस्य ब्रह्मकार्यतागमकत्वम् । तस्यैवाभावाच्च न ब्रह्मणोऽपि समवायित्वव्यभिचार इत्यर्थः । सिद्धमाहुः * तस्मादित्यादि * नामरूपयोः कर्मणः सुखदुःखमोहानां चागन्तुकत्वेन, परमाण्वादीनां चासाधारणत्वेन, कालादेस्तत्त्वे विप्रतिपन्नत्वेन, अलीकप्रतीते सत्त्वस्यारोपितत्वेन तेषामन्वयस्यासम्यक्तया प्रकटाप्रकटानां वास्तविकानां सच्चिदानन्दानामेव समन्वयाद् ब्रह्मण एव समवायित्वं निश्चयमित्यर्थः । नन्वेवं वादिविसंमताग्रहे किं बीजमत आहुः * एतदित्यादि * पूर्वाधिकरणोक्तं कर्तृत्वं शास्त्रप्रमाणकत्वम्, एतदधिकरणोक्तं समवायित्वं च कर्तृकर्मत्वबोधकविभक्तिभ्यामेकस्यैव श्रुतिर्वदतीत्येतदेव बीजमित्यर्थः । अन्यथा श्रुतावुपचारापत्तेः । एतच्च, यत इत्यत्र हेतौ या पञ्चमी सा, जनिकर्तुः प्रकृतिरित्यत्र प्रकृतिपदेन समवायिरूपं कारणं परामृश्य विहितेति निमित्तवदुपादानमपि सैव वक्तीति वाचकशब्दश्रवणमप्यूह्यम् । तथाचैवं विचारे ब्रह्मणः सर्व-

विधं कारणत्वं श्रुतिवाक्याभ्यां प्रमाणाभ्यां सिद्धम् । तत्र स्वस्यैव समवायित्वेन कर्तृरोपभूतमनःप्रकामत्वं, क्रियाज्ञानयोः सातिशयत्वं च वारितम् । कर्मणि आत्मपदेनाविकृतत्वबोधनाद् विकृतत्वं च वा-रितम् । तेन दोषरहिता ब्रह्मणः सर्वविधा कारणतेत्यनेनाधिकरणेन निर्णीतम् । समन्वयपदव्याख्यानेनात्र समवायस्वरूपमपि बोधितम् । अनारोपितानागन्तुकरूपेणानुवृत्तिरेव समवाय इति । इदमेव च ता-दात्म्यम् । आगन्तुकरूपेण भेदसहिष्णुत्वेऽप्यनागन्तुकरूपेणाभेदा-दिति । न तु वैशेषिकप्रतिपन्न इति न कोऽपि विरोधः । एतस्य स-म्बन्धत्वमैच्छिकमेदोत्तरं विनिगमने विशिष्टबुद्धिनियामकत्वाज्ज्ञेयम् ।

विज्ञानेन्द्रभिक्षुस्तु जन्मादिसूत्रे अधिष्ठानकारणमतिरिक्तम-ङ्गीकृत्य, यदविभक्तं येनोपष्टब्धं च सद् उपादानकारणं कार्याका-रेण परिणमते तदधिष्ठानकारणम् । यथा सर्गादौ जलाविभक्ताः पार्थिवसूक्ष्मांशास्तन्मात्राख्या जलेनैवोपष्टम्भात् पृथिव्याकारेण प-रिणमन्त इत्यतो जलं पृथिव्या अधिष्ठानकारणमिति । अत्र प्रमाणं तु, 'आधारमानन्दमखण्डबोधं यस्मिँल्लयं याति पुरत्रयं च । एतस्मा-ज्जायते प्राणो मनः सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' इति कैवल्योपनिषद्वाक्यम् । 'यस्य यत् कारणं प्रोक्तं तस्य साक्षान्महेश्वरः । अधिष्ठानतया स्थित्वा सदैवोपकरोति च' इति पुराणान्तरवाक्यं च । एतादृशकारणत्वमेवाधिष्ठानकारणत्व-मिति मूलकारणत्वमिति चोच्यते । ब्रह्मणश्च स्वाविभक्तप्रकृत्याद्युप-ष्टम्भकत्वं साक्षितामात्रेणेति जगत्कारणत्वेऽपि ब्रह्मणो न विकारि-त्वम् । न वा प्रकृतिपुरुषादिष्वतिप्रसङ्गः । सर्गात् पूर्वमन्येषां साक्षि-त्वासम्भवात् । अत एवाविकारिचिन्मात्रत्वेऽपि ब्रह्मणो जगदुपादान-त्वं, जगदभेदश्चोपपद्यते । विकारिकारणवदधिष्ठानकारणस्याप्यु-पादानत्वव्यवहारात् । कार्याविभागाधारत्वस्यैवोपादानसामान्यल-क्षणत्वात् । अविभागश्चाधारतावत् स्वरूपसम्बन्धविशेषोऽत्यन्तस-म्मिश्रणरूपो दुग्धजलाद्येकताप्रत्ययनियामकः । तत्र समवायसम्ब-न्धेन यत्राविभागस्तद्धि विकारिकारणम् । यत्र कार्यस्य कारणाविभा-गेनाविभागस्तदधिष्ठानकारणम् । यथा जलं पृथिव्या इति । न हि ज-लस्य पृथिवी साक्षादेव विकारः । तन्मात्राणां भूतप्रकृतित्वश्रुतिस्मृति-विरोधात् । नच द्वयोरेवोपादानत्वम् । विजातीयानामनारम्भकत्वात्

त। एवमाकाशादीनां वाय्वाद्युपादानत्वमप्यधिष्ठानतयैव द्रष्टव्यम्। सम्भवत्यविरोधे सृष्टिप्रक्रियायां वैशेषिकसाङ्ख्ययोरुभयोरप्यत्र विरोधानौचित्यादिति। वैशेषिकादिभिरपीदृशं ब्रह्मणः कारणत्वमिष्यत एव। परन्तु तैरिदमपि निमित्तकारणत्वमिति परिभाष्यते। अस्माभिस्तु समवाय्यसमवायिभ्यामुदासीनं निमित्तकारणेऽभ्यश्च विलक्षणतया चतुर्थमाधारकारणत्वमिति। ब्रह्मणश्च जगत्कर्तृत्वं स्वोपाधिमायोपाधिकम्। परिणामित्वरूपोपादानत्वं च प्रकृतितत्कार्योपाधिकमित्याह।

तदसङ्गतम्। आत्मैवेदमग्र आसीदित्यादिश्रुतिषु दृश्यमानस्य जगतः पूर्वमात्मरूपत्वादिबोधनेनेतराभावसिद्धाविभागाख्यस्य स्वरूपसम्बन्धस्य तदानीं वक्तुमशक्यत्वेन लक्षणेऽव्याप्तेः। गार्गीब्राह्मणे भूतभव्यस्याकाशे आकाशस्य चाक्षरे ओतप्रोतत्वकथनेन तादृशत्वस्य च, ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पट इत्यादावुपादानतागमकत्वेन, आथर्वणानां गोपथब्राह्मणारम्भे 'ब्रह्म ह वा इदमग्र आसीत् स्वयं त्वेकमेव तदैक्षत महद्वै यक्षं तदेकमेवास्मि हन्ताहं मदेव मन्मात्रं द्वितीयं तदेव निर्मम इति द्वितीयस्य ब्रह्ममात्रत्वश्रावणपूर्वकं सृष्टिकथनेन 'विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया। यथेदानीं तथाग्रे च पश्चादप्येतदीदृशम् इति तृतीयस्कन्धे विश्वस्य ब्रह्मतन्मात्रत्वकथनेन च द्वितीयस्य विश्वस्य च साक्षादुपादेयत्वे ब्रह्मण उपादानत्वस्यादण्डवारितत्वाच्च। नचोक्तकैवल्यश्रुतिविरोधः। तस्या अवान्तरसृष्टिविषयकत्वात्। एवकाराप्रपदार्थभावेन पुरुत्रयलपलिङ्गेन च तथा निश्चयात्। नापि स्मार्तसदापदविरोधः। प्राथमिकसृष्ट्यनन्तरं तथात्वेऽप्यविरोधात्। उक्तश्रुताविहापि प्राथमिकसृष्ट्यारम्भकालगमकस्याभावात्। उक्तदृष्टान्तोऽप्यसङ्गतः। पृथिव्यादितन्मात्रस्यैव साक्षाज्जलादिजन्यत्वात्। 'रसमात्राद् विकुर्वाणादम्भसो दैवनोदितात्। गन्धमात्रमभूत् तस्मात् पृथ्वी घ्राणस्तु गन्धग इत्यादितृतीयस्कन्धवाक्यैस्तथा निश्चयात्। विजातीयारम्भस्यात्रापि तादृशस्याप्यात्। नच विजातीयानामनारम्भकत्वम्। तन्तुत्वपटत्वयोर्भेदेन तत्रैव विजातीयारम्भदर्शनात्। द्रव्यत्वादिना साजात्यस्य भवदनभिमतेऽपि सत्त्वात्। नच द्रव्यत्वव्याप्यजातिभिरेव साजात्यं विवक्षितमिति वाच्यम्। अप्रयोजकत्वात्। गोमयादि-

ऽयों वृश्चिकाद्युत्पत्तिदर्शनात् । चलत्यनिले सूक्ष्मानलेनापि यत्र महान् दावानलस्तत्रानलावयवानां स्वल्पत्वेन ततो महानलस्याशक्यवचनतयाऽनिलेनैव तदुत्पत्तेः सार्वजनीनत्वाच्च । यत्र क्वचन स्विद्यति शोचते वा पुरुषस्तेजस एव तदध्यापो जायन्त इत्यादिश्रुतिभिरपि तथा निश्चयाच्च । साङ्ख्यवैशेषिकादीनां परस्पराविरोधाग्रहस्य प्रकृतानुपयोगित्वेन तथाथासत्वापायेऽनाग्रह । एवं ब्रह्मणो मायोपाधिकं कर्तृत्वं प्रकृतितत्कार्योपाधिकं परिणाम्युपादानत्वमप्यवान्तरसृष्टिविषयकमेव । आनन्दरूपममृतं यद् विभाति, सच्चिदानन्दरूपायेत्यादिश्रुतिभिरानन्दमात्रकरपादमुखोदरादिरित्यादिस्मृतिभिश्च ब्रह्मण आनन्दाकारत्वे सिद्धे मूलरूपस्यौपाधिकत्वकल्पनाया असङ्गतत्वात् । न च विकारित्वादि शङ्क्यम् । तस्याग्रे तदनन्यत्वाधिकरणे परिहरणीयत्वात् । एवमन्यदपि यद्यद् विरुद्धमविरुद्धं वा तत्सर्वं प्रसङ्गे व्यवस्थापयिष्यामः ।

भट्टभास्कराचार्यास्तु ब्रह्मण एवोपादानत्वमङ्गीकृत्य कार्यस्य जगतः कारणाद् भेदाभेदौ प्रतीत्या व्यवस्थापयन्ति । तथाहुः ।

एकस्यैकत्वमस्तीति प्रमाणादवगम्यते ।
नानात्वं तस्य तत्पूर्वं कस्माद् भेदोऽपि नेष्यते ॥
यत्प्रमाणैः परिच्छिन्नमविरुद्धं हि तत् तथा ।
वस्तुजातं गवाश्वादि भिन्नाभिन्नं प्रतीयते ॥

नैवाभिन्नं भिन्नमेव वा कश्चिद् दर्शयितुं शक्यते । सत्ताज्ञेयत्वद्रव्यत्वादिसामान्यात्मना सर्वमभिन्नं, व्यक्त्यात्मना तु परस्परवैलक्षण्याद् भिन्नम् । तथाहि ।

प्रतीयते चेदुभयं विरोधः कोऽयमुच्यते ।
विरोधे चाविरोधे च प्रमाणं कारणं मतम् ॥
एकरूपं प्रतीतत्वाद् द्विरूपं तत् तथेष्यताम् ।
एकरूपं भवेदेकमिति नेश्वरभाषितम् ॥

ननु शीतोष्णयोर्यथा परस्परं विरोधस्तथा भेदाभेदयोः, किमिदमुच्यते नास्ति विरोध इति । अत्रोच्यते । भवेत् प्रज्ञापराधोऽयं, न वस्तुविरोधः । कथम् । सहानवस्थानं, छायातपवद्भिन्नदेशवर्तित्वं वा शीतोष्णवद्विरोधो नाम । एतदुभयमिह कार्यकारणयोर्ब्रह्मप्रपञ्चयोर्नास्ति । तत उत्पत्तेस्तत्रैवावस्थितेस्तत्रैव प्रलयात् । विरोधे हि अय

मेतन्नोपपद्यते । नहि कृशानुतनाङ्कुरोत्पत्त्यादिलक्षणः सम्बन्धो दृश्यते । कारणेन हि मृत्सुवर्णादिना कार्यं सर्वदानुस्यूतं दृश्यते । तत्राक्षिणी निमील्य परस्परासङ्गतिलक्षणो विरोधो वैयात्याद् वक्तव्यो भवेत्, प्राथमिकशिष्यप्रतारणार्थं वा । शीतोष्णयोर्भिन्नाधारवर्तिनोर्न कदाचिदुत्पाद्योत्पादकलक्षणः सम्बन्धो, नाधाराधेयलक्षण इति युक्तस्तयोः परस्परविरोधः । तस्माच्छीतोष्णवदित्ययुक्तं दृष्टान्ताभिधानम् । अत्र प्रागल्भ्यात् कश्चिदाह । यथा संशयज्ञानं स्थाणुर्वा पुरुषो वेत्यप्रमाणं, तथा भेदाभेदज्ञानमिति । तदसत् ।

परस्परोपमर्देन न कदाचित् सह स्थितिः ।
प्रमेयानिश्चयाच्चैव संशयस्याप्रमाणता ॥

अत्र पुनः कारणं पूर्वसिद्धं मृत्सुवर्णादिलक्षणम् । ततः कार्यं पश्चाज्जायमानं तदाश्रितमेव जायते । कारणसमानाधिकरणतया हि कार्यबुद्धिः । न कारणस्वरूपोपमर्देन देशतः कालतो वा पृथग्भूतं कार्यं दृश्यते । तस्मान्न किञ्चिदेतत् । तदयं सङ्ग्रहश्लोकः ।

कार्यरूपेण नानात्वमभेदः कारणात्मना ।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा ॥ इति ।

अत्र वाचस्पतिमिश्रा उक्तां कारिकामुपन्यस्याहुः । कः पुनरयं भेदो नाम, यः सहाभेदेनैकत्र भवेत् । परस्पराभाव इति चेत् । किमयं कार्यकारणयोः कटकहाटकयोरस्ति, न वा । न चेद् एकत्वमेव वास्तवं न भेदः । अस्ति चेद् भेद एव, नाभेदः । नच भावाभावयोरविरोधः । सहासम्भवात् । सम्भवे वा कटकवर्धमानकयोरपि तत्त्वेनाऽभेदप्रसङ्गः । भेदस्याभेदाविरोधात् । अपिच । कटकस्य हाटकादभेदे यथा हाटकात्मना कटकमुकुटकुण्डलादयो न भिद्यन्ते, एवं कटकात्मना न भिद्येरन् । कटकस्य हाटकादभेदात् । तथाच हाटकत्वमेव वस्तु सन्न कटकादयोऽभेदस्याप्रतिभासनात् । अथ हाटकत्वेनैवाभेदो, न कटकत्वेन । तेन तु भेद एव कुण्डलादेः । यदि हाटकादभिन्नः कटकः, कथमयं कुण्डलादिषु नानुवर्तते । नानुवर्तते चेत् कथं हाटकादभिन्नः । ये हि यस्मिन्ननुवर्तमाने व्यावर्तन्ते ते ततो भिन्ना एव । यथा सूत्रात् कुसुमभेदाः । नानुवर्तन्ते चानुवर्तमानेऽपि हाटकत्वे कुण्डलादयः । तस्मात् तेऽपि हाटकाद्भिन्ना एवेति । सत्तानुवृत्त्या च सर्ववस्त्वनुगमे, इदमिह नेदमस्मान्नेदमिदमिदानीं

भेदमिदमेव भेदमेतमिति विभागो न स्यात्। कस्य चित् कदाचित् कथञ्चिद् विवेकहेतोरभावात्। अपिच। दूरात् कनकमित्यवगते, न तस्य कुण्डलादयो विशेषा जिज्ञास्येरन्। कनकादभेदात् तेषाम्। तस्य च ज्ञातत्वात्। अथ भेदोऽप्यस्ति कनकात् कुण्डलादीनामिति कनकावगमेऽपि अज्ञातास्ते। नन्वभेदोऽप्यस्तीति, किं न ज्ञाताः?। प्रत्युत ज्ञानमेव तेषां युक्तम्। कारणाभावे हि कार्याभाव औत्सर्गिकः। स च कारणसत्तयाऽपोद्यते। अस्ति चाभेदे कारणसत्तेति। कनके ज्ञाते ज्ञाता एव कुण्डलादय इति तज्जिज्ञासाज्ञानानि चानर्थकानि स्युः। तेन यस्मिन् गृह्यमाणे यन्न गृह्यते तत् ततो भिद्यते। यथा करभे गृह्यमाणे अगृह्यमाणो रासभः करभात्। गृह्यमाणे च दूरतो हेम्नि न गृह्यन्ते तस्य भेदाः कुण्डलादयः। तस्मात् ते हेम्नो भिद्यन्ते। कथं तर्हि हेम कुण्डलमिति सामानाधिकरण्यमिति चेद्। तदाधाराधेयभावे समानाश्रयत्वे वा सामानाधिकरण्यमित्युक्तम्। अथानुवृत्तिव्यावृत्तिव्यवस्था च हेम्नि ज्ञाते कुण्डलादिजिज्ञासा च कथम्। न ह्येकमेव एकान्तिकेऽनैकान्तिके चैतदुभयमुपपद्यते यत इत्युक्तम्। तस्माद् भेदाभेदयोरन्यतरस्मिन् हेये। अभेदोपादानैव भेदकल्पना, न भेदोपादाना अभेदकल्पनेति युक्तम्। भिद्यमानतन्त्रत्वाद् भेदस्य भिद्यमानानां च प्रत्येकमेकत्वात्। एकाभावेनानाश्रयस्य भेदस्यायोगात्। एकस्य च भेदानधीनत्वात्। नायमयमिति च भेदग्रहस्य प्रतियोगिग्रहसापेक्षत्वादेकत्वग्रहस्य चान्यानपेक्षत्वादभेदोपादानैवानिर्वचनीयकल्पनेति साम्प्रतम्। तथाच श्रुतिः, मृत्तिकेत्येव सत्यमिति। तस्मात् कूटस्थनित्यतैव पारमार्थिकी, न परिणामिनित्यतेति सिद्धमिति॥ तदनवधानविजृम्भितमेव॥ उक्ते मते भेदाभेदयोर्नानात्वैकत्वरूपतया भेदस्यान्योन्याभावरूपत्वानङ्गीकारेण तन्नादाय तन्मतदूषणस्य गगनकुसुमसौरभ्यकल्पत्वात्। परस्पराभावरूपत्वेऽपि घटतदत्यन्ताभावयोर्घटतद्भेदयोश्च भूतल एव सहावस्थानदर्शनेन भेदस्य तदभावेनाभेदेन सह न विरोधः। अत्यन्ताभावस्य नित्यव्यापकत्वेन सर्वत्र सत्वात् प्रतियोग्यानयनोत्तरं तदभावबुद्धिप्रतिबन्धमात्रपरम्। एवं सति यत्र भेदस्तत्राप्यभेदो वर्तेत यथेति तयोः सहासम्भवाद्विरोधकथनस्यापि तथात्वम्। एवं, सम्भवे वेत्यादिना कटकवर्धमानकयोरभेदप्रसञ्जनस्यापि तथात्वम्। अविरोध-

स्यैक्यापादकतायाः काप्यदृष्टत्वात्। यदपि, कटकस्य हाटकादित्यादिना कटकादीनां हाटकाद् भेदव्युत्पादनं, तदपि तथा। तेषां तदवस्थारूपत्वात्। अवस्थानां चावस्थावतः सकाशतो भिन्नाभिन्नत्वात्। षट्पद्यां समुद्रतरङ्गयोस्तथात्वस्य शङ्कराचार्यैरेवोक्तत्वात्। अतः परं सहानुपलम्भादिनोक्तो दूषणत्वेन प्रतीतिविरोधो वक्तव्यः। स चेद् विद्यमानेऽपि कुण्डलादिना भेदे कनकत्वेनाभेदः प्रतीयते तदा न प्रतीतिविरोधोऽपि। प्रमाणेनाधिगमात्। प्रमिते च तस्मिन्, दूरात् कनकमित्यादिनोक्तानां विकल्पानामनवसरपराहतत्वादिति, प्रतीयते चेदुभयमितिकारिकयैवोक्तं व्युत्पादितं च। अतो मुकुटकटकादीनामवस्थात्वेन हेमसामानाधिकरण्यस्य सामयिकत्वेन च व्यावृत्तिव्यवस्थाजिज्ञासाजनकत्वयोरुपपत्तेर्भेदस्यागन्तुकत्वमेव, न स्वनिर्वचनीयत्वम्। नच श्रुतिविरोधः। उक्तश्रुतौ परिणामिनो मृदादीनेव दृष्टान्तीकृत्य, एवं सोम्य स आदेशो भवतीति दार्ष्टान्तिकेऽतिदेशेन परिणामिनित्यताया एव श्रुत्यभिप्रेतत्वात्। नचात्र कारणे सत्यत्वस्य कार्ये वाचारम्भणत्वस्य चोक्तत्वेन कार्यमिथ्यात्वसिद्धौ कूटस्थनित्यत्वमेव सेत्स्यतीति वाच्यम्। घटः पट इत्यादिवाचारम्भणरूपस्य श्रुत्यनभिप्रेतत्वात्। यदि कार्यस्वरूपस्यापि वाङ्मात्रतामभिप्रेयाद्, वाचारम्भणं नामधेयमिति यद्द्वयं न ब्रूयात्। एकेनैव चारितार्थ्यात्। इदं यथा तथा तदनन्यत्वाधिकरणे प्रपञ्चयिष्यते। सिद्धान्ते यो विशेषः सोऽपि तत्रैव व्युत्पादयिष्यते। तस्मादस्मिन्नंशे भास्कराचार्यमतमदुष्टमेव।

रामानुजाचार्यास्तु, 'अस्मान्मायी सृजते विश्वमेतत्। तस्मिंश्चान्यो मायया सन्निरुद्धः। मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्'इत्यादिश्रुतिभ्यश्चिदचिदीश्वराणां चिदचित्प्रवराणां यथायथं भोग्यत्वभोक्तृत्वनियन्तृत्वैः स्वरूपवैधर्म्यात् त्रयोऽपि भिन्नाः। तथा, यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्मान्तर्याम्यमृत इत्यारभ्याऽऽपोऽग्निरन्तरिक्षं वायुर्द्यौरादित्यो दिशश्चन्द्रतारकमाकाशस्तमस्तेजः सर्वाणि भूतानि प्राणा वाक् चक्षुः श्रोत्रं मनस्त्वग् विज्ञानं रेत इत्येतानि काण्वपाठेन, विज्ञानस्थाने, आत्मा लोकयज्ञवेदाश्चाधिका माध्यन्दिनपाठेन, वाजसनेयके बृहदारण्यकेऽन्तर्यामिब्राह्मणे ब्रह्मशरीर-

स्वेनोक्ता ब्रह्मण आत्मत्वं चोक्तम् । सुबालोपनिषदि तु वाजसनेयक-उक्ताः पृथिव्यादयस्तथानुक्ताश्च बुद्धिचित्ताव्यक्ताक्षरमृत्युपर्यन्ताः शरीरत्वेनोक्ताः । यः पृथिवीमन्तरे सञ्चरन् यस्य पृथिवी शरीरं यं पृथिवी न वेद एष सर्वभूतान्तरात्मा । दिव्यो देव एको नारायण इत्यारभ्य यस्य मृत्युः शरीरमित्यन्तेन तथोक्तम् । तेन पृथिव्यादीनां स्थूलानाम् अव्यक्तादीनां सूक्ष्माणां च शरीरत्वश्रवणात् स्थूलसूक्ष्मभेदेन द्विविधस्याप्यचिद्वस्तुनो ब्रह्मशरीरम् । अव्यक्तादीति स्वव्यक्ताद्यक्षरतमांसि गुणत्रयसाम्यावस्थारूपायाः प्रकृतेरेव सूक्ष्मपर्वणामविशिष्टानि रूपान्तराणि तेषु मूलभूतरूपं तमः । सुबालोपनिषदि प्रलयप्रकरणे पृथिवी अप्सु लीयते आपस्तेजसि तेजो वायौ वायुराकाशे आकाशमिन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ भूतादिर्महति महान् अव्यक्ते अव्यक्तमक्षरे अक्षरं तमसि लीयते तमः परे देव एकीभवतीत्यविभागापत्तिदशायां विभागव्यपदेशानर्हरूपता तस्यैवावस्थानात् । शरीरकथनप्रस्तावे च तमःस्थाने मृत्योः श्रवणान्मृत्युशब्देनात्र तम उच्यत इति निश्चीयत इति तस्यापि शरीरत्वं सिद्धम् । एवं काण्वोक्तविज्ञानस्थाने आत्मनः श्रवणाच्चिद्वस्तुनोऽपि ब्रह्मशरीरत्वमसन्दिग्धम् । एवं सर्वावस्थास्वपि चिदचिद्वस्तुशरीरतया तत्प्रकारः परमपुरुष एवेति सदेव सोम्येदमग्र आसीत् सत्यं चानृतं च सत्यमभवदित्यादौ जगतो ब्रह्मत्ववादः । प्रपञ्चरूपे शरीरे प्रलयदशायां तमःशब्दवाच्यातिसूक्ष्माचिद्वस्त्वेकशेषे सति तमसि च स्वशरीरतया विनिर्देशानर्हातिसूक्ष्मदशापत्त्या स्वस्मिन्नेकतापन्ने सति तथाभूततमःशरीरं ब्रह्म पूर्ववद् विभक्तनामरूपचिदचिन्मिश्रप्रपञ्चरूपः स्यामिति सङ्कल्प्याप्ययक्रमेण जगच्छरीरतयाऽऽत्मानं परिणमयतीति सर्वेषु वेदान्तेषु परिणामोपदेशः । अत स्थूलसूक्ष्मचिदचित्प्रकारं ब्रह्मैव कार्यं कारणं चेति जगतो ब्रह्मोपादानकत्वेऽपि सूक्ष्मचिदचिदीश्वरसङ्घातस्यैवोपादानत्वेन चिदचितोर्ब्रह्मणश्च भोक्तृत्वभोग्यत्वनियामकत्वरूपस्वभावासङ्करोऽप्युपपन्नतरः । शुक्लकृष्णरक्ततन्तुसङ्घातोपादानके चित्रपटे तत्तत्तन्तुप्रदेश एव शौक्ल्यादिवत् तत्र तत्र भोक्तृत्वादीनां व्यवस्थितत्वात् । एतावान् पर विशेषः । तन्तूनां पृथक्स्थितियोग्यत्वात् पुरुषेच्छया कदाचित् सङ्घातात् कारणत्वं कार्यत्वं च कादाचित्कम् । इह तु चिदचितोः

सर्वावस्थयोः परमपुरुषशरीरत्वेन तत्प्रकारतयैव पदार्थत्वात् सर्वदा सर्वैः शब्दैस्तत्प्रकारः परमपुरुष एव वाच्य इति । अहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीत्यत्र तिस्रो देवता इत्यनेन सर्वमचिद्वस्तु निर्दिश्य तत्र स्वात्मकजीवानुप्रवेशेन नामरूपव्याकरणवचनात् सर्वे वाचकाः शब्दा अचिज्जीवविशिष्टपरमात्मन एव वाचका इति कारणावस्थपरमात्मवाचिनां शब्देन कार्यवाचिनः शब्दस्य सामानाधिकरण्यं मुख्यवृत्तमिति विशिष्टाद्वैतवादमङ्गीकृत्य चिदचिद्विशिष्टस्यैवोपादानत्वं रोचयन्ते ।

तदपि चिन्त्यम् । आदिसृष्टिप्राक्काले सूक्ष्मचिदचिच्छरीरवैशिष्ट्यस्य वक्तुमशक्यत्वात् । सदेव सोम्येदमग्र आसीद् एकमेवाद्वितीयमित्यत्रैवकारादिभिरितरव्यवच्छेदात् । नच तैः शरीर्यन्तरं मुख्यान्तरं मिथदन्तरं च व्यवच्छेद्यते, न तु शरीरममुख्यमपि चेति वाच्यम् । पुरुषविधब्राह्मणे, आत्मैवेदमग्र आसीत् पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्यनुवीक्षाया अन्यदर्शननिषेधस्य च विरोधापत्तेः । नच तत्राप्यन्यपदेन शरीर्येव विशिष्ट एव वा परामृश्यतेऽतो न विरोध इति वाच्यम् । तत्र तादृशपरामर्शस्याशक्यवचनत्वात् । तथाहि । तत्रात्मा किं स्वशरीरं विशेषणत्वेन शरीरत्वेन वा धर्मित्वेन वा परामृशत्यात्मत्वेन वा । नाद्यः । तस्य पार्थक्ये सत्यात्मानुवीक्षणस्य तदन्यादर्शनस्य च यथायथं भ्रमत्वानृतापादकत्वयोरापत्तेः । तमस एकीभावस्य स्वशरीरतया निर्निर्देशानर्हातिसूक्ष्मदशापन्नरूपताङ्गीकारेण तदानीं पार्थक्यस्य शरीरत्वस्य वाऽनभिमतत्वाच्च । न तुरीयः । आत्मत्वेन परामर्शे तेन प्रमाणज्ञानेनैवाभेदसिद्धौ भेदापादकप्रमाणाभावेन वैशिष्ट्याभावे केवलब्रह्माद्वैतवादस्यैव सिद्धेः । नच सुबालोपनिषदन्येषां प्रलयकथनात् तमसस्तदनुप्रवेकीभावकथनादन्येभ्यः कश्चिद्विशेषो वक्तव्यः । स च स्वरूपतिरोभावपूर्वकाविभागापत्तिरूप एव युक्तः । अन्यथा शब्दान्तरवैयर्थ्यप्रसङ्गात् । सिद्धे चैवं तमःस्वरूपतिरोभावे तदानीं वैशिष्ट्यस्याविलोपानुपपत्तौ च, सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयदिति प्रतिसृष्टि पूर्वतुल्यनामरूपेण सर्वदा सृष्टिप्रलयक्रमस्यैकरूप्यसूचनयापि शारीरूपेण वैशिष्ट्याद् विशिष्टाद्वैतवादस्यैव सिद्धिर्न केवलब्रह्माद्वैतवादस्येति तदानीं विशिष्टत्वादर्शनमेव तदर्थ इति वाच्यम् । उत्कृष्ट-

योरवान्तरयोर्किञ्चित्प्रलयसृष्टिविषयत्वेनाप्युपपत्तौ सर्वैकरूप्यस्य नियन्तुमशक्यत्वात्। 'यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथाऽक्षराद् विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्ति' इति विस्फुलिङ्गन्यायेन सद्योत्पत्तिप्रलययोरवगमात्। सूर्याचन्द्रमसाविति लिङ्गेनास्या अवान्तरविषयत्वावगमात्। अनुवीक्षणादिश्रुत्यनुरोधेन सौत्रावाक्येऽपि तथात्वस्य वक्तुं युक्तत्वाच्च। अस्तु वा सौत्रवाक्यस्यादिसृष्टिविषयत्वं, तथापि न तदानीं वैशिष्ट्यसिद्धिः। पृथिव्यादीनां नादेयसामुद्रसलिलैक्यवदविभागापत्तिरूपप्रलयस्य तमसश्च करकाणां जलैक्यवत् पूर्वभावापत्तिरूपस्य प्रवेशस्य शक्यवचनत्वात्। आत्मपदस्य केवलात्मवाचित्वेन विशेषणान्तरसङ्ग्रहाक्षमत्वात्। अन्यथा देहविशिष्टात्मप्रत्ययस्यापि प्रामाण्यापत्तेः। न च निर्विशेषत्वापत्तिः। सच्चिदानन्दरूपाकारस्य, कृत्स्नः प्रज्ञानघनः, आनन्दरूपममृतं यद् विभातीत्यादिश्रुतिभिस्तत्सिद्धेः। तस्मात्, सदेव सौम्येत्यत्र सच्छब्देन केवलं ब्रह्मैव परामृश्यत इति मन्तव्यम्। आत्मपदवत् सत्पदस्यापि केवलब्रह्माभिधायित्वात्। ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति गीतावाक्येन तथा निश्चयात्। एवं तैत्तिरीयेऽपि सत्यज्ञानादिलक्षणं ब्रह्म प्रकृत्य तत एव सर्वस्मादाकाशादिक्रमेण सृष्टिमुक्त्वा, उपादानतां च, सोऽकामयत बहुस्यां प्रजायेयेति स्फुरीकृत्य केवलस्यैवोपादानत्वाय, तदात्मानं स्वयमकुरुतेत्यात्मन एव कर्मत्वं कर्तृत्वं च आवयते। सत्यं चानृतं च सत्यमभवदिति केवलब्रह्मवाचकसत्यपदेन प्रपञ्चस्यापि ब्रह्मता विधीयत इति तत्रापि पूर्वोक्त एवार्थ इति प्रथमसूत्रे शुद्धं ब्रह्मैवोपादानम्।

किञ्च श्रुतौ हि प्रकारद्वयेन निरूपणम् आत्मत्वेन ब्रह्मत्वेन च। आत्मैवेदं सर्वं, ब्रह्मैवेदं सर्वमिति। इदं च पदद्वयं व्याप्तिं बृंहणत्वं चाचष्टे। यद्यप्युभयोः स्वरूपमानन्दस्तथापि सप्रकार आत्मा निष्प्रकारं ब्रह्मेति भेदः। तत्रायमात्मा ब्रह्म विज्ञानमय इत्यात्मनोऽपि ब्रह्मत्वविधाद् व्यासेनापि ब्रह्मजिज्ञासाया एव प्रतिज्ञानाच्च निष्प्रकारमेव मुख्यम्। तस्यैव चाग्रे कारणत्वविचारणमित्यतोऽपि तादृशमेवोपादानम्।

किञ्च। अन्तर्यामिब्राह्मणे सुबालोपनिषदि च, यं पृथिवी न

केचिदत्र शास्त्रयोनित्वपूर्वपक्षनिराकरणाय, तत्तु समन्वयादिति योजयन्ति । तत् पूर्वपक्षसिद्धान्तयोर्द्वयोरप्यसङ्गतत्वादुपेक्ष्यम् ।

वेद, ये मृत्युर्न वेदेत्येवं सर्वावस्थावस्थितस्याचिद्वस्तुनोऽनेनृत्वं श्रावितम् । तच्च वेदनयोग्यत्व एव घटते, यथाऽऽत्मा न वेदेत्यित् । न त्वयोग्यत्वे । घटो न वेदेत्यादिप्रयोगादर्शनात् । अतः सर्वत्र चिदन्वयोऽवश्यमुपेयः । सदन्वयस्तु प्रत्यक्षसिद्ध आनन्दान्वयश्चेत्यतोऽपि ब्रह्मैवोपादानम् । नच मृद्घटादित्यादावपि वाऽभिमानिनमादाय तयोक्तिरिति वक्तुं शक्यम् । जीवानुप्रवेशकृतनतद्विशिष्टस्य पाश्चात्यत्वेन पूर्वं सुष्मासिस्तथा वक्तुमशक्यत्वात् । अनुप्रवेशश्रुतिविरोधेन सर्वदा वैशिष्ट्यस्यावक्तव्यत्वात् । सदैवाविनाभावे चिदचिद्विवेकप्रसङ्गात् । आत्मा न वेदेति पृथङ्निर्देशवैयर्थ्यप्रसङ्गाच्च । अत उक्तलिङ्गैरपि ब्रह्मण एव केवलस्य परिणामनिश्चयादुपादानत्वम् । नच समावसाङ्कर्यप्रसङ्गः । प्रजापत्येतीत्युक्तेषां वचनीयादिभावविरोधी साङ्कर्याभावात् । सृष्टिप्राक्काले स्वितराशङ्कानुत्थानात् । अतो विशिष्टाद्वैतवादस्यार्वाचीनत्वात् सर्ववस्तूनां ब्रह्मपरिणामत्वेन ब्रह्माभिन्नतयैव पदार्थत्वात् सर्वैः शब्दैस्तत्तद्रूपं ब्रह्मैवोच्यत इति कारणावस्थब्रह्मवाचिना शब्देन कार्यवाचिनां शब्दानां सामानाधिकरण्यमुपपादनमन्तरेणापि मुख्यवृत्तमिति राद्धान्तपन्थाः ।

प्रकृतमनुसरामः । अस्मिन् सूत्रे रामानुजाचार्यादिमतमुपक्षिपन्ति * केचिदित्यादि * । ते हि पूर्वपक्षसिद्धान्तावेवमाहु । तथाहि । यद्यपि शास्त्रयोनित्वसूत्रे ब्रह्मणः शास्त्रमात्रप्रमाणकत्वं साधितं तथापि तन्नोपपद्यते । चोदनालक्षणोऽर्थो धर्म, तस्य ज्ञानमुपदेशः, तद्भूतानां क्रियार्थेन समाम्नायः, आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामिति जैमिनिना तत्र तत्र वेदस्य प्रवृत्तिनिवृत्तिजनकक्रियापरतायाः एवानुक्रान्तत्वाद् ब्रह्मरूपसिद्धार्थपरत्वे प्रयोजनशून्यत्वप्रसङ्गात् । नच प्रत्यक्षादीनां वस्तुयाथात्म्यावबोधपर्यवसानदर्शनाच्छास्त्रेऽपि तथात्वमस्त्विति शङ्क्यम् । लोके वेदे च प्रयोजनरहितवाक्यप्रयोगस्यादर्शनात् । प्रयोजनं च प्रवृत्तिनिवृत्तिसाध्यमानि-

इष्टप्राप्तिपरिहारात्मकमेवोपलब्धम् । तदनुद्दिश्य न केनापि किञ्चिद्वाक्यं प्रयुज्यते श्रूयते वा । अतो वेदेऽपि तथात्वं युक्तम् । न च पुत्रस्ते जातो, नायं सर्पो रज्जुरेषेत्यादिषु लौकिकवाक्येषु हर्षभयनिवृत्त्यादिरूपपुरुषार्थान्वयदर्शनात् सिद्धार्थपराणामपि वाक्यानां प्रयोजनवत्त्वं शङ्कनीयम् । तत्रापि वाक्यार्थज्ञानादेव तत्प्राप्तेर्बोधकस्य प्रतारणया प्रयोगेऽपि तत्सम्भवाद् वाक्यस्यार्थपरताया निश्चेतुमशक्यत्वात् । किञ्च । पचति गच्छतीत्यादिप्रयोगस्य प्रमाणान्तरेणावगमोत्तरमेव दर्शनात् सिद्धार्थवाक्यानां गृहीतग्राहित्वात् प्रामाण्यमपि न । साध्यार्थपराणान्तु गामानयेत्यादीनां प्रयोजनवत्त्वमगृहीतग्राहित्वं चाविवादम् । अतो लोकवद् वेदेऽपि वाक्यानां प्रवृत्तिनिवृत्तिपरत्वेन ज्ञानपरत्वेन वा प्रयोजन एव पर्यवसानमिति परिनिष्पन्ने ब्रह्मणि तात्पर्याभावान्न वेदान्तानां ब्रह्मणि तात्पर्यमित्येकः पूर्वपक्षः ।

तथाऽन्योऽपि । तथाहि । वेदान्तवाक्यान्यपि कार्यपरतयैव ब्रह्मणि प्रमाणभावमनुभवन्ति । अद्वितीयं ज्ञानैकरसं परिनिष्पन्नमपि ब्रह्म अनाद्यविद्यया सप्रपञ्चतया प्रतीयमानं निष्प्रपञ्चं कुर्यादिति ब्रह्मणः प्रपञ्चविलापनद्वारेण विधिविषयत्वात् । स च विधिः, 'न दृष्टेर्द्रष्टारं पश्येर्न मतेर्मन्तारं मन्वीथाः' इत्येवमादिर्बोध्यः । तत्र द्रष्टृद्रष्टव्यभेदशून्यं ब्रह्म कुर्यादित्येवमर्थसिद्धेः । अतः स्वनिबन्धनाया उपाधिनिबन्धनाया अकर्तव्यतायाः प्रामाण्ये विशेषाभावात् सिद्धस्यापि ब्रह्मणोऽनिष्पन्नतारूपेण साध्यत्वाविरोधाद् वेदान्तानां ब्रह्मणि कार्यपरतयैव प्रामाण्यं, न स्वातन्त्र्येणेति द्वितीयः पूर्वपक्षः ।

तथाऽपरोऽपि । यद्यपि वेदान्तवाक्यानां स्वातन्त्र्येण सिद्धरूपब्रह्मस्वरूपपरतया न प्रामाण्यं, तथाऽप्यात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः, य आत्माऽपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्यः, आत्मेत्येवोपासीत, आत्मानमेव लोकमुपासीतेत्यादिध्यानविषयो नियोगः स्वविषयभूतध्यानस्य ध्येयैकनिरूपणीयतया ध्येयमाक्षिपन्, सत्यं ज्ञानमनन्तं ब्रह्म, सदेव सोम्येदमग्र आसीत्, इदं सर्वं यदयमात्मा, अयमात्मा ब्रह्म सर्वानुभूरित्यादिस्वरूपविधेयपरवाक्यनिर्दिष्टस्वरूपमेवात्मानमाक्षिपतीत्येवं वाक्यानां ध्याननियोगशेषतयैव प्रामाण्यात् तद्विधिविषयीभूतध्यानाङ्गध्येयानुभवविषयब्रह्मस्वरूपेऽपि तात्पर्याद् ब्रह्मस्वरूपमपि सिद्ध्यत्येवेति

षेन । प्रवृत्तिनिवृत्तिप्रयोजनविधुराणां वेदान्तवाक्यानां ध्यानविधिशेषत्वेऽपि ध्येयविशेषस्वरूपसमर्पणमात्रपर्यवसानात् तत्र स्वातन्त्र्येऽपि बालातुराद्युपच्छन्दनवाक्यवज्ज्ञानमात्रेणैव पुरुषार्थासिद्धेः परिनिष्पन्नवस्तुसत्यतागोचरत्वाभावाद् ब्रह्मणः शास्त्रप्रमाणकत्वं न सम्भवतीति तृतीयः पूर्वपक्षः ।

सिद्धान्तस्तु, समन्वयः सम्यगन्वयः पुरुषार्थतयाऽन्वयः । तथाच, यतो वा इमानि भूतानि जायन्ते, सदेव सोम्येदमग्र आसीत्, एकमेवाद्वितीयं, तदैक्षत बहु स्यां प्रजायेयेति, तत्तेजोऽसृजत, ब्रह्म वा इदमेकमेवाग्र आसीत्, आत्मा वा इदमेकमेवाग्र आसीत्, तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, एको ह वै नारायण आसीत्, सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिषु परमपुरुषार्थभूतस्यानवधिकातिशयानन्दस्वरूपस्य ब्रह्मणोऽभिधेयतयाऽन्वयाच्छास्त्रप्रमाणकत्वं ब्रह्मणः सिद्धमेवेत्यर्थः । अन्यथा सर्वप्रमाणानां यत् स्वविषयावबोधपर्यवसायित्वं, तच्छास्त्रान्निवर्तमानं शास्त्रस्याबोधकत्वरूपमप्रामाण्यमापद्येत । न च प्रवृत्तिनिवृत्त्यन्यतरविरहिणः प्रयोजनशून्यत्वं, पुरुषार्थान्वयप्रतीतेः । स्वरूपपरस्यापि पुत्रस्ते जातः, नायं सर्पो रज्जुरियमित्यादेर्वाक्यस्य हर्षभयनिवृत्त्यादिरूपप्रयोजनदर्शनाच्च । अयमर्थः । अनादिकर्मरूपाविद्यावृतस्वस्वरूपज्ञानानां देवादिदेहाभिमानिनां क्षेत्रज्ञानां व्यवस्थितधारकपोषकभोग्यविशेषाणां मुक्तानां स्वस्य चाविशेषेणानुभवसम्भवे स्वरूपगुणविभवचेष्टितैर्निरवद्यानन्दजनकं ब्रह्मास्तीति बोधयदेव वाक्यं प्रयोजनपर्यवसायि । प्रवृत्त्यादिनिष्ठन्तु यावत्पुरुषार्थान्वयबोधं न प्रयोजनपर्यवसायि । एवम्भूतं कथं लभ्यत इत्यपेक्षायां तत्प्राप्त्युपायतया, ब्रह्मविदाप्नोति परम्, आत्मानमेव लोकमुपासीतेति वेदनादिशब्दैरुपासनं विधीयते । यथा वेश्मनि निधिरस्तीति वाक्येन निधिसद्भावं ज्ञात्वा पश्चात् तदुपादाने प्रयतते । यथाच कश्चिद् राजकुमारो बालक्रीडासक्तो नरेन्द्रभवनान्निष्क्रान्तो मार्गभ्रष्टो नष्ट इति राज्ञा विज्ञातः स्वयं चाज्ञातपितृकः केनचिद्द्विजवर्द्धितोऽधिगतशास्त्रः षोडशवर्षो गुणसम्पन्नस्तिष्ठन् केनचिदभियुक्तेन प्रयुक्तं पिता ते सर्वलोकाधिपतिः प्रशस्तगुणः पुरवरे त्वामेव नष्टं पुत्रं दिदृक्षुस्तिष्ठतीति वाक्यं शृणोति चेत्तदानीमेवाहं तावज्जीवतः पुत्रोऽस्मत्पिता च सर्वसम्पत्समृद्ध इति महाहर्षान्वितो भवति । राजा च

स्यपुत्रं जीवन्तं सकलगुणसम्पन्नं श्रुत्वाऽऽप्तसमर्थो भवति । प-श्चात्तावुभौ सङ्गच्छेते च । यत्तु परिनिष्पन्नवस्तुगोचरवाक्यार्थज्ञान-मात्रेणापि पुरुषार्थपर्यवसानाद् बालातुराद्युपच्छन्दनवाक्यवद्ब्रह्मार्थस-द्भावे प्रामाण्यमित्युक्तम् । तदसत् । निश्चितेऽर्थाभावे पूर्वं ज्ञानस्या-प्यर्थस्य पुरुषार्थानुपयोगात् । बालातुरादीनामप्यर्थसद्भावभ्रान्त्या पूर्वं हर्षाद्युत्पत्तावपि पश्चात् तदभावनिश्चये हर्षादिनिवृत्तिदर्शनात् । एवमौपनिषदेष्वपि वाक्येषु ब्रह्मसत्तायां तात्पर्याभावे निश्चिते पूर्व-मुत्पन्नमपि ब्रह्मज्ञानं न पुरुषार्थपर्यवसायि स्यात् । तस्माद्, यतो वा इमानीत्यादिवाक्यं स्वोक्तप्रकारकब्रह्मास्तित्वं बोधयदेव प्रमाणं भव-तीति सिद्धमिति रामानुजाचार्याः ।

भास्कराचार्यास्तु प्रपञ्चप्रविलापनद्वारेण ब्रह्मणः शास्त्रप्रमा-णकत्वं न स्यात् इति पूर्वपक्षे एवं प्रत्युत्तरमाहुः । तथाहि । ब्रह्मण आत्मत्वेन नित्यत्वेन चाभ्युपगतस्य कथं कार्यत्वम् । नित्यत्वकार्य-त्वयोर्विरोधात् । नचोपाधेर्विद्यमानत्वात् तद्विलापनेनोपधाननिवृत्ते-स्तद्द्वारा कार्यत्वमिति वाच्यम् । तथा सति घटे कृते नभसोऽपि का-र्यत्वापत्तेः । नचोक्तदूषणभयात् प्रपञ्चप्रविलापनं कुर्यादिति वाक्यं कल्पनीयमिति वाच्यम् । पुरुषमात्रेण महदादीनां महाभूतानां विला-पनस्य कर्तुमशक्यत्वेन विधेर्वैयर्थ्यात् । समाधौ सुषुप्तौ च सर्वतिरो-धानेऽपि व्युत्थानदशायां सर्वस्य पुरोऽवस्थानात् प्रपञ्चप्रविलापने उपायाभावाच्च । प्रपञ्चेनैव प्रपञ्चविलापनेऽनवस्थाप्रसङ्गाच्च । प्रपञ्च-स्य साधारणत्वेन तत्प्रविलापने सर्वमुक्तिप्रसङ्गादिदानीं जगदप्रती-तिप्रसङ्गाच्च । अथात्मीयस्यान्यकारणस्याविद्याकामकर्मलक्षणस्य ना-शनमेव प्रपञ्चप्रविलापनमिति मन्यसे तत्र न विसंवादः । किञ्च । नियोगस्य नियोज्यसापेक्षत्वेन तदाकाङ्क्षायां यदि तादृशप्रपञ्चकर्ता नियोगकर्ता वा नियोज्यः स्यात् तर्हीदानीं नियोज्याभावान्नियोगो न क्रियेत । किञ्चात्र प्रतीतिविषयायां प्रपञ्चविलयोऽभ्युपगम्यते । अग्निहो-त्रादौ तु प्रतीतिकालोऽनुष्ठानकालश्च भिन्नः । तदप्यसङ्गतम् । अत्रैव तत्रापि प्रतीतिमात्रेणैव नियोगसिद्धावनुष्ठानलोपप्रसङ्गात् । किञ्च प्रविलापनं स्वभावो वा अभावो वा । नाद्यः । तस्य सत्त्वेन प्रपञ्च-तादवस्थ्यात् । न द्वितीयः । तस्यावस्तुत्वेन प्रतिज्ञानाच्छशविषाणतु-ल्यत्वेन तद्विषयकनियोगानुपपत्तेः । अथात्मज्ञानविषयो नियोगः प-

रिकल्प्यते, आत्मज्ञानं कुर्यादिति । तदप्यसङ्गतम् । ज्ञानस्य प्रमाणप्रमेयाधीनत्वेन क्रियावत् पुरुषेच्छानधीनतया नियोगविषयत्वस्य तत्राशक्यवचनत्वात् । नच द्रष्टव्यादिविधिविरोधः । तस्योपायपरत्वात् । श्रोतव्यादिपदैस्तस्यैव विवरणात् । नचाध्ययनविधिनाऽर्थज्ञानं विधीयत इति शङ्क्यम् । तत्रार्थज्ञानरूपफलायाक्षरग्रहणरूपाध्ययनस्य विधानात् फलस्याविधेयत्वात् । किञ्च । नियोगविषयभूतमात्मज्ञानं यद्यनुत्पन्नं तदा यागवत् साध्यत्वाभावाद् विषयत्वासिद्ध्या तद्विषयकनियोगस्यासिद्धिः । यदि च श्रवणाद्युत्पन्नं तदा श्रवणादिनैवात्मज्ञानसिद्धेः किमन्तर्गडुना नियोगेन । नच फलार्थं तदपेक्षा । तमेव विदित्वेति श्रुतौ नियोगनिरपेक्षाज्ज्ञानादेवमुक्तेरुक्तत्वात् । किञ्च । ज्ञाननियोगयोः परस्परमसम्बन्धे वाक्यानर्थक्यात् सम्बन्धोऽवश्यं वक्तव्यः । स च गुणप्रधानभावेनैव दृष्ट इत्येकस्यावश्यं प्राधान्यं वक्तव्यम् । तद्यदि ज्ञानस्येत्युच्यते तदा नियोगस्य वाक्यार्थतया प्राधान्यं सर्वत्र यत्प्रतिज्ञातं तद्धीयेत । यदि नियोगस्यैव तदुच्यते तदा ज्ञानस्य नियोगार्थत्वान्मुक्त्यर्थत्वं न स्यात् तस्योभयार्थत्वे प्रमाणाभावात् । नच नियोगो मुक्त्यर्थः । अश्रुतत्वात् । तमेव विदित्वेति ज्ञानस्यैव साक्षात्तदुद्देशेन श्रुतत्वादिति । एतदर्थं च, यो रामानुजमतोपन्यासेऽस्माभिः प्रथमः पूर्वपक्ष उक्तो, यद्यपि शास्त्रयोनित्वेत्यादिना, यश्च तृतीय उक्तो, यद्यपि वेदान्तवाक्यानामित्यादिना, तदुभयमुपन्यस्य ततः पूर्ववदेव सुप्रिनाक्यप्रभृतीनां सम्यगन्वयः समन्वय इति समन्वयपदार्थमुक्त्वा युक्तीरेवमाहुः । नच तेषां ब्रह्मपराणामर्थान्तरकल्पना युक्ता । श्रुतहान्यश्रुतकल्पनाप्रसङ्गात् । नच कार्य एव प्रामाण्यं प्रतिपत्तुं युक्तम् । स्वरूपावबोधेऽपि प्रामाण्यस्याविशिष्टत्वात् । अपौरुषेयत्वस्यैव प्रामाण्ये तन्त्रत्वात् । नचाग्निहोत्रादिवाक्येषु कार्यावगतिः प्रामाण्ये तन्त्रमिति शङ्क्यम् । तस्य चैत्यवन्दनादिवाक्येऽपि तुल्यत्वात् । अथापौरुषेयत्वे सत्यनपेक्षत्वं तन्त्रमिति विभाव्यते । तदा तु वेदान्तेऽपि तस्य तुल्यत्वात् स्वरूपपरत्वेऽपि प्रामाण्यमक्षुण्णमेव । किञ्च । पदानां स्वार्थप्रत्यायनेऽनपेक्षत्वं लोकवेदसाधारणम् । वाक्यानां तु लोके परापेक्षमेव प्रामाण्यम् । अन्यथा सपुष्पं तिष्ठति पश्येत्यादीनामपि तत् स्यात् । वेदे तु तेषामपौरुषेयत्वात् प्रमाणान्तरानधिगतमूलकारणगमकत्वे तदनपेक्षमेव ।

अवान्तरवाक्यानां प्रकारशेषत्वात्। नच सर्वस्मिन् वेदे धर्म एव जिज्ञास्यः। तद्गुरुणैव व्यासेन ब्रह्मजिज्ञासायाः प्रतिज्ञातत्वात्।

न्देहनिरसनपूर्वकं सम्बन्धम्। * अवान्तरवाक्यानामिति * अर्थवादमन्त्रादिरूपाणाम्। * साधकत्वमिति * प्रमितिजनकत्वम्। अयमर्थः। पूर्वकाण्डे ह्यग्निहोत्रादीनि कर्माणि प्रतिपाद्यन्ते। तेषां च न तेन रूपेण तदभिधेयत्वम्। शास्त्रभेदप्रसङ्गात्। किन्तु धर्मत्वेनेत्येतद्बोधनाय जैमिनिर्धर्मजिज्ञासामेव प्रतिज्ञाय धर्मप्रतिपादकस्य पूर्वकाण्डस्य धर्मे समन्वयम्, आम्नायस्य क्रियार्थत्वादित्यादिभिः सूत्रैराह। तत्र मन्त्रार्थवादादीनां कथं क्रियार्थत्वमित्याकाङ्क्षायां तेषामवान्तरवाक्यानां धर्मप्रकारभूतद्रव्यदेवताकर्मस्तुत्यादिप्रकाशकत्वेन धर्मशेषत्वात् सर्वस्य पूर्वकाण्डस्य तत्रैव समन्वयः। नच तेष्वाम्नायादिपदात् सर्वस्मिन् वेदे धर्म एव जिज्ञास्य इति शङ्क्यम्। तद्गुरुणैव व्यासेन ब्रह्मजिज्ञासायाः प्रतिज्ञातत्वात्। नच व्यासस्य तद्गुरुत्वे सन्देहः। मार्कण्डेयपुराणारम्भ एव, 'व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत। यस्याग्रे भारताख्यानं व्यासेनोक्तं महात्मना' इति। श्रीभागवतेऽपि द्वादशस्कन्धे व्यासशिष्यान् प्रस्तुत्य, साम्नां जैमिनये प्राह तथा छन्दोगसंहितामिति कथनात्। नच सोऽन्य एवेति शङ्क्यम्। औत्पत्तिकसूत्रे, बादरायणस्यानपेक्षत्वादिति पूजार्थं बादरायणग्रहणेनापि तथावगतेः। नच ब्रह्मजिज्ञासायाः क्रत्वर्थपुरुषार्थजिज्ञासावदवान्तरशेषविषयत्वं शङ्क्यम्। तथा सति जैमिनिरेव क्रत्वर्थादिजिज्ञासावत् तामपि प्रतिजानीयात्। तस्या अपि शास्त्रपूर्वार्धमवश्यमपेक्षितत्वात्। अतः कर्तृभेदाद् भिन्ने एवोभे अपि जिज्ञासे इति च पूर्वोत्तरकाण्डाभ्यां प्रमिते धर्मे ब्रह्मणि च मन्दमध्यमयोर्बुद्धिदोषात् सन्देहसम्भवमालोच्यैव कृते, न त्वन्योऽन्यमतदूषणाय। जैमिन्युक्तानामभ्यासादीनां व्यासपादैरुपन्यासाद् व्यासाभिप्रेतस्यानपेक्षत्वस्य जैमिनिनोपन्यासात्। नापि धर्मब्रह्मप्रमितिजननाय। यदि तथा स्यात् तदा मीमांसाऽधीने वेदस्य प्रमितिजनकत्वे उभावपि वेदस्य प्रामाण्येऽनपेक्षत्वं न ब्रूयाताम्। अत

सन्देहमात्रवारकत्वाज्जिज्ञासयोः । न त्वलौकिककार्यसाधकत्वम् । तथा सति वेदानामन्याधीनत्वेनाप्रामाण्यं स्यात् । वेदजिज्ञासेत्येवोक्तं स्यात् ।

किञ्च ।

साधनं च फलं चैव सर्वस्याह श्रुतिः स्फुटम् ।
न प्रवर्तयितुं शक्ता तथा चेन्नरको न हि ॥
प्रवर्तकस्तु सर्वत्र सर्वात्मा हरिरेव हि ।
यज्ञ एव हि पूर्वत्र बोध्यते स्वर्गसिद्धये ॥

इदमपि सर्वस्य वेदस्याक्रियार्थत्वगमकम् । तदेतदुक्तम् * सन्देहेत्यादि, अप्रामाण्यं स्याद् * इत्यन्तेन । अथ यदि कर्मार्थतैव वेदस्य जैमिन्यभिप्रेता स्यात् तदा बादरायणमतं जानानेन तदनादराय वेदजिज्ञासेत्येव प्रतिज्ञावाक्यमुक्तं स्यात् । अत उक्तहेतुत्रयात् सर्वस्य वेदस्य क्रियार्थत्वं न जैमिन्यभिप्रेतम् । किञ्चाम्नायस्येति तु पूर्वपक्षसूत्रं, तद्भूतसूत्रस्थं क्रियार्थपदं तु तिङन्तवाचकं, न तु साध्यार्थपरम् । तेन तदर्थं जैमिनिसूत्रानुसरणमपार्थमेवेति ।

ननु तथापि पूर्वकाण्डस्य क्रियार्थत्वे तु न विवादः । तथा सत्येकशास्त्र्यानुरोधादुत्तरकाण्डस्यापि पूर्वशेषतैव येन केनापि प्रकारेणादरणीया । न च विपरीतमाशङ्कनीयम् । सिद्धे ब्रह्मणि साध्यार्थानां वाक्यानामन्वयायोगात् । न च प्रापकत्वेनान्वयः । तद्वाक्यगतफलोक्तिबाधप्रसङ्गात् । अतो वेदस्य साध्यार्थपरतां निश्चित्य तच्छेषतैवोत्तरकाण्डार्थस्यादरणीया । यदि चोपासनाशेषत्वं ज्ञानशेषत्वं वाङ्गीक्रियते तदापि तयोर्विधेयत्वेन धर्मत्वादुत्तरार्थस्य ब्रह्मणः प्रवर्तकश्रुतिवाक्यशेषता दुर्वारैवेति सर्वस्य वेदस्य धर्मार्थत्वमर्थादेव सिद्धमित्यत आहुः * किञ्चेत्यादि * । चकारद्वयं व्यापारस्य स्वरूपस्य च समुच्चायकम् । * सर्वस्येति * कर्मणः । सर्वस्यैव स्फुटमाहेत्यन्वयः । * सर्वत्रेति * विहिते निषिद्धे च । * सर्वात्मेति * स आत्मानं स्वयमकुरुतेति श्रुतेः सर्ववस्तुस्वरूपोऽ

न्तर्यामिब्राह्मणात् सौबालश्रुतेश्च सर्वान्तर्यामी । अयमर्थः । वेदस्य या साध्यार्थपरता त्वयाङ्गीकृता सा श्रुतेः प्रवर्तकत्वानुरोधात् । तत्र श्रुतेर्यत् प्रवर्तकत्वं तत् किं यावदधिकारिणः प्रति साधारणं, किं वा असाधारणम् । आद्ये कस्यापि त्रैवर्णिकस्य नरको न स्यात् । तथा राजदण्डादेरपि लोके कोऽपि विषयो न स्यात् । रोगी च नोपलभ्येत । अविहितनिषिद्धाच्च निवृत्तेरपि तत एव सम्भवात् । तदभावे नरकादेरप्यसम्भवात् । अथ पूर्वकर्मजन्यदुरदृष्टवशादविहितादौ प्रवृत्तिः । तर्हि तादृशेन शुभादृष्टेन विहितेऽपि प्रवृत्तिसम्भवान्न श्रुतेः प्रवर्तकत्वसिद्धिः । अथासाधारणम् तर्हि तदसाधारण्यं स्वभावतो वक्तुमशक्यं, हेत्वन्तरसाहाय्येन साधनीयम । तत्र कालादेः साधारणत्वात् तत्तज्जीवादृष्टस्य तथात्वं कल्पनीयम । तथा सति तेनैव प्रवृत्तिसम्भवान्न श्रुतौ प्रवर्तकत्वनिर्द्धारः कर्तुं शक्यः । अथ प्रवृत्तेः शब्दश्रवणानन्तरमाविर्भावाददृष्टादेः सहकारित्वेनैव प्रवेशो, न करणत्वेनेति विभाव्यते, तर्ह्यदृष्टसम्पादितदृष्टसामग्रीसत्तायां प्रवृत्तिरकुण्ठितैव स्यात् । अथान्तमसे चाक्षुषदर्शनेन सहकारिदौर्बल्येऽपि कार्योत्पत्तिनिर्द्धारात् । अतः कौष्ठ्यदर्शनात् फलमुखप्रवर्तकत्वं न श्रुतेः शक्यवचनम् । तेन साधनव्यापारफलस्वरूपाणि कर्मणां श्रुतिर्बोधयतीत्येतावन्मात्रमङ्गीकार्यम । न च प्रवृत्त्याद्यनुपपत्तिः । ईश्वरस्यैव प्रवर्तकस्य निवर्तकस्य सत्त्वात् । तथाच कवषा । एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति, एष उ एवासाधु कारयति तं यमधो निनीषतीत्यादिश्रुतेः । न च वैषम्यनैर्घृण्यापातः । आत्मसृष्टेरेव सृष्ट्यमूलत्वेन भेदाभावादिति, वैषम्यनैर्घृण्यसूत्रे व्युत्पादयिष्यामः । अतः श्रुतेः प्रवर्तकत्वाभावेन साध्यार्थपरतैव सङ्गता । न च तर्हि पूर्वकाण्डं यज्ञबोधनं व्यर्थमिति शङ्क्यम् । तस्य स्वर्गसिद्ध्यर्थत्वात् । विध्यादीनां क्रीडेच्छाव्यापारत्वान्न तद्वैयर्थ्यमिति, कृतप्रयत्नापेक्षसूत्रे व्युत्पादयिष्यामः । एवं सिद्धे विध्यादीनां क्रीडेच्छाव्यापारत्वे तदर्थानां च क्रीडाशेषत्वेनेति तत्प्रतिपादकत्वेनैवोभयोरेकशास्त्र्यं, न कर्मप्रतिपादकतयेति मन्तव्यम् । पुरःस्फूर्तिकक्रमाश्रय क्रियापरत्वाङ्गीकारेऽपि तेन पूर्वकाण्डस्यैव धर्मोपायसिद्धिर्न सर्वस्य वेदस्येति तावन्मात्रस्य साध्यार्थतोपगमेन पूर्वमीमांसकमतं भाष्ये दूषितम् ।

सिद्ध एव हि सर्वत्र वेदार्थो वेदवादिनाम् ।
मन्त्राणां कर्मणां चैव दर्शनश्रवणाच्छ्रुतौ ।
कृतिश्च सिद्धतुल्यत्वं वेदः स्वार्थे च सन्मतः ।

प्रजापतिरकामयत प्रजायेयेति । स एतदग्निहोत्रं मिथुनमपश्यत् । प्रजापतिर्यज्ञानसृजताग्निहोत्रं चाग्निष्टोमं च पौर्णमासीं चोक्थ्यं चामावास्यां चातिरात्रं च तानुदमिमीत यावदग्निहोत्रमासीत् तावानग्निष्टोम इत्यादि । न ह्युपाख्यानानां मिथ्यार्थत्वं बुद्धजन्मनः पुरोक्तं युक्तं वा । तथा सति वेदानामप्रामाण्यमेव स्यात् । मिथ्योपाख्यानप्रतिपादकलोकवत् ।

अतः परं पूर्वकाण्डस्यापि साध्यार्थत्वमनुपपाद्य दूषयन्ति सार्द्धेन* सिद्ध एवेत्यादि *। *सर्वत्रेति * काण्डद्वये । पूर्वमेतिपाठे अपेराध्याहारः। * वेदवादिनामिति * सर्ववेदप्रामाण्यज्ञानपूर्वकं तदनुसारिणाम् । * चैवेति चकारोऽपश्यत पुरोडाशं कूर्मं भूतं सर्पन्तमिति द्रव्यादीनां दर्शनस्य समुच्चायकः । मन्त्राणां दर्शनं तु, स एतं कसर्पीरः काद्रवेयो मन्त्रमपश्यत, स एतं दीक्षितवादमपश्यदित्यादिषु बोध्यम् ।*स्वार्थे चेति*चोऽप्यर्थे । अतः स्तुतिं समुच्चिनोति । उक्तं विभजन्तो दर्शनस्य श्रुती आहुः * प्रजापतिरित्यादि * । अन्त्याद्या तैत्तिरीयब्राह्मणस्था । अस्याम् अपश्यदित्यस्य ज्ञातार्थतायां अपि शक्यवचनत्वात् सिद्धार्थत्वं न निःसन्दिग्धं स्यादित्यतो द्वितीयस्या उपन्यासः । सा च संहिता प्रथमाष्टकस्था । तत्रोक्तस्योन्मानस्य कर्मणामसिद्धत्वेऽशक्यवचनत्वादिति । * न हीत्यादिकं विभागभाष्यम् । तेनायमर्थः । व्यासादधीतवेदः श्रुतभारतः स्वयम् ऋषिर्जैमिनिर्यदि धर्मरूपायाः क्रियायाः सिद्धत्वं नाभिप्रेयात् तदा भावार्थाधिकरणे, भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतेत्यनेन सिद्धावस्थापन्नधात्वर्थाभिधायकानां नामपदानां क्रियाप्रत्यायकत्वं न वदेत् । नच तत्र भावार्थपदेन भावनार्था इत्येवोच्यत इति वाच्यम् । तथा सति कर्मशब्दपदवैयर्थ्यापत्तेः । भावार्थैः

क्रिया प्रतीयतैतावतैव चारितार्थ्यात्। तथा सर्वेषां भावोऽर्थ इति चेदित्यग्रिमसूत्रं च न वदेत्। क्रियाबोधकाख्यातपदानां भावनार्थत्वस्य सर्वजनीनत्वेन सर्वेषां भावोऽर्थ इति सन्देहस्यैवानुदयात्। तथा अग्रिमसूत्रद्वये क्रमेण नाम्नां पुरुषानपेक्षक्रियाप्रतिपादकत्वमाख्यातानां तु पुरुषापेक्षक्रियाप्रतिपादकत्वमिति विभागं च न कुर्यात्। साध्यैकस्वभावक्रियावादे पुरुषानपेक्षक्रियाया एवाभावात्।

किञ्च। यागादिधर्मरूपा क्रिया यदि सर्वदा साध्यावस्थैव स्यान्न कदापि सिद्धावस्था, तदा तन्निष्पत्तेः कदाप्यभावाच्चोदनापि नोच्येत। चोदना पुनरारम्भ इति लक्षणमपि तस्या न क्रियेत। अतो जैमिनेरपि वेदस्य सिद्धार्थपरतैवाभिमता। इदं यथा तथा भावार्थाधिकरणभाष्ये व्युत्पादितमाचार्यचरणैः। मयापि तद्विवरणे निपुणतरं प्रपञ्चितमिति नात्र लिख्यते।

किञ्चार्थवादाधिकरणेऽर्थवादानां विधेयस्तावकत्वेन प्रामाण्यकथनादपि तथा। यदि हि बालातुराद्युपच्छन्दनवदर्थवादानां स्तावकत्वमभिप्रेयात्, प्रामाण्यं तेषां न ब्रूयात्। तदुपच्छन्दनस्य प्रतारणरूपत्वात्। ननूपच्छन्दनवाक्यस्य फलांश एव प्रतारणरूपत्वं, न प्रवर्तनांश इति, न तदेवात्रापि दोष इति चेन्न। स्वर्गादिरूपस्य फलस्याप्रत्यक्षत्वेन विधिवाक्योक्तफलांशेऽपि तथात्वप्रसङ्गात्। अत उपाख्यानानां मिथ्यार्थप्रतिपादकत्वकथनं, तथागतवासनावलम्बनमेव। नच 'परोक्षवादो वेदोऽयं बालानामनुशासनम्। कर्ममोक्षाय कर्माणि विधत्ते ह्यगदं यथा' इति, 'फलश्रुतिरियं नृणां न श्रेयो रोचनं परम्। श्रेयोविवक्षया प्रोक्ता यथा भैषज्यरोचनमिति'-पुराणवाक्याद्युपच्छन्दनन्यायेन मिथ्यात्वमाद्रियत इति वाच्यम्। तत्रैवमर्थाभावात्। सर्वथा सन्मार्गविमुखानां नानाकामानां सहसा कामानिवृत्तिमालोच्य शास्त्रतो निवर्तयितुं स्वर्गादिरूपं तदभीष्टं सदेव नश्वरं फलं प्रदर्श्य तेन तेषां सन्मार्गवर्तित्वविधानेन कर्ममोक्षेऽधिकारिणः कर्तुं कुसुमरूपं तदिति तत्र मिथ्यात्वगन्धस्यापि वक्तुमशक्यत्वात्। 'फलश्रुतिं कुसुमितां न वेदज्ञा वदन्ति हि। पुष्पेषु फलबुद्धय' इत्यादिवाक्यैस्तथा निश्चयात्। अतस्तत्र विभ्रान्त्या मायावादेन ये भ्रान्तास्तेषामेव वेदार्थे तथा भानं, न वेदस्यादि-

तस्मात् पूर्वमीमांसानभिज्ञाः क्रियापरत्वं सर्वस्यापि वेदस्य

मानमित्यर्थवादा अपि स्वार्थप्रमितिं जनयन्त एव स्तावका इति निश्चयम् ।

किञ्चाग्निहोत्रविधुनदर्शनोत्तरं पठ्यते । उदुदिते सूर्ये जुहोति, यस्यैवं विद्वान् उदिते सूर्येऽग्निहोत्रं जुहोति प्रैव जायत इति । उन्मानानन्तरं च पठ्यते, य एवं विद्वानग्निहोत्रं जुहोति यावदग्निहोत्रमनोपाप्नोति तावद्रूपाण्याप्नोतीति । एताभ्यां च विद्वद्वाक्याभ्यामर्थवादस्थापितार्थविषयकज्ञानस्य फलाङ्गता बोध्यते । यदि स उपच्छन्दनाय मिथ्या भवेत्, स्यात् ततो विद्वद्वाक्यमपि मुधा स्यात् । एवमन्यत्रापि । ततश्च सर्वस्य वेदस्य प्रामाण्यमपि विप्लवेत । अतस्तदभावाय सत्यार्थकत्वेनैवोपच्छन्दनमुपगन्तव्यम् । तेन श्रुतिपुराणयोरुभयोरपि सामञ्जस्यात् । ततः कर्मादिदर्शनश्रुतीनां स्वार्थे प्रामाण्यमकलङ्कमिति पूर्वकाण्डस्यापि सिद्धार्थपरत्वमेव । नच जुहुयाद् यजेतेत्यादीनां साध्यज्ञातिबोधकपदानां व्याकोपः । सिद्धस्य कर्मणः प्रकारज्ञानपूर्वकं करणं फलसम्बन्धं बोधयता विद्वद्वाक्येनातिदेशसिद्धया कृतेः सिद्धतुल्यत्वेन साध्यकृतिव्यङ्ग्यस्य सिद्धस्यैव धर्मस्य तत्र विवक्षिततया वाक्योपच्छन्दनायोक्तेः साध्यार्थे तात्पर्याभावनिश्चयात् । एकत्र दृष्टः शास्त्रार्थोऽपरत्रापि तथेति न्यायेन विद्वद्वाक्यविष्यत्वेऽपि तथाऽवगमाच्च । अतः पूर्वकाण्डस्य साध्यार्थपरत्वमयुक्तमेव । उत्तरकाण्डस्य तु ज्ञानादिप्रतिपादकत्वेऽपि ज्ञानोपासनादीनां विषयभूतब्रह्मणैव स्वरूपलाभेन ज्ञानादिभिर्ब्रह्मण एव प्राप्यतया फलत्वेन च तस्यैव शेषित्वम् । पूर्वकाण्डोक्तफलव्याप्येतस्यैवानन्दस्यान्यानीतिश्रुतेरुदाहृतत्वाच्च । कर्मफलार्थत्वादित्यादाव् । इदं फलत्वमप्युपपादयिष्याम इति । तदेतदुक्तम् * नहीत्यादिना । सिद्धमाहुः * तस्मादित्यादि * यस्मादुक्तरीत्या विचारे न सर्वस्याम्नायस्य क्रियार्थत्वं, न वा पूर्वकाण्डस्य साध्यार्थपरत्वं तस्मात् ते तथेति तद्वाक्येन शास्त्रयोनित्वव्याकुलीभावाभावात् पूर्वपक्षोऽसङ्गत इत्यर्थः । एवं पूर्वपक्षासङ्गतिमुद्घाट्य सिद्धान्तासङ्ग-

वदन्तो मूर्खा एव । उत्तरवादिनोऽपि पूर्वाज्ञानमङ्गीकृत्य पूर्वा-
नुपयोगित्वं ब्रह्मज्ञानस्य वदन्तो वेदानभिज्ञाः ।

यदेव विद्यया करोति श्रद्धयोपनिषदा वा तदेव वीर्यव-
त्तरं भवतीत्युपनिषज्ज्ञानस्य श्रुतिसिद्धैव कारणता ।

तिमुद्घाटयन्तः पूर्वं शङ्करमतस्यासङ्गतत्वमाहुः * उत्तरेत्यादि * अनभिज्ञा * इत्यन्तं ग्रहणकभाष्यम् । तत्रायमर्थः । सर्वस्य वेदस्य क्रियापरत्वमभिसन्धाय शुद्धबुद्धोदासीनभूतब्रह्माभिधायके वेदान्तभागे प्रयोजनशून्यतयाऽऽनर्थक्यं प्रत्यक्षादिसमानविषयतया लौकिकवाक्यवदनुवादकतायामनपेक्षप्रामाण्यभङ्गं च दर्शयतां व्याख्यायनिधिगृहीतत्वेन तत्सार्थक्याय दूरस्थत्वादिकर्मापेक्षितकर्तृदेवतादिप्रतिपादकत्वेन क्रियार्थत्वं वा, सगुणब्रह्मोपासनादिक्रियापेक्षितविषयप्रतिपादकत्वेन तादर्थ्यं वाऽभिमन्यमानानां पूर्वेषां वादिनां तदनुसारिणां च वेदान्तज्ञानमङ्गीकृत्य, शुद्धबुद्धोदासीनस्य ब्रह्मणः प्रमाणान्तरानधिगतत्वादितरनैरपेक्ष्येण तद्बोधकतया प्रामाण्यं हेयोपादेयशून्यब्रह्मात्मावगमादेवावस्तुभूताविद्यासमारोपितसकलक्लेशनिवर्तकतया सार्थक्यं च वेदान्तेषु प्रदर्श्य तत्सिद्धस्य ब्रह्मज्ञानस्य यज्ञानुपयोगित्वं वदन्तो वेदज्ञानरहिता इत्यर्थः । नन्वेवंयुक्तियुक्तमर्थं वदन्तः कथं तथेत्याकाङ्क्षायां छान्दोग्यारम्भप्रदेशस्थश्रुत्युपन्यासेन तदुक्तं दूषयन्तो विभजन्ते * यदेवेत्यादि, प्रवृत्तिरित्यन्तम् । * कारणतेति * सहकारिकारणता । अस्यां श्रुतौ विद्यापदेनात्मभिदाबाधकं ज्ञानम् । श्रद्धापदेन वेदोक्ते आस्तिक्यबुद्धिः । उपनिषत्पदेन परमात्मस्वरूपविषयकं रहस्यज्ञानमुच्यते । तेन तत्तद्युक्तो यत् कर्म वेदोक्तं करोति तदेव कर्म वीर्यवत्तरमनश्वरफलं मोक्षपर्यवसायि भवतीत्यर्थः यत्तु कैश्चिद् विद्या विज्ञानं, श्रद्धा कर्मश्रद्धा, उपनिषद् योग इति व्याख्यानम् । तन्न । विद्यापदस्य विज्ञाने, उपनिषत्पदस्य योगे च शक्त्यदर्शनात् । विद्याऽऽत्मनि भिदाबाध इत्येकादशस्कन्धवाक्येन, उपनिषद् रहस्यविद्येति शङ्कराचार्यविद्यारण्यादिव्याख्यानेन चोक्तार्थ एव शक्तिनिश्चयाच्च । तथाच पर-

नच बाधितत्वात् त्यज्यत इति वाच्यम् । ब्रह्मात्मज्ञानवत एव वसिष्ठादेर्यज्ञाधिकारात् । नचैवं किमनेनेति वाच्यम् । इत्थंभूतत्वाद्यज्ञस्य ।

मात्मरहस्यज्ञानात्मकब्रह्मज्ञानस्य श्रुतिसिद्धकारणताया अज्ञानाद् वेदार्थानभिज्ञा इत्यर्थः । ननु सिद्धे फले साधनान्तरस्यानुपयोगेन, उत्कृष्टस्य निकृष्टशेषतायाश्चासङ्गतत्वेन तस्याः श्रुतिसिद्धाया अनादरो ज्ञानभिज्ञत्वमितिसमाधिं दूषयन्ति * नचेत्यादि * । * त्यज्यत इति * नाद्रियते । अधिकारपदेनात्र मुख्याधिकारो विवक्षितः । तथाच यदि ज्ञानमात्रेणाविद्यानिवृत्त्यादि स्यात् । वसिष्ठादिज्ञानी यागादिकं न कुर्यात् । यदि स ज्ञानित्वेन भवदभिमतो न स्यात् तद्वचनानि नाद्रियेरन् । अतः पुराणादिप्रसिद्धैर्भवदादृतैरपि यागादिकरणेन तत्सारस्सूचनात् तद्विरोधेन ज्ञानस्य सहकारित्वानादरे सुतरामनभिज्ञतेत्यर्थः । ननूपनिषद्ब्रह्मात्मकज्ञानपूर्वकेण वसिष्ठाद्यधिकारेण वेदान्तविचारे किं सिद्ध्यति, येनैवमाग्रहः क्रियत इत्याकाङ्क्षायामाहुः *नचैवमित्यादि* । अयमाशयः । यज्ञो वै विष्णुरितिश्रुतेर्यज्ञोऽप्यैषकं ब्रह्मण एव क्रियात्मकं रूपम् । नच तत्राधिष्ठातृत्वमेव बोध्यते, न तु क्रियात्मकत्वमिति शङ्क्यम् । धर्मो यस्यां मदात्मकः मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम्, एतावान् सर्ववेदार्थ इत्येकादशस्कन्धीयभगवद्वाक्यैस्तथात्वस्यापि निश्चयात् । स च द्रव्यदेवतायजमानपदार्थचरादिभिरभिव्यज्यते । स चेल्लौकिकैरेवाभिव्यज्येत तदा प्रोक्षणादिसंस्कारा अवहननादीनां च नियमा मुधैव स्युः । अतो वेदोक्तफलसिद्ध्यर्थं यथा ते तथा मोक्षफलार्थमुपनिषदप्युपयुज्यते । तदभावे तु साङ्गस्य यज्ञस्य लौकिकत्वेनाध्यस्यमानत्वात् तदङ्गानां लौकिकत्वे तैराधिदैविकयज्ञस्वरूपानाविर्भावात् । उपनिषदा ह्यवगते सर्वस्य ब्रह्मत्वे ब्रह्मभूतैरङ्गैराधिदैविकयज्ञाविर्भावः । तथा तादृशो यज्ञे यज्ञाधिष्ठातुर्भगवतोऽप्याविर्भावः । यथा विश्वसृजां सहस्रसमे हिरण्मयशकुनिरूपस्य ग्रहणस्यैव पृथुनाभिप्रभृतीनां यागेषु रूपान्तरेण । तदभावादेव नेतरेषां यागेषु तदाविर्भावः । तथा यागस्य विद्योपयोग आचार्य-

किञ्च कर्मफलवद् ब्रह्मफलस्यापि लौकिकत्वात् । य एवं वेद प्रतितिष्ठति, अन्नवानन्नादो भवति महान् भवति प्रजया पशुभिर्ब्रह्मवर्चसेन महान् कीर्त्येति । अत्यन्ताविद्यावतो यज्ञानधिकारात् तन्निषेधार्थं ज्ञानमुपयुज्यते । नच देहाध्यासस्य कारणत्वम् । ब्रह्मार्पणं ब्रह्महविरित्यादिस्मृतेः ।

स्यापि सम्मत इति तु, सर्वापेक्षा च यज्ञादिश्रुतेरित्यादिसूत्रपर्यालोचनादेवावगंस्यते । नच मोक्षस्य जन्यत्वम् । ब्रह्मण आप्यत्वस्य वक्ष्यमाणत्वात् । अतो मुमुक्षूणां यज्ञस्यावश्यकत्वात् तदन्यथाभूतमधिकारं बोधयितुमयमारम्भ इति । तदेतदुक्तम् । ननु मुमुक्षूणां यज्ञा नावश्यकाः । कर्मफलस्य लौकिकत्वात् । अधिकारिभेदेऽपि मनुष्यादिब्रह्मान्तानां शरीरवतामेव तद्भोगकथनेन तथा निश्चयात् । नच किं तेनेति वाच्यम् । न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्तीति श्रुत्या दुःखसम्भेदकथनेन तस्य संसाररूपत्वबोधनात् । अतो मुमुक्षूणां शरीरसम्बन्धस्यानाकाङ्क्षितत्वाद् यज्ञानां कारणता श्रुतिसिद्धापि नाद्रियत इत्याशङ्कायामाहुः * किञ्च, कर्मेत्यादि * । * ब्रह्मफलस्येति * ब्रह्मज्ञानफलस्य । श्रुतिस्तु तैत्तिरीयाणां भृगुवल्ल्यां भार्गव्या विद्यायाः समाप्तिस्था । तत्र, सैषा भार्गवी वारुणी विद्या परमे व्योमन् प्रतिष्ठिता य एवं वेद प्रतितिष्ठतीति । अत्र परमे व्योम्नि प्रतिष्ठाकथनेनास्या विद्याया अत्युत्कृष्टत्वं दुर्लभत्वं च बोध्यते । विद्यायदोषस्या फलेपूपासनाफलत्वभ्रमो निवार्यते । तत्तत्फलकथनमुखेन गृहस्थाद्यधिकारश्च बोध्यते । तेनायमर्थः । कर्मणो विद्यायाश्च फलस्यैतरेतरवैलक्षण्यं प्रदर्श्य कर्मफलस्य शरीरिभोग्यतया संसारात्मकत्वात् तादृशफलजनकत्वेन तस्य विद्याजनकत्वमनादृत्य यदि कर्म त्यज्यते, तदा तस्य दोषस्य ब्रह्मविद्यायामपि तौल्यात् तस्या अपि त्याज्यत्वापत्तिः । अथ यद्यधिकारजाघन्यात् त्यज्यते, तदा सूक्तश्रुत्या विद्यासाहित्यबोधनेन जाघन्यस्य निवारितत्वान्न कर्मणस्त्याग उचितः । यदि च

तस्मादन्योन्ययोगित्वे न कोऽपि दोषः ।

क्रियाज्ञानयोः स्वातन्त्र्येण पुरुषार्थसिद्ध्यर्थं भिन्नतया शास्त्रप्रवृत्तिः ।

किञ्च, वेदान्तवाक्यानामस्मिञ्छास्त्रे समन्वय एव प्रतिपाद्यते सन्देहनिराकरणद्वारा । तत् कथं सिद्धवद्धेतुत्वेन निर्देशः । अग्रिमवैयर्थ्यं च स्यात् ।

विद्यावस्थेऽपि देहाध्यासस्यानिवृत्तत्वात् तस्यैव कर्मकारणत्वमिति विभाव्यते, तदा तु ब्रह्मार्पणमित्यादिस्मृत्या, स एवास्मि स सन् यजत इति श्रुत्या चाध्यासस्य कारणतानिवारणात् तासामेव विरोध इति वेदान्तभिन्नत्वमनिवार्यमेवेत्यर्थः । एवं विद्यास्वातन्त्र्यवादिशाङ्करमतमपास्यान्येषामेकदेशिनां सम्प्रदायमाहुः * तस्मादित्यादि * । वेदान्तभिन्नत्वस्य विद्यास्वातन्त्र्यवादिष्वेव पर्यवसानात्, कर्मणां विद्याकारणत्वस्योपासनवद्ब्रह्म कर्मसहकारित्वस्य श्रुत्यैव बोधनात्सूत्रेऽङ्गीकृत इतरेतराश्रयदोषोऽपि व्यक्तिभेदादेव निवृत्तः । न च छान्दोग्य औषस्त्य अविदुषामपि यजमानादीनां श्रवणात् कर्मणामविद्वदधिकारकत्वमेवेति शङ्क्यम् । तत्राप्यविद्वत्तायां मूर्धनिपातश्रवणेनाविदुषामनधिकारस्यैव बोधनात् । अतः पूर्वसूत्रभाष्य उक्ते ज्ञानकर्मसमुच्चये न कोऽपि दोषः । तेन मायावादिव्यतिरिक्ता अस्मिन्पक्षे सर्वेऽप्येकदेशिनो वेदाविरुद्धवादिन इत्यर्थः । नन्वेवं परस्परसाकाङ्क्षत्वे एकशास्त्र्यमेव स्यान्न तु शास्त्रभेदः । ततश्च वेदानुवर्त्यत्वादपृथक्समाख्याकरणव्याकोप इति शङ्कायामाहुः * क्रियेत्यादि * तथाच त्रिवर्गसाधन उभयोरपि स्वातन्त्र्यात् सिद्धे शास्त्रभेदे पूर्वोक्तदोषस्य न लेश इत्यर्थः ।

एवं वेदान्तभिन्नत्वं शाङ्कराणां बाधयित्वा सूत्रार्थानभिज्ञत्वं सर्वेषामेव बोधयन्ति * किञ्च, वेदान्तेत्यादि * । अयमर्थः । शाङ्कराचार्यैर्हि, सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं ब्रह्म वेदान्तशास्त्रादवगम्यत इति प्रतिज्ञाय, समन्वयादिति हेतुः सर्वेषु हि वेदान्तेषु वाक्यानि तात्पर्येणैतस्यार्थस्य प्रतिपादकत्वेन समनुगता-

नच प्रतिज्ञागर्भितहेतुत्वम् । अनुपयोगात् । गौणमुख्यभावे परं विवादः । नच येन रूपेण समन्वयो मतान्तरस्थैर्विचारितस्तथाग्रे सूत्रेषु निर्णयोऽस्ति ।

नीत्येवं व्याख्यातः । तत्रोक्तधर्मवत्त्वसाधकं ब्रह्मपक्षकं वाक्यसमनुगतत्वहेतुकमनुमानमभिसंहितं प्रतीयते ।

भास्कराचार्यैस्तु ब्रह्मस्वरूपं शास्त्रमवबोधयति, न केवलं कार्यमेव । कुतः । समन्वयात् । समन्वितानि हि ब्रह्मस्वरूपप्रतिपादनपरत्वेन सृष्टिप्रकरणगतानि वाक्यानीत्येवं हेतुर्व्याख्यातः । तेन तन्मते शास्त्रपक्षकम् । तथैव शैवस्य च मते ।

रामानुजाचार्यास्तु समन्वयः सम्यगन्वयः पुरुषार्थतयाऽन्वय इति हेतोरर्थमुक्त्वा परमपुरुषार्थभूतस्यानवधिकातिशयानन्दस्वरूपस्य ब्रह्मणोऽभिधेयतयान्वयाच्छास्त्रप्रमाणकत्वं सिद्धस्येवेति व्याचक्रुः ।

तत्र शाङ्करे व्याख्याने यथावस्थिते हेतोः स्वरूपासिद्धत्वम् । अतस्तत्रापि शास्त्रपक्षकमेवानुमानं वक्तव्यम् । ततश्च वेदान्तशास्त्रं ब्रह्मस्वरूपस्य प्रतिपादकं, तद्वाक्यानामेतदर्थप्रतिपादने समनुगतत्वात् । यदीयं वाक्यं यदर्थप्रतिपादने तात्पर्येण समनुगतम्, तच्छास्त्रं तस्यार्थस्य प्रतिपादकम् । क्रियार्थप्रतिपादकपूर्वकाण्डवदित्यनुमानं मतत्रयेऽपि कर्मवादिवारणाय प्रयुक्तमिति फलति । तत्रेदं विवेचनीयम् । किमयं हेतुरत्रप्रतिवन्नः सिद्ध उत साध्यः । तत्राऽविप्रतिपन्न इति तु न वक्तुं शक्यम् । तथा सति पूर्वपक्षस्यैवानुत्थानप्रसङ्गात् । नापि सिद्धः । अस्मिन्सूत्रे सन्देहनिराकरणद्वारा तस्यैव प्रतिपाद्यत्वात् । सिद्धत्वेऽग्रिमसमन्वयसाधकग्रन्थस्य वैयर्थ्यप्रसङ्गाच्च । अतस्तस्य सिद्धवन्निर्देशो न युक्त इति । अथ बुद्धिस्थं यथा प्रतिज्ञायते, तथा बुद्धिस्थमत्र हेतूक्रियत इति समन्वयसाधनप्रतिज्ञागर्भितस्य हेतोः सिद्धवन्निर्देशेऽपि न दोष इति विभाव्यते तदप्ययुक्तमित्याहुः * नचेत्यादि * भवद्भिर्हि भाट्टप्राभाकरयोस्तदनुसारिण एकदेशिनश्च निराकरणायायं हेतुरेवं व्याख्यायते । तत्र

प्रतिज्ञाया बुद्धिस्थत्वेन वादिनिग्रहवेलायां साधनस्याभावेन हेतोः साध्यसमतया तदनिग्राहकत्वादनुपयोगः। किञ्च। तैरपि वेदान्तानां ब्रह्मप्रतिपादकता न स्वीक्रियते इति तु न। किन्तु गौणत्वेन। तथा सति गौणमुख्यभाव एव विवादो, न तु प्रतिपादकत्व इति विवक्षितासाधकत्वादप्यनुपयोगः। अथ सम्यक्त्वकुक्षौ मुख्यतां निवेश्य ब्रह्मणो मुख्यतया प्रतिपादनेऽनुगतत्वादिरेवं विभाव्यते, तदापि शाङ्कराणां शैवानां च मतमयुक्तमित्याहुः * नच येनेत्यादि *। शाङ्करैर्हि जगत्कारणरूपे वाक्यानां समनुगतत्वं व्याख्यायाग्रे उच्यते। नच तेषां कर्तृस्वरूपप्रतिपादनपरतावसीयते, तत्र केन कं पश्येदिति क्रियाकारकफलनिराकरणश्रुतेरिति। ततश्च तन्मते यावद्धर्मशून्ये रूपे समन्वयो विचारितो भवति। तेन रूपेण समन्वयविचारस्त्वाध्यायसमाप्त्याऽसमाप्ति वाचकेष्वपि सूत्रेषु न दृश्यते। सर्वत्र तत्तद्धर्मपुरःसरं कर्त्रादिरूपेणैव तेषां तेषां वाक्यानां ब्रह्मप्रतिपादकताया निर्णीतत्वात्। अतोऽपि व्याख्यातारस्य हेतोरनुपयोगः। एतच्चानुपयोगादिति गृहीतो हेतुरस्तीत्यन्तेन विभक्तो बोध्यः। एवं शैवमतस्याप्यसङ्गतिर्बोध्या। शिवरूपेणापि निर्णयस्य सूत्राक्षरैरनुपलम्भात्। तन्मतसर्वार्थत्वमित्याचार्यैस्तदर्थं किमप्युक्तम्। यथा तु महत्ताख्ये भिन्दिपालाख्ये च वादे शिवतत्त्वविवेकादिग्रन्थदूषणेन निपुणतरं दूषितमिति न तदर्थमिह संरम्भः क्रियते। तथापि तत्र तत्र प्रसङ्गेन दूषयिष्यामि। तत्र तावत्, सदेव सोम्येदमग्र आसीदित्युपक्रमस्तत्त्वमसीत्युपसंहारः शिवरूपगमक इति यत् तदसङ्गतम्। ॐ तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति गीतायां ब्रह्मवाचकत्वस्यैवोक्तत्वेन तयोः शिवाकारगमकत्वाभावात्। नापि, धातुः प्रसादान्महिमानमीशमिति, यः परः स महेश्वर इत्यनयोरुपक्रमोपसंहारयोः। उपक्रमे 'अणोरणीयान् महतो महीयान् आत्मा गुहायां निहितोऽस्य जन्तोः। तमक्रतुं पश्यति वीतशोक' इति पादत्रयोत्तरं, 'धातुः प्रसादादिति' तुरीयपादः। तत्र तमित्यनेन पूर्वोक्तं महतो महीयांसमात्मानं दर्शनकर्मतया परामृश्य तद्विभूतिरूपमीशं पश्यतीत्याह। अन्यथा पौनरुक्त्यापत्तेः। महिमपदस्य विभूतिवाचकत्वं च, गो अश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यमिति छान्दोग्यश्रुतौ सिद्धम्। किञ्चात्र महेश्वरशब्दो रुद्रे शिवे।

शास्त्रारम्भस्तु प्रथमसूत्र एव समर्थितः ।

वैयासे तु दर्शने लिङ्गादिभिर्निर्णयस्याभिप्रेतत्वं, तल्लिङ्गाद्यधिकरणेषु दृश्यत इतिरूढिरप्रयोजिका । किञ्च, 'नारायणः शिवो विष्णुः शंकरः परमेश्वरः । एतैस्तु नामभिर्ब्रह्म परं प्रोक्तं सनातनम्' इति वाराहपुराणवाक्ये रुद्रादिशब्दानां परब्रह्मनामत्वेनैव व्यवस्थापनात् त्रिलोचनादिविशिष्टरूपस्य ततोऽप्यसिद्धेः । नृसिंहतापनीये नृकेसरिशक्तिगणनायां श्रियं लक्ष्मीमौपलामम्बिकां गामिनिश्रावणात् । वाराहे, ॐमित्येकाक्षरीभूताया उमाया नारायणदारत्वेन कथनाच्च नाम्बिकापत्युमापतिपदाभ्यामपि तत्सिद्धिः । नापि यो वै रुद्रः स भगवानित्यथर्वशिरोवाक्येन । अथर्वशिरःशिखाध्यायिशतमेकमेकेन मन्त्रराजजापकेन तत्सममिति पूर्वतापनीये नृसिंहमन्त्रराजजापकस्योत्कर्षश्रावणाद् विद्यावदुत्कर्षस्य च विद्योत्कर्षाधीनत्वाद् विद्योत्कर्षस्य च वेद्योत्कर्षाधीनत्वान्मन्त्रराजवेद्ये नृकेसरिण्येवोत्कर्षविश्रान्तेरथर्वशिरःशिखावेद्यस्य ब्रह्मरूपत्वेऽपि तत्र परत्वस्यापर्यवसानात् । एवमन्यत्रापि द्रष्टव्यम् । ब्रह्मरूपत्वं सर्वविशेषणत्वं सर्वदेहीश्वरत्वं गुरुत्वोपाधिना मोक्षदातृत्वं तु तत्तच्छ्रुतिपुराणानुसारेणानुमन्यामह इति दिक् ।

प्रकृतमनुसरामः । ननु भवन्मते सर्वस्य वेदस्य सिद्धार्थपरत्वेन सिद्धस्वरूपब्रह्मप्रतिपादकत्वे सन्देहाभावान्न तदर्थं शास्त्रारम्भो वक्तुं शक्यः । ज्ञानकर्मसमुच्चयस्याप्यङ्गीकारेण कर्मण्यपि गौणतात्पर्यस्य विद्यमानत्वान्न तदर्थमपि । ब्रह्मणः कारणतायास्तेषु तेषु रूपेषु पर्यायेणाङ्गीकरिष्यमाणत्वाच्च न विष्णुशिवादिव्यतिरिक्तस्य ब्रह्मत्वनिरासार्थम् । अभिन्ननिमित्तोपादानवादिनो यावन्तस्तैः सर्वैरपि जन्मादिसूत्रविषयवाक्यविचारेणैव सर्वविश्वकारणतायाः समर्थनाच्च तद्विशेषनिर्धारार्थमपीति भवन्मते शास्त्रारम्भवैयर्थ्यम् । नैवमन्यमते । तत्तदन्यस्मिन् वेदान्ततात्पर्याभावसमर्थकत्या सार्थक्यादिति शङ्कायामाहुः * शास्त्रेत्यादि * । * प्रथमसूत्र इति * तत्र शेषपूर्तिसमर्थनस्थले, नच गौणतापत्तिरजिज्ञास्यार्थं चेत्यादिना । तस्मात् विवृतं, केन प्रकारेणेत्याशङ्क्य दर्शनादितीत्यन्तेनेति ततो बोध्यम् ।

तस्मात् समवायिकारणत्वमेवानेन सूत्रेण सिद्धम् ।

ननु कारणत्वमेवास्तु ब्रह्मणः । किं समवायिकारणत्वेन । विकृतत्वं च स्यात् । अनर्थरूपत्वेन कार्यस्यायुक्तता च । तस्मादनारम्भणीयमेवैतत् सूत्रमिति चेन्मैवम् । सर्वोपनिषत्समाधानार्थं प्रवृत्तः सूत्रकारः । तद्यदि ब्रह्मणः समवायित्वं न सू-

---

सिद्धमाहुः * तस्मादित्यादि * । शास्त्रारम्भस्य प्रथमसूत्र एव समर्थितत्वाद् द्वितीयसूत्रविषयवाक्ये, यतो वेत्यादेः कारणतामात्रबोधकत्वेऽपि चारितार्थ्येन, यत् प्रयन्त्यभिसंविशन्तीत्यस्याधारतामात्रबोधकत्वेऽपि चारितार्थ्येन, सदेव सोम्येदमग्र आसीदित्यत्रापि, तत्ते-जोऽसृजतेत्यादिना कर्तृत्वस्यैवासन्दिग्धतया उपादानत्वं केवलस्य वा शरीरद्वारा वेति सन्देहानपायात् । सोऽत्रस्य योनिशब्दस्यापि कारणमात्रवाचकत्वेन प्रमाणाद्यबोधकत्वादुपादानत्वनिर्धारणासमर्थत्वाच्चेतः पूर्वसूत्रयोरुपादानत्वस्यासिद्धत्वादनेनैव सूत्रेण युक्तिनिर्देशात् तत्सिद्धमित्यर्थः । ननूपादानपदं परित्यज्य समवायिपदेन कुतो व्यवहार इति चेदुच्यते । लोके उपादानपदेन कर्तृक्रियया व्याप्तस्य परिच्छिन्नस्यैवाभिधानदर्शनात् । प्रकृतिर्ह्यस्योपादानमिति, पुरुषस्त्वनुपादानमात्मानं लीलयाऽसृजदिति श्रीभागवतेऽपि भगवता मैत्रेयेण च तादृशे एवोपादानपदस्य प्रयुक्तत्वाच्चेति जानीहि ।

अथ ब्रह्मस्वरूपस्य समवायित्वमसहमानाः प्रत्यवतिष्ठन्ते * नन्वित्यादि * । अयमर्थः । समन्वयसूत्रे ब्रह्मस्वरूपस्य समवायित्वाग्रहो यः क्रियते, स न पूर्वसूत्रोक्तकारणतासमर्थनार्थः । शास्त्रयोनित्वेनैव समर्थितत्वात् । नापि शास्त्रयोनित्वसमर्थनार्थः । त्वया तथाऽनङ्गीकारात् । किन्तु कारणत्वे विशेषान्तरस्यापि बोधनार्थः । स न युक्तो विकृतत्वादिदोषापादकत्वात् । अतः शरीरस्य बोधार्थं वा भिन्नाया एव प्रकृतेर्वा तथात्वं वक्तव्यम् । तथा सति स्वरूपसमन्वयस्याभावादनारम्भणीयमेवैतत् सूत्रं तव मते स्यादिति । अत्र समादधते * मैवमित्यादि * । अयमर्थः स्पष्टः । अत्र हेतुः * सर्वोपनि

याद् भूयानुपनिषद्भागो व्यर्थः स्यात् । इदं सर्वं यदयमात्मा, आत्मैवेदं सर्वम् । स सर्वं भवति, ब्रह्म तं परादादित्यादि, स आत्मानं स्वयमकुरुत, एकमेवाद्वितीयम्, वाचारम्भणं विकार इत्यादि । एवमादीनि वाक्यानि स्वार्थे बाधितानि भवेयुः ।

भवेयुरिति । अयमर्थः । समवायित्वं यन्निषिद्ध्यते, ननु किं पूर्वसूत्रस्य निराकाङ्क्षत्वादुत दोषोत्पादकत्वात् । नाद्यः । व्यासस्य सर्वोपनिषदां यथावस्थितार्थबोधनार्थं प्रवृत्तत्वेन भूयस उपनिषद्भागस्य वैयर्थ्ये जन्मादिसूत्रस्य विशेषाकाङ्क्षाया अनिवृत्तेः । नेतरः । तद्भावस्यानुपदं व्युत्पाद्यत्वात् । स भागस्त्विदं सर्वमित्यादिरूपः । अत्राद्यवाक्यं मैत्रेयीब्राह्मणस्थम् । तत्र ह्यात्मनि वा अरे दृष्टे श्रुते मते विज्ञाते सर्वमिदं विदितमित्यनेनात्मज्ञानादिभिः सर्वज्ञानरूपं फलं दर्शयित्वा, तज्ज्ञानं किम्प्रकारकमित्याकाङ्क्षायां, ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेदेत्यादिना योऽन्यत्रात्मनः सर्वं वेदेत्यन्तेन ब्रह्मादिसर्वान्तेष्वात्मभिन्नत्ववेत्तुः कैवल्याभावरूपममृतत्वाभावरूपं वा पराभवं प्रदर्श्येदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे यज्ञा इमानि भूतानीदं सर्वं यदयमात्मेत्युपसंहारे ज्ञानप्रकारदर्शनेन सर्वस्यात्माभेदं दर्शयति । तस्मिंश्चान्तरे सर्वस्यात्मोपादेयत्वमन्तरेणाघटमाने वाक्यमेव बाधितार्थं भवेत् । एवं द्वितीयवाक्यमपि, छान्दोग्ये सनत्कुमारसंवादे । तत्राप्यन्ते, आत्मनः प्राण आत्मन आशेत्यादि श्रूयते । तदप्यात्मनः समवायित्वं विना नोपपद्यते । तदतिरिक्तस्योपादानस्याश्रवणात् । तृतीयं तु पुरुषविधब्राह्मणस्थम् । तत्राप्यात्मैवेदमग्र आसीदिति सृष्टिपूर्वकाले केवलात्मसत्तामुक्त्वा, ततः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्यनेन सृष्ट्यनन्तरमन्यदर्शनमुक्त्वैव निषेधति । मध्ये च, किमु तद्ब्रह्मावेद् यस्मात् तत्सर्वमभवदिति प्रश्ने, तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात् तत्सर्वमभवदित्युत्तरमुक्त्वा तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीति सर्वात्मभावरूपं फलमाह । समवायित्वानङ्गीकारे तदपि सर्वं बाधितं भवेत् । तुरीयं तु तद्भिन्न-

नन्वेवं निःसन्दिग्धत्वात् कथं सूत्रप्रवृत्तिः ।

स्वधेत्युक्तरूपं परामर्शं वक्तीत्युक्तम् । मध्ये वाक्यद्वयं तु सर्वैकवाक्यतार्थम् । पञ्चमं तु तैत्तिरीये ब्रह्मवित्प्रपाठके । तत्रापि करोतिकर्मत्वेनात्मनः श्रावणात् तस्यैवोपादानोपादेयभावः स्फुटति । सोऽपि तथा भवेत् । एकमेवेत्यादिकं तु छान्दोग्यस्थम् । तत्राप्येकमेवेति विशेषणान्वितेनैवकारेणान्यसत्त्वे ऽर्थव्यवच्छेदेऽप्येके मुख्यान्यकेवला इति कोशादेकशब्दस्य नानार्थत्वेनात्र मुख्येतरव्यवच्छेद एवाभिसंहित इति श्रुत्यन्तरे, नान्यत् किञ्चन मिषदिति कथनाद् व्यापारं कुर्वतो वान्यस्य निषेधोऽभिसंहित इति वा शङ्का स्यादिति तन्निवारणायाद्वितीयपदेन द्वित्वसंख्यापूरकस्य निषेधः सृष्ट्यादौ क्रियते । सोऽपि सदितरस्य समवायिनः सत्त्वे बाध्येत । वाचारम्भणवाक्ये तु मृण्मयादिभिर्दृष्टान्तैः स्फुटमेव समवायित्वमवगम्यते । तथा द्वितीये गार्गीब्राह्मणे कस्मिन् वा आकाश ओतश्च प्रोतश्चेति प्रश्ने, एतद्वै तदक्षरं गार्गीत्यादिना अक्षरं ओतप्रोतनामाकाशस्य वदति । सा च समवायित्वस्यैव लिङ्गम् । 'नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे । ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः' इत्यादिपुराणवाक्यैस्तन्निश्चयात् । नच, मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवेति गीतावाक्यान्नैवमिति शङ्क्यम् । तत्र केवलप्रोतत्वस्यैवोक्तत्वेऽप्यग्रे, रसोऽहमप्सु कौन्तेय प्रभाऽस्मि शशिसूर्ययोरित्यादिभिः स्वस्य भूतसूक्ष्मत्वादिबोधनेनोतत्वस्यापि सूचिततया तत्राप्येवमर्थस्योक्ततौल्यात् । तथा 'त्वमग्र आसीत् त्वयि मध्य आसीत् त्वय्यन्त आसीदिदमात्मतन्त्रे । त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्मादित्यष्टमस्कन्धीयब्रह्मवाक्येऽपि समवायित्वस्योपबृंहणात् । आथर्वणानां गोपथब्राह्मणारम्भे च, ब्रह्म वा इदमग्र आसीत् स्वयम्भ्वेकमेव तदैक्षत महद्वै यक्षं तदेकमेवाऽस्मि हन्ताहं मन्मात्रं द्वितीयमित्यादि श्रूयते । तृतीयस्कन्धे, विश्वं वै ब्रह्म तन्मात्रमिति । एवञ्जातीयकानि वाक्यान्यादिपदेन सङ्गृह्यन्ते । अतः पूर्वसूत्राकाङ्क्षापूरणायेदं सूत्रमावश्यकमित्यर्थः ।

पुनराशङ्कते । * नन्वेवमित्यादि । * एवमिति * । पुरःस्फु-

उच्यते । अस्थूलादिवाक्यान्यपि सन्ति यत्राऽप्रपञ्चतद्धर्मवैलक्षण्यप्रतिपादकानि । ततोऽन्योऽन्यविरोधेनैकस्य मुख्यार्थबाधो वक्तव्यः । तत्र स्वरूपापेक्षया कार्यस्य गौणत्वात् प्रपञ्चरूपप्रतिपादकानामेव कश्चित् कल्पयेत् । तन्माभूदिति जन्मादिसूत्रवत् समन्वयसूत्रमपि सूत्रितवान् । तथाचाऽस्थूलादिगुणयुक्त एवाविक्रियमाण एवात्मानं करोतीति वेदान्तार्थः सङ्गतो भवति । विरुद्धसर्वधर्माश्रयत्वं तु ब्रह्मणो भूषणाय ।

र्तिकयथाश्रुतार्थग्रहणे । तथाच सूत्रकारो हि वेदान्तार्थं दुर्बोधमाकलय्यँस्तत्रान्येषामृषीणामपि शुकादिकृतं बुद्धिमोहमवधार्य लोकाननुजिघृक्षुँस्तदर्थं व्यक्तीकर्तुं प्रवृत्तो यद्येवं समवायित्वमसन्दिग्धमेव जानीयात् समन्वयसूत्रं न प्रणयेत् । अतः सूत्रप्रवृत्तिरेव समवायित्वाभावं बोधयतीत्यर्थः । अत्र प्रष्टुरिसुपयाद्यन्तः समादधते । *उच्यत इत्यादि* अर्थस्तु निगदेनैव व्याख्यातः । *जन्मादिसूत्रवदिति* यथा जन्मादिसूत्रं कर्तृत्वादिधर्मनिर्द्धारणेन निर्विशेषमात्रतानिराकरणार्थं तथेदमपि समवायित्वनिर्द्धारणेन तदर्थं, न तु सांख्यं निराचष्टुम् । तस्याग्रे वक्ष्यमाणत्वादिति भावः । एतेन पूर्वचोदितस्य द्वितीयदूषणस्यापि निवृत्तिं बोधयन्ति । * तथाचेत्यादि* । *सङ्गतो भवतीति * । उक्तदूषणस्योद्धृतत्वादसन्दिग्धो भवति । तथाचैतत्सूत्राभावे उक्तसन्देहानपायात् तदर्थं सूत्रप्रवृत्त्या समवायित्वमावश्यकमित्यर्थः । नन्वविक्रियमाणस्य समवायित्वं काल्पनिकम् । कल्पना तु लोकाविरुद्धैव प्रामाणिकसमाजे शोभते । तत इदमसङ्गतमित्याशङ्कायामाहुः * विरुद्धेत्यादि * । * भूषणायेति * तदेजति तन्नैजति । आसीनो दूरं व्रजति शयानो याति सर्वतः । अपाणिपादो जवनो ग्रहीतेत्याद्यनेकश्रुतिसिद्धत्वाद् भूषणाय । ब्रह्मणः श्रुत्येकसमधिगम्यत्वस्य सर्वेषामेव संमतत्वादित्यर्थः ।

ननु फलार्थं सर्वः प्रवर्तते । तस्यैव पुरुषशेषत्वात् । तदैहिकं मोक्षरूपं वा यद् यस्याभीष्टं तत् सर्वं, ब्रह्मोपासनया वा तज्ज्ञानेन वा

किञ्च । अन्यपदार्थस्रष्टौ वैषम्यनैर्घृण्ये स्याताम् । कर्माधीनत्वे त्वनीशिता । ततः कर्तृत्वमपि भज्येत । ततः सर्वमाहात्म्यनाश एव स्यात् ।

नन्वेवमेवास्तु, अपवादार्थत्वात् । रज्जुसर्पवदयुक्तार्थकथनेऽपि न दोषः । सर्वं समाप्नोषि ततोऽसि सर्व इति स्मृतेश्चेति चेत् । मैवम् । तथा सति पाषण्डित्वं स्यात् । एतादृशशास्त्रार्था-

---

सर्वस्य यथाधिकारं ब्रह्मणि सर्वकर्तृत्वं सर्वेश्वरत्वादिकं चानुसन्धानस्य सेत्स्यत्येव। नच समयावित्यानुसन्धानस्यावश्यकत्वम्। शरीरद्वारापि तदङ्गीकारे पूर्वोक्तमाहात्म्यनाशेन तथानुसन्धानस्यावश्यकत्वात् । अतोऽपार्थप्रयासात् तव मते एतत्सूत्रवैयर्थ्यमेवापद्येतेत्यत आहुः * किञ्चेत्यादि * । * तत इति * अनीशत्वे । * तत इति * कर्तृत्वभङ्गे । तथाच वैषम्यादिवारणेन कर्तृत्वादिसमर्थनार्थमप्यावश्यकत्वान्न वैयर्थ्यमतस्तवापि निर्दोषनिखिलगुणगणालङ्कृतब्रह्माङ्गीकर्तुरावश्यकमित्यर्थः ।

अत्र विरुद्धधर्माश्रयत्वमसहमानो निर्विशेषमात्रवादी पुनः शङ्कते * नन्वित्यादि * अयमर्थः । अस्तु कर्तृत्वादिभङ्गः । अस्थूलादिवाक्यैः स्वरूपस्य निर्विशेषत्वे निश्चिते तेषां कर्तृत्वादीनामविद्याकल्पितत्वेनापवादार्थत्वात् । नचैवं मिथ्यार्थकथने वाक्यप्रामाण्यभङ्गः । यथा द्यतिचपले बाले तस्य भीत्युत्पादनाय रज्जुः सर्प इति प्रदर्श्यते, ततो विनीते तस्मिन् रज्जुरियमिति स्वरूपं कथ्यते । तथा संसारासक्तेषु भीत्यर्थं माहात्म्यं कर्तृत्वफलदातृत्वनियामकत्वादिरूपमुच्यते । ततो वैराग्याद्युत्पत्तौ स्वरूपं बोध्यत इति रज्जुसर्पवदयुक्तार्थकथनेऽपि न दोषः । तत्र तात्पर्याभावात् । अथेदं सर्वं यदयमात्मेत्यादीनां स्वार्थत्यागादस्यासङ्गत्वं विभाव्यते । तदबोधात् । गीतायां विश्वरूपं पश्यता पार्थेनैव सर्वव्याप्त्या सर्वत्वकथनेन तदर्थनिश्चयादसङ्गत्वमायातीति ।

अत्र समादधते * मैवमित्यादि * । * तथा सतीति * सर्वधर्मापवादे कृते सति । * पाषण्डित्वमिति * पापलिङ्गधरत्वम् । तानि

ङ्गीकर्तृगासुरेषु भगवता गणितत्वात् । 'असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसम्भूतं किमन्यत् कामहेतुकम्' इति । शास्त्रानर्थक्यं चासर्वं समाप्नोषीत्यप्यसङ्गतं स्यात् । वस्तुपरिच्छेदात् ।

पापस्य पण्डानि लिङ्गं पण्डमिहोच्यत इति श्रीभागवतवाक्यात् । गीतावाक्यार्थस्तु, ते असुरा असत्यं नास्ति सत्यं वेदपुराणादिप्रमाणं यस्मिंस्तदसत्यम् । वेदादिस्वरूपसत्त्वेऽपि तत्प्रामाण्यानभ्युपगमाद् विशिष्टाभावः । अत एव नास्ति धर्माधर्मरूपा प्रतिष्ठा हेतुव्यवस्था यस्येत्यप्रतिष्ठम् । तथा नास्ति शुभाशुभफलदातेश्वरो नियन्ता यस्येत्यनीश्वरं जगदाहुरिति । यद्वा सत्यं सत्यशब्दनिर्दिष्टं ब्रह्म, तस्योपादेयत्वेन तदात्मकत्वे जगदपि सत्यं भवति, तद्विरुद्धमसत्यम् । न विद्यते ब्रह्मणि प्रतिष्ठा यस्येत्यप्रतिष्ठम् । न विद्यते नियामकः सत्यसङ्कल्प ईश्वरो यस्येत्यनीश्वरमिति । किञ्च, सर्वं पशुमनुष्यादिकं योषित्पुरुषयोः परस्परसम्बन्धेन जातमुपलभ्यते । अनेवम्भूतमपरस्परसम्भूतं तादृशमन्यत् किं, न किमपि । अत इदं सर्वं कामहेतुकमिति । यद्वा । यतः सर्वमेवमतोऽदृष्टं कारणं किमपि नास्ति । अदृष्टाङ्गीकारेऽपि कश्चित्त्वाऽन्ततः स्वभाव एव पर्यवसानात् स्वाभाविकमेव जगद्वैचित्र्यमस्तु । दृष्टे सम्भवत्यदृष्टकल्पनानवकाशात् । अतः काम एव प्राणिनां कारणं, नान्यददृष्टेश्वराद्वीत्याहुरिति । इयं च लौकायतिकदृष्टिरिति । ततश्चायमर्थः । धर्माणामपवादमातिष्ठतस्तद्विशिष्टस्येश्वरस्य काल्पनिकत्वेन वस्तुतस्तदभावात् प्रच्छन्नानीश्वरवादितया स्वभाववाद एव विश्रान्त्या लौकायतिककल्पत्वात् पाषण्डित्वस्य गीतोक्तलक्षणकत्वादासुरत्वस्य चापरिहार्यद्वयापि कल्पितत्वापत्त्या । तस्मानर्थक्यम् । कथञ्चित्प्रामाण्याङ्गीकारेऽपि संसारभ्रमस्यौत्पत्तिकत्वात् तद्भ्रमनिवारणाय स्वरूपमात्रस्यैव वक्तव्यत्वेन शेषशास्त्रस्य प्रक्षालनपङ्कन्यायादानर्थक्यम् । स्वस्वमतकल्पितरूपस्य चेतनविशेषस्येश्वरस्य सर्वैरेवाङ्गीकारेण तत्सत्तासाधनायाप्यनुपयोगात् । अपवादार्थमेवारोपितमेव सर्वमुच्यत इत्यङ्गीकारे, सर्वं समाप्नोषीत्यस्याप्यसङ्गतिः । पदार्थान्तरस्य व्याप्यस्याभावेनावस्तुनश्चाव्याप्यत्वेनास्य वस्तुपरिच्छेदबोधकस्यार्थबाधापत्तेः । असङ्गतत्वं विभजन्त एव तदुपपादकमा-

नहि वेदो निष्प्रपञ्चरूपकथनमुक्त्वा स्वोक्तं जगत्कर्तृत्वं निषेधति । तस्माद्ध्यारोपापवादपरत्वेन व्याख्यातृभिर्वेदान्ताखिलापः कृता इति मन्यामहे । सर्ववाक्यार्थबाधात् ।

यथा निर्दोषपूर्णगुणविग्रहता भवति तथोपरिष्टाद् वक्ष्यामः ।

ननु पुरुषार्थार्थानि शास्त्राणि । इदं च शास्त्रं मोक्षरूपपुरुषार्थसाधकम् । मोक्षश्चाविद्यानिवृत्तिरूप इति युक्तम् । अविद्या

हुः * न हीत्यादि * यदि हि निष्प्रपञ्चकथनं मुक्त्वा जगत्कर्तृत्वं ब्रह्मणि निषेधेत्, तदा फलन्तरादिसत्त्ववत् जगदपि सर्वं स्यात् । तदा व्याप्यसिद्धौ सर्वं समाप्नोतीति वाक्य सङ्गतं स्यात् । यथा तात्त्विकभेदवादिनां मते । तव मते तु निष्प्रपञ्चत्वकथनपूर्वक एव कर्तृत्वादिनिषेध इति त्वन्मत इदं वाक्यमसङ्गतमेवेत्यर्थः । एवं तन्मतमपास्य तमुपहसन्ति * तस्मादित्यादि * । * तस्मादिति * युक्तिप्रमाणविरुद्धत्वात् । तथाचैवंविधव्याख्यानरोगेण स्वीयाभिवृत्तदैवमायैरासुरत्वरूपमरणप्राप्त्या अस्पृश्यैर्वेदान्ता अपि शवतिलायो यथा अमङ्गला अस्पृश्यास्तथा कृता इत्यर्थः । अत एव प्रबोधचन्द्रोदयनाटकेऽपि बौद्धोक्तिः । 'प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः । वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यत' इति । असद्वा इदमग्र आसीत, ततो वै सदजायतेतिश्रुतिच्छायायास्तैरप्यालम्बनात् । अत एव पाद्मोत्तरखण्डेऽप्युक्तम् 'मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते । मयैव कथित देवि कलौ ब्राह्मणरूपिणेत्यादि' । ननु ब्रह्मणः प्रपञ्चसमवायित्वमयुक्तम् । कार्यस्य कारणसाजात्यनियमेन प्रपञ्चगतदोषाणां ब्रह्मण्यापातादित्याकाङ्क्षायामाहुः * यथा निर्दोषेत्यादि * । * उपरिष्टादिति * अन्तस्तद्धर्माधिकरणे ।

अपवादार्थत्वे उक्तान् दोषानसहमानो निर्विशेषवादी पुनः प्रत्यवतिष्ठते * नन्वित्यादि * । * युक्तमिति * दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तराभावादपवर्ग इति गौतमसूत्रे मिथ्याज्ञानापायस्य मोक्षसाधकत्वेन कथनाद्युक्तम् । * अविद्या

चाज्ञानं ज्ञानेनैव नश्यति । ततो ज्ञानोपयोगित्वेन व्याख्याने वेदान्तेऽध्यारोपापवादव्यतिरेकेण व्याख्यानमयुक्तम् । अतो यथाकथञ्चिद् व्याख्यानेऽपि पुरुषार्थसिद्धेर्न कोऽपि दोष इति चेत् ।

चाज्ञानमिति * । अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्येति पतञ्जलिसूत्र उक्तं भावरूपमज्ञानं, न तु ज्ञानाभावः । योगभाष्ये, 'अमित्रो न मित्रं, न वा मित्राभावः, किन्तु मित्रविरुद्धसपदिति दृष्टान्तेन व्यासपादैरेव भावरूपतायां उक्तत्वादिति । तत्रायमर्थः । शास्त्रस्य स्वार्थबाधने य आग्रहः क्रियते स शास्त्रस्वरूपं विचार्य कार्यः । न हि शास्त्रत्वेन शास्त्राणामुपादेयता येन स युक्तः स्यात् । किन्तु पुरुषार्थत्वेन । पुरुषाश्च नानाश्रमाभावाः स्वस्वोपयोगिशास्त्रमाद्रियन्ते । तदेदं शास्त्रं मोक्षसाधकं मुमुक्षूपयोगि । मोक्षस्त्वभियुक्तैरविद्यानिवृत्तिसाध्यनयोक्तत्वादविद्यानिवृत्तिरूप एवात्र वक्तव्यो, न तु स्वरूपात्मकः । तस्याजन्यत्वात् । तत्र च साधनानामनुपयोगेन तदुपदेशवैयर्थ्यप्रसङ्गाच्च । नचाविद्यानिवृत्तेर्जन्यत्वे कदाचित् तन्नाशः शङ्क्यः । ध्वंसरूपत्वात् । अत एव जन्यभावत्वेन नश्वरत्वेन व्याप्तिराद्रियते, न तु केवलं जन्यत्वेन । ततश्च साधनसाध्यो मोक्षोऽविद्यानिवृत्तिरूप एवेत्यविवादम् । तत्र साधनविचारे यद्यपि दर्शनान्तराभिमानिभिः साधनान्तराणि कर्मसमुच्चिततत्तद्विधज्ञानरूपाण्युक्तानि । श्रौतेऽस्मिन् वेदान्तदर्शने केवलं ज्ञानमेव साधनम् । अविद्याया अज्ञानरूपत्वस्य साधितत्वात् । विवक्षितज्ञानमात्रेणैव तन्निवृत्तिसिद्धौ साधनान्तराणां समुच्चयस्य चापार्थत्वात् । ततो ज्ञानोपयोगित्वेनैव वेदान्तव्याख्याने कर्तव्येऽध्यारोपापवादपक्षमपहाय स्वार्थपरत्वेन व्याख्यानं नाभियुक्तजनरुचिरम् । अतो यथाकथञ्चिद्व्याख्यानेऽपि ज्ञानोत्पत्त्या अज्ञाननिवृत्तौ, ब्रह्म वेद ब्रह्मैव भवतीतिरूपस्वरूपावस्थात्मकपुरुषार्थसिद्धेरप्रत्यूहत्वात् पाषण्डित्वासुरत्वशास्त्रानर्थक्यादिरूपाणां दोषाणां लेशस्याप्यभावादनुचितोऽयमुपहास इति । एवं तेन स्वोपहासे विनि-

न । पुरुषार्थस्य शास्त्रार्थस्य वा स्वरूपं शास्त्रैकसमधिगम्यं, न स्वबुद्धिपरिकल्पितम् । अतः स्वबुद्ध्या शास्त्रार्थं परिकल्प्य तत्र वेदं योजयन्तो महासाहसिकाः सद्भिरुपेक्ष्याः ।

पुरुषार्थः पुनर्यथा वेदान्तेष्ववगतः । ब्रह्म वेद ब्रह्मैव भवति, ब्रह्मविदाप्नोति परम्, न स पुनरावर्तते, ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्, अनावृत्तिः शब्दादनावृत्तिः श-

---

चारित्ते तस्यापत्रपत्वं बोधयन्तः स्वोक्तं स्थिरीकर्तुं तदुक्तं निषेधन्तः प्रामाणिकप्राचीनरीतिमाहुः * नेत्यादि *। अयमर्थः । यदुक्तं, पुरुषार्थोपायानि शास्त्राणीत्यादिना, तदङ्गीकुर्मः । परन्तु पुरुषार्थः शास्त्रार्थश्च कीदृशो विवक्षित इति विचारणीयम् । किं स्मार्त उत श्रौतः ? । तत्र नाद्यः । विरुद्धानां शास्त्राणां व्यासेनैव निराकरणात् । वाक्याभासयुक्त्याभासावष्टम्भाः पूर्वपक्षवादिन इहोत्तिष्ठन्ति । तत्र पदवाक्यप्रमाणज्ञेनाचार्येण वेदान्तवाक्यानां ब्रह्मावगतिपरत्वप्रदर्शनाय वाक्याभासयुक्त्याभासप्रतिपत्तयः पूर्वपक्षीकृत्य निराक्रियन्त इति भवद्भाष्यकृतापि तन्निराकरणाङ्गीकारात् । अतो द्वितीय एवादरणीयः । तथा सति पुरुषार्थस्य शास्त्रार्थस्य च स्वरूपं श्रुत्येकसमधिगम्यं, न तु दर्शनान्तरवाक्यादरणेन स्वबुद्धिकल्पितमिति सिद्धम् । एवं सति पदवाक्यप्रमाणनिष्णातेनाचार्येण कार्यलक्षणस्यैव पूर्वं विचारितत्वादग्रे तत्तद्धर्मादिविचाराच्च धर्मविशिष्टब्रह्मज्ञानमेव शास्त्रार्थो, न त्वध्यारोपापवादेन यावद्धर्मशून्यब्रह्मावगतिः । अतः स्वबुद्ध्या तथा शास्त्रार्थं कल्पयित्वा तत्र वेदस्यैकवाक्यत्वं बोधयन्तो लोकान्तरीयभयराहित्येन महासाहसकर्तृत्वात् सद्भिर्वेदानुसारिभिरसम्भाष्या इति । मोक्षस्याविद्यानिवृत्तिरूपत्वव्युदासायाहुः * पुरुषार्थ इत्यादि * । तथा चाविद्यानिवृत्तिरूपो मोक्षः कुत्रापि नोक्त इति त्वन्मतीयः पुरुषार्थोऽपि काल्पनिक इत्यर्थः । एतदेव बोधयितुं वाक्यान्युदाहरन्ति * ब्रह्म वेदेत्यादि *। अत्र प्रथमे ब्रह्मभावो, द्वितीये परब्रह्मप्राप्तिरेव च फलत्वेनोच्यते । तृतीये च संसारावृत्त्यभावः । चतुर्थे गीतावाक्ये आप्तिस्वरूपं निष्कृष्यते । पञ्चमे च

त्वादित्येवमादिभिः श्रुतिस्मृतिन्यायैर्ब्रह्मप्राप्तेरेव पुरुषार्थत्वम्। ब्रह्म च पुनर्न जीवस्यात्ममात्रम्। अज्ञानबद्धा। 'एकस्यैव'

वैयासे सूत्रे तृतीयवाक्यार्थनिर्द्धारणेन जन्यभावत्वानश्वरत्वयोर्व्याप्तिर्निराक्रियते। अत्रायमाशयः। भवद्भाष्ये न्यायसूत्रोपन्यासेनाविद्यानिवृत्तेर्ध्वंसरूपत्वादनश्वरत्वं यदसूचि, तद् आश्रमवासिके भारतीये पर्वणि महता प्रबन्धेन, त्यक्तदेहानां कुरुपाण्डवसैन्यानां व्यासेन पुनर्दर्शितानां स्वस्वपत्नीभिः सहैकरात्रिकृतविहारामन्त्रणादिकथनाद् ध्वंसस्याप्यनश्वरत्वं प्रायिकमेव, न तु नियमतस्तद्बद्विद्याकृताविद्यानिवृत्तेरपि स्वप्नप्रबोधन्यायेन च निवृत्तिसम्भवादनाश्वरत्वं, गुणानामन्योन्याभिभवजननमिथुनवृत्तितया सत्त्वेन रजस्तमसोरिव ताभ्यां सत्त्वस्याप्यभिभवे पुनरप्यविद्योत्पत्तिसम्भवादसङ्गतम्। अतस्तद्विहाय श्रौत एव ब्रह्मप्राप्तिरूपः पुरुषार्थ आदर्तव्यः। नच तस्य नश्वरत्वं शङ्क्यम्। न स पुनरावर्त्तत इति ब्रह्मप्राप्तस्यानावृत्तिबोधनेन तस्यानश्वरत्वनिश्चयात्। जन्यभावत्वेन नश्वरत्वेन व्याप्तिर्लौकिकत्वघटितैव सूत्रे शब्दादिपदस्य हेतोरुपन्यासात्। नच ब्रह्मणः सर्वगतत्वेन नित्याप्तस्वरूपत्वादप्राप्यत्वं शङ्क्यम्। आप्तस्वरूपत्वेऽप्युक्तगीतावाक्ये आप्तिस्वरूपविवरणेनेदानीं तस्याभावादप्राप्यत्वस्यापि सत्त्वात्। एतदर्थापत्त्यैवान्तस्त्वबहिष्ट्वयोरपि तत्र मन्तव्यत्वात्। नच श्वेताश्वतरोपनिषदि, 'भूयश्चान्ते विश्वमायानिवृत्तिरि'ति मायानिवृत्तेर्मोक्षरूपत्वश्रावणादविद्यानिवृत्तेरप्यनश्वरत्वं श्रौतत्वं च शङ्क्यम्। मायाऽविद्ययोर्भेदात्। 'विद्याऽविद्ये मम तनू विद्ध्युद्धव शरीरिणाम्। मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते' इति भगवता तयोः कार्यकारणभावबोधनात्। माया चाविद्या च स्वयमेव भवतीति तापनीयश्रावितद्वैरूप्यपक्षेऽपि तयोर्भेदेन तन्नाशयोरपि भिन्नत्वान्मायानिवृत्तेरेव मोक्षत्वं, नाविद्यानिवृत्तेः। मायानिवृत्तिश्च मोक्षस्य पूर्वा कक्षेति परममोक्षत्वं ब्रह्मप्राप्तेरेव निश्चेयम्। तदेतदुक्तं * ब्रह्मप्राप्तेरेव पुरुषार्थत्वमिति *। यदपि मोक्षस्य स्वात्मस्वरूपत्वेनाप्राप्यत्वमुक्तं. यच्च ब्रह्मणोऽविद्यांशापत्त्यादनानश्वरत्वं तदप्यसङ्गतमिति ज्ञापनायाहुः * ब्रह्म चेत्यादि *। *आत्ममात्रमिति * मात्रं कार्त्स्न्येऽवधारणे। कृत्स्नमात्मस्वरूपम्। तथाचा-

ममांशस्य जीवस्यैव महामते । बन्धोऽस्याविद्ययाऽनादिर्विद्यया च तथेतर' इति भगवता जीवस्यैवाविद्यावत्त्वप्रतिपादनात्।

तस्मान्न्यायोपबृंहितसर्ववेदान्तप्रतिपादितसर्वधर्मवद् ब्रह्म। तस्य श्रवणमनननिदिध्यासनैरन्तरङ्गैः शमदमादिभिश्च बहिरङ्गैरतिशुद्धे चित्ते स्वयमेवाविर्भूतस्य स्वप्रकाशस्य सायुज्यं परमपुरुषार्थः। तस्मात् सर्वे वेदान्ताः स्वार्थ एव युक्तार्था इति न्यायैर्वक्तव्यत्वाद् ब्रह्मणः समन्वयित्वाय समन्वयसूत्रं वक्तव्यम्॥३॥

एवं ब्रह्मजिज्ञासां प्रतिज्ञाय विलक्षणकं ब्रह्मेत्याकाङ्क्षायां जन्मादिसूत्रद्वयेन वेदप्रमाणकं जगत्कर्तृ समन्वायि चेत्युक्तम्।

ऽस्मिन् वाक्ये जीवस्यांशत्वकथनेन स्वस्यांशित्वं बोधयता भगवता ब्रह्मणो जीवात्ममात्रत्वे निवारिते मोक्षस्यात्मरूपत्वेनानात्यत्वं निवारितम्। जीवस्याविद्यया बन्धकथनेन ब्रह्मणोऽविद्यावत्त्वमपि निवारितमतस्तद्व्यसङ्गतमित्यर्थः। सिद्धमाहुः * तस्मादित्यादि *। तस्मादिति * एकदेशिमतस्योपबृंहणविरुद्धत्वात्। * तस्येति * सर्ववेदान्तप्रतिपादितधर्मविशिष्टस्य ब्रह्मणः। * स्वयमाविर्भूतस्येति * नायमात्मेतिश्रुत्या साधनाधीनत्वे ब्रह्माविर्भावस्य वारिते आविर्भावः स्वीकरणेन प्रसादादेव भवतीति तेन स्वयमाविर्भूतस्य। तथाच श्रौतानां स्मार्तानां च ब्रह्मविषयाणां साधनानां चित्तकषायशोषण एव पर्यवसानात् तैरतिशुद्धे चित्ते परमव्योमात्मके सति तत्राविर्भूतस्य ब्रह्मणः, सोऽश्नुत इतिश्रुत्युक्तं सायुज्यमेव सर्वोत्कृष्टः पुरुषार्थो ध्वंसाप्रतियोगित्वात्। न तु ब्रह्मात्मावगतिमात्रम्। अतस्तादर्थ्येन यथाकथञ्चिद् वेदान्तव्याख्यानमयुक्तमित्यर्थः। एवमेकदेशिमतानि व्युदस्य पूर्वोक्तं सूत्रप्रयोजनं निगमयन्ति * तस्मादित्यादि *॥

इति तृतीयाधिकरणम्॥ ३॥

अतः परं प्रस्तोष्यमाणग्रन्थावतरणाय पूर्वोक्तस्य शास्त्रार्थसंग्रहरूपत्वं बोधयन्तस्तदर्थमनुवदन्ति * एवं ब्रह्मेत्यादि *। तेन चि-

एवं त्रिसूत्र्या जिज्ञासालक्षणविचारकर्तव्यता सिद्धा ।

तत्र ब्रह्मणि चतुर्द्धा विचारः । स्वरूपसाधनफलप्रतिपादकानि सर्ववेदान्तवाक्यानि त्रिविधानि मतान्तरनिराकरणं च । तत्र स्वरूपे विचारिते मतान्तरनिरासव्यतिरेकेण साधनफलयोरनुपयोगात् । अतः प्रथमं स्वरूपनिर्णयः । तदनु मतान्तरनिरासः । तदनु साधनानि फलं चेति । तत्र प्रथमेऽध्याये स्वरूपवाक्यानि विचार्यन्ते तानि द्विविधानि । सन्दिग्धानि, निःसन्दिग्धानि च । तत्र निःसन्दिग्धानां निर्णयो न वक्तव्यः । सन्दिग्धानि पुनश्चतुर्विधानि । कार्यप्रतिपादकान्यन्तर्यामिप्रति-

---

क्रमाहुः * एवं त्रिसूत्र्येत्यादि * कर्तव्यतापदस्य जिज्ञासादिपदैः प्रत्येकं सम्बन्धः । * सिद्धेति * सूचिता । तथाच पूर्वसूत्रे जिज्ञासापदमहिम्ना ज्ञानेच्छास्मारणेन, अविज्ञातं विजानतां विज्ञानमविजानतामिति ब्रह्मस्वरूपमर्यादाबोधनाद् ब्रह्मज्ञानोत्तरमपि तस्याः करणावश्यकता सूचिता । द्वितीये स्वरूपलक्षणमनुक्त्वैव कार्यलक्षणकथनेन तस्य गौणत्वनिधारणात् तत्करणावश्यकता सूचिता । तृतीये समवायित्वनिर्णायकहेतुकथनेन विरुद्धधर्माश्रयत्वबोधनाद् विचारकरणावश्यकता च सूचितेति त्रिसूत्र्युक्त एवार्थोऽग्रे विशेषाकारेण बोधनीय इत्यर्थः । तमेव वैशेषिकं बोधयितुं प्रकारमाहुः *तत्र ब्रह्मणीत्यादि* । अत्राध्यायार्थक्रमनियमे तत्तदुपजीव्योपजीवकभावं हेतुत्वेनाहुः * तत्र स्वरूप इत्यादि * । तथाचैवं चतुर्द्धा विचारः शास्त्रार्थः । तच्चतुर्विधविचारस्तत्तदध्यायार्थ इत्यर्थः । प्रथमाध्यायस्य विशेषाकारेणार्थमाहुः * तत्र प्रथम इति * । * निःसन्दिग्धानीति * सत्यं ज्ञानमनन्तं ब्रह्म विज्ञानमानन्दं ब्रह्मेत्यादीनि । * न वक्तव्य इति * निर्णयस्य सन्देहनिरासार्थत्वात् तेषु च तस्याभावान्न वक्तव्यः । तथाच स्वरूपनिरूपकत्वेऽपि सन्देहाजनकत्वादेव तद्विचारो व्यासेन न क्रियत इत्यर्थः । पादसंख्यायां हेतुभूतां विधामाहुः * सन्दिग्धानीत्यादि* । प्रथमपादार्थमाहुः * तत्रेत्यादि * । निर्णेतव्यानां वाक्यानां विधां वदन्ति ।

पादकान्युपास्यरूपप्रतिपादकानि प्रकीर्णकानि चेति । तत्र प्रथमपादे कार्यवाक्यानां निर्णय उच्यते । सच्चिदानन्दरूपेणाकाशवायुतेजोवाचकवाक्यानि षड्विधान्यपि निर्णीयन्ते । अन्यत्रान्यवाचकान्यपि वेदान्तेषु भगवद्वाचकानीति ।

सच्चिदित्यादि सच्चिदानन्दरूपेण कारणं निर्दिश्य कार्यप्रतिपादकानि, आकाशवायुतेजोवाचकशब्देन कारणं निर्दिश्य कार्यप्रतिपादकानीत्येवं षड्विधान्याद्ये पादे निर्णीयन्त इत्यर्थः । नन्वन्यवाचकैः शब्दैः कुतो निर्देश इतिशङ्कानिरासायाहुः * अन्यत्रेत्यादि * तथाच तेषां नैसर्गिकशक्तिबोधनेन भूताकाशादिषु ब्रह्मलक्षणस्यातिव्याप्तिपरिहारायैवं निर्देश इति बोधयितुमयं निर्णय इत्यर्थः । एवमुपोद्घातेनार्थकथनादि बोधितम् । विचारस्य शास्त्रार्थत्वाज्जिज्ञासासूत्रस्य सर्वत्र विषयविषयिभाव. सङ्गतिः । शास्त्रस्याध्यायेषु तेषां स्वपादादिषु पादानां स्वावयवेषु सामान्यविशेषभावः । अधिकरणानां परस्परमन्यान्या एव सङ्गतय उन्नेया इति । सङ्गतिस्त्वनन्तराभिधानप्रयोजिकाकाङ्क्षाजनकज्ञानविषयोऽर्थः । इदं वाक्यमेतद्वाक्यानन्तरं कस्मादुक्तमीदृशी या जिज्ञासा सा अनन्तराभिधानप्रयोजकाकाङ्क्षा । तज्जनकं तत्स्वरूपयोगि यज्ज्ञानं तत्र विषयत्वेन योऽर्थः प्रकाशते सोऽर्थः सङ्गतिशब्दवाच्यः । तद्भेदाश्च षट् । 'सप्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा । निर्वाहकैककार्यत्वे षोढा सङ्गतिरिष्यते' इत्यभियुक्तोक्तेः । तत्र स्मृतस्योपेक्षानर्हत्वं प्रसङ्गः । प्रकृतार्थसाधकत्वमुपोद्घातः । उपजीव्योपजीवकभावो हेतुता । सा सापेक्षत्वादुभयसंग्राहिका । अप्रतिबन्धकीभूतजिज्ञासानिवृत्तावश्यवक्तव्यत्वमवसरः । निर्वाहप्रयोजकता निर्वाहकत्वम् । एकजातीयकार्यजनकत्वमेककार्यत्वम् । इदं च सङ्गत्यभिधानमात्रोपयोगित्वात् स्वरूपकथनमात्रम् । लक्षण तु प्रसङ्गाद्यन्यतमत्वमेव । तेन पूर्वस्येष्टसाधनत्वाधाराधेयभावादावव्याप्तावपि न दोष इति नैयायिका आहुः ॥ यत्तु, सावधानपुरुषप्रयुज्यमानवाक्यप्रयोजकत्वेन

तत्र लक्षणविचार एव सद्रूपाणां वाचकता निर्णीता । चिद्रूपस्य ज्ञानप्रधानस्य निर्णयार्थमीक्षत्यधिकरणमारभ्यते सप्तभिः सूत्रैः । सप्तद्वारत्वाज्ज्ञानस्य । तत्रैवं सन्देहः । ब्रह्मणः स्वप्रकाशत्वेन सर्वप्रमाणाविषयत्वाद् यतो वाचो निवर्तन्त इति श्रुतेश्च विचारः कर्तुं न शक्यते । स्वप्रकाशत्वविरोधात् । श्रुतिविरोधाच्च । आहोस्विद् विरोधपरिहारेण शक्यत इति ।

किं तावत् प्राप्तम् । न शक्यत इति । कुतः ।

स्मृतस्योपेक्षानर्हत्वमेव सङ्गतिः । हेतुतादयः सर्वे उपेक्षानर्हत्वस्यैव प्रयोजका धर्मास्ते तद्बोधकतया सङ्गतित्वेनोच्यन्ते । तत्रैतत्तानियामकस्यास्मद्दर्शनेऽनुक्तत्वादन्येषामपि संग्रहो न दुष्ट इति रोचयामहे । तत्र जन्माद्यधिकरणे जगदुत्पत्त्यादिरूपसदात्मककार्यनिरूपणेन सामान्यतः कारणतया विशेषतः कर्तृतया च स्वरूपं निरूपितम् । समन्वयाधिकरणे च सर्वत्र ब्रह्मणः सर्वानुगतत्वादुपादानतया विशेषतस्तन्निरूपितम् । तत्र यत् सामान्यतः सिद्धं तदनुवदन्ति * तत्रेत्यादि * उक्तविधेषु वाक्येषु पूर्वसूत्राभ्यां कृते लक्षणविचार एव सद् रूप्यते यैस्तेषां सदेव सौम्येदमग्र आसीदित्यादिवाक्यगतानां पदानां ब्रह्मवाचकता निर्णीता । कार्यस्य सदात्मकत्वेन तत्कारणभूतं ब्रह्मैव सच्छब्दैर्वाक्येषूच्यत इति निर्णयः कृत इत्यर्थः । अतः परमग्रिमाधिकरणप्रयोजनमाहुः * चिद्रूपस्येत्यादि * । निर्णयप्रयोजनमग्रिमसूत्रे स्फुटीभविष्यति । * सप्तद्वारत्वादिति * पञ्च चक्षुरादीनि मनो जीवश्चेत्येवं सप्तद्वारत्वात् । तथा चान्यत्र गुणवाचका अपि ज्ञानादिशब्दा वेदान्तवाक्यविशेषेषु ब्रह्मवाचका इति बोधनाय सप्तसूत्राणीत्यर्थः । संशयस्याकारमाहुः * तत्रैवमित्यादि * । * स्वप्रकाशत्वेनेति * तमेव भान्तमनुभाति विश्वमिति श्रुत्या स्वप्रकाशत्वेन । * स्वप्रकाशत्वविरोधादिति * प्रमाणविषयत्वे तज्ज्ञानस्य प्रमाणतन्त्रत्वेन स्वप्रकाशत्वाभावेन तद्विरोधात् । * श्रुतिविरोधादिति * विचारस्य मनोवाग्विषयत्व एव सम्भवेनोक्तश्रुतिविरोधात् ।

ज्ञापनार्थं प्रमाणानि सन्निकर्षादिमार्गतः ।
सर्वथाऽविषयेऽवाच्येऽव्यवहार्ये कुतः प्रमा ॥

ऐहिकामुष्मिकव्यवहारयोग्ये हि पुरुषप्रवृत्तिः । प्रवृत्त्यर्थं हि प्रमाणानि । ब्रह्म पुनः सर्वव्यवहारातीतमिति । नन्वेतदपि वेदादेवावगम्यत इति चेत् तर्हि बाधितार्थप्रतिपादकत्वान्न वेदान्ता विचारयितव्या इति प्राप्ते । उच्यते ।

विधिकोटिस्तु स्फुटैव । पूर्वपक्षयुक्तिं गृह्णन्ति *ज्ञापनार्थमित्यादि* । *सन्निकर्षादिमार्गत इति* आदिपदेन सहकारीणि । मार्ग उपायः । *सर्वथाऽविषय इति* स्वप्रकाशत्वेन मनोनिवृत्तिश्रुत्या च सर्वप्रमाणाविषये । *अवाच्य इति* वाङ्निवृत्तिश्रुत्या सत्यज्ञानादिपदैरपि लक्षणयावाच्ये । अव्यवहार्यत्वं विभजन्ते । *ऐहिकेत्यादि* व्यवहारो नाम मनोवागिन्द्रियप्राणजन्यपुरुषप्रवृत्तिरूपो व्यापारः । *सर्वव्यवहारातीतमिति* लौकिकवैदिकव्यापारानर्हम् । *एतदिति* अविषयत्वादिकम् । *वेदादिति* न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनो न विद्मो न विजानीमो यथैतदनुशिष्यात् । अन्यदेव तद्विदितादथो अविदितादधीत्यादिरूपात् । अयमर्थः । प्रमाणैर्हि द्रव्यगुणक्रियादिरूपाः पदार्था लौकिकालौकिकसन्निकर्षेण यथार्हं प्रमीयन्ते । ब्रह्म त्वस्थूलादिवाक्यैरतद्रूपत्वादसङ्गत्वेनासन्निकृष्टत्वाच्च सर्वप्रमाणाविषयम् । अतद्रूपत्वादेव च नामाख्यातनिपातोपसर्गरूपचतुर्विधपदजातप्रतिपाद्यतया अवाच्यम् । अवाच्यत्वादेव वैदिकव्यवहारादप्यतीतम् । तदेतत्सर्वमभिप्रेत्य, यतो वाच इत्यादयस्ततो वागादीनां निवृत्तिं तस्य विदिताविदितान्यत्वं च श्रावयन्तीत्यतस्तदविचार्यम् । तस्याविचार्यत्वादेव तत्प्रमितिफला वेदान्ता अप्यविचार्याः । अथ ब्रह्मण एवंरूपतापि वेदादेवावगम्यत इति तस्याप्रमेयत्वज्ञानायैव विचार्या वेदान्ता इति विभाव्यते, तदा तु स्वव्यापारेण तत्समर्पयन्तस्तस्य तथात्वं बोधयन्तीति, मम माता वन्ध्येतिवाक्यवद् बाधितार्थप्रतिपादकत्वादेवाविचार्या इति । एवं पू-

ईक्षतेर्नाशब्दम् ॥ ४ ॥

न विद्यते शब्दो यस्येत्यशब्दं सर्ववेदान्ताप्रतिपाद्यं ब्रह्म न भवति । कुतः । ईक्षतेः । सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति । तत्तेजोऽसृजत । तथाऽन्यत्र । आत्मा वा इदमेक एवाग्र आसीत् । नान्यत् किञ्चन मिषत् । स ऐक्षत लोकान्नुसृजा इति । स इमाँल्लोकानसृजतेति । स ईक्षाञ्चक्रे । स प्राणमसृजतेत्येवमादिषु सृष्टिवाक्येषु ब्रह्मण ईक्षा प्रतीयते ।

वैपक्षमुपकथ्य सिद्धान्तं वक्तुं सूत्रं पठन्ति ।

* ईक्षतेर्नाशब्दम् * ।

व्याकुर्वन्ति * नेत्यादि * । ननु ब्रह्मणो वेदान्तवाक्यात्मकशब्दप्रतिपाद्यत्वे ईक्षतिधातुनिर्देशस्य कथं हेतुत्वमित्याकाङ्क्षायां विषयवाक्यान्युदाहरन्ति * सदेवेत्यादि * । अत्र प्रथमं वाक्यं छान्दोग्यस्थम् । द्वितीयमाश्वलायननामैतरेयोपनिषत्स्थम् । तृतीयं प्रश्नोपनिषदः षष्ठप्रश्नस्थम् । * मिषदिति * व्यापारं कुर्वत् । आदिपदेनाविसृष्टिविषयकेक्षणघटितानां, ब्रह्म वा इदमग्र आसीत् स्वयम्भ्वेकमेव तदैक्षत महद्वै यक्षं तदेकमेवास्मि हन्ताहं मदेव मन्मात्रं द्वितीयं तदेव निर्मम इत्यादीनां संग्रहः । तथाच, न केवलमीक्षतिर्ब्रह्मणो वेदान्तशब्दप्रतिपाद्यत्वे हेतुभूतः, किन्तु वाक्यगतः । तेन च स्वार्थप्रत्यायने वाक्येषु ब्रह्मकर्तृकेक्षा प्रतीयते । ईक्षा च पर्यालोचनम् एवं करिष्यामीत्यध्यवसायः । सोऽवैतादृश इति कार्यबलादुन्नीयते । अत एतादृशेक्षायोधकेनेक्षतिना यत्रैवं पूर्वमव्यवहार्यत्वेऽपि पश्चाद् व्यवहार्यत्वेन प्रतिपाद्यत्वाभावस्तत्र तत्रैवमीक्षणकर्तृत्वेन प्रतिपाद्यताभाव इति व्याप्तिर्बोध्यत इतीक्षतेर्हेतुत्वमित्यर्थः । एवं सर्वत्र हेतुबोधनप्रकारो बोध्यः । ननु प्रतीयता-

किमतो यद्येवम् । एवमेतत् स्यात् । सर्वव्यवहारप्रमाणातीतोऽपि ईक्षाञ्चक्रे लोकसृष्टिद्वारा व्यवहार्यो भविष्यामीति । अतो यथा यथा कृतवाँस्तथा तथा स्वयमेवोक्तवान् । पूर्वरूपं फलरूपं च सृष्टत्वांशपुरुषार्थत्वाय । ततश्च प्रमाणबलेनाविषयः, स्वेच्छया विषयश्चेत्युक्तम् ।

ननु सर्वप्रमाणाविषयत्वे दूषिते केवलवेदविषयत्वं कथं सिद्धान्तीक्रियते । उच्यते । चक्षुरादीनां प्रामाण्यमन्यमुखनिरीक्षकत्वेन, न स्वतः । भ्रमानुत्पत्तिप्रसङ्गात् । सत्त्वसहितानामेव

मीक्षा, तावता पूर्वोक्तविरोधस्य कथं परिहार इति पृच्छति * किमतो यद्येवमिति * । *समाधत्ते *एवमित्यादि* तथाच ब्रह्मणः पूर्वोक्तरूपत्वस्येक्षायाश्च श्रुतिसिद्धत्वाच्छ्रौतत्वेनैकतरबाधस्याप्यनुचितत्वात् विरुद्धधर्माधारत्वस्य ब्रह्मणि भूषणत्वात् तस्याप्यन्यदेव तद्विदितादथो अविदितात्, तदेजति तन्नैजतीत्यादिश्रुतिसिद्धत्वादभिन्ननिमित्तोपादानवादमुपगच्छता तस्याप्यङ्गीकाराच्चेवमीक्षाकारासिद्धौ सुखेन सिद्ध्यति विरोधपरिहारे ब्रह्मणो विचार्यत्वस्यापि सिद्धिस्तादृशब्रह्मकृतिबोधकत्वेन वेदान्तानामप्यबाधितार्थत्वात् तेषामपि विचार्यत्वसिद्धिरित्यर्थः । एवं करणकथनयोः प्रयोजनमाहु: *पूर्वमित्यादि* । स्वांशा जीवास्तदुपयोगिपुरुषार्थत्वं तेजःप्रभृतीनां सर्वाश्चिनीच्छया पूर्वं प्रथमतो रूपं प्रजादिशब्दवाच्यं शरीरं फलरूपं लोकादिकं च सृष्टम् । तथाचैतेषां पुरुषार्थत्वेन जीवाशास्यत्वाधेयं कृत्वा तत्कर्तृतया फलदातृतया च स्वस्य व्यवहार्यत्वं च कृतवानिति तत्सम्पादनं प्रयोजनमित्यर्थः । तेन सिद्धमाहुः * तत इत्यादि * ।

अत्र प्रत्यवतिष्ठते * नन्वित्यादि * । * केवलवेदविषयत्वं कथमिति * सर्वप्रमाणानां तुल्यत्वेनाविशेषात् केवलवेदवेद्यत्वं ब्रह्मणः कथोपपत्स्येरत्यर्थः । अत्र समाधातुमुपपत्तिमाहुः * उच्यत इत्यादि * । न हि प्रमाणानां प्रामाण्यं तुल्यम् । तथा सति शुक्तिरज-

चक्षुरादीनां प्रामाण्यात् । अतो निरपेक्षा एव भगवन्निःश्वासरूपवेदा एव प्रमाणम् । सङ्केतग्रहस्तु वैदिक एव वेदविद्भिः कृतः ।

तादिविपर्ययकश्चाक्षुषभ्रमो न स्यात् । हेतुषु चाभासता न स्यात् । शब्देषु च वाक्यप्रामाण्यविभागो न स्यात् । अतश्चक्षुरादिमनोऽन्तानां तदुपजीविनां च प्रामाण्यं न स्वतः, किन्तु परमुखनिरीक्षकत्वेनान्याधीनम् । यदधीनं तत् सत् । सत्त्वगुण एव प्रकाशकत्वात् । तत्सहितानामेव तेषां प्रमाण्यात् । तस्य यदा गुणान्तरेणोपमर्दस्तदानुग्राहकाभावेन तेषां नैर्बल्यादप्रामाण्यमेव । सत्त्वशुद्धिस्तु वेदोदितयथावस्थितसाधनैरेवेति तेषां सर्वेषां सुदूरवर्तिनोऽपि वेदस्यैव स्वसार्थकत्वार्थमपेक्षा । वेदस्य तु न कथमपि तदपेक्षा । जैमिनीयादिनये तस्यापौरुषेयत्वात् । काणादादिनये चेश्वरजन्यत्वात् । अतोऽन्यनिरपेक्षा वेदान्तनये भगवन्निःश्वासरूपत्वेनैव सिद्धा आस्तिकमात्रमते अविप्रतिपन्ना वेदा एव प्रमाणम् । अतः सर्वप्रमाणाविषयत्वेऽपि सर्वनिरपेक्षत्वाद्भगवन्निःश्वासरूपत्वात् सर्वास्तिकोपजीव्यत्वाच्च वैदिकविषयत्वं सिद्धान्तीक्रियते । तथा चैषा युक्तिरित्यर्थः । नन्वेवंरूपत्वेऽपि वेदस्य न सर्वनिरपेक्षत्वम् । शब्दत्वात् । शब्दस्य बोधकतायाः पदपदार्थसम्बन्धग्रहाधीनत्वात् तद्ग्रहस्य च प्रयोजकप्रयोज्यव्यवहाराधीनत्वात्, वस्तुतस्तु ब्रह्मणोऽव्यवहार्यत्वेन तत्र सम्बन्धग्रहस्य दौर्घट्याद् बोधकताया अभावेन वेदविषयत्वसाधनमप्यनर्थकमेवेत्याशङ्कायामाहुः *सङ्केतेत्यादि* । नैवमबोधकत्वं सापेक्षत्वं वा शङ्कनीयम् । यतः सदेवेत्यादिसन्दर्भ एव तेजःप्रभृतिसृष्ट्युत्तरमेव श्रूयते । तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्त्याण्डजं जीवजमुद्भिज्जमिति । सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति । नहि तदानीं वैदिक्या इतरा कापि सृष्टिर्वा वेदविद्भ्य इतरे पुरुषा, न वा भगवतोऽन्यः कश्चिच्छिक्षक इति प्रथमतः सङ्केतग्रहो वैदिक एव प्रपञ्चे वेदविद्भिर्भगवच्छिक्षया वा भगवद्दत्तमनीषया वा भगवदिच्छामात्रेणैव वा कृत इति तथा गृ-

आकृतिमात्रार्थं लोकापेक्षा । अनधिगतार्थगन्तृ च प्रमाणं, लोकानधिगत इत्यर्थः । यज्ञब्रह्मणोरलौकिकत्वं सिद्धमेव ।

हीतसम्बन्धस्य वेदस्य नाबोधकत्वं, न वा लौकिकसापेक्षत्वमित्यर्थः । एवमेव पुरुषसूक्तेऽपि सहस्रशीर्ष्णो महापुरुषाद्विराजस्तन्मध्यगानां च सृष्ट्यादिकं श्रावयित्वा, 'वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचिन्त्य धीरो नामानि कृत्वाभिवदन् यदास्ते' इत्यादि मन्त्रत्रयं पठ्यते । तत्रास्मिन् मन्त्रे हेतुः पूर्वपक्षनिरासे । अस्मिन् प्रपञ्चेऽनादित्वपरमाणुजन्यत्वगुणजन्यत्वादिशङ्का महति पुरुषे च शबलत्वादिशङ्का न कार्या । तत्र हेतुः, 'तमसः पारे' इति । अस्य पदद्वयस्य महापुरुषे सर्वेषु रूपेषु च देहलीदीपन्यायेन सम्बन्धः । यदास्ते इति यत्पदं हेतुबोधकम् । तेनास्मिन् मन्त्रे छान्दोग्यवदेव सर्वं सृष्टिस्वरूपमभिवदितृत्वेन भगवत एव शिक्षकत्वं च बोधितम् । ततो द्वितीये, 'धाता पुरस्ताद् यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते' इति मन्त्रे धातुः प्रथमं तद्बोद्धृतया तत्प्रवक्तृत्वं शक्रस्य दिशां देवतानां श्रोतृत्वं चोक्त्वा उत्तरार्द्धे केवलस्यैव सर्वकर्तृत्वेन सर्वात्मकत्वेन वेदनं तस्य फलमाह । ततस्तृतीये, 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवा' इतिमन्त्रे तादृशे यज्ञे सिद्धानामेव धर्माणां प्राथम्यं तत्फलं चाह । तेनापि पूर्वोक्त एवार्थः सिद्धः । एतदेव श्रीभागवतद्वितीयस्कन्ध उपबृंहितम् । 'यदास्य नाभ्यान्नलिनादहमासं महात्मनः । नाविदं यज्ञसम्भारान् पुरुषावयवादृते । तेषु यज्ञस्य पशवः सवनस्पतयः कुशाः' इत्यारभ्य, 'तमेव यज्ञपुरुषं तेनैवायजमीश्वरम्' इत्यन्तेन । अतो वेदैकसमधिगम्यत्वसाधनं नानर्थकमिति । ननु भवत्वेवं तदानीन्तनानां, तावतेदानीन्तनानां कथं सङ्केतग्रह उपायाभावात् । तथा सतीदानीं तु स दोषस्तदवस्थ इत्यत आहुः * आकृतीत्यादि * । * आकृतिमात्रार्थमिति * आकृत्यवधारणार्थम् * सिद्धमेवेति * एवमतेऽपि सिद्धमेव । तथाच यथा दा-

लौकिको व्यवहारः सन्निपातरूपत्वात् पुरुषार्थासाधक एव । तर्हि

एवमार्तिकाद्युपकरणे गृहीतसङ्केताः सौवर्णेऽपि तस्मिंस्तया आकृत्या सङ्केतमवधारयन्ति, तथाप्तवाक्याद् यादृशो लौकिकस्तादृशे वैदिकेऽपि प्रपञ्चे सङ्केतमवधारयिष्यन्तीति बोधनार्थं, यथा सौम्यैकेन मृत्पिण्डेनेत्यादीनां लौकिकदृष्टान्तानां श्रुतावप्यादरणादिति लौकिकानां पुरुषाणामेव परापेक्षत्वं, न वेदस्य । यदि चैवमपि सापेक्षत्वमेवेति विभाव्यते तदा तु धर्मब्रह्मणोरपि बोधने लोकप्रसिद्धपदादिसमभिव्याहारसापेक्षत्वादनपेक्षतायै तिलाञ्जलिरेव प्रदीयताम् । तथाऽनधिगतार्थगन्तृत्वस्यापि प्रसिद्धपदसमभिव्याहारशून्यतायामबोधकताया एवापत्तेर्धर्मोऽपि न बुद्ध्येतैव । तथा निषेधावधिभूतब्रह्मस्वरूपमपि लोकप्रसिद्धमर्थमेव निषिद्ध्य बोध्यत इत्यस्ति तद्बोधनेऽपि लोकापेक्षेति तदभावे तदपि न बुद्ध्येत । अथ तत्र प्रसिद्धान्यपि पदादीनि वैदिकान्येवेति न दोष इति चेत्, तर्ह्यत्रापि व्यवहारं वैदिकमेवानुसन्धत्स्व । इदानीं विप्लूयमानेऽपि तस्मिन् भगवता, 'मां विधत्तेऽभिधत्ते मां विकल्प्यापोह्यते ह्यहम् । एतावान् सर्ववेदार्थः शब्द आस्थाय मां भिदाम् । मायामात्रमनूद्यान्ते प्रतिषिद्ध्य प्रसीदतीति' श्रीभागवते कथनात् । अतो धर्मब्रह्मबोधन इव वैदिकप्रपञ्चबोधने आकृतिमात्रार्थं लोकापेक्षायामपि न दोष इत्यर्थः । तदेतदुक्तं, * सिद्धमेवेत्यन्तेन । नन्वेवं लौकिकव्यवहारादरे को दोष इत्यत आहुः * लौकिक इत्यादि * एकादशस्कन्धे, 'सन्निपातस्त्वहमिति ममेत्युद्धव या मतिः । व्यवहारः सन्निपातो मनोमात्रेन्द्रियासुभिरिति भगवता प्राकृतगुणान् प्रकृत्य मनआदिव्यवहारस्य सन्निपातत्वकथनाल्लौकिकव्यवहारस्य सन्निपातकार्यत्वेनाऽप्रामाणिकत्वात् पुरुषार्थासाधक इत्यतो नाद्रियत इत्यर्थः । एवं ब्रह्मणो वैदिकव्यवहारविषयत्वमसहमानश्चोदयति * तर्हीत्यादि * यदि सूत्रकृत एवं ब्रह्मणो वैदिकव्यवहारविषयत्वमभिप्रेतं स्यात् तर्हि शब्दमात्रस्य नाशब्दमित्यनेन कथं ग्रहणं कुर्यात् । नावेदं, नावेदान्तमित्येव वदेत् । अतो नायं सूत्रार्थ इत्यर्थः । अत्र समादध-

शब्दमात्रस्य कथं ग्रहणम्। वेदव्याख्यातृत्वाविषयत्वादिति ब्रूमः।

ते * वेदेत्यादि * अस्य महतो भूतस्य निःश्वसितमेतद् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानीति मैत्रेयीब्राह्मणे श्रावणाद् वेदव्याख्यातृवाचामपि तथात्वेन ग्रहणात्तद्विषयत्वमपि सूत्रकृतोऽभिप्रेतमित्यतः शब्दशब्दग्रहणमिति ब्रूमः। तथाचैवमभिप्रेतत्वादयमेव सूत्रार्थो, नान्यः। सांख्यनिराकरणस्याग्रे आनुमानिकाधिकरणे करिष्यमाणत्वेनात्र तत्प्रयोजनाभावात्। अतो गृहप्रविष्टचौरतुल्यस्य मिथ्यावादिन एव निराकरणायेदं सूत्रमित्यर्थः। नन्वेवं सति सूत्रव्याख्यानत्वादीनां सूत्रान्तरादिष्वपि सत्त्वाद् व्याख्यानादिकमपि कुतो न संगृह्यत इति चेद्, उच्यते। 'किं विधत्ते किमाचष्टे किमनूद्य विकल्पयेत्। इत्यस्या हृदयं लोके नान्यो मद्वेद कश्चनेत्येकादशस्कन्धे वेदान्तकृद्वेदविदेव चाहमिति गीतायां च भगवद्वाक्याद् यथावस्थितवेदवेत्ता भगवानेव। स तु, मां विधत्त इत्यादि, वेदैश्च सर्वैरहमेव वेद्य इति च वक्ति। यथा 'वदन्ति कृष्ण श्रेयांसि बहूनि ब्रह्मवादिनः। तेषां विकल्पप्राधान्यमुताहो एकमुख्यता' इत्युद्धवप्रश्ने, 'कालेन नष्टा प्रलये वाणीयं वेदसंज्ञिता। मयादौ ब्रह्मणे प्रोक्ता धर्मो यस्यां मदात्मकः। तेन प्रोक्ता च पुत्राय मनवे पूर्वजाय सा। ततो भृग्वादयोऽगृह्णन् सप्तब्रह्ममहर्षयः। तेभ्यः पितृभ्यस्तत्पुत्रा देवदानवगुह्यकाः। मनुष्याः सिद्धगन्धर्वाः सविद्याधरचारणाः। किन्देवाः किन्नरा नागा रक्षःकिंपुरुषादयः। बह्व्यस्तेषां प्रकृतयो रजःसत्त्वतमोभुवः। याभिर्भूतानि भिद्यन्ते भूतानां मतयस्तथा। यथाप्रकृति सर्वेषां चित्रा वाचः स्रवन्ति हि। एवं प्रकृतिवैचित्र्याद्भिद्यन्ते मतयो नृणाम्। पारम्पर्येण केषाञ्चित् पाषण्डमतयोऽपरे। मन्मायामोहितधियः पुरुषाः पुरुषर्षभ। श्रेयो वदन्त्यनैकान्त्याद् यथाकर्म यथारुचि' इत्याद्याह। अत्राऽगृह्णन्नित्यस्य किम्पुरुषादय इत्यन्तं पृथक्सम्बन्धः। बह्वीनां प्रकृतीनां भिन्नवाङ्निर्गमहेतुत्वम्।

एतेन मनसैवानुद्रष्टव्यमित्यपि समर्थितम् । तस्मात् सृष्ट्यादिप्रतिपादका अपि वेदान्ताः साक्षाद् ब्रह्मप्रतिपादका इति सिद्धम् ॥ ४ ॥

स्यादेतत् । कर्तृत्वमकर्तृत्वं च वेदे प्रतीयते ब्रह्मणः । यतो वा इमानि भूतानि जायन्ते, स आत्मानं स्वयमकुरुत, निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्, असङ्गो ह्ययं पुरुष इत्येवमादिवाक्येषु । तत्र द्वेधा निर्णयः सम्भवति । सर्वभवनसमर्थत्वाद्विरुद्धसर्वधर्माश्रयत्वेन, अन्यतरबाधाद्वा । अलौकिकापेक्षया लौकिकस्य जघन्यत्वात् कर्तृत्वादेर्लोकसिद्धत्वात् कर्तृत्वबाध एव युक्तः । ईक्षत्यादिकं तु प्रकृतिगुणसम्बन्धादपि ब्रह्मणो युज्यते । तस्मादलौकिकसर्वभवनसमर्थत्वादिकल्पनापेक्षया

शेषन्तु स्फुटमेव । तेन भगवदुक्तिविरुद्धस्य वेदव्याख्यानत्वप्रतीतावपि तस्य व्याख्यानत्वाभाव एव सिद्ध इति तत्र संगृह्णन् इत्यर्थः इति । एवं शब्दशब्दोक्तिं साधयित्वा तेन सिद्धमाहुः * एतेनेत्यादि * एवं वैदिकशब्दप्रतिपाद्यत्वसमर्थनेन मनसैवानुद्रष्टव्यमिति सिद्धं कामविवर्जितविशुद्धमनसानुद्रष्टव्यमिति समर्थितम् । अपिशब्दात्, कश्चिद्धीरः प्रत्यगात्मानमैक्षदित्यादीनामपि संग्रहः । एवं व्यवस्थया विरोधपरिहारेण ब्रह्मणः सर्वप्रमाणाविषयत्वतद्विषयत्वयोः समर्थनेन यत् सिद्धं तदधिगमयन्ति * तस्मादित्यादि * एवं ब्रह्मणोऽलौकिकप्रमाणगम्यत्वाद्वेदान्तानां ब्रह्मप्रतिपादकत्वेन विचारणीयत्वं सिद्धमित्यर्थः ॥ ४ ॥

अतः परं, गौणश्चेन्नात्मशब्दादिति द्वितीयं सूत्रमवतारयन्ति * स्यादेतदित्यादि * । * कर्तृत्वमकर्तृत्वं चेति * चकारादुपादानत्वमनुपादानत्वं च । अत्र पूर्वश्रुतौ हेतुत्वमात्रं प्रतीयते । तत्प्रकारान्तरेणापि सम्भवतीत्यतो द्वितीयश्रुत्युपन्यासः । तत्र कर्तृत्वं स्फुटमिति तद्विरुद्धं निष्क्रियत्वं शान्तत्वं च । तृतीयश्रुतौ । तथैवो-

लौकिक एवान्यतरबाधो युक्तः । ततश्च सत्यस्वरूपादन्यदेवैतदिति स्वयमेवाशङ्क्य परिहरति सूत्रकारः ।

गौणश्चेन्नात्मशब्दात् ॥ ५ ॥

ईक्षत्यादिगुणयुक्तः परमात्मा गौणः प्रकृतिगुणसत्त्वसम्बन्धवानिति चेन्न तथात्वं वक्तुं शक्यते । कुतः । आत्मशब्दात् । आत्मा वा इदमेक एवाग्र आसीदित्युपक्रम्य, स ऐक्षतेत्युक्तम् । आत्मशब्दः पुनः सर्वेषु वेदान्तेषु निर्गुणपरब्रह्मवाचकत्वेनैव सिद्धः । तस्यैव जगत्कर्तृत्वं श्रुतिराह । ननु चोक्तमन्यतरबाधो युक्त इति । न युक्तः । स्वातन्त्र्याभावेन सगुणस्य कर्तृत्वायोगात् । वेदाश्च प्रमाणभूताः । ततः सर्वभवनसामर्थ्यमेव श्रुतिबलसम्भवमङ्गीकर्तव्यम् ।

पादनत्वविरुद्धं निष्कलत्वं निरवद्यत्वं च । चतुर्थ्यामसङ्ग इत्यनेनासक्तेः ससर्गस्य च निषेधः क्रियां विकारित्वं च विरुणद्धि । * युक्त इति * उत्पत्तिशिरोत्पत्तिशिरएन्यायेनोपजीव्योपजीवकभावेन च युद्धाधारो ह्ययुक्तः । * एतदिति * शबलं स्वरूपम् ।

अयुक्तत्वे हेतुमाहुः * स्वातन्त्र्याभावेनेत्यादि * कारकमात्रस्य स्वव्यापारं प्रति स्वातन्त्र्ये सत्यपि यत् कर्तृलक्षणतया स्वातन्त्र्यस्य कीर्तनं तत् कारकान्तरनियामकतयैवातो गुणानामुपादानत्वे वा करणत्वे वाऽप्यरूपं कर्तृनियम्यत्वैव युक्ता, न तु प्रयोजकता । तथा सति तेषामेव सृष्ट्यादिकार्ये स्वातन्त्र्येण ब्रह्मनियामकतया सगुणस्य स्वातन्त्र्याभावेन कर्तृत्वायोगादित्यर्थः । ननु गुणानां जडत्वेन चेतनाधीनत्वाच्च सगुणस्य स्वातन्त्र्यहानिरतो गुणासत्त्वनिश्चयेनैव कर्तृत्वं युक्तमित्यत आहुः * वेदाश्चेत्यादि * वानपेक्षत्वात्रिःश्वासरूपत्वाच्च वेदाः स्वतः प्रमाणभूताः । ते च, सदेव सौम्येदमग्र आसीद्, आत्मा वा इदमेक एवाग्र आसीदित्यादिषु

किञ्च । अस्तिभातिप्रियत्वादिधर्मवद् ब्रह्मगतकर्तृत्वं लोके प्रतीयते । कार्यत्वात् । तस्मादात्मशब्दप्रयोगाद् गुणातीतमेव कर्तृ ॥ ५ ॥

विशेष्यान्वितेनैवकारेणेतरयोगं व्यवच्छिन्दन्तस्तदानीं केवलस्य शुद्धस्यैवात्मनः कर्तृत्वमावेदयन्ति । नच कालवाचकाग्रपदेन तत्सत्ताया अपि बोधनादेवकारो नान्ययोगव्यवच्छेदक इति शङ्क्यम् । बोधनार्थमेव तथोक्तेः । कथमेतदिति चेदित्थम् । इयं हि श्रुतिः सर्वापेक्षया प्राथमिकं वृत्तान्तं वक्ति । तत्रैवकारेण तदितरयावद्व्यवच्छेदे भिन्नविषयप्रमाणान्तरस्यापि व्यवच्छिन्नत्वात् तस्याप्यभावेनाग्रपदे प्रमाणान्तरसिद्धकालानुवादकतया वक्तुमशक्यत्वेन, एतस्यैव वाक्यस्य कालसत्ताबोधकत्वे चात्मासीत कालोऽप्यासीदित्येवं वाक्यभेदप्रसङ्गेन कालसत्ताया अशक्यवचनत्वे केवलस्यात्मनोऽपि निरूपणमशक्यमिति वाक्यस्याबोधकत्वे प्रसक्ते सृष्ट्युत्तरव्यवहारानुसारेण सर्वाधारतया प्रतीयमानो यः कालस्तदुपरञ्जनेन पूर्ववृत्तान्तं वक्तीत्येवं बोधनार्थत्वं जानीहि । अत एव सृष्ट्युत्तरमपि केवलं ब्रह्मैवेति बोधनाय सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्येवं श्रुत्यन्तरेऽप्युच्यते । एवं तदानीमितराभावे गुणानां सत्ता तदानीं वक्तुं न शक्यत इति न सगुणः कर्ता । नचोत्पत्तिशिष्टन्यायस्योपजीव्यन्यायस्य वा प्रवृत्तिरत्र शङ्कनीया । विरुद्धधर्माधारत्वेन बाध्यबाधकभावाभावात् । ततः श्रुतिबललभ्यं, श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपेषु षट्सु प्रमाणेषु श्रुतिबलसिद्धं ब्रह्मणः सर्वभवनसामर्थ्यमेवाङ्गीकर्तव्यमित्यर्थः ।

ननु मास्त्वेवं कर्तृत्वादिबाधस्तथापि कर्तृत्वस्य लौकिकत्वं नापैतीति तत एव तद्बाधोऽस्त्वित्यत आहुः *किञ्चेत्यादि* । *प्रियत्वादी*त्यादिपदेनाऽपहतपाप्मत्वसङ्ग्रहः । तथाच ब्रह्मधर्मस्य कर्तृत्वस्य लोके प्रत्ययेन तस्य कार्यासाधारण्याभावान्न लौकिकत्वमिति न तत्प्रयुक्तोऽपि बाध इत्यर्थः । सिद्धमाहुः * तस्मादित्यादि * केनापि प्रकारेण बाधस्य वक्तुमशक्यत्वादात्मपदश्रुतिरूपमुख्यप्रमाणप्रमितत्वाच्च तथेत्यर्थः ॥ ५ ॥

नन्वात्मशब्दोऽपि लोकवद् गौणोऽस्तु । लोके हि केनचित् पृष्टो विष्णुमित्र आह, यन्नन्दनो ममात्मेति । अत्र गौणत्वमुपचार इत्येवं प्राप्तेऽभिधीयते ।

तन्निष्ठस्य मोक्षोपदेशात् ॥ ६ ॥

एवं हि श्रूयते । असद्वा इदमग्र आसीत्, ततो वै सदजायत, तदात्मानꣳ स्वयमकुरुतेत्युपक्रम्य, यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवतीति । प्रापञ्चिकधर्मरहिते ब्रह्मणि एतस्मिन् पूर्वोक्तजगत्कर्तरि परिनिष्ठितो मुक्तो भवतीत्यर्थः । तत्र यदि जगत्कर्ता गौणः स्यात् तन्निष्ठस्य संसार एव स्यान्न मोक्षः ॥६॥

एवं द्वितीयसूत्रं व्याख्याय, तन्निष्ठस्य मोक्षोपदेशादिति तृतीयसूत्रमवतारयन्ति * नन्वात्मेत्यादि * लोकवत्पदं विभजन्ते * लोके हीत्यादि *। तथाच मास्तु गुणसम्बन्धाद् गौणत्वमात्मनस्तथाप्यात्मपदश्रुतेर्मुख्यौपचारिकसाधारण्येन सन्दिग्धत्वान्नानया निर्णय इति पूर्वपक्षाशयः । अत्र सूत्रं पठित्वा समादधते *एवं हीत्यादि*। * असदिति * लौकिकविलक्षणमव्याकृतम् । * यदा ह्येवेत्यस्यार्थस्तु, यदा यस्मिन् काले, ह्येव निश्चयेनैव, एष साधक, एतस्मिन् पूर्वोक्ते ब्रह्मणि, अदृश्ये नामरूपशून्ये, अनात्म्ये आत्मन इदमात्म्यं शरीरं तद्रहितं, अनिरुक्ते विकारो हि विशेषवत्त्वान्निरुच्यते नत्वविकार इति विकारशून्यत्वाद् विदिताविदितात् परत्वेन निर्वक्तुमशक्यत्वाद्वा अनिरुक्ते, एवम्भूते ब्रह्मणि अभयं यथा स्यात् तथा प्रतिष्ठां स्थितिं विन्दते यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद् विजानातीत्येवंरूपां प्राप्नोति, अथ तदनन्तरमेव स साधकः, अभयं गतो मुक्तिं प्राप्तो भवतीति । तदाहुः * प्रापञ्चिकेत्यादि * सूत्रसिद्धं निर्णयमाहुः * तत्रेत्यादि * तथाचाहत्यां श्रुतावुपक्रमगतं कर्तृभूतं प्र-

किञ्च ।

हेयत्वावचनाच्च ॥ ७ ॥

इतोऽपि निर्गुण एव जगत्कर्ता । वेदान्तेषु सर्वत्र साधनोपदेशे पुत्रादिवज्जगत्कर्ता हेयत्वेन नोपदिश्यते । यदि सगुणः स्यात् प्राकृतगुणपरिहारार्थं मुमुक्षुभिर्जगत्कर्ता नोपास्यः स्यात् । पुत्रादिवत् । अत ईक्षणादयो न सगुणधर्माः । सूत्रत्रयस्य ईक्षतिहेतुसाधकत्वाच्चकारः । एवं सूत्रचतुष्टयेन ईक्षतिहेतुना जगत्कर्तृत्वोपपत्त्या सृष्टिवाक्यानां ब्रह्मपरत्वमुपपादितम् ॥ ७ ॥

अतः परं स्वतन्त्रहेतूनाह, स्वाप्ययाद्, गतिसामान्यात्, श्रुतत्वाच्चेति सूत्रत्रयेण ।

ननु किमर्थं हेत्वन्तराणि । साधकत्वे एकेनापि तत्सिद्धेः ।

ह्मैवेति तस्मिन्नित्यनेन परामृश्य तस्यैव प्रापञ्चिकधर्मराहित्यबोधनेन विरुद्धधर्माधारत्वं निगमयित्वा तादृशे तस्मिन् परिनिष्ठितस्य मुक्तिं वदन्ति । तथाऽन्यत्रापि, सदेव सौम्येदमित्यादिना कर्तृत्वादिविशिष्टं ब्रह्मोक्त्वा, आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य इति । अतस्तादृशब्रह्मनिष्ठस्य मोक्ष उपदिश्यत इति सृष्टिप्रकरणोक्तं फलमेव तत्रत्यात्मशब्दस्यौपचारिकत्वनिवर्तकं तात्पर्यलिङ्गत्वादिति सूत्राशय इत्यर्थः ॥ ६ ॥

आत्मशब्दस्यात्र गुणातीत एव कर्तरि तात्पर्यमिति बोधयन्तश्चतुर्थसूत्रमाहुः * किञ्च * । * हेयत्वावचनाच्चेत्यादि * । अर्थस्तु निगदव्याख्यातः । तथाचात्रोपपत्तिरूपात् तात्पर्यलिङ्गादप्यात्मशब्दस्य गुणातीतवाचकत्वेन निर्णयादीक्षत्यादयो न सगुणधर्मा इत्यर्थः । शेषं स्फुटम् ॥ ७ ॥

अग्रिमसूत्राण्यवतारयन्ति * अतः परमित्यादि * । * स्वतन्त्रहेतूनिति * वेदान्तवाक्यानां ब्रह्मपरत्वप्रतिपादने प्रत्येकं समर्थान् हेतून् । एतेषां हेतूनां वैयर्थ्यमाशङ्क्य *नन्वित्यादि* । समादधते ।

असाधकत्वे शतेनाप्यसिद्धेरितिचेत् । नैवम् । रूपभेदार्थं हेत्वन्तराणि । नानाविधान्नभोजनतृप्तिवत् । तद्यथा आरम्भशब्दात्, तन्निष्ठस्य मोक्षोपदेशात्, हेयत्वावचनाच्चेति निर्गुणस्य स्वरूपपरतया कार्यपरतया च । कार्यस्य पुनर्विधिनिषेधभेदाद् द्विरूपतेति । एवमुत्तरत्रापि यथाश्रियते ।

तत्र सृष्टिवाक्यानामीक्षतिहेतुना भगवत्परत्वमुक्तम् । इदानीं प्रलयवाक्यानामाह ।

स्वाप्ययात् ॥ ८ ॥

ब्रह्मणो न सर्वव्यवहारातीतत्वम् । कुतः स्वाप्ययात् । स्वस्मिन्नप्ययात् । तत्र चित्प्रकरणत्वाज्जीवस्य चोच्यते । एवं हि श्रूयते । यत्रैतत् पुरुषः स्वपिति नाम सता सौम्य तदा सम्पन्नो भवति तस्मादेनं स्वपितीत्याचक्षते । स्वं ह्यपीतो भवतीति ।

---

* नैवमित्यादि । रूपभेदार्थमिति * ब्रह्मणो व्यवहार्यत्वे केवलं सृष्टिरेव न द्वारं, किन्तु द्वारान्तराण्यपि सन्ति तानि तत्तद्रूपनिश्चतानीति तेषां रूपाणां विशेषस्य ज्ञापनार्थम् । एवं तात्पर्योक्तौ गमकमाहुः * तद्यथेत्यादि * तथाच चतुःसूत्र्यामाद्येनेक्षतिं सामान्यत उक्त्वा द्वितीयो हेतुः स्वरूपपरतया ततोऽग्रिमौ द्वौ कार्यपरतया चेति हेतुत्रयमुक्तम् । तथाग्रे त्रिसूत्र्यामपि कार्यपरतयेत्यर्थः । कथं कार्यान्तरपरतेत्यत आहुः * कार्यस्येत्यादि * । * द्विरूपतेति * इति अस्माद्धेतोर्हेत्वन्तराण्युच्यन्त इत्यर्थः । एवमेवात्र तात्पर्यमित्यत्र गमकमाहुः * एवमित्यादि *

एवं सूत्रत्रयप्रयोजनमुक्त्वा पूर्वसङ्गतिज्ञापनाय तन्नोक्तमनुवदन्तः स्वाप्ययसूत्रमवतारयन्ति * तत्रेत्यादि * व्याकुर्वन्ति । * तत्र चिदित्यादि * । * उच्यत इति * लय उच्यते । *श्रूयत इति* छान्दोग्ये श्वेतकेतुव्याख्याने श्रूयते । श्रुतिं व्याकुर्वन्ति

स्वपितीति न क्रियापदं, किन्तु जीवस्य नाम । तथैव स्वपितीतिनामत्वं, यदा सता सम्पद्यते । सति स्वशब्दवाच्ये अपीति लयं प्राप्नोतीत्यर्थः । अहरहर्जीवो ब्रह्म सम्पद्य ततो बलाद्यधिष्ठानं प्राप्य पुनर्नैव इव समायाति । वासनाशेषात् । स्वशब्देन चाभेदः । अर्थतः सच्छब्दसामानाधिकरण्यान्निर्गुणत्वम् ।

ननु प्रलये वक्तव्ये कथं सुषुप्तिः । मोक्षातिरिक्तदशायां

स्वपितीति नेत्यादि तथाच सत्सम्पत्तिरहितस्वापदशायां तु स्वपितीति यत्र प्रयोगस्तत्रास्य क्रियापदत्वमेव । सत्सम्पत्तिदशायान्तु स्वशब्दस्यात्मवाचकत्वेन सति स्वशब्दवाच्य आत्मनि अपीति लयं प्राप्नोति । तदा तस्मिन् पितिर्लयो यस्यासौ स्वपितिः । पृषोदरादित्वादकारलोपे ईकारस्य विकृतौ च सत्यां स्वपितिनाम्नः सिद्धिः । वस्तुतस्तु केवलयौगिकत्वे नामत्वाभावाद् योगरूढोऽयं शब्द इत्यर्थः । एवम्प्रकारेण हेतुकथनस्य प्रयोजनमाहुः * अहरहरित्यादि * । अयमर्थः । सुषुप्तिस्तावद् द्विधेति, तदभावो नाडीष्वित्यत्र वक्तव्यम् । तथा छान्दोग्य एव श्रूयते । तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तोऽपि न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दत्यनृतेन प्रत्यूढा इति । तत्र नाड्यां दुःखाभावमात्रम् । ब्रह्मणि सुप्तौ तु तद्वा अस्यैतदतिच्छन्दोऽपहतपाप्माऽभयं रूपमशोकान्तरमिति बृहदारण्यके श्रवणाद् ब्रह्मसम्पत्त्या बलादिरूपं यदधिष्ठानं, करणे स्युट्, देहनियमनसाधनं तत् प्राप्य तथा समायातीति बोधनमेकम् । च पुनः स्वशब्द आत्मवाचकोऽत्र प्रयुक्तस्तेन पूर्वोपक्रान्तस्य सत आत्माऽभेदबोधनपरम् । किञ्चात्र विभक्त्यन्तरप्रयोगेण शब्दतः सामानाधिकरण्याभावेऽप्युपक्रमे सत एव निर्दिष्टत्वेनार्थतः सच्छब्दसामानाधिकरण्यात् सतो निर्गुणत्वबोधनं चेति तृतीयं प्रयोजनमिति । तथाचैवंप्रकारेण गुणातीतस्य प्रलयकारणतां बोधयितुमयं हेतुनिर्देश इति हृदयम् । अत्र सूत्रस्य विषयवाक्यस्य च विरोधमाशङ्कते * नन्वित्यादि * । समादधते * मोक्षेत्यादि * मोक्षातिरिक्तदशायां कर्मसम्बन्धे स-

तथा कर्मसम्बन्धाभावादिति ब्रूमः ॥ ८ ॥

मुक्तिवाक्यानामाह ।

गतिसामान्यात् ॥ ९ ॥

गतौ समान्यात् । गतिर्मोक्षः । समानस्य भावः सामान्यम् । मोक्षे सर्वस्यापि भगवता तुल्यत्वात् । एवं हि श्रूयते । यथा सर्वासामपां समुद्र एकायनमित्युपक्रम्य वागेकायनमिति दृष्टान्तार्थं निरूप्य, स यथा सैन्धवखिल्य उदके प्रास्त इत्यादिना लयदृष्टान्तं निरूप्य, न प्रेत्य संज्ञास्तीति प्रतिपाद्य

स्यापि यथा जाग्रत्स्वप्नयोः कर्मसम्बन्धस्तथा सुषुप्तौ प्रलये च नास्ति, किन्तु वासनामात्र इति प्रलयसाम्यात् तत्कथनमिति ब्रूम इत्यर्थः । एवञ्चात्र ब्रह्म न सर्वव्यवहारातीतं, सुषुप्तिप्रलययोर्जीवाधारत्वेन श्रुतत्वात्, यद् यदा यदाधारत्वेन श्रुतं तत् तदा तत्प्रयुक्तव्यवहारविषयमित्येवमनुमानं बोध्यम् । ततश्च यस्मिल्लयं याति पुरत्रयं चेत्यादौ जडलयाधारत्वेन श्रावणात् तत्प्रयुक्तव्यवहारविषयत्वादपि सर्वव्यवहारातीतत्वाभावः सेत्स्यति । तेनायं हेतुर्लक्षणवाक्यस्थस्य यत्प्रयन्तीति भागस्य समर्थनार्थं इतिबोधितम् । प्रलयवाक्यानां ब्रह्मणि समन्वये वक्तव्ये सुषुप्तिवाक्योदाहरणं सूत्रे ख्याप्ययपदसूचितव्यासाशयज्ञापनार्थम् । अग्रिमसूत्रे मुक्तिवाक्यविचारात् पूर्वस्मिन् प्रलयोऽपि सूच्यत इति ज्ञायते । अन्यथा न्यूनता स्यादिति ॥ ८ ॥

गतिसामान्यादिति षष्ठं सूत्रमवतारयन्ति * मुक्तीत्यादि * तेषां ब्रह्मपरत्वमाहेत्यर्थः । * गतिर्मोक्षः * गतिशब्दः फले रूढः । अन्ते या मतिः सा गतिः, सा काष्ठा सा परा गतिरित्यादौ तथा दृष्टत्वात् । अत्र चाप्ययोत्तरमभिसंवेशस्यैव समर्थनीयत्वात् तथेत्यर्थः । श्रूयत इति । बृहदारण्यके मैत्रेयीब्राह्मणे श्रूयते । *दृष्टान्तार्थमिति * लयाधिकरणदृष्टान्तार्थम् । * इत्यादिनेति * प्रास्तमुदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद् यतो यतस्त्याददीतेति ग्रन्थेन * न प्रेत्य संज्ञास्तीति प्रतिपाद्येति * विमुक्त्यनन्तरं भोक्तृभावा-

तन्निरूपणार्थं यत्र हि द्वैतमिव भवति तदितर इतरमित्यादिना सर्वस्य शुद्धब्रह्मत्वं प्रदर्शितम्।

दिनिर्देशा जीवादिसंज्ञाराहित्यं प्रतिपाद्य। * तन्निरूपणार्थमिति * संज्ञाभावनिरूपणार्थम्। *सर्वस्येति* जडस्य जीवस्य च। अत्रायमर्थः यथाऽब्रादीनांसंज्ञानां कार्याणामपाद्यात्मकाः समुद्रादयो लयाधिकरणभूतास्तथा सदात्मकस्य सर्वस्य सदात्मकं कारणभूतं ब्रह्मैव लयाधिकरणभूतम्। नच स्पर्शादीनां, त्वगाद्यंशत्वस्य प्रत्यक्षबाधितत्वात् केवलं लयस्थानत्वमेव विवक्षितं, न तु तस्य कारणत्ववैशिष्ट्यमपीति शङ्क्यम्। 'त्वगस्य स्पर्शवायोश्चेति। मुखतस्तालु निर्भिन्नं जिह्वा तत्रोपजायत। ततो नानारसो जज्ञे जिह्वया योऽधिगम्यते' इत्यादिश्रीभागवतद्वितीयस्कन्धवाक्येषु तथा दर्शनेनात्र वैराजानामेव तेषां दृष्टान्तत्वेन विवक्षितत्वात्। यथा सर्वेशानां कार्याणां लयस्थानं ब्रह्म तथा चिदंशानां जीवानामपि लयस्थानं ब्रह्मैवेति वक्तुं, स यथा सैन्धवेत्यादिना यथा सामुद्रलवणशकलं उदके प्रक्षिप्तं उदकमेव लक्ष्यीकृत्य विलीयते, न तु खिल्यत्वेन ग्रहणाय कोऽपि समर्थः सम्भाव्यते; किन्तु यस्माद्यस्माद्देशादाद्रीयते तत्र तत्र लवणरसः एवास्वाद्यत इति तत्र तत्सत्ता निश्चीयत इत्येवं लयदृष्टान्तं निरूप्य, एवं वा अरे इदं महद्भूतमनन्तपारम्, अरे मैत्रेयि, इदं जीवात्मत्वेनानुभूयमानं, महत् पूर्वोक्तेभ्योऽप्यादिभ्य उत्कृष्टम्, अनन्तम् अविनाशि, अपारम् अनादि तत्वं विज्ञाने घनं चिदेकस्वरूपे ब्रह्मण्येवैतेभ्यः स्थूलसूक्ष्मशरीरात्मकेभ्योऽप्युपलक्षितेभ्यो भूतेभ्यः समुत्थाय पृथग्भूय तान्येव भूतान्यनु तल्लयोत्तरं विनश्यति विशेषेणादर्शनं प्राप्नोति ब्रह्मणः पृथङ् न ज्ञायते। तत्र हेतुः न प्रेत्यसंज्ञाऽस्तीति। लयोत्तरं जीवसंज्ञैव निवर्तते, ब्रह्मैव भवतीति। ततो लवणरसस्य सर्वत्रोदकेऽनुभवाल्लवणत्वेन वर्तत एवाग्रहणमिति कुतो निषिध्यते संज्ञेत्येवं मैत्रेय्या प्रोक्ते पुनः संज्ञाभावनिरूपणार्थं यत्र हि द्वैतमित्यादिना भेदकधर्मसत्तायां द्वैतदर्शनपूर्वकं, यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येज्जिघ्रेदभिवदेच्छृणुयान्मन्वीत

आदिमध्यावसानेषु शुद्धब्रह्मण एवोपपादनात् । सर्वेषां वेदान्तानां ब्रह्मसमन्वय उचित इति ॥ ९ ॥

किञ्च ।

श्रुतत्वाच्च ॥ १० ॥

पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत इति श्रुत्यैवासन्दिग्धं सर्वकार्यत्वं प्रतिपादितम् ।

विजानीयाद् येनेदं सर्वं विजानाति तं केन विजानीयाद् विज्ञातारमरे केन विजानीयादित्यन्तेन, यत्र तु अस्मिन्नधिकरणे अस्य सम्बन्धि सर्वं स्थूलं सूक्ष्मं चात्मैवाभूद् आत्मरूपमेवाभूत् तत् तदा करणस्य विषयस्य च लयादैकरूप्ये करणविषयभावापगमात् केन कं पश्येदित्यादि । ननु यद्यप्येवं लीने, तथापि विज्ञाता तु तिष्ठति स यथा स्वप्ने स्वयंज्योतिः पश्यत्येवं स्वयं कुतो न विजानातीत्याकाङ्क्षायां विज्ञातुः स्वरूपस्यापि समुद्रे लवणस्येवात्मत्वं स्मारयति, विज्ञातारमित्यादिना । तथाच तदा विज्ञातापि न विज्ञातृरूपेणास्ति, किन्तु गुणातीतेनात्मरूपेणैवातो न विजानातीत्युत्तरमुखेन सर्वस्य ब्रह्मत्वं च निरूपितम् । एवञ्च ब्रह्म न सर्वदा सर्वव्यवहारातीतं, मोक्षे तथात्वेन श्रावितत्वाद् यद्वैवं तद्वैषं मैत्रेयीब्राह्मणश्रावितसर्ववद्विस्येवमनुमानसिद्धेरस्य हेतुत्वं बोधितम् । तेनात्र, यतो वेति श्रुतिस्थोऽभिसंविशन्तीति भागः समर्थितः । किञ्चैतेनैव सर्वस्य शुद्धब्रह्मत्वमपि दर्शितमिति । तेन फलितमाहुः । * आदीत्यादि * आद्यामृतत्वलिङ्गेन, मध्ये आत्मदर्शनादिना सर्ववेदनप्रतिज्ञामारभ्य, वागेकायनमित्यन्तेनावसाने सर्वस्यात्मभावकथनेन च तेषु शुद्धब्रह्मण एव कथनेन च तेषु शुद्धब्रह्मण एव सर्वरूपत्वेन सर्वकर्तृत्वेन चोपपादनाद् ये केऽपि वेदान्तास्ते सर्वे येन चिद्रूपेण ब्रह्मैव वदन्तीति सर्वेषां वेदान्तानां ब्रह्मणि तात्पर्येणान्वय उचित इत्यर्थः ॥ ९ ॥

सप्तमं सूत्रं पठित्वा तद्विषयवाक्योपन्यासेनैव व्याकुर्वन्ति * पूर्णमित्यादि * अयं बृहदारण्यके द्वितीयषष्ठब्राह्मणानन्तरं परिशि-

सर्वे वेदा यत्पदमामनन्तीति च ।

दलक्षणखिलकाण्डारम्भे वर्तते । अस्मिन् मन्त्रे तु सर्वस्य ब्रह्मात्मैकत्वनिर्णयार्थम् आत्मैवेदमग्र आसीत् पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्यादिश्रुत्यर्थ एवोपसंह्रियते । व्याख्या तु, पूर्णमदः, अदः परोक्षं ब्रह्म पूर्णम् आकाशवद् व्यापि निरन्तरं निरुपाधिकम् । पूर्णमिदम इदं नामरूपाभ्यां व्यवह्रियमाणम् अवतारादिरूपमपि पूर्णं पूर्वोक्तरूपमेव । एवं व्यवहार्याव्यवहार्यस्वरूपयोर्निरुपाधिकत्वमुक्त्वा कार्यरूपेऽपि तथात्वमाह । पूर्णात् पूर्णमुदच्यते । पूर्णात् कारणात्मनः सकाशात् पूर्णमुत पूर्णानन्दं सद् अच्यते, पूर्णं सद् उदच्यते वा । अञ्चु गतिपूजनयोः, अच इत्येक इति पाणिनिः । पूज्यते उद्गच्छति वा । एवं स्थितिदशायां कार्यस्य ब्रह्मरूपतामुक्त्वा प्रलयदशायां तथात्वमाह । पूर्णस्य ब्रह्मणः पूर्णं निरुपाधिकमेकरसत्वलक्षणं स्वभावं प्रलयदशायामादाय पूर्णं ब्रह्मैव सदवशिष्यते । अव्यवहार्यत्वेन रूपेण तिष्ठतीति । तथाचानया श्रुत्याऽसन्दिग्धं यथा स्यात् तथा सर्वकार्यरूपत्वं ब्रह्मणः प्रतिपादितम् । तेन पूर्णज्ञानिनां व्यवहारदशायामपि कार्यं गुणातीतं ब्रह्माभिन्नमेव । व्यवहारस्तु भगवतः सत्यसङ्कल्पत्वाद् बहु स्यां प्रजायेयेत्यादिरूपया इच्छयैव । न चात्र सर्वत्र पूर्णपदादुद्गतस्य कार्यस्यांशस्य च पूर्णैश्वर्यादिमत्त्वं शङ्क्यम् । ऐश्वर्यप्रकरणाभावात् । पूर्णैश्वर्यादिबोधकस्य भगवच्छब्दस्य भगवत्येवानौपचारिकत्वमिति विष्णुपुराणे सिद्धत्वात् । न च परममोक्षदशायां ब्रह्मैक्ये तत्र तथात्वं शङ्क्यम् । दशमस्कन्धे श्रीवासुदेवं प्रत्यखण्डाद्वैतोपदेशे, खं वायुरितिश्लोके भगवता सच्चिदानन्दधर्मतारतम्यादिकृतनानात्वाविरुद्धैकस्वस्यैव प्रतिपादनेन पूर्णैश्वर्यादीनां स्वस्मिन्नेव नियतत्वाच्च । अतः सर्वव्यवहारातीतत्वमनपहायैव सर्वव्यवहारविषयं ब्रह्मेत्यर्थः । एतेन फलितमाहुः *सर्वे वेदा इत्यादि * तथाचाभिधया वृत्त्यापि सर्वे शब्दा ब्रह्मवाचका इति सर्वेषां वेदान्तानामभिधया तात्पर्येण च ब्रह्मण्येव समन्वय इत्यर्थः । अत्रेदं बोध्यम् । इयं श्रुतिः काठके द्वितीयवल्लीस्था, 'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् । अन्यत्र भूताच्च भव्याच्च यत्

चकारोऽधिकरणसंपूर्णत्वद्योतनाय ।

वक्ष्यसि तद्वद' इति प्रश्ने मृत्युनोक्ता । सर्वे वेदा यत् पदमामनन्ति
तपांसि सर्वाणि च यद्वदन्ति यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं
सङ्ग्रहेण ब्रवीम्योमित्येतदिति । पदं पदनीयं प्राप्तव्यमिति यावत् ।
आमनन्ति प्रतिपादयन्ति । यद्वदन्ति यत्प्राप्त्यर्थानि । सङ्ग्रहेण स-
ङ्क्षेपतः । तदेव सङ्क्षेपत आह, ओमित्येतदिति । तथाचोङ्कारेण यत्
सङ्क्षेपत उच्यते तदेव सर्वैर्वेदैर्विस्तारेणोच्यत इत्यर्थः । एतदेव
द्वादशस्कन्ध उपबृंहितं, समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिन इ-
त्यारभ्य ' ततोऽभूत् त्रिवृदोङ्कारो योऽव्यक्तप्रभवः स्वराट् । यत्तल्लिङ्गं भगवतो
ब्रह्मणः साक्षाद् वाचकः परमात्मनः । स सर्वमन्त्रोपनिषद्-
वेदबीजं सनातनम् ' इत्यादिभिः । तथाच बीजशक्तिरेव
सर्ववृक्षे प्रसरतीत्योङ्कारस्य या परमात्मवाचकता सैव सर्वस्मिन् वेद-
तरौ प्रसृतेति सर्वे वेदा अभिधया प्रतिपादयन्तीति युक्तम् । किञ्च ।
जैमिनीये नये सर्वे शब्दाः प्रायेण धर्मवाचका एव । धर्मश्च घटत्वा-
दिरूपः । त्वप्रत्ययश्च भावे । भाव इति भूधातोर्घञिरूपम् । भूधातुश्च
सत्तायां व्याप्तौ वा । उभयथापि सतो व्यापकस्य वा धर्मो घटत्वा-
दिरिति सिद्ध्यति । तादृशश्च धर्मी भगवानेति धर्मद्वारा भगवद्वाच-
का एव सर्वे शब्दाः । वैयाकरणमतेऽप्येवम् । ' सम्बन्धिभेदात् स-
त्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते तस्यां सर्वे शब्दा व्यव-
स्थिताः । तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते । सा नित्या सा
महानात्मा तामाहुस्त्वतलादयः ' इति वाक्यपदीयात् । नैयायिका-
दिमतेन विशिष्टवाचकत्वपक्षेऽप्येवैव व्यवस्था । धर्म् चात्र स्वार्थे ।
अन्यथाऽनवस्था स्यादिति । एवं पदवद्वर्णा अपि स्वभावतो भगव-
द्वाचका एव । ' वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः । ताव-
न्ति हरिनामानि कीर्तितानि न संशयः ' इति शिष्टवैदिकप्रसिद्धवा-
क्यात् । वाक्यानि तात्पर्येण बोधयन्तीति सर्वस्य वेदस्य भगवद्वाच-
कत्वमप्रत्यूहमिति । सौत्रस्य चस्य प्रयोजनमाहुः । * चकार इत्या-
दि * एवमत्र विसृज्यं सुषुप्तिविचारेण दैनन्दिनप्रलयकर्तृत्वं, द्विती-

ये मोक्षविचारेणात्यन्तिकतत्कर्तृत्वे, तृतीये सर्वकार्यकर्तृत्वप्रतिपादनेन नैमित्तिकादितत्कर्तृत्वे, बोधितमिति प्रतिभाति ।

अत्रैकदेशिन इमानि सूत्राणि सांख्यनिरासकतया व्याकुर्वते । तथाहि । सांख्यपरिकल्पितं प्रधानं जगत्कारणत्वेन नाश्रयितुं शक्यम् । अशब्दं हि तत् । कथमशब्दम् । ईक्षतेः । सदेव सोम्येदमग्र आसीदित्युपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेति जगत्कारणस्येक्षणकर्तृत्वश्रवणात् । तथाऽन्यत्रापि । आत्मा वा इदमेक एवाग्र आसीदित्युपक्रम्य, स ऐक्षत लोकान्नु सृजा इति । क्वचिच्च षोडशकलं प्रस्तुत्य, स ईक्षाञ्चक्रे स प्राणमसृजतेति । ईक्षतेरिति धात्वर्थनिर्देशो लक्षणया । विषयिणा विषयलक्षणात् । यथा यजतेः । तेन यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः, तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते इत्यादीनां सर्वज्ञेश्वरकारणपराणामपि वाक्यानां संग्रहः । नच सत्त्वधर्मेण ज्ञानेन प्रधानस्यापि सर्वज्ञताया ईक्षितृत्वस्य च शक्यवचनत्वात्तेन प्रधानं कारणमिति वाच्यम् । तस्य प्रधानावस्थायां गुणसाम्यात् सत्त्वधर्मस्य ज्ञानस्य तदानीमशक्यवचनत्वात् । तदा तदावरके रजस्तमोधर्मस्याप्यवर्जनीयत्वेन ज्ञानप्रतिबन्धस्यापि सम्भवेन किञ्चिज्ज्ञत्वस्याप्यापत्तेश्च । किंचासाक्षिकाऽसत्त्ववृत्तिर्न कापि जानाति, नाभिधीयत इत्यचेतनस्य प्रधानस्य सार्वज्ञ्यमनुपपन्नम् । नच योगिवदिति वाच्यम् । तेषां चेतनत्वेनादृष्टान्तत्वात् । यदि च तप्तायःपिण्डस्य दग्धृत्ववत् साक्ष्यधिष्ठितस्य प्रधानस्येक्षितृत्वं कल्प्यते, तदा तु यन्निमित्तं प्रधानस्येक्षितृत्वं तस्यैव सर्वज्ञत्वाज्जगत्कारणत्वं वक्तव्यम् । तदंतोरेवेति न्यायात् । नच ब्रह्मणो नित्यज्ञानत्वेन विवक्षितत्वादीक्षणात्मकज्ञानक्रियां प्रति स्वातन्त्र्यासम्भवात् कथं सर्वज्ञत्वमिति वाच्यम् । प्रततौष्ण्यप्रकाशेऽपि सूर्ये सविता दहति प्रकाशत इति प्रयोगदर्शनादिहापि तद्वत् सत्यसति च ज्ञानकर्मभूते विषये नित्यज्ञानतया तादृशप्रयोगोपपत्तेः । नच प्राक् सृष्टेः पदार्थान्तराभावादीक्षणात्मकस्येश्वरज्ञानस्य निर्विषयत्वं शङ्क्यम् । तत्त्वान्यत्वाभ्यामनिर्वाच्ययोर्नामरूपयोर्व्याचिकीर्षितत्वेन तयोरेव विषयत्वात् । नच तयोरनागतत्वेनाविषयत्वं शङ्क्यम् । अतीतानागतविषयकज्ञानस्य योगिषु दर्शनात् तद्रूपे ईश्वरे तादृशशङ्काया एवासङ्गतत्वात् । [illegible]

प्राक् सृष्टेर्ब्रह्मणोऽशरीरत्वादीक्षितृत्वमनुपपन्नमिति शङ्क्यम् । सवितृप्रकाशवद् ब्रह्मणो नित्यज्ञानस्वरूपत्वेन साधनानपेक्षत्वाद् । न तस्य कार्यं करणं च विद्यत इति, अपाणिपादो जवनो ग्रहीतेतिमन्त्राभ्यामपि तथा निश्चयात् । नच चैतन्यैक्यवादिनो जीवेश्वरभेदाभावात् संसारिणो जीवस्यापि तथात्वापत्तिरिति शङ्क्यम् । घटगिरिगुहाद्युपाधिभेदेन व्योम्न इव ब्रह्मचैतन्यस्याप्युपाधिभेदेन भेदस्याप्यङ्गीकारेणोक्तदूषणाभावादित्यादि । तज्जयतीर्थेन माध्वेनैवं दूष्यते । साङ्ख्यप्रतिपन्नं प्रधानं न श्रौतं जगत्कारणं, तदैक्षतेतीक्षितिश्रवणादशब्दं तदिति यद् व्याख्यातम् । तदयुक्तम् । तथाहि । मन्त्राशब्दमित्यनेनोक्तमश्रौतत्वं न साङ्ख्यस्य प्रतिवादिनः सिद्धम् । तेन वैदिकत्वाभ्युपगतेः । नापि स्वन्यायेन तदुक्तिः । अजामेकामित्यादौ प्रधानस्य श्रुतत्वात् । नच तत्रान्यत् कल्प्यम् । नाममात्रे विवादादर्थान्तरस्य चाभावात् । किञ्च ब्रह्मणोऽपि श्रौतत्वं न युक्तम् अवाच्यत्वात् । यतोवाचो इत्यन्तरायोगात् । नापि तस्येक्षितृत्वम् । तस्येक्षितिस्वरूपत्वात् । नच मायावच्छिन्नस्य जगत्कारणस्येक्षितृत्वे सम्भवतीति वाच्यम् । जिज्ञास्यस्यैव जगत्कारणताया उक्तत्वात् । नहि जिज्ञास्यं मायावच्छिन्नम् । तज्जिज्ञासाया अप्रयोजकत्वात् । किञ्च मायपेक्षितृत्वं भवत्युपचर्यते वा । आद्ये दृश्यत्वाद्यपि किं न स्यात् । द्वितीये प्रधानेऽपि तत्सम्भवादिति ।

अत्र स्वन्यदपि स्फुरति । सूत्रव्याख्याने यदुक्तम्, ईक्षतेरिति धात्वर्थनिर्देशो लक्षणया विषयिणा विषयलक्षणाद् यथा यजतेरिति । तदपि फलितवति । सूत्राणां वेदान्तवाक्यकुसुमग्रथनार्थत्वस्य पूर्वं स्वयमेव कथनात्तत्रापि पूर्वं विषयवाक्योपन्यासाद्वाक्यविशेषगतत्वेन स्वार्थप्रत्यायकस्यैव धातोर्निर्देशस्य सूत्रकाराशयगोचरतया लक्षणाया अविवक्षितत्वात् । किञ्च पञ्चशिखसूत्रौ ब्रह्मपदस्य प्रधानवाचकत्वाङ्गीकारात् तेन चेत् तत् स्मरेत् तदा प्रसङ्गे जात आनुमानिकादिसूत्राण्यप्यवैश्व वदेत् । जन्मादिसूत्रविषयत्वेन तु न वक्तुं शक्यम् । तत्र तत्प्रसङ्गाभावात् । श्रुत्यन्तराणां त्वानुमानिकपाद एव विचारादिति । सूत्रान्तरव्याख्यानं तु गतिविरुद्धमित्युपरस्यते । हेत्वावचनसूत्रं चकारं प्रतिज्ञाविरोधाभ्युच्चयार्थमाहुः । श्रुतत्वाच्चेति चकारप्रयोजनं न किमप्याहुः ।

भास्कराचार्या अप्येतदधिकरणं प्रधानकारणतानिरासायैवेति व्याचक्रुः।

रामानुजाचार्यास्तु, मुख्यतया प्रधानकारणवादनिरासं व्याख्याय निर्विशेषचिन्मात्रब्रह्मवादोऽप्येताभिर्युक्तिभिः सूत्रकारेण निरस्यते। पारमार्थिकमुख्येक्षणादिगुणयोगिजिज्ञास्यं ब्रह्मेतिस्थापनात्। निर्विशेषवादे हि साक्षित्वमप्यपारमार्थिकम्। वेदान्तवेद्यं ब्रह्म च जिज्ञास्यतया प्रतिज्ञाय तच्चेक्षतेर्नाऽशब्दमित्यादिसूत्रैश्चेतनमिति प्रतिपाद्यते। चेतनत्वं नाम चैतन्यगुणयोगः। अत ईक्षणगुणविरहिणः प्रधानतौल्यमेव। किञ्च निर्विशेषप्रकाशमात्रब्रह्मवादे तस्य प्रकाशत्वमपि दुरुपपादम्। प्रकाशोऽपि नाम स्वस्य परस्य च व्यवहारयोग्यतामापादयन् वस्तुविशेषः। निर्विशेषवस्तुनस्तदुभयरूपत्वाभावाद् घटादिवदचित्त्वमेवेति। अथ तदुभयरूपत्वाभावेऽपि तत्क्षमत्वमस्तीति चेन्न। तत्क्षमत्वं हि तत्सामर्थ्यमेवम्। तत्सत्त्वे निर्विशेषत्वहानेः। अथ श्रुतिप्रामाण्यादयमेको विशेषोऽभ्युपगम्यते, हन्त तर्हि सर्वशक्तित्वादयोऽन्येऽपि तथेति निर्विशेषवाद एव त्यक्तः स्यादित्याहुः।

शैवस्तु रामानुजमतस्यैव चौरो मध्वमतस्य च क्वचित् क्वचित् तद्विरुद्धां शैवश्रुतिमुदाहरन् भिन्नं प्रस्थानमभिमन्यते। तन्मते ईक्षत्यधिकरणं जन्माद्यधिकरणोक्तलक्षणस्य प्रधानेऽतिव्याप्तिवारणाय। आनन्दमयाधिकरणं च जीवेऽतिव्याप्तिवारणायेति।

मध्वाचार्यास्तु, यतो वाचः, अशब्दमस्पर्शमरूपमव्ययम्, अवचनेनैव प्रोवाच, यद्वाचानभ्युदितमित्यादिषु श्रुतिषु वाच्यत्वनिषेधाद् ब्रह्मणः शास्त्रयोनित्वसूत्रोक्तं शास्त्रप्रमाणकत्वं न युज्यत इति पूर्वपक्षनिवृत्त्यर्थमीक्षत्यधिकरणम्। तत्र विषयवाक्यं तु, स एतस्माज्जीवघनात् परात्परं पुरिशयं पुरुषमीक्षते, आत्मन्येवात्मानं पश्येत्, विज्ञाय प्रज्ञां कुर्वीतेत्यादि। एतेष्वीक्षणीयत्वश्रावणाद् वाच्यमेव ब्रह्म। नचेक्षणस्य दर्शनात्मकत्वात् कथं तेन वाच्यत्वसिद्धिरिति शङ्क्यम्। तं त्वौपनिषदं पुरुषं पृच्छामीति वाक्यान्तरे उपनिषदेकगम्यत्वश्रावणेन प्रत्यक्षाद्यवेद्यत्वे सिद्धे वचनेनैवेक्षणस्य विवक्षितत्वात्। नचाऽवचनेनोवाचेत्यादिश्रुतिविरोधः। तत्र साकल्येनावचनस्य विवक्षितत्वात्। 'अप्रसिद्धेरवाच्यं तद् वाच्यं सर्वागमोक्तितः। अत-

पदं तदव्ययमक्षय्यं ध्येयमेवं परं स्मृतम्' इति गारुडेन तथा निश्चयादिति व्याख्यायामग्रे प्रधानस्याश्रौतत्वं न साङ्ख्यमतसिद्धमतस्तस्याशब्दत्वव्यवस्थापनमसङ्गतमिति सूचयन्ति । ततो, गौणश्चेत्यादिसूत्रेषु जीवात्मनीक्षणीयत्ववाच्यत्वादिश्रौतगुणयोगं नानाश्रुतिस्मृत्युपन्यासेन निराकुर्वन्ति । समाप्तौ च पुनरपि सिंहावलोकनन्यायेन ब्रह्मणोऽवाच्यत्वमेव युक्त्यन्तरैर्दूषयन्ति ।

तत्रेदमवधेयम् । तथाहि । द्विविधं कपिलसूत्रप्रसिद्धं सांख्यम् । समासरूपमष्टाविंशतिसूत्रम् । तदुपरि पञ्चशिखैर्वृत्तिः । प्रवचनसूत्रात्मकं च षडध्याययुक्तम् । तत्राद्ये तु शास्त्रप्रतिपाद्यानामर्थानामुद्देशमात्रं नान्यत् । द्वितीये तु, सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान् महतोऽहङ्कारोऽहङ्कारात् पञ्चतन्मात्राण्युभयमिन्द्रियं स्थूलभूतानि पुरुष इति पञ्चविंशतिगण इत्येकस्मिन् सूत्रे सर्वानुद्दिश्य ततोऽग्रे स्थूलात् पञ्चतन्मात्रस्य बाह्याभ्यान्तराभ्यां तैरहङ्कारस्य तेनान्तःकरणस्य ततः प्रकृतेः, सङ्घातपरार्थत्वात् पुरुषस्येति पञ्चसूत्र्या स्थूलभूतानि प्रत्यक्षसिद्धान्यादाय तेभ्यः कार्येभ्य उपरितनानामानुमानिकत्वमेव कपिलाचार्यैरादृतम् । ततोऽग्रे यद्यपि प्रधानाज्जगज्जायत इति श्रुतिं सुधाकारैवा पठन्ति त्रिविधं प्रमाणं चाङ्गीकुर्वन्ति, तदप्युक्तोपष्टम्भायैव, न तु शब्दस्य प्राधान्याय । अत एव व्यासचरणैरप्यानुमानिकसूत्रे तथैव तन्मतं सूचयित्वा दूष्यते । तेन सांख्यमते प्रकृतेर्मुख्यतया शब्दगम्यत्वाभावेनाशब्दत्वमेव सिद्ध्यति । शब्दगम्यत्वस्यानुमानिकपादे निराकरणेन तस्याभिमानिकत्व एव पर्यवसानादिति । अत एतद्व्यतिरिक्तं सर्वं सम्यगेव । अत एव भाष्यान्तरेऽपि प्रकृतेस्तथात्वस्यैवादरणमिति दिक् ।

विज्ञानभिक्षुस्तु, ननु यदि प्रलये प्रधानादिसमन्वयो ब्रह्मण्युपगतस्तर्हि तस्यैव श्रुत्युक्तं जगत्कारणत्वमस्तु । भवदभिमतब्रह्मकल्पने तस्य जगदधिष्ठानकारणत्वकल्पने च गौरवात् । सांख्यसूत्रेष्वीश्वरस्य निराकृतत्वात् । प्रकाशवच्च व्यापकत्वात् प्रधानजीवयोरुपपद्यत एव । अधिष्ठानकारणत्वं च जीवानामेवास्तु । समस्तकार्याणामदृष्टद्वारा जीवकार्यत्वस्य अदृष्टवदात्मसंयोगजन्यतया जीवाधेयत्वस्य च सर्वास्तिकसम्मतत्वात् । सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेति, सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि, येन भू-

सान्यशेषेषा प्रश्नस्यात्मन्यथो मयीति जीवप्रकरणस्थश्रुतिस्मृति-
भ्यामपि तथावसायाच्च । अतः शास्त्रस्य निरीश्वरपरत्वे शास्त्रयो-
नित्वादितिहेतुराश्रयासिद्धः । कार्येश्वरपरत्वे च पृथक् शास्त्रारम्भ-
वैफल्यम् । सांख्यादिभिरेव तथाविधब्रह्मनिरूपणादितिशङ्कायामिदं
सूत्रं प्रवर्तते । ईक्षतेर्नाशब्दमिति । विवादास्पदप्रधानादिभ्योऽतिरिक्तं
ब्रह्म न अशब्दं, न अशास्त्रयोनि, न जगत्कारणत्वप्रतिपाद्यमिति
यावत् । कुतः । ईक्षतेः । इतरावृत्तिश्रुत्युक्तेक्षतिधर्मकत्वात् । तथाच
कारणश्रुतिः पराभिमतप्रधानाद्यविषया, तद्वृत्तिधर्मप्रकारेण बोध-
कत्वात् । आकाशाद् वायुरित्यादिश्रुतिवदिति । अथवा तज्जगज्जन्मा-
दिकारणं ब्रह्म चेतनमचेतनं वा । चेतनत्वेऽपि स्वयम्भूस्तदतिरिक्तो
वेति विशेषाकाङ्क्षायां प्रवर्तते । ईक्षतेर्नाशब्दमिति । जगत्कारणं ब्रह्म
न पुरुष एव । कुतः । ईक्षतेः । ईक्षणश्रुतिगोचरत्वाद् । अत एवेक्ष-
णात् तद्ब्रह्म अशब्दं, शब्दब्रह्मणो हिरण्यगर्भादतिरिक्तं च भवति,
सुतरां पुरुषान्तरेभ्य इत्यर्थः । हिरण्यगर्भस्य वेदमयत्वेन वेदगर्भ-
त्वच्छब्दब्रह्मत्वमपि स्मर्यते 'पूर्वस्यादौ परार्द्धस्य ब्राह्मो नाम महा-
नभूत् । कल्पो यत्राऽभवद् ब्रह्मा शब्दब्रह्मेति यं विदुरिति' भागवता-
दिष्विति । एवं द्विधा सूत्रं व्याख्याय, तदैक्षत बहुस्यामितिवाक्यं
दर्शयित्वा 'सर्गकाले तु सम्प्राप्ते ज्ञात्वा तं कालरूपकम् । अन्तर्लीन-
विकारं च तत्र स्रष्टुमुपचक्रमे । तस्मादव्यक्तमुत्पन्नं ततश्चापि महा-
नभूद्' इति स्मृतिं च दर्शयित्वाह । नहीदमीक्षणं प्रधानादीनामचेत-
नानां सम्भवति । ईक्षणध्यानचिन्तनादिशब्देषु चैतन्यस्य विशेष्य-
त्वात् । ईक्षणादिशब्दस्योपाधिवृत्तिवाचकत्वेऽपि प्रकृतिस्वातन्त्र्यवा-
दिभिरपि प्रधाने तत्पूर्विकायाः वृत्तेरनङ्गीकाराच्च । नापि जीवानां,
महदादिसृष्टेः पूर्वं करणाभावेन तेषां चैतन्यफलोपधानाभावात् ।
नचेयमीक्षणपूर्विका सृष्टिर्महत्तत्त्वसृष्टेः पश्चादिति वक्तुं शक्यम् ।
तथा सतीक्षणात् पूर्वमपि द्वैतापत्त्या, सदेव सोम्येदमग्र आसी-
देकमेवाद्वितीयमितीक्षणाव्यवहितपूर्वश्रुत्यनुपपत्तेः । ततश्चापि म-
हानभूदिति स्मृतिविरोधाच्च । नच तत् पूर्वसर्गीयमिति वक्तुं
शक्यम् । सर्गकाले तु सम्प्राप्ते ज्ञात्वेति सर्गसमकालीनज्ञानाव-
गमादित्यादि । ततः शाङ्करमतीयं सूत्रव्याख्यानं, मायां तु प्र-
कृतिं विद्यादितिश्रुतिव्याख्यानं च दूषयित्वा ततः साङ्ख्ययोग-

योर्वेदाविरुद्धत्वं च साधयित्वा रजस्तमःसम्भिन्नतया मलिनं कार्यसत्त्वं परमेश्वरस्य नोपाधिः, किन्तु केवलं नित्यज्ञानेच्छानन्दादिमत् सदैकरूपं कारणसत्त्वमेव तस्योपाधिः । न स्थानतोऽपि परस्योभयलिङ्गमित्याग्नामिसूत्रात् । ब्रह्मविष्णुमहेश्वरास्तु सृष्टिस्थितिसंहाराधिकारिणः कार्यसत्त्वाद्युपाधिका महदाख्या अवान्तरेश्वरा एव । तेषां च कार्योपाधित्वम् । 'गुणेभ्यः क्षोभ्यमाणेभ्यस्त्रयो देवा विजज्ञिरे । एका मूर्तिस्त्रयो देवा ब्रह्मविष्णुमहेश्वराः । सात्त्विको राजसश्चैव तामसश्च त्रिधा महान्' इति मात्स्यादिभ्यः । बुद्ध्याख्यसमष्टिमहत्त्वं हि त्रिगुणात्मकरज्जुवत् त्रिगुणात्मकमेकमेव । सत्त्वाद्यंशभेदेन त्रयाणां देवानां च शरीरं भवत्येका मूर्तिरित्युच्यते हरिहरात्मकदेहवत् । अत एव चैतत्सूक्ष्मशरीराधारभूतं विराडाख्यं स्थूलशरीरमेकमेवेति त्रयाणामेव विद्वद्रूपत्वमुपपद्यते । त्रयश्च देवाश्चेतनरूपा भिन्ना एव । अत एव त्रयाणामेकपिण्डतया वातपित्तकफवत् परस्परसापेक्षत्वाद् 'अन्योन्यमनुरक्तास्ते ह्यन्योन्यमनुजीविनः । अन्योन्यं प्रणताश्चैव लीलया परमेश्वरा' इति मात्स्यादिवाक्यमप्युपपन्नम् । एतेन त्रयाणां भेदाभेदावपि व्याख्यातौ वेदितव्यौ । ननु तेषां कार्योपाधिकत्वेऽपि, त्रिधा कृत्वाऽऽत्मनो देहं सोऽन्तर्यामीश्वरः स्थित इति स्मृतेर्योगिकायव्यूहवल्लीलावतारत्वमेवाऽस्तु, किमर्थं विष्ण्वादीनां चेतनान्तरत्वं कल्प्यत इति चेन्न । कौर्मे 'प्रधानं पुरुषं चैव प्रविश्याशु महेश्वरः । क्षोभयामास योगेन परेण परमेश्वरः । प्रधानात् क्षोभ्यमाणाच्च तथा पुंसः पुरातनात् । प्रादुरासीन्महद्बीजं प्रधानपुरुषात्मकम्' इत्यनेन, तथा विष्णुपुराणादिषु च पुरुषान्तरेण सह प्रकृतिं संयोज्यैव परमेश्वरस्तदुभयात्मकं देवतात्रयरूपं महान्तं सृजतीत्यवगमात् । 'ब्रह्मादीनां त्रयाणां तु स्वहेतौ प्रकृतौ लयः । संभवन्ते कालयोगेन पुनरेव समुद्भव' इति मात्स्यादिभ्यस्तेषामुत्पत्तिलयसिद्धेश्च । अस्मिन् कूर्मवाक्ये ईश्वरप्रवेशो जीवस्य ज्ञानेच्छाप्रयत्नव्यापनरूपः । क्षोभश्च गुणद्वारा योगश्चैकात्म्यम् । अयं च क्षोभसंयोगविशेषद्वारा महतो हेतुः । एवं पुराणान्तरेभ्योऽपि न तेषां साक्षादवतारत्वम् । किञ्च । मनुना 'यत् तत्कारणमव्यक्तं नित्यं सदसदात्मकम् । तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते' इत्यनेनाव्यक्तब्रह्मकार्यस्यापि लौकिकब्रह्मत्वमुक्त्वा, आपो नारा इति

प्रोक्ता इत्यादिना योगेन तथैव नारायणत्वमुक्तमतो नारायणादव्यतिरिक्त एव परमेश्वर इति। नच नारायणादिशब्दानामुपाधिमात्रपरत्वमिति वाच्यम् । तथा सति लक्षणापत्तेरिति । अत एव विष्ण्वादिदेवतायाः कृष्णाद्यवतारेषु न पुरुषान्तरप्रवेशः श्रूयते, फलवान् वा भवतीत्यतोऽवतारत्वमेव । अत एव भागवते कृष्णादीन् प्रकृत्य स्मर्यते, 'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् । इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे' इति । अत्र कृष्णो विष्णुः स्वयं परमेश्वरः, तस्य पुत्रवत् साक्षादंश इत्यर्थः । कृष्णादीनामंशांशिवचनादिति । नचैवं सति, मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जयेति गीतावाक्यविरोध इति वाच्यम् । तथाविधवाक्यानां व्यक्तपरत्वात् । ईश्वरस्य चाव्यक्ततया व्यवहार्यत्वाभावात् । एतेनापि विष्ण्वादीनां परमेश्वरत्वादिकं व्यक्तापेक्षया बोध्यम् । नित्यत्वं चाऽऽभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इति स्मृतेर्बोध्यम् । अथवा, यो यो देवानां प्रत्यबुध्यत स एव तदभवदितिश्रुतेर्विष्णुदेवताया औत्पत्तिकब्रह्मात्मभावान्मत्तः परतरं नास्तीत्यादिवचनोपपत्तिः । वक्ष्यति चाऽऽचार्यः, शास्त्रदृष्ट्या तूपदेशो वामदेववदिति । अत एवानुगीतायां, परं हि ब्रह्म कथितं योगयुक्तेन तन्मयेति श्रीकृष्णवचनाद् भगवद्गीतायां ब्रह्मैव कार्यब्रह्मणा श्रीकृष्णेनाहमित्युपदिष्टमिति निर्णीतम् । किञ्च । अन्येषामपि ज्ञानिनां ब्रह्मभावेऽपि विष्णावेव मुख्यतो ब्रह्मभावान्मत्तः परतरं नास्तीति वचनमुक्तं, नान्यस्य । तस्य सर्वज्ञानिमुख्यत्वमुक्तं मोक्षधर्मे, 'अनाद्यन्तं परं ब्रह्म न देवा नर्षयो विदुः । एकस्तद्वेद भगवान् धाता नारायणो विभुः । नारायणादृषिगण' इत्यादिना । तथा शिवस्यापि मत्तः परतरं नास्तीति वचनं बोद्धव्यम् । किञ्च । योगयुक्ता ये जीवाः पूर्वपूर्वेषु सर्गेषु करणवर्गेण सह च सायुज्यमुक्त्या परमेश्वरतां गतास्ते वासुदेवव्यूहेऽन्तर्भवन्ति । तत्र च व्यूह एक एव वासुदेवो निर्लेपश्वर इतरे तदंशा वासुदेवाः । तथा सङ्कर्षणप्रद्युम्नोऽनिरुद्धाख्यव्यूहरूपिणो विभूतिगणाः पूर्वसिद्धाः । त एते यथायोग्यं महदादिविराडन्तरूपेण ब्रह्मविष्णुरुद्ररूपेण चांशावताराः परमेश्वरस्य भवन्ति । आगच्छन्ति यथाकालं गुरोः सन्देशकारिण इति मोक्षधर्मात् । तथाच ये हरिहरादयः परमेश्वरकोटयस्तेषां, मत्तः परतरं नास्तीति वचनमुपपद्यत एव । यद्यपि तेषां ज-

णादृत्याधारयज्ञेमैश्वर्यं तथापि परमेश्वरात्मकतया सर्वस्पृत्वमर्पा-धारत्याद्युपदेशोऽपि तेषु युज्यत एव । ननु यद्येवं तदा गीतादिषु विष्ण्वादिदेवतैश्वर्यमेव कुत उक्तं, न परमेश्वरस्तैश्वर्यं येतिचेन्न । एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते । ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमा' इति प्रश्नप्रतिवचनाभ्यां विष्णुदेवाद् भेदेन परमेश्वर-कथनात् । अनादिमत् परं ब्रह्म न सत्तन्नासदुच्यत इत्यादिना च परमेश्वरस्यैश्वर्यादिकथनात् । ये त्वीश्वरस्यान्तर्यामिव्यतिरिक्तविग्र-हापि योगिनामिव लीलाशरीरमिच्छन्ति, तेषां मते, न तस्य कार्यं करणं च विद्यते, अप्राणो ह्यमनाः शुभ्रः, अक्षरात् परतः पर इत्या-दिश्रुतीनाम, शङ्करस्येव हि तत्प्रधानत्वादित्यागामिसूत्रस्य च वि-रोधः । कार्यं शरीरम् । करणं बुद्ध्यादि । बुद्ध्यादिना हि शरीरं प्रेर्यत इति । 'अशरीरः शरीरेषु सर्वेषु निवसत्यसाविति, देहत्रयस्थितो नित्यः सर्वदेहविवर्जित' इति भारतादिष्वीश्वरस्य देहद्वयप्रतिषेधात् । अतो विष्ण्वादिदेवानामेव स्थित्यादिलक्षणस्वाधिकारपालनाय मत्स्याद्-यो लीलावताराः । ते च परब्रह्मणः प्रकृष्टांशतया आवेशावतारतया परमेश्वरत्वेनोपास्या इति । तथाच श्रुतिः । यन्मनसा न मनुते येनाहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते । यस्या-मतं तस्य मतं मतं यस्य न वेद सः । अविज्ञातं विजानतां विज्ञातम-विजानतामिति । नन्वेवं परब्रह्मणः सकाशाद् विष्ण्वादिदेवानां भि-न्नत्वे विष्णुशिवप्रकरणस्थानि सृष्ट्यादिवाक्यानि ब्रह्मनिरूपणे सा-धनतया विचारकैः किमित्युपन्यस्यन्त इति चेत् । तयोरीश्वरकोटि-तया परमेश्वरेण सह व्यवहारसाम्यादिति गृहाण । अत एव, त्रया-णामेकभावानां यो न पश्यति वै भिदामित्यादिभिस्त्रयाणामेव देवानां स्वाभाविकब्रह्मात्मभावसाम्यात् सर्वोपास्तिपरत्वु न पृथगुपासनार्थं प्र-ख्यातयोपादिश्यन्त इति । परब्रह्मणश्च स्वतो नामरूपाद्यभावः । 'न स-न्ति यत्र सर्वेशनामजात्यादिकल्पनाः । सत्तामात्रात्मके ज्ञेये ज्ञाना-त्मन्यात्मनः परे । नामरूपे न यस्यैको योऽस्तित्वेनोपलक्ष्यत' इत्यादि-रूपविष्णुपुराणादिवाक्यात् । आत्मनः पर इति जीवादतिरिक्ते । अतः परब्रह्मणो नामरूपाद्यभावानुरूपविकारयोर्हरिहरयोर्नामरूपा-स्यामेव शास्त्रेषु प्रायशो व्यपदेशः । अत एव वैष्णवाः शैवाश्च वि-ष्ण्वाद्यतिरिक्तं परमेश्वरमविद्वांसो ब्रह्ममीमांसाशास्त्रं विष्ण्वादि-

परतया व्याचक्षाणा अविवेकिन एवेति मन्तव्यम् । एवं पञ्चसूत्र्यां सङ्क्षेपतः प्रदर्शितः शास्त्रार्थः इतः परं प्रपञ्च्यत इत्याह ।

तदप्यविचाररमणीयमेव । सदेव सौम्येदमग्र आसीदित्येन निरूपिताया आदिसृष्टेः पूर्वं केवलं ब्रह्मैव, नान्यदिति तस्यार्थस्य साधने तदभिमताविभागलक्षणाद्वैतस्याऽवान्तरसृष्टिप्राक्कालविषयत्वव्युत्पादनेन तदानीं तदभिमतप्रकारेण प्रधानादिसमन्वयस्यागपद्यवचनतया जीवादृष्टस्याप्यभावेन प्रथमव्याख्यानगतपूर्वपक्षस्यैवासङ्गतत्वेन तदपाकरणाय सूत्रप्रवृत्तेर्वक्तुमशक्यत्वात् । द्वितीयव्याख्यानं तु न दुष्टम् । सांख्ययोगयोः सर्वांशेन श्रुत्यविरुद्धत्वोपपादनं त्वसङ्गतमेव । 'अक्षपादप्रणीते च काणादे सांख्ययोगयोः । त्याज्यः श्रुतिविरुद्धोऽंशः श्रुत्येकशरणैर्नृभिः । जैमिनीये च वैयासे न विरोधोऽस्ति कश्चन' इति पराशरोपपुराणीयवाक्यविरोधात् । नच योऽभ्युपगमवादत्वेनोक्तो निरीश्वरत्वकथनादिः स एव त्याज्योऽस्त्विति वाच्यम् । तदुक्तषडध्याय्यां तस्याऽभ्युपगमवादत्वगमकानुपलम्भात् । नित्यानित्यवस्तुविवेकव्यतिरिक्तांशान्तरेऽपि तथात्वात् । कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यमिति श्रुत्या तथा निश्चयात् । एवं योगेऽपि द्रष्टव्यम् । जीवात्मज्ञानमात्रेण मोक्षाङ्गीकारस्यापि तथात्वात् । 'येऽन्येऽरविन्दाक्ष ! विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः । आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रय' इति श्रीभागवते विविक्तजीवात्मज्ञानाद्विमुक्तमानिनां पातकथनेन तथा निश्चयादिति । तथा परमेश्वरस्य ब्रह्मविष्णुमहेश्वरातिरिक्तस्य कारणसत्त्वोपाधिकत्वस्थापनमप्यसङ्गतमम् । शिवतत्त्वविवेकस्थापितस्योङ्कारवाच्यस्य गुणसाम्योपाधिकस्य सर्वेश्वरस्यैव कारणसत्त्वोपाधिकस्यापि निरुपाधिकपरमेश्वरप्रतिनिधित्वेनैव ब्रह्मोपनिषन्नृसिंहतापनीयमैत्रायणीयाथर्वशिखासु सिद्धत्वात् । इदं यथा तथा महत्ताख्ये वादे निपुणतरमुपपादितमिति नेह प्रपञ्च्यते । नच निरुपाधिकस्य निराकारत्वं शङ्क्यम् । आनन्दरूपममृतं यद्विभातीति मुण्डके, 'अकारं ब्रह्माणं नाभौ उकारं विष्णुं हृदये मकारं रुद्रं भ्रूमध्ये ओंकारं सर्वेश्वरं द्वादशान्ते आनन्दाऽमृतरूपं परमं षोडशान्ते' इति तापनीये, आ-

तन्द्मात्रकरपादमुखोदरादिरिति पञ्चरात्रस्मृतौ, अथवा परमात्मानं परमानन्दविग्रहमिति योगियाज्ञवल्क्यस्मृतौ चानन्दाकारस्यैव सिद्धत्वात् । नच, न तस्य कार्यं करणं च विद्यत इत्यस्य विरोधः । तस्य तत्सम्बन्धि यत् तत् कार्यं जन्यं न, किन्त्वजन्यमेव । किञ्च, तस्येति षष्ठ्या भेदो निरूप्यते । तथाच जीववत् स्वरूपातिरिक्तं ज्ञानक्रियादिषु करणमिन्द्रियादिकं च तस्य नास्ति । अथवा नित्यत्वादाकारस्य तद्धेतुभूत करण क्रिया, सापि नास्ति । अत एव, न तत्सम इत्यादीति तदर्थात् । एतेनैव अप्राणो ह्यमनाः शुभ्र इत्यस्याप्यविरोधः सिद्धः । नाप्यरूपवत्सूत्रस्य विरोधः । तथापि रूप्यते निरूप्यते व्यवह्रियते इति रूपं सर्वव्यवहारविषयत्वं तदुक्तं रूपवद्दिवम् । ब्रह्म तु तद्विलक्षणम् । यद्वा रूप्यते व्यवह्रियतेऽनेनेति रूपं करचरणादि तद्वत् तदुक्तं ब्रह्म न, किन्तु तद्विलक्षणम् । करादेरपि ब्रह्माभेदाद्रूपरूपं ब्रह्मैव, नतु रूपवदिति । ननु कुत एवदवगम्यत इत्याकाङ्क्षायां तद्विनिगमकं सूत्रशेषेणाह । तत्प्रधानत्वादिति । सर्वेषां वेदान्तानां प्राधान्येन ब्रह्मप्रतिपादकत्वात् । तथाच ब्रह्मप्रकरणे निरूपित आकारो ब्रह्माभिन्न एवेति । नचाऽऽकारनिरूपकाणां ब्रह्मपरिचायनार्थत्वात् तेषां ब्रह्मभिन्नकराद्याकारनिरूपकत्वेऽपि न प्राधान्येन ब्रह्मप्रतिपादकत्वप्रतिरोध इति शङ्क्यम् । स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेतिश्रुतौ बाह्याभ्यन्तरभेदराहित्यबोधने ज्ञानाकारत्वस्यैव सिद्धत्वात् । आकारभूतकरादिराहित्येन केवलज्ञानात्मकतायां बाह्याभ्यन्तरत्वराहित्येन तन्निषेधानुपपत्तेः । अकृत्स्नादिप्रतीतिराहित्येन कृत्स्नघनपदयोर्वैयर्थ्यापत्तेश्च । अतः केवलसच्चिदानन्दात्मकब्रह्माभिन्नकरचरणाद्याकाराङ्गीकारे न कस्यापि विरोधः । यत्तु पुनस्तलवकारादिश्रुत्या परमेश्वरस्य साक्षादुपास्यत्वाभाव उक्तः । स तु तामेव श्रुतिं विरुणद्धि । पूर्वार्द्धे मनःप्रवृत्तिरहितं तत्प्रेरकं यदुक्तं, तदेव ब्रह्म त्वं विद्धि, नेदं प्रेर्यत्वेनानुभूयमानं जीवात्मरूपं न विद्धि । यत् प्रेरकं तत् किमित्यत आह । यदिदं सच्चिदानन्दाकारमुपासते वैदिकोपासका इति तत्रार्थात् । अनुपास्यत्वेऽभिप्रेते तु द्वितीयेदङ्कारं न वदेदेव । नेदं यदुपासत इत्येतावतैव चारितार्थ्यात् । यस्यामतं तस्य मतमित्यत्रापि, यमेवैष वृ-

णुते तेन लभ्यस्तस्यैव आत्मा विवृणुते तनुं स्वामिति वरणहेतुकतनु-विवरणस्य श्रुत्यन्तरे श्रावणाद् वरणाभावे यस्यामतमविदितं तस्य मतं, यस्य पुनस्तदभावेऽपि मतं स न वेदेति। यद्वा, अनिरुक्तश्रुतौ ब्रह्मणो वाक्यपरिच्छेद्यत्ववारणाद् यस्यामतमनिरुक्तत्वात् सम्यक्तया अज्ञातं तस्य मतम्। यस्य पुनस्तद्विपरीतं स न वेदेति। अविज्ञातं करचरणादिविशिष्टतया जानतां, विज्ञातं तद्भिन्नतया जानतामित्यर्थादिति। अतो न परब्रह्मणोऽनुपास्यत्वाज्ञेयत्वादिकं युक्तम्। यदपि परब्रह्मणः स्वतो नामाद्यभावसाधनाय विष्णुपुराणादिवाक्यमुपन्यस्तं, तत्रापि कल्पनापदात् काल्पनिकनामादिनिवृत्तिरेवाभिप्रेता, न यावन्नामादिनिवृत्तिः। ॐतत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः। ॐकारं प्रकृत्य स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः। तस्य वाचकः प्रणव इति गीताश्रीभागवतपातञ्जलसूत्राणां विरोधात्। वाचकस्यैव नामत्वात्। एवं सिद्धे सदादिनामकत्वे, 'नारायणः शिवो विष्णुः शङ्करः परमेश्वरः। एतैस्तु नामभिर्ब्रह्म परं प्रोक्तं सनातनम्' इतिवाराहपुराणवाक्यात्, 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः। तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयत' इत्यादिश्रुतिश्च नामान्तरस्वीकारेऽप्यदोषात्। अनादिमत्परं ब्रह्मेति स्वलिखितगीतावाक्याग्रिमगीतावाक्य एव सर्वतःपाणिपादान्तमित्यादिना परमेश्वररूपस्याप्युक्तत्वेन तस्याप्यङ्गीकार्यत्वात्। ज्ञेयं प्रस्तुत्यैव तस्य कथमेनोपासनागन्धस्याप्यभावात्। अतो नामरूपे न यस्येति द्वितीयवाक्येऽपि काल्पनिकनामाद्यभाव एवाख्येय इति परमेश्वरस्य लीलाविग्रहाङ्गीकारे दोषाभावान्मत्स्यादीनां परमेश्वरलीलावतारत्वेऽपि न दोषः। द्वितीयस्कन्धे, लीलावतारान् पुरुषस्य भूम्न इति प्रतिज्ञाय ब्रह्मणा मत्स्यादीनां कथनात्। नचैते चांशकलाः पुंस इति प्रथमस्कन्धविरोधः। तेषामतद्भिन्नत्वात्। त्वदुपगतनित्यकार्यवासुदेववन्नामरूपादिसाम्येऽपि भेदस्योपक्रमोपसंहाराभ्यां यथायथमवगन्तुं शक्यत्वात्। गीतायां श्रीभागवते च विभूतिमध्ये वासुदेवस्य गणनाच्च। यत्पुनः, 'कृष्णस्तु भगवान् स्वयमित्यत्तत्स्वयंपदस्य पुत्रवत् साक्षात् परमेश्वरांशः। श्रुत्यादीनामशांशिवचनाद्' इत्युक्तम्। तदप्यसङ्गतम्। भूभारहारकं कृष्णमंशेपूक्ता तदंशित्वेन पुमांसं चोक्ता ब्रह्माण्डात्मकपुंरूपताभ्रमपारणाय तुशब्दोक्तिपूर्वकं

स्वयंभगवत्त्वविधानस्यावबोधात् । कृष्णमेनमवेहि त्वमात्मानमखिलात्मनामिति, वसुदेवगृहे साक्षाद् भगवान् पुरुषः पर इत्यादिवाक्यानामप्यविचाराच्च । गीतायां तु 'परं ब्रह्म परं धाम पवित्रं परमं भवान् । पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुम् । आहुस्त्वाम् ऋषयः सर्वे देवर्षिर्नारदस्तथा । असितो देवलो व्यासः स्वयं चैव ब्रवीषि मे' इति वाक्यमपि प्रायो नावलोकितं, येन, मत्तः परतरमितिवाक्यस्य वामदेववच्छास्त्रदृष्ट्या ज्ञानिमुख्यवाक्यत्वेन गतिश्चिन्तिता । नहि परब्रह्मत्ववक्तार ऋषयः सर्वे भ्रान्ता येनैवं भगवदुक्ते गौणीं वृत्तिं ब्रह्मदृष्टिं च नावगच्छन्ति । तथाऽव्यक्तपरत्वेन गतिरप्यसङ्गतैव । अव्यक्तस्याक्षरत्वेन भगवद्धामतयैव सिद्धा भगवतस्ततोऽपि परत्वात् । नच व्यवहार्यत्वान्नेश्वरत्वमिति युक्तम् । तस्य सूत्रव्याख्यानपद्योपपादितत्वात् । यदपि मोक्षधर्मवाक्येन नारायणाद्भिन्नत्वं परमेश्वरस्योक्तं, तत्र तु नारायणपदं यौगिकमेव । धातुपदविशेषितत्वात् । न तु रूढम् । अतो यत्र नारायणपदेन परमेश्वर उच्यते तत्र रूढ्यैवोच्यते । यथा महोपनिषदि । तत्र ह्येको ह वै नारायण आसीन्न ब्रह्मा न ईशानो नापो नाग्नीषोमावित्यादिना ब्रह्मादिसर्वनिषेधेऽपामपि निषेधात् । स एकाकी न रमते इत्यनेन पुरुषाकारस्योक्ततया निराकारत्वस्यापि वारणात् । तस्य ध्यानान्तस्थस्य यत्र स्तोममुच्यते, तस्मिन् पुरुषाश्चतुर्दशाऽजायन्तैका कन्येति प्रस्तुत्य, दशेन्द्रियाणि मन एकादशं तेजो द्वादशमहङ्कारस्त्रयोदशः प्राणश्चतुर्दश आत्मा पञ्चदशी बुद्धिरिति तेषां स्वरूपकथनं तेजःपदेन महत्तत्त्वस्य गणितत्वात् । 'विश्वमात्मगतं व्यञ्जन् कूटस्थो जगदङ्कुरः । स्वतेजसाऽपिबत्तीव्रमात्मप्रस्वापनं तमः' इति पुराणे तस्य तेजोरूपत्वावगमात् । अतो धर्मिश्रुत्येकदेशमालम्ब्य सकलशास्त्रविप्लावनं न सतां मार्ग इति बोध्यम् । एवं विश्वरूपेऽपि ज्ञेयम् । 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् । तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनामिति श्रुतेरनन्तरूपः परमेश्वरः कदाचिच्छ्रियाकारेणैव सर्वं जगत् करोतीति । अतो विचारकाणां विष्णुशिवप्रकरणीयवाक्यविलक्षणमस्मदुक्ताभिप्रायेण, न तु त्वदुक्तेनेति गृहाण । एतावान् परं विशेषो यन्नृसिंहतापनीये, अनुपनीतशतमेकमेकेनोपनीतेन तत्सममित्यादिना गृहस्थवानप्रस्थयतिरुद्रजापकाथर्वशिरःशिखाध्यायिपर्यन्तमुक्त्वा

एवं चिद्रूपस्य कारणतानिरूपणेन वेदान्तानां ब्रह्मपरत्वं निरूपितम् ॥ १० ॥

अतः परमानन्दरूपस्य कारणत्वोपपादनेन तद्वाक्यानां ब्रह्मपरत्वमुपपाद्यते, आनन्दमयाद्यष्टभिः सूत्रैः । तत्र तैत्तिरीयशाखायां ब्रह्मभृगुपाठकद्वयेन ।

अथ संशिरःशिखाध्यायिनमेकमेकेन मन्त्रराजजापकेन तत्सममिति नृसिंहमन्त्रराजजापके, उत्कर्षविश्रान्तिबोधनात् तद्विद्याविषयरूपप्रकर्षविश्रान्ति । एतदपि रहस्याध्ययनादेवावगन्तव्यमिति दिक् । अतः पर प्रकृतमनुसरामः ।

ईक्षत्यधिकरणप्रयोजनमाहुः * एवमित्यादि * वेदान्तवाक्येष्वजयमहार्थत्वादिना बोधितस्य चिद्रूपस्य कारणतासमर्थनेन सर्वेषां वेदान्तानां कार्यद्वारा ब्रह्मस्वरूपनिरूपकत्वाद् ब्रह्मपरत्वं ब्रह्मणि तात्पर्येण समन्वितत्वं निरूपितम् । तथाचेदमधिकरणप्रयोजनमित्यर्थः ॥

इति चतुर्थाधिकरणम् ।

नन्वीक्षत्यधिकरणे सर्वेषां वेदान्तानां ब्रह्मपरत्वं सिद्धमेवेत्यग्रिमाधिकरणस्य किं प्रयोजनमित्याकाङ्क्षायां तद्वदन्तस्तदवतारयन्ति * अतः परमित्यादि * । * तद्वाक्यानामिति * आनन्दप्रतिपादकवाक्यानाम् । तथाच लक्षणगताव्याप्त्यादिदोषपरिहारायेदमधिकरणम् । अत्रापि सामान्यविशेषभावगर्भोऽवसर एवाधिकरणसङ्गतिरित्यर्थः । तानि कानीत्याकाङ्क्षायां विषयवाक्यानां बाहुल्यादुपक्रममेव प्रदर्शयन्ति * तत्रेत्यादि * । आनन्दकार्यं प्रतिपाद्यत इति शेषः । तानि विषयवाक्यानीत्यर्थः । नन्वेतद्द्वये ब्रह्मणः कार्यमुच्यते । सत्यज्ञानानन्तलक्षणकं ब्रह्म प्रस्तुत्य तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्यादिना कार्यकथनात् । तथाग्रिमेऽपि, यतो वा इमानीति ब्रह्म लक्षयित्वा, आनन्दाद्ध्येव खल्विमानि भूतानीत्यादिना ब्रह्मण एव निष्कर्षाच्चानन्दकार्ये सन्देह

तत्रानन्दमय इति मयट्प्रत्ययान्तस्याब्रह्मत्वेनाजगत्कर्तृत्वे ब्रह्मप्रपाठकस्याब्रह्मपरत्वं स्यादिति तन्निराकरणार्थमानन्दमयाधिकरणम् । षडिन्द्रियस्वरूपद्वयानन्दभेदेनानन्दस्याष्टविधत्वादष्टसूत्राणि ।

ननु कथं सन्देहः, कथं वास्याब्रह्मत्वे प्रपाठकासङ्गतिरिति। उच्यते । ब्रह्मविदः परमाप्तिं प्रतिज्ञाय ज्ञेयांशे कारणत्वायानन्दांशमप्यत्रैव जडत्वपरिहाराय सर्वज्ञानन्दरूपं फलमुपपाद्य तन्निरूपणार्थं सर्वोऽपि प्रपाठक आरब्धः । तत्र साधनशेषत्रह्मणो वाक्यादेव निःसन्दिग्धप्रतीतेः फलस्य ब्रह्मत्वं प्रतिपादनीयम् ।

एव न भविष्यतीति व्यर्थोऽधिकरणारम्भ इत्यत आहुः * तत्रानन्दमय इत्यादि * । * तत्रेति * ब्रह्मप्रपाठके । *मयट्प्रत्ययान्तस्येति* मयट्प्रत्ययान्तप्रतिपाद्यस्य । तथाचानन्दरूपेणात्र जगत्कर्तृत्वस्य प्रतिपिपादयिषितत्वान्मध्ये च सन्दिग्धशब्दनिवेशात् तन्निवृत्त्यर्थमयमारम्भ इत्यर्थः । नन्वानन्दरूपेणैवात्र कारणताप्रतिपिपादयिषितेत्यत्र किं गमकमित्याकाङ्क्षायामधिकरणसूत्रसङ्ख्यैव गमिकेत्याशयेनाहुः । * षडित्यादि * षडिन्द्रियात्मपरमात्मभिर्हि लोके कार्यं क्रियते । ब्रह्मणि त्विन्द्रियाद्यभावादानन्देनैव कार्यं क्रियत इति तत्तदात्मक आनन्द एवेत्यानन्दस्यैवाष्टविधत्वात् तावन्ति सूत्राणीति सैव तथेत्यर्थः । एवमधिकरणारम्भे साधिते आनन्दमयस्याब्रह्मत्वेनापि प्रपाठकस्य ब्रह्मपरत्वं मन्वान एकदेशी चोदयति *ननु कथमित्यादि* । एवं प्रश्ने सन्देहादिकं व्युत्पादयन्ति । * उच्यते * । * ब्रह्मविद् इत्यादि * ब्रह्मविदाप्नोति परमिति वाक्ये ब्रह्मविदः परप्राप्तिं प्रतिज्ञायैतद्वाक्यविवरणभूतायामृचि आनन्दांशस्य कारणत्वबोधनाय सत्यं ज्ञानमनन्तं ब्रह्म यो वेदेति लक्षणवाक्योक्तज्ञेयांशस्य साधनशेषत्वेन तदपेक्षया फलस्योत्कृष्टत्वात् फलभूतमानन्दांशं तत्राप्रवेश्य कारणस्य प्रकृत्यादेर्लोके जडत्वदर्शनात् तद्विलक्षणत्वमानन्दांशे बोधयितुं तस्य जडत्वपरिहाराय विपश्चिद्ब्रह्मपदाभ्यां सर्वज्ञानन्दरूपं फ-

तत्राब्रह्मान्नमयादितुल्यवचनात् सुखवाचकशब्दानामेव वचनाच्च सन्देहः । आनन्दांशस्यैव कारणत्वेन ब्रह्मत्वप्रतिपादनार्थत्वात् तदभावे प्रपाठकवैयर्थ्यं च ।

फलस्य नैकट्यप्रतिपादनायात्मपदप्रयोगेण फलरूपेण जगत्कारणतामुक्त्वा तस्यैव मध्ये सर्वान्तरत्वमुपपादितम् । तस्माद् वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमय इति । अन्ते च, एतमानन्दमयमात्मानमुपसंक्रामतीति । आदिमध्यरूपे अनूद्य फलत्वेनोपपादितम् । तन्निरूपकस्यापि तत्तुल्यफलत्वं वक्तुमन्नमयादीनामपि ब्रह्मत्वेनोपासनमुक्तम् ।

त्वम् ऋगुत्तरार्द्धे, सोऽश्नुते सर्वान् कामान् सहेत्यनेनोपपाद्य तस्य सर्वज्ञानन्दरूपस्य फलस्य निरूपणार्थं सर्वोऽपि प्रपाठक आरब्धः । तत्रापि साधनशेषस्य ज्ञेयब्रह्मणो लक्षणवाक्यादेव निःसन्दिग्धं स्वरूपावगमात् फलस्य ब्रह्मत्वं प्रतिपादनीयम् । प्रतिज्ञावाक्ये परपदात् तस्य चर्गुत्तरार्द्धेन विवरणे भिन्नविभक्तेर्भिन्नपदवचनयोश्च कथनेन परपदार्थानिश्चयाद् ऋगव्याख्यानरूपे प्रपाठकेऽवश्यं कारणात्मादिना ब्रह्मत्वमुपपादनीयमित्यर्थः । एवं प्रपाठकार्थमुक्त्वा सन्देहबीजमाहुः * तत्राऽब्रह्मेत्यादि * । * अब्रह्मान्नमयादीति * अब्रह्मरूपं यदन्नमयादीत्यर्थः । एवं सन्देहमुपपाद्य प्रपाठकासङ्गतिमुपपादयन्ति * आनन्दांशस्यैवेत्यादि * सदेव सोम्येति, स ऐक्षत लोकान्नुसृजा इत्यादिश्रुत्यन्तरे सच्चिदंशयोः कारणत्वस्य प्रतिपादितत्वेन तत्सहचरितस्यानन्दांशस्यापि तथात्वेन तस्यान्यत्र कारणत्वाकथनात् तदभावे कार्यानुसारिलक्षणस्याव्यापकत्वप्रसक्तेरत्र तस्यैव कारणत्वेन ब्रह्मत्वप्रतिपादनार्थत्वात् तदभावे तद्वैयर्थ्यमित्येवमसङ्गतिरित्यर्थः ।

ननु कारणतावाक्ये तस्माद्वा एतस्मादात्मन इत्यात्मपदादात्मा वा इदमेक एवेत्यादावियत्रापि चिदंशकारणताप्रतिपादनस्य सम्भवद्युक्तिकत्वात् कथमत्रानन्दांशकारणताप्रतिपादनविनिगमनेत्याकाङ्क्षायामात्मपदोक्तितात्पर्यं वदन्तस्तद्विनिगमकयुक्तिमाहुः * फलरूपेत्यादि * यथा मलयजस्याभीष्टत्वेऽपि दूरत्वात् तदर्थं न

तत्र पूर्वपक्षेऽन्नमयादेरिवानन्दमयस्यापि न ब्रह्मत्वम् । अन्नमयादितुल्यवचनात् तथैव फलसिद्धेरिति । एवं प्राप्तेऽभिधीयते ।

आनन्दमयोऽभ्यासात् ॥ १२ ॥

आनन्दमयः परमात्मा, नान्नमयादिवत् पदार्थान्तरम् । कुतः । अभ्यासात् । अभ्यस्यते पुनः पुनः कीर्त्यत इत्यभ्यासः । तस्मात् । अभ्यासस्य भेदकत्वं पूर्वतन्त्रसिद्धम् ।

पुरुषप्रवृत्तिस्तथा माभूदिति तदर्थं फलस्य नैकट्यप्रतिपादनायात्मपदप्रयोगेण तदनन्तरादाभ्यां सन्निहितपरामर्शात् फलरूपेण जगत्कारणतामुक्त्वा तस्यैवानन्दस्य मध्ये सर्वान्तरत्वफलत्वमन्ते फलत्वं चानन्दमयपदाभ्यामुक्तम् । तेनादिमध्यावसानेषु कारणत्वसर्वान्तरत्वफलत्वानि तत्रैव साधितानि । तथान्नमयादीनां ब्रह्मत्वेनोपासनकथनात् तदान्तरत्वनिरूपकाणां यदा तत्तुल्यं फलत्वं, तदाऽऽनन्दमयस्य सर्वान्तरस्य फलत्वं किं वाच्यमित्याशयेन फलत्वमेव दृढीकृतम् । तथाच यदि केवलमात्मपदमेव कारणताप्रतिपादकवाक्ये स्यात् तदा त्वदुक्तं स्यादपि । न त्विह तथा । किन्तु तदेतत्पदसमभिव्याहृतम् । तथा सत्यात्मपदं नैकट्यमेव बोधयति, न तु तेन रूपेण कारणताम् । सा च प्रतिपिपादयिषिते पर्यवस्यतीति सम्पूर्णवाक्यविचारादवसीयते । अतः पूर्वोक्ताः फलत्वादय एतद्विनिगमकयुक्तिरूपा इत्यर्थः । एवं विनिगमकबोधनेन परोक्तं प्रतिक्षिप्य प्रकृते पूर्वपक्षमाहुः * तत्रेत्यादि * । * तथैवेति * ब्रह्मत्वेनोपासनेनैव । सूत्रं व्याकुर्वते * अभिधीयत इत्यादि * । ननु हेतुना साध्यसिद्धिर्व्याप्तिनिश्चये सति भवति । प्रकृते चाभ्यासत्वेन परमात्मबोधकत्वेन व्याप्त्यभावादसिद्धोऽयं हेतुरित्यत आहुः *अभ्यासस्येत्यादि* पूर्वतन्त्रे हि, समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजतीति पञ्चकृत्वो यजत्यावृत्तौ मीमां-

यथा पूर्वतन्त्रे शब्दान्तराभ्याससंख्यागुणप्रक्रियानामधेयानां षण्णां कर्मभेदकत्वमेवमेवानन्दमयस्याप्यभ्यासात् पूर्ववैलक्षण्यम् । अतोऽतुल्यत्वाद् ब्रह्मत्वम् । एवमभ्यासः श्रूयते । को ह्येवान्यात् कः प्राण्यात्, यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयातीत्यर्थतोऽभ्यासः स्तुत्या ।

सितं, किमत्र तनूनपादादिषु चतुर्षु पूर्वयागान्तरविधानमिति । तत्र पूर्वपक्षिणा धात्वर्थप्रत्यभिज्ञानादिडादिगुणविधानार्थं समिद्यागानुवादेऽङ्गीकृते सिद्धान्तितम् । भेदाभेदसाधारण्या युक्तिश्रुत्या यागमात्रप्रत्यभिज्ञानेन श्रुतेर्यागान्तरपक्षेऽपि तुल्यत्वाद् गुणविधानपक्षेऽपि चतुर्थीतद्धितयोरभावेन देवतायास्तृतीयाया अभावेन द्रव्यस्य च वक्तुमशक्यत्वाद् द्वितीयया चाग्निहोत्रं जुहोतीत्यादिवत् तयोः कर्मनामत्वनिश्चयात् पदान्तरसमभिव्याहृतेन यजतिना यागान्तरमेव बोध्यत इति । तथाच यत्र यत्र वाक्ये पदान्तरसमभिव्याहृतस्य यस्य पदस्याभ्यासस्तत्र तस्य पदस्य पूर्वस्मादर्थान्तरगमकत्वमिति व्याप्तिः पूर्वस्मादर्थान्तरत्वेन परमात्मसाधनायासिद्धो हेतुरित्यर्थः । नन्वभ्यासस्य भेदकत्वमात्रं सिद्धम् । तस्य फलमितरभेदः सोऽत्र शब्दान्तरादेव सिद्धो वाक्यान्तरसिद्धमसन्निहितमभ्यासं स्वलाभाय नापेक्षते । तथा सति कथं तेन परमात्मावगतिरित्यत आहुः * यथेत्यादि * तथाच शब्दान्तरेण सिद्धेऽपि भेदे वैलक्षण्यमभ्यासः साधयति । सिद्धाच्च वैलक्षण्यादन्नमयादिभ्य आनन्दमयस्यातुल्यत्वं सिद्ध्यति । तेन ब्रह्मात्मावगतिरित्यर्थः । नन्वभ्यासस्यान्नमयादिवाक्येष्वपि दर्शनादत्रैव कथं वैलक्षण्यसाधकत्वमित्यत आहुः * एवमभ्यास इत्यादि * अयमर्थः । पूर्वानुवाकेष्वन्नादीनां प्रशंसासु सत्स्वपि, को ह्येवान्यादिति वाक्ये हिशब्दद्वयेन पूर्वोक्तं सर्वं परामृश्यते । तेन तदन्नादिकं प्रति व्यतिरेकमुखेनानन्दस्यैव हेतुता श्राव्यते । तेनान्नादीनामपि स्वस्वकार्ये सामर्थ्यं तदानन्दसापेक्षतया बोध्यत इति सर्वोपजीव्यत्वेन स्तुत्या सर्वेषा-

मयडर्थत्वप्रकृतिस्तु तुल्या । पुनर्वचनेनाभ्यासेन प्रवाहाद् भेदे साधिते ब्रह्मत्वम् । न तु द्वैतापत्तिः । उत्तरस्य साधकत्वात् । तस्माद् आनन्दमयं ब्रह्मैव ।

ऽऽनन्दोऽर्थतोऽभ्यस्यत इति साधकत्वेन वैलक्षण्यसाधकत्वमित्यर्थः । ननु तावताऽभ्यासस्य पूर्वेष्वपि सत्त्वाद् वैलक्षण्यस्य तेष्वपि सिद्धेर्वैलक्षण्यं नानन्दमयस्य परमात्मत्वनिर्णायकम् । लिङ्गेन सिद्धस्यतस्य मयट्श्रुत्यपेक्षया दुर्बलत्वात् । अर्थान्तरत्वेऽपि प्रायपाठेन च तुल्यत्वनिश्चयात् । किञ्चायं विकारे मयट् । द्व्यचश्छन्दसीतिनियमस्य, मृण्मयं गृहं राजग्रह गमामित्यादिमन्त्रेषु व्यभिचारात् । तेन विकारार्थे द्व्यचो मयडेव । अन्यस्मात्तु विकारार्थे भवति, न भवति चेति व्यवस्थितविकल्पाश्रयणेन द्व्यचोऽप्यानन्दशब्दात् तस्य विकारार्थे सुवचत्वात् । तथा सति न तेन वैलक्षण्यसिद्धिर्वैलक्षण्यसिद्धावपि न तेन परमात्मत्वसिद्धिरित्यत आहुः * मयडर्थेत्यादि * मयट् प्रत्ययः । अर्थत्वमर्थान्तरत्वम् । ताभ्यां सहिता प्रकृतिर्मयडर्थत्वप्रकृति शब्दान्तररूपा । सा तुल्या व्यवस्थितविकल्पाश्रयणेऽपि पदार्थान्तरपक्षे परमात्मपक्षे च साधारणा । यद्वा स्तुत्या तुल्या वाक्यशेषस्तुतिस्ताद्दशामर्थान्तरं बोधयति । अतो न तयाऽर्थान्तरप्रायपाठेन वा विकारार्थाग्रहो युज्यते । तदपेक्षयाऽसाधारणस्य लैङ्गिकाभ्यासस्यैव ज्यायस्त्वादित्यर्थः । तेन सिद्धमाहुः * पुनरित्यादि * किमः पुनर्वचनेन बोधितो य आर्थिकोऽभ्यासस्तेन मयडर्थान्तरयोः प्रवाहाद् भेदे आनन्दमयस्य साधिते तस्य ब्रह्मत्वं सिद्धमित्यर्थः । नन्वानन्दमयस्य ब्रह्मत्वे द्वैतापत्तिः । तस्य प्रियमेव शिर इत्यादिसम्बन्धषष्ठ्या तस्य भेदबोधनात् । तथा सति ब्रह्मत्वस्याप्यसिद्धिः । नेह नानास्तीत्यादौ ब्रह्मणि भेदनिषेधादित्याशङ्कायामाहुः * नत्वित्यादि * उत्तरस्यैतदभ्यासवाक्याद्ग्रिमस्य यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते अथ तस्य भयं भवतीत्यन्तरशब्दवाच्यभेदकृतिनिन्दावाक्यस्य राहोः शिर इत्यादिवदभेदषष्ठीसाधकत्वान्न द्वैतापत्तिरित्यर्थः । सिद्धमाहुः * तस्मादित्यादि * बाधाभावात् तथेत्यर्थः । उपचयापचयशङ्किताब्रह्मत्वपरिहारस्तु गुणोपसंहारपादे प्रियशिरस्त्वादिसूत्रे आचार्येण

अथवा स नैव रेमे, तस्मादेकाकी न रमते स द्वितीयमैच्छत्, स हैतावानासेत्यादिश्रुतिभिरेष उ एवेतिश्रुतेश्च तानि तानि साधनानि कारयित्वा तानि तानि फलानि ददद् भगवान् स्वक्रीडार्थमेव जगद्रूपेणाविर्भूय क्रीडतीति वैदिकैर्निर्णीयते । एतदेव काण्डद्वयेऽपि प्रतिपाद्यते । अन्यथा जीवस्य साधनफले निरूपयन्त्याः श्रुतेर्जीवपरत्वमेव स्यान्न ब्रह्मपरत्वम् ।

कर्मब्रह्मणोरपि जीवशेषत्वं नापेयात् ।

विधेय एवेति न चोद्यावसर इति बोधयितुमेवकारः । एवमस्मिन् वर्धकेऽन्नमयादीनां ब्रह्मकार्यत्वेन पदार्थान्तरत्वमङ्गीकृत्य । आनन्दे फलत्वस्य वक्तव्यत्वात् साधनशेषभूते शेषे ब्रह्मण्यानन्दं चानिवेद्यार्थिकाभ्यासादानन्दमयस्य तेभ्यो भेदः साधितः ।

साम्प्रतं तु प्रभुचरणैरखण्डब्रह्मवादेन पूर्वं सिद्धं कार्यस्यापि ब्रह्मत्वमनूद्यानन्दस्य साधनशेषत्वेऽपि रूपभेदेन फलत्वानपायाज्ज्ञेयकोटावानन्दं निवेद्यापि तेभ्य आनन्दमयभेदस्तस्यैव एव शारीर आत्मेत्यादिवाक्याभ्यासाद् वर्णकान्तरेणाधिदैविकवादमाश्रित्य साध्यते * अथवेत्यादि * । तदर्थंपूर्वं सर्वश्रुतीनां ब्रह्मपरत्वेनैकवाक्यत्वाय प्रतीयमानस्य द्वैतस्य बाध्यताप्रकारबोधनाय च सृष्टिप्रक्रियास्मारणपूर्वकमखण्डब्रह्मवादस्वरूप सप्रमाणं निरूप्यते * स वै नैवेत्यादि * । * वैदिकैरिति * प्राचीनौपनिषदैः । एतेन सम्मतिरपि शिष्टानामुक्ता । एतेन सृष्टीच्छायां प्रयोजिका क्रीडेच्छेति बोधितम् । * एतदेव काण्डद्वयेऽपि प्रतिपाद्यत इति * शाब्दस्य हि ब्रह्मण एष पन्था इत्यनेन द्वितीयस्कन्धे उक्तार्थस्यैवोपबृंहणात् क्रीडनमेव प्रतिपाद्यत इत्यर्थः । तेन सृष्टीच्छा क्रीडेच्छारूपैवेति निर्णीयोक्तोपबृंहणेऽन्यस्यार्थस्य सम्भवदुक्तिकत्वात् तदनुक्त्या विपक्षे बाधकं तर्कमेवाहुः * अन्यथेत्यादि * । * अन्यथेति * भगवतः सर्वरूपत्वाभावे । *नापेयादिति* पारार्थ्यस्य शेषलक्षणस्य फलद्वारा तत्र सत्त्वान्नापेयादित्यर्थः । नच जीवशेषत्वमेव काण्डद्वयस्यास्तु

एवं सति 'पूर्वकाण्डेऽवान्तरफलान्युक्त्वैतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेर्निरवच्छिन्नानन्दात्मकमेव परमं फलमिति तद्विवक्षया पूर्वं सामान्यत आह। संसाधनं तैत्तिरीये। ब्रह्मविदाप्नोति परमिति। अक्षरब्रह्मवित् परं ब्रह्माप्नोतीत्यर्थः। अत्र परशब्दस्य पूर्वपरत्वे तावित्येव वदेत्। पूर्वं ब्रह्मोक्त्वाग्रे यत् परमित्याह तेन सान्निध्यात् तत एव 'परं' पुरुषोत्तमरूपमेवाऽत्राभिमतमिति ज्ञायते।

किञ्च प्रतिवादिना तदात्मज्ञानात्मिकैव वाच्या। तथा सति ब्रह्मप्राप्तो ब्रह्म प्राप्नोतीत्यर्थः स्यात्। स चासङ्गतः। साधनसाध्यभावव्याहतिश्च।

बाधकाभावादिति वाच्यम्। सर्वे वेदा यत् पदम्, ओमित्येतदक्षरम्, इदं सर्वं, यस्यात्मा शरीरमित्यादिषु वेदादेर्भगवत्परत्वस्य भगवतो जीवशरीरत्वस्य च श्रावणेन तद्विरोधस्यैव बाधकत्वात्। तस्मादत्र आशुक्लेशः। एवमखण्डब्रह्मवादस्यैव श्रौतत्वादुक्तरीतिक एवार्थ इति हृदि कृत्वाधिदैविकवादेन भेदं साधयितुं विषयवाक्यं व्याकरिष्यन्तः सिद्धमनूद्य तदवतारयन्ति *एवं सतीत्यादि*। *एवं सतीति* शङ्कादोषपरिहारायोक्तरीत्या श्रुतीनां ब्रह्मपरत्वे सति। *इति श्रुतेरिति* आनन्दान्तरस्यैव द्वादशान्वयादिति शेषः। *सामान्यत इति* संक्षेपेण। विषयवाक्यस्यार्थतोऽनुवृत्त्या व्याकुर्वन्ति *ब्रह्मेत्यादि*। साधनशार्थाद् ब्रह्मणः परस्यातिरिक्तत्वे गमकमाहुः *अत्रेत्यादि*। तावित्येव शब्दान्तरेण निर्देश एव भेदगमक इत्यर्थः। एतेन निरवधिसंख्यानात्मकत्वे सत्यक्षरादुत्कृष्टत्वमिति परस्य लक्षणमप्युक्तप्राय-मतिचोत्कृष्टत्वमानन्दमीमांसोक्तं, यतो वाच इति श्लोके गणनापरिच्छेदरहितवाङ्मनसगोचरानन्दरूपत्वेन सिद्धं भविष्यति। ननु सर्वं ब्रह्मेतिवित् परं ब्रह्माप्नोतीत्यर्थोक्तौ न कोऽपि दोष इत्यत आहुः *किञ्चेत्यादि*। *असङ्गत इति* पुनरुक्तिदोषादसङ्गतः। नन्वत्र व्याख्यातव्याख्येयभाव एव सङ्गतिरिति चेत् तत्राहुः *साधनेत्यादि* *नच

अतः परं विशेषतस्तद्विवक्ष्यमाणानुभवैकगम्यं तत्स्वरूपं नान्यथावगम्यमिति ज्ञापयितुमन्यमुखेनाह । तदेषाऽभ्युक्तेति । अन्यथा सर्वार्थतत्त्वप्रतिपादिका श्रुतिरेवं कथं वदेत् । तदित्यव्ययम् । तथाच तत् पूर्वोक्तं ब्रह्मविदः परमाप्तिलक्षणमर्थं विशदतया प्रतिपाद्यत्वेनाभिमुखीकृत्योपगृह्य ऋगेषा विदितपरब्रह्मकैरुक्ता । पूर्ववाक्योक्तार्थस्य वैशद्यमनया क्रियत इत्यर्थः सम्पद्यते । तामेवाह । सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता । सोपपत्तिकमानन्दात्मकत्वमग्रे निरूपणीयमित्यधुना तदनिरूप्य सच्चिदंशौ देशकालापरिच्छिन्नत्वं चोक्तवती ।

शाब्दज्ञानवान् परं साक्षात्काररूपं ज्ञानमाप्नोतीत्युक्तौ न दोष इति वाच्यम् । प्रत्यक्षविरोधात् । न च साधनान्तरासमवधानाद्दोष इति वाच्यम् । तस्यात्रानभिप्रेतत्वात् । अनुपदेशेन तथावसायात् । यमेवैष इति श्रुत्या साक्षात्कारस्य वरणेतरसाधनानधीनत्वाच्च । साधनान्तरकल्पनायामपि पूर्वोक्तरीत्या परशब्दवैयर्थ्याच्च । अत उक्तविधस्यैवार्थस्यात्र सङ्क्षेप उक्तिरेवाऽत्रेति निश्चयः । एवं सामान्यत उक्तिं तथैव व्याख्याय विशेषतो व्याख्यातुं सामान्यविशेषभावं गमकाकाङ्क्षायां व्याख्यानव्याख्येयभाव एव गमक इत्याशयेनाहुः *अतः परमित्यादि * । * अन्यथेति * व्याख्यानत्वाभावे, परस्य तत्प्राप्त्यनुभवैकवेद्यत्वाभावे च । *एषामिति* अन्यमुखेन । * अव्ययमिति * हेतुपञ्चम्यन्तमव्ययम् । श्रुतिव्याख्यानगतं तत्पदं त्वर्थाध्याहृतमर्थविशेषणत्वाय वाऽव्ययमित्युक्तम् । तथाच सम्पूर्णा ऋक् फलांशविवरणार्थैवेति सम्पद्यत इत्यर्थः । तामित्यादिना ऋचं पठित्वा व्याकुर्वन्ति * सोपपत्तिकमित्यादि * । एवमग्रे फलनिरूपणावसरे निरूपणीयमित्यधुना साधननिरूपणावसरे सोपपत्तिकमनिरूप्य सत्यज्ञानपदाभ्यां सच्चिदंशावनन्तपदेन देशकालापरिच्छिन्नत्वं च ज्ञेयस्य ब्रह्मणः साधनशेषत्वायोक्तवतीत्यर्थः । एवं पूर्ववर्णकस्यास्य ह्यांशे

अथवा, अक्षरब्रह्मण्यानन्दात्मकत्वे सत्यपि तस्य परिच्छिन्नत्वान्न परमफलत्वमत आनन्देऽपरिच्छिन्नत्वमेव परमफलतावच्छेदकमिति तद्धर्मपुरःसरं परमानन्द एवानन्तशब्देनोच्यतेऽत्र । सत्यं विज्ञानमानन्दं ब्रह्म, सच्चिदानन्दविग्रहमित्यादिश्रुतिषु त्रयाणामप्येकमक्रमपठितत्वाद् द्वितीयोक्तौ तन्नियतसहचरितत्वेनाऽनुक्तोऽप्यानन्दः प्राप्यत एवेत्याशयेन वाऽऽनन्दः स्फुटतया नोक्तः । अथ वेदनपदार्थमाह । यो वेदेत्यादिना । अत्रेदमाकूतम् । 'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन । यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम्' इति श्रुत्या वरणेतरसाधनाप्राप्यत्वमुच्यते ।

कारणत्वायानन्दांशाप्रवेश्येत्यस्य सङ्ग्रहाय तदाशयो विशदीकृत । तेन ब्रह्मत्वे तुल्येऽपि क्षरस्य देशकालापरिच्छिन्नत्वाभावान्न विवक्षितफलसाधनशेषत्वम् । अक्षरस्य तु तदपरिच्छिन्नत्वात् तादृशसाधनशेषत्वमिति बीजं प्रकाशितम् ।

अत. परं प्रस्तूयमानवर्णकरीत्या विवक्षितफलविवरणार्थमप्यानन्दांशप्रवेशं वक्तुमनन्तशब्दस्यार्थान्तरमाहु * अथवेत्यादि * । * परिच्छिन्नत्वादिति * गणनया परिच्छिन्नत्वात् । एवमत्र वेद्यपदार्थो गणितागणितानन्दभेदेन द्वेधा विवृत । अनन्तरूपमितिश्रुत्यन्तरादत्राप्यनन्तपदं रूपानन्त्यवाचकमेवास्तु । तथा सति नानन्तपदेन परमानन्दलाभ इत्याशङ्का पक्षान्तरमाहु. * सत्यं विज्ञानमित्यादि * । * अथेति * वेद्यनिरूपणोत्तरम । नन्वेवं द्वेधा वेद्यव्याख्याने किं बीजमित्याकाङ्क्षायामाहु, * अत्रेत्यादि * । * इदमाकूतमिति* ऋचि वेदनव्याख्यानांशे इद वक्ष्यमाण तात्पर्यम् । * वरणेतरसाधनाप्राप्यत्वमिति * अत्र प्रवचनपदं वेदे रूढम् । तदत्र वाच्यतासम्बन्धेन तदुक्तसाधनान्युपलक्षयति । मेधा धारणावती बुद्धि. सा च पुरुषनिष्ठस्वाभाविकसाधनानि श्रुत चानुगत तु साधनानि-

एवं सति श्रुतिद्वयविरोधपरिहारायाक्षरब्रह्मज्ञानेनाविद्यानिवृत्त्या प्राकृतधर्मराहित्येन शुद्धत्वसम्पादनेन पुरुषोत्तमप्राप्तौ स्वरूपयोग्यता सम्पाद्यते । तादृशे जीवे स्त्रीयत्वेन वरणे भक्तिभावात् सहकारियोग्यतासम्पत्त्या पुरुषोत्तमप्राप्तिर्भवतीति निर्णीयते । तदैव गुहायां परमव्योमाविर्भावः । परो मीयते ज्ञायतेऽनेनेति तथा । ज्ञानमार्गीयजीवज्ञेयप्रकारकाद्वैशिष्ट्येनापि तथा । परमव्योम्नोऽप्यलौकिकत्वज्ञापनायालौकिकः प्रयोगः कृतः ।

ति तथा । * एवं सतीति * व्याख्येये यजुषि वेद्यनप्राप्त्यत्व उक्ते सति । * सहकारियोग्यतासम्पत्त्येति * सहकारियोग्यतयोः सम्पत्त्या । तथाच वरणाभावे ज्ञानमार्गरीत्या ज्ञानप्रधानतया ब्रह्मज्ञानं, वरणे तु भक्तिमार्गरीत्याऽऽनन्दप्रधानतया ब्रह्मज्ञानं, येन परमातिरिक्ति वेद्यस्य द्विधाविर्भाव एव द्विधा व्याख्याने बीजमित्यर्थः । अस्या ऋच एवं निर्णायकत्वे गमकमाहुः । * तदैवेत्यादि * । * कृत इत्यन्तम् * । तथाच श्रुत्यन्तरे वेद्यनिरूपणे हार्दाकाशविशेषणत्वेन परमादिपदाभावोऽत्र तु तत्सद्भाव इत्येव गमकमित्यर्थः । यत आकारायुधादिलिङ्गानां व्यूहेष्ववतारेषु च सत्त्वात् पुरुषोत्तमत्वं तैर्निश्चेतुमशक्यम् । अक्षरस्थितत्वज्ञाने तु निश्चेतुं शक्यमतोऽक्षरात्मकत्वव्योम्नः परमत्वम्, अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमाङ्गतिं, यं प्राप्य न निवर्तन्ते तद्धाम परमं ममेति गीतावाक्यस्वारस्यात् । तस्य परमव्योमत्वं तु, ऋचो अक्षरे परमे व्योमन्, यदक्षरे परमे व्योमन्नित्यादिश्रुतिभ्योऽवगन्तव्यम् । नचाव्यक्तपदादक्षरपदं प्रकृतिवाचकमिति शङ्क्यम् । यं प्राप्य न निवर्तन्त इति मुक्तिस्थानत्वरूपलिङ्गविरोधात् । प्रकृतिं प्राप्तानां तु पुराणे प्रकृतिचिन्तकानधिकृत्य, पूर्णं शतसहस्रं तु तिष्ठन्ति विगतज्वरा इति वाक्येन तदुत्तरं पुनरावृत्तिबोधनात् । द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव चेति पुरुषत्वोक्तिविरोधात् । अव्यक्तत्वं त्वक्षरीयमेव प्राथमिककार्यत्वात् प्रकृतिगामि भवति । आकाशजन्ये वायौ नीरूप-

भक्त्याऽहमेकया ग्राह्यो, नाहं वेदैरित्युपक्रम्य, भक्त्या त्वनन्यया शक्य इत्यादिस्मृतिभ्यश्चैवमेव सङ्गच्छते । अन्यथा ज्ञानमार्गिणामपि ब्रह्मविदो परमाप्तिः स्यान्न त्वेवम् । 'मुक्तानामपि सिद्धानां नारायणपरायणः । सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने । तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः । न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह' इत्यादिवाक्यैः । एतदेवाह । गुहायां हृदयाकाशे यदाविर्भूतं परमं व्योमाक्षरात्मकं व्यापि वैकुण्ठ, तस्य पुरुषोत्तमगृहरूपत्वात् तत्र निहितं स्थापितमिव वर्तमानं यो वेद स भक्तो ब्रह्मणा नित्याविकृतरूपेण विपश्चिता, विविधं पश्यच्चित्तं हि विपश्चित्त्वम् । पृषोदरादित्वात् पश्यच्छब्दावयवस्य लोपं कृत्वा व्युत्पादितो विपश्चिच्छब्दः । तेन विविधभोगचतुरेण सह सर्वान् कामानश्नुत इत्यर्थः । एतेन परमाप्तिपदार्थ उक्तो भवति । शुद्धपुष्टिमार्गीयत्वादस्य भक्तस्य स्वातन्त्र्यं भोग उच्यते । सहभावोक्त्या ब्रह्मणो गौणत्वम् । अत एव भक्ताधीनत्वं भगवतः स्मृतिष्वप्युच्य-

---

स्यपत् । न तु मर्यादाभक्तस्यमात्रग्रहणम् । अतोऽक्षराधिष्ठातृत्वं पुरुषोत्तमाऽसाधारणमित्यक्षरस्यैव तद्धर्मकत्वमिति हृदयम् । ननु चरणपदार्थो लक्षणया ज्ञापनात्मको ग्राह्यो, न तु रूढोऽङ्घ्र्याकारात्मक इति मात्र भक्तिनिवेशे किञ्चिद् बीजं पश्याम इत्याशङ्कायां श्लोकमुपष्टम्भन्ति * भक्त्येत्यादि * । * एवमेवेति * चरणपदस्याङ्घ्र्याकारपरत्वमेव । विपक्षे बाधकं तर्कमाहुः * अन्यथेत्यादि * । * न त्वेवमिति * न ज्ञानमार्गिणां विवक्षितलक्षणा परमाप्तिः । एवम् श्रुत्यो निर्णायकत्वमुपपाद्यैवंप्रकारकज्ञानस्य फलनामकरीयकत्वानुसारेण सर्वमेव व्याकुर्वन्ति । * एतदेवाहेत्यादिना * । * यननेति * ऋगुत्तरार्धेन । एतमर्थं स्मृत्योपष्टम्भन्ति * अत एवेत्यादि * । नवास्य नवमस्कन्धीयपद्यवतस्य सात्त्विकांश-

ते । अहं भक्तपराधीनः, वशे कुर्वन्ति मां भक्त्येत्यादिवाक्यैः ।

यद्यप्यश भोजन इति धातोरश्नातीत्येवं रूपं भवत्यशूङ् व्याप्ताविति धातोर्भवत्यश्नुत इति रूपं, विकरणभेदात् पदभेदाच्च । तथाप्यत्राश भोजन इति धातोरेव प्रयोग इति ज्ञायते । तथाहि । अत्राशनक्रियायां ब्रह्मणा सहभाव उच्यते । तथाच व्याप्त्यर्थकत्वे ब्रह्मणा सह भूतान् कामान् व्याप्नोतीत्यर्थो भवत्यथवा ब्रह्मणा सह भूतः स जीवः कामान् व्याप्नोतीति । एतौ त्वनुपपन्नौ । न हि कामवज्जीवकर्तृकव्यापनक्रियाकर्मत्वं ब्रह्मणि सम्भवत्यतिमहत्त्वात् । व्यापनं चात्र स्वाधीनीकरणमेव वाच्यम् । न हि कामानां तथात्वं स्वतः पुरुषार्थरूपम् । भोगशेषत्वात् तेषाम् । पूर्वोक्तपरमाप्तिव्याकृतिरूपत्वाभावस्य तथार्थोऽनुपपन्नः ॥

भूतविष्णुवाक्यत्वेन पुरुषोत्तमवाक्यत्वाभावात्पूर्वोक्तार्थोपष्टम्भकत्वमिति प्राहुरम् । तस्य भिन्नत्वेऽपि मूलपुरुषरूपनामलीलासाम्येनादोषात् । पराशरपुराणे 'वैष्णवानि पुराणानि समस्तानि महामुने । त्रिमूर्तीनां हरेर्नाम्ना मूर्त्यां तस्य परं पदम् । प्रवदन्ति' इति साम्यस्मरणादिति ॥ उक्तेऽर्थेऽनुपपत्तिमुद्भाव्य परिहरन्ति * यद्यपीत्यादि * । व्युत्पादयन्ति * तथाहीत्यादि * । विपक्षोद्भावितयोरर्थयोराद्यं दूषयन्ति * न हीत्यादि * । * कामवदिति * सप्तम्यर्थे वतिः । * अतिमहत्त्वादिति * 'एकः शुद्धोऽक्षरो नित्यः सर्वव्यापी तथा पुमान् । सोऽप्यंशः सर्वभूतस्य मैत्रेय परमात्मनः' इतिवाक्यादित्यर्थः । द्वितीयं दूषयन्ति * व्यापनं चेत्यादि * संयोगरूपव्यापनस्यापुरुषार्थत्वाद् व्यापकात्मवादिमते तस्य स्वतः सिद्धत्वाच्च तद्विधानामङ्गत्वापत्तेरत्र कामस्वाधीनीकरणरूपं तद् वाच्यम् । तेन कामप्राप्तिरेव व्याकृता भवति, न परमाप्तिरिति सोऽर्थोऽनुपपन्न इत्यर्थः । एतेनैव, ब्रह्मणा करणभूतेन सर्वान् कामान् सहाऽश्नुते युगपद् भुङ्क्त इति योजनासिद्धोऽर्थोऽपि निरस्तो बोध्यः ।

तेन अश भोजन इति धातोरेवायं प्रयोगोऽर्थस्यालौकिकत्वज्ञापनायालौकिकः प्रयोगः कृतः । व्यत्ययो बहुलमिति सूत्रेण छन्दसि तद्विधानात्, श्नाप्रत्ययपरस्मैपदयोर्व्यत्ययेन श्नुप्रत्ययात्मनेपदे जाते इति भोगार्थक एवायं धातुः । एवमेव, न तदश्नोति कश्चन, न तदश्नोति कश्चनेत्यत्र प्रत्ययमात्रव्यत्ययेन प्रयोगोऽशधातोरेवेति ज्ञेयम् । अन्यथा सर्वव्यापकस्य ब्रह्मणस्तन्निषेधोऽनुपपन्नः स्यात् ।

ननु सकामोऽत्रोपासकस्तदुपास्यं च सगुणं ब्रह्म । द्वयोरपि कामोपभोगश्रवणात् । यत्र हि द्वैतमिव भवति तदितर इतरं पश्यतीत्युपक्रम्य, यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदित्यादिनाऽन्यदर्शनादिनिषेधाद् ब्रह्मविदः कामोपभोगासम्भवश्चेति चेन्नैवम् । तदेषाऽभ्युक्तेति वाक्येन पूर्ववाक्योक्तार्थनिरूपकेणर्गिरयुक्तत्वेन प्राकृतगुणसम्बन्धस्य तत्र वक्तुमशक्यत्वात् । तथा सति ब्रह्मविदाप्यपरत्वयोरसम्भवापत्तेः । न च वेद्यस्यागुणत्वमुत्तरस्य सगुणत्वमिति वाच्यम् । परत्वानुपपत्तेः ।

भोगस्य सुखसाक्षात्कारातिरिक्तोदासीनज्ञानात्मकोऽर्थस्तु पूर्वमेव निरस्तः,* स चासङ्गत इत्यादिना । तेनोक्तैव योजना । अयमेव चार्थ इति निश्चयः । सिद्धमाहुः * तेनेत्यादि * । अंते इति प्रथमाद्विवचनम् । श्रुत्यन्तरेऽप्ययमेवार्थ इत्याहुः * एवमित्यादि * तथा च तत्राप्यस्थूलादिलक्षणं ब्रह्म कमपि न भुङ्क्ते, कोऽपि ब्रह्म न भुङ्क्त इत्येवार्थो वक्तव्यः । सकलप्रापञ्चिकधर्मनिषेधे प्रापञ्चिकभोगनिषेधकथनस्यापि युक्तत्वादित्यर्थः । एवं परमाप्तिपदार्थे भोगरूपे व्याख्याते भोगलिङ्गात् परस्य सोपाधिकत्वं, ब्रह्मवित्पदस्य सकामोपासकपरत्वं चापाद्य चोदयति * ननु सकाम इत्यादि * तथा च वृथा पूर्वोक्ता चिन्तेति चोद्याशयः । तत्र समादधते * नैवमित्यादि * । तत्र हेतुमाहुः * तदेषेत्यादि * दर्शन इत्यन्तम् * । एवं पूर्वदूषणं परिहृत्य

साधनशेषभूतस्यागुणत्वं तत्फलस्य सगुणत्वमित्यसङ्गततरं च । यद्धि पश्यन्ति मुनयो गुणापाये समाहिता इति श्रीभागवतवाक्येन गुणातीतपुंसां वैकुण्ठदर्शनाधिकार उच्यते यत्र तत्र किमुवाच्यं तत्परदर्शने ।

यच्चोक्तं ब्रह्मविदो द्वैतदर्शनानुपपत्त्या कामभोगासम्भव इति । तत्राप्युच्यते । यत्र त्वस्य सर्वमात्मैवाभूदिति श्रुतिरखण्डब्रह्माद्वैतभाने ब्रह्मविदः प्रापञ्चिकभेदादर्शनं वदति, न तु प्रपञ्चातीतार्थदर्शनं बोधयति निषेधति वा । पुरुषोत्तमस्वरूपं तु यावत्स्वधर्मविशिष्टं प्रपञ्चातीतमेवेति तद्दर्शनादौ किमायातम् । पुरुष एवेदꣳ सर्वं यद् भूतं यच्च भाव्यमित्यनेन ब्रह्मात्मकत्वं प्रपञ्चस्योक्त्वैतदपि तस्य विभूतिरूपं पुरुषस्त्वितो महानित्याह, एतावानस्य महिमा अतो ज्यायांश्च पूरुष इति श्रुतिरतो न किञ्चिदनुपपन्नम् । एवं सति ब्रह्मविदः परप्राप्तेः पूर्वदशा तत् केनेत्यादिनोच्यते, उत्तरदशा तु सोऽश्नुत इत्यनेनोच्यत इति सर्वं सुस्थम् । छान्दोग्येऽपि, यत्र नान्यत् पश्यतीत्यादिना भूमस्वरूपमुक्त्वा, आत्मैवेदꣳ सर्वमित्यन्तेन तद्विभावमुक्त्वोच्यते । स

द्वितीयं परिहर्तुमनुवदन्ति *यच्चेत्यादि* । समादधते *तत्रापीत्यादि* । *किमायातमिति* श्रुत्यविरोधात् किं दूषणमायातं, न किमपीत्यर्थः । ननु धर्मविशिष्टस्य पुरुषोत्तमस्य प्रपञ्चातीतत्वे किं मानमित्याकाङ्क्षायां तदुपपादयन्ति *पुरुष एवेत्यादि* । तथा चोक्तश्रुत्या प्रपञ्चाज्ज्यायस्त्वकथनेन तदतीतत्वमेव बोध्यतेऽतस्तथेत्यर्थः । एवं चोद्यनिराकरणेन पूर्वोक्तचिन्तायाः सार्थकत्वाय सिद्धमाहुः । *एवं सतीत्यादि* । ननु वाक्यभेदेन पूर्वोत्तरदशाद्वैपरीत्यस्यापि शक्यवचनत्वात्कथमिदं सुस्थमिति शङ्कायामाहुः *छान्दोग्येऽपीत्यादि* । *तद्विभावमिति* उत्तरदशारूपसर्वात्मभावस्योद्दीपकमखण्डब्रह्मात्मरूपं विभावम् । तथा चात्राऽखण्डब्रह्मज्ञानात्मरतिक्रीडादीनां पू-

वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति सर्वेषु लोकेषु कामचारो भवतीति । एतच्च, लिङ्गभूयस्त्वात् तद्धि बलीयस्तदपीत्यधिकरणे प्रपञ्चयिष्यते ।

अथवा तदेषाऽभ्युक्तेति वाक्येन पूर्ववाक्योक्तब्रह्मनिरूपकेयमृगित्युच्यते । तत्र साधनफले निरूपिते इति ऋच्यपि ते एव निरूप्येते । तथाहि । आनन्दस्य फलात्मकत्वेन साधनशेषत्वे ब्रह्मविद्यनुसरत्वा, यो वेदेसन्तयर्चा, ब्रह्मविद्विशेषतो वाक्यस्य विवरणं क्रियते । एतेन फलाप्तौ स्वरूपयोग्यतासम्पत्तिरुक्ता । तत उक्तरीत्या भगवद्दर्शनेन भक्तिलाभे गुहायामाविर्भूतं यत् परमं व्योम, तस्मिन्निहितः पुरुषोत्तम एवेति । तं निहितमिति तृतीयार्थे द्वितीया । तथा च तत्र निहितेन ब्रह्मणेत्यग्रे पूर्ववत् ।

वीतरमायस्य स्पष्टत्वात्र पूर्वोक्तस्य मुख्यत्वाभावः शङ्कितुं शक्य इत्यर्थः । नन्वेवं चेच्छान्दोग्यवाक्येऽपि साधनं व्युत्पादयितव्यमत आहु । * एवं चेत्यादि * । * एतदिति * छान्दोग्यवाक्यम् ।

एवमनेन ग्रन्थेन श्रुतौ मुख्यतया फलमेव निरूप्यत इत्युपगस्य श्रुतिर्व्याख्याता । व्याख्येयवाक्ये ज्ञानस्य ज्ञातृविशेषणतया प्रवेशेनाऽमुख्यत्वात् । तथापि तद्व्याख्यानभूतायामृचि साधनस्य पृथङ्निरूपणाद् व्याख्यानस्य विशेषप्रतिपत्तिहेतुत्वात् तामनुसृत्य पूर्वोक्तमर्थं दृढयितुं पूर्ववाक्योक्तव्याख्यानमेवानुसरन्तः पक्षान्तरमाहु * अथवेत्यादि * । * पूर्ववदित्यन्तम् । एवञ्चोक्तरीत्यास्य ब्रह्मणेत्यादिनाऽन्वयः । तथा च ब्रह्मणा सह तदात्मकानेव कामानश्नुत इत्यर्थः । यत्तु, न ह्यन्यज्ञानेनान्यप्राप्तिर्भवतीति परैर्दूषणमुक्तम् । तदसङ्गतम् । य एवं वेदप्रतितिष्ठतीत्यादिश्रुतिविरोधात् । यच्च परिच्छिन्नत्वेऽन्यत्वे च प्राप्तिर्नापरिच्छिन्नत्वेऽनन्यत्वे इति । तदपि तथा । इच्छयाऽऽविर्भावतिरोभावाभ्यामेवोपपत्तेः । अनन्यत्वं तु सुवर्णशकलन्या-

अथ परमफलत्वान्निरवध्यानन्दात्मकत्वमन्तरङ्गेभ्योऽप्यन्तरङ्गत्वं स्वस्मिन् ज्ञापयितुं सर्वस्य सर्वरूपत्वेन सर्वाधिदैविकरूपत्वमपि ज्ञापयितुमाधिभौतिकादिरूपेणाविर्भवितुं भगवानाकाशादिरूपेणाविर्भूतोऽत एव भवन आकाशस्यैव कर्तृत्वमुच्यते ।

अग्रेऽन्नमयादीनि चत्वारि रूपाणि पूर्वं निरूपितान्युत्तरोत्तरमन्तरङ्गभूतानि । अन्नरसमयशरीरभूतात् प्राणमयस्तस्मान्मनोमयस्तस्माद् विज्ञानमयः ।

कश्चित्त्वेतानि रूपाणि विकारात्मकत्वात् प्राकृतान्येवैतेभ्योऽप्यन्तरङ्गो विमुक्तावस्थो जीव एवानन्दमय उच्यत इत्याह । स प्रतिवक्तव्यः ।

येन ब्रह्मणः सकाशाज्जीवस्य, न तु जीवस्य सकाशाद् ब्रह्मण इति तस्यापि प्राप्तिप्रतिबन्धकत्वाभावादिति । तेन ज्ञानमपरिच्छिन्नमेवेति न काऽपि दोषः । एवमुक्तात्पर्यमुक्त्वाऽऽधिदैविकवादमाश्रित्य सूत्रयोर्दिनिरूपकग्रन्थस्य तात्पर्यमुपयोगं चाहु । *अथेत्यादिना* । *सर्वस्य सर्वरूपत्वेनेत्यादि* प्राणस्य प्राणमुत चक्षुषश्चक्षु. श्रोत्रस्य श्रोत्रमिति श्रुत्यनुसारेणान्नस्यान्नमयस्यान्नमय प्राणमयस्य प्राणमय इत्येवमानन्दमयमात्मा मे शुध्यन्तामिति तैत्तिरीयश्रुत्यन्तरे शोध्यत्वज्ञापनेन, आनन्दमानन्दमयोऽश्नाति इति स्मृतौ च क्रममुक्तिप्रकरणेन कारणशरीरनिवृत्तिविमुक्तावस्थजीवयोरानन्दमयत्वकथनात् तयोरपि य आधिदैविकस्तमानन्दमयमत्र ज्ञापयितुमित्यर्थः । * कर्तृत्वमुच्यत इति * तेनात्र नाकाशादीनां प्राकृतत्वं, किन्तु विभूतिरूपत्वमेवेत्यर्थः ।

अत्यन्तरङ्गत्वं विशदयन्ति । * अग्रे इत्यादि * अन्योऽन्तर आत्मेति सर्वत्र कथनात् तथेत्यर्थः । अत्र मायावादी मयटो विकारार्थकत्वमङ्गीकृत्य सूत्राण्यन्यथा नीत्वा आनन्दमयमपि जीवं मन्यते । तन्मतमनूद्य परिहरन्ति * कश्चिदित्यादि * । * स प्रतिवक्तव्य इत्यादि * । तत्र मयटः सन्दिग्धार्थकत्वादनिर्णायकत्वेन श्रुत्यन्तरादेव निर्णय उचित इत्याशयेना-

अग्रिमप्रपाठके भृगुणा अधीहि भगवो ब्रह्मेति पृष्टो वरुणस्तदोत्तमाधिकाराभावात् स्वयं ब्रह्मस्वरूपमनुक्त्वा, तपसाऽधिकारातिशयक्रमेण स्वयमेव ज्ञास्यतीति तथैव साधनं सर्वत्रोपदिष्टवान् । तपसा ब्रह्म विजिज्ञासस्वेति । ब्रह्मातिरिक्तेन साधनेन न तज्ज्ञातुं शक्यमिति ज्ञापनाय, तपो ब्रह्मेति सर्वत्रोक्तवान् । तथाच तपसा साधनेन ब्रह्मत्वेन ज्ञातानि रूपाणि प्राकृतानीति विचारकेण न वक्तुं शक्यमिति । तर्हि पुनर्ब्रह्मविषयकप्रश्नसाधनोपदेशतत्करणापूर्वातिरिक्तब्रह्मज्ञानानां परम्परा नोपपद्यते इति चेत् । मैवम् । भगवतो हि विभूतिरूपाण्यनन्तानि । तत्र येन रूपेण यत्कार्यं करोति तेन रूपेण समर्थोऽपि तदतिरिक्तं न करोति । तथैव तल्लीला यतः ।

तथाचान्नमयादिरूपैः क्षुद्राण्येव फलानि ददाति । हीनाधिकारिणां तावतैवाकाङ्क्षानिवृत्तिर्भवति । एवं सति यादृशेनाधिकारेणान्नमयस्वरूपज्ञानं भवति तादृशे तस्मिन् सम्पन्ने तज्ज्ञानमपि तथा । एवमेवोत्तरत्रापि । तथाचाकाशादिरूपमाधिभौतिकस्वरूपमुक्त्वाऽऽध्यात्मिकं तद् पुरुषरूपं वदन्ती पक्षिरू-

---

णुः * भामिमेत्यादि * । * तर्हीति * तेषां ब्रह्मरूपत्वे । *यत इति * सोऽकामयत, बहुस्यां प्रजायेय, तस्मादेकाकी न रमते, स हैतावानासेत्यादिष्वेकस्यैव बहुत्वोच्चनीचभावलीलानामुक्तत्वादित्यर्थः ।

* तज्ज्ञानमपि तथेति * । तज्ज्ञानमपि तदुक्तफलदमित्यर्थः । एवं विभूतिरूपज्ञानफलमुक्त्वाऽऽनन्दमयस्याधिदैविकत्वं बोधयितुं पूर्वोक्तं स्मारयन्ति * तथाचेत्यादि * । आकाशादिरूपमाधिभौतिकं स्वरूपं तस्माद्वा एतस्मादात्मन इत्यन्तेनोक्त्वा आध्यात्मिकमन्नमयादिपुरुषरूपं वदन्ती श्रुतिस्तस्येदमेव शिर इत्यादिना पक्षिरूपमा-

पमाह । यतस्तेनैव रूपेणाधिभौतिके रूपे आध्यात्मिकस्य पुरुषस्य प्रवेशः । तदुक्तं वाजसनेयिशाखायाम् । पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः, पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति । वस्तुतस्तु पुरुष एव । परन्तु पुरः सम्बन्धी सन् पक्षी भूत्वा पुरः शरीराण्याविशदित्यर्थः । प्राकृतीषु विविधासु पूर्व्वप्राकृतस्यैकविधस्य प्रवेशोऽनुचितो यद्यपि तथापि स्वप्रवेशं विना न किञ्चिद् भावीति गतिप्रतिबन्धकमुल्लङ्घ्यालौकिकया गत्या प्रविशामीति ज्ञापनाय पक्षिभवनम् । स हि तादृशः । अत एव द्विपदश्चतुष्पद इति ।

आधिदैविक एक एवेति यः पूर्वस्येति सर्वतोक्तम् ।

नन्वानन्दमयेऽप्येवमुक्तेर्नायमपि परमकाष्ठापन्नरूपः, किन्तु

इत्यर्थः । ननु तस्येदमेवेतीदमा प्रत्यक्षविषयस्यैव शिर आदेः परामर्शात् प्रत्यक्षविषयस्यैव पक्षित्वं कल्पनयोपदिश्यत इति नात्राध्यात्मिकपुरुषोपदेश इति शङ्कायां तद्बोधनार्थं श्लोके हेतुमाहुः * यत इत्यादि * तथाच पक्षिरूपस्यातिरिक्तस्याङ्गीकारे पक्षादिपदेषु लक्षणाभावादयमेव पक्षो ज्यायानित्यतस्तथेत्यर्थः । ननु तथापीदम्पदे लक्षणा गौरवं चाधिकमतो नेदं साधीय इत्यतः श्लोकमुपष्टम्भन्ति * तदुक्तमित्यादि * तथाचातिरिक्तस्य श्रुत्युक्तत्वात् तेनेदम्पदलक्षणाया अप्यनुग्रहादयमेव पक्षो ज्यायानित्यर्थः । *एकविधस्येति* अन्नमयेऽन्नमयरूपस्येत्येवमित्यर्थः । * स हि तादृश इति * पक्षी यतो गतिप्रतिबन्धकोल्लङ्घनेनैतद्देशप्रवेशसमर्थ इत्यर्थः । प्रतिबन्धकज्ञापकमाहुः * अत एवेत्यादि * तथाच पुरां विशेषणबलात् तथाऽवसीयत इति नात्र कल्पनालेशोऽपीत्यर्थः । नन्वेवं पक्षिरूपस्यान्नमयादिषु पञ्चस्वपि सत्त्वादानन्दमये को विशेष इत्याकाङ्क्षायामाहुः * आधिदैविक इत्यादि * । एवमत्र श्रुत्यर्थे निर्णीते यः पूर्वपक्षोऽधिकरणावतारणायोन्मिषति तमाहुः * नन्वित्यादि * तथाच योग्यत्वात् प्रायपाठाच्चानन्दरूपत्वमवयवानामुच्यते, न तु परमात्मत्वादित्यर्थः । परमात्म-

पूर्वोक्तेभ्योऽतिशयितधर्मवत्त्वात् विभूतिरूप एव । न च शिरआदीनामानन्दरूपत्वेनैवोक्तेरयं परमात्मैवेति वाच्यम् । अन्नमये यथाऽवयवानां तद्रूपत्वं तथाऽऽनन्दमयेऽपि तेषां तद्रूपत्वादन्यथा तस्यैष एव शारीर आत्मेति न वदेत् । शरीरं हि पूर्वोक्तं, तत्सम्बन्धी हि शारीरस्तद्भिन्नः प्रतीयते । तथाच परब्रह्मत्वं स्वान्यात्मवत्त्वं च सर्वश्रुतिविरुद्धम् । नन्वेतदतिरिक्तं चेद् ब्रह्म स्यात् तदानन्दमयादन्योऽन्तर आत्मा ब्रह्मेत्यपि वदेत् । नत्वेवमतोऽयं पर एवेति चेन्न । आध्यात्मिकरूपाणामेवात्र निरूपणात् तेषां च पञ्चरूपत्वात् तावतामेव निरूपणमतोऽस्मादन्य एव पर इति प्राप्ते प्रतिवदति ॥ आनन्दमयोऽभ्यासात् ॥ आनन्दमयशब्दवाच्यः पर एव । कुतः । अभ्यासात् । तस्यैष एव शारीर आत्मा यः पूर्वस्येत्यन्नमयादिषु सर्वत्रैवात्मत्वेनानन्दमयस्यैव कथनात् ।

ननु न किञ्चिन्मानमत्र पश्यामः । किञ्च । आनन्दमयस्यैव सर्वत्रात्मत्वेन कथने आनन्दमयेऽपि, तस्यैष एवेत्यादि न वदेदयमेव पूर्वस्यात्मेति वदेदतो नानन्दमयः पर इति चेत् ।

त्वाभावे गमकमाह * अन्यथेत्यादि * । * पूर्वोक्तमिति * आनन्दमयम् । शेषं निगदव्याख्यातम् । एवञ्च मयटो विकारार्थत्वानङ्गीकारेऽप्यन्नमयादीनामिवानन्दमयस्याऽऽध्यात्मिकविभूतिरूपत्वात् परब्रह्मत्वं प्रायपाठबलादङ्गीकर्तव्यं, न तु परब्रह्मत्वमिति पूर्वपक्षाशयः । अत्र सूत्रमुपन्यस्य समादधते * आनन्दमयोऽभ्यासादिति * । * तस्येत्यादि * तथाच वाक्याऽभ्यासात् तथेत्यर्थः । अयं प्रकारो गुणोपसंहारपादे, आत्मगृहीतिकार्याख्यानाधिकरणाभ्यां पुनः स्फुटीकर्तव्यः । अत्र चोदयति । * नन्वित्यादि * । * अत्रेति * उक्तवाक्येष्वानन्दमयग्रहणे । साधकतर्काभावमुक्त्वा बाधकतर्कमाह * किञ्चेत्यादि । *

उच्यते । न हीश्वरादन्यः सर्वेषामेक आत्मा भवितुमर्हति । तस्यानन्दरूपत्वं त्वेतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति । रसो वै सः रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवति । को ह्येवान्यात् । कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयातीत्यादिश्रुतिभिर्निर्णीयते । एवं सति तदेकवा-

---

क्तयोर्दूषणयोः पूर्वं निरस्तत्वात् । * न हीत्यादि, मन्तव्यमित्यन्तम् * । तथाच सर्वेश्वरोऽन्तरात्मत्वमानन्दमयस्य निरूपयिष्यन्नथा यत् तस्यैष एव शारीर आत्मा यः पूर्वस्येति प्राणमयाद्यानन्दमयान्तस्य, एष एव शारीर आत्मा यः पूर्वस्यान्नमयस्येत्यन्नमयस्यापीश्वर आत्मनः सर्वान्तरस्यास्यात्मत्वमभ्यस्तम् । अन्नमयाभिमानी तु पूर्वं नोपक्रान्तः, किन्तु जगत्कर्तैवोपक्रान्तस्तत्रापि सृष्टिकथनेन तदेतच्छब्दाभ्यां संनिहितं विपश्चिद्ब्रह्मैव परामृश्यत इति तदेव पश्चात्तमात्मेति बोध्यते । अत आत्मपदघटितवाक्याभ्यासस्तस्य सर्वात्मत्वं सर्वान्तराऽऽत्मत्वं वा बोधयंस्तत्र निरङ्कुशमीश्वरत्वं निगमयति । एतस्यैवानन्दस्येति * श्रुत्यन्तरश्चानन्दप्राचुर्यम् । तच्च निरवधिसन्निर्देशापेक्षयेति प्रकृतत्वात् सिद्ध्यति । तथा रसो वै स इत्यादिश्रुत्यन्तरं चानन्दरूपताम् । एवं सर्वश्रुत्येकवाक्यत्वेऽभ्यस्यमानवाक्यगतस्यैव इत्ययमेतच्छब्दः पूर्वोक्तमात्मानं परामृशन्नेतादृशो न सर्वेश ग्राहयतीति पूर्वोक्तश्रुत्येकवाक्यतः पञ्चस्यास्यैव मानत्वान्न मानाभाव इत्यर्थः । एतेनैव बाधकतर्कोऽपि निरस्त एव । शारीरपदन्तु शरीरसम्बन्धिमात्रबोधकं, न स्वाभिमानित्वबोधकम् । किञ्चाभिमानित्वपक्षेऽपि नाभिमानित्वं दोषः । सर्वात्मकत्वात् । अन्यस्यान्यस्मिन्नभिमानस्यैवाध्यासरूपत्वेन दोषत्वात् । अत एव पुरुषविधब्राह्मणे, ब्रह्म वा इदमग्र आसीदित्युपक्रान्तस्यात्मनो ब्रह्मत्वं निगमयित्वा तदात्मानमेवावेदहं ब्रह्मास्मीत्युच्यते । नच तस्यैष इति षष्ठ्या भेदनिर्देशान्न तथेति वाच्यम् । राहोः शिर इति वदभेदेऽपि षष्ठीदर्शनात् । नन्वस्त्वेवं, तथाप्यानन्दमय एतत्कथनस्य किं प्रयोजनमित्या-

मयतायै प्रकृतोऽप्यानन्दमयशब्दस्तद्वाच्येवेति मन्तव्यम् । अन्यथाऽऽनन्दमयादन्योऽन्तर आत्मेत्येव वदेत् ।

ननूक्तमाध्यात्मिकानामेवात्र निरूपणादित्यादीति चेन्न । उक्तरीत्याऽऽधिदैविकस्यैवान्ते निरूपणात् । अत एव भार्गव्यां विद्यायामपि भृगोरन्नमयादिज्ञानानन्तरमपि पुनर्ब्रह्मजिज्ञासोक्ता, न त्वानन्दमयज्ञाने । न हि भृगोराध्यात्मिकज्ञानार्थं प्रवृत्तिः, किन्तु ब्रह्मज्ञानार्थमेव । अधीहि भगवो ब्रह्मेति प्रश्नवचनात् ।

किञ्च, ब्रह्मविदाप्नोति परमित्युपक्रमावन्ते ह्येयानन्दगणनामुक्त्वा, स यश्चायं पुरुषे यश्चासावादित्ये स एक इति वाक्यशेषेऽक्षविदि पुरुष आदित्ये च तदेवाक्षरं ब्रह्म प्रतिष्ठितमिति सदानन्दोऽपि तथैवेति तयोरानन्दयोरैक्यम् । एवं रूपं ब्रह्मेति यो वेद तस्य क्रमेणान्नमयादिप्राप्तिमुक्त्वा अन्ते एतमानन्दमयमात्मानमुपसंक्रामतीति । एवं सत्युपक्रमे परमाप्तेः फलत्वेनोक्तेरुपसंहारेऽपि तथैव भवितव्यत्वादानन्दमयमाप्तेरेवान्ते फलत्वेनोक्तेस्तदुत्तरमन्यस्यानुक्तेरानन्दमय एव परः ।

वाक्या तु, शरीरमेवेदमप्रयोजनेत्यादिनाऽनुपपन्नमेव निवारणीया । तस्मान्न योऽपि दोषः । उक्तसाधनाय विपक्षबाधनाय च तर्कमाहुः * अन्यथेत्यादि * । अत्र चोदयन्ति * नन्वित्यादि * । तत्र समादधते * नेत्यादि * । * उक्तरीत्येति * सर्वाम्नायादेरन्यत्रासम्भवेन । एतमेवार्थं श्रुत्यन्तरेणोपष्टम्भयन्ति * अत एवेत्यादि * नन्वु भृगोर्ब्रह्मज्ञानार्थं प्रवृत्तिरिति सत्यं, परन्तु तदानन्दत्वेन ब्रह्मज्ञानाज्जिज्ञासोपरतिर्न त्वानन्दमयत्वेन ज्ञानात् । अतो नानया श्रुत्या तदुपष्टम्भ इत्याकाङ्क्षायां प्रस्तुतप्रपाठकोपक्रमादिविचारेणापि तमर्थं साधयन्ति * किञ्चेत्यादि * । * पर इत्यन्तम् * । तथा चाद्य प्रपाठकस्य, ब्रह्मविदाप्नोति परमिति

ननूपसंक्रमणं ह्यतिक्रमणमतो न तथेति चेत् । हन्तैवमतिक्रान्तशब्दार्थो त्वन्यातिभाति । यतः संक्रमणशब्दः प्राप्त्यर्थकः सर्वत्र श्रूयते । अत एव रवेर्मकरादिराशिप्राप्तौ तत्तत्संक्रमणमित्युच्यते । नचेयं न परममुक्तिः । अस्माल्लोकात् प्रेत्येति पूर्वमुक्तेः । अत एव पुरुषोत्तमानन्दानुभवे सत्यनुभवैकगम्योऽयमान-

---

सूचितार्थविवरणरूपत्वात् फलविवरणमेवानन्दमये प्रपाठकस्य तात्पर्यं नियमयत् तस्य प्रश्नत्वं गमयति । एवं भृगुप्रपाठके यद्यपि जिज्ञासोपरतिस्थले आनन्दमयपदाभावस्तथापि समाप्तावेतमानन्दमयमात्मानमुपसंक्रम्य एतत् साम गायन्नास्त इति फलकथनेन द्वयोरपि प्रपाठकयोरैकार्थ्यावगमात् तस्याप्युपक्रमकत्वमव्याहतमित्यर्थः । अत्र वादी परमफलत्वाभावमाशङ्कते * नन्वित्यादि * संक्रमः प्रतिसंक्रम इति पुराणप्रयोगात् नयेत्यर्थः । समाधत्ते * हन्तेत्यादि * । * उच्यत इति * कार्मुकं तु परित्यज्य द्वयं संक्रमते रविरित्यादिवाक्येषूच्यते । ननु संक्रम एव प्राप्तिर्नतूपसंक्रमोऽपीति चेत् तथाप्युपोपसर्गेणातिक्रमोऽर्थः कथं लब्धव्यः । तर्हि किमर्थोऽयमुपसंक्रम इति चेत् । भेदेन स्थित्वा भोगार्थ इत्यवधेहि । श्रुचि तथैव सिद्धत्वेन तदुपपादकग्रन्थे ऽपि तथैव सिद्धेरावश्यकत्वादिति । नन्वेवं भेदे सति नेयं परममुक्तिः, किन्तु जीवन्मुक्तिरेवेयमिति चेत्तत्राहुः * नचेत्यादि * तथाचैतच्छरीरत्यागकथनेनात्र जीवन्मुक्तेरशक्यवचनत्वात् परममुक्तिरेवात्रोच्यत इत्यर्थः । तर्हि देहान्तरे सिद्धिरेवास्तु । परममुक्तौ बाधकस्य भेदस्योक्तत्वादिति चेन्न । तथा सति करणग्रामसद्भावात् प्राणमयादिसत्त्वेन पुनस्तत्संक्रमोक्तिविरोधापत्तेः । तस्मादत्र परममुक्तिरेव विवियत इति हार्दकृत्यैतस्याः परममुक्तित्वसाधकं हेत्वन्तरमाहुः * अत एवेत्यादि * अस्य परममुक्तिरयादेव पुरुषोत्तमानन्दानुभवे सति 'वरणैकहेतुकानुभवमात्रगम्योऽयमानन्दो, न मनोवाग्विषय इति यद्भाण आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन लोकवेदादिभ्योऽपि न बिभेतीति सर्वतो भयाभावम-

न्दो. न मनोवाग्विषय इति ज्ञात्वा लोकवेदकालादिभ्योऽपि न बिभेतीति, यतो वाच इति श्लोकेनोक्तवती । अन्यथा आनन्दे मनसोऽप्यगम्यत्वमुक्त्वा, विद्वानिति कथं वदेत् ।

एवं सति सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्यृचि यत् फलमुक्तं तदेवान्ते विवृतमिति ज्ञायते । अन्यथा अस्माल्लोकात् प्रेत्येत्युक्तत्वाद्देहाभावेन भयानुपस्थित्या तन्निषेधासम्भवः । कामभोगासम्भवश्च । अत एव सामानाधिकरण्यमनुक्त्वा आनन्दं ब्रह्मण इत्युक्तम् । एतेन लौकिकं पूर्वदेहं त्य-

---

नेन श्लोकेनोक्तवतीति सर्वभयाभावः परममुक्तेर्लिङ्गमिति स एव तथात्वसाधक इत्यर्थः । विपक्षबाधकतर्कोक्तिमुखेन पुनर्हेत्वन्तरमाहुः * अन्यथेत्यादि * । * अन्यथेति * परममुक्तित्वाभावे । तथाच मनोवागविषयानन्दवेदनमपि परममुक्तेरेव लिङ्गमित्यर्थः । एवं हेतुत्रयेणास्याः परप्राप्तेः परममुक्तित्वसाधनेनेदं सिद्धम् । या ज्ञानमार्गिणां ब्रह्माऽभेदरूपा परममुक्तिः सा भक्तानां फलानुभवे स्वरूपयोग्यतासम्पादकतयोपयुज्यते । तस्यां सत्यां भक्त्या तादात्म्येन फलानुभवात् । अतः सा पूर्वकक्षारूपेति । तदेतद् हृदिकृत्य सिद्धमाहुः * एवं सतीत्यादि * । एवं सतीति * आनन्दमयप्राप्तेरेवं परममुक्तित्वे सति * विवृतमिति * यतो वाच इति श्लोकेन विवृतम् । अस्य श्लोकस्योक्तफलांशविवरकत्वमृगंशस्य च यद्विवक्षितफलबोधकत्वमिति द्वयं निगमयितुं तद्विपरीतवादबाधकं तर्कमाहुः * अन्यथा अस्मादित्यादि * तथाच यद्यस्यांशविवरकत्वं न स्यात् तदांकरीत्या भयाभावेन भयनिषेधनमसङ्गतं स्यात् । यदि ऋगंशस्य विवक्षितफलबोधकत्वं न स्यात् तदा कामभोगोक्तिरप्यसङ्गता स्यादित्युभयमन्वयव्यतिरेकाभ्यां निगम्यत इत्यर्थः । अथैतत्साधकं हेत्वन्तरमाहुः * अत एवेत्यादि * तथाच विवक्षितफलविवरकत्वादेव तथोक्तमित्यर्थः । एवमेतस्याः श्रुतेः फलांशविवरकत्वमुपपाद्य तेन सिद्धं निगमयितुमाहुः * एतेनेत्यारभ्य, अक्षर-

त्वा साक्षाद्भगवद्भजनोपयोगिनं भगवद्विभूत्यात्मकं सङ्घातं मा-प्नोत्यादौ । तथाहि । देहेन्द्रियप्राणान्तःकरणजीवात्मको हि सङ्घातः । तत्र स्थूलं शरीरमाद्यविभूतिरूपम् । द्वितीयं स्पष्टम् । तृतीयं सर्वेन्द्रियसम्बन्धित्वेनेन्द्रियरूपत्वेन चान्तःकरणात्मकत्वेन चेन्द्रियान्तःकरणरूपम् ।

तुरीयं जीवतत्त्वात्मकम् । यत्र गुहायां भगवद्वरणेन परम-व्योमाविर्भावस्ततः पूर्णानन्दात्मकं पुरुषोत्तमस्वरूपं फलरूपं प्राप्य उक्तरूपशरीरी सन् तेन सह सर्वकामाशनमेव मनोवागविष-यानन्दवेदनं तद्वान् भवतीति वाक्यैकवाक्यतयाऽवगम्यते ।

गत इत्यन्तम् * । * आद्यविभूतिरूपमिति* अन्नमयविभूतिरूपम् । मनोमयविभूतिरूपस्येन्द्रियान्तःकरणरूपत्वे हेतुमाहुः * तृतीयमि-त्यादि * अत्र मनसः सर्वेन्द्रियनियामकत्वान्मनोमयस्य सर्वेन्द्रिय-सम्बन्धित्वम् । शेषं स्फुटम् । तथा च कार्यद्वारा मनसैवेन्द्रियाण्या-क्षिप्यन्त इति तदर्थः । जीवस्य विद्यमानत्वाद्विज्ञानमयविभूतिर्बु-द्धिरूपा मनसः पृथग् भविष्यतीत्याशङ्कावारणाय तत्स्वरूपमाहुः * तुरीयमित्यादि * । जीवतत्त्वात्मकमिति * जीवस्य यत्तत्तत्त्वं स्व-रूपसहकारियोग्यतासम्पत्तिस्तदात्मकमित्यर्थः । अथ गमकं, यत्रे-त्यादिना प्रोक्तं ज्ञेयम् । एवं विभूतिरूपाणि व्याख्याय तच्छेषिणं व्याकुर्वन्ति * तत इत्यादि * अत्र कामाशनस्य वेदनरूपत्वम् । भोगस्य सुखसाक्षात्काररूपत्वात् । * वाक्यैकवाक्यतयेति * उप-संक्रमेण वेदनभयाभावाभ्यां तासामात्मादिभिश्चास्य फलांशविवरक-त्वेन वाक्यानामेकवाक्यतया ।

एवमानन्दमयप्रकरणे यथा परममुक्तित्वं, तथा प्रकारो विषय-वाक्यभूतप्रपाठकविवरणेन प्रकाशितः । तत्र पूर्वोक्तानां विभूतीनां पक्षिरूपत्वं यदुक्तं तच्छीलोपयोगिषु तेषु कोशेषु पक्षिरूपेण यः प्रवेशस्तद्धेतुकमिति तदुपक्रियायाः श्रुतेर्विचारे तत्र इदं भव-

अथेदं विचार्यते । पुरश्चक्रे द्विपद इति श्रुतौ वस्तुतस्तु पुरुष एव । परन्तु पुरः सम्बन्धी सन् पक्षी भूत्वा पुर आविशदिति निरूपितम् । प्रकृते चान्नमयादयस्तथैवोक्ताः । एवं सत्येकस्यां पुरि बहूनां तेषां प्रवेशो न वक्तुमुचितः । प्रयोजनाभावादित एकैकस्यां पुरि तथा वाच्यः । तत्र कीदृश्यां तस्यां कस्य प्रवेश इति विचार्यमाणे प्राकृतत्वब्रह्मत्वयोरविशेषाद् विनिगमकाभावात् सर्वेषां सर्वत्र प्रवेशोऽप्रवेशो वा भवेदिति चेत् ।

अत्रेदं प्रतिभाति । अस्माल्लोकात् प्रेत्येति वाक्ये इदंशब्द-

दीति तद्दृढीकरणाय पक्षिरूपप्रवेशबोधकश्रुतिविचारं प्रतिज्ञाय तद्विचारबीजं वक्तुं प्रथमतो विषयमाहुः * अथेत्यारभ्य, उक्ता इत्यन्तम् * । * तथैवेति * पक्षिरूपेण । अत्र विचारबीजं वदन्तः पूर्वपक्षमाहुः * एवं सतीत्यादि, चेदित्यन्तम् । * अविशेषादिति * सर्वेषु पक्षित्वविशेषात् । * अप्रवेश इति * उक्तश्रुतावेकस्य प्रवेशोक्तावप्यन्नमयादिषु पक्षिलिङ्गेन पुरि प्रवेशे प्रतीतेऽपि प्राणमयादिष्वन्तर आत्मेति श्रावणात् तेषां चतुर्णां तत्तदन्तःप्रवेशोऽस्तु । अन्नमये तु तदश्रावणात् तत्प्रवेशो न शक्यवचनः । किञ्च, द्विपत्त्वादिलिङ्गस्य स्थूलस्यैव सत्त्वात् नाम्नैव प्रवेशोऽत्र भासत इति प्राणमयादिषु लिङ्गाभावेन विवक्षितपक्षाभावात् तेष्वपि तदन्तराणां सोऽशक्यवचन इत्यप्रवेश इत्यर्थः । सिद्धान्तमाहुः * अत्रेत्यादि * अयमर्थः । अस्माल्लोकात् प्रेत्येत्यत्र स्थूलशरीरस्याग्नीध्रकारे सूक्ष्मशरीरकारणशरीरयोः सत्त्वेन प्राणमयादिकोशानां सत्त्वेन, एतं प्राणमयमात्मानमुपसङ्क्रामतीत्याद्यग्रिमवाक्यविरोधादस्माल्लोकादित्यस्येदम्, इदं सर्वं यदयमात्मा, अस्मिँल्लोकेऽमुष्मिन् इत्यादिष्विदमः परिदृश्यमानजगत्सम्पादकत्वदर्शनादत्रापि ब्रह्मविदः फलप्रकरणे प्रापञ्चिकसर्वसम्पादकतया एवाभिप्रेततयोचितत्वात् तथावगम्यते । ततो गुणातीतप्रपञ्चप्राप्त्यैव प्रपञ्चयुक्तदृश्यां जातायां पु-

प्रयोगात् प्राकृतगुणमयं प्रपञ्चमतिक्रम्य गुणातीतं प्रपञ्चं साक्षाल्लीलोपयोगिनं प्राप्नोतीत्यवगम्यते । तस्मात्सैव भगवद्भावे सम्पन्ने पूर्वं भगवद्विरहभावेनाविनीयत्वेन सर्वोपमर्दिना शरीरेन्द्रियप्राणान्तःकरणानि नष्टान्येव स्युर्यदि तत्तद्रूपं ब्रह्म तेषु तेषु न प्रविष्टं स्यात् । जीवस्य च ब्रह्मण्येव लयेन लीलारसाऽननुभवेन नाश एव सः । तथाच तत्तद्रूपं ब्रह्म तेषु तेषु स्थितमिति न तेषां नाशः । जीवे त्वानन्दमयः पुरुषोत्तमः प्रविशतीति रसात्मकत्वादानन्दात्मकमेव विरहभावरसाब्धिमनुभूय पश्चात्प्रादुर्भूतं प्रभुस्वरूपं प्राप्य, न बिभेति कुतश्चनेति वाक्येन लोकात् तदभावमुक्त्वा, एतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमितिवाक्यैर्वेदाद्भयाभाव उच्यते ।

शरीरप्राणमनोऽन्तः करणजीवात्मनां शरीरत्वं वाजसने-

यिविरहभाव पर्वोद्धिष्णत इति तेन शरीरादीनि मूलसंति लीनानि स्युरतस्तत्प्रभावाय प्रवेशः सर्वत्रावश्यकः । किञ्च, लये हानिसाधारण्येन वरणविषयत्वांल्लीलाननुभवे स जीवस्याप्यनिष्टरूप एवेत्यतोऽप्यावश्यक इत्यर्थः । ननु भवत्वन्यत्रान्येषां प्रवेशस्तथापि जीवस्य नित्यत्वात् तत्रानन्दमयप्रवेशो निष्प्रयोजनत्वादयुक्त इत्यत आहुः * जीवे त्वित्यादि * । * उच्यत इत्यन्तम् * । * प्रविशतीति * रसानुभावनाय प्रविशति । * इतीहैतो * तथाच सोऽपि सप्रयोजनः । तस्य पुरुषोत्तमत्वं श्लोकोक्तभयाभावरूपाल्लिङ्गादेव ज्ञायते । एतद्विमिताथस्तु य एवमतापकत्वेन एते साध्वसाधुनी विद्वान् स आत्मानं स्पृणुते प्रह्म प्रीणाति । तत्र हेतुरुभे ह्येवेत्यादि । अत्र स्पृणोतिर्तर्पणार्थक इति न पुनरुक्तिः । तेन सोऽपि युक्त इत्यर्थः । अत्र या स्वरूपप्राप्तिरुक्ता सा फलाध्यायतुरीयपादे निपुणतरं प्राप्य उक्तेति मया तत्रैव स्फुटीकरिष्यते योध्यम् । किञ्च । त्रिपथ्यादीत्यादिनोक्तद्वितीयव्याधर्मनिरासाय पूर्वं स्फुटीकुर्वन्ति * शरीरेत्यादि * प्राणमनोऽन्तः करणेतिपाठे मनोऽन्तर्यामि भिन्नं पद-

पिशाखायामन्तर्यामिब्राह्मणे पठ्यते। यस्य सर्वाणि भूतानि शरीरं यस्य प्राणाः शरीरं यस्य वाक् शरीरं यस्य चक्षुः शरीरं यस्य श्रोत्रं शरीरं यस्य मनः शरीरं यस्य त्वक्छरीरमित्यादिरन्ते यस्यात्मा शरीरमिति। अत्र पूर्वोक्तनिर्गुणदेहानां भगवच्चरणरेणुजत्वेन भूतरूपत्वाद् ब्रह्मशरीरत्वम्। तत्राक्षगतत्प्रवेशात् तत्स्थितिः प्राणेष्वपि तथा। ज्ञानेन्द्रियेषु विज्ञानमयप्रवेशात् तथा। मनसि मनोमयप्रवेशात् तथात्वम्। जीवेष्वानन्दमयः प्रविशतीति तथात्वम्। अतो युक्तं पक्षित्वकथनम्।

आनन्दमयस्य स्वरूपं विशेषणो वक्तुमशक्यमिति यः पूर्वस्येति सर्वत्रोक्तम्। शरीरप्रवेशप्रयोजनकपक्षिरूपित्वं पञ्चस्वपि

म्। एतद्रूपनाममध्ये इत्यर्थः। प्राणेन्द्रियान्तःकरणेति वा पाठः। अत्रापमथः। पृष्ठं हि शरीरत्वम्। तच्च भूताद्यात्मान्तेषु तुल्यम्। तथा ब्रह्मणः अमरत्वं च सर्वत्रोक्तमिति प्रवेशोऽपि तस्य सिद्धः। एवं सत्येतदनुरोधात् बहुपदां पुरां दर्शनादत्र प्रतिष्ठा पदेन पादसंबन्धिनाः पुरश्चक्र इति श्रुतौ द्विपदादिपदं कृतपूर्णोपलक्षकमिति तत्र नाम्नां करणं, तासु प्रवेश इति चाभिप्रेतं, न तु तासां द्वैविध्यं स्थूलत्वं वेति निर्णये सर्वास्वेव कार्यार्थं पक्षिरूपेण प्रवेशः सिद्ध्यति पक्षिलिङ्गादश्वमगर्दभादीनामपि प्रवेशः शास्त्रवचन इत्यर्थः। एवं सर्वेषां प्रवेशं समर्थयित्वा लीलोपयिकप्रवेशार्थमप्राकृतविभूतिरूपाणां स्वरूपमाहुः। * अत्रेत्यादि * इदं च प्रथमस्कन्धसुबोधिन्यां, या वै लसच्छ्रीतुलसीविमिश्रपादाब्जरेणव्यधिकाम्बुनेत्यत्र सिद्धानि। प्रवेशं विभजन्ते * तत्रेत्यादि * जीवस्य वर्णनेवं शुद्धत्वाद् विज्ञानमयस्य प्रवेशोऽनर्थक इति शङ्कावारणाय तदधिकरणमाहुः। * ज्ञानेन्द्रियेष्वित्यादि * जीवे तथात्वं लीलारसानुभवयोग्यत्वरूपं यावदन्यत्रैवं सर्वत्र पक्षिरूपोक्तिं समर्थयित्वाऽऽनन्दमये शारीरत्वोक्तेस्तात्पर्यं यद्वक्तुं यः पूर्वस्येति गूढोक्तेराशयमाहुः। * आनन्दमयस्येत्यादि। * * शरीरेत्यादि च *। विशेषतो वक्तुमशक्यत्वं मनोवागगम्यत्वाद्

साधारणमिति तेषु तथा वदन्त्यानन्दमयेऽपि तथैवोक्तवती श्रुतिरिति ज्ञेयम् । एवं सति स्वर्णोपाधिसम्बन्धेन रजतादेर्हेमत्वमिवोक्तप्रकारकप्रवेशाश्रयाणामपि तत्तदात्मकत्वमित्युच्यते । वस्तुतस्तु परोक्षवादोऽयमिति ज्ञायते । तथाहि । ब्रह्मविदाप्नोति परमिति वाक्येन ब्रह्मविदः परमाप्तिं सामान्यत उक्त्वा तत्तात्पर्यं सत्यं ज्ञानमित्यृचोक्तम् । तत्र सर्वात्मभाववान् भक्तो भगवता सह तत्स्वरूपात्मकान् कामान् भुङ्क्त इत्युक्तव्याख्यानेन तदर्थोऽवधार्यते । उक्तभक्तस्य सदैव, विरहभावे तु विशेषतः प्रियस्वरूपातिरिक्तास्फूर्त्या अन्नप्राणादिरूपः स एवेति ज्ञापनाय तत्तद्रूपमुच्यते ।

तेन परमप्रेमवत्त्वं सिद्ध्यति । ततो भगवदाविर्भावे सत्यपि पूर्वभावस्यातितीव्रत्वेन ज्ञानादिसर्वतिरोधानेनाग्रिमरसानुभवो न भविष्यतीति स्वयमेव तदनुभवात्मको भवतीति ज्ञापनाय वि-

---

योज्यम् । तथाच तस्यैष इत्यत्र शब्द एव पूर्वसमो, न त्वर्थोऽपि । तेनात्रायमर्थः । तस्येत्यभेदे षष्ठी । तथाच पूर्वस्य यः शारीर आत्मा उपक्रमे जगत्कर्तृत्वेनोक्तस्तदभिन्न एव इति । एवमर्थोक्तौ गमकं तु, अंशोऽन्यस्यान्तरात्मन उक्तत्वमात्र एवेति प्रागेवोक्तम् । प्रवेशस्य योग्यतासम्पादकत्वप्रकारं दृष्टान्तेनाहुः । * एवं सतीत्यादि * । एवमत्र श्रुत्यन्तरानुसारेण वास्तवं पक्षिरूपमादाय प्रकृतश्रुत्यर्थो निर्णीतः । अतः परं परोक्षप्रिया इव हि देवा प्रत्यक्षद्विष इति श्रुतेः । वेदास्त्रिकाण्डविषया ब्रह्मात्मविषया इमे । परोक्षवादा ऋषयः परोक्षं च मम प्रियमित्येकादशस्कन्धीयभगवद्वाक्याच्च परोक्षवादस्यैव ज्यायस्त्वेनात्र परोक्षवाद एवास्तीत्याहुः । * वस्तुत इत्यादि । * उपपादयन्ति । * तथाहीत्यादि, * प्रतिष्ठारूपत्वमित्यन्तम् * तत्रेति * तात्पर्यकथने * । तदर्थ इति * । ऋगर्थः । * तत्तद्रूपमिति * । अन्नप्राणमनोरूपम् । * स्वरूपेति * । भगवानेव ।

ज्ञानरूपत्वमुच्यते । तदाऽनुभवविषयः प्रकट आनन्दमय इति तत्स्वरूपमुच्यते । तत्र निरुपधिप्रीतिरेव मुख्या, नान्यदिति ज्ञापनाय प्रियस्य प्रधानाङ्गत्वमुच्यते । तदा प्रियदर्शनादिभिरानन्दात्मक एव विविधरसभावसन्दोह उत्पद्यते यः स दक्षिणः पक्ष उच्यते । ततः स्पर्शादिभिः पूर्वविलक्षणः प्रकृष्टानन्दसन्दोहो यः स उत्तरः पक्ष उच्यते । नानाविधपक्षसमूहात्मकत्वात् तयोः पक्षयोर्युक्तं तथात्वम् । स्थायिभावस्यैकरूपत्वादात्मत्वमुच्यते । यतस्तत एव विभावादिभिर्विविधभावोत्पत्तिः । परमाप्तिसाधनीभूतब्रह्मज्ञानदशायां तदानन्दोऽपि यः पूर्वमनुभूतः स गणितानन्द इत्येतदानन्दानुभवानन्तरं तुच्छत्वेन भातीप्रगतावमाधन-

---

तत्रेति । आनन्दमयस्वरूपकथने *प्रियस्येति * प्रियस्वरूपस्य । तेन श्रुतौ प्रियमिति नपुंसकलिङ्गस्य नानुपपत्तिः । *प्रधानाङ्गत्वमुच्यत इति * कल्पनयोपदिश्यते । इत आरभ्य कल्पनोपदेशो बोध्यः । तत्रायं प्रकारः । आनन्दमयानुभवे निरुपधिप्रीतिरेव मुख्या । भक्त्याऽहमेकया ग्राह्य इति वाक्ये तस्या एवानुभवजनकत्वात् । नान्यत् साधनान्तरमिति ज्ञापनाय प्रियस्य प्रीतिविषयस्यानन्दस्वरूपस्य प्रधानाङ्गत्वं शिरस्त्वमुच्यते । शिरसाऽभिज्ञायते, सोऽयमिति । तथा निरुपधिप्रीत्या भगवानिति शिरःशब्दे तत्सिद्धिनिबन्धना गौणी । एवमग्रे, * तदेत्यादिना वक्ष्यमाणयोर्मोदप्रमोदयोर्दक्षिणोत्तरपक्षत्वेऽपि तथा । ताभ्यामुड्डीयाऽभीष्टदेशं प्राप्नोति । एवं दर्शनस्पर्शजानन्दाभ्यां भावाभ्यां शीघ्रं भगवन्तं प्राप्नोतीति । * स्थायिभावस्येत्यादिनाऽऽत्मशब्दे तत्सिद्धिनिबन्धना सा । परमाप्तीत्यादिना च पुच्छशब्दे पूर्वेषामानन्दानां प्रशंसानिबन्धना सा बोध्यते । * प्रतिष्ठाशब्दोऽपि तथा । पदमग्रपदेषु परोक्षवादो बोध्यः । तथाच स्वर्णघर्मानुवाके आनन्दरूपं परमकाशकं कमनीयं परमेश्वरस्य यत्स्वरूपं प्रज्ञा ज्ञातवान् । स सर्वान्तर्यामी सर्वनियामको बहुधा विचरति यत्र सर्वमेकं भवति, स आत्मा जनानां मानससम्बन्धी । मानसाक्षेन भावा आनन्दरूपा

त्वेन स्वरूपतोऽपि तस्माद्दीनत्वं चेति पृष्ठभागादपि दूरस्थितः पुच्छरूपत्वं ब्रह्मण उच्यते । पुरुषोत्तमाधिष्ठानत्वात् प्रतिष्ठारूपत्वं च । एवं सत्यक्षरादप्युत्तमत्वेऽप्यप्रधानीभूय भक्तकामपूरणकर्तृत्वेऽसम्भावना विपरीतभावना च सम्भवति । तदभावायासन्नेव स भवतीत्याद्युक्तम् । स्वानुभवाभावेऽपि गुरूपदेशादिनापि तदस्तित्वमात्रमपि यो जानाति तं ब्रह्मविदः सन्तं सत्त्वधर्मविशिष्टं वर्तमानं च विदुरित्यग्रेऽवददस्ति ब्रह्मेति चेदित्यादिना । ब्रह्मासत्त्वज्ञानेऽसन् भवतीत्युक्त्वा तदस्तित्वज्ञाने सन् भवतीत्यनुक्त्वा, सन्तमेनं विदुरिति तत्त्वेनान्यज्ञानं यदुक्तं, तेनोक्तपुरुषोत्तमानन्दानुभववन्तं ज्ञानक्रियाविशिष्टं जीवं वर्तमानं विदुः । अननुभवे केवलं गुरूपदेशादिना तादृग्ब्रह्मास्तित्वज्ञाने स्वरूपतः सन्तं तं विदुर्न तु ज्ञानादिमन्तम् । तदसत्त्वज्ञाने स्वकीकर्तुल्यमिति श्रुतितात्पर्यमिति ज्ञायते ।

एवं विचारचातुर्यवद्भिः सद्भिर्व्रजाधिपे ।
आनन्दमयतानन्दसन्दोहायाऽवधार्यते ॥ ॥ ११ ॥

नन्वानन्दमयस्य न ब्रह्मता वक्तुं शक्या । मयटो लोके विकाराधिकारविहितत्वादित्याशङ्क्य स्वयमेव परिहरति ।

इति तज्जनकस्य यत् स्वरूपं भावरूपं कल्पनया परोक्षवादार्थमुच्यत इति बोध्यः । एतमर्थं दृढीकर्तुम्, असन्नेव स भवतीति श्लोके व्याकुर्वन्ति * एवं सतीत्यादि * ज्ञायत इत्यन्तम् * । शेषाणां श्रुतीनामर्थस्तु पूर्वोक्तपक्षेष्वपि तुल्य इत्यतोऽग्रे न व्याख्यातम् । एवं परोक्षवादव्याख्यानस्य फलं कारिकयाऽऽहुः । * एवं विचारेत्यादि * एवमस्मिन् [illegible] आनन्दस्य ज्ञेयकोटिनिवेशे तदनिवेशे चानन्दमयस्य परब्रह्मत्वं निर्बाधमिति प्रभुचरणैर्व्यवस्थापितम् ॥११॥

अतः परमग्रिमसूत्रमवतारयन्ति * नन्वित्यादि * मयड्वै-

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥ १२ ॥

अनेनैव पूर्वसूत्रार्थः सिद्धो भविष्यति । विकारवाची मयट्प्रत्ययो यस्मिंस्तद्विकारशब्दं तस्माच्चच्छब्दवाच्यं ब्रह्म न भवति । ब्रह्मणोऽविकारित्वादिति चेत् । नात्र विकारे मयट्, किन्तु प्राचुर्यात् । प्राचुर्यमतति प्राप्नोतीति प्राचुर्यात् । तथाच पाणिनिः । तत्प्रकृतवचने मयट् । प्राचुर्येण प्रस्तुत वचनं तत्प्रकृतवचनं, तस्मिन् मयट् प्रत्ययो भवतीत्यर्थः ।

तयोर्भाषायामित्यनेन लोके मयटो विकाराधिकारे विहितत्वात्तै- द्विकनिर्णयस्यापि यादिबोधनाय लोकन्यायेनैव कर्तव्यत्वादित्याश- ङ्क्य परिहरन्तीत्यर्थः । सूत्रं पठित्वा व्याकुर्वते ॥ विकारशब्दान्ने- तिचेन्न प्राचुर्यात् ॥ * अनेनेत्यादि * । विकारार्थनिराकरणेनैव पू- र्वसूत्रगत आनन्दमयशब्दो यौगिक इति बोधनान्निरवद्यानन्दरूपः परमात्मेति सिद्धो भविष्यतीत्यर्थः । * विकारशब्दमिति * पदमि- शेप । अनेन सूत्रांशे मायावादिवद् भ्रान्ताः प्रागपि ऋषयः न्तीति, तथा प्राचुर्यादित्यनेन व्याकरणान्तरे प्राचुर्येऽपि म- त्यपि बोधितम् । तथापीदानीं पाणिनीयस्यैवात्याहतत्वात् त्वाच्च प्राचुर्यार्थे तत्सम्मतिमाहुः । * तथाचेत्यादि * ननु- नीये सूत्रे तत्प्रकृतवचने मयडुक्तो, न प्राचुर्ये इति कथं तस्य स- म्मतित्वेनोपन्यास इत्याकाङ्क्षायां व्याकुर्वन्ति * प्राचुर्येणेत्यादि * सूत्रं तु काशिकायामेवं व्याख्यातम् । तदिति प्रथमा समर्थविभ- क्तिः । प्राचुर्येण प्रस्तुतं प्रकृतम् । तथाच, प्रथमान्तात् समर्थात् प्र- कृतोपाधिके वर्तमानात् स्वार्थे मयड् भवतीति । उदाहरणं तु प्रकृतमन्नमन्नमयमिति । अपरे तु प्रकृतमुच्यतेऽस्मिन्निति प्रकृतव- चनम् । उदाहरणं तु प्रकृतमन्नमुच्यतेऽस्मिन्नित्यन्नमयो यज्ञ इति । उभयथा च सूत्रप्रणयनाद् द्वयमपि प्रमाणमिति । अयमेवार्थः प्र- सादेऽनूदितः । सिद्धान्तकौमुद्यां तु तथानूद्य प्राचुर्येण प्रस्तुतं प्रवृत्तं तस्य वचनं प्रतिपादनमिति व्याख्यानेन सूत्रे षष्ठीतत्पुरुषो

प्राचुर्येण पूर्वापेक्षयाऽल्पाधिक्येन, को ह्येवान्यात् कः प्राण्यादिति वाक्ये प्रकर्षेण स्तुतम् । अतो मयट् पूर्वापेक्षया प्राचुर्यमयते । एकदेशानिर्देशेन तदर्थलक्षणया प्राचुर्यः । प्राचुर्येण प्रस्तुतार्थवाचकत्वादित्यर्थ इति वा ।

बोधितः । मनोरमादिषु तट्टीकासु तु यद्यपि प्रकृतशब्दः प्रस्तुतमात्रे रूढस्तथापि वचनग्रहणसामर्थ्याद् यादृशस्य प्रकृतस्य लोके प्रख्यापनमभिप्रेतं तत्रायं मयट् स्यादिति विशेषो लभ्यत इत्युक्त्वा स्वार्थिकप्रकरणवशात् प्रचुरार्थबोधविषयवृत्तिमतः प्रातिपदिकात् स्वार्थे मयड्विधाने प्रातिपदिकार्थोपस्थापिका प्रथमा विभक्तिः प्रकृतार्थादेव सिद्ध्यतीति वचनपदस्य भावव्युत्पत्तौ तच्छब्दग्रहणं व्यर्थम् । अधिकरणव्युत्पत्तौ तु धर्ममात्रापकत्वात् सार्थकम् । उच्यमानता प्रकृतता च प्रकृत्यर्थविशेषणम् । ल्युडोक्तमधिकरणत्वं तु मयडर्थ इत्युक्तम् । शब्देन्दुशेखरे तु स्वार्थिकप्रकरणविरोधादधिकरणत्वं मयडर्थ इत्यसङ्गतम् । नन्वान्नमयो यज्ञ इत्याद्युदाहरणासिद्धिः । प्राचुर्यवदधिकरणलक्षणाच्छब्दात् स्वार्थे मयट्करणेऽपि तद्रूपैः । वृत्तेरव्यत एव सङ्गतेश्च । सूत्रे तु तद्ग्रहणं चिन्त्यप्रयोजनमित्युक्तम् । तदेतत् सर्वं वृत्तिविचारादेवानुसन्धाय तद्ग्रहणवैयर्थ्यनिवृत्त्यर्थम् । तेन प्रकृतं तत्प्रकृतम्, उच्यत इति वचनमवश्यप्रतिपादनम् । प्राचुर्येण प्रस्तुतस्य वचनं तत्प्रकृतवचनम् । तत्र तथेति सूत्रार्थः । तथाच तच्छब्दस्य विवक्षितप्रकारबोधनार्थत्वाद्वचनपदस्यावश्यकार्थत्वाद्वेवं सूत्रार्थोक्तौ सम्मतिरयं निर्बाधमिति तथेत्यर्थः । स्वोक्तं विभजन्ते * प्राचुर्येणेत्यादि * । * पूर्वापेक्षयेति * अन्नमयादिचतुष्टयापेक्षया । ननु प्राचुर्येण प्रस्तुतेऽर्थेऽनुशिष्टो मयट् कथं प्राचुर्यबोधक उच्यत इत्यत आहुः । * एकदेशेत्यादि * । यथा हि भीमसत्यादिपदानि, विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्य इति वार्त्तिकेनैकदेशभूतान्यपि विशिष्टार्थनामानि, तथात्र नामत्वाभावेन वक्तुमशक्यत्वाल्लक्षणया प्राचुर्येण प्रस्तुतं बोधयतीत्यर्थः । पूर्वस्मिन् पक्षे कल्पनाक्लेशात् प्रकारान्तरेण व्याख्यातम् । त-

छन्दसि द्व्यज्व्यतिरिक्तस्थले मयटो विकारे विधानाभावाद् व्याकरणमप्यर्थनिर्णायकम् । विज्ञानमयानन्दमयशब्दौ यद्यपि पाणिनिर्मयड् वैतयोर्भाषायां, द्व्यचश्छन्दसीति कथमवोचत् ।

याच पञ्चम्यन्तमिदं पदम् । तेन कल्पनाऽक्लेश इत्यर्थः । ननु, मयड्वैतयोर्भाषायामिति सूत्रे विकल्पस्य भाषायां सिद्धेर्वेदे नित्यं विकारे मयट् । किञ्च, नित्यं वृद्धशरादिभ्य इत्यग्रिमसूत्रे भाषायामित्यस्यानुवृत्त्या भाषायां नित्यो, वेदे वृद्धादिभ्यो वैकल्पिक इति सिध्यति । एवं सत्यानन्दशब्दस्य वृद्धत्वात् ततो वैकल्पिको, विज्ञानशब्दाच्च नित्यो विकारे मयडदण्डवारितः । अन्नादिपदेभ्यश्च स्वारसिक एवेति प्रायपाठानुग्रहाद् विकारार्थ एव युक्त इति तं विहाय प्राचुर्ये तदङ्गीकारो न युक्त इत्यत आहुः * छन्दसीत्यादि* । *द्व्यज्व्यतिरिक्तस्थल इति * बह्वच्स्थले । तथाच यदि सूत्रकारः पाणिनिस्तथाभिप्रेयात् तदा छन्दसि बह्वज्व्युदासाय द्व्यच एवेति न नियमयेत् । अतो नित्यो वैकल्पिको वा मयट् छन्दसि बह्वचो विकारे न भवत्येवेति पाणिनीयविचारेणापि प्राचुर्यार्थग्रहणं युक्तमेवेत्यर्थः ।

अत्र शङ्कराचार्याः । अन्नमयादिविज्ञानमयान्तं विकारप्रायपाठमनादृत्यानन्दमयपदस्य प्राचुर्यार्थत्वब्रह्मविषयत्वयोरङ्गीकारे प्रायपाठविरोध आकस्मिकत्वं च । साम्प्रवर्णिकब्रह्माधिकाराद् ब्रह्मविषयत्वादरणेऽन्नमयादीनामपि ब्रह्मत्वप्रसङ्गः । अन्नमयाद्यान्तरस्यान्यस्य कथनात्तेषां न ब्रह्मत्वम् । आनन्दमयादन्तरस्यान्यस्याकथनात् तस्य ब्रह्मत्वमित्यङ्गीकारेऽप्येकस्यैवानन्दमयस्य ब्रह्मण आत्मरूपेनावयवित्वं, तस्यैव पुच्छत्वेनावयवत्वमित्यसामञ्जस्यम् । किञ्च । प्रियमोदादिविशेषयुतस्यानन्दमयस्य सर्वलोकप्रसिद्धत्वेन आवाङ्मनसगोचरत्वाभावादसन्नेव स भवतीति श्लोकस्यापि विरोधः । अपि चानन्दमयस्य ब्रह्मत्वेऽपि प्रियाद्यवयवयोगेन सविशेषब्रह्मत्वमङ्गीकर्तव्यम् । तथा सति यद्वाङ्मनसाऽगोचरत्वबोधकस्य, यतो वाचो निवर्तन्ते इति वाक्यशेषस्य विरोधः । किञ्चानन्द प्रचुर इ-

अत्र केचित् सर्वविप्लववादिनो विकारार्थत्वं वदन्ति। श्रुतिसूत्रादीनामर्थाज्ञानात्। तद् वेदाद्यर्थविद्भिर्भगवतो नवमावतारकार्यं ज्ञात्वोपेक्ष्यम्।

त्युक्ते तत्र दुःखास्तित्वस्यापि प्रत्ययापत्तिः। लोके प्राचुर्यस्य प्रतियोग्यल्पतासापेक्षत्वात्। तथाच सति यत्र नान्यत् पश्यति शृणोति विजानातीति सुखैकरसे भूम्नि ब्रह्मणि तद्व्यतिरिक्ताभावबोधकश्रुत्यन्तरस्यापि विरोधः। किञ्च। प्रियादेः प्रतिशरीरं भिन्नत्वेनानन्दमयस्यापि तथात्वात् तस्य न ब्रह्मत्वं शक्यवचनम्। सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतौ, एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मेति श्रुत्यन्तरे च ब्रह्मण आनन्त्यैकत्वयोः श्रावणात्। किञ्च। आनन्दपदस्यैवाभ्यासो, न त्वानन्दमयपदस्येत्यतोऽपि न ब्रह्मत्वम्। एतमानन्दमयमात्मानमुपसङ्क्रामतीत्यभ्यासस्त्वन्नमयादिप्रवाहपतितत्वान्न ब्रह्मत्वसाधनसमर्थः। अत आनन्दमयशब्दस्य ब्रह्मविषयताया अनिश्चितत्वेन तत उत्तरेष्वानन्दमात्रप्रयोगेष्वानन्दमयाभ्यासस्य कल्पयितुमशक्यत्वान्नानन्दमयो ब्रह्मेत्याहुः।

तन्मतस्याधिकरणसमाप्तौ दूषणीयत्वादत्रैतत्सूत्रे पूर्वपक्षतयोदितमानन्दमयपदस्य विकारार्थत्वं यत् सिद्धान्तितं, तस्यासङ्गतत्वायाहुः। * अत्र केचिदित्यादि * अत्रानन्दमयशब्देऽन्नमयादिषु पञ्चस्वपि वा केचिन्निर्विशेषवादप्रहिला विवर्त्तवादाद्यङ्गीकारेण भगवन्माहात्म्यादिनाशकत्वात् सर्वविप्लववादिनो विषयवाक्याकरश्रुतेस्तद्विचारकाणां व्याससूत्राणां व्याकरणसूत्राणां च तात्पर्याज्ञानाद् विकारार्थत्वं वदन्तितत उक्तश्रुत्याद्यर्थविद्भिर्भगवतो नवमावतारस्य बुद्धस्य कार्यं वेददूषणरूपं ज्ञात्वोपेक्ष्यम्। पाद्मोत्तरखण्डे उमामहेश्वरसंवादे तामसशास्त्रकथनं प्रतिज्ञाय कानि चिदसच्छास्त्राण्युक्त्वा; 'मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते। मयैव कथितं देवि कलौ ब्राह्मणरूपिणा। अपार्थं श्रुतिवाक्यानां दर्शयँल्लोकगर्हितम्। कर्मस्वरूपत्याज्यत्वमत्रैव प्रतिपाद्यते। सर्वकर्मपरिभ्रंशं नैष्कर्म्यं तदुच्यते। परेशजीवयोरैक्यं मयात्र प्रतिपाद्यते। ब्रह्मणश्च परं रूपं निर्गुणं

वक्ष्यते मया। सर्वस्य जगतोऽप्यत्र मोहनार्थं कलौ युगे। वेदार्थवन्महाशास्त्रं मायावादमवैदिकम्। मयैव वक्ष्यते देवि जगतां नाशकारणाद्' इति शिववाक्याद् वेदाद्यर्थविद्भिर्नादरणीयमित्यर्थः। नच प्रायपाठविरोधः। विकारार्थस्य प्राणमयपद एवाभावात्। प्राणादीनां त्रयाणां वृत्तित्वेनाकाशपृथिव्योश्च भूतान्तरत्वेन तदवयवकल्पनाप्रस्थतस्तत्र मयटः स्वार्थिकत्वस्यैव भट्टभास्करोक्तरीत्या निश्चयात्। नच घटाकाशस्य घटविकारत्ववत् प्राणाद्युपाध्यवच्छिन्नस्य प्राणविकारत्वं भामत्युक्तरीत्या सिद्ध्यतीति प्रायपाठसिद्धिरिति वाच्यम्। एतस्या रीतेर्मज्जत्फेनालम्बनकल्पत्वात्। अवच्छिन्ने तद्विकारत्वस्याप्रसक्त्यात्। शास्त्रेषु क्वापि तथाप्रयोगादर्शनाच्च। तुष्यतु दुर्जनन्यायेन तदङ्गीकारेऽपि तस्य सत्यामुभयत्र प्राप्तावेकतरनिर्णायकत्वं, न तु तत्प्रापकत्वमिति द्व्यच्छन्दसीति व्याकरणसूत्रेण, न बह्वच इति नियमिते विज्ञानानन्दशब्दाभ्यां वैकारिकमयट्प्राप्तेरेवाभावेनाऽकिञ्चित्करत्वाच्च। नच मनोरमादिषु, मयड् वेति सूत्रेण, हेतुमनुष्येभ्य इत्यनुवर्तमाने हेतुवाचकादानन्दशब्दादागतार्थे मयटं साधयित्वा विकारस्यार्थिकत्वमुक्तमित्यस्त्येव प्राप्तिरिति वाच्यम्। पञ्चस्वप्यन्नमयादिषु स्वार्थे मयट्प्राप्तौ बाधकाभावेन वृथा तदतिहायैवं क्लिष्टकल्पनस्यायुक्तत्वात्। हेतुत्वस्य निमित्तोपादानसाधारणत्वेन विकारस्यार्थिकताया निर्णेतुमशक्यत्वाच्च। नचानन्दप्राचुर्यस्योक्तरीत्या दुःखशबलत्वस्फोरकत्वेनानन्दमये ब्रह्मत्वसिद्ध्यभावादागतार्थमादाय विकारार्थेऽपि को दोष इति वाच्यम्। लोकेऽपि प्रचुरप्रकाशः सविता, प्रभूतसन्तापो निदाघदिवसोऽन्धकारमयी वर्षाविभावरी, बहुधनो वैश्रवण इत्यादिवाक्यश्रवणे प्रतियोगिनां तमःशैत्यप्रकाशदारिद्र्याणां प्रत्यक्षतो बाधेन तत्र तदल्पत्वशङ्काया अनुदयात्। वेदे तु सर्वभूतोपजीव्यानन्दप्राचुर्यबोधके दूरापेतैव प्रतियोग्यल्पत्वशङ्का। यदि हि तत्र वेदो दुःखसम्भेदमभिप्रेयादवयवकल्पनायां तदपि क्वचिद्विशेषयेत्। सजातीयैरेवार्थैरवयवकल्पनाया अनुपक्रान्तत्वात्। आकाश आत्मा-पृथिवी पुच्छं महः पुच्छमित्यादिना तथा निश्चयात्। यच्च शारीर आत्मेति शरीरसम्बन्धबोधनं दुःखसम्भेदसमर्पकमित्युक्तं, तदप्यन्तर्यामिब्राह्मणाननुसन्धानहेतुकम्। अत एव सत्यपि यत् तद्विचारेणानन्दमये दुःखा-

योऽर्धस्तमवोचाम ॥ १२ ॥

स्तित्वकथनं, तद् ग्रन्थकृतो महादुःखसंस्कारस्य प्राबल्यमेव गमयतीति दिक् ।

भास्कराचार्यास्तु स्वरूपैक्ये प्राचुर्यवचनं प्रचुरप्रकाशो रविरितिवदितराल्पत्वमपेक्षत इत्याहुः ।

रामानुजाचार्यास्तु, तत्प्रचुरत्वमितरसत्तां नावगमयति । अपि तु तस्याल्पत्वं निवर्तयति । इतरसद्भावासद्भावौ तु प्रमाणान्तरावसेयौ । इह त्वपहतपाप्मेत्यादिना प्रमाणान्तरेण तदभाव एवावसीयते । तथा आनन्दमीमांसायां ब्रह्मणि निरतिशयदशाशिरस्कानन्दबोधिकया श्रुत्या पूर्वोक्तजीवानन्दापेक्षया प्राचुर्यबोधनेन सापेक्षत्वमप्येवं पूर्यत इति दुःखसद्भावावगमकथनमसदित्याहुः । तदपि युक्तमेव । उपपन्नत्वात् ।

यत्तु, श्रीग्रामण्योश्छन्दसीत्यत्र धियश्छन्दसीत्यंशो भाष्यकृता छन्दसि विभाषाया व्यवस्थितत्वमुपेत्य प्रत्याख्यातस्तद्रीत्या प्रकृतेऽपि भाषाग्रहणं, द्व्यचश्छन्दसि, नोत्वद्वर्ध्रबिल्वादिति सूत्रद्वयं च त्याज्यम् । तथाचानन्दमय इत्यादावपि विकारे मयट् सुकर एवेति शङ्कराचार्योदितं सम्यगेवेति मनोरमायां समर्थितम् । तत्तु विकारत्वप्रकारकबोधविवक्षायां बह्वचः परस्य मयट्प्रत्ययस्यासाधुत्वज्ञापनाय, द्व्यचश्छन्दसीत्यादेरावश्यकत्वेन दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यादिति दूषणं प्रदर्श्य रामकृष्णशास्त्रिभिरेव सिद्धान्तरत्नाकरे दूषितमिति न कथमपि विकारे मयट्सिद्धिः । यदपि प्राचीनवृत्तिकारैर्विज्ञानमयस्थले विकारार्थकत्वं यदाश्रितं तत्रैव गतिरिति मनोरमायामुक्तम् । तदपि कल्पितमिवाभाति । रामानुजाचार्यैर्वृत्तिकारानुसरणस्य कृतत्वेन तैरननूदितत्वात् । अथास्ति तत्र तर्हि तत्रैव दोषो नान्यत्रेति, न किञ्चिदेतत् । किञ्च पूर्वसूत्रे, अभ्यासादित्युक्त्याऽस्मिन् सूत्रे प्राचुर्यादिति यदुक्तं तेनान्नमयादिषु पञ्चस्वपि प्राचुर्यमेव बाधकाभावात् सिद्ध्यतीति प्रायपाठोऽप्येतस्यैवानुग्राहको, न तु विकारार्थस्येति बोधनायाहुः * योऽर्धस्तमवोचामेति * यः सर्वत्रानुस्यूतः प्रधानामर्थस्तं व्याकरणसूत्रोपन्यासेनावो-

शब्दबलविचारेण मयटो विकारार्थत्वं निवारितम् । अर्थबलविचारेणापि निराकरोति ।

तद्धेतुव्यपदेशाच्च ॥ १३ ॥

हेतुत्वेन व्यपदेशो हेतुव्यपदेशः । तस्य हेतुव्यपदेशस्तद्धेतुव्यपदेशस्तस्मात् । एष ह्येवानन्दयाति । आनन्दयतीत्यर्थः । सर्वस्यापि विकारभूतस्यानन्दस्यायमेवानन्दमयः कारणम् । यथा विकृतस्य जगतः कारणं ब्रह्म अविकृतं सच्चिद्रूपमेवमेवानन्दमयोऽपि कारणत्वादविकृतोऽन्यथा तद्वाक्यं व्यर्थमेव स्यात् । तस्मान्नानन्दमयो विकारार्थः । चकारः समुच्चयं वदन् सूत्रद्वयेनैकोऽर्थो मध्ये प्रतिपादित इत्याह ॥ १३ ॥

ननु किमिति निर्बन्धने सूत्रत्रयेणैवं वर्ण्यते । अभ्यासपाद-

धामेत्यर्थः ॥ १२ ॥

उक्तसूत्रेण विकारार्थे निरस्तेऽग्रिमसूत्रस्य किं प्रयोजनमित्यत आहुः * शब्देत्यादि * तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोदिति श्रुतेर्मुखं व्याकरणं स्मृतमिति परिशिष्टाच्च व्याकरणरूपः शब्दोऽर्थनिर्णायक इति तद्बलविचारेण तथा कृतम् । तदपेक्षया अर्थस्तु बलिष्ठः । प्रतिपाद्यत्वेन शेषित्वात् । उक्तरीत्या निराकरणे स चेद् विरुध्येत तदा प्रयासो व्यर्थः स्यादतस्तद्वारणाय सूत्रान्तरमित्यर्थः । उक्तरीतिकं विकारार्थनिराकरणं व्युत्पादयन्ति * सर्वस्येत्यादि * । * व्यर्थमेव स्यादिति * रसं ह्येवायं लब्ध्वाऽऽनन्दीभवतीति पूर्ववाक्ये पूर्वप्रकृतस्यानन्दमयस्यैव रसत्वेन सिद्धत्वात् तल्लाभेनानन्दयत्ताश्रावणेनैव रसरूपस्यानन्दकारणताया अर्थतः सिद्धौ पुनस्तत्कथनमप्रयोजनकं सत् तथा स्यादतः कारणत्वेनाविकृतत्वबोधनायैवेदं वाक्यम् । तेनाविकारत्वमेव सिद्ध्यतीत्यर्थविचारेणापि न तथेत्यर्थः ॥ १३ ॥

मान्त्रवर्णिकसूत्रमवतारयन्ति *नन्वित्यादि* । *एवमिति*

यदुपासनापरत्वेनापि श्रुत्युपपत्तेः। पक्षपुच्छादित्वेन मोदप्रमोदादीनामुक्तत्वाच्च। तस्माद् ब्रह्मत्वेन साधितमप्यावश्यकोपपत्त्यभावान्न ब्रह्मपरत्वमिति प्राप्तेऽभिधीयते।

मान्त्रवर्णिकमेव च गम्यते ॥ १४ ॥

सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति मन्त्रः। मन्त्रेणाभिधया वृत्त्या प्रतिपाद्यं मान्त्रवर्णिकम्। तदुपपादनग्रन्थे तदेव मुख्यतया ज्ञायते। यत्र यदुद्दिष्टं तदेव मुख्यतया ज्ञातव्यम्। उपपादनीयं च सन्दिग्धम्। तत्र, ब्रह्मणा विपश्चितेति सन्दिग्धं सर्वज्ञं ब्रह्म।

परमात्मपरत्वेन। नचोपास्तेरश्रवणादप्रामाणिकं कथं कल्पनीयमिति शङ्क्यम्। तदभावेऽपि विद्युद् ब्रह्मेत्यादिषु विद्युदाद्युपासनासु प्रकरणबलेन तत्स्वीकारात्। प्रकृते तु पक्षपुच्छादित्वेन मोदप्रमोदादीनां कल्पनयोक्तत्वाच्च लिङ्गस्यापि सद्भावात्। तस्मादुक्तहेतुद्वयाद् ब्रह्मत्वेन साधितमप्यानन्दमयपदमावश्यकोपपत्त्यभावान्न ब्रह्मपरमिति प्राप्ते इत्यर्थः। ब्रह्मपरत्वमिति पाठे त्वर्हतीति शेषस्त्रुटितो बोध्यः। को मन्त्रः, किं मान्त्रवर्णिकमित्याकाङ्क्षायामाहुः। * सत्यमित्यादि * यथाच यं कञ्चिदर्थमभिसन्धाय वाक्यसम्बन्धानां नानात्वात् तेषु यं कञ्चिदादाय लक्षणया यत्किञ्चिदुच्यते, तन्न मान्त्रवर्णिकम्। किन्तु मन्त्रेणाभिधया पदशक्त्या मुख्यवृत्त्या यत् प्रतिपाद्यं, तत् तथेत्यर्थः। एतस्य मान्त्रवर्णिकस्य कथमुपपत्तित्वमित्यत आहुः * तदित्यादि *। *तदुपपादनग्रन्थ इति* । सर्वस्मिन् प्रपाठके। तथाच तस्य मुख्यत्वादावश्यकोपपत्तित्वमित्यर्थः। मुख्यत्वमेवास्य कथमित्यत आहुः * यत्रेत्यादि * ननु तदेषाऽभ्युक्तेति प्रतिज्ञानान्मन्त्रस्य ब्राह्मणव्याख्यानत्वं स्फुटम्। शिष्टस्य प्रपाठकस्य मन्त्रव्याख्यानत्वे किं गमकमित्यत आहुः * उपपादनीयमिति *। * सन्दिग्धमिति * विभक्तिभेदात् पदभेदाच्च सन्दिग्धम्। तथाच सन्दिग्धोपपादकत्वमेव व्याख्यानत्वगमकमित्य-

तस्य हि फलत्वं वाक्ये नोपपाद्यते । फलं तु सर्वैः स्तुत आनन्दः । अभ्यासात् स्तुतत्वमित्यवोचाम । शिरःपाण्यादिकं तु स्तुत्यर्थमेव पुरुषविधत्वाय । लोके ह्यन्तर्भूतं बहिर्वेष्टितं च तदाकारं भवति ।

र्थः । ननु सर्वस्मिन् ब्रह्मणि कस्मिन्नंशे कुतश्च सन्देह इत्यत आहुः । * तस्य हीत्यादि * । * वाक्य इति * मन्त्रे । तथाच ब्राह्मणवाक्ये द्वितीयया परस्य फलत्वबोधनात्, तद्व्याख्यानमन्त्रे तु द्वितीयया कामानां फलत्वबोधनाद् ब्रह्मणश्च गौणत्वबोधनात् तस्य फलत्वांशे सन्देह इत्यर्थः । तर्हि कथं तस्य फलत्वमुपपाद्यत इत्याकाङ्क्षायां सर्वतः प्रचुरानन्दरूपत्वेनोपपाद्यत इत्याहुः * फलन्त्वित्यादि * । * सर्वैरिति * प्रकारैः । प्रकारास्त्वभ्याससर्वान्तरत्वसर्वाधिकत्वादयो बोध्याः । ननु यदि प्रचुरानन्दरूपेणैव फलत्वाभिप्रेतं स्यादमूर्तस्य तथोक्तं स्यान्न तु शिरःपाण्यादिकं कल्प्येत । प्रयोजनाभावात् । कल्पनया चोपासनार्थता प्रतीयते, न तु परमफलतेत्यत आहुः * शिर इत्यादि * । * शिरःपाण्यादिकमिति * इदमा बोधितं शिरःपाण्यादिकम् । * पुरुषविधत्वायेति * सर्वेषां पुरुषविधत्वाय । यदि हि स्वयं पुरुषविधो न स्यात्तदा तदुपरितनोऽन्नमयान्तः कोऽपि पुरुषाकारो न स्यादिति तदर्थं तथोक्तिरिति तस्य पुरुषविधतामन्वयं पुरुषविध इति वाक्यादेव प्रतीयते । अतः सा कल्पना नोपासनार्थाऽपि तु स्तुत्यर्थेति कल्पनाया लिङ्गत्वाभावात् प्रकरणापेक्षया वाक्यस्य बलिष्ठत्वाच्चानन्दमयपदस्य ब्रह्मपरत्वं न पारिप्लवमित्यर्थः । नन्वानन्दमयस्य पुरुषविधत्वेन कथं सर्वेषां तथात्वमित्यत आहुः । * लोके हीत्यादि * । अयमर्थः । लोके ह्यन्तर्भूतस्य तदाकारता मूषानिषिक्तप्रतिमादौ दृष्टा । बहिर्वेष्टितस्य तदाकारता नृपदेहे सीवितवसनादौ च दृष्टा । तथाच यथा भाण्डकर्तारः प्रथमत आकृतिं मधूच्छिष्टादेः कृत्वा तदुपरि मृदं वेष्टयित्वा तन्मूषायां धातून् पूरयन्ति । अन्यथा पूरितभाण्डनिर्माणं न भवति । तथात्र तादृशोऽयं देहः । अतोऽत्र देहे कश्चिदान्तर एवंविधो वर्तते यदुपरि समागता अन्नरसादयः पुरुषाकारा भवन्ति । नो चेद् घटादिवत् कृतिसाध्यत्वाभावाद्

जीवोऽत्र मुख्यः। कर्तृत्वेन व्यपदेशात्। स च वस्तुतो हंसरूपः। पुरुषाधिकारकं हि शास्त्रम्। तेन पुरुषशरीरे तदाकारः सर्वं फलं प्राप्नोति। अतः पुरुषं हंसरूपेणानुवर्णयति।

भस्मोत्करवद् राशीभूता एव भवेयुः। अत्र तु श्रुतौ, तस्माद्वा एतस्मादन्नरसमयादन्योऽन्तर आत्मा प्राणमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव तस्य पुरुषविधतामन्वयं पुरुषविध इत्यादौ पूर्वं प्राणमयादिकमुक्त्वा तेन प्राणमयादिना आन्तरेण एषोऽन्नमयादिरुपरितनः पूर्ण इति पूर्वोक्तन्यायेन पूर्णतां प्रतिज्ञाय तनस्तां निगमयितुं, स वा एष प्राणमयादिः पुरुषविध एवेत्यनेन तदाकारमुक्त्वा तस्य प्राणमयादेः पुरुषविधतामनुलक्ष्यीकृत्य, अयमन्नमयादिः पुरुषविध इति वदति। तेन सर्वान्तरस्यानन्दमयस्यैव सर्वत्र पुरुषाकारसमर्पकता पर्यवस्यति। तेन तथा सिद्ध्यतीति। नन्वस्त्वेवं, तावता स्तुतिः का वा सिद्ध्यतीत्यत आहुः * जीव इत्यादि, वर्णयतीत्यन्तम् *। * नेनेति * हेतुना। * तदाकार इति * हंसाकारः। अयमर्थः। उक्तमन्त्रे सोऽश्नुत इत्यनेन जीवः फलादाने कर्तृतया व्यपदिष्टः फलभोगे मुख्यः। तस्य च, द्वा सुपर्णाविति श्रुत्या, एवं स मानसो हंसो हंसेनैव प्रबोधित इति स्मृत्या च हंसरूपेणैव सिद्धत्वात् पुरुषाधिकारेण मनुष्यस्य शास्त्रस्य तं प्रत्यप्रवृत्तौ तस्य ब्रह्मविदत्वाभावेन वेदनादिफलस्याप्यभावाच्छास्त्रादेर्वैयर्थ्यं स्यादिति फलार्थं शास्त्रसार्थक्यार्थं च जीवस्य पुरुषरूपमावश्यकम्। तथा समतां विना फलानुभवदौर्घट्याद् ब्रह्मसमतायाश्च, न तत्सम इत्यादिश्रुत्या निषेधात् फलानुभावनार्थं समताये ब्रह्मणोऽपि हंसरूपमावश्यकम्। अतः पुरुष एव यदा हंसरूपेण जीवान्तराविश्य तैः पुरुषरूपेणान्तरितस्तदा तद्द्वारेण पुरुषरूपो जीवः सर्वं लौकिकालौकिकफलमनुभवति। परमात्मा च हंसेऽन्तर्भूतो हंसाकारश्च सन्तत्फलमनुभावयतीति श्रुतिरपि परमात्मानं हंसरूपेण पुर्यावेशोत्तरं वर्णयति। तथा च स्वयमतिमहानपि जीवस्य फलभोजनार्थमेतत् करोतीत्येषा स्तुतिरित्यर्थः। एवं पक्षिरूपकल्पनस्य शिरःपाण्यादिकथनस्य च स्तुत्यर्थतासमर्थनेन निरालम्बना प्रत्यगात्मविषया बुद्धिः कर्तुमशक्येति वृद्धशारीराम-

पञ्चस्वपि शारीर आत्मा जीव एक एव । तत्रान्नमये निःसन्दिग्धत्वात्, तस्यैष एव आत्मेति नोच्यते । द्वितीयादिषु प्रथमोक्तमेवातिदिश्यते । तत्रान्नमये हस्तेन प्रदर्शयन्निव निःसन्दिग्धं व्याख्यातम् । तदन्तरो हि प्राण आन्तरव्यवहारकारणम् । बलभोजनविसर्गादिषूपयोगात् । तस्य सञ्चार आकाशे परिनिष्ठितः पृथिव्याम् । एवं लौकिकव्यवहारार्थं बाह्याभ्यन्तरभेदेन द्वयम् ।

सामान्येन प्रत्यगात्मनि बुद्धिसिद्ध्यर्थं शाखाचन्द्रन्यायेनेदं कल्पनमित्यपास्तम् । तथा सति पुरुषरूपकल्पनयापि कार्यसिद्धेः पक्षिरूपकल्पनावैयर्थ्यप्रसङ्गादिति । ननु यद्येवमभिप्रेतं स्यात् तर्ह्यानन्दमयस्यैव पक्षिरूपत्वं वर्णितं स्यान्नान्नमयादीनामतो नैवमित्याशङ्कायां पूर्वोक्तं विभजन्ते * पञ्चस्वित्यादि * तथाच प्राणमयादीनां चतुर्णां व्याख्याने, तस्यैष एव शारीर आत्मेति कथनात् पञ्चस्वपि फलेष्वेकस्यैव जीवस्य भोक्तुः पञ्चानां शरीरतया भोग्यत्वस्य च ज्ञाप्यत्वेन हंसरूपजीवानुरोधादन्नमयादिष्वपि तथा कल्पनं युक्तमित्यर्थः । ननु यद्येवं तदान्नमय इदं वाक्यं कुतो नोच्यत इत्यत आहुः *तत्रेत्यादि* कोशेऽन्नमये शरीरस्यस्यैकात्मभोग्यत्वस्य च प्रत्यक्षसिद्धत्वेन तत्तुल्येऽन्नमयेऽपि तथात्वस्यासन्दिग्धत्वान्नोच्यत इत्यर्थः । नन्वेवं सत्यन्येष्वपि तत्तत्कोशतौल्यात् तत्रापि नोच्येतेत्यत आहु *द्वितीयेत्यादि* * प्रथमोक्तमिति * अन्नमय उक्तं पञ्चावयवकत्वम् । तथाचातिदेशादार्थ्यार्थं तदुक्तिरित्यर्थः । एतदेव प्रपञ्चयन्ति * तत्रेत्यादि * । * प्रदर्शयन्निवेति * वदतीत्यन इति शेषः । तथाच यत एवं वदत्यतः प्राप्यरूपेऽन्नमयेऽप्यत्र व्याख्यातं तदवयवसाम्यं निःसन्दिग्धमित्यर्थः । प्रदर्शयन्तीवेति वा पाठः । प्राणमये आहुः । * तदन्तर इत्यादि * । अत्र, * बलेत्यादिना प्राणादित्रयस्य कार्यमुक्तम् । कोशादेदश्च दर्शितः । स पञ्चवृत्तिको दशवृत्तिको वा अयं तु त्रिवृत्तिकः । तस्य सञ्चारो नियते देशे हृदयादौ । अस्य तु सर्वत्राकाश

तदनु वैदिकव्यवहारः। स च मनोमयः पुरुषः। आदेशः कर्मचोदना। ब्राह्मणानि सशेषाणि। अथर्वाङ्गिरसे ब्रह्मकर्मत्वात् प्रतिष्ठा। तदनु नानाविषयाणामविसाधनत्वतः फलं विज्ञानमयः। तत्र श्रद्धा आपः। तृतीयाध्याये त्वयमर्थो विस्तरेण

इति स तस्य स्वरूपलाभहेतुत्वादात्मा। स तु देहे स्थितोऽयं तु सर्वस्यां पृथिव्यामिति। अतो द्विविधभोगसाधनत्वेन साभिमानाय द्वयोः कथनमित्यर्थः। अग्रिमप्रयोजनादिकमाहुः * तदन्वित्यादि * लौकिके व्यवहारे पयःप्रभृतिभिः स्वातन्त्र्यसम्पत्तौ सत्यां वैदिके प्रवर्तेत इति वेदप्रयुक्तो मनोमात्रेन्द्रियप्राणव्यापारस्तस्यानन्तरमावी। तस्य च लौकिकाद् भेदः, शब्द इति चेत्ततः प्रमथाद् इत्यत्र सोपपत्तिकं वक्तव्यः। तद्भोगसाधनाय च स वेदात्मको मनोमयः पुरुषः। वेदस्य च मनोमयत्वमेकादशस्कन्धे, स एव जीवो विवरप्रसूतिरितिश्लोकेन भगवतोक्तम्। * सशेषाणीति * सार्थवादानि * ब्रह्मकर्मत्वादिति *। चातुर्होत्रविधाने ब्रह्मणः कृताऽकृतावेक्षकत्वेन तत्कर्मणोऽथर्वसिद्धस्य कर्मस्थैर्यसम्पादकत्वादथर्वाङ्गिरसः प्रतिष्ठारूप इत्यर्थः। शान्त्यादिकर्मबोधकत्वात् पुच्छत्वमपि तस्य बोध्यम्। एतेन नानावृत्तिकान्मनोमयकोशाद् भेदोऽपि दर्शितः। एवं द्विविधैहिकभोगौपयिकं द्वयं वैदिकव्यवहारौपयिकं तृतीयं चोक्त्वा पारलौकिकभोगौपयिकं चतुर्थमाहुः। *तदनु नानेत्यादि*। विज्ञानमय इति * विज्ञानप्रचुरः। तस्यावयवानां स्वरूपमाहुः * तत्र श्रद्धेत्यादि *। पञ्चाग्निविद्यायां, पञ्चम्यामाहुत्याः हुतायामापः पुरुषवचसो भूत्वा समुत्थाय वदन्तीति प्रश्नाग्निरूपणभागे प्रथमाहुतौ, देवाः श्रद्धां जुह्वतीति कथनाच्च श्रद्धारूपा आपो मुख्या इति शिर इत्यर्थः। अस्यार्थस्य काल्पनिकत्वपरिहाराय विचारितत्वं बोधयन्ति * तृतीयेत्यादि * रंहत्यधिकरण इत्यर्थः। ननु प्रथमाहुतौ श्रद्धाहोमम्नतः सोमवृष्ट्यन्नरेतःक्रमेण पञ्चम्यामाहुतौ हुतायां रेतसः पुरुषभाव इत्यवयवपूर्वभावात् कथमस्य जीवभो-

गम्यते । यथोक्तकर्तृत्वात् क्रममुक्तिः ।

अतस्तौ समीपमागतानुष्ठीयमानौ धर्मौ योगश्च मुख्यत्वादात्मा । अधोभागो महर्लोकः । तादृशस्य ततोऽर्वाक् संस्रवभावात् । ततोऽपि ब्रह्मविद आनन्दमयः फलम् । तस्य स्वरूपस्यैकत्वाद् धर्मभेदेन शिरःपक्षादि निरूप्यते । तस्य मुख्यतया प्रीतिविषयत्वं धर्मस्तच्छिरः । मोदप्रमोदावपरिनिष्ठितपरिनिष्ठितावानन्दातिशयौ । आनन्दस्तु स्वरूपम् । साधनरूपत्वात् ।

एवरथं भोगसाधनत्वं विद्याकाण्डत्वयामाहुः । * यथोक्तेत्यादि * । अक्रमयाथुक्तोपासनाकर्तृत्वात् क्रममुक्तिः । एतेनोपसनाकथनप्रयोजनमपि बोधितम् । तथाच श्रद्धादीनामर्थानां पूर्वसिद्धत्वेन सत्त्वादेतद्वयवास्तु पूर्णा एव । तेन जीवस्य क्षणिको भोग इति न दौर्धस्थमित्यर्थः । एतेन संशयविपर्यासादिनानाशुक्तिकाद् विज्ञानमयकोशाद् भेदो दर्शितः । अथैतत् सिद्धम् । अन्नब्रह्मोपासनायां सर्वान्नप्राप्त्या लौकिको बाह्यो भोगस्ततोऽग्निमोपासने सर्वायुःप्राप्तिरूप आन्तरः । तदग्रे ब्रह्मानन्दज्ञानात् सर्वदा भयाभावाद् वैदिकः । तदग्रे प्रमादाभावे सति पापनाशपूर्वकसर्वकामाप्तिरूप इति । अथ पञ्चान्तरस्वरूपमाहुः * ऋतेत्यादि * । * तादृशस्येति * अग्निहोमात् पूर्वजन्मनि निष्कामयज्ञकर्तुर्ज्ञानरहितस्य ततः श्रद्धादिक्रमेण प्राप्तयोग्यदेहस्य । एतादृशस्य ज्ञानप्राप्त्या मुख्यं फलं भवतीति विषयमाहुः * ततोऽपीत्यादि * । * साधनरूपत्वादिति * ज्ञेयत्वेन साधनशेषतया साध्यत्वात् । एवं, लोके हीत्यादिना वर्णायनीत्यन्तेनोक्तमर्थं विभज्य पुरुषविधत्वं पक्षिरूपत्वं च समर्थितम् । तेन च मन्त्रे द्वितीयान्नकामपदेनोक्ता एत एव धर्माः । आनन्दमयस्तु विपश्चिद् ब्रह्म । धर्मधर्मिणोः प्रकाशाश्रयवद्भेदेऽप्यभेदादेकादशमेव व्याख्येयवाक्योक्तं पदमिति बोधितम् । साधनादि तत्र विधिज्ञानवत्त्वं लक्षणोक्तसाक्षिप्रैशिष्ट्यं च सम्यङ् नावगम्यत इति

ब्रह्म पुच्छमिति। श्लोकौ तु सच्चिदंशबोधकौ केवलानन्दत्वपरिहाराय।

अपरौ तु श्लोकौ माहात्म्यज्ञापनाय। वाग्गोचरागोचरभेदेन। अवान्तरानन्दास्तु सर्वे तस्मान्न्यूनतया तदुत्कर्षत्वबोधनाय। तस्मात् सर्वत्र प्रपाठके मान्त्रवर्णिकमेव प्रतीयते। अतो मुख्योपपत्तेर्विश्रमानत्वेनानन्दमयः परमात्मैव। चकारो मध्ये प्रयुक्तो विधिमुखविचारेणाधिकरणसम्पूर्णत्वबोधकः॥ १४॥

तदर्थमयिमो ग्रन्थो, न तु साधनशेषब्रह्मज्ञानायेत्याहुः * श्लोकावित्यादि * श्लोकात् पूर्वं, तदपीत्यनेनानन्दमयं लक्ष्यीकृत्य, असन्नेवेति श्लोक उक्तः। तेनानन्दमयमेवास्ति ब्रह्मेति वेत्तव्यमित्यायाति। एवमसद्वेत्तिश्लोके कर्तृत्वसमर्थायित्वयोर्योधनाभिप्रेतलाभः। तेन द्वावेतौ विपश्चित्त्वसमर्थनायेति फलति। तथा सति तत्तच्छ्लोकोत्तरं या ग्रन्थः सोऽपि श्लोकार्थबोधनायेति बोधितम्। नेनायातोऽनुप्रश्ना इत्यादिना ग्रन्थेन साधनस्य विद्वत्त्वस्य फलोपधायकस्वरूपप्रश्नः। सोऽकामयतेत्यारभ्य तत्त्वेव भयं विदुषोऽमन्वानस्येत्यन्तेनोक्तरूपतया सर्वदा विचारयन् एव पूर्णं विद्वत्त्वं तदेव फलं नान्यथेति सिद्ध्यति। भीषाऽस्मादित्यादिग्रन्थस्य तात्पर्यमाहुः * अपरावित्यादि * भीषाऽस्मादिति श्लोकौ वाग्गोचरमाहात्म्यबोधनाय। यतो वाच इति तु वागाद्यगोचरतद्बोधनाय। तथाच सत्याव्याप्तायेतौ परत्वस्य निरूपणायेति सिद्ध्यति। गणितागणितानन्दस्वरूपविशेषावगम विना ब्रह्मणः सकाशात् परस्य निष्कृष्टुमशक्यत्वादिति। शेषं स्फुटम्। श्रीभागवते दशमस्कन्धे वेदस्तुतौ, पुरुषविधोऽन्वयोऽत्र चरमोऽन्नमयादिषु य इत्यनेनायमर्थं उपबृंहितः। अन्नमयादिषु चरम आनन्दमयो भगवानिति। तथा सति तेन पुरुषाकारे समर्पिते सर्वस्य पुरुषाकारता सिद्ध्यति। ये तु प्रसिद्धमन्नमयस्य पुरुषविधत्वं स्वीकृत्य तस्य पुरुषविधत्वमनु प्राणमयाद्यानन्दमयान्तानां पुरुषविधत्वं सूत्रानिविष्टमतिमान्द्यायेनाहुः। तैः श्रीकारस्तत्प्रकार एव न

बुध्यते । मूषानिषिक्तप्रतिमायास्तदान्तराकारानुविधायित्वात् । तस्य च मधूच्छिष्टनिर्मितप्रतिमया समर्पणादत्रापि तेन न्यायेन बाह्याकारानुरोधस्याशक्यवचनत्वात् । तेनैव पूर्णं इत्यत्र तच्छब्देन प्रकृतम्, एतच्छब्देन पूर्वोक्तं च परामृश्य मध्ये, स वा एष इति तदेतच्छब्दाभ्यां च प्रकृतं परामृश्य तस्य पुरुषविधतामित्यत्र पूर्वपरामर्शनम् । ततस्तस्य प्राण एव शिर इत्याद्यवयवकल्पनावाक्ये पुनः प्रकृतपरामर्श इत्येवं व्याख्याने प्रक्रान्तत्यागप्रसङ्गाच्च । तस्मान्नैते कोशाः, किन्तु पञ्चापि फलरूपा व्यापका भिन्ना एव । एतद्वाक्यत्यागोक्तिपूर्वकं तत्तत्प्राप्तिश्रावणात् । तथा श्रुत्यन्तरे, अन्नात् प्राणा भवन्ति भूतानां प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानन्दो ब्रह्मयोनिः स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं च द्यौश्च दिशश्चावान्तरदिशाश्च स वै सर्वमिदं जगत् स स भूतं स भव्यमित्यादिना अनादिपञ्चविधस्योक्तरीत्या पञ्चात्मकस्य पुरुषस्य सर्वव्याप्तिसर्वात्मकत्वबोधनपूर्वकं, ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वानित्यनेन तद्विदो मुक्तिश्रावणाच्च । कोशास्त्वन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयमात्मा मे शुद्ध्यन्तामिति श्रुत्यन्तरे शोध्यत्वलिङ्गात् प्रतिशरीरे भिन्ना एव । न इति स्वस्वजीवीयस्वरूपभेदलिङ्गात् । अतस्तद्भ्रमेणात्र तदङ्गीकरणमपि प्रकृतविरुद्धमेवेति । ननु शोध्यत्वलिङ्गिकायां श्रुतौ सिद्धवन्निर्देशादत्र व्याकारसमर्पणलिङ्गात् कोशत्वं चतुर्णां सिद्ध्यति । मतान्तरे तु तत् सृष्ट्वा तदेवानुप्राविशदित्यनुप्रवेशस्याग्रे श्रावणादनुप्रवेशस्य च श्रुत्यन्तरे, अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति जीवकरणकत्वबोधनादत्र शारीरपदार्थ पञ्चानां कोशत्वम् । द्वितीयवर्णकरीत्या विचारे स्वप्नं अस्माल्लोकात् प्रेत्येत्यादिना इत उत्क्रमणपूर्वकमन्नमयाद्युपसंक्रमणश्रावणाद्देवतानामेव प्राप्यतया फलरूपत्वं सिद्ध्यति । तत्र सिद्धान्ते चतुर्णां विभूतित्वं, पञ्चमस्य परपुरुषरूपत्वात् परमफलत्वम् । पूर्वपक्षे तु पञ्चानामपि विभूतिरूपत्वमिति विशेषः ।

तथापि श्रुतिसमर्थनं तु सर्वत्र मुख्यमतः कुत उत्क्रमणं, कस्य प्राप्तिरित्येतत् सर्वमतेऽपि विचारणीयमेवेति चेत् । अत्रेदं प्रतिभाति । तथाहि । ब्रह्मविदाप्नोति परमिति प्रतिज्ञानात् तत आनन्दं तद्विवरणे फलस्यस्यैवोपपादनादिदं फलप्रकरणमेवेति निश्चीयते । एवं सत्यनु-

प्रवेशश्रुतिः प्रकरणेन सन्दृष्टा परस्य फलरूपस्यैव सर्वेशानुप्रवेशं समर्पयति । न स्वप्रकरणिनो जीवस्य । न च लिङ्गाद् बाधः । तदनु प्रविश्य सच्च त्यच्चाभवदित्यादिना, सत्यमित्याचक्षते इत्यन्तेन वाक्येनानुप्रविष्टसर्वात्मकतायाः सर्वस्य सत्यतायाश्च श्रावणादनुप्रवेशस्य नामरूपव्याकरणार्थतायाः श्रावणाच्चास्यानुप्रवेशस्य तस्मादनुप्रवेशाद् भिन्नत्वेनास्य जीवलिङ्गत्वाभावात् । अन्यथा वाक्यपीडापत्तेः । अग्रे च, यदेष आकाश आनन्दो न स्यादित्यनेनानन्दस्यैवान्तराकाशवर्तित्वश्रावणेन प्रकरणस्यैव पोषाच्च । अत आकारसमर्पणस्याप्युक्तरीत्या ब्रह्मकोशत्वसाधकतया मैत्रायणीयश्रुतौ, विश्वभृद्धै नामैषा तनूर्भगवतो विष्णोर्यदिदमन्नं प्राणो वा अन्नस्य रसो मनः प्राणस्य विज्ञानं मनस आनन्दं विज्ञानस्येति भगवत्तनुत्वश्रावणेन, अन्नात् प्राणा भवन्ति भूतानामिति पूर्वोक्ततैत्तिरीयश्रुतौ व्यापकत्वादिब्रह्मलिङ्गश्रावणेन चैतेषां जीवकोशरूपत्वे दूरनिरस्ते, एते विभूतिरूपाः प्राप्या एवेति सिद्धम् । जीवकोशास्त्वेतद्व्यष्टिरूपा इति तावत् प्रेत्यपदोक्तोत्क्रमणलिङ्गादत्र बोधिताः कल्प्यन्ते । तेन श्रुत्यन्तरीयः सिद्धवन्निर्देशोऽप्युपपन्न एव । एवमेतेषां विभूतित्वे जीवकोशाद् भेदे च निश्चिते पूर्वोक्ताभ्यासादिभिरानन्दमयस्य ततोऽपि निष्कर्षात् परमफलत्वं सुसिद्धमिति ब्रह्मयज्जीवः पूर्वोक्तविभूतिव्यष्टिरूपेभ्यः स्वकोशेभ्य उत्क्रम्य मान्त्रवर्णिकसूत्रभाष्योक्तरीत्या क्रमेण समष्टिभूतान्नमयाद्यानन्दमयान्तानि विभूतिरूपाणि प्राप्यानन्दमयो भूत्वा, एतमानन्दमयं परं ब्रह्माप्नोति । आनन्दमानन्दमयोऽवसान इति द्वितीयस्कन्धवाक्यात् । यद्यप्यत्रानन्दमयो मध्ये नोक्तस्तथापि, तद्वितोऽधि वरुणः सम्बन्धादितिन्यायेन श्रुत्यन्तरसिद्धत्वान्निवेशनीय इति नात्र विवादलेशः । एवमत्र स्वाज्येभ्योऽन्नमयादिकोशेभ्य उत्क्रमणं तत उक्तरीत्या विभूतिरूपाणां तेषामानन्दमयस्य परस्य च क्रमेण प्राप्तिरिति वर्णकद्वयोक्तमुपपन्नतरमित्यवधेहि ।

ननु भवत्वेवं ज्ञानमार्गीयाणां प्राप्तिः, परन्तु भक्तिमार्गीयाणां प्राप्तिः कथं व्युत्पाद्या । प्राप्तिर्हि पूर्वमसम्बद्धस्य पाश्चात्यसम्बन्धरूपा । अत्र चाकारसमर्पकत्वेनानन्दमयस्य लौकिकेऽपि शरीरे स्थितेः पूर्वं सिद्धत्वेन विभूतिरूपाणां चाकाशवद् व्यापकतया सि-

निषेधमुखेन चतुःसूत्र्येदमेवाधिकरणं पुनर्विचार्यते सुदृढत्वाय । इदमत्राकूतम् । जीव एवानन्दमयो भवतु । फलस्य पुरुषार्थत्वात् । स ब्रह्मविदानन्दमयो भवतीति स्वर्गादिसुखवदलौकिकमेव रूपमानन्दमयं जीवस्य फलभूतमिति प्राप्तेऽभिधीयते ।

तेऽर्थात् सिद्धत्वेन भक्तशरीरेष्वपि सत्तया पक्षिरूपेण तेषु भक्तशरीरेषु प्रवेशनिर्वचनाशक्तौ फलप्राप्तेर्व्युत्पादयितुमशक्यत्वादिति चेद् । अत्रोच्यते । अनुप्रवेशश्रुत्या, आविशदिति श्रुत्या च पुरेषु भगवत्प्रवेशो निर्विवादः । पक्षिलिङ्गेनान्येषामपि गतिप्रतिबन्धकीभूतव्यापकत्वोल्लङ्घनात् स निर्विवादः । या पुनः सार्वदिकी स्थितिः सा तु तावन्मात्रकार्यार्थत्वादेतत्फलानुभावने प्रयोजिका न भवत्येव । यथा काष्ठादिषु वह्निस्थितिर्दाहादौ । एवं सति बहिष्ठो भक्त्या यदान्तः प्रविशति, हृद्येव वा मायामपसार्य प्रादुर्भवति तदा अक्षरात्मकानि विभूतिरूपाण्यपि भगवता सह विशन्त्याविर्भवन्ति वा । अक्षरस्य चरणात्मकत्वेन तेषामपि तत्त्वात् । इयं तु लौकिकशरीरे व्यवस्था । यदा त्वेतत्त्यागेनालौकिकशरीरे प्राप्तिस्तदा तु तत्र वर्तमानत्वात् तेषां कार्यकारित्वमेवेति विशेषः । एवञ्चाधिभौतिकरूपेण व्याप्तानि तिष्ठन्त्याध्यात्मिकेन प्रविशन्त्याधिदैविकेन कार्यं कुर्वन्ति । आधिभौतिकत्वं च लौकिके नियतम् । आधिदैविकं भगवति नियतं पर्यवसन्नम् । अवान्तरेषु सर्वेषु त्वाधिदैविकादित्रयमपि यथासम्भवं सव्यपेक्षमिति, न क्वापि प्राप्तिव्युत्पत्तिप्रतिबन्ध इति जानीहीति दिक् ॥ १४ ॥

प्रकृतमनुसरामः । अग्रिमसूत्रमवतारयितुं तत्र प्रयोजनमाहुः * निषेधेत्यादि * ननु को वा सन्देहो येन निषेधमुखविचारावश्यकत्वमत आहुः । * इदमित्यादि * । यद्यप्यानन्दमयस्य फलत्वं, सर्वापेक्षयोत्कर्षश्च प्रतिपादितस्तथापि फलस्य पुरुषार्थत्वेन पुरुषशेषत्वात्, तस्यैष एव शारीर आत्मेत्यानन्दमयेऽपि श्रावणाज्जीव एवानन्दमयो भवतु । न च मन्त्रवर्णविरोधः । स ब्रह्मवित् सर्वान्

नेतरोऽनुपपत्तेः ॥ १५ ॥

इतरो जीवो न । आनन्दमयो न भवति । कुतः । अनुपपत्तेः । जीवस्य फलरूपत्वमात्रेणानन्दमयत्वं नोपपद्यते । तथा सति तस्य स्वातन्त्र्येण जगत्कर्तृत्वेऽस्यलौकिकमाहात्म्यवत्त्वेन निरूपणं नोपपद्यते । अतो न जीव आनन्दमयः ॥ १५ ॥

भेदव्यपदेशाच्च ॥ १६ ॥

इतोऽपि न जीव आनन्दमयः । यतो भेदेन व्यपदिश्यते । रसं ह्येवायं लब्ध्वानन्दी भवतीति । आनन्दोऽस्यास्तीत्यानन्दी । एष ह्येवानन्दयाति । आनन्दयतीत्यर्थः ।

कामान् अश्नुते, विपश्चिता ब्रह्मणा सह भूत आनन्दमयो भवतीत्यर्थोक्तौ तदभावात् । तेन यथा स्वर्गसुखमस्य फलभूतं तथा अखण्डैकरसं मुक्तावस्थालौकिकरूपमपीत्यर्थः । सूत्रं पठित्वा व्याचष्टे ॥ नेतरोऽनुपपत्तेः ॥ इत्यादि । * तथा सतीति * जीवस्यानन्दमयत्वे सति । *निरूपणमिति* ब्रह्मणो निरूपणम् । तथाच, तस्माद्वा एतस्मादात्मन आकाशः सम्भूत इत्यादिनोक्तं माहात्म्यं जीवेऽपि गच्छेदेतां श्रुतिं विरुन्ध्यादिति माहात्म्यश्रुत्यनुपपत्तेस्तथेत्यर्थः । नचात्रैवं जीवस्य जगत्कर्तृत्ववारणे कृते फलाध्यायस्य वक्ष्यमाणस्य जगद्व्यापारवर्जसूत्रवैयर्थ्यापत्तिरिति शङ्क्यम् । तत्रैतादृशजगद्व्यापारसहित्यस्याविवक्षितत्वेनावैयर्थ्यात् ॥ १५ ॥

भेदव्यपदेशाच्च ॥ रसं ह्येवायं लब्ध्वानन्दी भवतीत्यानन्दीति लब्धृलब्धव्यभेदव्यपदेशो न जीवभेदगमकः । आत्मलाभान्न परं विद्यत इत्यत्र स्वरूपपक्षेऽपि लब्धृलब्धव्यभेदव्यपदेशादर्शनेन तस्यानियामकत्वादिति परे मन्यन्ते । तन्निवारणायाहुः *एष ह्येवेत्यादि* तथाचानया श्रुत्याऽऽनन्दनीयानन्दकत्वेन भेदनिर्देशाज्जीवब्रह्मभेदे सिद्धे, आनन्दीति निर्देशस्यापि भेदबोधकत्वे बाधकाभावात् । आत्मलाभश्रुतावपि

चकारात् सूत्रद्वयेन जीवो नानन्दमय इति निरूपितम् ॥ १६ ॥

तर्हि जडो भवत्वानन्दमयः । न । आन्तरत्वान्न कार्यरूपो भवति । किन्तु कारणरूपः । स स्वमते नास्त्येव । मतान्तरे प्रकृतिर्भवेत् । तन्निवारयति ।

कामाच्च नानुमानापेक्षा ॥ १७ ॥

जडा प्रकृतिर्नास्तीति कारणत्वेन निराकृतैव । अथैतद्वाक्यान्यथानुपपत्त्या सत्त्वपरिणामरूपा कल्प्यते । सा कल्पना नोपपद्यते । कुतः । कामात् । आनन्दमयनिरूपणानन्तरं, सोऽकामयतेति श्रूयते । स कामश्चेतनधर्मः । अतश्चेतन एवानन्दमय इति । चकारात्, स तपोऽतप्यतेत्यादि । अतोऽनुमानपर्यन्तमर्थमवोधयद् वाक्यं न तिष्ठतीत्यर्थः ॥ १७ ॥

न जीवलाभस्तात्पर्यविषयः, किन्तु परमात्मलाभ एव तत्र भूम्न एवात्मतया सनत्कुमारेण नारदं प्रति छान्दोग्ये व्याख्यातत्वात् । अतो जीवब्रह्मैक्यस्य तद्रीत्या अभ्युपगमैकशरणत्वमिति दृष्टान्तोऽप्यसंगत एवेत्यर्थः । * नानन्दमय इति * कस्यामप्यवस्थायाम् ॥ १६ ॥

कामाच्चेति सूत्रद्वयमवतारयन्ति * तर्हि जड इत्यादि * । * नेति * एतदेव विभजन्ते * आन्तरत्वादित्यादि * । * * मतान्तर इति * सांख्यमते । * जडेत्यादि * प्रधानक्षेत्रज्ञपतिर्गुणेश इत्यादौ प्रधानादिशब्दैः श्रुतावुक्तापि यादृशी सांख्यैर्जडा मूलकारणभूताङ्गीक्रियते तादृशी श्रुतौ नास्तीतीक्षतिसूत्रे कारणत्वेन निराकृतैव । अथ तस्य विषयमेवेत्यत्रयमवयवना वाक्यान्यथानुपपत्त्या आत्मपदार्थे गौणमङ्गीकृत्य आनन्दस्य सुखात्मकत्वेन सत्त्वधर्मत्वात् सत्त्वपरिणामरूपा कार्यरूपा कल्प्येत, सा तथेत्यर्थः । * अनुमानपर्यन्तमित्यादि * । वाक्यश्रवणोत्तरम्, आनन्दमयपदोक्तोऽर्थः सत्त्वपरिणाम आनन्दविकारत्वाद्लौकिकसुखवदित्येवं यावदनुमीयते तावत् ततः पूर्वमेव कामवाक्यश्रवणात् तत्प्रतिहन्यतेऽतस्तथेत्यर्थः ॥ १७ ॥

अस्मिन्नस्य च तद्योगं शास्ति ॥ १८ ॥

इतश्च न जड आनन्दमयः। अस्मिन्नानन्दमये अस्य जीवस्य च आनन्दमयमात्मानमुपसंक्रामतीति तेन रूपेण योगं शास्ति। फलत्वेन कथयतीति। न हि जीवस्य जडापत्तिर्मुक्ता। अत्रैव सन् ब्रह्माप्येतीति वदस्याप्यर्थः। तस्मान्नायं जीवो, नापि जडः। पारिशेष्याद् ब्रह्मैवेति सिद्धम्। ये पुनरधिकरणभङ्गं कुर्वन्ति, तेषामज्ञानमेव। यतस्तैरप्यानन्दमयः कः पदार्थ इति वक्तव्यम्।

अस्मिन्नस्य च तद्योगं शास्ति॥ * इतिवदस्याप्यर्थ इति * आनन्दमानन्दमयोऽभ्यसान इति श्रीभागवतीयवाक्यादानन्दमय एव सन्नानन्दमयमात्मानमुपसंक्रामतीत्यर्थो ज्ञेय इत्यर्थः।

एवमधिकरणव्याख्यानं समाप्य विकारशब्दसूत्रे विशेषेणाऽदूषणादधुना परमतं दूषयन्ति स्वोक्तसमर्थनाय। * ये पुनरित्यादि *। ये शाङ्करा एकवारं सर्वसम्मतप्राचीनरीत्या व्याख्याय, पुनरिदं त्विह वक्तव्यमित्यादिना प्रायपाठविरोधमाकस्मिकत्वमेकस्यैवावयविरवावयवत्वाऽभ्यामसामञ्जस्यम्, असन्नेवेत्यादिश्लोकद्वयविरोधमानन्दमाऽर्थेऽपि दुःखसाहचर्यमब्रह्मत्वापत्तिमानन्त्यैकत्वविरोधमानन्दमयपदाभ्यासं च प्रदर्श्यानन्दमयपदस्य ब्रह्मपरत्वानादरणेन व्यासोक्ताधिकरणस्य भङ्गं कुर्वन्ति तेषां श्रुत्यर्थाज्ञानमेव। यतस्तैरप्यानन्दमयपदार्थः क इति प्रश्ने तस्योत्तरं वक्तव्यम्। तस्यानुक्तत्वाद् तथेत्यर्थः। नचानन्दमयपदस्य ब्रह्मपरतायां दूषितायां जीवो वा जडो वा पारिशेष्यादानन्दमयः सेत्स्यतीति कथमनुक्तमिति वाच्यम्। दूषणानामसङ्गतत्वात्। तथाहि। अस्यामुपनिषद्यारम्भ एव ब्रह्मविदाप्नोति परमिति ब्राह्मणोक्तोऽर्थः सत्यं ज्ञानेत्यस्यामृचि संक्षेपेणोक्तः।स एव सम्पूर्णे प्रपाठके विस्तारेण व्याख्यायते। तत्र ज्ञानरूपस्य ब्रह्मण ऋचि स्वरूपलक्षणवाक्यादेवासन्दिग्धं प्रतीतेस्तत्र सन्देहानुदयेन तदर्थमुपपादनविस्तारस्याप्रयोजनकत्वात् फलवाक्ये

विभक्तिवचनयोर्भेदेन सन्देहात् तदर्थ एव सम्पूर्णप्रपाठक उपपादनीयः । अत उपपादनबीजत्वेन ब्रह्मशेषस्य ब्रह्मणो मन्त्रवर्णे प्रकृतत्वकथनमेवासङ्गतम् । तत एव तद्विजिज्ञापयिषया पञ्चानां कोशात्वकथनमपि तथा । द्वयपरयोरेकशाखीकारोऽपि शब्दान्तरप्रयोजनाननुसन्धानात् तथा । विकारप्रत्ययासम्भवस्य प्रागुपपादितत्वाच्च मा ।पाठविरोधोक्तिराकस्मिकत्वोक्तिश्चापि तथा । प्रियाद्यवयवयोगस्य बाधकत्वकथनमपि तथा । द्वितीयवर्णकसमासिद्धपरोक्षवादव्याख्यातरीतिकभक्तहृदयाधिकरणप्रादुर्भावाज्ञानात् । केवलनिर्विशेषब्रह्मभावस्यैवात्यधिकरण एव निरस्तत्वाच्च । एकस्यावयवावयविभावविरोधकथनमपि, प्राणस्य प्राणमिति श्रुतिवत्स्य, नेह नानास्तीतिभागस्यार्थाज्ञानादेव । आकारदर्शनं विना नानात्वस्फुरणायोगेन तस्य निषेधानर्हतया तेनैवाकारप्राप्तौ सत्यां नानात्वनिषेधस्यावयवावयविभावविरोधाभाव एव पर्यवसानादिति । एवं, कृत्स्नः प्रज्ञानघन एवेति कृत्स्नपदादपि ज्ञातव्यम् । अकृत्स्नत्वापादकभेदबुद्ध्युदयं विना भेदनिवारणफलककृत्स्नपदवैयर्थ्यस्य दुष्परिहरत्वादिति । पञ्चमसप्तेवेति श्लोकस्य ब्रह्मपुच्छेत्युक्तब्रह्मपरत्वोत्प्रेक्षणमपि निर्हेतुकम् । अन्नमयादिश्लोकानामिवास्याप्यवयवविपरीतायाः प्रागुक्तायास्त्यागे बीजाभावात् । न च प्रियमोदादिरूपस्यानन्दमयस्य सर्वप्रतीतिगोचरत्वात् तद्विषयकभावाभावशङ्काभावादेव तस्य श्लोकस्यासङ्गतिरेव बीजमिति युक्तम् । उक्तप्रियादिपञ्चावयवविशिष्टावयविरूपेणानन्दमयपुरुषज्ञानस्य स्वतः काप्यदर्शनेनोक्तश्रुतित एव ज्ञानसम्भवे तत्र विश्वासरहितस्य निन्दाया विश्वस्तस्य प्रशंसायाश्च बोधनेनास्यासङ्गत्यभावात् । एवं, यतो वाच इति वाक्यशेषस्य निर्विशेषसमर्पकत्वकथनमपि तथा । नायमात्मेति मन्त्रे सकृत्तनुविवरणश्रवणेनैतदुत्तरार्द्धे श्रावितस्यानन्दविग्रहस्यापि तत एव सिद्ध्या तदननुगृहीतवाङ्मनसयोरगोचरत्वस्यापि तत एव सिद्धेस्तस्य निर्विशेषसमर्पकतायाः कल्पयितुमशक्यत्वात् । किञ्चोक्तप्रणाड्या वेदनविषयाणामलौकिकानामेव प्रियादीनामत्र पूर्वोक्तरीत्या परामर्शात् तेषां प्रतिशरीरं भेदाभावादेवानन्दमयस्यानेकत्वमपि न, शक्यकल्पनम् । अत आनन्दमयेऽनेकत्वप्रसञ्जनाय लौकिकानां प्रियादीनामादरोऽप्यसङ्गत एव । यत्पुनर्नचानन्दमयपदाभ्यासः श्रूयत

न तावज्जीवः । तस्य ब्रह्मज्ञानफलत्वेन, ब्रह्मणा विपश्चितेत्यानन्दमयस्योक्तत्वात् ।

इत्यादिना आनन्दपदाभ्यासे आनन्दमयपदाभ्यासस्याशक्यकल्पनत्वमुक्तं, तदपि तथैव । यतोऽभ्यासोऽभ्यस्यमानं भिन्दन्नाभ्यस्तपदवाच्येन सामान्यरूपेण तं भिनत्ति, किन्तु पदान्तरोक्तेन विवक्षितरूपेण । समिधो यजतीत्यादिरूपे तदुदाहरणे यजस्तु यागत्वे समानेऽपि पदान्तरोक्तसमिदादिरूपेणैव भेददर्शनात् । एवं सति तत्र यथाभ्यस्तो यजतिः समिदादिपदाभ्यासकल्पनानपेक्ष एव समिदादिरूपयागभेदसाधकस्तथात्रानन्दपदमप्यानन्दमयपदाभ्यासकल्पनानपेक्षमेवानन्दमयरूपानन्दभेदसाधकमिति स्फूर्त्या तादृशशङ्काया एवानुदयादिति बोध्यम् । अथानन्दवल्लीभाष्ये यदुक्तम् । आनन्द इति विद्याकर्मणोः फलं, तद्विकार आनन्दमय इति । प्रियादिवासनानिर्वृत्तो ह्यात्मानन्दमयो विज्ञानमयाश्रितः स्वप्न उपलभ्यत इति च । तदप्यसङ्गतमिति । तत्रान्त्यं दूषयन्ति * नेत्यादि * अयमर्थः । ब्राह्मणे परशब्देनोदितं फलं तद्रूपारूपायामृचि न केवलेन कामपदेन शक्यवचनम् । तेषां ज्ञेयब्रह्मापेक्षया अपरत्वेन मुमुक्षूपजीव्यब्राह्मणस्थपरशब्दविरोधापातात् । किन्तु विपश्चिद्ब्रह्मपदाभ्यां सहितेन । अतः सर्वान् कामान् सह ब्रह्मणा विपश्चितेत्येतावन्तं ग्रन्थं व्याख्यातुं सर्वप्रपाठक इत्युपपादितम् । तथा सत्यन्नमयादीन्निरूप्य सर्वान्तरः प्रियाद्यवयवानानन्दमयो यो व्याख्यायते स जीवस्य ब्रह्मज्ञानफलत्वेनैव व्याख्यायते । तत्रावयवा एव कामपदार्थोऽवयव्येव विपश्चिद् ब्रह्मेति सिद्ध्यति । उत्तरत्रैतमानन्दमयमात्मानमुपसंक्रामतीत्यनेन तादृशस्य तस्यैव पर्यवसितफलत्वेनोपसंहारात् । स यदि जीवत्वेन विवक्षितः स्यात् प्रथमान्तत्वेनात्र निर्दिष्टः स्यात् । सोऽश्नुत इति श्रुतौ फलशेषिणो जीवस्य प्रथमान्तत्वेनैव निर्दिष्टत्वात् । भोक्तृफलयोरैक्यापत्तिश्च स्यात् । किञ्चान्नमयादीनां व्यवहारे सतामत्र प्रायपाठेनाकस्मात् तद्विहाय स्वप्नोपलभ्यमानग्रहणे तद्विरोधोऽपि । किञ्च ब्रह्मांशस्याविद्ययात्यन्तभिन्नमानिनो जीवस्य ब्रह्मवेद ब्रह्मैव भवतीत्युक्तो ब्रह्मभावः सर्वात्मभावरूपं ज्ञाने तदधिकार-

अथ जडः स्वर्गवत् तदा किमाश्रित इति वक्तव्यम् । जडाश्रितत्वे कर्मफलमेव स्यात् । ज्ञानस्याप्यवान्तरफलमिति चेन्न। तर्हि किमानन्दात् तस्यातिरिक्तं फलं भविष्यति । जडचिद्रूपतायाः पूर्वमेव विद्यमानत्वात् । अस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीतिश्रुतिविरोधश्च ।

रूपा अविद्यानिवृत्तिश्च न ब्रह्मज्ञानफलत्वेन वक्तुं शक्यानि । ब्रह्मभावस्यावरणभङ्गमात्रेण स्वतो भवनस्य भवतिना बोधनात् प्रकृते तदङ्गीकारे द्वितीयाविभक्तिपीडा लक्षणादोषश्च स्याताम । ज्ञानस्य तथात्वाङ्गीकारे तु तस्य, स यश्चायं पुरुषे यश्चासावादित्ये स एकः स य एवं विदितसाधनशेषभूतपुरुषविशेषणत्वेन तत्कोटिनिविष्टत्वात् । साधनरूपस्य फलरूपस्य च ज्ञानस्यावैजात्यात् साधनफलभावव्याहतिश्च । तेन, एतं ह वा व न तपतीत्यादिक ब्रह्मविन्माहात्म्यबोधनद्वारा विद्यादिमाहात्म्यायैव सिद्ध्यति । अतः श्रुतिव्याख्यानस्यासङ्गतत्वादानन्दमयो जीव इत्यसङ्गतम । एवं द्वितीयं दूषयित्वा आद्यं दूषयन्ति । * अथ जड इत्यादि । * जीवाश्रितत्वे भोक्तृशरीरान्तःपातात् तद्व्यतिरिक्ते जड वा ब्रह्म वा आश्रित इत्यनयोर्मध्ये एक किञ्चिद् वक्तव्यम् । तत्राद्ये ज्ञानफलत्वाभावादुक्तश्रुतिविरोध एव दूषणम् । यदि तदविरोधाय ज्ञानावान्तरफलत्वमङ्गीक्रियते, तदा मुख्यं फलमानन्दादतिरिक्तं किं भविष्यतीति वक्तव्यम् । ब्रह्मभावादीनां फलत्वाङ्गीकारे दूषणानामुक्तत्वात् संसारदशायां जडरूपताया ब्रह्मविरदशायां चिद्रूपतायाश्च सत्त्वात् । अत आनन्दमयस्य विकारत्वाङ्गीकारे फलबोधकश्रुतिविरोधः सर्वथा दुर्वार इत्यर्थः । दूषणान्तरमाहुः । * अस्येत्यादि । स एको ब्रह्मण आनन्द इत्यस्य व्याख्याने ब्रह्मानन्दस्य परमत्वायैतस्यैवानन्दस्येति श्रुतिस्तैरुपन्यस्ता । आनन्दमयस्य विकारत्वे ब्रह्मानन्दैकदेशत्वाभावात् स्फुट एव तद्विरोध इत्यानन्दमयस्य विकारत्वेन ब्रह्मानन्दैकदेशत्वाभावात् स्फुट एव तद्विरोध इत्यानन्दमयविकारत्वाङ्गीकारः सर्वथा श्रुतिविरुद्ध इत्यधिकरणभङ्गो न युक्त

पुच्छत्वेन ब्रह्मवचनात् प्रद्वेष इति चेत्, तर्हि स एको ब्रह्मण आनन्द इत्यत्रापि षष्ठ्या भेदनिर्देशाद् ब्रह्मणः परमपुरुषार्थत्वं नाङ्गीकुर्यात्। उपक्रमादिसर्वविरोधश्च पूर्वमेव प्रतिपादितः। यदप्यधिकरणमन्यथा रचितं, ब्रह्मपुच्छमिति। तत्र न पुच्छस्य ब्रह्मत्वं प्रतिपाद्यते, येनान्यथा समाधानं भवेत्। किन्तु ब्रह्मणः पुच्छत्वमिति पूर्वन्यायेनेदं पुच्छं प्रतिष्ठेतिवत्। तत्र श्रुतिबाधो ब्रह्मणाप्यशक्यः।

इत्यर्थः। अधिकरणभङ्गस्याशयान्तरमुद्भावयन्ति। * पुच्छत्वेनेत्यादि। * जिज्ञास्यत्वेन मुख्यतया शास्त्रारम्भे बोधितस्य ब्रह्मणोऽनयाधिकरणरचनया न्यूनता समायातीत्यतः प्रद्वेषादधिकरणभङ्ग इत्यर्थः। तद् दूषयन्ति। * तर्हीत्यादि *। स्वप्रधानस्याप्रधानत्वापत्त्या यदि प्रद्वेषस्तदा ब्रह्मण आनन्द इत्यत्राभिन्नस्य षष्ठ्या भेदनिर्देशाङ्गयाभावरूपस्य फलस्यानन्दकर्मकज्ञानेनैवोक्तत्वात् तस्य परमपुरुषार्थत्वमपि नाङ्गीकुर्यात्। पुच्छत्ववचनवद् भेदवचनस्यापि प्रद्वेषबीजस्य सत्त्वात्। अथ यदि राहोः शिर इतिवद् ब्रह्मण इत्यभेदषष्ठी तर्हि तस्य प्रियमेवेत्यादावप्यभेदषष्ठीमादृत्य पुच्छत्वं माक्रमङ्गीकार्यं, न त्वधिकरणं भङ्क्तव्यमित्यर्थः। भङ्गे पूर्वोक्तानि दूषणानि स्मारयन्ति। * उपक्रमेत्यादि *। ननु न वयमधिकरणं भञ्ज्मः किन्तु प्रकारान्तरेण तत् समर्थयाम इत्याकाङ्क्षायां तद् दूषयितुमनुवदन्ति। * यदपीत्यादि। * ब्रह्मपुच्छमिति। * ब्रह्मपुच्छं प्रतिष्ठेत्यत्र किमानन्दमयस्यावयवत्वेन ब्रह्म विवक्ष्यते, उत स्वप्रधानत्वेनेति सन्देहे पुच्छशब्दादवयवत्वेनेति प्राप्तम्। तत्रोच्यते॥ आनन्दमयोऽभ्यासात्॥ आनन्दमयस्यात्मेत्यत्र ब्रह्मपुच्छं प्रतिष्ठेति स्वप्रधानमेव ब्रह्मोपदिश्यते। असन्नेव स भवतीति निगमनश्लोके केवलस्य ब्रह्मण एवाभ्यस्यमानत्वादित्येवं रचितमित्यर्थः। तद् दूषयन्ति। * तत्र नेत्यादि। * ब्रह्मपुच्छं प्रतिष्ठेति वाक्ये पुच्छस्य यदि ब्रह्मत्वं प्रतिपाद्येत तदा शङ्का स्यात्। पूर्वं वेदनविषयतया लक्षितस्वप्रधानब्रह्मरूपत्वं पुच्छस्य कथमिति। तदा समाधानमपि सम्भ-

मौर्ख्यं चैतत् । आनन्दमयस्यैव ब्रह्मत्वे न कोऽपि दोषः स्यात् । आनन्दमयस्याब्रह्मत्वं परिकल्प्य तत्पुच्छत्वेन ब्रह्म वेदबोधितमिति ज्ञात्वा तत्समाधानार्थं यतमानो महामूढ इति विषयफलयोः किं मुख्यमित्यप्यनुसन्धेयम् । पुच्छत्वोक्तिस्तु पूर्वप्राप्त्याय । अत एव ज्ञानविषयत्वं प्रतिष्ठा च । आनन्दमयो

वेदभ्यासात् स्वप्रधानत्वमिति । दृश्यते तु विपरीतम् । तत्र ब्रह्मपदाभ्यासेन कथं समाधानं भवेत् । अभ्यासो हीतरशब्दश्रुतमर्थं स्वाश्रयपदाभ्यस्यमानं परिच्छिनत्ति, न तु तदर्थं बाधते । समिधो यजतीत्यादौ तदुदाहरणे तथा दर्शनात् । एवमत्रापि ब्रह्मपदाभ्यासस्तत्समभिव्याहृतपदश्रुतं पुच्छमितरेभ्यः परिच्छेत्स्यति, न तु बाधिष्यते । अतो ब्रह्मणोऽवयवश्रुतिबाधोऽनया रीत्या ब्रह्मणा सर्ववेदपाठिनापि कर्तुमशक्यः, किं पुनरितरेणेति व्यर्थमिदमन्यथा रचनमित्यर्थः । दूषणान्तरमाहुः । * मौर्ख्यमित्यादि । * एतत् * । अन्यथा रचनम् । * चकारादधिकरणभङ्ग उभयमपि मौर्ख्यम् । तत्र हेतुरानन्दमयस्येत्यादि । * स्वदुद्भावितानां दोषाणां प्रागेव परिहृतत्वादन्येषां चाभावात् तथेत्यर्थः । ननु प्रकारान्तरेण योजने कौशलाय भवतीति कथं मौर्ख्यमित्यत आहुः । * आनन्दमयस्याब्रह्मत्वमित्यादि * । तथाच भवेत् कौशलाय यद्यानन्दमयस्याब्रह्मत्वं न कल्पयेत, पुच्छश्रुतिं च न बाधेत । तत्तु करोतीत्यतस्तथेत्यर्थः । ननु शास्त्रं प्रकृतं ब्रह्मैव मुख्यमतस्तस्य तथात्वं साधयितुमयं यत्न. कथं मौढ्यायेत्यत आहुः । * विषयेत्यादि * । प्रकृतत्वस्योभयत्र तौल्यान्न तेन रूपेण मुख्यत्वं निर्णेयं, किन्तु रूपान्तरेण । तथा सति तु त्वदभिमतस्य न मुख्यत्वं, किन्तु फलस्येति विषयमुख्यत्वार्थमपार्थो यत्न इत्यर्थः । ननु भवत्वेवं तथापि विषयत्वेनावश्यकस्य पुच्छत्वोक्तिकृतोऽपकर्षः कथं सोढव्य इत्यत आहुः । * पुच्छेत्यादि । * सा तु पूर्वं तत्प्राप्तिबोधनाय । न हि द्वारं गृहं वा अप्राप्य तत्र स्थितं पुरुषं कश्चित् प्राप्नोति । तेन तथेत्यर्थः । अत्र गमकमाहुः * अत इत्यादि * । आनन्दमयस्य तत्र स्थितौ गमकमाहुः * प्रतिष्ठेत्यादि * नन्वेवं सति ब्रह्मत्वमापद्यते, तथ

ब्रह्मण्येव प्रतिष्ठित इति । अत्रावयवावयविभावो भाक्त इति तु युक्तम् । प्राणमयादीनामपि तथात्वात् । अन्तःस्थितस्य बाह्यानुरोधेन तथात्वमिति सर्वं सुस्थम् ॥ १८ ॥

नेह नानाऽस्तीत्यादिभिर्निषिद्धमतो नोक्तं साधीय इत्यत आहुः । * अतेत्यादि * भाक्तत्वस्याप्रामाणिकत्वान्न द्वैतापत्तिदोष इत्यर्थः । ननु भाक्तत्वे भवता ईदृशाकारः कथं समर्थनीय इति शङ्कायामाहुः । * अन्तरित्यादि * बाह्यो जीवस्तदनुरोधेन तथाकार इति न कोऽपि शङ्कावकाश. । तत्प्रकारस्य पूर्वमेवोपपादितत्वात् सर्वं प्राचां वचनं समीचीनमेवेत्यर्थः । एवञ्च यद्भामतीनिबन्धे पक्षद्वयं व्याख्यायोक्तम्, 'प्रायपाठपरित्यागो मुख्यार्थातिलङ्घनम् । पूर्वस्मिन्नुत्तरे पक्षे प्रायपाठस्य बाधनम्' इति । अर्थस्तु, आनन्दमयपदस्य ब्रह्मार्थकत्वपक्षे मयडर्थस्य विकारस्य त्यागेन प्राचुर्यार्थाङ्गीकारे प्रायपाठपरित्यागः । आनन्दमयपदस्य ब्रह्मण्यप्रसिद्धस्य लक्षणया योगेन वा ब्रह्मणि व्याख्याने मुख्यार्थोल्लङ्घनम् । आनन्दपदाभ्यासेन च ज्योतिरधिकरणपूर्वपक्षे ज्योतिःपदेन ज्योतिष्टोमवदानन्दमयो लक्ष्यत इत्यानन्दपदस्यापि मुख्यार्थोल्लङ्घनम् । पुच्छपदं च वालधौ शक्तमानन्दमयावयवे गौणमिति तत्समानाधिकरणब्रह्मपदमपि स्वार्थत्यागेन तत्परमतस्तस्यापि मुख्यार्थोल्लङ्घनमिति चत्वारो दोषाः । विकारार्थकत्वपक्षे तु ब्रह्मपदस्य न स्वार्थत्यागो, नाप्यानन्दमयपदस्य, न चानन्दपदस्य । पुच्छपदमुख्यार्थबाधस्त्ववयवपरतायामधिकरणपरतायां च तुल्यः । अवयवप्रायपाठबाधश्च विकारप्रायपाठबाधेन तुल्य इति विकारार्थग्रहणपक्ष एव साधीयानिति । तदपि व्याख्येयपूजनमात्रमेव, न तु तात्त्विकम् । विकारार्थस्य प्राणमये बाधितस्य घटाकाशदृष्टान्तेनोज्जीवयितुमशक्यत्वात् । आप्राकृतमापण्डितं कस्यापि घटाकाशे घटविकारत्वप्रत्ययस्याभावात् । घटभूते दुग्धादावपि तथाप्रत्ययाभावेन दृष्टान्ताभावादनुमातुमप्यशक्यत्वात् । लोके शास्त्रे तथाप्रयोगस्य क्वाप्यनुपलम्भादिति । एवं बाधिते विकारपाठे तस्य प्रायतया अपि वन्ध्यासुतसौन्दर्यदेशीयत्वात् । किञ्च । शब्दमात्रमोङ्कारस्य विकृतिः । ॐकारस्तु ब्रह्मवाचक एवेति तद्विकृतय. सर्वे-

ऽपि शब्दा उत्सर्गतो ब्रह्मवाचका एव । ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानमिति, स्वधाम्नो ब्रह्मण. साक्षाद्वाचकः परमात्मन., स सर्वमन्त्रोपनिषद्वेदबीजं सनातनमिति, तस्य वाचकः प्रणव इति श्रुतिपुराणपातञ्जलस्मृतिभिस्तथा निश्चयात् । अतः शक्तिसङ्कोचेनैव व्यवहारसिद्ध्यर्थं तत्तद्वदन्तीति तन्निवर्तनायैवाचार्यः श्रौतान् हेतून् ब्रूत इति प्रागेव निर्णीतमिति नानन्दमयानन्दब्रह्मपदानामपि मुख्यार्थोल्लङ्घनम् । अत. पूर्वस्मिन् दोषाभावाद् द्वितीयस्मिन्नेव व्याकरणविरोधादिरूपदोषबाहुल्यादुत्तरं एवासाध्विति । यदपि वेदसूत्रयोर्विरोधे, गुणे त्वन्यायकल्पनेति सूत्राण्यन्यथा नेतव्यानीत्युक्तम् । तदप्यसङ्गतम् । तथाहि । इदं हि, विप्रतिपत्तौ विकल्पः स्यात् समत्वाद् गुणे त्वन्यायकल्पनैकदेशत्वादिति नावमिक तृतीयपादस्थसूत्रस्यैकदेशभूतम् । सूत्रस्य त्वेव विषयः । ज्योतिष्टोमेऽग्नीषोमीयपशावेकवचनान्तबहुवचनान्तौ पाशोन्मोकमन्त्रौ भिन्नयोः शाखयोराम्नातौ । अदिति. पाशं प्रमोक्त्वेतमिति तैत्तिरीये । अदिति पाशान् प्रमुमोक्त्वेतानिति शाखान्तरे । तत्र सन्देहः । बहुवचनान्तो मन्त्र. प्रकृतौ निविशते न वेति । तत्र प्रकरणवशेन प्राप्तावपि विकल्पापादकत्वात् बहुवचनस्यैकस्मिन् पशुपाशे असमर्थत्वाच्च न निवेशो युक्त इति बहुपाशकपशुगणयुक्तासु विकृतीषूत्कर्षव्य इति पूर्वं पक्ष. । सिद्धान्तस्तु पाशरूपप्रातिपदिकार्थोद्दिष्टं विभक्त्यभिहित कर्मकारकं प्रकृतावप्यस्तीति पाशकर्मकोन्मोचनाभिधानेन सम्भवन्मन्त्रो नोत्कर्षं सहते । सङ्ख्यामात्र त्वसम्भवदपि गुणत्वात्प्रातिपदिककारकयो प्रधानभूतयोरुत्कर्षणसमर्थम् । इह सङ्ख्याप्यविवक्षिता । पाशकर्मणोरभिधानमात्रेण व्यवहारस्य सिद्धे. । किञ्चैकस्मिन्नप्यवयवबहुत्वाभिप्रायेण छान्दसो बहुवचनप्रयोगोऽवकल्पते । अतो गुणेऽन्यायकल्पनाया अयुक्तत्वात् प्रकरणानुरुद्धो विकल्प एव युक्त इति । एवञ्चात्र सूत्राणां वेदार्थनिश्चायनाय प्रवृत्तत्वेन सङ्ख्यायदेकदेशत्वाभावात् तदन्यथा नयने मीमांसाद्वयस्य वेदस्य च विप्लवापत्तेरिति । वस्तुतस्तु ।

युक्तिभिरतिशिथिलाभि समादधानो दृढान् दोषान् ।
वाचस्पतिरपि भाष्ये व्याख्याव्याजेन दूषणं ब्रूते ॥

इति बोध्यम् ॥ १८ ॥ ॥ इति पञ्चमाधिकरणम् ॥

अन्तरस्तद्धर्मोपदेशात् ॥ १९ ॥

अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः, आप्रणखात् सर्व एव सुवर्णस्तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदितः। उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद। इत्यधिदैवतमथाध्यात्ममथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते इत्यादि। तत्र संशयः। किमयमधिष्ठातृदेवताशरीरमाहोस्विद् परब्रह्मेति, ब्रह्मणो वा शरीरमिति। तदर्थमिदं विचार्यते। हिरण्मयशब्दः सुवर्णविकारवाची, आहोस्विद् प्रकाशमात्रैतानन्दवाचीति। ब्रह्मविदाप्नोति परमित्युपक्रम्य आनन्दमयस्य फलत्वमुक्त्वा द्वितीयोपाख्याने, स यश्चायं पुरुषे यश्चासावादित्ये

अन्तरस्तद्धर्मोपदेशात् ॥ *अथ य एष इत्यादि* इदं छान्दोग्ये प्रथमप्रपाठके श्रूयते। विषयवाक्यमुपन्यस्य संशयाकारमाहुः। *किमित्यादि* तथाचात्र त्रिकोटिकः संशय इत्यर्थः। *तदर्थमिदं विचार्यत इति* तादृशसंशयोत्पत्त्यर्थं तस्य बीजं विचार्यत इत्यर्थः। तदाहुः *हिरण्मयेत्यादि* ननु जन्माद्यधिकरणसमन्वयाधिकरणाभ्यां लक्षणकथनादिना समवायिकारणतां विचार्येक्षत्यानन्दमयाधिकरणाभ्यामसम्भवादिदोषनिरासेन सा परीक्षिता। तथा सति लक्षणप्रमाणाभ्यां ब्रह्मज्ञानस्य सौकर्यात् तावतैव च ततः फलसिद्धेः किमनेनाधिकरणेनेत्याकाङ्क्षायां पूर्वाधिकरणेनास्य सङ्गतिं वक्तुमाहुः * ब्रह्मविदित्यारभ्य, विचारारम्भ इत्यन्तम् *। * द्वितीयोपाख्यान इति * यद्यपि प्रथमप्रपाठके एतादृशं वाक्यमस्ति। तथापि तत्र, स एको ब्रह्मण आनन्द इति गणितानन्दं प्रस्तुत्य तत्पठितं, न तु वाङ्मनसागोचरं प्रस्तुत्येति पूर्णब्रह्मविदस्तदनुपयुक्तमिति शङ्का स्यादतस्तदभावायैतदुक्तम्। अत्र हि सर्वान्ते एतदुक्त्वा मे, हाबु हाबु इत्यहोऽर्थकेन शब्देन वीप्सया आश्चर्यमुक्त्वा,

स एकः स य एवंविदिति साधनस्यानन्दमयमात्मानमुपसंक्रम्येति फलं श्रुतम्।

तत्र सवितरि विद्यमानस्याब्रह्मत्वे फलं नोपपद्यत इति विचारारम्भः। तत्र हिरण्मयशब्दो विकारवाची। केशनखादयश्चोच्यन्ते शरीरधर्माः। मृता वा एषा त्वगमेध्या यत् केशश्मश्रूति शरीरमन्तरा नोपपद्यते। परिच्छेदश्चाधिदैविकादिवचनं च बाधकम्।

अहमन्नमित्यादिना सर्वात्मभावं ब्रह्मभावं चाह। तेनैतज्ज्ञानमक्षरसायुज्ये परब्रह्मसायुज्यं च फलोपधानायावश्यकमित्येतस्य कथनम्। नच भवत्वेवं, तथाप्यस्य विचारे किं बीजमिति वाच्यम्। तस्त्वेव भयं विदुषोऽमन्वानस्येत्यनेन मननाभावे भयस्योक्ततया तदापत्तेरेव बीजत्वादित्याशयेनाहुः * तत्र सवितरीत्यादि * तथा चास्य हेतुतागर्भः प्रसङ्गोऽत्र सङ्गतिरित्यर्थः। किञ्चायं जन्मादिसूत्रस्थविचारः सर्वस्याग्रिमविचारस्य मूलम्। तत्राग्रे, फलमत उपपत्तेरित्यनेन सर्वफलदाता भगवानेवेति वक्तव्यम्। ततोऽग्रे, चतुर्थेऽध्याये निषेधमुखेन प्रतीकोपासना, विधिमुखेनाङ्गोपासनाश्चादित्यादिमतिसूत्रे वक्तव्यास्तत्र मतान्तरोक्तरीत्या प्रतीकोपासनानामब्रह्मपरत्वेऽपि तद्वाक्योक्तफलसिद्धिस्त्वदन्तःस्थाद् ब्रह्मण एवेति ज्ञापनायाङ्गोपासनानां ब्रह्मपरत्वे तदुक्तमवान्तरफलं तत्कर्तृत्वरूपं मुख्यं फलं च भगवत एवेति ज्ञापनाय चाप्येतद् बोध्यम्। तेनान्तःपदघटितेषु वाक्यान्तरेषु सत्स्वप्येतस्यैव विषयवाक्यत्वेनोदाहरणेऽप्येतदेव बीजमिति बोध्यम्। पूर्वपक्षमाहुः * तत्रेत्यादि *। * विकारवाचीति * प्रचुरत्वाद् विकारार्थकप्रत्ययवान्। * नोपपद्यते इति * मृतत्वक्सम्बन्धो नोपपद्यते। * परिच्छेदश्चेत्यादि * अन्तराऽऽदित्य इत्यनेनोक्तस्तदन्तर्वर्तित्वकृतः परिच्छेद इत्यधिदैवतमित्यनेनोक्तमाधिदैविकवचनम्। आध्यात्मिकस्तु यः प्रोक्तः सोऽसावेवाधिदैविक इति स्मृतौ तस्याध्यात्मिकाभेदकथनादाध्यात्मिकस्य च

अतः सर्वथा तच्छरीरमिति मन्तव्यम् । चाक्षुषत्वाच्च । इन्द्रियवत्त्वञ्च श्रूयते । यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्येति । कपेराम आसनम् । आरक्तं तस्यासनं भवतीति । अन्सभ्यतुल्यता च । अतो देहेन्द्रिययोर्विद्यमानत्वाज्जीवः कश्चिदधिकारी सूर्यमण्डलस्थ इति गम्यते । फलं तत्सायुज्यद्वारेति । अथोच्येन, एष सर्वेभ्यः पाप्मभ्य उदित इति । अपहतपाप्मत्वादिधर्मश्रवणात् । पूर्वदोषस्यापि विद्यमानत्वाद् ब्रह्मण एव केन चिन्निमित्तेन शरीरपरिग्रह इति । तस्य च शरीरस्य

जीवत्वात् तद्वचनमपि ब्रह्मत्वबाधकमित्यर्थः । * आदिपदं, य एषोऽन्तरक्षिणीति, अथाध्यात्ममित्यादिनोक्तानामक्षिपुरुषधर्माणां संग्रहाय । अक्षिपुरुषविचारोऽपि, स यश्चायं पुरुष इति श्रुत्यर्थनिर्णयायेति बाध्यम् । *मन्तव्यमिति* उक्तहेतुभिर्निश्चेयम् । एवं देहत्वसाधनेन देहित्वं साधयित्वेन्द्रियवत्त्वं साधयति * इन्द्रियेत्यादि * । * कप्यासमिति * उपवेशनार्थकस्यास्तेः करणे घञ् । कपेर्मर्कटस्यासनमधोभाग इव कप्यासम् । उपमावाचकपदलोपाल्लुप्तोपमा । तेन रूपकातिशयोक्तिः । ननु यदि स जीवः स्यात् तदा तैत्तिरीये परिकरान्तानामुपासनानामनन्तरं, स यश्चायमिति वाक्यं नोच्येत । तथा बृहदारण्यकीये, आदित्यो वा एष एतन्मण्डलं तपतीत्यनुवाके त्रयीविद्यात्मकत्वमुक्त्वा, आदित्यो वै तेज ओजो बलमिति तदभिमानुवाके ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोतीति फलं नोच्येतेति शङ्कायामाह * फलमित्यादि * आनन्दमयोपसंक्रमणरूप फलं स्वस्याधिकारिसायुज्यद्वारा भवतीत्येतदर्थं तदनन्तरमुच्यते । आदित्यो वै तेज इत्यत्रापि ब्रह्मणः सायुज्यमित्याद्युक्त्वा, एतासामेव देवतानाꣳ सायुज्यꣳ सार्ष्टिताꣳ समानलोकतामाप्नोति य एवं वेदेत्युच्यते । एवमधिष्ठातृदेवताशरीरकोटिः साधिता । ब्रह्मशरीरकोटिं साधयति * अथोच्येतेत्यादि * अनया श्रुत्या असाधारणब्रह्मधर्मभाषणादयं ब्रह्मैवेत्युच्यतेत्यर्थः । तद् दूषयति *अपहतेत्यादि*

कर्मजन्यत्वाभावादपहतपाप्मत्वादि सङ्गच्छते । सुवर्णशरीरत्वमप्यलौकिकत्वाद् ब्रह्मण एव सङ्गच्छते । शरीरवदिन्द्रियस्यापि परिग्रहः । वर्णमात्रपरिग्रहान्नासम्भवता । स्थावरापेक्षया जङ्गमस्योत्कृष्टत्वात् स्थावरावयवोपमानवज्जङ्गमावयवोपमानं स्थावरस्यापीति सर्वब्रह्मभावाय श्रुत्युक्तत्वाच्च । तस्माद् ब्रह्मण एवेदं शरीरमित्येवं प्राप्ते, उच्यते ।

अन्तस्तद्धर्मोपदेशात् ॥

अन्तर्दृश्यमानः परमात्मैव । कुतः । तद्धर्मोपदेशात् । तस्य ब्रह्मणो धर्मा उदितादिधर्मा उपदिश्यन्ते । स एष सर्वेभ्यः पाप्मभ्य उदित इति । अयमाशयः । ब्रह्म कारणं, जगत्कार्यमिति स्थितम् । तत्र कार्यधर्मा यथा कारणे न गच्छन्ति, । तथा कारणासाधारणधर्मा अपि कार्ये । तत्रापहतपाप्मत्वादयः कारणधर्मास्ते यत्र भवन्ति तद् ब्रह्मेत्येवावगन्तव्यम् । बलिष्ठत्वात् कारणधर्मस्य । नामतुल्यतामात्रमुभयेषामपि धर्माणाम् । ते श्रुत्येकसमधिगम्याः । ब्रह्मणि लोके प्रमाणान्तरमपि प्रवर्तते । अतः सर्वरसादयो ब्रह्मनिष्ठा एव धर्माः । स्थूलत्वादयस्तु ये ब्रह्मणि निषिध्यन्ते, अस्थूलादिवाक्येषु ते कार्यधर्माः । अणो-

---

* स्थावरस्येति * पुण्डरीकस्य । एवमुपमाप्रयोजनं तु ब्रह्मप्रवेशेन सर्वस्य ब्रह्मभावबोधनम् । ब्रह्मदाशा इतिवत् । स्फुटमन्यत् ।

सूत्रं पठित्वा समादधते * अन्तरित्यादि * ननु बाधकानां बहूनामुक्तत्वाद्धर्मोपदेशमात्रेण कथं ब्रह्मत्वनिश्चय इत्यतस्तद् व्युत्पादयन्ति * अयमाशय इत्यादि * । * स्थितमिति * पूर्वाधिकरणैर्निर्णीतम् * कार्यधर्मा इति * कार्यासाधारणधर्माः । दृष्टं चैतत् । न हि घटीया जलाहरणयोग्यत्वादयो मृत्पिण्डकपालादौ गच्छन्ति । न वा मृत्पिण्डादिसंस्थानविशेषा घटादौ । अथ यदि गच्छेयुस्तदा कार्यकारणयोर्वैलक्षण्यं न भवेत् । कार्यकारणव्यवहारश्च भज्येत ।

रणीयानित्यादिषु कारणधर्मा एव । अत एकोऽप्यसाधारणो धर्मो विद्यमानः शिष्टान् सन्दिग्धानपि ब्रह्मधर्मानेव गमयति । इममेव श्रुत्यभिप्रायमङ्गीकृत्य सर्वत्र ब्रह्मवाक्यनिर्णयमाह सूत्रकारः । तथाच श्रुतिव्यतिरिक्तस्थले तथैवावगन्तव्यम् । अनन्तमित्यनन्तमूर्तिता च ब्रह्मणः प्रतिज्ञाता । अन्यथा गुहायां निहितमिति विरुद्धेत । तस्मात् साकारं तादृशमेव ब्रह्म ।

अतो ये असाधारणा धर्मास्तेऽन्यत्र न गच्छन्तीति नियतम् । तत्र प्रकृतवाक्ये, तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित इत्यनेनोक्तमपहतपाप्मत्वम् । तथा आदित्यपदेनाक्षिपुरुषवाक्ये सर्क् तत्साम तदुक्थं तद्यजुस्तद् ब्रह्म तस्यैतस्यैतदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेत्यनेनोक्तमृक्सामादिसार्वात्म्यं यन्नाम तन्नामेत्यतिदिष्टनामनिर्वचनहेतुभूतमपहतपाप्मत्वं च, य आत्मा अपहतपाप्मेतिश्रुत्यन्तरे ब्रह्मासाधारणधर्मत्वेन सिद्धम् । तथा, इदं सर्वं यदयमात्मेतिश्रुत्यन्तरसिद्धं सार्वात्म्यं च कारणभूतब्रह्मासाधारणधर्मरूपं नान्यगामि तदत्रोपदिश्यते। एवमन्येऽपि श्रुत्यन्तरोक्ता असाधारणा ब्रह्मधर्मा यत्र भवन्ति तद्ब्रह्मेत्येवावगन्तव्यम् । तेन सूत्रे अन्तःपदं स्थानान्तरस्याप्युपलक्षकं, न तु तावन्मात्रपर्यवसन्नमिति बोधितम् । नच केशनखादीनां कार्यधर्माणामपि बोधनात् कथं विनिगमनेति शङ्क्यम् । उपजीव्यत्वेन नित्यत्वेन च कारणधर्मस्य बलिष्ठत्वात् । नचापहतपाप्मत्वं स्वाध्याये मुख्यप्राणे चोच्यते, सार्वात्म्यं च चतुर्मुखादावतः कथमसाधारणत्वमिति शङ्क्यम् । यतो नामतुल्यतामात्रमुभयेषां धर्माणाम् । स्वाध्ययादौ ह्यपहतपाप्मत्वं पापराहित्यरूपं, स्वाध्यायो देवपवित्रमिति य एवंविदि पापं कामयत इति तत्र तत्र लिङ्गात् । अत्र तु सर्वकर्माऽननराहित्यरूपम् । अनन्वितं ते भगवन् विचेष्टितं यदात्मना चरसि च कर्म नाऽज्यस इति श्रीभागवतवाक्यात् । एवं चतुर्मुखादिसार्वात्म्यमपि साङ्कुशम् । अविज्ञाय परं मत्तः, एतावत्त्वं यतो हि म इति द्वितीयस्कन्धे नारदं प्रति ब्रह्मवाक्यात् । अत उदीत्यादीना-

मेवं कारणभूतब्रह्मासाधारणधर्मत्वे सिद्धे तत्सहपठितानां द्दश्यत्वहिरण्यश्मश्रुत्वादीनामपि ब्रह्मधर्मत्वमेव बोध्यम् । यतस्ते श्रुत्येकसमधिगम्या ब्रह्मणि । लोके तु तेषां गमकं प्रमाणान्तरमपि वर्तते । अत एतद्वत् सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरस इत्यादिश्रुत्यन्तरोक्ताः सर्वरसाद्योऽपि ब्रह्मनिष्ठा एव धर्मा बोध्याः । श्रुत्येकसमधिगम्यत्वस्य तेष्वपि तौल्यात् । नचैवं सति स्थूलत्वादिष्वपि शङ्का । तेषां श्रुत्या निषिध्यमानत्वेन कार्यधर्मत्वात् । नच ब्रह्मणि विरुद्धधर्माश्रयत्वस्याग्रे व्युत्पादनीयत्वाद्, आसीनो दूरं व्रजति, अणोरणीयान् महतो महीयानित्यादिषु सहावस्थानविरुद्धक्रियाधर्मयोरिव भावाभावविरुद्धस्थूलत्वतदभावयोरपि शक्यवचनत्वादेतेषां कारणधर्मत्वमेवास्त्विति शङ्क्यम् । इतः पूर्वं गार्ग्या उपादानकारणबोधनार्थं कार्याणां प्रकृततया याज्ञवल्क्येन कार्यविलक्षणकारणबोधनार्थं कार्यधर्माणामेव निषेधात् । अन्यथा प्रकृतिविरोधापत्तेः । नचैवमनर्थ्यत्वनेन निषिद्धस्याणुत्वस्य, स य एषोऽणिमेत्यादिषु श्रूयमाणस्य का गतिरिति शङ्क्यम् । तत्राणोरणीयानित्यादिषु तु, सप्त प्राणाः प्रभवन्तीत्यादिभिः कार्यस्याग्रे वक्ष्यमाणतया ततः पूर्वं श्रूयमाणानां कारणधर्मत्वेन तद्भिन्नत्वात् । ऐतदात्म्यमिदं सर्वं, महतो महीयानित्यादितद्विरुद्धधर्मसामानाधिकरण्यश्रावणेन तथा निश्चयात् । एवमन्यत्रापि बोध्यम् । अत एकोऽप्यसाधारणधर्मो विद्यमानः शिष्टान् सन्दिग्धानपि धर्मान् ब्रह्मधर्मत्वेनैव गमयति । अन्यथाऽन्यगामित्वेन तस्यासाधारण्यभङ्गप्रसङ्गात् । तथाच यत्र निषिद्धत्वं तत्र तदनुरोधात् ते लौकिकाः कार्यधर्मा एव । यत्र च न निषेधस्तत्रालौकिका ब्रह्मात्मकास्ते धर्मा, नेह नानास्तीतिश्रुत्यनुसारेणावगन्तव्याः । इममेव श्रुत्यभिप्रायमङ्गीकृत्य सर्वेष्वधिकरणसूत्रेषु प्रधानवाक्यनिर्णयमाह सूत्रकारः । अन्यथा, आदित्यान्तरस्यन्तरित्येवमधिकरणं विशिष्यात् । तथाचेदं सिद्धम् । यत्र निश्चिते कार्यत्वे तस्य कारणाभेदेन स्तुतिः क्रियते, यथेन्द्रप्रतर्दनसंवादादौ तत्र नेयं रीतिः । तद्व्यतिरिक्तस्थले स्वयमेवावगन्तव्यमिति । नचैवं परिच्छिन्नेषु नानास्थानेषु नानापरिमाणेन स्थितौ ब्रह्मणोऽनेकत्वापत्त्या, एकमेवाद्वितीयमित्यादिश्रुतिविरोध इति शङ्क्यम् । यतः सत्यं ज्ञानमनन्तं ब्रह्मेति लक्षणवाक्य एवानन्त इत्यनेन ब्रह्मण आनन्त्यकथने-

ब्रह्मणः शरीरमिति तु सर्वथा असङ्गतम् । सर्वकर्तुर्ब्रह्मणः का वा अनुपपत्तिः स्याद् येन स्वस्यापि शरीरं कल्पयेत् । किन्तु लीलया व्यामोहनार्थमन्यथा भासयेन्नटवत् ।

ऽनन्तमूर्तिता च प्रतिज्ञाता । नचात्र मानाभावः । निहितं गुहायामिति हृदयाकाशनिधानकथनस्यैव मानत्वात् । अन्यथा गुहायां निहितमिति विरुद्ध्येत । अनन्तमूर्तित्वाभावे व्यापकतया सर्वस्य तदन्तःस्थत्वात् । इदं च श्रुत्यन्तरेऽप्युक्तम् । यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तादिति । तस्माद् ब्रह्मण एकत्वेन व्यापकत्वेऽप्यनन्तमूर्तित्वात् साकारं वेदैकवेद्यत्वाद् यादृशं यत्र स्थाने यद्वाक्य उच्यते तादृशं तत्र ब्रह्मेति मन्तव्यमिति सिद्धमित्यर्थः । एवमधिष्ठातृदेवतापक्षं निराकृत्य अत्र ब्रह्मैवोच्यत इति स्थापितम् । अतः परं साधकानुग्रहार्थं ब्रह्मण एव शरीरमिति पक्षं निराचक्षते * ब्रह्मणः शरीरमित्यादि * । असङ्गतत्वे हेतुमाहुः * सर्वकर्तुरित्यादि * । अयमर्थः । यदत्र शरीरमङ्गीकृतम् । तत् किं नित्यमुतानित्यम् । नाद्यः । अद्वितीयश्रुतिव्याकोपात् । सच्चिदानन्दादतिरिक्तवस्त्वभावस्य प्रागेवोपपादितत्वेन ब्रह्मात्मकतया प्रत्यापत्ते शरीरत्वस्याशक्यवचनत्वाच्च । अन्यथा पुरुषविधब्राह्मणोदितायाः, सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्यनुवीक्षाया विरोधापत्तेश्च । द्वितीयपक्षेऽपि तच्छुद्धसत्त्वात्मकं वा प्राकृतं वा मायिकं वाङ्गीकार्यम् । तत्र कर्त्रपेक्षायां ब्रह्मण एव कर्तृत्वं च वाच्यम् । तत्रान्यानपेक्षतया सर्वकर्तुर्ब्रह्मणः का वा अनुपपत्तिः स्याद् येन स्वस्यापि शरीरं कल्पयेत् । अतो मूलरूपे नास्त्येव शरीरम् । किन्तु स्वरूपमेव तदाकारम् । प्राणन्नेव प्राणो भवति वदन् वागितिवच्छरीरकार्यं कुर्वँल्लीलया व्यामोहनार्थं शरीरवद्भासयेन्नटवत् । 'यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः । भूभारः क्षपितो येन जहौ तच्च कलेवरमिति प्रथमस्कन्धव्याख्यानात् । अतो यादृशं प्रतीयते तादृशं तद् ब्रह्मैव । येषां पुनर्न मोक्षाधिकारस्तेषां तच्छरीरवद्भासत इति निश्चयः । एतस्यैव निर्णय-

तस्माद् वेदातिरिक्तेऽप्युपपत्तिपूर्वकं यत्र ब्रह्मधर्मस्तद् ब्रह्मेति मन्तव्यम् । ब्रह्म तु वेदैकसमधिगम्यं यादृशं वेदे प्रतिपाद्यते तादृशमेवेत्यसकृदवोचाम । प्रकृतेऽपि हिरण्मय इत्यत्र यकारलोपश्छान्दसः । अतो न द्वयच् । हिरण्मयशब्द आनन्दवाची । लोकेऽपि तस्यानन्दसाधकत्वात् । अतः केशादयोऽपि सर्वे आनन्दमया एव । तादृशमेव ब्रह्मस्वरूपमिति मन्तव्यम् ।

मन्यत्रातिदिशन्ति । * तस्मादित्यादि * । ननु किमित्येवं निर्बन्धेन सर्वाकारं निरूप्यते । निर्विशेषमेवोपासकानुग्रहाय मायया शरीरं कल्पयतीत्येव कुतो न कल्प्यते इत्याकाङ्क्षायामाहुः । * ब्रह्म त्वित्यादि * ननु भवत्वेवं, तथापि प्रकृते हिरण्मय इत्यत्र विकारवाचिनो मयटः प्रयोगो, हिरण्मयशब्दस्य, दण्डिनायनसूत्रे निपातनाद्विकारत्वसिद्धौ कथं ब्रह्मत्वनिर्णय इत्यत आहुः । * प्रकृतेऽपीत्यादि * तथाच द्वयच्त्वेन विकारप्रत्ययाभावान्नायं निपातः किन्त्वत्र छान्दस एव यकारलोप इत्यर्थः । ननु पूर्वं स्वरूपलक्षणविचारे ब्रह्मणः सत्यज्ञानानन्दरूपत्वमेव सिद्धं, न हिरण्यरूपत्वमिति हिरण्मयस्याविकारत्वेऽपि ब्रह्मत्वं वक्तुमशक्यमतः शारीरत्वमेवाङ्गीकार्यमित्यत आहुः । *हिरण्मयशब्द इत्यादि * । यद् यज्जनकं तत् तद्गुणकं, यद् यद्गुणकं तत् तदात्मकमिति व्याप्त्योः पूर्वं साधितत्वादत्रानन्दसाधकत्वेनानन्दात्मकत्वे विकारभूतस्य लौकिकस्यापि हिरण्यस्य सिद्धे कारणभूतस्याविकारस्यानन्दात्मकत्वे बाधकाभावाद्धिरण्मयशब्द आनन्दवाची । अतः केशश्मश्रुनखाग्राक्षीणि, तत्सदृभूता अनुक्ता अन्येऽपि पुरुषावयवाः कप्यासपदेन वर्णान्तरस्यापि सूचितत्वात् तत्तद्वर्णविशिष्टा अपि सर्वे आनन्दमया एवेति पुरुषाकारं ब्रह्मस्वरूपमेवेति मननीयम् । अन्यथा, तत्त्वेवं भयं विदुषोऽमन्वानस्येत्युक्तस्य भयस्यापत्तेरित्यर्थः । ननु सूर्यान्तर्वर्तिन ब्रह्मशरीरमित्यसङ्गतम् । उपबृंहणविरोधात् । अग्निपुराणे, ध्येयः सदेति श्लोके, हिरण्मयवपुरिति

अत एव, 'ध्येयः सदा सवितृमण्डलमध्यवर्ती नारायणः सरसिजासनसन्निविष्टः। केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशङ्खचक्र' इत्यत्रापि वपुः स्वरूपम्।

माया ह्येषा मया सृष्टा इत्यादि भगवद्वाक्यं, भगवन्मायया भगवन्तमन्यथा पश्यन्तीत्याह। न तु भगवानेव मायिक इति। शरीरे सति जीवत्वमेवेति निश्चयः। अतो ब्रह्मधर्मोपदेशात्

शरीरवाचकपदस्योक्तत्वादित्याशङ्कायामाहुः। * अत एवेत्यादि *। यथाचात्रापि खं सुखं पुष्णातीति योगेन ब्रह्मैवोच्यते। अत एव स्मृत्यन्तरे 'आदित्यमण्डलासीनं रुक्माभं पुरुषं परम्। ध्यात्वा जपेत्सदिच्छेत निष्कामो मुच्यते द्विजः। आदित्यमण्डलान्तःस्थं परं ब्रह्माधिदैवतम्। छन्दोनिवृत्त्या ह्यागायत्री मया दृष्टा सनातनी' इति गायत्र्या ध्येये सूर्यमण्डलान्तःस्थे वपुःपदं नोच्यत इति न तेन शरीराङ्गीकारः कर्तुं शक्य इत्यर्थः। नन्वत्र केवलस्वरूपाङ्गीकारेऽन्यत्रापि स्वरूपमेव न्यायबलेन साधयितुं शक्यम्। तथा सति 'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद। सर्वभूतगणैर्युक्तं न मां पश्यन्ति सूरय' इति विश्वरूपाकृतेर्नारायणस्य यद्वारते वाक्यं तस्य विरोधो दुर्वार इत्यत आहुः। * मायेत्यादि *। तथाचास्मिन् वाक्येऽपि, यन्मां सर्वभूतगुणैर्युक्तं पश्यसि एषा माया मया सृष्टेति पदसम्बन्धान्न विरोध इत्यर्थः। ननु किमित्येवं निर्बन्धेन शरीरवत्ता निराक्रियते। कर्माजन्यस्वैच्छिकशरीरस्याङ्गीकारेऽपि ब्रह्मत्वाक्षतेरित्याशङ्कायामाहुः। * शरीर इत्यादि *। मास्तु कर्मजन्यत्वं शरीरस्य, तथापि शुद्धसत्त्वात्मकत्वं त्रिगुणात्मकत्वं वा तु सर्वथाङ्गीकार्यम्। तेन सह सम्बन्धश्चाभिमान एव वाच्यः। तथा सत्याभिमन्ता जीव इति तापनीये श्रावितस्य जीवलक्षणस्य तत्र सत्त्वाज्जीवत्वमेव। यदि च नियन्तृत्वं, तदाऽन्यस्याभिमानिनस्तत्र सत्त्वाद् ब्रह्मशरीरत्वाभावः। यदि च सम्बन्धान्तरं, तदापि 'स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः। प्रकृतिस्थपरीराहित्यात् स्यातन्त्र्याद् वैभवादपीति नारसिंहवाक्यवि-

सूर्यमण्डलस्थः परमात्मैव ॥ १९ ॥

भेदव्यपदेशाच्चान्यः ॥ २० ॥

इतोऽपि सूर्यमण्डलस्थः परमात्मा । भेदव्यपदेशात् । य आदित्ये तिष्ठन्नादित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृत इति श्रुत्यन्तरे आधिदैविकं सूर्यमण्डलाभिमानिभ्यो भेदेन निर्दिष्टम् । यद्यपि तत्राकारो न श्रूयते, तथापि हिरण्मयवाक्यैकवाक्यत्वात् सर्वत्र साकारमेव ब्रह्मेति मन्तव्यम् ।

अन्तर्यामिब्राह्मणे चत्वारोऽर्था उच्यन्ते । सर्वत्र तिष्ठंस्तद्धर्मैर्न सम्बध्यते । सर्वमुक्तिपरिहाराय स्वधर्मैस्तत्र बद्ध्यते । स्वलीलासिद्ध्यर्थं तच्छरीरमिति । तस्य नियमनं तदर्थमिति । चकाराद्धर्मा उच्यन्ते ।

रोध इति शरीराङ्गीकारे जीवत्वापत्तिरनिवार्येति तदभावाय निर्बन्ध इत्यर्थः ॥ १९ ॥

भेदव्यपदेशाच्चान्यः ॥ ननु पूर्वसूत्रोक्तेनैव हेतुना सिद्धे ब्रह्मत्वे किमिति हेत्वन्तरोपन्यास इत्याकाङ्क्षायामाहुः । * यद्यपीत्यादि * । तथाच समानप्रकरणोक्तधर्मान्तरस्यापि प्राप्त्यर्थं हेत्वन्तरमित्यर्थः । नन्वत्र भेदव्यपदेशमात्रेण कथं परमात्मलाभ इत्यत आहुः * अन्तर्यामीत्यादि * । * तदिति * सामान्ये नपुंसकम् । अभिमानीत्यर्थः । अत्र हि जडाज्जीवाच्च भिन्नत्वेनान्तर्यामी प्रतिपाद्यते । तत्र, य आदित्ये तिष्ठन्नादित्यादन्तर इति जडमण्डलमाधारत्वेन निर्दिश्य ततोऽन्तरत्वकथनात् ततो भेदो बोधितः । तेन तद्धर्मैर्न सम्बध्यत इति बोधितम् । तत आदित्यादन्तरत्वं तदभिमानिनो जीवस्याप्यस्तीति ततोऽपि भेदबोधनाय, यमादित्यो न वेदेति तदभिमान्यज्ञेयत्वकथनेनाभिमानिधर्मैर्न सम्बध्यत इत्याह ।

तस्मात् सर्वविलक्षणत्वादन्य एव, नाभिमानी । उपचारऽप्राप्त्यर्थमन्यपदेनोपसंहारः ।

तथा यद्यभिमानी तं जानीयान्मुक्तः स्यात् । अतस्तदभावाय स्वासाधारणैर्ज्ञानापहतपाप्मत्वादिभिर्धर्मैः कर्तृभिस्तद् आधारभूतम् अभिमानि वस्तु न बध्यते, न व्याप्यते । यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । सैषा त्रय्येव विद्या तपतीति स्मृतिश्रुत्युक्तधर्मैर्मण्डल एव व्याप्यते, नाभिमानीति स न मुच्यते । यद्वा दिवादिर्भ्वादिवदाकृतिगणः । तेन क्षीयते मुग्यतीत्यादिवद् बध्यत इत्यपि कर्तरि प्रयोगः । तथा सति स्वधर्मैस्तमभिमानिनं न व्याप्नोतीत्यर्थः । तात्पर्यं तूभयथापि समानम् । तेन ततोऽपि भेदः । एवमुभयाङ्गेदे सिद्धेऽपि तत्र स्थितेः किं प्रयोजनमित्याकाङ्क्षायां, यस्यादित्यः शरीरमित्याह । तत्र जगद्भासन दिग्विभागो धर्मप्रवृत्तिरित्यादिरूपा स्वस्यैव लीला तत्सिद्ध्यर्थं तन्मण्डलं शरीरं, न त्वधिष्ठानार्थम् । तेन जीवतुल्यता वारिता । एवं, गामाविश्य च भूतानि धारयाम्यहमोजसेत्यादिष्वपि भगवल्लीलात्वं बोध्यम् । तेन पृथिव्यादिकार्यस्यापि लीलात्वं, तेषां लीलाशरीरत्वं च ज्ञातं भवति । शरीरस्य तादृशत्वे गमकमाह । य आदित्यमन्तरो यमयतीति । अत्रादित्यपदं मण्डलाभिमानिनोः संग्राहकम् । तथाच * तस्यादित्यादेर्नियमनं, * तदर्थं तादृशलीलार्थम् । तं यदि, भीषास्मादित्याद्युक्तरीत्या न नियमयेत्तदा सा सा लीला न सिद्ध्येदिति । अत्र पुनरप्यन्तर इति पदम्, अन्तरं करोतीत्यन्तरयति, अन्तरयतीत्यन्तर इति सर्वान्तःव्यापकत्वबोधनार्थम् । एवमेते चत्वारोऽर्था उच्यन्ते । सूत्रे तु चकारात् पूर्वसूत्रोक्ता धर्माः समुच्चीयन्ते । तेन हेतुभेदेऽपि साध्यैक्यान्नाधिकरणभेदः । एवञ्च श्रुतिं सूत्रं च व्याख्याय सिद्धमाहुः । तस्मादित्यादि । तथाच भेदव्यपदेशात् सर्वविलक्षणत्वेन व्यपदेशादादित्यान्तर्वर्ती परमात्मा अन्य एव, नाभिमानीत्यर्थः । नन्वत्रान्य इत्यस्य साध्यत्वेन निर्देशादिदमधिकरणान्तरमेवास्त्विति चेत्तत्राहुः * उपचारेत्यादि * तथाच, नेतरोऽनुपपत्तेरित्यादिना पूर्वाधिकरणं निषेधमुखेन विचारितं यथोपचारनिवृत्त्यर्थं तथेदमन्यपदेनोपसंहृतमिति तत्रैवात्रापि नाधि-

ब्रह्मत्वे सिद्धे ज्ञानं वा, उपासना वेति, नास्मत्सिद्धान्ते कश्चन विशेषः । कारणे कार्यधर्मारोपस्त्वयुक्त एव । कार्ये पुनः कारणधर्माधिकरणत्वेनोपासना अभेदात् फलायेति सर्वत्र व्यवस्थितिः ॥ २० ॥

कारणभेद इत्यर्थः । ननु, उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्यनेनोपासनाकथनात् तस्याश्च वाचो धेनुत्ववदारोपिताकारेणापि सिद्धेः किमर्थमयमाग्रह इत्यत आहुः * ब्रह्मत्व इत्यादि * तथाच भवतूपासना, तथापि पूर्वसूत्रोक्तधर्मैस्तस्य ब्रह्मत्वे सिद्धे तदाकारस्याकल्पितत्वमप्यनुपपत्त्यभावात् सिद्धमेवेति वेदनस्य ज्ञानत्वमुपासनात्वं वास्तु, मनोव्यापारत्वस्योभयत्र तौल्यादतस्तत्र नास्मत्सिद्धान्ते कश्चिदाग्रह इत्यर्थः । नन्वतस्मिंस्तद्धर्मानारोप्य तत्त्वेन चिन्तनमुपासना, तस्य तत्त्वेन निश्चयो ज्ञानमिति स्वरूपभेदात् कुतो न विशेष इत्यत आहुः * कारण इत्यादि * अस्त्वयं विशेषस्तथापि हीने उत्कृष्टधर्मारोपस्य लोके कार्यसाधकत्वस्य विपरीते वैपरीत्यस्य च दर्शनात् कारणे यः कार्यधर्मारोपः स तु हीनत्वापादकत्वेन कार्यासाधकत्वादयुक्त एव । वेदे हि सर्वत्राद्यं ब्रह्मेत्यादौ कार्ये कारणगतानामुत्पत्तिस्थितिप्रलयकर्तृत्वादीनामारोपेणोपासनात् फलप्राप्तिः श्रूयते । तत्र हेतुः कार्यस्य कारणाभेद एव । सर्वत्र तथा दर्शनात् । कारणस्य कार्यभेदस्तु प्रत्यक्षाच्छास्त्राच्च विरुद्धः । यत्र पुनः सर्वथा भेदो यथा वाग्धेन्वोस्तत्रापि शब्दाविलक्षणार्थस्योत्कृष्टत्वम् । शब्दशोऽविवादर्थस्य । अतो ज्ञानोपासनयोर्विशेषसत्त्वेऽपि यथैकदेशिभिः स्वीक्रियते तथा नास्तीति फलजनकत्वांशे विशेषाभावकथनं, तत्रोपपन्नमेवेत्यर्थः ।

माध्वास्तु, 'पूर्वाधिकरणविषयवाक्येषु, अदृश्येऽनात्म्येऽनिरुक्त इत्युक्तम । तच्चादृश्यत्वम, अन्तः प्रविष्टं कर्तारमेतम् अन्तश्चन्द्रमपि मनसा चरन्तं सहैव सन्तं न विजानन्ति देवा इत्यत्रान्तःस्थस्य कस्य विरुध्यते । नदमं च, इन्द्रो राजा जगतो य ईशे इति । सप्त युञ्जन्ति रथमेकचक्रं स्वधारं रूपाणि विकुर्वतमित्यादिभिरन्ये प्रतीयन्ते । अतः को वाऽऽनन्दमय इति सन्देहे, इन्द्रो राजेत्यादि ततः

देवतावाचकश्रुत्या, सप्त युञ्जन्तीत्यादिरूपलिङ्गाच्च कश्चिद्देवताजीवविशेष एव तत्र युक्तः । श्रुतेः सर्वापेक्षया प्रबलत्वाज्जगतो य ईश इत्यादिप्रयोगस्यापि समुपोद्बलकत्वं तत्र दर्शनाच्चेति प्राप्त इदं सूत्रद्वयं प्रवर्तते ॥ अन्तस्तद्धर्मोपदेशात् ॥ भेदव्यपदेशाच्चान्यः ॥ इति । अन्तः श्रूयमाणो विष्णुरेव । कुतः । 'अन्तःसमुद्रे मनसा चरन्तं ब्रह्मान्वविन्दद्दशहोतारमर्णे । समुद्रे अन्तः कवयो विचक्षते । मरीचीनां पदमिच्छन्ति वेधसः । यस्याण्डकोशे शुष्ममाहुः प्राणमुल्बम्' इत्यादि तद्धर्मोपदेशात् । श्रुत्यर्थस्तु समुद्रे अन्तरर्णे अन्तर्जले मनसा चरन्तं यथेष्टं विहरन्तं दशहोतारं, श्रुद्वानादनयोः, दशेन्द्रियविषयदातारं ब्रह्मा अन्वविन्दद् व्यजानादिति यथा । मरीचीनां जीवानां पदमाश्रयभूतं वेधसः भूतभाविनो ब्रह्माण इच्छन्तीति । अण्डकोशे ब्रह्माण्डं यस्य शुष्मं वीर्यमाहुरिति । अत्र समुद्रशायित्वब्रह्माण्डवीर्यत्वादीनामन्तःप्रविष्टनिष्ठतयोपदिष्टानां लिङ्गानां विष्णवेकनिष्ठत्वादन्तःप्रविष्टः कर्ता विष्णुरेवेति । प्रलयार्णवशायित्वब्रह्माण्डवीर्यत्वयोः कथं विष्णुलिङ्गत्वमित्याकाङ्क्षायाम्, आपो नारा इति व्याससमृतिवाक्यं, चतुर्थेऽपि साक्षाच्छ्रुतिश्चोपन्यस्ता । ननु तस्येन्द्राद्यभिन्नत्वं तत्रास्तीत्यतिशङ्कायां द्वितीयसूत्रे, 'इन्द्रस्यात्मा निहितः पञ्चहोता । वायोरात्मानं कवयो निचिक्युः । अन्तरादित्ये मनसा चरन्तं देवानां हृदयं ब्रह्मान्वविन्ददित्यादिरेकस्यैव सर्वदेवान्तर्वर्तित्वकथनेन यथेष्टचारित्वपान्तर्यामित्वबोधनेनेन्द्रादिभ्यस्तस्य भेदव्यपदेशात् सोऽन्य एव तेभ्य इति वदन्ति ।

शैवस्तु छान्दोग्यश्रुतिमेव विषयवाक्यत्वेनोपन्यस्य साधकानुग्रहार्थं तत्र हिरण्मयं किमपि रूपं समाश्राय संवितृमण्डलेऽधिवसति । तच्च त्रिलोचननीलकण्ठादिविशिष्टम् । न चाक्षिणी इति द्विवचनविरोधः । तस्य पुण्डरीकोपमाबोधनार्थत्वात् । तृतीयस्य नेत्रस्य मुकुलितत्वेन तत्र पुण्डरीकोपमाया अभावात् । नचैतावता तृतीयाभावः शङ्क्यः । यथाहि कश्चित् विपुलं ब्राह्मणमुद्दिश्योच्यते, द्वावस्य पुत्रावग्निकल्पौ । न तावता तृतीयाभाव आयाति । किन्तूपमाभाव एव । तथात्रापि शक्यवचनत्वात् । ध्येयः सदेति वाक्यन्तु लौकिकानां भाक्तमेव । नापि पुण्डरीकाक्षत्वलिङ्गेन विष्णुः शङ्क्यः । कमलनेत्रत्वस्य लौकिकसाधारणत्वेन लिङ्गत्वाभावात् । नचास्मिन्

हिरण्मयपुरुषवाक्ये शिवासाधारणलिङ्गादर्शनात् कथं शिवाकारनिश्चय इति शङ्क्यम् । अस्य वाक्यस्य सन्दिग्धत्वेनासन्दिग्धेन वाक्यान्तरेणैतदर्थस्य निर्णेयत्वात् । तैत्तिरीयायां महोपनिषदि, आदित्यो वा एष एतन्मण्डलं तपतीत्यनुवाके, य एषोऽन्तरादित्ये हिरण्मयः पुरुष इत्यादिनाऽन्तर्यामिणमभिधाय तदग्रिमानुवाके, आदित्यो वै तेज इत्यादिनाऽऽदित्यरूपस्य विभूतिमभिधाय एष पुरुष एव भूतानामधिपतिरिति भूतपतित्वेन तं निर्दिश्य तदग्रिमानुवाकेषु, सर्वो वै रुद्र इत्यादिषु, हिरण्यबाहवे अम्बिकापतय उमापतय इत्युपसंहारेण तत्र शिवाकारनिर्णयात् । अन्तर्यामिब्राह्मणे, एष त आत्माऽन्तर्याम्यमृत इति कथनाच्च । जाबालोपनिषदि, एतानि ह वा अमृतस्य नामधेयानीति शतरुद्रियप्रशंसावाक्येन अमृतपदस्य शिवपरतानिर्णयादत्र आदित्यान्तर्वर्ती त्रिलोचननीलकण्ठादिशरीरवानित्याहु । तन्मन्दम । शरीरपक्षस्य प्रागेव दूषितत्वात् । आकारेऽप्यक्षिशिरस्य पुण्डरीकोपमाबोधनार्थत्वं तदा स्याद्यदि नीलग्रीवादिकं त्रिलोचनत्वसाधकमस्मिन् वाक्ये एतन्निर्णायकवाक्यान्तरे वा स्यात् । भूतानामधिपतिरित्यस्य तु न निर्णायकत्वम् । भूतपदस्य, क्षरः सर्वाणि भूतानि, पादोऽस्य विश्वा भूतानीतिवत् प्राणिमात्रवाचकत्वेन प्रेतवाचकत्वाभावान्न नीलग्रीवादिरूपवल्लिङ्गत्वम् । तस्य प्रेतमात्रवाचकत्वे च परिच्छिन्नैश्वर्यबोधकत्वेन परमैश्वर्यविघटकतया तस्यालिङ्गत्वमेवेत्युभयथापि तदगमकत्वात् । सर्वो वै रुद्र इत्यादीनां तु नैतद्वाक्यशेषत्वम् । आदित्यो वै तेज इत्यनुवाकान्ते, इत्युपनिषदित्यनेन विद्यासमाप्तिबोधनात् । एवममृतपदस्यापि न निर्णायकत्वम् । शतरुद्रियस्याऽमृतनामत्वेऽप्यमृतपदस्य शिवनामत्वाभावात् । इदं यथा तथा महत्तास्ये वादे निपुणतरमुपपादितमिति नेह प्रपञ्च्यते । यत्पुनर्ध्येयः सदेत्यस्य लौकिकवाक्यत्वमुक्तं, तत्त्वग्निपुराणादर्शनाद्वेति । गायत्र्यां तु भर्ग इति पदं सान्तम । द्वितीयपादे चारूपान्वयो मैत्रायणीयोपनिषदि सिद्धः । तथा, 'रविमध्ये स्थितः सोमः सोममध्ये हुताशनः । वह्निमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोऽच्युत इति तत्रैव मन्त्रः । योगियाज्ञवल्क्येऽप्येतादृशमेव वाक्यम । ताभ्यामपि सर्वान्तरच्युतप्रयोक्तौ, ध्येयत्वेन च भगवानेवाहत इत्यतोऽपि शैवमतमसङ्गतम्,

चेति दिक् ।

विज्ञानेन्द्रभिक्षुस्तु काण्वषष्ठाध्यायस्थं, 'स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु । य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते । सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति । स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्' इति वाक्यं विषयत्वेनोपन्यस्य, तत्र किं जीवविशेष उच्यते, उत परमेश्वर इति सन्देहे विज्ञानमयशब्दस्य योगरूढिभ्यामात्मसामान्यवाचित्वाज्जाग्रदाद्यवस्थाभिर्जीवस्यैव प्रकान्तत्वाज्जीव एवेति प्राप्ते । अन्तः परब्रह्मैव भवितुमर्हति । कुतः । तद्धर्मोपदेशात् । सर्ववशित्वशुभाशुभकर्मफलाभागित्वसर्वाधिपतित्वादीनां परमेश्वरधर्माणामुपदेशात् । नचैते धर्माः सिद्धेः पूर्वं जीवेषु सम्भवन्ति । साक्षर्मणैव एवप्राप्तेश्चेत्यादियुक्तिभिर्हेतुं साधयित्वा, न केवलं धर्मव्यपदेशादेवान्तःस्थो विज्ञानमयो जीवादन्यः परमेश्वरः । किन्तु, भेदव्यपदेशाच्चान्यः । भेदव्यपदेशश्च पूर्वाशेव वाक्यशेषे । यथा सोऽयमात्मा, आत्मन्येवात्मानं पश्यतीति । आधाराधेयभावस्य भेदतन्त्रत्वादित्याद्युक्त्याह । 'आधुनिकास्तु, य एषोऽन्तरादित्ये हिरण्मय इति छान्दोग्यवाक्यं विषयतया वर्णयन्ति । तत्र । पाप्मभ्य उदित इत्यनेनोक्तस्य पाप्मभ्य उदयस्य यापनारूपतया ब्रह्मधर्मत्वाभावात् । धर्मान्तरस्य चात्रानुक्तत्वात् । प्रत्युत तेनैव लिङ्गेन चन्द्रनक्षत्रादिदेवताप्रकरणपठिततया च देवताविशेषावधारणाच्च । नचादित्यस्यान्तरिति भेदनिर्देशानुपपत्तिरिति वाच्यम् । आदित्यस्यान्तरपि आदित्यभिन्नस्य हिरण्यगर्भादेः स्मारणात् । 'ब्रह्मादीनां परं धाम त्रयाणामपि संस्मृतम् । वेदमूर्तिधरः पूषा पूजनीयः प्रयत्नत इति मात्स्यादिषु हिरण्मयशब्दाद्धिरण्यगर्भ एवात्रोपास्यत्वेन गम्यते । किञ्च, ध्येयः सदेतिरूपयोः श्रुतिस्मृत्योर्नारायणाख्यहिरण्मयस्य सूर्यमण्डल उपासनासिद्धेस्तदेकवाक्यतया हिरण्यश्मश्रुरित्यादिश्रुतेरपि नारायणपरत्वमेव, न परमेश्वरपरत्वम् । अपिच । यस्मिन् वाक्ये रूपसंख्यानादिकं श्रूयते, तत्र तत्तद्देवतापरिग्रह एवौत्सर्गिकः । असाधारण्यात् । ब्रह्मणश्च स्वतो नीरूपतायाः, अरूपवदेव हि तत्प्रधानत्वादित्यत्र वक्ष्यमाणत्वात् । क्वचित्तु प्रकरणादिबलाद्देवादीन् विहाय देवादिरूपैरेवारूप ईश्वर उपास्य इष्यते ।

नचेह तथा बलवत् प्रकरणादिकमस्ति । अन्यथा देवतोपासनमात्रोच्छेदापत्तेः । सर्वत्रैव ब्रह्मोपासनसम्भवात् । लीलाविग्रहोऽपि विष्ण्वादिदेवतानामेव स्वस्वाधिकारसम्पादनार्थः । न त्वीश्वरस्य । अप्राणो ह्यमनाः शुभ्रः अक्षरात् परतः परः, न तस्य कार्यं करणं च विद्यत इत्यादिश्रुतीनां सङ्कोचे प्रमाणाभावात् । तदुक्तं विष्णुपुराणे । 'स देवोऽन्यशरीराणि समाविश्य जगत्स्थितिम् । करोति सर्वभूतानां नाशं चान्ते जगत्पतिरिति ।

तत्र विषयवाक्यव्याख्यानादिकं तु न युक्तम् । तथाप्येतस्य विषयवाक्यत्वेऽधिकरणस्य पूर्वाधिकरणेन सह न स्फुटा सङ्गतिरिति बोध्यम् । यत्पुनश्छान्दोग्यवाक्यस्याऽलिङ्गत्वादिकमुक्तं, तत्स्वबुद्ध्यैव । अत्र पाप्मन उदयस्य सर्वकर्माञ्जनराहित्यरूपस्य विवक्षितत्वादिति प्रागेवोक्तम् । नच पाप्मशब्दस्य पापे शक्तत्वात् तत्र उदयस्य पाप्मनाशरूपत्वमेव युक्तं, न पापकर्माञ्जनराहित्यरूपत्वमिति वाच्यम् । 'स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः । कर्मणां जात्यशुद्धानामनेन नियमः कृत' इति विधिप्रतिषेधयोर्व्यवहारनियमार्थत्वबोधके वाक्ये कर्ममात्रस्य जात्यशुद्धत्वबोधनेन तदङ्गे पुण्यरूपेऽप्यशुचित्वावगतस्य दुरपोहत्वेन सर्वस्यैव पाप्मरूपत्वात् । अन्यथा पुण्यफलस्यापि मुमुक्षूपादेयतापत्तेः । अतो धर्मान्तरानुक्तावपि न वाक्यस्य जीवपरत्वं शक्यवक्तुम् । आदित्यान्तस्तु न हिरण्यगर्भादिः । मात्स्ये परं धामोद्दिश्य तस्य पुत्रत्वकथनेन तत्र परब्रह्मण एवाभिप्रेतत्वनिश्चयात् । ध्येयः सदेति वाक्येऽपि परमेश्वर एवोच्यते । 'नारायणः शिवो विष्णुः शङ्करः परमेश्वरः । एतैस्तु नामभिर्ब्रह्म परं प्रोक्तं सनातनम्' इति वाराहपुराणवाक्येन तस्य ब्रह्मनामत्वात् । नीरूपेश्वरवादस्त्वीक्षत्यधिकरणव्याख्यान एव निरस्तत्वात् । नचैवं, यो देवानां नामधा एक एव, एकं सद्विप्रा बहुधा वदन्तीत्यादिश्रुत्या, हव्यकव्यभुगेकस्त्वं पितृदेवस्वरूपधृगित्यादिस्मृत्या च सर्वैव ब्रह्मोपासनायाः शपथवचनत्वेन देवतामात्रोपासनोच्छेद इति शङ्क्यम् । ज्ञानपूर्वकोपासकान् प्रति तस्येष्टत्वात् । अज्ञान् प्रति तु तदभावात् । येऽप्यन्यदेवताभक्ता इत्यादिभगवद्गीतावाक्यसन्दर्भेण तथा निश्चयात् । स्वरूपे विग्रहस्तु नास्त्येव । आकारस्तु स्वरूपात्मकत्वमस्य सहेतुकमुपपादितं च । तेनाप्राणो ह्यमनाः शुभ्र इत्यादि

आकाशस्तल्लिङ्गात् ॥ २१ ॥

अस्य लोकस्य का गतिरित्याकाश इति होवाच । सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते । आकाशं प्रत्यस्तं यन्ति । आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणमिति । तत्र संशयः । भूताकाशो, ब्रह्म वेति । ननु कथमत्र सन्देहः । आकाशव्योमशब्दा ब्रह्मण्येव प्रयुज्यन्ते ब्रह्मप्रकरणे । कार्यनिरूपणे तु महाभूतवचनः । यथा, आकाश आनन्दो न स्यात्, परमे व्योमन् प्रतिष्ठितेत्यादि । आत्मन आकाशः सम्भूत इति

श्रुतीनां न विरोधः । अरूपवदेवेति सूत्रे तु रूपवद्भिन्नमेवोच्यते, न तु रूपरहितम् । नञः पर्युदासार्थत्वात् । अन्यथा स्वरूपमित्येतावतापि रूपाभावबोधनसिद्धेर्मतुब्वैयर्थ्यस्य दुर्वारत्वात् । अतो, न तस्य कार्यं करणं चेत्यत्र सङ्कोच एतदेव सूत्रं प्रमाणमित्यसङ्कोच एव प्रमाणाभावः । श्रुतयस्तूक्ता वक्ष्यन्ते च । उक्तं विष्णुपुराणवाक्यं स्वधान्तरस्थितिनाशविषयकं, न तु महाकार्यविषयकम् । शरीराणीति बहुवचनेन तथा निश्चयात् । अत इदं मिथ्यात्वैयन्यदवस्थायामेवावादीदिति दिक् । अतो यत्रासाधारणधर्मोपदेशोऽग्निमान्यादिभेदव्यपदेशो वा तत्र रूपोक्तावनुक्तौ वा परं ब्रह्मैवाभिधीयत इति निश्चयः ॥ २० ॥

इति षष्ठाधिकरणम् ॥

आकाशस्तल्लिङ्गात् ॥ छान्दोग्यप्रथमप्रपाठकस्थं विषयवाक्यमुपन्यस्याधिकरणप्रयोजनं विचारयन्ति । * नन्वित्यादि, विचार इत्यन्तम् * । तत्र कर्मपदे गृहीतं प्रकारं विभजन्ते । * आकाशेत्यादि * । यद्यपि लोकप्रसिद्धेः प्रयोगप्राचुर्याच्च सन्देहः सम्भवति, तथाप्यस्य वाक्यस्य प्रकरणावरुद्धत्वेन प्रकरणे चाकाशपदेन कारणमुक्त्वा कार्यनिरूपणस्योपक्रान्ततया प्रकरणादेवाकाशशब्दार्थस्य निर्णयसिद्धेराकाशः प्रकरणादिति सूत्रयितव्यम् । अथ प्रकरणापेक्षया लिङ्गस्य बलिष्ठत्वात् तेन निर्णीतेति तदा तु जन्मादिसूत्रे लिङ्गस्य निर्द्धारितत्वात् तेनैवैतद्वाक्यनिर्णयसिद्धेः सूत्रमेव न प्रयो-

कार्यनिरूपणम् । अतः प्रकरणादेव सन्दिग्धनिर्णये किमिति सूत्रारम्भः । जन्मादिलक्षणसूत्रेण चायमर्थो निर्णीतः । अन्यथा ब्रह्मशब्देऽपि सन्देहः स्यात् । महाभूतवेदादिवाचकत्वात् । तस्मात् प्रकरणादेव परिज्ञानं भविष्यतीति चेत् । उच्यते । असन्दिग्धे प्रकरणे तथैव निर्णयः । इह पुनः प्रकरणमपि सन्दिग्धम् । अतो विचारः ।

अवान्तरविद्यायां पर्यवसितप्रकरणत्वस्यापि प्रकरणस्य भूताकाश एव पर्यवसानमिति । लोकभाष्यन्यायेनाकाशो भौतिक एवेति पूर्वपक्षस्तत्राह ।

तव्यम् । अथ जन्मादिसूत्रे लक्षणस्यापरीक्षितत्वात्र लिङ्गेना, तदा त्विदानीं तस्या निरूढत्वादाकाशो ब्रह्मलिङ्गादित्येनं प्रणेतव्यम् । न तु तल्लिङ्गादिति पूर्वपक्षाशय. । प्रतिवचनाशयस्तु स्फुट एव । प्रकरणस्य सन्दिग्धत्वं तु उपक्रमे उद्गीथोपासनस्योक्तत्वादत्र परोवरीयोरूपस्योत्कृष्टस्य फलस्य कथनाच्च ज्ञेयम् । तेन विचारस्यावश्यकत्वमिति । अधिकरणसङ्गतिस्तु प्रसङ्गरूपा । पूर्वाधिकरणयोः प्रत्ययकृते सन्देहे वारितेऽत्र प्रकृतिकृतसन्देहस्य वारणीयत्वादिति । प्रयोजनमुक्त्वा पूर्वपक्षमाहुः । * अवान्तरेत्यादि * । तथा च यथा जानश्रुत्युपाख्याते संवर्गविद्यायां पर्यवसितं तथास्यापि प्रकरणस्य भूताकाश एव पर्यवसानम् । लोकेऽवगतसामर्थ्यः शब्दो वेदेऽपि बोधक इति लोकभाष्यन्यायेनात्र भूताकाशग्रहणस्यैव युक्तत्वात् । श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति जैमिनिसूत्रात् । ब्रह्मग्रहणे तु लक्षणापत्ते. । तां च विना तदादरस्यानुचितत्वात् । नचाकाशते, आकाशयतीति वा योगेन प्रकाशकं ब्रह्मोच्यतेऽतो न दोष इति वाच्यम् । रूढ्यपेक्षया योगस्यापि दुर्बलत्वात् । नच लिङ्गबोधकवाक्यासङ्गतिः । सर्वाणि ह वा इमानि भूतानीति सर्वपदस्य च वाय्वादिषु सङ्कोचात् सुखेन सङ्गतेः । किञ्च, इमानीति कथनादवान्तरभूतसम्बन्ध्यवकाशरूप एव स ग्राह्यः । फलन्तु तादृशोपासनाबलादेव भविष्यतीति पूर्वः पक्ष इत्यर्थः । सूत्रं

आकाशस्तल्लिङ्गात् ॥ आकाशः परमात्मैव । कुतः । तल्लिङ्गात् । श्रुतिलिङ्गादयो नियामकत्वेन पूर्वतन्त्रवदिहापि गृह्यन्ते । लिङ्गं श्रुतिसामर्थ्यम् एकवाक्यता च सर्वासां ब्रह्मश्रुतीनाम् । तत्र ब्रह्मैव जगत्कारणमिति निःसन्दिग्धेषु सिद्धम् । सर्वशब्दवाच्यत्वं ब्रह्मण्येव । तत्र वाक्यार्थापेक्षया पदार्थस्य दुर्बलत्वात् वाक्यार्थः सर्वगतित्वादिः । तद् वाक्यार्थान्यथाऽनुपपत्त्या आकाशपदार्थो ब्रह्मेति । सर्वशब्दवाच्यत्वाच्च न लक्षणा । मुख्यत्वाच्च । यावन्मुख्यपरत्वं सम्भवति तावन्न कस्यापि वेदान्तस्यापरब्रह्मपरत्वमिति मर्यादा । तस्माद्, यदेष आकाश आनन्दो न स्यादितिवदत्राप्याकाशो ब्रह्मैवेति सिद्धम् ॥ २१ ॥

पठित्वा समादधाना व्याचक्षते । *आकाश इत्यादि* । *नियामकत्वेनेति * । अर्थविशेषनिर्णायकत्वेन । * श्रुतिसामर्थ्यमिति * । अनन्यापेक्षस्य शब्दस्य स्वरसेनार्थबोधकत्वम् । * एकवाक्यतेति * । विभागे साकाङ्क्षत्वे सत्येकार्थप्रतिपादकता । सा च समन्वयरूपा । उपपत्त्यात्मकं तात्पर्यनिर्णयलिङ्गम् । तेन * तल्लिङ्गादित्यस्य श्रुतिसामर्थ्यात्तात्पर्यनिर्णयलिङ्गाच्चेत्यर्थः सिद्ध्यति । * मुख्यत्वादिति * मुख्यार्थत्वात् । तथाच, यतो वा इमानि भूतानि जायन्त इत्यादिश्रुतिनिखिलजडजीवकारणत्वं ब्रह्मणि सिद्धम् । अत्रापि तदेव सर्वपदेन निखिलान्युद्दिश्य, भूतपदेन च देहविशिष्टजीवतया महाभूततया च तानि जीवजडरूपेण निष्कृष्य तत्कारणत्वमाकाशे बोध्यते । तथा, एभ्य इत्यनेन पूर्वोक्तान्येव भूतानि परामृश्य ततो ज्यायस्त्वं च बोध्यते । तथा परमस्थानत्वरूपं परायणत्वं च । तद्यदि भूताकाशो गृह्येत, तदा सर्वपदार्थसङ्कोचेन सर्वपदसामर्थ्यस्यार्थबाधाद् भूतादीनां पदानामपि तद् बाधेन । तथासङ्गतम् । एकपदानुरोधेनानेकपदार्थसङ्कोचात्मकस्य सामर्थ्यबाधस्यानुचितत्वादिति । किञ्च । सर्वे वेदा यत्पदमामनन्तीति, त त्वौपनिषदमिति च श्रुत्या सर्वस्य वेदस्य ब्र-

ब्रह्मण्येव तात्पर्यमिति सिद्धम्। यद्यपि निरङ्कुशसर्वैककारणत्वमस्मिन् वाक्ये भूताकाशस्योक्तेन, तदर्थभेदाद् विभागे साकाङ्क्षत्वाभावाच्च सर्वासां श्रुतीनामेकवाक्यता व्याहन्येत। यद्यपि सर्वे वेदा इत्यत्रासङ्कुचितवृत्तिना सर्वशब्देन ब्रह्मणि सर्वशब्दवाच्यत्वं तत्तत्पदार्थरूपतया सिद्धं, तथापि तत्र वेदे वाक्यार्थापेक्षया तदेकदेशभूतस्य पदार्थस्य दुर्बलत्वाद् वाक्यार्थ एवादरणीयः। वाक्यार्थस्तु सर्वगतित्वादिः। गतिराश्रयः। प्रश्ने, शालावत्यैतल्लोकगतेः पृष्टत्वेऽपि जैवलिना तदुपपादनार्थं सर्वभूतोत्पत्तिप्रलयाधारत्वं यदुक्ता परायणपदेन सर्वगतित्वं प्रतिपाद्यत इति। तथा आदिपदेन सर्वज्यायस्त्वं परोवरीयस्त्वमनन्तत्वं च। तत्र * तस्मात् कारणाद् वाक्यार्थान्यथानुपपत्तिरूपयोपपत्त्यापि, आकाशपदस्य ब्रह्मण्येव तात्पर्यमित्यर्थः। * सर्वशब्दवाच्यत्वादिर्मन्यस्त्वत्रानार्थः। एवमत्र श्रुतिसामर्थ्यरूपेण लिङ्गेन उपपत्तिरूपेण तात्पर्यलिङ्गेन चेति द्विधा व्याख्यातम्।

अन्ये तु, तल्लिङ्गादित्यस्य, ब्रह्मासाधारणधर्मादित्यर्थं वदन्ति। केचिच्चैवं सूचयन्ति। तन्मतेऽधिकरणवैयर्थ्यम्। तद्धर्मोपदेशाधिकरणेनैव गतार्थत्वादिति।

विज्ञानभिक्षुस्तु, काण्वचतुर्थाध्याये सुषुप्तं जीवमुपक्रम्य पठ्यते, तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेत इत्यादि। तत्र किं भूताकाशस्तद्देवता वा ब्रह्म वोच्यत इति संशयः। तद्बीजं तु उपक्रमोपसंहारयोर्ब्रह्मवाचकब्रह्मात्मादिपदवन्मुख्यवाक्ये भूताकाशादिवाचकस्याकाशपदस्य श्रवणम्। अन्यतरस्य गौणत्वे नियामकाभावश्रवणामपि स्वाधाराधारत्वादविशेषश्च। निर्णयस्तु, आकाशो ब्रह्मैवेति। हेतुस्तु तल्लिङ्गात्। लिङ्गानि तु, स यथोर्णनाभिस्तन्तुनोच्चरेदिति, यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति तस्योपनिषत् सत्यस्य सत्यमित्यादीनि। सर्वश्रुतिषु ब्रह्मणि तथा दृष्टान्तदर्शनात्। अचेतनस्य भूताकाशस्याग्निविस्फुलिङ्गदृष्टान्तानर्हत्वात्। तद्देवतायाश्च सर्वदेवान्तर्गतत्वेनाकारणत्वात्। य एवायमाकाशो पुरुष इति पूर्ववाक्येनाकाशदेवताया ब्रह्मत्वप्रतिषेधाच्च। सत्यस्य सत्यमिति च नामपूर्ववाक्येन ब्रह्मण्येव व्याख्यातम्। तत्र सत्यशब्देन पञ्चभूतानि व्याख्याय तद-

अत एव प्राणः ॥ २२ ॥

पेक्षयापि निषेधशेषं ब्रह्म सत्यमिति श्रुत्यैव स्पष्टमुक्तत्वात्। स्कान्देऽपि, 'चैतन्यापेक्षया प्रोक्तं व्योमादि सकलं जगत्। असत्यरूपं सत्यं तु कुम्भकुण्डाद्यपेक्षया' इत्युक्तत्वाच्च। अतः शब्दसाम्येऽपि ब्रह्मलिङ्गाद् ब्रह्मैवाकाशशब्दार्थः। आकाशशब्दश्च ब्रह्मणि रूपकविधया विभुत्वनिर्लेपत्वादिगुणलाभाय, मुखे चन्द्रवच्छुरुत्या प्रयुक्तः। अत एव, परमे व्योमन् प्रतिष्ठितेत्यादिषु श्रुतिष्वाकाशरूपेण ब्रह्म निर्दिश्यते। नानार्थतापा, गङ्गायां घोष इतिवल्लक्षणायाश्चायुक्तत्वादिति। एवं प्राणज्योतिरादयः शब्दा अपि जीवनत्वप्रकाशनत्वादिप्रतिपादनाय रूपकत्वेनैव व्याख्येयाः। वस्तुतस्त्वाकाशप्राणज्योतिरादयः शब्दा आकाशादिभावापन्नब्रह्मपरा एवैतेषु ब्रह्मवाक्येषु भवन्ति। केवलब्रह्मपरत्वे सत्याकाशादिलिङ्गानुपपत्तेः। यत्तु छान्दोग्यवाक्यमाधुनिका इहोदाहरन्ति, अस्य लोकस्य का गतिरित्यादि। तन्न। प्रकरणादिशून्यात् केवलंलिङ्गाच्छ्रुतेर्बलवत्त्वस्य पूर्वमीमांसासूत्रादेरवधारणात्। तत्र च श्रुतिप्रकरणयोरभावात्। किञ्च। प्रश्ने, अस्य लोकस्येत्यनेन भूर्लोकजना एवोक्ता इति प्रत्युत्तरे भूतानीत्युक्तत्वात् सर्वाणि भूतानीति ब्रह्मलिङ्गं न भवति। आकाशसाधारण्यात्। आकाशाद् वृष्टिद्वारेषां भूर्लोकस्थानां सृष्टिस्थितिसंहारादित्याह।

तदसङ्गततमम्। सूत्रविरोधात्। सूत्रे केवलस्य लिङ्गस्यैव हेतुत्वेनोक्तत्वात्। त्वद्रीत्या तु, श्रुतिलिङ्गप्रकरणैरिति पाठापातात्। श्रुतिविरोधाच्च। श्रुतौ सामाद्यलोकान्तगतिज्ञानवतः शालावत्यस्यैतल्लोकगतिप्रश्नेन सामाधेतल्लोकान्तस्य परमाश्रये परमोपजीव्ये वा प्रश्नपर्यवसानात्, तादृशत्वस्य चाकाशेऽसम्भवात्। अतश्छान्दोग्यवाक्यस्याविषयत्वकथनमसङ्गतम्। अन्येषामाधुनिकत्वकथनमपि तथा। स्वस्य सर्वार्वाचीनत्वात्। प्राचीनवृत्त्यादीनामनाश्रयणाच्च। आकाशशब्दस्य भूताकाशतद्देवताब्रह्मसु साधारण्यकथनमपि तथा। ब्रह्मणि रूपकविधया प्रयोगाङ्गीकारेण गौण्या वा निरूढलक्षणाया पाऽऽदरादु ब्रह्मवाचकत्वस्याभावेन साधारण्यस्याभावादिति ॥ २१ ॥

इति सप्तमाधिकरणम् ॥

अत एव प्राणः ॥ अत्रापि छान्दोग्यप्रथमप्रपाठकस्थं वाक्यं

प्रस्तोतर्या देवता प्रस्तावमन्वायत्तेत्युपक्रम्य श्रूयते । कतमा सा देवतेति प्राण इति होवाच । सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते । सैषा देवता प्रस्तावमन्वायत्तेति । तत्र संशयः । आसन्यः प्राणो ब्रह्म वेति । पूर्वपक्षसिद्धान्तौ पूर्ववदेवेत्यतिदिशति ।

नन्वधिकरणानां न्यायरूपत्वात् सर्वत्र गमिष्यति, किमित्यतिदिश्यत इति । उच्यते । प्राणस्य मुख्यस्यापि सर्वभूतसंवेशनं स्वापादौ श्रुतावेवोपपाद्यते यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येतीत्यादिना । तत्र यथा प्राणविद्याया न ब्रह्म-

---

विषयवाक्यत्वेनोदाहरन्ति * प्रस्तोतरित्यादि * । अत्रापि देवतापदेनोपक्रमादृगादित्यसहपाठाच्च प्रकरणे न ब्रह्मणः । प्राणस्य प्राणमित्यादिर्ब्रह्मप्रकरणस्था श्रुतिः पुराणप्रसिद्धिश्च सन्देहबीजम् । श्रुतौ तु प्रस्तावः सामोपासनाविशेषः । अन्वायत्ता अनुगता प्रस्तावस्योपासनाविषया । प्राणश्च वायुवत् प्रतीयमानोऽपि न वायुविकार । वृद्धैः प्राणस्तु तैजस इति पुराणेषु भिन्नकारणकत्वेन सिद्धत्वात् । श्रुतौ च प्राणाद्वायुरजायतेति वायुजनकत्वेन, यो वायुः स प्राण इति श्रुतौ वायुत्वेन च कथनात् । यद्यपि लोके वायुविकारत्वेनोक्तस्तथापि तदपेक्षया वेदव्याख्यानरूपस्यैतदुपबृंहणस्य बलिष्ठत्वात् । अतः स आसन्यो ब्रह्म वेति संशयः । पूर्वपक्षस्तु पुराणप्रसिद्धेरासन्यो ग्राह्य इति । सिद्धान्तस्तु, असङ्कुचितवृत्तेः सर्वशब्दस्य सामर्थ्यादेवात्र प्राणशब्देन ब्रह्म ग्राह्यम् । प्रकरणापेक्षया लिङ्गस्य बलिष्ठत्वात् । पुराणस्य चान्यत्र सावकाशत्वेनात्रानुपबृंहणतायामपि विपरीतबलाबलभावस्याशक्यकल्पनत्वादिति । अत्राधिकरणवैयर्थ्यमाशङ्कते * नन्वित्यादि * । समादधते * उच्यत इत्यादि * । * उपपाद्यत इति * धर्मत्वेनोपपाद्यते । * तत्रेत्यादि * तत्र प्राणविद्यावाक्ये पुरुषस्वापप्रयुक्तं भूतसंवेशनं, तत्प्रबोधप्रयुक्तं

परत्वमेवमेवास्यापि न ब्रह्मपरत्वमिति, न न्यायेन प्राप्नोति । अतोऽतिदिशति । अनेन चायमतिरिक्तो न्याय आपादितः । यत्रैव प्रकरणे ब्रह्मपरत्वे कल्प्यमाने न किञ्चिद् बाधकं तत्रैव ब्रह्मपरत्वं कल्पनीयमिति, न त्वन्यस्मिन् सम्भवे तत्परत्वमिति । अत एव तल्लिङ्गात् प्राणशब्दवाच्यं ब्रह्मेति ॥२३॥

च भूताधिजननमुच्यते, न तु स्वतन्त्रमतो यथा नः प्राणविद्याया ब्रह्मपरत्वमेवमस्यापि वाक्यस्य न ब्रह्मपरत्वं स्याद्यदि श्रुतिसामर्थ्यरूपे हेतौ स्वातन्त्र्यपारतन्त्र्यविवेको न क्रियेत । * इति * हेतौ । प्राणविद्यासाधारण्यस्य बाधकस्य सत्त्वात् तेन न्यायेनास्य ब्रह्मपरत्वं न प्राप्नोति । अतोऽपवादमतिदिशति । एवकारेण बाधकयोगं व्यवच्छिन्दन्नाह तं हेतुं प्रापयतीत्यर्थः । एतस्यातिदेशस्य फलमाहुः । * अनेनेत्यादि * । * न त्वन्यस्मिन् सम्भव इति * सम्भवान्तरे सति तु नेत्यर्थः । सिद्धमाहुः * अत एवेत्यादि * बाधकाभावात् पूर्वोक्ताल्लिङ्गात्त्वेत्यर्थः । नच, प्राणं महिं वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनो यदा प्रबुध्यते प्राणादेवाधि पुनर्जायन्त इत्यत्रेन्द्रियसंवेशनमुच्यते, न भूतसंवेशनमिति विषयभेदात् कथमस्य साधारण्यशङ्केति वाच्यम् । दीपश्चक्षुस्तथा रूपं ज्योतिषो न पृथग्भवेदित्यादिषु पुराणवाक्येष्विन्द्रियाणां भूतापृथग्भावस्योक्तत्वेन भूतविशेषपरत्वस्य सिद्धत्वेमानीत्यस्य श्रुत्यन्तरे वागादिरूपत्वेनोक्तानीत्यर्थस्य शक्यवचनत्वेन शङ्कोदयस्य सम्भवात् । अतः सर्वं समाधेयमिति । एतेन माहात्म्यज्ञानोपयोगिनीनां देवान्तरोपासनानामनुच्छेदायेदमधिकरणम् । अन्यथा तु लोके पित्रपेक्षया क्वचित् पुत्रमाहात्म्यदर्शनात्, केचिद् ब्रह्मकार्येष्वपि ब्रह्मापेक्षयाऽधिकं भावयन्तीति शङ्का स्यादिति तेनोपोद्घातः सङ्गतिरिति बोधितम् । एवञ्चातिदेशाङ्गीकारे, आपो वा इदं सर्वमित्यादिवाक्येष्वपि सर्वात्मकत्वादिब्रह्मलिङ्गदर्शनादबादिशब्दानामपि ब्रह्मप्रकरणे ब्रह्मवाचकत्वमित्यपि साधितं ज्ञेयम् । अधिकरणानां न्यायरूपत्वादिति ।

ज्योतिश्चरणाभिधानात् ॥ २३ ॥

इदमामनन्ति । अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेषु । इदं तावद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिरिति ।

तत्र ज्योतिःशब्देन प्राकृतं ज्योतिराहोस्विद् ब्रह्मैवेति संशयः ।

अत्र सर्वेऽपि ब्रह्मासाधारणधर्ममेव हेतूकृत्याधिकरणं योजयन्तीति तद्दूषणमपि पूर्ववदेव बोध्यम् ।

माध्वास्तु, तद्धै त्वं प्राणो अभवः महान् भोगः प्रजापतेः । भुजः करिष्यमाणः यद्देवान् प्राणयो न वा ' इति तैत्तिरीयोपनिषच्छ्रुतिं विषयवाक्यत्वेनोपन्यस्याधिकरणं रचयन्ति तत्र लोकप्रसिद्धिः, ईशानः प्राणदः प्राण इति विद्वद्रूढिः सन्देहबीजम् । श्रीश्च ते लक्ष्मीश्च पत्न्यावित्यादि तल्लिङ्गं हेतुत्वेनाहुः । अतिदेशप्रयोजनं तु किमपि नाहुः । अत्रापि पूर्ववदेव दूषणम् । किञ्चात्र हेतुः पुरुषसूक्तस्थो, विषयवाक्यं सर्वसूक्तस्थमतो हेतुसाध्यवैयधिकरण्यपरिहारप्रयासश्चाधिक इत्यवधेयम् ।

विज्ञानभिक्षुस्तु कौशीतकिब्राह्मणादिस्थां ब्रह्मप्रकरणीयां श्रुतिं विषयत्वेन वक्तीति तद्दूषणमपि पूर्ववदेव ॥ २२ ॥

इत्यष्टमाधिकरणम् ॥

ज्योतिश्चरणाभिधानात् ॥ *आमनन्तीति* छान्दोग्ये पञ्चमप्रपाठके वदन्ति । श्रुतौ तु, *विश्वतः पृष्ठेष्विति* सर्वेषामुपरि । अयं च विश्वशब्दो न सङ्कोचसह इति ज्ञापनाय तदर्थकं शब्दान्तरं * सर्वतः पृष्ठेष्विति * । शेषं स्फुटम् । संशयमाहुः * तत्र ज्योतिरित्यादि * । अत्र लोकप्रसिद्ध्या, अनादिमत् परं ब्रह्मेति प्रकृत्य पठितेन, ज्योतिषामपि तज्ज्योतिरितिगीतावाक्येन च कोटिद्वयोपस्थितिः

अत्रासाधारणब्रह्मधर्माभावात् पूर्वपक्षः । सिद्धान्ते तु चरणस्य ब्रह्मधर्मत्वमिति । एतावानस्य महिमा, अतो ज्यायांश्च पूरुषः, पादोऽस्य सर्वा भूतानि त्रिपादस्याऽमृतं दिवीति पूर्ववाक्यम् । गायत्री वा इदं सर्वभूतं यदिदं किञ्चेति गायत्र्याख्यब्रह्मविद्यां वक्तुं तस्याः पादचतुष्टयं प्रतिपाद्य ब्रह्मणश्चतुष्पात्त्वमुक्तम् ।

संशयबीजम् । पूर्वपक्षमाहुः । * अत्रेत्यादि * । अयमर्थः । लोके तमोविरोधी पदार्थ आदित्यादिर्ज्योतिःपदेनाभिधीयते । अत्र च दीप्यत इत्युक्तं, प्रकाशकत्वमपि तस्यैव लिङ्गम् । तथाग्ने, तस्यैषा दृष्टिर्यत्रैतदस्मिन् शरीरे संस्पर्शेनोष्णिमानं विजानाति, तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिवाग्नेरिव ज्वलत उपशृणोतीति जाठरस्याग्नेर्लिङ्गम् । न च सूर्यादिप्रकाशस्य दिवोऽर्वागपि दर्शनाज्जाठरप्रकाशस्य च क्वाप्यदर्शनादुभयोर्बाधे गीतावाक्यादिभिर्ब्रह्मैव ज्योतिःपदवाच्यतयाऽऽदरणीयमिति वाच्यम् । ब्रह्मासाधारणधर्मस्य तत्प्रकरणस्य चात्रानुपलम्भात् । अतस्तेजोधर्मस्यात्र दर्शनाद्, बर्हिराज्याधिकरणन्यायेनात्र शास्त्रप्रसिद्ध्यपेक्षया लोकप्रसिद्धेरेवात्र फलवत्त्वाच्च त्रिवृत्कृतं वा प्राकृतमेव तेज इह ग्राह्यम् । अघटमानो धर्मो द्युमर्यादत्वादिर्यः स तूपासनार्थः । किञ्च । यदि ब्रह्मैवात्रोपास्यत्वेनाभिसंहितं स्यात्तदाऽस्या उपासनायाश्चक्षुष्यः श्रुतो भवतीत्यल्पं फलं नोच्येत । अतः फलमपि वाक्यस्य तेजस्तात्पर्यकत्वगमकमतः प्राकृतं तेज एवात्रादरणीयमिति पूर्वः पक्षः । सिद्धान्ते युक्तिमाहुः । * सिद्धान्ते त्वित्यादि * । नन्विह कुत्र चरण उक्तो यस्य ब्रह्मधर्मत्वमुच्यत इत्यत आहुः । * एतावानित्यादि * । तथा च यद्यप्यत्र नोक्तस्तथापि वाक्यान्तर उक्तस्तस्य चैतस्य चैकवाक्यत्वमतश्चरणलाभ इत्यर्थः । कथमेकवाक्यतेत्याकाङ्क्षायां तामुपपादयन्ति * गायत्रीत्यादि, * । * सिद्धमित्यन्तम् * उक्तरीत्या तां ब्रह्मप्रतिपादिकां विद्यां वक्तुं यस्मात् तस्या भूतादिपादचतुष्टयं प्रतिपाद्य तदेतदृचाऽभ्यनूक्तमिति तत्पदेन तदेव चतुष्पात्त्वं परामृश्य ब्रह्मणश्चतुष्पात्त्वमृचोक्तम् । यदि हि सा ब्रह्मविद्यात्वेन

पुरुषसूक्तेऽप्याश्रमचतुष्टयस्था जीवाः पादत्वेनोक्ताः । तथा प्रणवब्रह्मविद्यायामकारोकारमकारनादैश्चत्वारः पादा विश्वतैजसप्राज्ञतुरीया उक्ताः । तद्विष्णोः परमं पदमिति च । ब्रह्मपुच्छमिति च । सत्यकामब्राह्मणे तु स्पष्टा एव ब्रह्मणश्चत्वारः पादा निरूपिताः । अतः सच्चिदानन्दरूपस्य प्रत्येकसमुदायाभ्यां चतूरूपत्वम् । तत्र केवलानां कार्यत्वमेव । चतुर्थपादस्य तु ब्रह्मत्वम् ९

विवक्षिता स्यात्तदैवं कथनं निष्प्रयोजनकं स्यात् । अत एवं गायत्र्या ब्रह्मविद्यात्वेन प्रकरणस्य ब्रह्मत्वे सिद्धे, एकप्रकरणगतत्वेनैकवाक्यतेत्यर्थः । नन्वस्मिन्सूत्रैकदेशो प्रकरणस्य ब्रह्मताया आक्षेप्यमाणत्वेन सन्दिग्धत्वात् तावन्मात्रेणात्र ब्रह्मणश्चतुष्पात्त्वासिद्धिरिति हेतोः साध्यसमत्वमत आहुः । * पुरुषसूक्त इत्यादि * । तत्र पुरुषसूक्तं प्रकृत्य पठिते, एतावानितिमन्त्रे आश्रमिणां पादानां द्वितीयस्कन्धीये पुरुषसूक्तविवरणाध्याये, 'पादास्त्रयो बहिश्चासन्नप्रजानां य आश्रमाः । अन्तस्त्रिलोक्यास्त्वपरो गृहमेधो बृहद्व्रतः' इत्येतेन विवरणादाश्रमवद्देहविशिष्टा जीवाः पादत्वेन सिद्धा इति तत्प्रत्यभिज्ञानादत्र ब्रह्मपादसिद्धिः । किञ्च । यद्येकत्रैव कचिद् ब्रह्मणः पादनिरूपणं स्यात् तदा कथञ्चित् सन्दिग्धतापि । अस्ति तु तद् बहुषु स्थलेष्विति बोधयितुमाहुः । * तथेत्यादि * । तथाच माण्डूक्यादौ काठके तैत्तिरीये छान्दोग्यस्थसत्यकामब्राह्मणे च नानाकारेण पादश्रवणाद् ब्रह्मणश्चतुष्पात्त्वे सन्देह इति न हेतोः साध्यसमत्वमित्यर्थः । ननु भवतु ब्रह्मणश्चतुष्पात्त्वं, तथापि ते चत्वारो न पशोरिवावयवाः किन्त्वंशा एव वाच्याः । तच्च न युज्यते, ब्रह्मणोऽनंशत्वादित्यत आहुः । * अत इत्यादि * । यतो जन्माद्यधिकरणेषु ब्रह्मणस्त्रिरूपता, कार्यकारणभावो, विरुद्धधर्माधारत्वं च साधितमत एवं चतूरूपत्वादेवमंशाः सुखेन युज्यन्त इत्यर्थः । ननु भवतु ब्रह्मणश्चतुष्पात्त्वं, तथाप्यत्र प्रकरणे सत्यकामब्राह्मणवत् कार्यरूपा एव भूतादयः पादा निरूप्यन्ते । तेषां च न ज्योतिर्वाक्या-

तत्रापि षड्विधत्वप्रतिज्ञानाद् भूतपृथिवीशरीराणां परिचायकत्वेन षड्विधत्वमनिरूप्य हृदयस्य षड्विधत्वं निरूपयँस्तस्य ह वा एतस्येत्यादिना पञ्च देवपुरुषान्निरूप्य तेषां द्वारपालत्वज्ञानानन्तरम्, अथ यदतः परो ज्योतिर्दीप्यत इति चतुर्थपादस्य षड्विधत्वमप्रतिपादनात्। अतश्चतुर्थपादे पञ्चपुरुषास्ततः परो दिवो ज्योतिः षष्ठस्तस्यैव सर्वत्र दीप्यमानत्वं निरूप्य तदेवान्तःपुरुषे उपसंहरति । तस्मात् पूर्वं त्रिपादस्यामृतं दिवीत्युक्तत्वादस्य त्रिपात्सम्बन्धि अमृतमुपरितनलोकेऽस्तीति । अतोऽत्र चतुर्थः पादो निरूप्यत इति सिद्धम् ।

काङ्क्षा । गायत्र्याः प्रकृतत्वोक्तत्वात् । नापि ज्योतिर्वाक्यस्य तदाकाङ्क्षा । अथेति प्रकृतच्छेदात् । उभयत्राप्याकाङ्क्षोत्थापकपदाभावाच्च । यद्यपि तेषाम् ऋचा विवरणादिचैव पुरुषपदाद्यत्राणामपि तेषां ग्राह्यत्वं विभाव्यते, तदापि ऋचि ज्योतिर्वाक्ये च परस्पराकाङ्क्षोत्थापकपदाभावाच्च तयोरेकवाक्यता । तदभावे च प्रकरणकथनसाधितमप्येकवाक्यत्वमप्रयोजकमित्याकाङ्क्षायां तयोः परस्पराकाङ्क्षां साधयितुमाहुः । * तत्रापीत्यादि * । यत्र गायत्र्याश्चतुष्पदात्वमुक्तं तत्रापि तस्याः षड्विधत्वप्रतिज्ञानादस्ति षण्णां विधानामाकाङ्क्षा । तत्र भूतपृथिवीशरीराणां पादत्वेन प्रतीयमानानामपि पार्ष्णिप्रपदाङ्गुल्यादिवत् पादपरिचायकत्वमेव, न तु पादत्वं, न वा तद्विधापूरकत्वमित्याशयेन तेषां षड्विधत्वमनिरूप्य हृदयस्यास्ति तथात्वमित्याशयेन हृदयस्य षड्विधत्वं निरूपयन् वक्ता तस्य ह येत्याद्युक्तरीत्या पञ्चविधाज्ञानानन्तरमथेति प्रकृतविच्छेदनपूर्वोक्तविधाभ्यो ज्योतिषो वैलक्षण्यं बोधयंश्चतुर्थपादस्य षड्विधत्वप्रतिपादनाद्वयवलोपे पञ्चमीप्रतिपादनं कृत्वा, अतः, तृतीयान्तत्वसिः, अनेन प्रकारेण चतुर्थपादेत्युक्तरीत्या तदेव ज्योतिरन्तःपुरुषे उपसंहरति । तस्मात् पूर्वं मन्त्रे त्रिपाद-

स्येतिकथनात् पादत्रयमुपरि यतोऽतोऽत्र, तस्य ह वेत्यारभ्यान्ते विधानिरूपके वाक्ये चतुर्थः पादो निरूप्यत इति सिद्धम्। तथाच षड्विधत्वप्रतिज्ञाया विधानिरूपणाकाङ्क्षत्वाद्विधोपपादनस्य चाकाङ्क्षितत्वाभावाय प्रतिज्ञासाकाङ्क्षत्वादुभयोरेकवाक्यत्वम्। अतः परम् ऋगवशिष्यते। सापि चतुष्पदात्वषड्विधात्वप्रतिज्ञयोरनन्तरं तद्विवरणतयोक्तेति तच्छेषत्वस्तस्मादुपपादनवाक्यात् पूर्वं च पठिता। तस्यां च त्रिपादस्यामृतमितिरीत्या पादत्रयं कण्ठत उपरितनलोकेष्वित्युक्तत्वादस्ति चतुर्थपादाकाङ्क्षा। चतुर्थश्च पादः सर्वभूतात्मको हृदयाधिष्ठानक इति तदधिष्ठानस्य हृदयस्य ज्योतिर्वाक्यपर्यन्तेन विवरणादाकाङ्क्षा पूर्यते। त्रिविधमायापादविधानां च स्वाधारभूतपादस्वरूपविवरणाकाङ्क्षा। सा च पादोऽस्य सर्वा भूतानीति विवरणेन ऋचा पूर्यते। तथा ऋचि, दिवीति पदादत्र च परो दिव इति कथनादृचि पुरुषपदेनोक्तः पादत्रयाधारो ज्योतिर्वाक्ये प्रत्यभिज्ञायते। अतश्चतुर्थः पादोऽस्मिन् वाक्ये निरूप्यत इत्यृचा सहाप्यस्यैकवाक्यत्वं सिद्धमित्यर्थः।

अत्रेदं बोध्यम्। अत्र गायत्रीमुपक्रम्य तस्याः सर्वभूतात्मकत्वं प्रतिज्ञाय तत्स्वरूपजिज्ञासायां, वाग्वै गायत्रीति तत्स्वरूपमुपदिश्य वाचः कथं गायत्रीत्वमित्यपेक्षायां, सर्वभूतगातृत्वात्तत्त्रातृत्वाच्च गायत्रीत्वमुक्तम्। तर्हि तस्याः कथं सर्वभूतात्मकत्वमित्यपेक्षायां, या वै गायत्रीयं वाव सेत्यादिना तस्याः पृथिवीत्वं प्रतिपाद्य तेन रूपेण सर्वभूतधारकत्वात् सर्वभूतत्वे समर्थिते, किं तत् सर्वं भूतं? का च तद्धारिका पृथिवीत्यपेक्षायां तां शरीरत्वेन सङ्कोच्य शरीरं हृदयत्वेन सङ्कोचयति। तत्र प्राणांश्च प्रतिष्ठापयति। तेन प्राणरूपाणि भूतानि शरीरैकदेशहृदयात्मकपृथिवीरूपेण वाग्रूपा गायत्री धारयतीति प्रतिपाद्य तस्याः स्वरूपमाह। सैषा चतुष्पदा षड्विधा गायत्रीति। तत्र वाग्रूपायाः कथं पृथिव्यादिरूपत्वं भूतधारकत्वञ्च। तथा पदशब्दोऽपि किं स्थानवाची, उत चत्वारि वाक्परिमिता पदानीति श्रुत्युक्तपरापश्यन्तीमध्यमावैखरीति वागवस्थाचतुष्टयवाची वा पादवाची वेति सन्देहवारणाय तदेतदृचाऽभ्यनूक्तमिति प्रतिज्ञाय ऋचा विवृतम्। तावान् सर्वभूतात्मकत्वादिरूपोऽर्थः पूर्वमुक्तस्तावान् अस्य गायत्रीनाम्नः पुरुषस्य

महिमा माहात्म्यं विभूतिः । तत उक्तरूपान्महिम्नः पुरुषो ज्यायान् अधिकः । पूर्वोक्तं कथमस्य महिमेत्यत आह । पादस्येत्यादि । तथात्वोक्तरूपस्य सर्वस्यैतत्पादरूपत्वान्महिमत्वम् । तत एव च पुरुषस्य ज्यायस्त्वम् । एतेन यच्छब्दार्थोऽपि निर्णीतः । पादा एव यच्छब्दवाच्या इति । एवञ्चार्थरूपपादबोधनेन गायत्र्या वाग्रूपत्वं निवारितम् । तेन पुरुषस्य गायत्रीवाच्यत्वाद् गायत्रीत्वम् । तेन वाग्रूपाया गायत्र्यास्तद्विधात्वमित्यपि साधितम् । ततः पुरुषः को वेत्यपेक्षायां तं पूर्वोक्तपार्थिवशरीरवतः पुरुषाद् व्यावर्तयितुं, यद्वैतद् ब्रह्मेत्यारभ्य, योऽयमन्तर्हृदय आकाश इत्यन्तेन तत्स्वरूपमाह । तेन मन्त्रे पुरुषत्वेन यदुक्तं, तद् ब्रह्म आकाशो, न तु शरीरी पुरुष इत्युक्तम् । तत आधेयस्य कथं महिमाधारत्वमित्यतस्तथात्वं साधयितुं तस्य व्यापकत्वं तदुपासनं तत्फलं चाह । तदेतत्पूर्णमित्यादिना । ततः कास्तद्विधा इत्यपेक्षायां तस्य ह वा एतस्य हृदयस्येत्यादिना पञ्चप्राणानिन्द्रियाणि तद्देवांश्च द्वारपालकोटौ निवेशयति । षष्ठेन ज्योतिषा च षट्संख्यां पूरयति । तेनैते षडपि विधाः । एतद्व्यतिरिक्तः प्राणविधायां, प्राणो हि पिता प्राणो मातेति प्रसिद्धो जीवात्मकः प्राणः पाद इति सिद्ध्यति । सोऽपि न विविक्तः किन्तु शरीरविशिष्ट इति तद्विशिष्टानां जीवानां पादत्वं, तस्य च मुख्यं स्थानं हृदयं, विधाश्च तत्रैव भूतस्य इति हृदयमपि पाद एव निविशते । ज्योतिश्चात्र हार्दमेव यदाकाशशब्देनोक्तं, हृद्यन्तर्ज्योतिरितिश्रुत्यन्तराच्च । अतः पूर्वोक्तरीत्या एकवाक्यत्वं निष्प्रत्यूहमित्यर्थः ।

यत्तु केचित् पुरःस्फूर्तिकमालम्ब्य गायत्र्या भूतपृथिवीशरीरहृदयभेदेन चतुष्पात्त्वं, तथा वाग्रूपत्वकथनाद् हृदये प्राणानां चोक्तत्वात् तदुभयसहितानि तानि भूतानि सङ्ख्यायां निवेश्य तैः षड्भिर्गायत्र्याः षड्विधत्वं व्याख्याय, इदं यावदुक्तं तावानस्य महिमा विकारस्ततो ज्यायान् पुरुषो महान् विकारोऽस्य पुरुषस्य सर्वाणि भूतानि पूर्वं गायत्र्यात्मनोक्तान्येकः पादोऽस्य गायत्रीब्रह्मणस्त्रिपाद् अमृतं दिवि द्योतनवति स्वात्मन्यवस्थितमित्येवं मन्त्रं व्याख्याय तस्य गायत्र्यवच्छिन्नस्य ब्रह्मणो हृदयाकाश उपास्यत्वं च व्याख्याय तत उपास्याङ्गभूतं पञ्चद्वारपालोपासनं च व्याख्याय गायत्र्युपाधिकस्य

अतः पादानां ब्रह्मधर्मत्वाज्ज्योतिषो ब्रह्मत्वमिति ।

इत्युपास्यत्वेनोक्तस्यैव कौक्षेयज्योतिःप्रतीकत्वेनोपासनम् 'अथ यदतः परो दिव' इत्यादिना विधीयते । अत्र चाथशब्दो विद्यान्तरोपक्रमार्थ इत्याहुः ।

तन्मन्दम्। पुराणोपबृंहितश्रुत्युपष्टम्भेन व्याख्यातप्रकारेण पादानां विधानां च विवेकसिद्धावेवं साङ्कर्येण पादविधयोर्व्याख्यानस्यासङ्गतत्वात् । उक्तपुराणश्रुत्योरेवंविरोधेनैव मन्त्रव्याख्यानस्याप्यसङ्गतत्वात् । अथ योऽस्य दक्षिणः शुषिरित्यादावप्यथशब्दस्य सत्त्वेऽपि तत्र न विद्याभेदकत्वम्, अथ यदतः पर इत्यत्र विद्याभेदकत्वमित्यत्र बीजानुपलम्भाद् अङ्गोपास्तिभेदप्रायपाठविरोधाच्चेति । एवमेकवाक्यतामुपपाद्य सिद्धमाहुः * अत इत्यादि * अत एवम् ऋग्वाक्ययोरपि परस्पराकाङ्क्षत्वेन पादानां ब्रह्मधर्मत्वाज्ज्योतिषो ब्रह्मत्वं सिद्धमित्यर्थः । अत्रेदं बोध्यम् । मन्त्रे, पादोऽस्य सर्वा भूतानीत्यत्र, क्षरः सर्वाणि भूतानीति गीतोक्तः क्षरः पुरुषो जीवसमष्टिमात्रमिति । यद्यपि वक्तुं शक्यते । किञ्च । इदन्तज्ज्योतिः पुरुष इति श्रुत्वा जीवस्य हृदयं स्थानं, तद्विराड् जीवस्य स्वर्लोकः । हृदा स्वर्लोक इति द्वितीयस्कन्धात् । अत्र च स्वर्लोकस्य द्वारपान् वेदेति तत्प्रत्यभिज्ञानात् । तथापि मन्त्रे, त्रिपादस्यामृतं दिवीति विशेषकथनात् पुरुषसूक्तविवरणाध्याये च तेषामाधारत्वव्यक्तत्वेन व्याप्ततया निगमनात्, पादोऽस्येत्यत्रापि व्यष्टिजीवा एव ग्राह्याः । अन्यथा त्रिपादित्यादेर्विरोधापत्तेः । एवं सिद्धेऽस्यानां सर्वभूतानामुपरितनानां च व्यष्टिजीवानां तेषां सर्वेषां इदन्तदिति श्रुत्या हृदयमेव स्थानमिति तस्यैकत्र षड्विधत्वेऽन्यत्रापि तथात्वमिति ब्रह्मपादानां गायत्रीपादतुल्यत्य, तद्विधानां च गायत्रीविधातुल्यत्वं भवति । एवं सति यथा प्रणवविद्यायां ब्रह्मणः पादसङ्ख्यापूरकत्वं, तथास्यां गायत्रीविद्यायां विधासङ्ख्यापूरकत्वम् । एवमत्र चरणानां ब्रह्मधर्मत्वात् प्रकरणस्य ब्राह्मत्वं सिद्धं शब्दमात्रस्य ब्रह्मण्येव सुघटत्वात् । तमेव भान्तं, यदादित्यगतं तेज इत्यादिश्रुतिस्मृतिनिर्दिष्टनामकस्य तेजोलिङ्गस्यापि ब्रह्मण्येव समन्वयात् । अहं वैश्वानरो भूत्वेति गीतावाक्येन जाठरव-

ब्रह्मधर्मनिर्णयार्थमिदमधिकरणं चरणानामौपचारिकत्वव्यावृत्त्यर्थम् । एतन्निर्णयेन प्राणवादिविद्या निर्णीता वेदितव्याः ॥ २३ ॥

छन्दोऽभिधानान्नेतिचेन्न तथा चेतोऽर्पणनिगदात् तथा हि दर्शनम् ॥ २४ ॥

ननु नात्र ब्रह्म चतुष्पान्निरूपितं, किन्तु गायत्री छन्दः । गायत्री वा इदं सर्वं यदिदं किञ्चेत्युपक्रम्य तामेव भूतपृथिवीशरीरहृदयभेदैर्व्याख्याय, सैषा चतुष्पदा षड्विधा गायत्री । तदेतदृचाभ्युक्तं, तावानस्य महिमेति । तस्यामेव व्याख्यानरूपायां गायत्र्यामुदाहृतो मन्त्रः कथमकस्माद् ब्रह्म चतुष्पादभिदध्यात् । यद्वै,तद् ब्रह्मेति ब्रह्मपदमपि छन्दसः प्रकृतत्वात् त-

---

भेदयोर्निमादेरपि तत्र समन्वयात् । द्युमर्यादत्वस्यापि ब्राह्मणश्रमणन्यायेनाधिकयबोधनार्थत्वात् । चक्षुष्यः श्रुतो भवतीति फलस्यापि भगवद्गीयत्वेक हृदयो विख्यातश्च भवतीत्याकारकत्वात् । अपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो यवाद्रियन्ते भगवद्गीयत्वेनैव परिमितमासवर्गा इति पञ्चमस्कन्धोक्तरीत्या तस्य महाफलत्वात् । वसन्ते ज्योतिषा यजेत, वाचैव ज्योतिषेत्यादिश्रावणेन ज्योतिःपदस्य तेजोमात्रवाचकत्वाभावाच्च ज्योतिषो ब्रह्मत्वमिति हृदयम् । एवं सिद्धान्तमुक्त्वा, तद्धर्मोपदेशाधिकरणेनास्य गतार्थताशङ्कां परिहरन्ति । * ब्रह्मेत्यादि * । तथाच तत्र हेतोः सिद्धत्वेनात्र तु साध्यत्वेन फलभेदान्न गतार्थतेत्यर्थः । ननु ब्रह्मप्रतिपत्तिरूपस्य फलस्यान्यथापि सिद्धे का हेतुसाधनावश्यकतेत्यत आहुः । * एतदित्यादि * । पादवन्निर्णयेन पादवत्योऽन्या अपि विद्या निर्णीताः स्युरित्येतदर्थं तदावश्यकतेत्यर्थः ॥ २३ ॥

छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथा हि दर्शनम् ॥ आक्षेपांशं व्याकुर्वन्ति । *नन्वित्यादि* । *अकस्मादिति*।

त्परमेवावगन्तव्यम् । शब्दस्यापि ब्रह्मवाचकत्वसिद्धेर्ब्रह्मोपनिषदितिवच्छब्दब्रह्मेति च । तस्माच्छन्दस एव पादाभिधानाम ब्रह्मधर्माः पादा इति चेन्नैष दोषः । तथा चेतोऽर्पणनिगदात् । तथा तेन द्वारेण चेतसोऽर्पणं निगद्यते । गायत्री वा इदं सर्वं यदिदं किञ्चेति । न हि वर्णसमाम्नायरूपस्य सर्वत्वमनुपचारेण सम्भवति । यथा सूचीद्वारा सूत्रप्रवेशस्तथा गायत्रीद्वारा बुद्धिस्तत्प्रतिपाद्ये ब्रह्मणि प्रविशेदिति ।

कुत एतदेवं प्रतिपाद्यत इति, तत्राह । तथा हि दर्शनम् । तथा तेनैव प्रकारेण दर्शनं ज्ञानं भवति । स्थूला बुद्धिर्नाहत्यैव ब्रह्मणि प्रविशेदिति । एतेन सर्वा मन्त्रोपासना व्याख्याताः । हि युक्तश्चायमर्थो, लोके स्वतो यत्र प्रविशति तदुपायेन विशतीति । न स्वदृष्टद्वारा । दृष्टे सम्भवत्यदृष्टकल्पनाया अन्याय्यत्वात् । तस्मात् । पादा ब्रह्मधर्माः ॥ २४ ॥

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ २५ ॥

तात्पर्यलिङ्गोपक्रमं विना । तथाचोपक्रमस्य तात्पर्यलिङ्गत्वादसंजातविरोधत्वेन प्रबलत्वात् तदनुरोधेनैव मन्त्रव्याख्यानमुचितमिति मन्त्रेण ब्रह्मपादासिद्धेर्हेतुः स्वरूपासिद्ध इत्यर्थः । परिहारांशं व्याकुर्वन्ति । * तथा तेनेत्यादि * । अत्र हि, तथा चेतोऽर्पणनिगदे सर्वरूपत्वोक्तिर्लिङ्गम् । वाङ्गरूपायां गायत्र्यां तदसम्भावितत्वात् । तदेव च विरुद्ध्यमानमुपक्रमस्य प्राबल्यमपहन्ति । निवृत्ते च तस्मिन् प्रकरणस्य ब्राह्मत्वं मन्त्रवर्णादेव निर्णीयते । अतस्तथेति । अग्रिमं व्याकुर्वन्ति । * कुत इत्यादि * । वेदेनेति शेषः । एवं निरूपणप्रयोजनमाहुः । * एतेनेत्यादि * । तथाच सर्वासां मन्त्रोपासनानां निर्णयार्थमेतदित्यर्थः ॥ २४ ॥

किञ्च । भूतादयोऽत्र पादा व्यपदिश्यन्ते । भूतपृथिवीशरीरहृदयानि चत्वारि । न ह्येतानि गायत्र्याः पादा भवितुमर्हन्ति । ब्रह्मपरिग्रहे तूपपद्यन्ते । यावन्मुख्यमुपपद्यते । तावन्न गौणं कल्पनीयम् । अयमर्थः । पूर्वहेतौ छन्दसोऽपि पादाव्यपदेशाद् भवन्ति । तथापि ब्रह्मण एव युक्ता इति । पुरुषसूक्ते एतावानस्येत्यस्य ब्रह्मपरत्वात् । अस्मिन् वाक्ये तु गायत्र्याः पादा एव नोपदिष्टाः, किन्तु ते ब्रह्मण एव पादा इति ।

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥ युक्त्यन्तरं वदतीत्याहुः । *किञ्चेत्यादि* । अयमर्थः । त्वया हि गायत्र्याः प्रकरणित्वमुपगतं सन्निहितत्वाद् भूतादय एव पादत्वेन वाच्याः । ते च स्वरसेनासंभवन्तो गौण्या योज्याः । गौणीत्वेकत्र वास्तवत्वेऽन्यत्र भवत्यतस्तथेति स एव मुख्यो विवक्षित इति श्रुतौ वक्ष्यमाणस्यामर्थं बोधयितुं सैवेत्येतत्पदमुक्तम् । अन्यथा तु पूर्ववदियं वा .व सेत्येवं वदेदित्यर्थः । नन्वयमर्थस्तु पूर्वसूत्रेणैव सिद्ध इत्यस्य सूत्रस्य किं प्रयोजनमत आहुः । * अयमर्थ इत्यादि * । पूर्वहेतौ चेतोऽर्पणनिगदरूपे छन्दःसोऽपि पादा गौण्या कथनाद् भवन्ति । तथापि ब्रह्मणः पादा युक्ता इति ज्ञायते । नच तर्हि भूतादय एव मुख्यतया ब्रह्मणः पादा भवन्त्विति शङ्क्यम् । पुरुषसूक्ते, एतावानस्येत्यस्य ब्रह्मपरत्वात् । तदर्थस्य चात्र विवरणेऽपि प्रत्यभिज्ञानात् । नच तत्रापि सर्वभूतपदैरेतान्येवोच्यन्त इति शङ्क्यम् । पुरुषसूक्तविवरणाध्याये चैतद्व्याख्यान आश्रमचतुष्टयवतां भौतिकशरीरविशिष्टजीवानामेव .व्याख्यातत्वाच्छरीरविशिष्टे च भूतपृथिव्यादेरपि परिचायकत्वेनैव सङ्ग्रहान्मुख्यतया ग्रहणे तद्विरोधापत्तेस्तन्मुख्यतया वक्तुमशक्यत्वात् । नच गायत्री वेति वाक्यविरोधः । * अस्मिन् वाक्य इत्याद्युक्तरीत्या तेषां गायत्र्यामुप-

तद्वाचकत्वेन गायत्र्यामुपचारेणोपसंहारः । चकारादर्था न शब्दस्य पादा भवन्ति, किन्त्वर्थस्यैवेति । तस्मात् ब्रह्मवाचकत्वे भूतादीनां पादत्वमुपपद्यते नान्यथेति । तस्मात् पादानां ब्रह्मधर्मत्वम् ॥ २५ ॥

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥२६॥

पादोऽस्य विश्वा भूतानि, सर्वाणि भूतान्येकः पादः । पादत्रयममृतं दिवीत्येकोऽर्थः ।

'पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुः । अमृतं क्षेममभयं त्रिमूर्ध्नोऽधायि मूर्द्धसु ' इत्यपरः ।

चारेणोपसंहार इति तद्विरोधाभावादित्यर्थः * तद्वाचकत्वेनेति * ब्रह्मवाचकत्वेन । * उपसंहार इति * सैषा चतुष्पदेत्यादिनोक्तः स्मः। तथाच पादानां ब्रह्मधर्मत्वाभावे गायत्र्यां तद्रूपव्यपदेशस्यापि वक्तुमशक्यत्वात् त्वया स्वमतोपपादनायाप्यस्मदुक्तमवश्यमङ्गीकरणीयमिति, गले पादुकान्यायेन तदङ्गीकारणं प्रयोजनमित्यर्थः । एतेन सूत्रस्यमेवपदं व्याख्यातम् । स्फुटमन्यत् ॥ २५ ॥

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥ सूत्रं व्याख्यातुं तदर्थं प्रथमतो मन्त्रं व्याकुर्वन्ति । * पादोऽस्येत्यादि * । * एकोऽर्थ इति * । पुरःस्फूर्तिकः सर्वोत्तरस्तृतीयोऽर्थः । अस्मिन् पक्षे श्रौतं दिवीतिपदं द्योतनात्मस्वरूपपरम् । अतः पादसंख्यापूर्तिरप्यमृतात्मकेन स्वरूपेणैव । न तु जीवैर्न वा लोकैरिति । द्वितीयस्कन्धानुसारेणेतरमाहुः । *पादेष्वित्यादि* । तिष्ठन्ति येष्विति स्थाः भूरादिलोकाः स्थितपदवाच्याः । ते पादा यस्येति स्थितिपात् । तस्य स्थितिपदो भगवतो भूरादिषु पादेषु सर्वाणि भूतानि विदुः । त्रिमूर्ध्नो भूरादित्रयोपरिवर्तमानस्य महर्लोकस्य मूर्द्धसूपरितनेषु जनस्तपःसत्येषु, अमृतं क्षेममभयमिति सुखत्रयमधायि । अतो भूरादिचतुष्के

पुरुषसूक्तानुरोधे द्वितीय एवार्थः । प्रथमे तावत् । ननु दिवीतिमन्त्रे सप्तम्याऽऽधारत्वं प्रतिपाद्यते । अतः परमित्यत्र पञ्चम्याऽनाधारत्वमत उपदेशभेदात् पूर्वोक्तपरामर्शाभावान्न ज्योतिषो ब्रह्मत्वमिति चेन्नैष दोषः । उभयस्मिन्नप्यविरोधात् । मन्त्रे दिव्येवोक्तम् । अस्मिन् वाक्ये सर्वत्रोच्यते । सर्वत्र विद्यमानस्य दिवि विद्यमानत्वं न विरुध्यते । अतः शब्देन न तत्राविद्यमानत्वं, किन्तु ततोऽप्यन्यत्र सत्त्वं बोध्यते । तस्मात् सप्तमीपञ्चमीनिर्देशो न विरुद्धः । द्वितीये तु । ननु मन्त्रे अमृतपदमत्र ज्योतिःपदमत उपदेशभेदाच्चतुर्थश्च पादो हृदयम् ।

अनित्यं सुखमित्यर्थादायाति । अस्मिन् पक्षे श्रौते पादशब्दे, सुपां सुलुगिति सुपः स्वादेशः । अस्येश्वरस्य स्थितिपदः पुंस इत्यर्थः । दिवीति जनआदित्रयोपलक्षकम् । अमृतपदममृतत्वस्यानुसीयमानत्वात् सुखत्रयोपलक्षकम् । एवं सति द्वितीयस्योपपादनसापेक्षत्वात् प्राञ्जलः पूर्व एव ग्राह्य इति शङ्कायामाहुः * पुरुषेत्यादि * एवकारोऽप्यर्थे । पूर्वस्यापि पादात्रय इत्युक्तरीत्या पुरुषसूक्तानुसारित्वात् । एवमभिप्रेत्य सूत्रं द्वेधा व्याकरिष्यन्त आहुः *प्रथमे तावदित्यादि* । * प्रथम इति* पुरःस्फूर्तिके तृतीये * । पूर्वोक्तपरामर्शाभावादिति* विभक्तिभेदेन मन्त्रोक्तस्य दिव्शब्दस्यास्मिन् प्रत्यभिज्ञाभावात् । सिद्धान्तग्रन्थे पञ्चम्याः कथं सर्वत्र विद्यमानताबोधकत्वमत आहुः । * अत इत्यादि * अतो दिव इत्युक्त्वा, सर्वतः पृष्ठेष्वित्यादिश्रावणेन पञ्चम्या ल्यब्लोपीयत्वे, इमं द्युलोकमारभ्येत्यर्थात् तथेत्यर्थः । अत्र सर्वे, वृक्षाग्रे श्येनो, वृक्षाग्रात् परतः श्येन इति विभक्तिभेदेऽपि यथैकार्थप्रत्यभिज्ञा तथात्रेति दृष्टान्तमाहुः । अत्र तु विभक्तिभेदस्य प्रयोजनमप्युपदेशभेदमाहुः । * चतुर्थश्च पादो हृदयमिति * मन्त्रे लोकात्मकः पादः । ब्राह्मणस्य तु हृदयमुपक्रम्य पठितत्वाद्धृदयपादत्वेन तत्र सिद्धतीत्युपदेशभेद इत्यर्थः । अन्यमपि भेदकमाहुः ।

अतः शब्दाच्च सर्वस्माद्भेदः प्रतिपाद्यते । अत उपदेशभेदान्नैकवाक्यता । अस्मिंश्च वाक्ये चरणाभावात् स्वरूपासिद्धो हेतुरिति चेन्नैष दोषः । उभयस्मिन् ज्योतिःपदे अमृतपदे च प्रयुज्यमाने एकार्थत्वान्न विरोधः । पादत्रयमुपरितनलोकेषु चतुर्थं सर्वत्रेति । अन्यथा वैजात्यं पादानामापद्येत । परिच्छेदश्च विरोधश्च । अतोऽमृतज्योतिःशब्दयोरेकार्थत्वेन विरोधाभावादेकवाक्यत्वम् । अतोऽत्र चरणसद्भावात्तस्य च ब्रह्मधर्मत्वाज्ज्योतिर्ब्रह्मैव ॥ २६ ॥

---

* अतः शब्दादित्यादि * अत इत्यस्य पूर्वपरामर्शित्वात् पूर्वस्माद् भेदे प्रत्यापिते पूर्वोक्ताद् ब्रह्मणोऽपि स्वकार्याज्ज्योतिषो भिन्नत्वसिद्धिरित्यर्थः । *अत इत्यादि* एवं प्रकारत्रयेणैकदेशभेदाग्मन्त्रब्राह्मणयोर्भिन्नार्थत्वेनोपदेशभेदादित्यर्थः । तेन सिद्धमाहुः * अस्मिन्नित्यादि * ब्राह्मणवाक्यं तदभावादेकवाक्यत्वाभावेन मन्त्रतः प्राप्यमाणासद्धेत्यर्थः । सिद्धान्तं व्याचक्षते * नैष इत्यादि * । * एकार्थत्वादिति* उभयोर्ब्रह्मवाचकत्वेनैकार्थत्वान्नैकवाक्यताविरोधः । ननु तथापि पादभेदेन विभागे साकाङ्क्षत्वाभावात् कथमेकवाक्यतेत्यत आहुः * पादेत्यादि * आश्रमचतुष्टयस्थजीवानां पादत्वपक्षे लोकानां च पादत्वपक्षे यथायथं हृदयरूपं चरणस्थानं, पादान्तर्वर्ति ब्रह्म च ज्योतीरूपं सर्वत्रेति पादभेदेऽपि तदुपलक्षकस्य तदन्तःस्थितस्य च सार्वत्रिकत्वेनोभयत्रापेक्षणाद्विभागे साकाङ्क्षतायाः सत्त्वान्नैकवाक्यत्वभङ्ग इत्यर्थः । ननु स्पष्टस्य ब्रह्मधर्मस्याभावेऽपि निर्बन्धेनैवं व्याख्याने का दोषपत्तिरित्यत आहुः * अन्यथेत्यादि * गायत्रीपरतया व्याख्याने गायत्र्याः शब्दत्वेन पादानां चार्थत्वेनांशांशिभावाङ्गीकारे वैजात्यं पादानामापद्यते । किञ्च । गायत्री परिच्छिन्ना । अत्र तु, सर्वतः पृष्ठेष्वित्यादिना परिच्छेदराहित्यं प्रतिपाद्यतेऽतः परिच्छेदविरोधश्च । तथाच गायत्रीपक्षे दोषद्वयसत्त्वं, ब्रह्मपक्षे तदभावश्च व्याख्यानिर्बन्ध उपपत्तिरित्यर्थः । एवं सर्वमुपपाद्य सिद्धमाहुः * अत इत्यादि * । *अत इति* पक्षान्तरस्यायदमानत्वाद् । * अत इति * एकवाक्य-

प्राणस्तथाऽनुगमात् ॥ २७ ॥

अस्ति कौषीतकिब्राह्मणोपनिषदि इन्द्रप्रतर्दनसंवादः। प्रतर्दनो ह वै दैवोदासिरित्यादिना, एष लोकपाल एष लोकाधिपतिरेष लोकेशः स म आत्मेति विद्यात् स म आत्मेति विद्यादित्येतदन्तम्। तत्र वरदाने मामेव विजानीह्येतदेवाहं मनुष्याय

त्वर्ह्येव सिद्धत्वात्। तथा च प्रकरणस्य ब्रह्मत्वे सिद्धे ब्रह्मधर्मस्य तत्र सिद्धत्वादुपसंहारगतमपि ज्योतिःपदं ब्रह्मवाचकत्वेनैव सिद्धमतस्तथेत्यर्थः। अत्र पादवतीविद्यानां ब्रह्मस्वरूपपरत्वप्रतिपादनाद् अध्यायसङ्गतिः। आश्रमचतुष्टयस्य जीवस्थितितद्भोग्यसुखरूपकार्यद्वारा तत्प्रतिपादनात् पादसङ्गतिः। ज्योतिषः स्थितिकार्यकत्वेन ब्रह्मलक्षणेऽतिव्याप्तौ प्राप्तायां तन्निवृत्त्यर्थं ज्योतिःपदे सन्देहवारणाद् अवसरोऽधिकरणसङ्गतिः। तेनापो वा इदं सर्वमित्यादावप्ययं न्यायो बोध्यत इति न न्यूनता।

माध्वास्त्वत्राधिकरणद्वयमङ्गीकुर्वन्ति। तत्र प्रथमसूत्रस्यापि-सूक्तं विषयवाक्यम्। 'वि मे कर्णा पतयो विचक्षुर्वीदं ज्योतिर्हृदय आहितं यत्। वि मे मनश्चरतं आधीः किं स्विद् वक्ष्यामि किमनूमनिष्य' इति। अत्र विशब्दो विरुद्धार्थकः। पतय इति पततो विरुद्धं चरत इत्यर्थः। इदं चरणं हेतुः। शेषं समानम्। वस्तुतस्त्वत्र विचरणमुक्तं, न तु चरणमतद्भिन्नत्वम्। छन्दोऽभिधानादिति सूत्रमधिकरणान्तरम्। तत्र छान्दोग्यस्थमुक्तमेव विषयवाक्यम्। समानमितरत्। अत्रापि सूत्रे साध्यानुल्लेखात् सूत्रकृदाशयगोचरत्वं सन्दिग्धम्॥ २६॥

इति नवमाधिकरणम्।

प्राणस्तथाऽनुगमात्॥ विषयवाक्यमुदाहरन्ति *अस्तीत्यादि* तथा च सम्पूर्णः पञ्चमाध्यायोऽत्र विषयवाक्यमित्यर्थः। कथमस्य विषयत्वमित्याकाङ्क्षायामेतदर्थं वदन्तो मतान्तरीयाः सर्वेऽपि, मुख्यः प्राणो वा देवतात्मा वा, जीवो वा, ब्रह्म वेति चतुष्कोटिकं संशयं वदन्तीति ततो वैलक्षण्यबोधनाय व्युत्पाद्याहुः। * तत्र वरेत्यादि *।

हिततमं मन्य इत्युपक्रम्य त्वाष्ट्रवधादिनात्मानं प्रशस्य स्वोपासनायाः पापाभावं फलत्वेन प्रतिपाद्य कस्त्वमिति विवक्षायां, प्राणो वा अहमस्मि प्रज्ञात्मानं मामायुरमृतमित्युपास्वेत्युक्त्वा आयुषः प्राणत्वमुपपाद्याऽमृतत्वं च प्राणस्योपपाद्य, प्राणेन ह्येवास्मिँल्लोके अमृतत्वमाप्नोतीति, अमृतत्वं योगेन प्रतिपादयति। तत्र सन्देहः । प्राणः किमासन्यो ब्रह्म वेति ।

अत एव प्राण, इत्यत्र प्राणशब्दमात्रे सन्देहः । अत्रार्थेऽपि सन्देहः । बाधकं च वर्तत इति पृथगधिकरणारम्भः । तत्र साधकासाधारणधर्मस्याभावाद् बाधकानां विद्यमानत्वान्न ब्रह्मत्वमिति पूर्वपक्षः । सिद्धान्तस्तु चतुर्भिः सूत्रैः प्रतिपाद्यते । तत्र प्रथमं साधकधर्ममाहैकेन । त्रिभिर्बाधकनिराकरणम् । प्राणः परमात्मा भवितुमर्हति । कुतः । तथाऽनुगमात् । तथाहि । पौर्वापर्येण पर्यालोच्यमाने वाक्ये पदार्थानां समन्वयो ब्रह्मपति-

---

* योगेनेति * प्राणसंयोगेन । तथाचेन्द्रेण स्वस्मिन् प्राणत्वस्यैवोपपादितत्वेन प्रज्ञापदस्य बुद्धिवाचकतया चेतनधर्माणां तत्रोपचरितत्वाद् द्विकोटिक एव युक्त इत्यर्थः । ननु चतुष्कोटिक एव युक्तोऽन्यथा पूर्वाधिकरणेनास्य गतार्थत्वं स्यादित्यत आहुः । * अत एवेत्यादि * । उक्ताधिकरणे विषयवाक्ये ब्रह्मलिङ्गस्य विद्यमानत्वात् प्राणशब्दः प्रयुक्त इति प्राणशब्दमात्रे सन्देहः । अत्र तु प्राणे प्रज्ञात्मत्वकथनादायुष्ट्वोपपादनाच्चासन्यो वा, जीवो वेति प्राणशब्दार्थे सन्देहः। किञ्च जीवमुख्यप्राणलिङ्गादिकं बाधकं वर्तत इत्यतस्तथेत्यर्थः । युक्तिपूर्वकं पूर्वपक्षमाहुः । * तत्र साधकेत्यादि * । कथमेवमित्यत आहुः* तत्र प्रथममित्यादि * । सूत्रं व्याकुर्वन्ति * प्राण इत्यादि * तथा ब्रह्मपरत्वेऽनुगमात् पदार्थानां समन्वयादिति सूत्रार्थ इति त-

पादनन्तर उपलभ्यते । उपक्रमे तावद् वरं वृणीष्वेति इन्द्रः प्रतर्दनोक्तः परमपुरुषार्थं वरमुपचिक्षेप । त्वमेव मे वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस इति । तस्मै हिततमत्वेनोपदिश्यमानः प्राणः कथं परमात्मा न स्यात् । न हि परमात्मनोऽन्यद्धिततममस्ति । परमानन्दस्वरूपत्वात् । पापाभावश्च ब्रह्मविज्ञान एव । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावर इति श्रुतेः । प्रज्ञात्मत्वं च तस्यैव सम्भवति । उपसंहारेऽप्यानन्दोऽजरोऽमृत इति, एष लोकाधिपतिरित्यादि च । तस्मात् सर्वत्रानुगमात् प्राणो ब्रह्म ॥ २७ ॥

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्ध-
भूमा ह्यस्मिन् ॥ २८ ॥

बाधकमाह । यदुच्यते प्राणो ब्रह्मेति, तन्न । कुतः । वक्तुरात्मोपदेशात् । वक्ता हीन्द्र आत्मानमुपदिशति । मामेव विजानीहीत्युपक्रम्य प्राणो वा अहमस्मि प्रज्ञात्मानं मामायुरमृतमित्युपास्स्वेति । स एष प्राणो वक्तुरात्मत्वेनोपदिश्यमानः कथं ब्रह्म स्यात् । तथाच वाचो धेनुत्वोपासनवद्देवतायाः प्राणत्वेनोपासना बोध्यते ।

अन्ये च ब्रह्मधर्माः प्राणस्तावका इति कथमस्य ब्रह्मोपा-

मुपपादयन्ति * उपक्रम इत्यादि * । * सम्भवतीति * चिद्रूपत्वात् सम्भवति । * सर्वत्रानुगमादिति * आद्यन्ते पदार्थानां ब्रह्मधर्मत्वेनैव समन्वयात् । एवं साधकधर्मो व्याख्यातः ॥ २७ ॥

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् ॥
बाधकमाहेति सूत्रांशेनाहेत्यर्थः । *उपदिशतीति* मामित्यहङ्कारयोगेनोपदिशति । * ब्रह्मधर्मा इति * पूर्वसूत्रव्याख्याने उक्ताः ।

ख्यानत्वमिति चेन्न । अध्यात्मसम्बन्धभूमा ह्यस्मिन् । अस्मिन् प्रकरणे अध्यात्मसम्बन्धः । आत्मानमधिकृत्य यः सम्बन्धः । आत्मशब्दो ब्रह्मवाची । वस्तुतो जीवस्य ब्रह्मत्वाय तथा वचः । तस्य सम्बन्धः । तद्धर्माः । तेषां बाहुल्यं प्रतीयते । एष लोकपाल इत्यादि । यावद् यथाकथञ्चिदपि ब्रह्मप्रकरणत्वं सिद्ध्यति, तावदन्यप्रकरणत्वमयुक्तमिति हिशब्दार्थः । प्राणस्य प्रज्ञात्मत्वम् । स्वातन्त्र्येणायुर्दातृत्वम् । न वाचं विजिज्ञासीत वक्तारं विद्यादिति चोपक्रम्य, तद्यथा रथस्यारेषु नेमिरर्पिता, नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः, प्रज्ञामात्राः प्राणे अर्पिताः । स एष प्रज्ञात्माऽऽनन्दोऽजरोऽमृतो न साधुना कर्मणेत्यादिविषयेन्द्रियव्यवहारे अनभिभूतं प्रज्ञात्मानमेवोपसंहरति । स म आत्मेति विद्यादिति चोपसंहारः । तस्मादध्यात्मसम्बन्धबाहुल्याद् ब्रह्मोपदेश एवायम् ॥ २८ ॥

निराकरणांशं व्याकुर्वन्ति * अस्मिन्नित्यादि * । * अधिकृत्येति * अधिकाभिक्ये । अधिकं कृत्वा । आत्मपदार्थस्य सन्दिग्धत्वादाहुः । * आत्मेत्यादि * । ननु तर्हि ब्रह्मपदमेवास्मिन् सूत्रे कुतो नोक्तमत आहुः * वस्तुत इत्यादि * । ऐकात्म्यवादेन जीवस्य ब्रह्मत्वं बोधयितुमात्मपदम् । अत एव सूत्रपरिहारांशप्रयोगो नकारस्य न कृतः । * सम्बन्ध इति * सम्यग् बन्धो यस्याऽसौ स सम्बन्धः । तथाच जीवात्मनः सकाशात् परमात्मानमधिकं कृत्वा तद्धर्मबाहुल्यमस्मिन् प्रकरणे प्रतीयते । अतोऽत्र बहूनामनुग्रहस्य व्याख्यातत्वात् प्राणः परमात्मेत्यर्थः । ननु किमित्येवं निर्बन्ध इत्यत आहुः । * यावदित्यादि * तथाच पूर्वसूत्रे साधकहेतुमुक्त्वाऽत्र हिशब्दकथनात्, सर्वे वेदा यत् पदमामनन्तीति श्रुत्यनुरोधेन निर्बन्ध इत्यर्थः । तदुपपादयन्ति । * प्राणस्येत्यादि * । भूतमात्राः शब्दादयः । प्रज्ञामात्रा ज्ञानेन्द्रियांशाः । * तस्मादिति * । प्रज्ञात्मत्वाद्युपदेशात् ॥ २८ ॥

तर्हि बाधकस्य का गतिरित्यत आह ।

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ २९ ॥

पूर्वसूत्रेणापरिहृतमत्र परिहरति तुशब्दः । अयं दोषो व्यवहारदृष्ट्योपदेशे । अहं ब्रह्मेत्यार्षेण दर्शनेन तूपदेशः । ननु, तत्त्वमसि, अयमात्मा ब्रह्मेतिवाक्येषु जीवस्य ब्रह्मत्वं बोध्यते । तत्र प्रत्यधिकारं शास्त्रप्रवृत्तिरिति न्यायेन स्वात्मन एव ब्रह्मत्वावगतिर्मुख्या । न प्रतर्दनस्येन्द्रजीवब्रह्मत्वावगतिरुपासनं वा पुरुषार्थाय । अतः शास्त्रदृष्टिरपि नैवंविधा । केवलस्य चैतन्यमात्रस्य तादृशे ब्रह्मण्यैक्यावगतिविरोधात्तत्त्वमस्यादिवाक्यार्थोऽध्यवसीयते । ननु ब्रह्मधर्मा जीवे वक्तुं शक्यन्त इत्या-

---

* तर्हीत्यादि * । प्रकरणस्य ब्रह्मपरत्वाङ्गीकारे । यथा इन्द्रेण यः स्वात्मोपदेशः कृतस्तस्य बाधकस्य क उद्धरणप्रकार इत्यर्थः ।

शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥ व्याकुर्वन्ति * पूर्वेत्यादि * । * अयं दोष इति * । स्वात्मोपदेशरूपो दोषः । तथाचार्षज्ञानेन स्वात्मानं ब्रह्मात्मकमवगत्येन्द्रेणैवमुपदिष्टमतोऽत्रैवं प्रकारभेदे भासमानेऽपि ब्रह्मपरत्वोपदेशाज्ञानेनान्यथा सम्भावयितुं शक्यमित्यर्थः । कथमेवमवगम्यत इत्यपेक्षायां दृष्टान्तमवतारयन्ति । * नन्वित्यादि * । * प्रत्यधिकारमिति * अधिकारं लक्ष्यीकृत्य । * नैवंविधेति * । नेन्द्रजीवस्य ब्रह्मत्वबोधनपरा । तर्हि, न वाच्यं विजिज्ञासीत वक्तारं विद्यादित्यग्रे प्राणाज्जीवसामान्य एव शास्त्रदृष्टिरस्त्वित्याशङ्क्याह । * केवलस्येत्यादि * । सर्वज्ञत्वाज्ञत्वादीनां धर्माणां परस्परविरोधाद्भागत्यागलक्षणया निर्विशेषस्य चैतन्यमात्रस्य जीवस्य निर्विशेषे चैतन्यमात्रे ब्रह्मण्यैक्यावगतिस्तत्त्वमस्यादिवाक्यार्थ इति निर्धार्यते । न त्वानन्दाऽजराऽमरत्वादयो ब्रह्मधर्मा ऐक्यावगतिविरोधिनस्तत्र जीवे वक्तुं शक्यन्ते । अतोऽत्र वक्तृत्वादिविशिष्टस्योक्त्या केवलस्याविवक्षितत्वाद् ब्रह्मणोऽपि तादृश-

शङ्कां परिहरति । वामदेववत् । तद्धैतत् पश्यन्नृषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चेति । य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति । तत्र सर्वेषां सर्वभावे सर्वानन्दसमसङ्गात् सर्वमेकमेवेति वक्तव्यम् ।

ततः कारणलय एव सर्वभाव इति मनुरभवं सूर्यश्चेत्यवयुत्यानुवादोऽनुपपन्नः । तत्र यथा ज्ञानावेशात् सर्वधर्मस्फूर्तिरेवमत्रापि ब्रह्मावेशादुपदेश इति । त्वाष्ट्रवधादयो ब्रह्मधर्मा एव । तदावेशेन क्रियमाणत्वात् । 'नन्वेष वज्रस्तव शक्र ! तेजसा हरेर्दधीचेस्तपसा च तेजितः । तेनैव शत्रुं जहि विष्णुयन्त्रित' इति वृत्रवचनं भागवते । तस्माद्युक्तं ब्रह्मधर्मवचनम् । ननु, स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हीतिसूत्रे सुषुप्तौ ब्रह्मसम्पत्तौ च ब्रह्मधर्माविर्भावो, न त्वन्यदेति कथमेवमिति चेन्नैवम् ।

स्वेनाविर्भावितत्वाज्जीवसामान्ये शास्त्रदृष्टिरपि न वक्तुं शक्येति नायं समाधिरुपपन्न इत्यर्थः । परिहारं व्याकर्तुं दृष्टान्तं व्याकुर्वन्ति । * तद्धैतदित्यादि * । इदं बृहदारण्यके पुरुषविधब्राह्मणस्थं वाक्यम् । * तत्रेति * । अस्मिन् वाक्ये । * एकमेवेति * । ब्रह्मात्मकत्वेनैकमेव । * कारणलय इति * । कारणे ब्रह्मणि लये । * अवयुत्यानुवादोऽनुपपन्न इति । स्वसर्वस्वनिर्धारं पृथक्कृत्य मन्वाद्यनुवादः स्वस्य ब्रह्मणि लीनत्वादनुपपन्नः । न प्रेत्य संज्ञास्तीति श्रुत्यन्तरे ब्रह्मभूतानां भिन्नतया स्वानुसन्धानाभावबोधनात् । तर्हि कथमेवमुक्तं तत्राहुः । * तत्र यथेत्यादि * । * ब्रह्मावेशादिति * । शास्त्राभ्यासदार्ढ्यबाहुल्येन तदावेशात् । ननु यदि शास्त्रदृष्ट्योपदेशः स्यात् तदा जगल्लयादय उक्ताः स्युर्न तु त्वाष्ट्रवधादय इन्द्रकर्तृका इत्यत आहुः । * त्वाष्ट्रेत्यादि, * धर्मवचनमित्यन्तम् * । अत्रागामिसूत्रविरोधमाशङ्कते । * नन्वित्यादि * । परिहरन्ति । * नैवमित्यादि * । नान्यदेतीतिनियमरूपः सूत्रार्थो नाङ्गीकर्तव्यः । किन्तूभयत्र नियतोऽन्यत्र त्वनियत इ-

उपदेशभावनादिष्वपि कदाचिदुत्तमाधिकारिविषये ब्रह्मसाक्षात्कृत्य-मित्यङ्गीकर्तव्यम् । मय्येव सकलं जातमित्यादिवाक्यानुरोधात् ।

इहैव समवनीयन्ते प्राणाः । ब्रह्मैव सन् ब्रह्माप्येतीत्यपा-विर्भावापेक्षम् । तस्य प्रायिकत्वान्न सूत्रे फलत्वग्रहः । जीवन्मु-क्तानामपि परममुक्तेर्वक्तव्यत्वाच्च ।

स्त्वङ्गीकर्तव्यः । तत्र हेतुः * उपदेशेत्यादि * तथा चैवं विधवाक्यानि पश्यन् व्यासः कथमेवं नियमयेदतो नैवं सूत्रार्थः । आदिपदेन, एतत्साम गायन्नास्त इत्यादिश्रुतीनां, कस्याश्चित् पूतनायन्त्या इत्यादि-वाक्यानां च सङ्ग्रहः । तथा च वाक्यानां सूत्रोपजीव्यत्वेनोक्तसूत्रस्य सम्पत्तिपदे उपलक्षणविधया समाधिकारोऽपि सङ्ग्रहीतुं शक्यत इति न तद्विरोध इत्यर्थः । ननु तद्वैतदिति, मय्येवेति श्रौतं वाक्यद्वयं पू-र्णज्ञानिन इति तस्याहङ्काराद्यभावेन तथा कथनं युज्यते, न त्वावेशिनः । इन्द्रस्यावेशीति दृष्टान्तदार्ष्टान्तिकवैषम्यम् । नचेन्द्रस्यापि पूर्णज्ञानि-त्वे शास्त्रवचनम् । तथा सति वामदेववदिन्द्रस्यापि मुक्त्यापात् म-द्देवमुपदेशस्यापि फलत्वमुक्तं स्यादित्यत आहुः । * इहैवेत्यादि * । अस्तु तस्य पूर्णज्ञानिवाक्यपरत्वं तेषां मुक्तत्वं च । तथापि ज्ञानमुक्त्यो-राविर्भावापेक्षत्वं तु निर्विवादम् । इहैवेति श्रुतौ ब्रह्मैव सन्निति ब्रह्म-भावे मोक्षकथनाद्, ब्रह्म वेद ब्रह्मैव भवतीति श्रुत्यन्तरे ज्ञानेन ब्रह्म-भावश्रावणाच्च । ब्रह्मभावश्च स्वस्मिन् ब्रह्मधर्माविर्भावपूर्वकब्रह्म-स्फूर्तिरूप एव । न तु तद्रूपापत्तिरूपो, न वा तादात्म्यरूपः । तस्य सार्वदिकत्वेन सर्वोपस्यासाधारणतया ज्ञानित्वाद्यप्रयोजकत्वात् । नापि निष्प्रपञ्चब्रह्मस्फूर्तिरूपः । सर्वभावस्फूर्त्यादिविरुद्धत्वात् । अतः प्रकृते उपदेशरूपकार्यदर्शनेन तत्कारणरूपे ज्ञाने ब्रह्मधर्माविर्भाव-पूर्वकब्रह्मभावे चेन्द्रस्य सिद्धे तथा वाक्यकथनस्य युक्तत्वान्न दृष्टा-न्तदार्ष्टान्तिकवैषम्यम् । एतावान् परं विशेषो, यन्मुक्तस्योक्तविधब्र-ह्मभावः सार्वदिकः, आवेशिनस्तु कादाचित्कः । अतस्तस्य प्रायिकत्वा-द् वामदेवादिसंवादवन्न सूत्रे तस्य फलत्वमाह । किञ्च । सर्वभाव-

असम्प्रज्ञातसमाधाविवाविर्भावदशायामेव शरीरवियोगे वियोजकाभावाद् वागादिमात्रं लीयते । तस्य च प्राप्तत्वादेव नार्चिरादिगतिः ।

स्यापि साधनत्वेनावान्तरफलत्वमेव, न चरमफलत्वम् । परममुक्तिश्च जीवन्मुक्तानामप्यग्रे वक्तव्या, सुतरामावेशिन इत्यतोऽपि नाहातो न तदुक्तिरपि इत्यर्थः । ननूक्तस्थले ब्रह्माविर्भावाङ्गीकारो न युक्तः । तस्मिन् सति वागादिविलयस्येहैवेति श्रुतौ कथनाद् वक्तुस्तदापत्त्युपदेशनासम्भवापत्तेः । तस्य मुक्तिपूर्वावस्थारूपत्वेनार्चिरादिगतिकथनापत्तेश्चेत्यत आहुः । * असम्प्रज्ञातेत्यादि * सत्यमस्ति तत्र तथात्वं, पुराणे दधीच्यादिषु प्रसिद्धं च । तथाप्युक्तश्रुतौ, अथाकामयमान इति प्रतिज्ञाय लयकथनात् कामाभावे सत्येव प्राणानां लयो, न तु तदभावे । प्रकृते तु दधीचिवदसम्प्रज्ञातसमाधेरभावादधिकारित्वेन तदानीमिन्द्रियवियोजकस्य कामाभावस्य चाभावान्न वागादिलय इति नोपदेशानुपपत्तिः । ब्रह्मभावस्य प्राप्तत्वान्नार्चिरादिगत्युक्तिरित्यर्थः ।

यद्वा । ननूपदेशभावनादिषु ब्रह्माविर्भावो न युक्तः । यदि तत्र स स्यात्तदोपदेष्टुः सद्यो मुक्तिः स्यात् । इहैव समवनीयन्ते प्राणा इत्यादिश्रुतौ तथैव सिद्धः । तथा सति तस्याविर्भावस्य फलत्वमपि व्यासैरुच्येतेत्यत आहुः । * इहैवेत्यादि * । सत्यं सद्योमुक्तिराविर्भावापेक्षा । परन्तु यत्रैव सन्निलिखितश्रुतावधारणकथनाद् यत्र सर्वथा ब्रह्मभावस्तत्रैव सद्यो मुक्तिः । उपदेशभावनादौ तु न तथा । बहिःस्फूर्तेरपि सत्त्वेन केषु चिदेव तद्भवनेन तस्याविर्भावस्य प्रायिकत्वाद्भगवान् व्यासस्तस्य फलत्वं नाह । न तु तावता सर्वत्र नाविर्भाव इति वक्तुं शक्यमित्यर्थः । यदि तादृशाविर्भावस्य न फलत्वं, तदा तस्य वैयर्थ्यमेव स्यादित्यत आहुः । * जीवन्नित्यादि * । पारम्पर्याभावात् फलत्वानुक्तावपि नाफलमित्यदोष इत्यर्थः । ननु यदि तादृशाविर्भावस्य जीवन्मुक्तिसम्पादकत्वं, तदा तस्यार्चिरादिगतिरुच्येत । सा च नोच्यतेऽतो नैवमित्यत आहुः * । असम्प्रज्ञातेत्यादि * । शरीरवियोग इति * । अर्चिरादिगतिरिति शेषः । * वियोजकाभा-

तथापि प्रायिकत्वान्न सूत्रगीतादिषु तद्वचनम् । सगुणनिर्गुणभेदेन नियमवचनं त्वप्रामाणिकमेव । ब्रह्मवादे गुणानङ्गीकाराच्च । तस्माद्युक्तमुक्तं, शास्त्रदृष्ट्या तूपदेश इति ॥ २९ ॥

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३० ॥

अन्यद् बाधकद्वयमाशङ्कते । ननु यद्यपि ब्रह्मधर्मा भूयांसः प्रकरणे श्रूयन्ते । तद्वज्जीवधर्मा मुख्यप्राणधर्माश्च बाधकाः सन्ति । न वाचं विजिज्ञासीत वक्तारं विद्यादित्यादि । अत्र हि वागादिकरणाध्यक्षस्य जीवस्य विज्ञेयत्वमभिधीयते । अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति शरीरधारणं मुख्यप्राणधर्मः । मा मोहमापद्यथ, अहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति श्रवणात् ।

वादिति * । तादृशादृष्टाभावात् । भावनादौ यागादिमात्रं लीयते । तस्य ब्रह्मणश्च प्राप्तत्वात् तत्प्राप्त्यर्थोऽर्चिरादिगतिरत्र नोक्ताऽतो नोक्तदोष इत्यर्थः । ननु मुख्याधिकारस्यैवंविधत्वे सूत्रादिषु कुतस्तदनुक्तिरित्यत आहुः । * तथापीत्यादि * । प्रायिकत्वं सम्भावितत्वमनियतत्वमिति यावत् । तथाचातोऽनुक्तिरित्यर्थः । ननु सगुणोपासकस्यार्चिरादिगतिर्निर्गुणपरस्य तु, तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्य इति श्रुत्या केचिदेकदेशिनः सगुणनिर्गुणोपासनाभेदेनाधिकारिभेदमङ्गीकुर्वन्ति । तत् कुतो नाद्रियत इत्यत आहुः । * सगुणेत्यादि * । ब्रह्मवादे ब्रह्मणः सगुणनिर्गुणभावाभावेनाधिकारिभेदाभावात् तथागत्यादिनियमकथनमप्रामाणिकमेव । सांख्यप्रतिपन्नानां गुणानां व्यासेनानङ्गीकारादपि तथेत्यसङ्गतत्वान्नाद्रियत इत्यर्थः । सिद्धमाहुः । * तस्मादित्यादि * । * तस्मादिति * । अभ्यासबाहुल्येन ब्रह्मावेशात् ॥ २९ ॥

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ व्याचक्षते । * अन्यदित्यादि * । * एतद्बाणमिति * । एतच्छरी-

यो वै प्राणः सा प्रज्ञा या प्रज्ञा स प्राण इति जीवमुख्यप्राणवाच्यत्वे प्रज्ञाप्राणयोः सहवृत्तित्वादुपचारो युज्यते । उत्क्रान्तिश्च । ननु सर्वथा विलक्षणस्य ब्रह्मणः । तस्माज्जीवमुख्यप्राणलिङ्गयोर्विद्यमानत्वान्न ब्रह्मप्रकरणमिति चेन्न । उपासात्रैविध्याद । अयमर्थः । किमत्र चोद्यते । जीवमुख्यप्राणलिङ्गाद् ब्रह्मपर्याणां जीवपरत्वं, त्रयाणामपि स्वतन्त्रत्वं वा, लिङ्गद्वयस्यापि ब्रह्मधर्मत्वमुच्यतामिति वा । आद्यः पूर्वमेव परिहृतः । न हि ब्रह्मधर्मा अन्यपरत्वेन परिणेतुं शक्या इति । द्वितीये दूषणमाह । उपासात्रैविध्यात् । तथा सत्युपासनं त्रिविधं स्यात् । तद्वाक्यभेदप्रसङ्गान्न युक्तम् ।

रम् । तथाच वागादिकरणाध्यक्षत्वस्य जीवलिङ्गस्य शरीरधारणस्य मुख्यप्राणलिङ्गस्य च ब्रह्मवाक्यत्वबाधकस्य विद्यमानत्वान्नेदं ब्रह्मवाक्यमित्यर्थः । ननु यथैते लिङ्गे ब्रह्मवाक्यत्वबाधके तथा अमृतत्वादिकं ब्रह्मलिङ्गमेतद्बाधकमिति नात्र कस्यापि निर्णय इत्यत स्वपक्षे गुणमाह । *यो वा इत्यादि* । *इति जीवमुख्यप्राणवाच्यत्व इति *अस्मिन् प्रकरणेऽङ्गीकार्यत्वे । * उत्क्रान्तिरिति * । सहैवैतैः सर्वैरुत्क्रामतीत्यनेनोक्तोत्क्रान्तिः । * सर्वथा विलक्षणस्येति* । उत्क्रान्तिविरोधिन्या व्यापकतया जीवात्, तथा चेतनतया च मुख्यप्राणाद् विरुद्धधर्मवतः । * तस्मादिति * । उक्तरूपस्य महाबाधकस्य सत्त्वात् । तथाचैतेन बाधकेन ब्रह्मलिङ्गानामुपासनार्थत्वस्य शक्यवचनत्वान्नेदं ब्रह्मप्रकरणमिति पूर्वपक्षाशय इत्यर्थः । समाधानांशं व्याकुर्वन्ति । *अयमर्थ इत्यादि* । *उच्यतामिति * । उपपाद्यताम् । * पूर्वमेव परिहृत इति * । न वक्तुरिति सूत्रे ब्रह्मधर्मबाहुल्यप्रतिपादनेन बहूनामनुग्रहस्य न्याय्यत्वालम्बानात् परिहृतः । परिहारस्याकारमाहुः । * न हीत्यादि * । अन्यपरत्वं बहुषु लक्षणाया आपत्त्या ज्ञेयम् । * द्वितीय इति * लक्षणादोषराहित्यात् त्रयाणां स्वातन्त्र्येण प्रतिपाद्यत्वाङ्गीकार इत्यर्थः । *वाक्यभेदप्रसङ्गादिति* । विजानीहीत्यस्यावर्तनेन, मामितिपदस्यार्थत्रयकल्पनेनैवका-

तृतीये तूपपत्तिरुच्यते। जीवधर्मा ब्रह्मणि न विरुद्ध्यन्ते। आश्रितत्वात्। जीवस्यापि ब्रह्माधारत्वात् तद्धर्मा अपि भगवदाश्रिता एव। इहेत्युभयत्र सम्बन्धो ब्रह्मवादे। मुख्यप्राणे तु तद्योगात्। तेन योगस्तद्योगस्तस्मात्। प्राणधर्मा भगवति न विरुद्ध्यन्ते। प्राणस्य भगवत्सम्बन्धात् तद्धर्माणामपि भगवत्सम्बन्धात्। अथवा वक्तृत्वादयो न जीवधर्माः किन्तु ब्रह्मधर्मा एव। जीवे आश्रितत्वाद्भासन्ते। परात्तु तच्छ्रुतेरिति न्यायात्। प्राणेऽपि तथा। स्वाप्ययसम्पत्त्योर्जीवस्य ब्रह्माश्रितत्वम्। आध्यात्मिकाधिदैविकरूपत्वात् संयोगः। प्राणस्य तु संयोग एव।

दार्थविरोधेन च वाक्यभेदप्रसङ्गात्। * तृतीय इति। * ब्रह्म धर्मेत्वोपपादनचोदनापक्षे। * ब्रह्माधारत्वादिति *। आत्मावयवभूतैरनुव्याप्तं सर्वमिदं जगदिति श्रुत्या जीवस्यावयवत्वबोधनेन तस्य ब्रह्माधारत्वात्। न च वैपरीत्यं शङ्क्यम्। संयोगात्तूपपत्तिरितिपक्षे तथात्वे, विभागात्तूपपत्तिरिति पक्षे तदभावादिति। * इहेत्युभयत्र सम्बन्ध इति *। इहाऽऽश्रितत्वादिह तद्योगादित्येवं सम्बन्धः। ब्रह्मवादपदं मायावादिमते जीवब्रह्मणोरभेदादाधाराधेयभावानङ्गीकारेण तस्य विरुद्धत्वबोधनार्थम्। * भगवत्सम्बन्धादिति *। भगवतो नियामकतया तत्प्रियस्वरूपात् सम्बन्धात्।, तथाच, ' न प्राणेन, नापानेन मर्त्यो जीवति कश्चन। इतरेण तु जीवन्ति, यस्मिन्नेतावुपाश्रिताविति' तत्सामर्थ्यस्य भगवदधीनत्वात् तद्धर्माणामपि परम्परया भगवद्धर्मत्वमित्यर्थः। अस्मिन् पक्षे जीवप्राणधर्माणां न साक्षाद् भगवद्धर्मत्वमिति लक्षणयाऽऽपद्येतेत्यरुच्या पक्षान्तरमाहुः। * अथवेत्यादि *। * ब्रह्मधर्मा इति * साक्षाद्ब्रह्मधर्माः। ननु यद्येवं प्राणे स्यात् तदाऽऽश्रितत्वमेव हेतुत्वेनोक्तं स्यान्न तु तद्योगोऽपीत्यत उपपादयन्ति * स्वाप्ययेत्यादि * तथाच स्वाप्ययादौ जीवस्य ब्रह्माश्रितत्वम्। अवस्थाभेदकृतात् तादात्म्याच्च संयोगः। उभयप्रवेशपक्षे तु स्वाप्यये सम्परिष्वक्तः संयोगः कादाचित्कः। प्राणे तु संयोग

तस्मात् सर्वे धर्मा ब्रह्मणि युज्यते ।

सहोत्क्रमस्तु क्रियाज्ञानशक्त्योर्भगवदीययोर्देहे सहैव स्थानं सहोत्क्रमणमिति भगवदधीनत्वं सर्वस्यापि बोध्यते । ननु, प्राणस्तथानुगमादिति प्राणशब्देन ब्रह्मैव प्रतिपादितं, तत्कथं धर्मयोरुत्क्रमणमिति चेत् । अत्र धर्मधर्मिणोरेकत्वपृथक्त्वनिर्देशयोर्विद्यमानत्वात् । प्राणो वा अहमस्मिन् प्रज्ञात्मेति । अत्र क्रियाज्ञानशक्तिमान् निर्दिष्टः । तदन्वेकैकस्य धर्मप्रशंसा, यो वै प्राणः सा प्रज्ञा, या प्रज्ञा स प्राण इत्युपसंहारान्तम् । पुनस्तयोरेवोत्क्रमणप्रवेशाभ्यां सह ह्येतावस्मिन् शरीरे वसतः सहोत्क्रामत इत्युपक्रम्य सुषुप्तिमूर्छामरणेषु प्राणाधीनत्वं सर्वेषामिन्द्रियाणामुक्त्वा आसन्यव्यावृत्त्यर्थं प्रज्ञयैक्यं प्रतिपाद्योपसंहरति । पुनर्ज्ञानशक्तेरुत्कर्षं वक्तुम, अथ खलु यथा प्रज्ञायामित्यारभ्य, न हि प्रज्ञापेतोऽर्थः कश्चन सिद्ध्येतेत्यन्तेन ज्ञानशक्त्युत्कर्षं प्र-

---

एव सार्वदिक इति हेतुद्वयकथनं युक्तमित्यर्थः । सिद्धमाहुः । * तस्मादित्यादि * । * तस्मादिति * अनया रीत्या ब्रह्मणः प्रयोजकत्वेन लक्षणादोषासंसर्गात् । नन्वस्त्वेवमन्येषां भगवद्धर्मत्वं, तथापि सहोत्क्रमस्यैकत्वव्यापकत्वविरुद्धतया तस्य तु तथात्वं न युज्यत इति तस्य का गतिरित्यत आहुः । सहोत्क्रमस्त्विवति । तथाच व्यापकत्वादसम्भवेऽपि शक्तिशक्तिमतोरभेदाद्धस्तोत्क्षेपणवत् सोऽपि भगवद्धर्म एवेत्यर्थः । एवं बोधनस्य फलमाहुः । * देह इत्यादि * अत्र पूर्वविरोधमाशङ्कते * नन्वित्यादि * । * तन् कथमिति * पूर्वोक्तविरोधेन धर्मधर्मिभावस्य वक्तुमशक्यत्वात् कथम् । एतत्समाधानाय हेतुं गृह्णन्ति * अत्र धर्मेत्यादि * तथाच यदि पृथक्त्वनिर्देशो न स्यादुत्क्रमणं विरुद्ध्येत । अत्र तूभयोः सत्त्वान्न पूर्वापरविरोध इत्यर्थः । उक्तं व्याख्यातुमुपपादयन्ति * प्राण इत्यादि * अत्र विषयवाक्ये पाठभेदो देशभेदाद् बोध्यः । यथा बृहन्नारायणोपनिषदि

तिपाद्य धर्ममात्रत्वनिराकरणाय ज्ञानशक्तिमन्तं भगवन्तं निर्दिशति, न हि प्रज्ञातव्यमित्यारभ्य, मन्तारं विद्यादित्यन्तेन । तदनु ज्ञानक्रियाशक्त्योर्विषयभूतभूतमात्रारूपजगतो भगवदभेदं प्रतिपादयन्, स एष प्रज्ञात्माऽऽनन्दोऽजरोऽमृत इत्युपसंहरति ब्रह्मधर्मैः । अतः क्रियाज्ञानविषयरूपो भगवानेवेति प्रतिपाद्य, न तावन्मात्रं, ततोऽप्यधिक इत्येकोपासनैव विहिता । तस्माज्जडजीवरूपत्वात् सर्वात्मकं ब्रह्मैवेति महावाक्यार्थः सिद्धः ॥३०॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राऽणुभाष्ये प्रथमस्याध्यायस्य प्रथमः पादः ॥ १ ॥ १ ॥

तैलङ्गद्राविडपाठभेदात् । यथा चैतद्बाणमवष्टभ्येति प्रश्नोपनिषद्वाक्ये रिथमं शारीरं परिगृह्येति पठन्तीति पाठान्तरं शङ्कराचार्यैरुपन्यस्तम् । तथाऽत्रैवोदूहमित्यत्रादुदुहादिति पठितम् । तद्वत्, शङ्करानन्दकृतटीकायामप्ययमेव पाठ इति । अत्र क्रियाशक्त्यनुग्राहकः प्राण इति, ज्ञानशक्त्यनुग्राहकश्च चेतन इति तदुभयवाचकयोः प्राणप्रज्ञात्मशब्दयोरिह सामानाधिकरण्यात् तदुभयवानेको निर्दिष्टः । ततस्तं मामायुरमृतमित्युपास्स्वेत्यनेन तस्योपासनं विधाय तस्य फलं चोक्त्वा, तदनु, तद्धैक आहुरित्यारभ्यास्तित्वे च प्राणानां निःश्रेयसमित्यन्तेन क्रियाशक्तिप्रशंसा । जीवति वागपेत इत्यारभ्य प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीत्यन्तेन ज्ञानशक्तिप्रशंसा । ततस्तयोरथोपासनां विधाय प्राणे सर्वाप्तिमुक्त्वा यो वै प्राणः सा प्रज्ञा, या वा प्रज्ञा स प्राण इत्युपसंहृतेत्येतदन्ता उभयप्रशंसा । तदग्रिमसन्दर्भे तूत्क्रमणप्रवेशाभ्यां पुनस्तयोरेव प्रशंसा । सा च तस्मिन् पाठे, सह ह्येवास्मिन्नित्युपक्रम्य सुषुप्त्यादिषु सर्वेन्द्रियाणां प्राणाधीनत्वमुक्त्वा ततः प्राणस्य प्रज्ञयैक्यं प्रतिपाद्योपसंहृता । प्रसिद्धपाठे तु, तस्यैवैष इति एतद्विज्ञानमित्युपक्रमः । सह ह्येवास्मिन्नित्युपसंहारः । वाक्यार्थस्तूभयत्राप्येक एव । तस्य प्रयोजनं तु क्रियाशक्त्यपेक्षया ज्ञानशक्तेरुत्कर्षप्रतिपादनमतस्तमुत्कर्षं वक्तुमेतावान् सन्दर्भः । ततो-

ऽथ खलु प्रज्ञायामित्यादिनोत्कर्षप्रतिपादनम् । तत्रापि पाठभेदः । प्रसिद्धपाठे, अथ यथास्यै प्रज्ञायै, इत्युपक्रमान्न हि प्रज्ञापेताधीः काचन सिद्ध्येदित्युपसंहारात् । अर्थस्त्वेक एव । तदग्रे तु पाठोऽपि समानः । तदर्थस्तु, * धर्ममात्रत्वनिराकरणायेत्यादिना प्रतिपाद्यते । तत्र ज्ञानशक्तिमन्निर्देशो जीवसाधारण इति जीवं वारयितुं, ता वा एता दशैव भूतमात्रा इत्यारभ्य, न ह्यन्यतरतो रूपं किञ्चन सिद्ध्येदित्यन्तेन क्रियाज्ञानशक्त्योः परस्परसापेक्षतया स्वविषयभूतरूपात्मकजगत्साधकत्वं प्रतिपाद्य, ततो नो एतन्नानेति तासां प्रज्ञायाः सकाशादभेदं प्रतिज्ञायोपपादयति । तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष इति । तथाच, यद् यज्जनकं तत् तद्धर्मकं, यद् यद्धर्मकं तत् तदविनाभूतमिति व्याप्त्या भूतमात्राप्रज्ञामात्रात्मकस्य सर्वस्य जगतः प्रज्ञाऽविनाभावेन तदात्मकत्वे सिद्धे तस्या अपि स्वरूपं निर्णेतुम्, आनन्दोऽजरोऽमृत इति ब्रह्मधर्मैरुपसंहरति । अतोऽत्र प्रज्ञात्मकजीवस्वरूपादधिकस्य ब्रह्मणः सर्वात्मकत्वसर्वाधिकत्वज्ञानाधर्मकैवोपासना विहिता । तस्मात् साध्वसाधुकारकतया प्राप्तस्य वैषम्यादिदोषस्यापि परिहाराद् ब्रह्म जडजीवात्मकतया सर्वोपादानत्वेन सर्वात्मकमित्येव महावाक्यार्थः सिद्ध इत्यर्थः । तेनेदमधिकरणं पूर्वोक्तस्य सर्वस्य निगमनार्थमिति बोधितम् । तथाहि । पूर्वं शास्त्रारम्भे जिज्ञासोक्ता । सा सर्वदा कर्तव्या । अन्यथा, अहम्मुखत्वादिवद्विनाशः स्यादिति विषयवाक्यारम्भे बोधितम् । ततो जन्मादिसूत्रसिद्धं सर्वकर्तृत्वं, समन्वयसूत्रसिद्धं सर्वोपादानत्वं चोपपादितम् । तत उपसंहारे, ईक्षत्यानन्दमयाधिकरणसिद्धोऽर्थः प्रज्ञात्मानन्दपदाभ्यां सङ्गृह्य बोधितः । ब्रह्मधर्मोपदेशेन, लोकपालत्वादिबोधनेन, प्राणशब्दोक्त्या, स म आत्मेत्युपसंहारेण च यथायथं तद्धर्मोपदेशाद्यधिकरणार्थः सङ्गृहीतः । तेन तथेति ।

अत्रोपासात्रैविध्यादितिपदं शङ्करभास्कराचार्यभिक्षुभिः स्वस्वमतेनैवमेवापत्तिमादाय व्याख्यातम् ।

रामानुजाचार्यैस्तु प्राचीनवृत्तिकारानुसारेणोपासात्रैविध्यपदमेकवाक्यत्वे हेतुत्वेन व्याख्यातम् । न ह्यत्र जीवमुख्यप्राणब्रह्मणां त्रयाणामुपासनमुच्यते, येन वाक्यं भिद्यते । किन्तु भोक्तुर्जीवस्य

धर्मभोग्यस्य मुख्यप्राणस्य धर्मैः स्वधर्मैश्चेत्येवं त्रैविध्यादेकोपासनै-व विधीयत इति, सम्भवत्येकवाक्यत्वे वाक्यभेदश्च नेष्यते इत्यभि-युक्तोक्तेः पूर्वपक्षो न युक्त इति । तेषां चौरः शैवोऽप्येवमाह ।

तच्च वाचस्पतिमिश्रैरेवं दूषितम् । एतदालोचनीयम् । कथं न वाक्यभेद इति । युक्तं सोमेन यजेतेत्यादौ सोमादिगुणविशिष्टया-गविधानम् । तत्तद्गुणविशिष्टस्यापूर्वस्य कर्मणोऽप्राप्तस्य विधिवि-षयत्वात् । इह तु सिद्धरूपं ब्रह्म न विधिविषयो भवितुमर्हति । अभावार्थत्वात् । भावार्थस्य विधिविषयत्वनियमात् । वाक्या-न्तरेभ्यश्च ब्रह्मावगतेः प्राप्तत्वात्तदनूद्याप्राप्तोपासाभावार्थो विधेयस्त-स्य भेदाद्विध्यावृत्तिलक्षणो वाक्यभेदोऽतिस्फुट इति भाष्यकृता नो-द्घाटित इति ।

अत्रेदं बोध्यम् । तथाहि । अत्र हि मामेव विजानीहीत्यारभ्य, नीत्कं वेतीत्यन्ता ऐन्द्रगुणविशिष्टैकोपासना । तदनु, सहोवाच प्रा-णोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वेत्यारभ्यैवं हि सर्वाम इत्यन्ता द्वितीया प्राणगुणविशिष्टस्य । तदन्वथ खलु प्राण एव प्रज्ञा-त्मेदं शरीरं परिगृह्योत्थापयति तस्मादेतदेवोक्थमुपासीतेत्यारभ्य सिद्धेदित्यन्ता प्रज्ञागुणविशिष्टस्य । तत्र पृथगुपासनाङ्गीकारे, मामे-व विजानीहि स म आत्मेति विद्यादित्युपक्रमोपसंहारगतस्य वक्त्रा-त्मोपदेशस्य विरोध इति तदभावायैकवाक्यत्वस्यात्रश्यत्वादुपासना-त्रयपक्षस्त्वसङ्गतः । अथोपक्रमाद्यनुरोधेनावान्तरोपासनावाक्यानां त-दनुवादेन प्रकारविधायकत्वमङ्गीकृत्यैन्द्रवाक्यत्वं चेदङ्गीक्रियते, तदा तत्रोक्तानां प्राणधर्माणां ब्रह्मधर्माणां च फादपनिकत्वापत्तिः पूर्वोक्तरीत्या प्रतर्दनस्य पुरुषार्थासिद्धिश्चेति तदुभयं विहायात्र ब्रह्म-वाक्यत्वं सिद्धान्तितम् । तथा सति त्रितयपक्षस्य प्रागेव निरस्तत्वा-द् विध्यावृत्त्यङ्गीकारे विधोल्लेखवैयर्थ्यप्रसङ्गाच्च प्रकारत्रयविशिष्टै-कोपासाविधिरेव सिद्ध्यतीति वाक्यभेदस्फुटत्वं कथमित्येवालोचनी-यं, न तु तदभावसमर्थनमालोचनीयम् । किञ्च । भाष्यकृतापि ब्रह्मण एवैतदुपाधिद्वयधर्मेण स्वधर्मेण चैकमुपासनं त्रिविधं विवक्षितमिति तन्मतासद्भुक्तमतो व्याख्येयविरोधोऽपीति ।

नन्वियमस्य प्राचीनपक्षस्य निर्दुष्टत्वे सिद्धान्तिना कुतोऽयं नादृत, आरत्या च कुतो व्याख्यातमिति चेन्न । त्रैविध्यादित्यस्या

दयब्लोपपञ्चमीत्वेनापत्तेराधिकतयाऽध्याहार्यत्वाभावेन व्याख्याने दोषाभावात् । सिद्धान्ते तेषां धर्माणां जीवीयत्वादिना भानस्यैव भ्रान्तित्वबोधनेन ब्रह्मधर्मत्वस्यैव निर्णीततया प्राचीनप्रतिपन्नवैविध्यस्याप्यभावादिति बुध्यस्व ।

माध्वास्तु, ऐतरेयोक्तं विश्वामित्रेन्द्रसंवादं विषयवाक्यत्वेनोदाहरन्ति ।

इति श्रीवल्लभाचार्यचरणनखचन्द्रकिरणनिवारितहृदयध्वान्तेन पुरुषोत्तमेन कृते भाष्यप्रकाशे प्रथमाध्यायस्य प्रथमः पादः ॥ १ ॥ १ ॥

अथ प्रथमाध्यायस्य द्वितीयः पादः ।

सर्वत्र प्रसिद्धोपदेशात् ॥ १ ॥

समन्वये प्रथमेऽध्याये सर्वेषां वेदान्तानां ब्रह्मणि समन्वयो वक्तव्यः । तत्रोद्गीथाद्युपासनावाक्यानां मुख्यवाक्येषु फलोपकार्यङ्गत्वम् । ब्रह्मवाक्यानां पुनर्निःसन्दिग्धानां समन्वयः स्वतः सिद्धः सन्दिग्धानि द्विविधानि शब्दतोऽर्थतश्च ।

सर्वत्र प्रसिद्धोपदेशात् ॥ अथ द्वितीयपादं व्याचिख्यासवः पादानामेककार्यस्वरूपां परस्परसङ्गतिं क्रमनियामिकामवसरस्वरूपां च सङ्गतिं प्रतिपादयितुं व्याख्येयाध्यायार्थकथनपूर्वकं पूर्वपादसिद्धः स एवार्थः सङ्क्षेपेण वक्तव्योऽन्यथा मन्दमतीनां पूर्वोक्तानवधारणेन वक्ष्यमाणार्थे सन्देहः स्यादित्यतस्तमाहुः । * समन्वये, इत्याद्य,* सन्देहं निवारित इत्यन्तेन * । समन्वये * सर्ववेदान्तसमन्वयप्रतिपाद्यकत्वेन समन्वयाख्यया प्रसिद्धे प्रथमेऽध्याये उक्तविधः समन्वय एकार्थप्रतिपादकत्वरूपो वक्तव्यः । परमप्राप्तिरूपफलसाधनाय तत्साधनीभूतब्रह्मज्ञानोपकाराय यावदयं वाच्यः । नचानन्तेष्वनन्तशाखासु वेदपूर्वनिबद्धागरूपाणां वेदान्तानामप्यनन्तत्वात्तुक्तरीतिकसमन्वयोक्तेरशक्यत्वमसंगतत्वं वा शङ्क्यम् । प्रकारविशेषेण सर्वोपपत्तेरित्याशयेनाहुः । *तत्रेत्यादि* । वक्तव्ये सर्वसमन्वये, अन्तस्तद्धर्माधिकरणादिविषयवाक्यभूतानामुद्गीथाद्युपासनावाक्यानां मुख्यवाक्येषु फलसम्बन्धबोधकेषु सर्वविधकारणतादिप्रतिपादकवाक्येषु फलोपकार्यङ्गत्वम् । तत्तदुपासनया तेन तेन रूपेण तत्तत्फलप्राप्तौ माहात्म्यज्ञानस्यात्मरतिस्फूर्त्या निरुपधिप्रेम्णश्च सिद्ध्या तस्य सत्त्वस्य भक्तिरूपत्वसिद्धौ विवक्षितपरप्राप्तिरूपं फलं भवतीति तेषां तदङ्गत्वम् । तथा चानया रीत्याऽन्येषामनुक्तानामप्युपासनावाक्यानां प्रयोजनैक्यात् समन्वयः सिद्ध्यतीति न पूर्वोक्तो दोष इत्यर्थः । एवमन्येष्वपि बोध्य इत्याशयेनाहुः । * ब्रह्मवाक्यानामित्यादि * । पूर्वं प्रतिपाद्यविषयभेदेन सन्दिग्धानि चतुर्विधान्युक्तान्यत्र तु नेत्थेव शब्दार्थभेदेन सन्दिग्धत्वमाहुः । * सन्दिग्धानीत्यादि * तथाचैवं

तदर्थं चैतद्विचारितम् । ब्रह्मणि व्यवहारोऽस्ति कश्चने-वेति। प्रथमसूत्र एव व्यवहारः स्थापितः । यतो वाचो निवर्तन्त इत्यादीनां विशेषेणेदमित्थतया निरूपणनिषेधनपरत्वम् । एवमेव कार्यसिद्धेः । अधीतानां ब्रह्मवाक्यानां चतुर्लक्षण्या ब्रह्मपरत्वे सिद्धे श्रवणं सिद्ध्यति। श्रुतस्य कालान्तरेऽप्यसम्भावनाविपरीतभावनानिवृत्त्यर्थं पूर्वंस्थितानामङ्गानामनपेक्षितानामुद्वापेनान्येषामपेक्षितानामावापेन तस्यैवार्थस्य निर्द्धारणे मननं भवति ।

वाक्यविचारेणानुक्तानामपि समन्वयसिद्धिरित्यर्थः । एवमध्यायार्थस्य सर्वोपयोगित्वमुक्त्वा पादार्थस्य वक्तुं तत्रत्याधिकरणानां प्रयोजनमर्थं च वदन्तः पूर्वं प्रथमस्याहुः । * तदर्थमित्यादि *, * स्थापितमित्यन्तेन * । * तदर्थमिति* समन्वयार्थम् । *विचारितमिति * ईक्षत्यधिकरणे विचारितम् । ईक्षत्यधिकरणं चतुर्थं, तत्र विचारितस्य कथं प्रथमार्थत्वमित्यत आहुः । * तत्र प्रथमेत्यादि * । * स्थापित इति * प्रमाणलक्षणप्रभृतिभिः स्वरूपादिचिन्तनस्यैव विचारपदार्थत्वात् तत्प्रतिज्ञयैव स्थापितः । तथाच विचारस्य चतुर्थे सत्त्वेऽपि स्थापनस्य प्रथमे कृतत्वात् प्रथमार्थत्वमित्यर्थः । ननु सत्यं स्थापितस्तथापि श्रुत्यन्तरविरोधान्नादरणीय इति शङ्कायां तत्परिहारप्रकारमाहुः । * यतो वाच इत्यादि * अस्याः श्रुतेरेवन्तात्पर्यकत्वे गमकमाहुः । *एवमेव कार्यसिद्धेरिति * कार्यं श्रवणादिकं, तत्सिद्धेरित्यर्थः । नन्वेवं वाङ्निवृत्तिश्रुतिसङ्कोचने किं मानमित्याकाङ्क्षायामेतदेव विभजन्ते *अधीतानामित्यादि *। आत्मा वारे द्रष्टव्य इत्यादिश्रुतावात्मदर्शनसाधनत्वेन श्रवणादित्रयमुक्तम्। तत्रात्मा परब्रह्म वेति तस्य वागाद्यविषयत्वे प्रमाणलक्षणादिससर्गाभावेन श्रौतानां पदवाक्यादीनां ब्रह्मावाचकतया तद्वाचकपदादिशक्तितात्पर्यावधारणरूपस्य श्रवणस्यासम्भवात् । तदभावे च, तदुपजीवकस्य, तत्त्वेनार्थं विदुषोऽमन्वानस्येत्यनेनापदपकतया आक्षिप्तस्य मननस्य तदुपजीवकस्य निदिध्यासनस्य चासम्भवाज्ज्ञानस्यापि सिद्धिर्मोक्षसिद्ध्यभावो मोक्षसाधनबोधकश्रुतिवैयर्थ्यपरिहारायानिरुक्तश्रुतिविरोधप-

ततोऽप्येवं ध्यानादिसमाध्यन्तरूपनिदिध्यासनरूपं मनसि सर्वतो निवृत्तव्यापारे स्वयमुपलभ्यनिजसुखानुभवरूपं ब्रह्म । इदमेव ब्रह्मज्ञानमिति । अतस्तादृशस्यानुभवैकवेद्यत्वाद्युक्तमविषयत्वम् । पाकभोजनतृप्तिवत् ।

अतः श्रवणाङ्गमीमांसायां माहात्म्यज्ञानफलायां भगवद्वाक्यानामन्यपरत्वेऽन्यवाक्यानां च भगवत्परत्वे दिव्यधर्मादिव्यधर्मव्यत्यासेन वैपरीत्यं फलमापद्येत । तदर्थं दिव्यधर्मनिर्द्धारे

रिहाराय च ब्रह्मणः श्रुत्यात्मकत्वागादिविषयत्वाङ्गीकार आवश्यकः । नचैवमुपगमे उक्तश्रुतौ सङ्कोचापत्तिः । विशेषेणेदमित्थंतया निरूपयितुमशक्यस्यानुभवैकवेद्यतया वागादिनिवृत्तिकथनेन सङ्कोचाभावात् । नचैवमनुभवैकवेद्यत्वे मनोविषयस्य सम्भवान्मनसा सहेत्यस्य विरोधः । लोके मनसा ज्ञायमानानामपि फलतण्डुलादिपाकनानाविधान्नभोजनतज्जन्यतृप्तीनामिदमित्थंतायां अविषयत्वस्य सर्वजनीनत्वेनात्रापि तथात्वस्य युक्ततया मनसो निवृत्तेर्विरोधक्लेशस्याप्यभावादित्यतस्तथोक्त इत्यर्थः । भाष्ये तु वास्तवेन यत्किञ्चिद्रूपेण येनकेनचित् प्रकारेण निरूपणेऽपीदमित्थंतया निरूपणस्य सम्भवात् तद्वारणाय विशेषेणेति पदं बोध्यम । तथा पूर्वस्थितान्यङ्गानि ब्रह्मवाक्यस्थानि बोध्यानि । उद्वापस्तु प्रकृतपरत्वेन प्रतीयमानस्यान्यपरत्वापादनम । आवापस्त्वन्यपरत्वेन प्रतीयमानस्य प्रकृतपरत्वापादनम । * ततोऽप्येवमिति * । मननानन्तरमभ्यासेन निर्द्धारणे तद्वार्ढ्ये वा । * निदिध्यासनरूपमिति * । ब्रह्म ज्ञानमिति शेषः । रूपपदरहितः पाठो वा । *मनसीत्यादिना तुरीयरूपपदोक्तस्य ज्ञानस्य स्वरूपकथनम।*इदमिति* ब्रह्मत्वमापजन्यम् । *युक्तमिति* अनुभवस्य प्रादुर्भावापेक्षत्वात् प्रादुर्भावस्य च वरणाधीनत्वात् प्रमाणबलस्य कौण्ठ्येन तस्याकिञ्चित्करत्वाद्युक्तम । तथाचैतत्सर्वमनुसन्धाय जिज्ञासासूत्रप्रणयनाद् व्यवहारस्थापनं प्रथमाधिकरणार्थ इत्यर्थः । अतः परं द्वितीयाधिकरणार्थमाहुः । *अत इत्यादि, फलमेतीत्यन्तम् । * अत इति * । ब्रह्माणि व्यवहारस्थापनेन श्रवणविषयत्वसिद्धौ तत्स्वरूपादिविचारस्यावश्यकत्वात् । * वैपरीत्यमिति * । वि-

द्वितीयाधिकरणे विचारितः । वेदा एव वाचका, अलौकिकमेव कर्मेति । ततः पूर्णालौकिकत्वाय विधिनिषेधमुखेनाधिकरणद्वयम् । समन्वयेक्षतिरूपम् । तदनु प्रथमे पादे शाब्दसन्देहो निवारितो निश्चितार्थे । तत्रापि प्रथमं प्रत्ययसन्देहो निवारितो द्वयेन । प्रकृतिसम्बन्धोऽप्यधिकरणत्रयेण । पुनरन्तिममधिकरणं संश्लेषवारणाय ।

एवं प्रथमे पादे शब्दसन्देहो निवारितः ।

परीतभावरूपम् । अपरप्राप्तिरूपमिति यावत । * विचारित इति * । हेतोः साध्यस्य च कथनमुख्येन निर्णीतः । तस्यैवाकारो वेदा एवेत्यादिनोच्यते । अग्रिमार्थमाहुः । *नत इत्यादि* । पूर्णालौकिकत्वायेति * । अभिन्ननिमित्तोपादानरूपताबोधनेन तथात्वाय । * विधिनिषेधमुखेनेति * । समन्वयेन हेतुना पूर्णालौकिकत्वस्य विधिमुखेन स्थापनम् । अव्यवहार्यत्वस्य प्रधानस्य सगुणस्य च निरासेन तत्स्थापनानिषेधमुखस्य बोधनम् । नच पूर्वं जिज्ञासालक्षणविचाराणां कर्तव्यतायास्सिद्धत्वा उक्तत्वादीक्षत्यधिकरणस्य कुतो निवेश इति शङ्क्यम् । त्रिसूत्र्युक्तप्रमेयप्रपञ्चनार्थमेव सर्वस्य शास्त्रस्योपदेशेन तत्सम्प्रयोजनाय तस्य तस्याधिकरणस्य सङ्गतेऽप्यदोषादिति । आनन्दमयाधिकरणप्रयोजनमाहुः । * तदन्वित्यादि * । प्रकृतिसम्बन्ध इत्यत्र प्रकृतौ सम्बन्धो यस्य सन्देहस्य स तथेति व्यधिकरणपदो बहुव्रीहिः । सन्देह इति पाठो वा । एवं प्रधानाधिकरणीप्रयोजनमुक्त्वा इशामस्याहुः । * पुनरित्यादि * । संश्लेषवारणायेति * । परब्रह्मणश्चिदचित्संश्लेषवारणाय । प्रवादे केवलस्यैव तादृशत्वेन चिदचिच्छरीरापेक्षाराहित्यादिति । सिद्धमाहुः । * एवमित्यादि * षडधिकरण्या निर्धारित । तथाचैतावतैव शाब्दसन्देहनिवृत्तेः कार्यसिद्धेश्च सम्भवान्न्यूनाधिकाधिकरणाङ्गीकारो न युक्त इत्यर्थः । ननु केचिदेकदेशिनो, यतो वाच इत्यस्य यावच्छब्दमनसगोचरत्वानिषेधनपरत्वमाश्रित्य भीतस्मादित्यादिवाक्यवैयर्थ्यपरिहाराय ब्रह्मणि सगु-

ये पुनः कचित् सगुणनिर्गुणभेदं प्रतिपादयन्ति, ते स्वयमेव स्वस्य ब्रह्मजिज्ञासानधिकारं बोधयन्ति । ब्रह्मवादे साङ्ख्यानामिव गुणानामनङ्गीकारात् । भौतिकगुणानामसम्बन्धार्थमेव ह्यध्यायारम्भः । अन्यथा सर्वस्यापि तत्कारणत्वेन तत्सम्बन्धस्य विद्यमानत्वादन्यनिराकरणेन तत्प्रतिपादकत्वनिर्द्धारकाधिकरणानां वैयर्थ्यमेव ।

अर्थसन्देहनिराकरणार्थं द्वितीयाद्यारम्भः । तत्रार्थो द्विविधो जीवजडात्मकः प्रत्येकसमुदायाभ्यां त्रिविधः । तत्र प्रथमं जीवपुरःसरैव सन्देहा निवार्यन्ते ।

णनिर्गुणभेदं प्रतिपादयन्ति । ततश्च निर्गुणं ब्रह्मोक्तश्रुतिरर्थाद् बोधयति । श्रौतत्वादिश्रुतयस्तु शब्दात् सगुणं बोधयन्तीत्येवमपि ब्रह्मणि व्यवहारसिद्धेः पूर्वोक्तरीत्या जिज्ञासासूत्रस्योक्तश्रुतेश्चार्थकथनं न युक्तमित्याशङ्कायां तन्मतमनूद्य दूषयन्ति । * ये पुनरित्यादि * कथं बोधयन्तीत्यत आहुः । * ब्रह्मवाद इत्यादि * । * गुणानामिति * नित्यभिन्नानाम् । ननु, प्रधानक्षेत्रज्ञपतिर्गुणेश इत्यादिश्रुतिषु गुणाङ्गीकारात् कथमनङ्गीकारायगम इत्यत आहुः । * भौतिकेत्यादि * भौतिका भूतोत्पादकत्वेन तत्सम्बन्धिनः । तथाच, प्रधानेत्यादिश्वेताश्वतरश्रुतौ गुणानां सिद्धवन्निर्देशेऽप्युपनिषदारम्भे, भूतानि योनिः पुरुष इति चिन्त्यमित्यत्र योनिपदोक्तानित्यभिन्नगुणानङ्गीकारबोधनादुक्तश्रुतौ ब्रह्मवादसिद्धा भगवद्गुणा एव ते बोध्याः । अतस्तदभिमतानां मायावादसिद्धानां गुणानामसम्बन्धार्थमेवाध्यायारम्भात् सा श्रुतिव्यवस्था असङ्गतेत्यनस्तथेत्यर्थः । ननु कथमेवमवगम्यत एतदर्थमेवाध्यायारम्भ इति, तत्राहुः । * अन्यथेत्यादि * । * तत्कारणत्वेनेति * तत्कारणकत्वेन । तथाचातोऽवगम्यत इत्यर्थः । एवं प्रासङ्गिकं निराकृत्य प्रस्तुतमाहुः । * अर्थेत्यादि * कोऽर्थः सन्देहजनकः, कथं च तन्निराकरणमित्यपेक्षायामाहुः । * तत्रार्थ इत्यादि * । द्वितीयपादार्थमाहुः । * तत्र प्रथममित्यादि * । * जीवपुरःसरेणेति * प्रथमाधिकरणे, अनुपपत्तेस्तु न शारीर इति पूर्वं

इदमाम्नायते। सर्वं खल्विदं ब्रह्म तज्जलानिति, शान्त उपासीत। अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति। स क्रतुं कुर्वीत मनोमयः प्राणशरीर इत्यादि। तत्र वाक्योपक्रमे सर्वं खल्विदं ब्रह्मेति सर्वस्य ब्रह्मत्वं प्रतिज्ञाय, तज्जलानिति सर्वविशेषणं हेतुत्वेनोक्त्वा तत्त्वेनोपासनमुक्तम्।

जीवस्यैव निराकरणाज्जीवपुरःसरेण विचारेणेत्यर्थः। एवमग्रिमपादेऽपि, नानुमानमतच्छब्दादिति सूत्रप्रणयनाज्जडपुरःसरत्वम्। एवं चतुर्थेऽप्युभयपुरःसरत्वमानुमानिकसूत्रविवरणादवगन्तव्यम्। तथा च त्रिभिः पादैस्त्रिविधार्थसन्देहो निवार्यत इत्यर्थः। एवञ्च पादानामेककार्यकत्वेऽपि क्रमनियामिकाऽवसररूपा सङ्गतिरिति बोधितम्।

अन्ये तु प्रथमपादे स्पष्टब्रह्मलिङ्गान्याकाशादिवाक्यानि निर्णीतानि। द्वितीयतृतीययोस्त्वस्पष्टब्रह्मलिङ्गानि निर्णीयन्त इत्याहुः। तन्मते क्रमनियामकं न स्पष्टम्।

एवं पादसङ्गतिं निरूप्य प्रथमाधिकरणं व्याख्यातुं विषयवाक्योपन्यासमुखेनावतारयन्ति। * इदमाम्नायत इत्यादि * छान्दोग्ये पञ्चमप्रपाठके उच्यते। मवादिपदेन, भारूपः सत्यसङ्कल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वेत्यादिनाऽणीयस्त्वगुणविशिष्टस्य, तत, एष म आत्माऽन्तर्हृदये ज्यायान् पृथिव्या इत्यादिना स एव ज्यायस्त्वगुणविशिष्ट इत्युक्त्वा पुनः सर्वकर्मत्वादिविशिष्टस्य, तत, एतद् ब्रह्मैतमितः प्रेत्याभिसम्भवितास्मीति, यस्य स्यादद्धा न विचिकित्सास्तीत्येतावतश्च बोधकः शाण्डिल्यविद्याख्यो ग्रन्थः परामृश्यते। अत्र संशयादिकं बोधयितुमेतद् व्याकरिष्यन्तोऽत्र वाक्यद्वयस्य प्रतीयमानत्वादादौ पूर्वं व्याकुर्वन्ति *तत्रवाक्येत्यादि* * तज्जलानिति * तस्माद् ब्रह्मणो जायत इति जं, लीयत इति लम्,

नचायं शमविधिः। वाक्यार्थे लक्षणाप्रसङ्गात्। कारणत्वेन सामान्यत एव सिद्धत्वाच्च। अतः सर्वजगतो ब्रह्मत्वेनोपासनमुक्तम्। इदमेव पुराणादिषु विराट्त्वेनोपासनम्। अतः परमग्रिमवाक्यार्थे सन्देहः। क्रतुं कुर्वीतेति। क्रतुर्धर्मो यज्ञ इति यावत्।

तस्य स्वरूपं मनोमयः प्राणशरीर इति।

अनितीश्यन्। ब्रह्मसम्बन्धेनोत्पत्तिलयस्थितिकमित्यर्थकं तज्जलानिति सर्वविशेषणमुपासनाहेतुत्वेनोक्त्वा सर्वस्य ब्रह्मत्वेनोपासनमुक्तमित्यर्थः। ननु यथाऽत्र तज्जलानिति सर्वविशेषणं, तथा शान्त इत्युपासकविशेषणम्, इतिश्च हेतौ। तथा सत्यत्र जगत उक्तरूपत्वात् सर्वेव रागद्वेषरहितो भूत्वा वक्ष्यमाणोपासनं कुर्यादिति शमविधिमङ्गीकृत्याग्रे मनोमयत्वादिधर्मवैशिष्ट्यकथनात् तत्र जीवोपासनमेव विधीयत इति पूर्वपक्षमुत्थापयन्ति। तत् कुतो नाद्रियत इत्याशङ्क्याहुः। *नचायमित्यादि*। शमविधिमुपगच्छता, शान्त उपासीतेत्यस्य शमपूर्वकोपासनाविधानरूपे वाक्यार्थेऽङ्गीकृते, उक्तोपासनार्थं शमं सम्पादयेदिति वचनव्यक्तेः पदद्वयेऽपि लक्षणापत्त्या वाक्यार्थे लक्षणाप्रसङ्गात्। वक्ष्यमाणोपासनाया जीवात्मविषयत्वाङ्गीकारे च, शान्तो दान्त इत्यात्मदर्शनवाक्यादस्यामप्यात्मदर्शनसामान्येन शमस्यावाप्तसिद्धत्वाच्च विधिवैयर्थ्यापातः। क्रतुकरणस्याग्रे वक्ष्यमाणत्वेन तदनुवादाङ्गीकारोऽप्यसङ्गत इति चकारार्थः। तथाच नैवं पूर्वपक्ष उचित इत्यर्थः। तस्मादयमुपासनान्तरविधिरेवेत्याहुः। *अत इत्यादि* पनतुपष्टम्भायोपबृंहयन्त्याहुः। *इदमित्यादि* तन्त्रोपासनं प्रकारभेदेन, पातालमेतस्य हि पादमूलमित्यादिनोक्तमतस्तदुपासनान्तरोपगम एव युक्त इत्यर्थः। एतद्विचारप्रयोजनमग्रे स्फुटिष्यति। प्रस्तुतमाहुः। *अतः परमित्यादि* कथं सन्देह इत्याकाङ्क्षायां तं बोधयितुं व्याकुर्वन्ति। *क्रतुरित्यादि* ननु द्रव्यदेवते यज्ञस्य स्वरूपभूते। ते चात्रानुक्ते इति कथं यज्ञत्वावगतिरित्यत आहुः। *तस्येत्यादि* तथाच द्रव्यादिरहितोऽपि ज्ञानयज्ञ इत्यर्थः।

उपासनाप्रकरणत्वादुपासनैवैषा । तत्र मनोमय इति प्रमाणभूतो वेद उक्तः । प्राणशरीर इति कार्यकारणयोरभेदोपचारः । अग्रे सत्यसङ्कल्पादिधर्मवचनात् किमयं विज्ञानमयो जीवो ब्रह्मत्वेनोपास्य, उत ब्रह्मैवान्तर्यामी, यः पुराणेषु सूक्ष्म उक्तः ।

ननु यस्य भूयांसो यज्ञक्रतव इत्याहुरित्यादावङ्गोपाङ्गसहितहविस्त्यागरूपक्रियायाः क्रतुत्वेन प्रसिद्धत्वान्मानसस्यास्य कथं क्रतुत्वमित्यत आहुः । * उपासनेत्यादि * तथाच प्रकरणबलाद्बुद्धिमनस्य क्रियतेऽसौ क्रतुरिति योगं चादायोपासनादिपर इत्यस्यास्तथात्वमित्यर्थः । तर्हि कोऽत्र विषय इत्यतस्तं प्रकटयन्ति * तत्र मनोमय इत्यादि * वेदस्य मनोमयत्वं तु 'स एष जीवो विवरप्रसूतिः प्राणेन घोषेण गुहां प्रविष्टः । मनोमयं सूक्ष्ममुपैत्यरूपं मात्रा स्वरो वर्ण' इति स्थविष्ठ इत्येकादशस्कन्धीयभगवद्वाक्यसन्दर्भे स्पष्टम् * कार्यकारणयोरिति * वेदप्राणयोः । नन्वेवमत्र वेदरूपस्य विषयस्य स्फुटत्वेन कथं वाक्यार्थे सन्देह उच्यत इत्यत आहुः । *अग्र इत्यादि* आदिपदेन, एष म आत्मेत्यादेर्वेदव्यावर्तकस्य जीवसङ्ग्राहकस्य धर्मस्य सङ्ग्रहः । * अयं विज्ञानमयो जीव इति * वेदबोधितधर्मा मनोमयः प्राणशरीरो, मारूपत्वेन विज्ञानमयो जीवः प्राणधारणप्रयत्नवान् ब्रह्मत्वेनोपास्यः, स म आत्मेति कथनाच्च ? उत सत्यसङ्कल्पादिपदोक्तधर्मवैशिष्ट्याद् ब्रह्म वा, यः पुराणेषु 'केचित् स्वदेहान्तर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम्' इत्यादौ सूक्ष्मो हृदयान्तर्वर्तित्वेनोक्त इति सन्देह इत्यर्थः । इह, तत्र मनोमय इत्यादिनोपासनविषयबोधनेनाधिकरणसङ्गतिरपि बोध्यते । पूर्वपादे जन्मादिसूत्रे ब्रह्मणः कर्तृत्वमुक्त्वा तल्लिङ्गाद्यधिकरणचतुष्टयेनातिव्याप्तिपरिहारं क्रियमाणेऽन्तिमेनानुगमाधिकरणेन जडाविशिष्टे जीवेऽतिव्याप्तिनिवारणं कृतम् । तदस्मिन्नधिकरणे कर्तृत्वनिर्वाहकाणां मनोमयत्वादिसर्वकर्मान्तानां धर्माणां जीवे बोधनेन ब्रह्मणि तदभावात् कर्तृत्वासम्भवं बोधयित्वा पूर्वपक्षे व्याक्षिप्यते । तेनाक्षेपः सङ्गतिः ।

तत्र पूर्ववाक्ये जडस्य जगतो ब्रह्मत्वेनोपासनस्योक्तत्वाज्जीवस्यापि ब्रह्मत्वेनोपासनमेव युक्तं, न त्वाहत्यैव ब्रह्मवाक्यं भवितुमर्हति । विज्ञानं ब्रह्म चेद्वेदेति शाखान्तरे स्पष्टत्वाच्च । तस्मात् कार्यकारणयोरभेदाज्जीव एव ब्रह्मत्वेनोपास्य इत्येवं प्राप्ते, उच्यते ।

सर्वत्र प्रसिद्धोपदेशात् ॥ अथ खल्वित्यादि ब्रह्मवाक्यमेव । कुतः । सर्वत्र प्रसिद्धोपदेशात् । कुर्वीतेत्युपदेशो, न तूपासना । तत्र परमशान्तस्य सर्वस्य जगतो ब्रह्मत्वेनोपासनया शुद्धान्तःकरणस्य सर्ववेदान्तप्रसिद्धब्रह्मोपदेश एव युक्तो मननरूपो, न तु काचित् सिद्धस्य जीवस्योपासना ।

पूर्वपक्षमाहुः । * तत्र पूर्वेत्यादि * । * आहत्येति * । अकस्मात् प्रयत्नहेतुं विनेति यावत् । तथाच श्रुतेर्लिङ्गस्य सत्त्वेन तद्वाक्यनिर्णायकत्वादुपक्रमस्यासञ्जातविरोधित्वेन बलिष्ठत्वात् तत्र च जीवस्यैवोक्तत्वात् पूर्ववाक्यविचारेऽपि प्रकरणस्यैव नियामकतया औचित्याच्च नास्य ब्रह्मवाक्यत्वम् । किन्तु शाखान्तरोक्तविज्ञानमयस्यात्र भारूपत्वेन प्रत्यभिज्ञानात् कार्ये सशरीरे जीवे कारणभूतस्य ब्रह्मण उपचारं विधाय सत्यसङ्कल्पादिधर्मवत्तया वेदाभिमानिदेवताजीवो वा, स्वजीव एव वोपास्य इत्यर्थः ।

सिद्धान्तं वक्तुं सूत्रं पठन्ति ॥ सर्वत्र प्रसिद्धोपदेशात् ॥ कथमयमुपदेश इत्याकाङ्क्षायामाहुः । * तत्रेत्यादि * । तथाच, सर्वं खल्विति पूर्ववाक्ये यज्जगतो ब्रह्मत्वेनोपासनं, तद्भगवत एव विराड्रूपेणोपासनम् । तस्य कादाचित्कत्वाभावबोधनायैवात्र तज्जलानिति हेतूक्तिः । तत्फलं चान्तःकरणशुद्धिः । 'स सर्वधीवृत्त्यनुभूतसर्व आत्मा यथा स्वप्नजनेक्षितैकः । तं सत्यमानन्दनिधिं भजेत नान्यत्र सज्जेद्यत आत्मपातः' इति तद्विधायकवाक्यं तथा सिद्धत्वात् । एवं सति पूर्वोक्तोपासनाफलभाजा पुनः किं कार्यमित्यपेक्षायाम्, अथ खल्वि-

शाखान्तरे त्वग्रे आनन्दमयस्य वक्तव्यत्वात्तथा युक्तम् । न त्विह तथा । तस्मादानन्दरूपमायाशरीररूपो वाक्यार्थः ॥१॥

त्यादिना पुरुषस्योपासनानुरूपफलभाक्त्वकथनेन विराट्त्वेनोपासनायामन्यत्र सङ्गाभावेऽप्यन्ते या मतिः सा गतिरिति न्यायेन, यं यं वापीति गीतावाक्येन चान्ते सर्वात्मकत्वमेव, न तु परप्राप्तिरिति तादृशा तदर्थमुपायान्तरं कर्तव्यमित्याशयेन तमाह । स क्रतुं कुर्वीतेति । स उक्तोपासनया शुद्धान्तःकरणोऽपि, यथा क्रतुरित्युक्तरीत्योपासनानुरूपमेव फल प्राप्नोतीत्यतो मनोमयेत्युक्तप्रकारेण मननात्मकं क्रतुं कुर्वीतेति सर्वत्र वेदान्ते सर्वान्तरत्वेन प्रसिद्धस्य ब्रह्मण एव मननीयदेयस्त्वेव भयमितिश्रुत्यन्तरे तस्यावश्यकत्वश्रावणाद्युक्त इति शाखान्तरसिद्धा जीवोपासना नाङ्गीकर्तुं शक्येत्यर्थं ।ननु यदि मयटो विकारार्थमनादृत्याञ्च ब्रह्मवाक्यत्वमङ्गीक्रियते तर्हि शाखान्तरेऽपि तथा वक्तुं शक्यत्वाज्जीवोपासनाया उच्छेद एव स्यादित्यत आहुः । * शाखान्तर इत्यादि * तथाचैवं वैलक्षण्यस्य स्फुटत्वान्न तदुच्छेद इत्यर्थः । एवं वाक्यं व्याख्याय सिद्धमाहुः । * तस्मादित्यादि * यस्मादेतादृशस्य मननमेव युक्तम् । तथानपेक्षिताङ्गोद्वापेनापेक्षिताङ्गावापेन वाक्यार्थनिर्द्धारणे भवतीत्येतत्पूर्ववाक्यविचारे, एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानित्यादिश्रुतिभिर्जगज्जनकत्वस्य वेदे सत्येऽप्यस्य महतो भूतस्य निःश्वसितं यदृग्वेदो यजुर्वेद इत्यादिश्रुत्या वेदस्य ब्रह्मजन्यत्वावधारणं निरङ्कुशस्य जगज्जनकत्वस्य वेदे अभावाद्, यो ब्रह्माणं विदधाति पूर्वं, हिरण्यगर्भं पश्यति जायमानमित्यादिभिर्हिरण्यगर्भेऽप्यभावादेतादृशजनकत्वस्योद्वापेन, निरङ्कुशस्य, यतो वेत्यादिश्रुत्युक्तस्य तस्यावापेन च ब्रह्मपदस्य परवाचकत्वे निर्द्धारिते तस्य वाक्यस्य परब्रह्मरूपो वाक्यार्थो मतो भवति । तथैतद्वाक्यमननेऽपि सत्यसङ्कल्पेत्यारभ्य यावन्ति विशेषणानि तेषां मनोविकारभूते वेदे हिरण्यगर्भे जीवान्तरे चासम्भवात् तद्विशिष्टे मनोमये मन्तव्ये, मनसैवानुद्रष्टव्य', स मानसी न आत्मा जनानां, मनसा तु विशुद्धेनेत्यादिश्रुतिभिस्तादृशमनोग्राह्यत्वेन मनःप्राचुर्या-

द्विकारोद्धापेन प्राचुर्यावापेन चानन्दमयरूपो मनोमयः, को ह्येवान्यात् कः प्राण्यादिति प्राणिसूत्रश्रावणात् प्राणस्वरूपविग्रह इति मननादानन्दमयरूपो यः प्राणशरीररूपोऽन्तर्यामी सोऽत्र वाक्यार्थ इत्यर्थः। अत्र विषयवाक्ये, भारूप इति प्रकाशरूपो ज्ञानात्मा। सत्यसङ्कल्प इति, सत्या अवितथा विषयाऽव्यभिचारिणः सङ्कल्पा विचारा यस्य तादृशः। आकाशात्मेति, व्यापको दुर्ज्ञेयो नीरूपो नीलः सर्वाधारो नामरूपनिर्वाहकः। सर्वे कामा निर्दोषा यस्येति सर्वकामः। एवमग्रेऽपि। सर्वमिदं जगद् अभ्यात्तः, अभि अन्तर्बहिरुभयत्र गृहीतो व्याप्तः। अवाकी। उच्यतेऽनयेति वाक्। वागेव वाकः। करणे घञ्। स यस्य वर्ततेऽसौ वाकी। तद्भिन्नोऽवाकी। उपलक्षणमिदम्। कार्यं कुर्वन्नपि करणशून्यः। अपाणिपादो जवनो ग्रहीतेति श्रुत्यन्तरात्। अनादरः। न विद्यत आदरः सम्भ्रमो यस्य। आप्तकामत्वात्। सर्वानपेक्षः। अभिसम्भवितास्मीति प्राप्तास्मि। ब्रह्मेति निश्चयः। एतादृशस्तं प्राप्नोतीति शेषः। स्फुटमन्यत्। ननु भवत्वयं विषयवाक्यार्थस्तथापि सूत्रे पक्षानुल्लेखात् कथं व्याख्यातोऽर्थः सौत्रत्वेन निश्चेतुं शक्यः। तदनिश्चये वाक्यार्थोऽपि सन्दिग्धप्राय एवेति चेन्मैवम्। द्वितीयादिपादानां पूर्वपादोक्तार्थविमर्शरूपत्वात् कारणत्वस्य तत्र विमृष्टत्वेऽप्यन्येषामविमृष्टत्वाद्यान्तस्तद्धर्मोपदेशाधिकरणसाधितस्यानन्दमयान्तरत्वस्य विमर्श इत्यविवादम्। आन्ते पादेऽन्तर्वर्तिन एव विचारदर्शनात्। सूत्रेऽप्युपदेशपदेन तदर्थविचारस्य प्रत्यभिज्ञानात्। विषयवाक्येऽप्येष म आत्माऽन्तर्हृदय इति पदात्। अतः सूत्रे पक्षानुक्तावपि प्रकरणबलेन तन्निर्णयस्य सुसाध्यत्वादिति। यः पुनरत्ता चराचरग्रहणादित्यादौ पक्षोल्लेखः, स तु तस्यैवात्तृत्वादिधर्मविचारार्थं इत्यदोषः।

रामानुजाचार्यास्तु सूत्रारम्भगतेन सर्वत्रेतिपदेनारम्भगतसर्वपदघटिते वाक्ये विषयवाक्यत्वेन बोधिते तस्य ब्रह्मनिष्ठपर्यवसितस्य फलाकाङ्क्षापूरणायाग्रिमसन्दर्भस्योपस्थित्या सूत्रगतपक्षाकाङ्क्षापूरणेनोक्तार्थस्य सौत्रत्वे सिद्धे वाक्यार्थनिश्चयस्य सुखेन सम्भवादिति वदन्ति।

एवञ्च सूत्रगतन्यायचर्चात्रैवं बोध्या। अत्र ब्रह्मवित्त्वादिवाक्यमुद्देशः। परमात्माधिकारत्वात्। यदेवं तदेवम्। यं ब्रह्मेत्या-

ननु क्रतुमयः पुरुष इति यथासङ्कल्पमग्रिमदेहकथनाल्लोकान्तरभाविफलार्थमन्योपासनैव तु युक्ता, न तु ब्रह्मज्ञानस्य तादृशं फलं युक्तमित्याशङ्क्य परिहरति ।

दिवाक्यवत् । यत्रैवं तत्रैवम् । प्राणं तर्हि वागप्येतीत्यादिवाक्यवत् । उपदेशश्च परममहितानुशासनम् । तत इदं वाक्यं ब्रह्मवाक्यम् । सर्ववाक्यसमर्थितसर्ववेदान्तप्रसिद्धोपदेशात् । यद्देवं तद्देवं, यत्रैवं तत्रैवमिति । सिद्धान्तरीत्या तु प्रकरणसमर्थितत्वेन हेतुर्विशेषणीय इति भेदः ।

किञ्च, सूत्रे प्रसिद्धपदेन, तदेजति तन्नैजतीत्यादिवाक्यप्रसिद्धस्यापि स्मारणादेतद्वाक्यगतानीयस्त्वज्यायस्त्वाधारत्वेन प्रसिद्धत्वमपि सङ्गृह्यते । अतो वाक्यस्य स्पष्टलिङ्गत्वमपि बोध्यते । तेनात्र पादे अस्पष्टलिङ्गवाक्यचिन्ताङ्गीकारं प्रतिज्ञायैतद्वाक्यात्र विषयत्वेनोपन्यासोऽप्ययुक्त इत्यपि सूचितम् ॥ १ ॥

विवक्षितगुणोपपत्तेश्चेतिसूत्रमवतारयन्ति * नन्वित्यादि * । अयमर्थः । अत्र हि पूर्ववाक्ये ब्रह्मोपासनकथनेऽप्यथेतिप्रकृतच्छेदेनाग्रे उपासनान्तरमुच्यते । तथा क्रतुमय इत्यारभ्य, तथेतः प्रेत्य भवितास्मीत्यन्तेन लोकान्तरे सङ्कल्पानुरूपदेहप्राप्तिरूपं फलमुच्यते । फलं च तात्पर्यनिर्णये लिङ्गम् । अतस्तद्विचारेऽत्रोक्तोपासनाया ब्रह्मविषयत्वं न घटते । फलस्य प्राकृततया जाघन्यात् । अतोऽत्र यथासङ्कल्पमग्रिमदेहकथनाल्लोकान्तरभावितादृशदेहप्राप्त्यर्थं वेदाभिमानिदेवताया वा, क्रतुमय इत्यादिना साधकस्योपक्रान्तत्वात् स्वजीवस्यैव वोपासना युक्ता । इहापि भावनया पेशस्कृतो रूपान्तरस्य प्रत्यक्षसिद्धत्वेन सुयुक्तपारलौकिकरूपान्तरस्य भावनाप्रचयजन्यतायां बाधानवतारात् । नचैवं सति ब्रह्मोपासनायामपि तथा वक्तुं शक्यत्वात् कुतस्त्याग इति शङ्क्यम् । देहस्वस्य प्राकृतत्वव्याप्तत्वेन ब्रह्मज्ञानस्य च, तमेव विदित्वा अतिमृत्युमेति, ब्रह्मविदाप्नोति परमित्यादिषु ब्रह्माप्तिरूपस्यैव फलस्य श्रावणेन ब्रह्मज्ञाने तादृशफलकथनस्यायुक्तत्वादिति । तस्मादत्र मननोपदेशाङ्गीकारो न युक्त इत्याशङ्क्य परिहरतीति ।

विवक्षितगुणोपपत्तेश्च ॥ २ ॥

विवक्षिता लोकान्तरे तादृशरूपप्राप्तिः, सा प्रकृतेऽप्युपपद्यते। भगवत्स्वरूपलाभात् सारूप्यलाभाद्वा। नच व्याप्तिरुक्तेरधमप्राप्त्युपायो युक्तः।

सत्यसङ्कल्पादिवचनं च ब्रह्मवाक्यत्वपोषकमिति चकारार्थः ॥ २ ॥

सूत्रं पठित्वा तत् समाधातुं व्याकुर्वन्ति * विवक्षितेत्यादि * विवक्षिता वक्तुमिष्टा उपादेयत्वेनाभिप्रेता या या गुणरूपा लोकान्तरे तादृशी सङ्कल्पानुरूपदेहप्राप्तिः सा ब्रह्मज्ञानपक्षेऽप्युपपद्यते। ज्ञानफलबोधकासु श्रुतिषु मृत्युमतिक्रान्तस्य भगवत्स्वरूपस्य ब्राह्मदेहस्य यत्प्राप्तिरूपस्य वा, ब्रह्म वेद ब्रह्मैव भवतीति श्रुत्या ब्रह्मस्वरूपस्य वा लाभोऽभिप्रेत इति तस्य सङ्कल्पानुरूपतायाः युक्तत्वादिति। नच यथा क्रतुरित्यादिना लोकान्तरप्राप्यत्वेन सङ्कल्पानुरूपत्वेन व्याप्तिरुक्तेर्यतः, कुर्वीतेत्युपदेशबोधितः क्रतुरधमस्य प्राकृतदेहस्य प्राप्त्युपायो युक्तः। परमशान्तस्य पूर्वोपासनया शुद्धान्तःकरणस्याशुद्धसङ्कल्पायोगात् तदभावे प्राकृतदेहस्याप्यपोगादित्यर्थः। हेत्वन्तरमाहुः। * सत्येत्यादि * तथाचैवं हेतुद्वयबाधितत्वादस्य जीवपरत्वं न शङ्कितुं शक्यमित्यर्थः।

यत्तु कश्चिदपौरुषेयवेदे वक्तुरभावात्रेच्छार्थः सम्भवतीत्यत उपादेयत्वेन फलेन तत्र विवक्षितत्वमुपचर्यते। लोके तथा दर्शनात्। वेदेऽपि वाक्यतात्पर्यातात्पर्याभ्यामुपादेयत्वानुपादेयत्वयोरवगन्तुं शक्यत्वात् सूत्रे विवक्षितपदमौपचारिकमङ्गीकुर्वन्ति। तन्न रोचिष्णु। निःश्वसितश्रुत्यनुरोधेन वेदे जीवाजन्यत्वरूपस्यापौरुषेयत्वस्याश्रयत्वेन सर्वथा वक्त्रभावस्यासङ्गतत्वात्। शास्त्रयोनित्वसूत्रे स्वयमेव वेदकर्तृत्वाङ्गीकारेण वदतो व्याघाताच्च। नच निःश्वसितस्य सार्वदिकत्वादबुद्धिपूर्वकत्वेन वक्तुरुपगमेऽपीच्छायासम्भवाद्दोष इति वाच्यम्। आनीदवातं स्वधया तदेकं तस्माद्धान्यन्न परः किञ्चनासेति श्रुतिविरोधेन तस्सार्वदिकत्वाङ्गीकारस्यैवासङ्गतत्वात्। एवं

नन्वेतावतापि नैकान्ततो ब्रह्मवाक्यत्वमुपपत्तेरुभयत्रापि तुल्यत्वादित्याशङ्क्य परिहरति ।

अनुपपत्तेस्तु न शारीरः ॥ ३ ॥

नच प्राणशरीररूपो जीवो भवति । तिरोहितानन्दत्वेन

सिद्धे निःश्वसितत्वस्यासार्वदिकत्वे तदुद्गमे इच्छापूर्वकत्वस्याप्यपर्यवसायित्वात् । प्रपञ्चमात्रं प्रति, बहु स्यामितीच्छाया एव कारणत्वेन वेदात्मकनामप्रपञ्चं प्रत्यपि तस्या अदण्डवारितत्वात् । नच शब्दस्वरूपमात्रोद्गम एवेच्छासम्बन्धो, न तु तस्यार्थसाहित्येऽपीत्यदोष इति वाच्यम् । ईदृशविभागे मानाभावात् । नचैवं पौरुषेयत्वाङ्गीकारे काणादादितौल्यापातः । ईश्वरवाक्यत्वेनैव तन्निरासात् । नचैवं शब्दार्थसम्बन्धानित्यत्वप्रसङ्गः । शब्द इति चेदित्यस्मिन् सूत्रे तन्निरासप्रकारस्यापि वक्ष्यमाणत्वात् । अतो वेदे वक्तुरिच्छासम्बन्धस्य सत्त्वेन विवक्षितत्वादेः सत्त्वादुपचाराङ्गीकारो न युक्त इति दिक् ।

यत्तु पुनर्मनोमयः प्राणशरीर इत्यस्य सगुणविषयत्वम्, अप्राणो ह्यमनाः शुभ्र इत्यस्य निर्गुणब्रह्मविषयत्वमित्युक्तम । तत्तु पूर्वपादार्थानुवादभाष्य एव दूषितमित्युपरम्यते ॥ २ ॥

अग्रिमसूत्रमवतारयन्ति । * नन्वेतावतेत्यादि * । * एतावतेति * सूत्रद्वयोक्तयोपपत्त्या । * तुल्यत्वादित्यादि * 'आत्मानं चेद्विजानीयादयमस्मीति पुरुषः । किमिच्छन् कस्य वा हेतोः शरीरमनुसंज्वरेद्' इत्यादौ ज्ञेयतया प्रसिद्धत्वेन जीवस्य मन्तव्यत्वोपदेशो, लोकान्तरे विवक्षितदेहप्राप्ति । न वै कश्चिन्मे मनसो मृषा गतिरिति वाक्यात् सत्यसङ्कल्पत्वं, व्यापकत्वादाकाशात्मकत्वं, पर्यायेण सर्वाहंमानितया वा सर्वकर्मत्वादिकं हिरण्यगर्भे जीवे च सङ्गच्छत इति तस्य बाधाभावेन तुल्यत्वादित्याशङ्क्य परिहरतीत्यर्थः ।

अनुपपत्तेस्तु न शारीरः ॥ सूत्रं व्याकुर्वन्ति * नचेत्यादि * सत्यमस्त्येयमुपपत्तिर्नैव्यं, तथापि शरीरसम्बन्धी जीवो वाक्यार्थो न सम्भवति । कुतः । अनुपपत्तेः । प्राणशरीरत्वस्यानुपपद्यमानत्वात् । तत्र हेतुः । * तिरोहितेत्यादि * प्राणशरीर इत्यत्र शरीरपदमाकार-

निराकारत्वात् । अध्यासेन तथात्वे त्वनुपास्यत्वमेव । इदानीमेवोपासकस्यापि तथात्वात् । नच प्राणादेर्लौकिकत्वम् । उपदेशानर्थक्यप्रसङ्गात् । अत आनन्दरूपप्राणशरीररूपत्वाभावान्न वाक्यार्थो जीवः ।

पूर्वपक्षस्यात्रैव निवृत्तत्वात् तुशब्दः । विज्ञानमये तु प्राप्ताप्राप्तविवेकेन धर्मस्यैवोपासना ॥ ३ ॥

परम् । तथाचात्र हि, मनोमय इत्यत्र यथा विकारार्थोद्वापेन प्राचुर्यान्मनोमयत्वमुपदेयगोचरस्तथा प्राणशरीर इत्यत्रानन्दरूपप्राणशरीररूपत्वम् । लौकिकप्राणस्योद्वापात् । प्राणस्यानन्दरूपता त्वनुगमाधिकरण एव सिद्धा । प्राणमुपक्रम्य, एष प्राणात्मानन्दोऽजरोऽमृत इति तद्विषयवाक्यं श्रावणात् । नच लौकिकप्राणस्योद्वापे किं मानमिति वाच्यम् । लौकिकस्य तस्य शारीरतया आध्यासिकत्वेनेदानीमुपासकस्यापि प्राणशरीरत्वात् तथोपासनोपदेशे आनर्थक्यप्रसङ्गस्यैव मानत्वादिति । अतस्तदभावान्न वाक्यार्थो जीव इत्यर्थः । तुशब्दं व्याकुर्वन्ति * पूर्वेत्यादि *। ननु कथं पूर्वपक्षस्यात्र निवृत्तिः । विज्ञानमानन्दं ब्रह्मेति श्रुत्युक्तस्य विज्ञानस्य, विज्ञानं यज्ञं तनुत इति विज्ञानमयनिगमनश्लोकेऽपि प्रत्यभिज्ञायमानत्वेनात्र पूर्ववाक्ये विरुद्धत्वेन ब्रह्मोपासनवद्विज्ञानमयेऽपि विज्ञानत्वेन ब्रह्मोपासनत्वेन शाक्यवचनतया आनन्दपूर्वभागमात्रस्य जीवोपासनागमकतया अप्रयोजकत्वेन तत्रापि तदुपासनानवकाशात् तत्र तदङ्गीकारस्यासङ्गततया पूर्वपक्षस्यानुपपमादित्यत आहुः । * विज्ञानमय इत्यादि * तत्र गौणान्तर्येण श्रद्धादिधर्मत्वेन च जीवत्वस्य प्राप्तत्वेन मुख्यान्तर्यस्यानन्दरूपत्वस्य चाप्राप्तत्वेन किं ग्राह्यमिति विचारे प्राप्ताप्राप्तविवेकेनाप्राप्तापेक्षया प्राप्तस्यैव बलिष्ठत्वाद्धर्मस्य भगवति वृत्तिमतो जीवस्यैवोपासना युक्तेति सुखेन पूर्वपक्षोपपमात् तन्निवृत्तिरित्यर्थः ॥ ३ ॥

ननु प्राप्तव्यतादृशरूपफलाभिप्रायं भविष्यतीति परिहरति ।

कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥

एतमितः प्रेत्याभिसम्भवितास्मीति, यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्य इत्यग्रे फलवाक्यम् । एतं प्राणशरीररूपं कर्मत्वेन ध्येयत्वेन प्राप्यत्वेन च व्यपदिशति । कर्तृत्वेन च शारीरं व्यपदिशति । नच भजनीयरूपाकथने तादृशं फलं सिद्ध्यतीति चकारार्थः ।

अग्रिमसूत्रमवतारयन्ति * नन्वित्यादि * यदि तत्र प्राप्ताप्राप्तविवेकेन जीवोपासना, तर्हि प्राप्यत्व खलु क्रतुमयः पुरुष इत्यादिना जीवस्यैव प्राप्तत्वाद् ब्रह्मस्वरूपस्य चाप्राप्तत्वात्तद्विवेकेन जीवोपासनैव युक्ता । युक्तेस्तुल्यत्वात् । नचानन्दरूपप्राणशरीरत्वोक्तिविरोधः । तद्वचनं जीवप्राप्तव्यतादृशरूपफलाभिप्रायं भविष्यतीत्यविरोधादित्याशङ्क्य परिहरतीत्यर्थः ।

कर्मकर्तृव्यपदेशाच्च ॥ इदं सूत्रं व्याकुर्वन्ति *एतमित्यादि* सत्यं प्राप्तं जीवत्वम् । परन्तु ध्यानकर्तृत्वेन, न तु तत्कर्मत्वेन । विषयस्तु ध्येयत्वेनैवाभिप्रेतः । अत्र चास्य क्रतोः को विषय इत्यस्मिन्नंश एव सन्देहात् तद्विचारे त्वेतमित्युपसंहारगते फलवाक्ये एतमितिपदेन पूर्वं प्राणशरीररूपतयोक्तं ध्येयमेव परामृश्य, अभिसम्भवितास्मीति वचनेन तमेव प्राप्यत्वेन व्यपदिशति, ध्यानादिकर्तृत्वेन च शारीरम् । अतः प्राप्ताप्राप्तविवेकन्यायस्यात्राप्रवृत्तिः । किञ्च, फलविचारेऽपि चेतनस्य फलस्य न पुरुषार्थत्वम् । चेतनस्य महत आकाशस्य शेषितायाः परणीयस्त्वे दर्शनात्, फलं पुरुषार्थत्वादिति पौर्वतन्त्रन्यायस्य स्वर्गादौ चरितार्थत्वादत्र च तद्वैपरीत्येनाप्रवृत्तेः । अत इदं ब्रह्मवाक्यमेवेत्यर्थः । सौत्रस्य चकारस्यार्थमाहुः । * नचेत्यादि * यथा क्रतुरित्यादिना भजनीयप्राप्तव्ययोरैकरूप्यस्योक्तत्वात् तादृशरूपस्याभावे फलवाक्यस्याबोधकत्वेव प्रसज्येतातस्तदपि

अधिकरणसम्पूर्णत्वद्योतकश्च ॥ ४ ॥

शब्दविशेषात् ॥ ५ ॥

इदमाम्नायते। यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वैवमयमन्तरात्मन् पुरुषो हिरण्मय इति। तत्र संशयः। हिरण्मयः पुरुषः किं जीव, उत ब्रह्मेति। उपक्रमबलीयस्त्वे जीव, उपसंहारबलीयस्त्वे ब्रह्मेति।

प्राप्तत्वेनैवावगन्तव्यमित्येव चकारार्थ इत्यर्थः। एवञ्चात्र जगदुत्पत्तिकर्तृत्वनिर्वाहकाणां सत्यसङ्कल्पादिधर्माणां ब्रह्मणि साधने तदसम्भवः परिहृतः। प्रयोजनान्तरमाहुः। * अधिकरणेत्यादि * एतेनैव पूर्वपक्षस्योपशान्तत्वात् तथेत्यर्थः। अन्ये त्वेतदधिकरणमष्टसूत्रमाहुः। तदप्येतेनैव दूषितम् ॥ ४ ॥ ॥ १ ॥

शब्दविशेषात् ॥ विषयवाक्योपन्यासमुखेनाधिकरणमवतारयन्ति। * इदमाम्नायत इत्यादि *। इदं वाक्यम्। केचन समानप्रकरणे वाजिनामित्याहुः। अन्ये तु समानप्रकरणे इत्येवाहुः। इदं च वाक्यं न बृहदारण्यकस्थम्। तत्र प्रकरणसामान्येऽप्येवं पाठदर्शनादिति। किन्तु वाजिशाखायामेवान्यत्र स्थितं बोध्यम्। भास्कराचार्यादिभिस्तथा कथनात्। तेनात्र प्रसङ्गोऽधिकरणसङ्गतिः। नन्वत्र पक्षानुपन्यासात् कथमधिकरणान्तरत्वावगतिः। नच समानप्रकरणत्वेनैतदुक्तपक्षस्य स्मारणादिति वाच्यम्। तथा सति पूर्वशेषत्वावगत्याऽधिकरणभेदस्यासङ्गतत्वमित्याशङ्कायां संशयाकारमाहुः। *तत्र संशय इत्यादि*। तथाच तत्र मनोमयत्वादिविशिष्टः पक्षोऽत्र तु हिरण्मयत्वविशिष्ट इति पक्षभेदाद् भेद इत्यर्थः। नन्वेवं सति पूर्वपादेऽन्तस्तद्धर्माधिकरणेनैव गतार्थत्वेनैतत्प्रणयनवैयर्थ्यापात इत्यत आहुः। * उपक्रमेत्यादि * तथाच तत्रोपक्रमस्य बलिष्ठत्वसाधनात् संशयनिरासः। प्रकृते तु तदभावादेतत्प्रणयनमतो न वैयर्थ्यमित्यर्थः। ननु प्रथमावगततयोपक्रमस्यासञ्जातविरोधत्वेन बली-

ननु प्राप्यत्वतादृशरूपफलाभिप्रायं भविष्यतीति परिहरति ।

कर्मकर्तृव्यपदेशाच्च ॥ ४ ॥

एतमितः प्रेत्याभिसम्भवितास्मीति, यस्य स्यादद्धा न विचिकित्सास्तीति ह स्माह शाण्डिल्य इत्यग्रे फलवाक्यम् । एतं प्राणशरीररूपं कर्मत्वेन ध्येयत्वेन प्राप्यत्वेन च व्यपदिशति । कर्तृत्वेन च शारीरं व्यपदिशति । नच भजनीयरूपाकथने तादृशं फलं सिद्ध्यतीति चकारार्थः ।

अग्रिमसूत्रमवतारयन्ति * नन्वित्यादि * यदि तत्र प्राप्ताप्राप्तविवेकेन जीवोपासना, तर्ह्येतमितः प्रेत्य खलु क्रतुमयः पुरुष इत्यादिना जीवत्वस्यैव प्राप्तत्वाद् ब्रह्मत्वस्य चाप्राप्तत्वात्तद्विवेकेन जीवोपासनैव युक्ता । युक्तेस्तुल्यत्वात् । नचानन्दरूपप्राणशरीरत्वोक्तिविरोधः । तद्वचनं जीवप्राप्यतादृशरूपफलाभिप्रायं भविष्यतीत्यविरोधादित्याशङ्क्य परिहरतीत्यर्थः ।

कर्मकर्तृव्यपदेशाच्च ॥ इदं सूत्रं व्याकुर्वन्ति *एतमित्यादि* सत्यं प्राप्तं जीवत्वम् । परन्तु ध्यानकर्तृत्वेन, न तु तत्कर्मत्वेन । विषयस्तु ध्येयत्वेनैवाभिप्रेतः । अत्र चास्य क्रतोः को विषय इत्यस्मिन्नंश एव सन्देहात् तद्विचारे त्वेतमित्युपसंहारगते फलवाक्ये एतमितिपदेन पूर्वं प्राणशरीररूपतयोक्तं ध्येयमेव परामृश्य, अभिसम्भवितास्मीति वचनेन तमेव प्राप्यत्वेन व्यपदिशति, ध्यानादिकर्तृत्वेन च शारीरम् । अतः प्राप्ताप्राप्तविवेकन्यायस्यात्राप्रवृत्तिः । किञ्च, फलविचारेऽपि चेतनस्य फलस्य न पुरुषशेषत्वम् । चेतनस्य महत आशास्यस्य शेषिताया वरणीयस्थले दर्शनात्, फलं पुरुषार्थत्वादिति पौर्वतन्त्रन्यायस्य स्वर्गादौ चरितार्थत्वादत्र च तद्वैपरीत्येनाप्रवृत्तेः । अत इदं ब्रह्मवाक्यमेवेत्यर्थः । सौत्रस्य चकारस्यार्थमाहुः । * नचेत्यादि * यथा क्रतुरित्यादिना भजनीयप्राप्ययोरैकरूप्यस्योक्तत्वात्, तादृशरूपस्याप्राप्तत्वे फलवाक्यस्याबोधकतैव प्रसज्येत । तत्तदपि

अधिकरणसम्पूर्णत्वद्योतकश्च ॥ ४ ॥

शब्दविशेषात् ॥ ५ ॥

इदमाम्नायते । यथा व्रीहिर्वा यवो वा श्यामाको वा श्यामाकतण्डुलो वैवमयमन्तरात्मन् पुरुषो हिरण्मय इति । तत्र संशयः । हिरण्मयः पुरुषः किं जीव, उत ब्रह्मेति । उपक्रमबलीयस्त्वे जीव, उपसंहारबलीयस्त्वे ब्रह्मेति ।

प्राप्तत्वेनैवावगन्तव्यमित्येष चकारार्थ इत्यर्थः । एवञ्चात्र जगदुत्पत्तिकर्तृत्वनिर्वाहकाणां सत्यसङ्कल्पादिधर्माणां ब्रह्मणि साधने तदसम्भवः परिहृतः । प्रयोजनान्तरमाहुः । * अधिकरणेत्यादि * एतेनैव पूर्वपक्षस्योपशान्तत्वात् तथेत्यर्थः । अन्ये त्वेतदधिकरणमपसूत्रमाहुः । तदप्येतेनैव दूषितम् ॥ ४ ॥ ॥ १ ॥

शब्दविशेषात् ॥ विषयवाक्योपन्यासमुखेनाधिकरणमवतारयन्ति । * इदमाम्नायत इत्यादि * । इदं वाक्यम् । केचन समानप्रकरणे वाजिनामित्याहुः । अन्ये तु समानप्रकरणे इत्येवाहुः । इदं च वाक्यं न बृहदारण्यकस्थम् । तत्र प्रकरणसामान्येऽप्येवं पाठदर्शनादिति । किन्तु वाजिशाखायामेवान्यत्र क्वचिद्बोध्यम् । भास्कराचार्यादिभिस्तथा कथनात् । तेनात्र प्रसङ्गोऽधिकरणसङ्गतिः । नन्वत्र पक्षानुपन्यासात् कथमधिकरणान्तरत्वावगतिः । न च समानप्रकरणत्वेनैतदुक्तपक्षस्य स्मारणादिति वाच्यम् । तथा सति पूर्वशेषत्वावगत्याऽधिकरणभेदस्यासङ्गतत्वमित्याशङ्कायां संशयाकारमाहुः । *तत्र संशय इत्यादि * । तथा च तत्र मनोमयत्वादिविशिष्टः पक्षोऽत्र तु हिरण्मयत्वविशिष्ट इति पक्षभेदाद् भेद इत्यर्थः । नन्वेवं सति पूर्वपादोक्तान्तस्तद्धर्माधिकरणेनैव गतार्थत्वेनैतत्प्रणयनवैयर्थ्यापात इत्यत आहुः । * उपक्रमेत्यादि * तथा च तत्रोपक्रमस्य बलिष्ठत्वसाधनात् संशयनिरासः । प्रकृते तु तदभावादेतत्प्रणयनमतो न वैयर्थ्यमित्यर्थः । ननु प्रथमावगततयोपक्रमस्यासञ्जातविरोधत्वेन बली-

यत्रैकस्यान्यपरत्वेनैकार्थता सम्भवति तद्बलीयस्त्वमिति सिद्धं पूर्वतन्त्रे । तत्र चतुर्विधभूतनिरूपणार्थं जीवस्यैवाराग्रमात्रस्यान्तर्हृदये प्रतिपादकमिदं वचनं, फलतो हिरण्मयत्वमिति, न त्वेतादृशाभाससमानत्वं ब्रह्मणो युक्तमतो जीवप्रतिपादकमेवेदं वाक्यमिति प्राप्ते, उच्यते ।

शब्दविशेषात् ।

यस्त्वस्यात्रापि तौल्यात् वैयर्थ्यं कथं नेत्यत आहुः । * यत्रेत्यादि * । न हि प्रथमावगततामात्रं बलीयस्त्वे तन्त्रम् । किन्तु यत्रोपक्रमाद्यत्रैकस्यान्यपरत्वेन वाक्यस्यैकार्थता सम्भवति, विप्रतिपत्तिनिरासेन वाक्यभेदो न भवति तस्य बलीयस्त्वमिति पूर्वतन्त्रे सिद्धम् । तदेकवाक्यत्वाद्यत्राप्युपादेयमतोऽत्र यस्य बलीयस्त्वं तदुपपादनाय प्रणयनमतो न वैयर्थ्यम् । तथाच तत्समानप्रकरणाभावेन तत्रास्मरणात्र तत्रास्य प्रणयनम् । प्रकृते तु स्मरणेऽपि पक्षभेदोपस्थित्या पूर्वत्र निवेशासम्भवेनाधिकरणान्तरत्वाङ्गीकार इत्यर्थः । एवमधिकरणान्तरत्वं प्रसाध्य पूर्वपक्षमाहुः । * तत्रेत्यादि * । जरायुजस्वेदजाण्डजोद्भिज्जभेदेन चतुर्विधानि यानि भूतानि जीवदेहाः । न हिंस्यात् सर्वा भूतानीत्यादौ तथा सिद्धत्वात् । तेषां निरूपणार्थम् । छान्दोग्ये, त्रीण्येव तेषां बीजानीति श्रावणादत्र चतुर्थस्याधिकस्य कथनार्थमाराग्रमात्रस्य जीवस्यान्तर्हृदये व्रीह्यादिभिश्चतुर्भिर्दृष्टान्तैरौपाधिकस्य परिमाणस्य प्रतिपादकमिदं वचनमिति दृष्टान्तबलादवसीयते । आराग्रश्रुतावङ्गुष्ठमात्रपरिमाणस्य बुद्धिगुणेनोक्तत्वात् । नच हिरण्मयत्वविरोधः । पूर्वाधिकरणासङ्गेन तत्क्रतुन्यायेनोपासनायां फलतो हिरण्मयत्वमिति वक्तुं शक्यत्वात् । नच तथा ब्रह्मोपासनाङ्गीकारेऽपि बाधकाभावेनोपपत्तितौल्यात् संशय एव पर्यवसानं शङ्क्यम् । तुः शङ्कानिरासे । तादृशो व्रीहियवादिरूपो य आभासो जीवेन स्वात्मनयाऽभ्यस्यमानं शरीरं तत्समानत्वं ब्रह्मणो न युक्तम् । निरवयवत्वात् । अतः साधकबाधकयुक्तिसत्त्वात्संशयनिरासाज्जीवप्रतिपादकमेवेदं वाक्यमिति पूर्वः पक्ष इत्यर्थः ।८

हिरण्मयः पुरुषो न जीवस्य फलमपि, तत्प्राप्तेरेव फलत्वात्। नाप्ययं नियमस्तस्यामेव मूर्तौ लय इति।

अतः शब्देनैव विशेषस्योक्तत्वान्न हिरण्मयः पुरुषो जीवः॥५॥

अत्र समादधते * हिरण्मय इत्यादि * । हिरण्मयस्यानन्दमयत्वं तद्धर्माधिकरणे सिद्धम्। आनन्दमयाधिकरणे च तत्प्राप्तेरेव फलत्वमतो जीवस्य फलमपि हिरण्मयो न भवतीति तद्विरोधाज्जीववाक्यत्वं न शङ्कितुं शक्यमित्यर्थः। ननु पूर्वाधिकरणे तत्क्रतुन्यायस्य सिद्धत्वात् तथोपासने स्वरूपसारूप्यान्यतरलाभेन भाष्येऽप्यङ्गीकाराच्च कथं न तस्य फलत्वमित्यत आहुः * नापीत्यादि * । तैत्तिरीये, आदित्यो वा एष एतन्मण्डलं तपतीत्याद्यनुवाकद्वयमध्ये पूर्वस्मिन् हिरण्मयं पुरुषं प्रस्तुत्य, द्वितीये चादित्यो वै तेज ओजो बलमित्यादिना तद्विभूतिभूता देवताश्चोक्त्वाऽन्ते पठति। ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोत्येतासामेव देवतानाꣳ सायुज्यꣳ सार्ष्टिताꣳ समानलोकतामाप्नोति य एवं वेदेत्युपनिषदिति। तथाच यदि तत्क्रतुन्यायो नियतः स्याद्धिरण्मयस्य फलत्वं युज्येतापि। न तु तथा। नचैतद्विरोधः शङ्क्यः। यथा क्रतुरित्यत्र पुरुषविशेषणस्याधिकारस्यापि प्रकारांशे निवेशे तदभावात्। अन्यथोक्तश्रुतिविरोधस्य दुष्परिहरत्वात्। एवं सिद्धे तन्मूर्तौ लयानियमे हिरण्मयस्य फलताया अपि प्रायिकत्वेन तद्विरोधो दुर्वार इत्युपक्रमस्य पदवैयर्थ्यापादकत्वैकार्थताविघटकत्वेन निर्बलत्वान्न तदनुरोधादस्य जीववाक्यत्वमित्यर्थः। एवं सिद्धान्तमभिधाय तस्य सौत्रत्वं प्रकटयन्ति * अत इत्यादि * । शब्दोक्तो विशेषः शब्दविशेषस्तस्मात्। उक्तरीत्या हिरण्मयशब्देनैवाधिकारविशेषमादाय तत्र लयानियमस्य सूचितत्वात् तथेत्यर्थः। एवञ्चाप्रामाणुत्ववोधकैर्योगाद्दिदृष्टान्तैरन्तरात्मनि वर्तमानस्य जीवत्वं प्रतीयत इति युक्त्या पूर्वाधिकरणसङ्गतिमाक्षिप्योपसंहारबलीयस्त्वेन तन्निवार्य पूर्वोक्तं दृढीक्रियत इतीदं पूर्वाधिकरणस्यैव शेषः॥५॥

ननु हृदये विद्यमानत्वादभिमान्येव जीवो युक्त इति चेत्, तत्राह ।

स्मृतेश्च ॥ ६ ॥

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठतीति । ननु सर्ववेदानां यन्निःश्वासत्वं तस्य भगवतो वाक्यं कथं स्मृतिरिति । उच्यते । तं त्वौपनिषदं पुरुषं पृच्छामीति श्रुतेः केवलोपनिषद्वेद्यं ब्रह्म, न प्रमाणान्तरवेद्यम् । ततश्चार्जुनस्य शिष्यरूपेण प्रपन्नस्य पुष्टिभक्तत्वाभावाद् भगवद्वाक्ये निर्विचिकित्सविश्वासाभावाद् रथित्वेनैव स्थाप्यत्वात्र तादृशाय तादृशदेशकालयोरुपनिषदामवक्तव्यत्वाद् गुरुरूपतादृशरूपं निःश्वसितवेदोद्गमजनकं स्मृत्वा तदर्थमपि स्मृत्वा भगवान् पुरुषोत्तमो वाक्यान्युक्तवान् स्मृतिरूपाणि ।

स्मृतेश्च ॥ इदं सूत्रमवतारयन्ति । * ननु हृदय इत्यादि । तथाच श्रुतेः सन्दिग्धत्वेऽपि लिङ्गाज्जीववाक्यत्वं युक्तमित्यर्थः । * अभिमान्येव जीव इति * अभिमानी जीव एवेति योजना । रामानुजादयो भगवन्तं श्रीकृष्ण पुरुषोत्तमत्वेन परब्रह्मत्वेन वदन्तो गीतावाक्यान्येवात्र स्मृतित्वेनोदाहरन्तोऽप्येतत्स्वरूपं न विचारितवन्त इति तत्स्वरूपं तदुपन्यासादिप्रयोजनं च निर्णेतुं विषयवाक्यस्य स्मृतित्वं व्युत्पादयन्ति । * ननु सर्वेत्यादि * । * शिष्यरूपेणेति * शिक्षणीयरूपेण । शिष्यस्तेऽहं शाधि मां त्वं प्रपन्नमिति वाक्यात् । * निर्विचिकित्सविश्वासाभावादिति * अपरं भवतो जन्मेत्यादिरूपात् संशयबोधकवाक्यात् तथेत्यर्थः । * रथित्वेनेत्यादि * । अभिमकार्यकारणार्थं साहङ्कारतायाँ आवश्यकत्वाद्रथित्वेनैव स्थाप्यत्वान्न तादृशाय * साहङ्काराय । * तादृशदेशकालयोरिति *दारुणे देशे काले चेत्यर्थः । * गुरुरूपतादृशरूपमिति * यो वै वेदांश्च प्रहिणोति तस्मा इत्यादिश्रुत्युक्त गुरुरूपं यन्मर्यादाप्रतिपाद्यस्वरूपम् । अत्राऽयमर्थः । यद्यपि औपनिषदस्यैवात्र विचारस्तथाप्युपनिषदामेव वि-

ततो ब्रह्मविचारे तान्यप्युदाहृत्य चिन्त्यन्ते। पुनश्च भगवाँस्तदधिकारेण ब्रह्मनिष्ठां निरूप्य स्वकृपालुतया, सर्वगुह्यतममित्यादिना भक्तिप्रपत्ती एवोक्तवान्। अतोऽङ्गत्वेन पूर्वं सर्वनिर्णया उक्ता इत्यध्यवसेयम्। तथैवार्जुनविज्ञानात्, करिष्ये वचनं तवेति।

स्तनीयत्वेनास्मिन् विचारे निश्चायनाय स्मृतेर्हेतुत्वेनोपन्यासस्यायुक्तत्वेऽपि वेदस्य परोक्षवादत्वेन सूरिमोहजनकत्वात्तादृशस्यापि योऽर्थबोधः सोऽधिकारविशेषदेशकालविशेषसापेक्ष एवेति तदभावान्मन्दमध्यमाद्यर्थं तदुपबृंहणभूतेतिहासपुराणोपन्यास आवश्यकः। तत्रापि, वेदान्तकृद् वेदविदेव चाहम्, इत्यस्या हृदयं लोके नान्यो मद्वेदकश्चनेति वाक्यान्तरवाक्यापेक्षया भगवद्वाक्योपन्यास एवावश्यकः। तेषु चोक्तरीत्याऽधिकारिदेशकालानां आधान्यदर्शनेन भवति वैयधिकरण्यशङ्केति तत्परिहारेणोभयसामञ्जस्याय वाक्यानां स्वरूपमवश्यं विचारणीयम्। तत्र वक्तृभेदे स्मृतित्वस्यासङ्गतत्वाद् वक्तर्येव कश्चिदवस्थाभेदो वा रूपभेदो वा तदर्थं वक्तव्यः। तत्रानन्तरूपमिति श्रुत्या रूपभेदस्य शीघ्रं बुद्ध्यारोहान्मर्यादाप्रतिपादकं वेदवत्स्वक्षरात्मकं रूपं वेदार्थं तत्तात्पर्यं च स्मृत्वा तत उत्तमोऽपि भगवाँस्तादृशवाक्यान्युक्तवानतः स्मृतिरूपत्वं तेषामुपपन्नमिति। एवं स्वरूपं विचार्योपन्यासप्रयोजनमाहुः। * तत इत्यादि *। वेदान्तार्थनिश्चायकत्वात् तद्विचारोऽपि युक्त एवेति तान्यपि चिन्त्यन्त इत्यर्थः। नन्वैकार्थ्यं सामानाधिकरण्यप्रयोजकम्। तदिह न दृश्यते। वेदे मुख्यतया ज्ञानविज्ञानयोरत्र च तथा भक्तिप्रपत्त्योः प्रतिपादनेनार्थभेदादित्यत आहुः। * पुनरित्यादि *। * तदधिकारेणेति * भक्तिघटितेनाधिकारेण। तथाचाधिकारभेदस्य वेदेऽपि सिद्धत्वाद् वेदोऽपीदमेव द्वयं तादृशाधिकार्थं निरूपयति। अत एव ब्रह्मवाक्येषु सृष्ट्यादिकर्तृत्वमात्मत्वं चैकस्मिन्नेव प्रकरणे वदति। शरणमहं प्रपद्ये इत्यादौ प्रपत्तिं च श्रावयतीति तस्याप्यत्रैव तात्पर्यात्सामानाधिकरण्यमिति पूर्वोक्तदोषाभावात् तच्चिन्तनम-

चकाराद् तन्मूलभूतनिःश्वासोऽप्युच्यते । व्यासस्यापि भगवज्ज्ञानांशत्वाददोषः ॥ ६ ॥

उपक्रमबलीयस्त्वमाशङ्क्य परिहरति ।

अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न
निचाय्यत्वादेवं व्योमवच्च ॥ ७ ॥

ननु व्यापकस्येश्वरस्य हृदयदेशस्थितिरयुक्ता, व्रीह्यादिरूपत्वं च । अतोऽर्भकमल्पकमोको हृदयस्थानं यस्य तत्त्वाद् व्रीह्यादितुल्यत्वाच्च न परमात्मा वाक्यार्थ इति चेन्न । निचाय्यत्वात् । पूर्वं प्रथमदूषणं परिहरति । हृदये ज्ञातुं शक्यत इति तदायतनत्वेन प्रतिपाद्यते ।

व्यावश्यकमेवेत्यर्थः । एतस्यार्थस्य सौत्रत्वायाहुः । * चकारादित्यादि * । ननु भवत्वेवं, तथापि क्वचित् क्वचिद् व्यासचरणैः पुराणवाक्यान्यप्युदाहृत्य चिन्त्यन्ते । तत्र को हेतुरित्याकाङ्क्षायामाहुः । * व्यासस्यापीत्यादि * । बुद्धादिवारणाय, * ज्ञानांशत्वादिति * । तथाचोक्तस्मृत्या हृदयस्य भगवदाधारत्वेन निर्णीतत्वात्तद्बलेन ब्रह्मवाक्यत्वपर्यवसानं युज्यत इत्यर्थः ॥ ६ ॥

अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥ इह सूत्रमवतारयन्ति * उपक्रमेत्यादि * असञ्जातविरोधित्वेन तथाऽऽशङ्क्येत्यर्थः । सूत्रं व्याकुर्वन्त आशङ्कांशं व्युत्पादयन्ति * नन्वित्यादि * । तथाचेश्वरधर्मविरुद्धस्य जीवधर्मस्य बोधनात् स्मृतिरयोग्यतादोषदुष्टेति न सा निर्णायिकेत्यर्थः । समाधानांशं व्याकुर्वन्ति * पूर्वमित्यादि । * तदिति * हृदयम् । तथाच भृतिलाभस्थानत्वादायतनत्वव्यपदेशः । अत्रान्ये दृष्टान्तमपि वदन्ति । यथा, सर्वलोकपतिरप्ययोध्यापतिरिति । कथं भृतिलाभ-

निदिध्यासनानन्तरं हि साक्षात्कारस्तदन्तःकरण एवेति निचाय्यत्वम् । भक्तौ तु बहिरपीति विशेषः । द्वितीयं परिहरति । एवं व्योमवद । एवं व्रीह्यादितुल्यतया यत्प्रतिपादनं चतुर्विधभूतान्तरत्वख्यापनाय । यथा चत्वार उपरवाः प्रादेशमात्रा इति तथा तद्धृदयाकाशे प्रकटस्य सच्चिदानन्दस्वरूपसर्वतःपाणिपादान्तस्य तत्स्वरूपमिति ।

पूर्वपक्षसिद्धान्तयोश्चकारद्वयमेतादृशवाक्यान्तरे पूर्वपक्षासि-

---

स्थानत्वमित्यत आहुः * निदिध्यासनेत्यादि * । * हिर्हेतौ । * तदन्तःकरण इति * जीवान्तःकरणे । तथाच मनसैवानुद्रष्टव्य इतिश्रुतेस्तत्रैव निचाय्यत्वमिति तस्य प्रशंसया स्थानत्वव्यपदेशोऽतो न स्मृतेरयोग्यतादोषघटितत्वमित्यर्थः । ननु यदि हृदयमेव स्फुत्तिलाभस्थानं, नेतरत् तदा तस्य व्यापकतापि दुर्घटा । प्रत्यक्षापेक्षया शब्दस्य दुर्बलत्वादित्यत आहुः । * भक्तौ त्वित्यादि * तथाच साधनविशेषेण बहिरपि निचायनात्र शब्दस्य नैबल्यमित्यर्थः । * द्वितीयं परिहरतीति * ननु मास्तु स्थानविरोधस्तथापि परिमाणविरोधस्तु स्यादेवेत्यतो द्वितीयं परिमाणविरोधरूपं दूषणं परिहरतीत्यर्थः । व्योमवदिति दृष्टान्तं विवृण्वन्ति । * यथेत्यादि * । उपरवा नाम हविर्धाने स्थाना बिलविशेषाश्चत्वारः । दक्षिणस्य हविर्धानस्याधस्तात् पुरोऽक्षं चतुर उपरवानन्तरदेशेषु प्रादेशान्तरालान् करोतीति कल्पे विहिताः । तैर्बिलैर्यथाकाशस्य प्रादेशमात्रं स्वरूपमभिव्यक्तीक्रियते, किमत्र भद्रमित्यादिमन्त्रैरध्वर्युयजमानयोः परस्परहस्तग्रहणाय । तथात्र व्रीह्यादितुल्यतया प्रतिपादनं चतुर्विधभूतहृदयाकाशे प्रकटस्योक्तविधस्य ब्रह्मण एव तत्स्वरूपमिति बोधनाय । तैत्तिरीये, अतः परं नान्यदणीयसं हि परात् परं यन्महतो महान्तमित्येकस्यैव नानापरिमाणश्रावणात् । तथाच न परिमाणविरोधोऽपीत्यर्थः । एवं समाधानांशं व्याकृत्य चकारप्रयोजनमाहुः । * पूर्वपक्षेत्यादि * तथाचाधिकर्य

द्धान्तयोराधिक्योपपत्तिसमुच्चयार्थम् । तेन, अत एव प्राण इतिवदधिकरणान्तरमपि सूचितमिति ॥ ७ ॥

पूर्वाधिकरणापेक्षया वैलक्षण्यं, तत्र या उपपत्तिस्तयोरनुक्तयोः स्फोरणार्थमित्यर्थः । तत्सूचितमर्थमाहुः । * तेनेत्यादि * तत्रेदमुदाह्रियते । तैत्तिरीये महानारायणोपनिषद्याम्नायते । आदित्यो वा एष एतन्मण्डलं तपति । तत्र ता ऋचस्तदृचां मण्डलं स ऋचां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नां लोकोऽथ य एष एतस्मिन् मण्डलेऽर्चिषि पुरुषस्तानि यजूंषि स यजुषां लोकः सैषा त्रय्येव विद्या तपति य एषोऽन्तरादित्ये हिरण्मयः पुरुष इति । अत्र संशयः । हिरण्मयः पुरुषः किं जीवो ब्रह्म वेति । तद्बीजं तु विधेयत्वानिर्देशः । तत्रादित्यो वेत्युपक्रम आदित्यस्य मण्डलतापकत्वमुक्त्वोपसंहारे तत्तापकत्वं त्रय्यामुपसंहृतम् । तेनादित्यस्त्रयीशरीरः सिद्धः । शरीरस्य चान्तस्तदभिमान्येव युक्तः । मण्डलस्य हृदयाद्यपेक्षया महत्त्वेऽपि परममहत्परिमाणापेक्षयाल्पत्वेन तत्र जीवस्यैव मानात् । पुरुषपदेन पूर्वोक्ताचिर्गतयजुःपुरुषस्यैव व्यपदेशाच्च । नच हिरण्मयत्वविरोधः । तस्योपासनाफलत्वायानुवादात् । नचात्रोपासनाबोधकपदाभावान्नैवमिति वाच्यम् । अत्रापेक्षितगुणान्तरबोधके, आदित्यो वै तेज ओज इत्यव्यवहितोत्तरानुवाके, य एवं वेदेत्युपसंहारेण तस्या उक्तत्वात् । अतो नेदं ब्रह्मवाक्यमिति सूत्रांशेनाशङ्क्यांशान्तरेण सिद्धमतमाह । न, निचाय्येत्यादि । यथा हृदये निचाय्य एवमादित्येऽपि । स यश्चायं पुरुषे यश्चासावादित्ये स एक इति श्रुत्यन्तरात् । नच तत्र जीवो वक्तुं शक्यः । तदग्रे, स य एवंविदित्यादिना विदो जीवस्य वेद्याद् भेदेन निर्देशात् । 'अनाद्यन्तं परं ब्रह्म न देवा नर्षयो विदुः । एकस्तद्वेद भगवानादित्यो ज्योतिषां पतिरिति' स्मृतेश्च । एवं त्रय्यामपि, सर्वे वेदा यत् पदमामनन्तीति श्रुत्या तदर्थत्वादिति । ननु पुरुषत्वेन व्यपदेशाज्जीवत्वं तदेवेति चेत्तत्राह । व्योमवदिति । यथोपरथबिलेषु प्रादेशमात्रत्वं व्योम्नोऽभिव्यज्यते, तथात्र

सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ ८ ॥

बाधकमाशङ्क्य परिहरति । यदि सर्वेषां हृदये भगवाञ्जीववत् तिष्ठेत् तदा जीवस्येव तस्यापि सुखदुःखसाक्षात्कारस्तत्साधनादिपरिग्रहश्च प्राप्नोतीति चेन्न । वैशेष्यात् । विशेषस्य भावो वैशेष्यं तस्मात् । सर्वरूपत्वमानन्दरूपत्वं स्वकर्तृत्वं विशेषः । तद्भावो ब्रह्मणि वर्तते, न जीवे इति जीवस्यैव भोगो, न ब्रह्मण इति । वैशेष्यपदादयमर्थः सूचितः । अपेक्षित एव भोगो, नानपेक्षित इति । न तु तस्य भोगाभाव एव । अग्निमाधिकरणविरोधात् । यथेन्द्रियाधिष्ठातृदेवतानाम् । तत्त्वमस्यादिवाक्येन जीवस्यापि तथात्वे तस्यापि तद्वदेव भविष्यति ॥ ८ ॥

पुरुषरूपं नयेति न दोषः । ततश्चान्तरादित्ये यः पुरुषो यजुःपुरुषेणाभिव्यज्यते स हिरण्मय इत्येवं विधेयनिर्देशस्याप्युपपन्नत्वात् स ब्रह्मैवेत्यर्थ इति ॥ ७ ॥

सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥ * बाधकमिति * सम्यग् अभिनिवेशेन भोगः सम्भोगः, सम्यग्भोगो यस्मादिति वा सम्भोगः । तयोः प्राप्तिर्जीवतौल्यमापादयतीति तदाशङ्क्य परिहरतीत्यर्थः । बहुव्रीहिमङ्गीकृत्याहुः । * तत्साधनादिपरिग्रहश्चेति * । * अग्निमाधिकरणविरोधादिति * अग्निमाधिकरणविषयवाक्येषु भोगप्रतिपादनात् तदनङ्गीकारे तद्विरोधादित्यर्थः । अपेक्षित एवेत्यादिनियमे दृष्टान्तमुखेन मानमाहुः । * यथेत्यादि * । तथा चानुमानमेव मानमिति भोगप्राप्तावपि न जीवतौल्यापत्तिरित्यर्थः । नन्वेवं सति जीवस्य कुत उभयभोग इत्यत आहुः । *तत्त्वमसीत्यादि* तथा च ब्रह्मभावाभावेन कामकर्मादिवशगत्वाद् बन्धदशायां तथेत्यर्थः । तथा च तदभावायैव साधनानां विधानमिति भावः । तदेतत्प्रासङ्गिकमुक्तम् ।

अन्यच्च पूर्वाधिकरणयोऽन्तर्हृदयवर्तमानस्यान्तर्यामित्वे निश्चायितेऽपि पुनरस्मिन्नधिकरणे यथात्वप्रतिपादनं तत्तदाकारनिश्चायनार्थम् । यथा कौण्डपायिनां सत्रे, मासमग्निहोत्रं जुहोतीत्यत्राग्निहोत्रशब्देन नित्याग्निहोत्रधर्मा अतिदिश्यन्ते । तथा, हिरण्मयः पुरुष

इति शब्दाख्यामन्तस्तद्धर्मोधिकरणविषयवाक्योक्तहिरण्मयपुरुषाकारातिदेशार्थमिदमधिकरणमिति मम प्रतिभाति ।

यदत्र शैवः, प्रसिद्धोपदेशाधिकरणं द्विसूत्रमङ्गीकृत्य अविनाभावरूपाद्वैतोपगमेन विशिष्टाद्वैतवादं चानुसृत्य, सर्वं खल्विदं ब्रह्मेति वाक्योक्तोपासनायां ब्रह्मणः सर्वात्मकत्वोपपादनाया ऽथर्वशिरोवाक्यघाम्यहमेकः प्रथममासं वर्तामि च भविष्यामि च, नान्यः कश्चिन्मत्तो व्यतिरिक्त इत्यादीन्युदाहृत्य ब्रह्माहमित्यादिना विश्वरूपत्वमात्मनः प्रपञ्चयित्वा विश्वरूपत्वे सोऽन्तरादन्तरं प्राविशदित्यनुप्रवेशमेव हेतुत्वेनाह । तदसङ्गतम् । एको ह वै नारायण आसीन्न ब्रह्मा न ईशान इति महोपनिषदि सृष्टिप्राक्काले ईशानसत्तानिषेधेनाऽस्यास्मिवर्ततिभवतीनां सत्तार्थकत्वस्य वक्तुमशक्यतया, यस्माद् हृदयादासं स ईशो विदधातु मे, ततो युद्धमवर्तत, नन्दपत्न्यां भविष्यसीत्यादिषु जननार्थस्यैव प्राधान्येन प्रतिकल्पं प्रथमोत्पत्तिबोधकतया, नान्यः कश्चिन्मत्तो व्यतिरिक्त इत्यस्यापि, नासीद्वर्तते भविष्यति चेति पुरुषविपरिणामेन तास्वेव क्रियास्वन्वयस्य युक्तत्वेन रुद्राविनाभावरूपाद्वैतबोधकताया वक्तुमशक्यत्वात् । नच, सोऽहं नित्यानित्यो व्यक्ताव्यक्तो ब्रह्माब्रह्मेत्यग्रिमसन्दर्भे विश्वरूपत्वस्य स्वस्मिन् प्रपञ्चनात् तत्सिद्धिरिति वाच्यम् । महोपनिषदुक्तनिषेधेन सिद्धे तस्याब्रह्मत्वे वामदेववच्छास्त्रदृष्ट्या ब्रह्मदृष्ट्या वाहम्पदमयोगाद्द्रूपेणाविनाभावस्यासिद्धेः । नापि, सोऽन्तरादन्तरं प्राविशदिति प्रवेशोक्त्या तत्सिद्धिः शङ्क्या । स प्रविष्टः परमात्मा अन्तरादन्तरं दहरपुण्डरीकं प्राविशदतस्तद्भेदर्शयत्यात् तथैवार्थात् । अन्यथा प्रथमपुरुषादिप्रयोगविरोधापत्तेरिति । किञ्चाविनाभावरूपाद्वैतोपगमस्य चिदचिदीश्वरभेदसिद्धिसापेक्षत्वेन, सदेव सोम्येदमग्र आसीदिति श्रुतिविरुद्धत्वस्य प्रागेवोपपादितत्वेन तदादरस्याप्रस्तुतत्वमेवेति दिक् ।

यदप्यनुपपत्तेस्तु न शारीर इत्यादिकं पञ्चसूत्रमधिकरणान्तरमङ्गीकृत्य बृहन्नारायणोपनिषदो महोपनिषदिति नामान्तरं चाभिप्राय, तत्रत्ये 'पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतं नारायणं महाज्ञेयम्' इत्यादिवाक्ये, किं परमेश्वरमूर्त्यात्मा तद्विभूतिर्नारायणो विश्वपतित्वादिलक्षणकतया प्रतिपाद्यते? किंवा परमेश्वरः शिव? इति

सन्दिह्य सहस्रशीर्षं देवमित्यारभ्य सहस्रशीर्षादिविशिष्टत्वेन नारायणस्यैवोद्दिष्टतया अभ्यासात्, समुद्रेऽन्तमिति समुद्रशायिस्वरूपतल्लिङ्गात् तद्वाचकाच्युतहर्यादिशब्दप्रयोगाच्च नारायण एव विश्वपतित्वादिलक्षणाकत्वेन प्रतिपाद्यत इति पूर्वपक्षमभिधाय सिद्धान्तमाह । अत्र नारायणान्तर्यामी परमेश्वर एव प्रतिपाद्यते । कुतः । विश्वपतित्वादीनां परमेश्वरधर्माणां पदार्थान्तरे नारायणेऽनुपपत्तेः । पशूनां पतये वृक्षाणां पतये जगतां पतये नम इत्यादिना शिव एव परमेश्वरे निखिलभुवनाधिपत्यमभ्यस्यते । एको रुद्रो न द्वितीयाय तस्थुर्य इमाँल्लोकानीशत ईशनीभिरिति रुद्रव्यतिरिक्तस्य जगदीश्वरत्वं निषिध्यते । विश्वाधिको रुद्रो महर्षिरिति विश्वाधिकत्वं तस्यैव श्रूयते । अतो विश्वपतित्वादिलक्षणो नारायणात्मा परमेश्वर एवेति । अग्रिमसूत्रे च पद्मकोशप्रतीकाशमित्यादिना नारायणद्वयमेवोच्यत इत्यङ्गीकृत्य शिवनारायणयोर्ध्येयध्यातृभावमाह ॥ शब्दविशेषसूत्रे च, नारायणपरं ब्रह्मेति मन्त्रे नारायणात् परमिति समासमङ्गीचकार ॥ स्मृतेश्चेति सूत्रे, 'एवमुक्त्वा ततो राजन् महायोगेश्वरो हरिः । दर्शयामास पार्थाय परमं रूपमैश्वरम्' इति गीतायावचनम्, 'अहं यथावदाराध्यः कृष्णेनाक्लिष्टकर्मणा । तस्मादिष्टतमः कृष्णादन्यो मम न विद्यत' इति भारतीयमश्वत्थामानं प्रति शिववचनं च स्मृतित्वेनोदाजहार । तत्सर्वमसङ्गतमेव । द्वापरादिष्वलोकव्यामोहनाय पाञ्चरात्रादिप्रसिद्धस्य, त्वामाराध्य तथा शम्भो ग्रहीष्यामि वरं सदेत्यादिवरदानस्य यथावत्पदेनात्र बोधनात् कृष्णाराध्यत्वेऽपि शिवस्य परब्रह्मत्वासिद्ध्या, गीतोक्तरूपस्याप्यनुगीतोत्तरुत्तङ्कोपाख्याने 'ततः स तस्मै प्रीतात्मा दर्शयामास तद्वपुः । शाश्वतं वैष्णवं धीमान् ददृशे यद्धनञ्जय' इत्यारभ्य, 'तद् दृष्ट्वा परमं रूपं विष्णोर्वैष्णवमद्भुतम् । विस्मयं च ययौ विप्रस्तद् दृष्ट्वा रूपमैश्वरम्' इति पूर्वमर्जुनेनेदानीमुत्तङ्केन च दृष्टस्य रूपस्य वैशम्पायनेन कण्ठत एव वैष्णवत्वप्रतिपादनादुत्तङ्केनापि, विश्वकर्मन्नमस्तेऽस्तु यस्य ते रूपमीदृशमिति निगमनाच्चोपपादनमन्तरेणैव वैष्णवत्वसिद्ध्याऽनुगीतायामपि विष्णोरेवेश्वरत्वसिद्ध्या शैवमतानुपष्टम्भकत्वात् । नारायणपरं ब्रह्मेत्यस्यापि प्रथमाम्नायपाठपतितत्वेन तत्र पञ्चमीसमासनिवेशस्याशक्यवचनतया पदभेदपक्षेऽपि, सुपां सुलुगिति सू-

अत्ता चराचरग्रहणात् ॥ ९ ॥

कठवल्लीषु पठ्यते । यस्य ब्रह्म च क्षत्रं चोभे भवत ओ॰

त्रेण लोलोपे सुखेन तथा पाठासिद्ध्या पुरुषसूक्त एव सहस्रशीर्ष- त्वादिविशिष्टरूपेण जगदुपादानतायाः श्रूयमाणतया च, नारायणपदं ब्रह्मत्वेनापि शब्दविशेषेण तदनुपपत्त्यभावात् । सहस्रशीर्षं देवमित्य- नुवाके कर्मत्वबोधकद्वितीयाया नारायण एवाऽभ्यासान्नारायणपदं ब्रह्मेत्यादिप्रथमान्तवाक्यपाठपतितस्य, नारायणपरो ध्यानेत्यस्य, ध्यानं नारायणः पर इत्येतत्समभिव्याहृतस्य वस्तुपरिच्छेदनिवर्तकतायाः स्फुटत्वाच्च तस्य कर्तृत्वे पर्यवसानं वक्तुमशक्यमिति तेनापि तन्मतानुपपत्त्यभावात् । इतः पूर्वस्मिन्ननुवाके, अणोरणीयानिति मन्त्रे ईशानपदस्य शिवस्य प्रस्तुतात्ममहिमरूपत्वेनैव सिद्धत्वान्मध्येऽपि, यो देवानां प्रथममिति मन्त्रे महर्षिरित्यादिभिर्मुख्यविभूतितया सिद्ध- त्वाच्च, दहरं विपापमित्युपान्त्यमन्त्रेऽपि तद्धृदयाकाशरूपेणैव ग्राह्यत्वा- त्, 'सर्वं विशुद्धं वसुदेवशब्दितं यदीयते तत्र पुमानपावृतः । सत्त्वे च तस्मिन् भगवान् वासुदेवो ह्यधोक्षजो मे मनसा विधीयत' इति

३ . चतुर्थस्कन्धे सतीं प्रति शिववाक्येन, अहं ध्यायामि तं विष्णुं पर- मात्मानमीश्वरमित्यादिना, विष्णोराराधनार्थं मे ब्रह्मचर्यं पिता- महेत्यन्तेन गारुडद्वितीयाध्याये ब्रह्माणं प्रति शिववाक्येन च तदुपबृं- हणादपि रुद्रस्य ध्यातृत्वेनैव सिद्धत्वाच्च । इदं यथा तथा मया प्रहस्ते निपुणतरमुपपादितमित्युपरम्यते । प्रकृतमनुसरामः ॥ ८ ॥ ॥ २ ॥

अत्ता चराचरग्रहणात् ॥ पूर्वाधिकरणे परमात्मनः पुरुषहृदय- देशावच्छिन्नधारणे जीववत् सुखदुःखभोगप्राप्तिरिताशङ्क्य समासौ प- रिहृता । स परिहारस्तदा सुघटेन, यदि तस्य भोगः सिद्धः स्यात् । अतस्तत्साधनायोपोद्घातेनेदमधिकरणमारभ्यत इत्याशयेन विषय- वाक्यमाहुः * कठवल्लीषु पठ्यते इति * द्वितीयवल्लीसमाप्तौ पठ्य- ते । अत्र शङ्कराचार्यादयोऽस्यामुपनिषद्यग्निजीवपरमात्मनां प्रकृत- त्वात् त्रिकोटिकं संशयमुपगच्छन्ति । तद्युक्तम् । अग्नेः कोटिपात-

दनम् । मृत्युर्यस्योपसेचनम् । क इत्था वेद यत्र स इति । अत्र वाक्ये ब्रह्मक्षत्रयोरोदनत्वं वदन् यच्छब्दार्थस्य भोक्तृत्वमाह । तत्र संशयः । किं जीवो, ब्रह्म वेति । सच्चिदानन्दरूपत्वं सर्वोपास्यत्वं पूर्वाधिकरणद्वयेन सिद्धम् । सर्वभोक्तृत्वं साधयति । ब्रह्मक्षत्रयोरशक्यवधयोः सर्वमारकस्य च मृत्योर्भक्षयिता जीवो न भवत्येवेति कथं सन्देह इति चेदुच्यते । ओदनोपसेचनरूपक-

---

स्यासङ्गतत्वादित्याशयेनाहुः । * अत्रेत्यादि * ओदनस्य चेतनभोग्यत्वेन तत्समभिव्याहृतयच्छब्दार्थभूतस्य भोक्तुश्चेतनतायास्तत्समभिव्याहारेणैव निवृत्तेरत्रेत्तथात्वाज्जीवब्रह्मकोटिक एव संशयो युक्त इत्यर्थः । नन्वेतस्मिन् विचारे का वा सङ्गतिरित्याकाङ्क्षायां तामाहुः । * सच्चिदित्यादि * । तथाच ब्रह्मजिज्ञासाप्रतिज्ञावाक्ये ब्रह्मण इति सम्बन्धबुद्ध्या ब्रह्मधर्माणामावश्यकानां सङ्गृहीतत्वादुपासने ज्ञाने चापेक्षितेषु धर्मेषु द्वयोः सिद्धौ तृतीयस्याप्यत्रस्यापि स्मरणात् प्रसङ्ग एव सङ्गतिरित्यर्थः । नच जन्माद्यधिकरणचतुष्टयेन सच्चिदानन्दरूपत्वस्य, तद्धर्माधिकरणे सर्वोपास्यत्वस्य च प्रथमपाद एव सिद्धत्वात् पुनर्विचारस्य किं प्रयोजनमिति शङ्क्यम् । तद्विषयवाक्येषु, ब्रह्मविदिति, हिरण्मयः पुरुषो दृश्यत इति पदात् तत्र तेषां ज्ञानशेषतया विचारादुपासनायां तेषामनुपयोग इति शङ्कानिरासायावश्यकत्वात् । नच पूर्वाधिकरणे कथं सच्चिदानन्दरूपधिनिगमनेति शङ्क्यम् । सर्वं खल्विदमेव सद्रूपतायाः, सत्यसङ्कल्पादियदेश्चिद्रूपतायाः, अनाद्यस्त्वेनानन्दरूपतायाश्च बोधनेन तत्सिद्धेरिति । एवं द्वितीयाधिकरणे विषयवाक्येऽप्यन्तरात्मनिरत्याधिकरणानिर्देशात् तस्य च स्थानस्य सर्वसाधारण्यात् सर्वोपास्यत्वसिद्धिः स्फुटैवेति न कोऽपि शङ्कालेशः । तस्यैवान्तिमे सूत्रे भोगस्य स्मारणात् तस्यालौकिकत्वनिश्चायनायैतदधिकरणमित्युपोद्घातोऽपि सङ्गतिरित्यपि बोधितम् । अधिकरणवैयर्थ्यमाशङ्क्य समादधते । * ब्रह्मक्षत्रेत्यादि *

स्वाज्जीवधर्मत्वम् । स्थानाज्ञानाच्च । न हि सर्वगतस्य स्वहृदयेऽपि प्रतिभासमानस्य, क इत्था वेद यत्र स इत्यज्ञानमुपपद्यते । अलौकिकसामर्थ्याच्च सन्देहः ।

तत्र निषिद्धत्वाल्लौकिकभोजनत्वस्थिरूपत्वमात्रत्वात् स्थानाज्ञानाच्च कश्चिदुपासनोपचितालौकिकसामर्थ्यो महादेवादिरत्ता भविष्यति । न तु तद्विरुद्धधर्मा भगवान् भवितुमर्हति, अक्लिष्टकर्मत्वादिधर्मवान् । तस्माज्जीव एवोपासनोपचितमहामाहात्म्यो वाक्यार्थ इत्येवं प्राप्तेऽभिधीयते ।

अत्ता चराचरग्रहणात् ॥ अत्ता भगवानेव । कुतः । चरा-

---

*स्थानाज्ञानादिति विवृण्वन्ति । * नहीत्यादि * तथाच पूर्वाधिकरणद्वये सर्वगतत्वादिरूपेण सिद्धौ स्थानाज्ञानस्य वक्तुमशक्यत्वादज्ञातस्थानकत्वं जीवधर्म एवेत्यर्थः । नन्वेवं ब्रह्मवाक्यत्वसाधकपदार्थानां रूपकाज्ञानाभ्यामन्यथात्वस्य वक्तुमशक्यत्वात् कथं सन्देह इत्यत आहुः । * अलौकिकेत्यादि । ननु जीवे कथमलौकिकसामर्थ्यसम्भव इत्याकाङ्क्षायां तत्साधयन्त एव पूर्वपक्षमाहुः * तत्रेत्यादि * न हिंस्यात् सर्वा भूतानीतिश्रुत्या स्वपरप्राणवियोजनरूपाया हिंसाया निषिद्धत्वादत्र च ओदनरूपकेण तस्या लौकिकनैवेद्यस्य च सूचनात् तथा । * महादेवादिरित्यादिपदेन रुद्रवतोऽग्नेः संग्रहः । महादेवस्य निषिद्धभोक्तृत्वं त्वगस्त्यसंहितायां प्रथमाध्याये तेनैव पार्वतीं प्रत्युक्तम् । 'भक्त्यार्पयन्ति ये मह्यं तथापि पिशितादिकम् । उत्पादयन्ति चानन्दं गणेभ्यो वा सुरेश्वरि । तथापि मे मदीयाना-मस्माकं पिशितादिकम् । तृप्तिमुत्पादयत्येव विधिनाऽविधिनार्पितम्' इति । * तद्विरुद्धधर्मेति * अनिषिद्धालौकिकभोजनकृत् । विरुद्धधर्मवत्त्व उपपत्तिः । * अक्लिष्टेत्यादि * सिद्धान्तं व्याकुर्वन्तो विषयवाक्ये हेतुपक्षबोधकपदादर्शनात् कथमस्य सूत्रस्य तद्विषयत्वमितिशङ्कापरिहाराय ग्रहणपदं चराचरोपलक्षकमिति ला-

चराग्रहणात् । चरं सर्वप्राणिवधार्थं परिभ्रमन्मृत्युः । अचरं ब्रह्मक्षत्ररूपं कल्पाद्यचाल्यम् । तयोरत्ता न जीवो भवितुमर्हति । यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनादिति न्यायात् । अस्मदादिप्रतिपत्त्यर्थं तु लौकिकवद्वचनं भोक्तृत्वाय । प्रलयकर्तृत्वांशायुक्तत्वम् । सर्वत्र विद्यमानस्याप्यज्ञायमानत्वात् फलतः

क्षणिकव्याख्यानस्यासङ्गतत्वबोधाय चाहुः । * चरमित्यादि * * अचाल्यमिति * । प्रवाहनित्यत्वादचाल्यम् । श्रुतौ चकारद्वयेन वर्णान्तरस्यापि संग्रहः । तेषामपि भक्त्याधिकारेण मुक्तियोग्यत्वात् । देवोऽसुरो मनुष्यो वेति वाक्यात् । एवं सति पूर्वोक्तस्यात्ता जीवो भवितुं नार्हति । अत्तुर्जीवभावे तदात्तानां मोक्षासम्भवात् । ननु मृत्युञ्जयत्वेन संहारकत्वेन ज्ञानदातृत्वेन च तस्य प्रसिद्धत्वाच्छुभविभूतिरूप एव सोऽस्तु, न जीवो, न वा परः । बाधकानामुक्तत्वादित्याकाङ्क्षायामाहुः । *यत्रेत्यादि* यथा ह्यमात्यो युवराजो वा राजकार्यं कुर्वन्नन्येभ्योऽतिशयवानपि, न राजभोग्यं भुङ्क्ते तदसाधारणं कार्यं वा करोति । अत उपासनोपचयादिना जातेऽपि सामर्थ्ये न तस्य तादृशमत्तृत्वं शक्यवचनमित्यर्थः । ननु तादृशभोक्तृत्वस्य बाधकानामुक्तानां का गतिरित्यत आहुः । * अस्मदादीत्यादि * तुः शङ्कानिरासे । तथाच यथा सदेव सौम्येदमग्र आसीदित्यत्र ब्रह्मणः केवलत्वेऽभिसंहितेऽप्यग्रपदेन कालोपरञ्जनमस्मदादिप्रतिपत्त्यर्थं, तथात्र भोजने लौकिकवद्वचनमपि । न चात्र निषिद्धत्वं बाधकम् । निषेधस्य जीवेऽपि देहसम्बन्धानन्तरमेव प्रवृत्तेरनुज्ञापरिहारसूत्रे वक्ष्यमाणत्वादशरीरे ब्रह्मणि तदप्रवृत्तेस्तं प्रति निषिद्धत्वाभावात् । अन्यथा प्रलयेऽपि हिंसायास्तौल्यात् तत्कर्तृत्वमप्ययुक्तं स्यात् । तथा सति प्रलय एव न भवेदतस्तत्रैव भोक्तृत्वेऽपि नायुक्तत्वम् । नापि ज्ञानाज्ञानं बाधकमित्याहुः । * सर्वत्रेत्यादि * सर्वत्र विद्यमानत्वेऽपि, हन्त तिरोधानीति श्रुतेः सृष्ट्यनन्तरं तिरोधानेनाऽज्ञायमानत्वात् प्रत्यक्षरूपस्य फलस्याभावेन तदभिसंधाय ज्ञानाज्ञानमत्रोक्तं, न तु ज्ञानविषयकं परोक्षज्ञानमप्यभिसन्धायातो

स्यानाज्ञानमुक्तम् । ब्रह्मक्षत्रयोरपि मोक्षापेक्षित्वान्मृत्युसम्बन्धमात्रेण भगवति भोक्तरि प्रवेशार्थं योग्यरूपमेवौदनत्वम् । प्राणानां तत्रैव समवलयान्मृत्युरपि तत्रैव लीनोऽग्रे जन्ममरणाद्यभावाय भगवत्येव प्रविशति । तस्मादस्मिन् वाक्ये ब्रह्मक्षत्रमृत्यूनां भोग्यत्वेन ग्रहणादत्ता भगवानेवेति सिद्धम् ॥ ९ ॥

ननु किमित्येवं प्रतिपाद्यते । पूर्वपक्षन्यायेन यमोऽन्यो वा मृत्युं साधनीकृत्य स्ववशे सर्वं करोतीति जीववाक्यमेव किं न स्या-

---

न दोषः । ननु भवत्वेवं, तथापि क्लिष्टकमेतत् कथं निवर्ततामित्यत आहुः । * ब्रह्मक्षत्रेत्यादि * । मोक्षापेक्षिणो ह्यत्रादनीयत्वेनाभिमेयन्ते । ते च देहसम्बन्धे निवृत्ते मुच्यन्ते, न तु सदेहाः । अतो यथा तण्डुलानां वन्ह्यादिसम्बन्धेनावयवशैथिल्येन विक्लित्तावोदनत्वं, तथात्र मोक्षापेक्षिणां भोक्तरि भगवति प्रवेशार्थं कथञ्चिन्मृत्युसम्बन्धमात्रेण योग्यरूपत्वमेवौदनत्वम् । यथा कंसादीनां, कुरुपाण्डवसैन्यानां च । अत एव, तदेव रूपं दुरत्ययमाप, यात्यन्त्यदर्शनमलं यत्भीमपार्थव्याजाह्वयेन हरिणा निलयं तदीयमित्यादीनि वाक्यानि । नचैवं मृत्योरुपसेचनत्वासम्भवः । अत्राप वै मृत्युर्जायत इत्यनेकमृत्युपक्षे, अशनायया मृत्युरेवेत्येकमृत्युपक्षेऽपि मुच्यमानब्रह्मक्षत्रप्राणानामत्रैव समवनीयन्ते प्राणा इति श्रुतेरस्मिन्नेव लयेन तद्धर्माशनायादिरूपो मृत्युरपि तेषां जन्ममरणाद्यभावाय भगवत्येव प्रविशतीति तस्योपसेचनत्वमपि युक्तमेव । एवं सिद्धे तेषामोदनोपसेचनभावे तदत्तृत्वेनाक्लिष्टकर्मत्वमपि भगवतोऽनायासेनैव सिद्धम् । दुश्चिकित्स्यव्रणादिव्यापन्निवारकागदङ्कारकृतनिबन्धस्योपशमफलत्वात् । एवं मलयेऽपि सुषुप्तिवत्सुखजनकत्वमेव । नानासंसृतिक्लेशनिवृत्तिफलकत्वात् । तस्मादत्र बाधकानामभावात् साधकयुक्तीनां सत्वादस्मिन् वाक्येऽत्ता भगवानेवेति सिद्धमित्यर्थः । किञ्च । मोक्षापेक्षिब्रह्मक्षत्रप्राणानामुत्क्रमणाभावेनान्तःप्रकटे भगवत्येव लयादन्तर्यामित्वमपि सिद्धं ज्ञेयम् ॥ ९ ॥

सूत्रान्तरमवतारयितुं चोदयन्ति * नन्वित्यादि * । अयमर्थः ।

दिशत आह।

प्रकरणाच्च ॥ १० ॥

प्रकरणं हीदं ब्रह्मणः। न जायत इत्यारभ्याऽऽसीनो दूरं व्रजतीत्यादिना माहात्म्यं वदन्नन्ते, यस्य च ब्रह्म च क्षत्रं चेत्याह। अतःप्रकरणानुरोधात् पूर्वोक्तप्रकारेण ब्रह्मवाक्यत्वमिति। अन्यथा प्रकृतहानाप्रकृतकल्पने स्यातामिति चकारार्थः॥ १०॥

विषयवाक्ये पक्षादिबोधकपदाभावेऽपि चराचरादिपदैर्मृत्व्वादिगतं धर्ममादृत्य योगवृत्त्या तानि बोधयित्वा तेषां ग्रहणस्य लिङ्गत्वं च कल्पयित्वा निर्बन्धेन ब्रह्मवाक्यत्वकल्पनापेक्षया पूर्वपक्षोक्तानां निमित्तत्वादीनां शीघ्रं बुद्ध्यारोहात् तेन न्यायेन जीव एवात्र महीतुमुचितः। स चेत् साधारणो न समर्थस्तदा संहारेऽधिकृतो यमो देवतारूपं मृत्युं, देवतारूपो मृत्युर्वा रोगादिरूपं मृत्युं साधनीकृत्य ब्रह्मक्षत्रोपलक्षितं सर्वं प्राणिजातं स्ववशे करोतीति युक्तम्। अतोऽस्य जीववाक्यत्वमेवादरणीयमिति। अत्र सूत्रं पठित्वा व्याचक्षते॥ प्रकरणाच्चेति॥ जीवप्रश्नोत्तरश्रवणानन्तरम्, अन्यत्र धर्मादन्यत्राधर्मादिति प्रश्नान्तरे कृते सर्वे वेदा यत् पदमामनन्तीत्यादिना प्रकरणान्तरं प्रवृत्तमत इदं ततोऽतिरिक्तस्य ब्रह्मणः प्रकरणम्। तत्र सर्वे वेदा इति मन्त्रे सङ्क्षेपेण कथनं प्रतिज्ञाय, ओंकारस्य सङ्क्षेपरूपतामुक्त्वा एतद्ध्येवाक्षरं ब्रह्मेति मन्त्रद्वयं सर्वफलदायकत्वादिना तत्प्रशंसामुक्त्वा तत्प्रतिपाद्यस्य ब्रह्मणो माहात्म्यं, न जायत इत्यादिभिरष्टभिर्मन्त्रैर्वदन्नन्ते तस्यैवात्तृत्वं मृत्युरेवाह। तद्यदि यमो देवतारूपो मृत्युर्वात्तृत्वेनाभिप्रेतः स्यात् तदा, न जायत इति मन्त्रे तस्य जननमरणाभावं न घटेत्। पुराणादिपूभयोरपि जन्यत्वस्मरणात्। यमो यमी श्राद्धदेव इति, ततोऽपानस्ततो मृत्युरिति। वेदेऽपि न मृत्युरासीदमृतं न तर्हीति। जन्यत्वं च नद्वत्त्वव्याप्तम्। तथाऽऽसीनमन्त्रे, कस्तं मदामदं देवं मदन्यो ज्ञातुमर्हतीति स्वस्य तस्य च भेदेन ज्ञातृज्ञेयभावं च न घटेत्। अत इदं मृत्य्वादिदेवताव्यतिरिक्तस्य ब्र-

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ ११ ॥

ह्मण एव प्रकरणम् । तथा सत्यासीनादिमन्त्रेषु यथा विरुद्धधर्माधारत्वादिरूपं तन्माहात्म्यमवद्वत्तथोक्तविधात्तृत्वस्वरूपमपीति तदेरर्थः । शेषं स्पष्टम् । अत्र चात्तृत्वस्य ब्रह्मणि निश्चायनात् प्रलयकर्तृत्वनिर्वाहकसामर्थ्यमवसरसङ्गत्योक्त्वा तदसम्भवो निवारितः । सर्वे वेदा, एतद्ध्येवाक्षरमित्युपक्रमात् सर्वरूपत्वात्मकं वैरूप्यमपि जीवतुल्यभोगाभावार्थं सूचितं ज्ञेयम् ।

माध्वास्तु, स यद्यदेवाऽसृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति सर्वमदितेरदितिं त्वमिति बृहदारण्यकीयाग्निब्राह्मणस्थश्रुतिं विषयवाक्यत्वेनोदाहरन्ति ।

विज्ञानभिक्षुस्तु, 'य इमं मध्वदं वेदात्मानं जीवमन्तिकात् । ईशानं भूतभव्यस्य ततो न विजुगुप्सत' इति कठवल्लीस्थाम् ।

अत्तृत्वरूपस्य विषयस्य तत्र स्फुटत्वात् । अत्तृत्वं च प्रलयकर्तृत्वमेव सर्वे व्याकुर्वन्ति । तन्नु व्याख्यानं न युक्तम् । अत तत्प्रसङ्गादर्शनात् । पूर्वाधिकरणविषयवाक्ये तज्जलानिति विशेषणेन जन्मादित्रयस्य ब्रह्मकर्तृकताया उक्तत्वात् प्रथमपादे चोपपादितत्वात् तेषु केवलस्य संहर्तृत्वस्यैवेह पुनर्विचारे कारणस्यानुपलम्भाच्च । अतोऽत्र तद्भिन्नस्य प्रलयातिरिक्तकालिकमोक्षफलकस्य धर्मान्तरस्यैव विचार इत्येव युक्तम् । जिज्ञासासूत्रे सम्बन्धपद्धत्या उपपादितत्वेन ज्ञानोपासनयोस्तद्धर्मविचारस्यैवायोगिनया आवश्यकत्वादिति । भिक्षूदाहृतस्य तु भूतभव्येशानत्वरूपे स्पष्टे ब्रह्मलिङ्गे विद्यमाने उपपादनसापेक्षलिङ्गग्रहणस्यानवसरपराहतत्वमेव । माध्वोदाहृते तु, नैवेह किञ्चनाग्र आसीन्मृत्युनैवेदमावृतमासीदशनायया ऽशनाया हि मृत्युरित्युपक्रमे जिघत्साश्रावणात् तस्याश्च श्रुत्यन्तरे विजिघत्सोऽपिपास इति ब्रह्मणि निषेधेनोपपादनसापेक्षत्वात् प्रकरणस्यापि सन्दिग्धत्वमेव । तस्मादुक्तमेव विषयवाक्यं युक्तमिति दिक् ।

शैवस्तु प्रहस्तादेव पराहत इति न तदर्थं पुनः प्रयतनम् । अतः पूर्वोक्तमक्षुण्णम् ॥ १० ॥ ॥ ३ ॥

गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ॥ अयं भोगो व्यापिवैकुण्ठे

तस्यैवाग्रे पठ्यते । ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे । छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेता इति ।

किमिदं ब्रह्मवाक्यमाहोस्विदन्यवाक्यमिति । अस्य वाक्यस्योत्तरशेषत्वे जीवप्रकरणपठितत्वान्न ब्रह्मवाक्यत्वम् । पूर्वशेषत्वे तु ब्रह्मवाक्यमिति प्रकरणनिर्णयः । मध्ये पाठादेवं

अन्यत्र वास्तु, न त्वन्तर्हृदयेऽपीत्याशङ्कावारणाय। किञ्च, ये पूर्वाधिकरणेषु धर्मा उक्तास्तेऽन्तर्वर्तिन उक्ताः । अन्तर्वर्ती च ह्यन्तःपुरुष इत्यादिश्रुत्या, अहमित्यादिप्रत्ययविषयतया चान्तर्वर्ती जीवसिद्धः। ब्रह्म तु व्यापकत्वात् सार्वत्रिकमुदासीनं, न त्वन्तरेव विशेषतः सिद्धम् । तथा सति पूर्वाधिकरणेषु यन्माहात्म्यमुक्तं तज्जीव एव भविष्यति, न ब्रह्मणीति जीवनिवारणे तत्र तत्साधनाय चेदमधिकरणमुपोद्घातसङ्गत्या आरभ्यत इत्याशयेन विषयवाक्यस्थलकथनपूर्वकं तद्वाक्यमुदाहरन्ति *तस्यैवाग्र इत्यादि*।पुरः स्फूर्तिको वाक्यार्थस्तु, ऋतं सत्यं सुकृतस्य सम्यक्स्वयमवगत्य कृतस्य कर्मणः फलं पिबन्तौ भुञ्जानौ । यद्यप्येको भुङ्क्ते, नेतरस्तथापि, छत्रिणो यान्तीतिवत् समुदाये गौण्या पिबन्ताविति प्रयोगः । लोके अस्मिञ्छरीरे, गुहां हृदयाकाशं प्रविष्टौ । गुहामिति सप्तम्यर्थे द्वितीया । गुहाया विशेषणं, परमे परार्द्धे इति । बाह्यपुरुषस्थानापेक्षया परम उत्कृष्टे । तत्र हेतुः परार्द्धत्वम्।.परार्द्धं ब्रह्मणः स्थानम् । तत्र हि भक्तैर्ज्ञानिभिरुपासकैश्च ब्रह्मोपलभ्यत इति । तौ छायातपौ संसारित्वासंसारित्वाभ्यां धर्माभ्यां परस्परविलक्षणौ ब्रह्मविदो वदन्ति कथयन्ति । न केवलं त एव कथयन्ति,किन्तु पञ्चाग्नयस्त्रिणाचिकेताः श्रौतस्मार्ताग्निमन्तस्त्रिकृत्वो नाचिकेतोऽग्निर्यैश्चितस्तादृशा गृहस्था अपि वदन्तीति।मुख्योऽर्थस्त्वग्रे भाष्य एव वक्तव्यः । तत्रोक्तेऽर्थे संशयं तद्बीजं चाहुः । *किमिदमित्यादि * । *प्रकरणनिर्णय इति* प्रकरणेन कृतो निर्णयः।ननु वल्लीसमाप्त्या पूर्वप्रकरणसमाप्तेस्तदुत्तरप्रकरणगतत्वस्य स्फुटत्वात् कथं सन्देह इत्यत आहुः । *मध्य इत्यादि* तथाच, 'स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्षया । वाक्यानामेकवाक्यत्वं पुनः संहत्य जा-

सन्देहः । अर्थविचारे तु द्विवचननिर्देशात् पूर्वशेषत्वे बद्धमुक्तजीवौ भविष्यतः । उत्तरशेषत्वे त्विन्द्रियमनसी । उभयथापि न ब्रह्मवाक्यम् । द्वयोर्मुख्यत्वेन प्रतिपादनात् । ब्रह्मवाक्यत्वेऽपि न प्रयोजनसिद्धिः ।

अथ मन्यते, उपनिषत्पाठादन्यत्रानिर्द्धाराज्जीवब्रह्मपर-

यत्वं इति पूर्वतन्त्रे सिद्धत्वात् कयाचित् सङ्गत्या पूर्वशेषत्वस्यापि शक्यवचनत्वाद्, आत्मानं रथिनं विद्धीत्यादेः प्रागेव पाठाच्च सन्देह इत्यर्थः । ननु तर्ह्यर्थेन निर्णयोऽस्त्वित्यत आहुः । * अर्थेत्यादि * । * बद्धमुक्तजीवाविति * हन्ता चेन्मन्यते हन्तुमित्यनेन बद्धस्य, मत्वा धीरो न शोचतीत्यनेन मुक्तस्य च पूर्वमुक्तत्वात् तदनन्तरपठितस्य द्विवचनस्य तद्विषयत्वप्रत्यभिज्ञानात्तावेव युक्तौ, न तु जीवपरमात्मानौ । अनश्नन्नितिश्रुत्या परमात्मनो भोगाभावादिति । * इन्द्रियमनसी इति * यस्त्वविज्ञानवान् भवतीत्यादौ तयोरेवाग्रे निरूपणात् । पिबन्ताविति पानकर्तृत्वव्यपदेशस्त्वेधांसि पचन्तीतिवत् करणे कर्तृत्वोपचाराद् बुद्धिजीवपक्षे बुद्धौ केवलायामिवोभयत्राप्युपपत्स्यत * उभयथेति * उत्तरशेषत्वे पूर्वशेषत्वे च । ननु, येयं प्रेते विचिकित्सेत्यनेन जीवस्य, अन्यत्र धर्मादन्यत्राधर्मादित्यनेन परमात्मनश्च पूर्वं पृष्टत्वात् पूर्वशेषत्वाङ्गीकारे जीवपरमात्मानौ सुखेन सम्भविष्यत इति तावेवात्र ग्राह्याविर्त्येकदेशिकृतं समाधानं दूषयन्ति * द्वयोरित्यादि * ब्रह्मवाक्यत्वाय हि परमात्मनिरूपणमवाङ्गीकार्यम् । तत्प्रयोजनं च मुख्यतया परमात्मनो मोक्तृत्वप्रतिपत्तिः । सा तु द्वयोस्तुल्यतया मुख्यत्वेन प्रतिपादनाद् दुर्घटेत्यपार्थं तस्य ब्रह्मवाक्यत्वमित्यर्थः । ननूपनिषदो रहस्यविद्यास्तासु यदुच्यते, तन्निर्द्धारितमेवोच्यते । अत उभयोर्भोक्तृत्वमन्यत्रानिर्णीतमत्र निर्धारयितुं प्रवृत्तं वाक्यमिन्द्रियमनसोर्ग्रहण उपचारदोषेण दुष्यतीति तदभावायास्य जीवब्रह्मपरत्वाङ्गीकारेऽपि तयोरचस्याभेदेनैव भिन्नतया वस्तुन एषणाद् वाक्यस्योभयपरत्वेऽपि ब्रह्मवाक्यत्वमक्षतमित्येकदेशिकृतं समर्थनं दूषणार्थमनुवदन्ति । * अथेत्यादि * । तद् दूषयन्ति ।

त्वेऽपि तयोरभेदाद् ब्रह्मपरतैव वाक्यस्य युक्तेति। तथापि कस्य निर्णायकत्वं, प्रकरणस्यार्थस्य वेति। उभयोरपि सान्दिग्धत्वादयुक्तो विचार इति चेदुच्यते।

सन्देहवारकं शास्त्रं पदशक्त्या तु निर्णयः।
जीवादुत्कर्षशब्देन द्वयोर्वाक्येऽपि न क्षतिः॥ १॥

गुहाहितशब्दाभ्यामित्यर्थः।

ऋतं पिबन्तावित्यत्रैवं संशयः। किं जीवद्वयं निरूपयति, आहोस्विज्जीवब्रह्मणी वेति। तत्र ब्रह्मप्रकरणस्य सामान्य-

---

तथापीत्यादि सन्दिग्धत्वादिति। अर्थस्य सन्दिग्धत्वं जीवद्वयनिरूपणकोट्यनिरासाद् बोध्यम्। तथाच तदङ्गीकारे विचारवैयर्थ्यमित्यर्थः। एवमेकदेशिमतदूषणेन विचारमाक्षिप्य तत् समर्थयन्ति *उच्यत इत्यादि*। शास्त्रं व्यासप्रणीतं श्रौतवाक्यस्यसन्देहवारकम्। अतस्तत्र पूर्वं सन्देहाकारस्य निर्णयः कार्यः। अन्यथा तु समाधानमनर्थकमेव स्यात्। ननूक्तयोरुभयोरपि सन्दिग्धत्वात् केन स निर्णय इति शङ्क्याम्। * पदशक्त्या तु निर्णयः *। सन्देहाकारस्य। कस्य पदस्य शक्त्येति चेत्। * जीवादुत्कर्षशब्देन *। जीवं प्राप्य उत्कर्षबोधको यः शब्दस्तेन। वाक्ये द्वयोः पक्षयोर्न क्षतिः। तथाच तादृशपदस्य शक्त्या जीवद्वयपक्षो जीवपरमात्मपक्षश्चेति द्वावपि संग्रहीतुं शक्येते इत्यर्थः। जीवादुत्कर्षशब्दः को वेत्यपेक्षायां व्याकुर्वन्ति * गुहेत्यादि* इदं पूर्वोत्तरपक्षयोर्विवरण एव स्फुटीभविष्यति। ननु, यः सेतुरीजानानामिति मन्त्रस्यापि प्रकरणद्वयमध्ये पाठोऽस्तीति स कुतो न विचार्यत इत्यत आहुः * ऋतमित्यादि * तथाच तत्राक्षरं ब्रह्म स्फुटमेव श्रूयत इति सन्देहाभावात् स न विचार्यते, किन्त्वयमेवैवं संशयादयमेव विचार्यत इत्यर्थः। एवं संशयं साधयित्वा पूर्वपक्षमाहुः। * तत्रेत्यादि *। अयमर्थः। यद्यस्मिन् मन्त्रे ब्रह्मैव प्रतिपाद्यं भवेत् तदा पूर्ववल्ल्यामिवात्राप्युपास्यत्वेन प्राप्यत्वेन,

त्वाद्, यस्तु विज्ञानवान् भवतीत्यग्रे विद्वदविद्वतोर्वक्तव्यत्वात् तदर्थमुभयोः प्रथमं निर्देश उचितः । मन्त्रेऽपि, ऋतं स्वर्गापवर्गलक्षणं सुखम् । मार्गद्वयस्यापि विहितत्वात् सुकृतलोकत्वम् । गुहा तत्त्वविचारो हृदयं वा । जात्यपेक्षया त्वेकवचनम् । परमपरार्द्धं सत्यलोकः । तत्रोभयोर्भोगात् । अविद्यया पिहितप्रकाशत्वादविदुषश्छायात्वम् । ब्रह्मज्ञानेनातिप्रकाशत्वादातपत्वं विदुषः । अत एव विदुषः स्वरूपं ब्रह्मविदो वदन्ति । पञ्चाग्नयस्त्रिणाचिकेताश्चेतरम् । इन्द्रियमनसोस्त्वचेतनत्वान्न वाक्यार्थसङ्गतिः । वाक्यार्थयोगे हि विशेषणनिर्णयः । तस्माद् बद्धमुक्तजीवपरतयोपपन्नत्वात् तत्प्रकरणपाठान्न ब्रह्मवाक्यमिति । एवं प्राप्ते, उच्यते ।

गुहां प्रविष्टावात्मानौ । गुहा हृदयाकाशस्तत्र सकृदेकस्मिन्

य ब्रह्मोच्यत इति प्रकरणस्य तौल्यादेकवचनमेवात्र घटेत् । यदाति द्विवचनमतोऽत्र, न ब्रह्माभिप्रेतं, किन्तु बद्धमुक्तजीवावेवाभिप्रेतौ । अतः प्रथममुभयोर्निर्देशः । नचैवं मन्त्रवर्णासङ्गतिः । मन्त्रेऽपि ऋतपदेनोक्तरीतिकं द्विविधसुखमुच्यते । प्रवृत्तिनिवृत्तिरूपस्य मार्गद्वयस्यापि विहितत्वात् सुकृतत्वेन तज्जन्यस्य शरीरस्य लोकत्वम् । तत्र गुहा तत्तदुपयोगी तत्त्वविचारो गुहेव गुहा । यदि सैषा नाद्रियते, तदा हृदयाकाशः । नच विचारादेर्भिन्नत्वाद् द्विवचनं शङ्क्यम् । जात्यपेक्षयैकवचनस्यापि युक्तत्वात् । परमः परश्चतुर्मुखो यत्र मीयते तादृशं परार्द्धमुत्तमं सत्यलोक एव । तत्रोभयोः शतजन्मीनस्वकर्मशुद्धस्य कर्मिणो, वेदान्तविज्ञानसुनिश्चितार्थस्य सन्न्यासिनश्च भोगादिति । * विद्वदविद्वतोरिति * विच्छब्दान्मतुप्प्रयोग इति सम्बन्धे । शेषं स्फुटम् । पूर्वपक्षमुक्त्वा समाधानं व्याकुर्वते । * गुहामित्यादि * । एकस्मिन्निति * एकदेशेत्यर्थः । अत्र हेतुर्हियच्छब्देन सूच्यते ।

प्रविष्टौ जीवपरमात्मानावेव । अनेन जीवेनात्मनानुप्रविश्ये-त्युभयोः प्रवेशश्रवणात् । न ह्येकस्मिन् हृदयाकाशे जीवद्वयं प्रवेष्टुमर्हति । अर्थस्त्वेवं सम्भवति । पूर्वाधिकरणे यथाभिलपि-तभोगो भगवति साधितः । प्रकारान्तरेणापि, ऋतं सत्यं परं ब्र-ह्मेति ऋतसत्ययोर्ब्रह्मत्वप्रतिपादनात् स्वरूपाऽनुपातारां । सुकृतमपि ब्रह्मैव । तस्मात् तत्सुकृतमुच्यत इति श्रुतेः । स एव लोकः । उपचारात् षष्ठी ।

ते विवृण्वन्ति । * अनेनेत्यादि * अनेन जीवेन सहात्मनेत्यर्थः । नच सहार्थ-तृतीया चेत् स्यात् तदाकं सम्भवेत् । सैवात्र मन्दिग्धेति वा-क्यम् । गुहाहितं गह्वरेष्ठं पुराणं यो वेद निहितं गुहायां परमे व्योम-न्नित्यादौ श्रावितस्यं निहितत्वादेः स्वरूपेण प्रवेशं विनानुपपत्त्यात्र तथा निश्चयात् । यद्यपि तत्र परमात्मनः लिङ्गत्वनिर्देशस्तथापि, तत् सृष्ट्वा तदेवानुप्राविशत्, तदनुप्रविश्य सच्च त्यच्चाभवदिति श्रुत्य-न्तरात् प्रवेशहेतुक एवेत्यर्थः । नन्वत्र जीवपदात् तयोरेव सोऽस्त्व-स्यत आहुः । * न हीत्यादि * हृदयाकाशे हि जीवस्य प्रवेशो नामा-दिव्याकरणार्थः । व्याकरणं चैकेनैव सम्भवति । अत एवैकवचनं-म् । अन्यथा जीवाभ्यामित्यादि वदेत् । पुराणेष्वपि, 'चित्तेन हृदयं चैत्यः क्षेत्रज्ञः प्राविशद्यदा । विराट् तदैव पुरुषः सलिलादुदतिष्ठत' इत्यादौ देहोत्थापनायाप्येक एवोक्तः । अतो व्यष्टिदेहेऽप्येक एव म-न्तव्यः । अन्यथा करणाधिपौ द्वौ स्याताम् । ततश्च सुकृतदुष्कृतभो-गोऽपि श्रुत्यादौ द्वयोरुच्येत । व्यवस्था च भज्येत । अतो जीवद्वयमे-कत्र प्रवेष्टुं नार्हतीति कार्यबलात् सहार्थेऽपि सती तृतीया जीवस्य ब्रह्मसाहाय्यमेव गमयतीत्यर्थः । ननु भवत्वेवं तत्र, तथापि प्रकृतमन्त्रा-र्थः कथं सङ्गच्छत इत्यत आहुः । * अर्थ इत्यादि * यथेति भिन्नं पदं नित्यसम्बन्धात् तथापदमध्याहरति । तेनास्मिन्नधिकरणे जीवेन सहापि विवक्षितरीतिकं भोगं साधयतीत्यर्थः । तमेव प्रकारं स्फु-टीकुर्वन्ति । * ऋतमित्यादि * । * उपचारादिति * राहोः शिर इतिवदभेदेऽपि भेदोपचारात् । उपचारमरोचयन्तो लोकपद-

माणत्वेन, 'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक' इति समनन्तरमन्त्रे च जीवपरमात्मनोरुक्तत्वेनासन्दिग्धतया जीवान्तरस्य जडस्य च तत्र द्वितीयकोटयप्रवेशाज्जीवपरमात्मानौ स्फुटौ प्रतीयेते । अतो न्यायप्रयोजनाभावादयुक्तमित्यर्थः । नच तत्र परमात्मनोऽनश्नत्त्वस्योक्तत्वाद्, ऋतं पिबन्ताविव्यत्र जीवद्वयमेव युक्तमिति शङ्क्यम् । पूर्वोक्तयुक्तिभिर्द्वितीयस्य ब्रह्मत्वसिद्धौ जीवान्तरस्य तत्राशक्यवचनत्वेन ब्रह्मणो भोगसिद्धेर्द्वा सुपर्णेति मन्त्रे जीवदर्शनाभावस्यैवानश्नन्नित्यत्र व्याख्येयतया जीवद्वयस्याशक्यवचनत्वादिति । एवमत्र हृदयस्थस्य भोगसाधनेन पूर्वाधिकरणसिद्धोऽपि भोगः प्रकरणैक्यान्मोक्षापेक्षिहृदयस्थस्यैवेति साधितम् । तथा मन्त्रव्याख्यानेनानन्दमयरूपं वैशिष्ट्यं च बोधितम् ।

शङ्कराचार्यास्तु, द्वा सुपर्णेतिमन्त्रमुपन्यस्य पैङ्गिरहस्यब्राह्मणे, तयोरन्यः पिप्पलं स्वाद्वत्तीति सत्त्वम् । अनश्नन्नन्यो अभिचाकशीतीत्यनश्नन्नन्योऽभिपश्यति ज्ञः । तावेतौ सत्त्वक्षेत्रज्ञाविति व्याख्याय, तदेतत् सत्त्वं येन स्वप्नं पश्यत्यथ योऽयं शारीर उपद्रष्टा स क्षेत्रज्ञस्तावेतौ सत्त्वक्षेत्रज्ञाविति तत्र निष्कर्षादन्त्यः सिद्धान्तस्तत्र न युज्यते । तर्हीनदधिकरणपूर्वपक्ष एव तदर्थोऽस्त्विति चेत् सोऽपि न । न ह वा एवंविदि किञ्चन रज आध्वंसत इत्यादिफलकथनात् । नचैवं संसारधर्मातीतो ब्रह्मस्वभावश्चैतन्यमात्ररूपोऽभिप्रेयते । अनश्नन्नन्योऽभिपश्यति ज्ञ इति व्याख्यानात् । यत् पुनः सत्त्वस्य भोक्तृत्वकथनं तत्तु सुखादिविक्रियावति सत्त्वेऽध्यारोपेण । अस्याः श्रुतेः क्षेत्रज्ञाभोक्तृत्वबोधन एव तात्पर्यात् । न ह वेत्युक्ते फलवाक्ये अविद्यासम्बन्धाभावरूपफलकथनेन तथा निश्चयात् । इदं हि कर्तृत्वभोक्तृत्वं सत्त्वक्षेत्रज्ञयोरितरेतरस्वभावाविवेककृतं कल्प्यते । वस्तुतस्तु सत्त्वस्याचेतनत्वात् क्षेत्रज्ञस्य चाविक्रियत्वाद्भोक्तृत्वमनर्थकस्यापि । किञ्च । सत्त्वस्याविद्याप्रत्युपस्थापितसद्भावत्वेन तत्त्वनाऽसत्त्वात् सुतरां न सम्भवतीत्याहुः ।

तन्न । प्रपञ्चस्य ब्रह्मात्मकतायाः समन्वयसूत्र एव व्युत्पादितत्वेन, आविद्यकत्वस्य च, तदनन्यत्वादिसूत्रेषु दूष्यत्वेन सत्त्वासद्भावस्याभ्युपगमैककारणत्वात् सिद्धे तत्सद्भावे तस्य जडत्वेनाभोक्तृत्वेऽपि तेन जीवोपभुज्यमानभोगानादरस्यायुक्तत्वात् । नचानश्नदादि·

अन्तर उपपत्तेः ॥ १३ ॥

पद्व्याख्यानव्याकोपः शङ्क्यः। येन स्वप्नं पश्यतीत्यस्य येन हेतुना स्वप्नं पश्यति तत् तस्माद्धेतोरेनत् स्वप्नद्रष्टृ सत्त्वं सत्त्वोपाधिकं चैतन्यमित्येवमुक्तं व्याख्यायाथ योऽयमित्यादिना मुक्तं व्याकरोतीत्यमुक्तजीवीयभोगस्य मुक्ताभोगस्य च सिद्धेस्तदभावादिति । नचैकस्मिञ्छरीरे जीवद्वयनिवेशस्यासङ्गतत्वान्नायं श्रुत्यर्थ इति शङ्क्यम्। अत्र, समानं वृक्षमिति समानपदस्य तुल्यवाचकतया शरीरभेदस्यैवाभिप्रेतत्वेनोक्तदोषाभावात्। नचैवं जीवानां बहुत्वेन, द्वा इत्यादिद्वित्वसंख्याविरोधः। प्रकारपरत्वेनाविरोधात् । संयुक्तस्य ह्येककालावच्छिन्नप्रवेशत्वेनाप्युपपत्तेः। सखित्वस्य चाक्षण्वन्तः कर्णवन्तः सखाय इतिवत् सारूप्येणोक्तेः। अतो, नैव किञ्चित् करोमीतिन्यायेन ध्यातव्यमित्युपदेशायेदं पैङ्गिरहस्यव्याख्यानम् । न ह वा एवं विदीति फलवाक्येन तथा निर्णयात्। नचैवं श्रौतव्याख्यानुरोधेन मुण्डकाद्युक्तैतन्मन्त्रेऽप्ययमेवार्थोऽस्तु, न तु जीवब्रह्मपर इति शङ्क्यम् । तत्र प्रकरणस्य ब्राह्मत्वेन ब्रह्मणः प्रतिक्षेपानर्हत्वात् । अतो, द्वयश्रोतपूभौ द्वयाम्नानस्यैवत्वादिति पूर्वतन्त्रीयन्यायाद् द्वावप्यर्थौ प्रकरणानुरोधात् तत्र तत्र व्यवस्थितावङ्गीकार्यौ । तत्र पाठविशिष्टमन्त्रस्यैवाम्नायविशिष्टस्यैव तस्य प्रकरणिना ग्रहणात्। अर्थभेदं विना व्याख्यानवैयर्थ्यादिप्रसङ्गादिति । अतो मन्त्रवर्णैक्येऽप्यर्थभेदान्नैकवाक्यत्वम् । श्रुतमित्यस्य तूभयभेद इति सुतरां तथेत्यस्मिन् मन्त्रे तन्न्यायसंचारणमसङ्गतमेवेति दिक् ।

एवञ्चात्र परमात्मनोऽलौकिकभोगयोगे दोषराहित्यस्य प्रसङ्गेन विचारात् प्रलयकर्तृत्वं दोषरहितत्वं समर्थितमितीदं पूर्वस्यैव शेषः ॥ १२ ॥ ॥ ४ ॥

अन्तर उपपत्तेः ॥ अतीतेषु त्रिष्वधिकरणेषु प्रथमे वैरूप्येण लौकिकभोगबाधकं रूपं परिहृत्याग्रिमाभ्यां चराचरग्रहणाद्युगपदुभयप्रवेशाच्च सम्पद्यमानदशायां मोक्षदशायां चेत्युभयविधोऽपेक्षितो भोगः साधितः । इदानीं संसारदशायां किं वैरूप्यमित्याकाङ्क्षायां तन्निर्णेतुमिदमारभ्यत इत्युपोद्घातरूपां सङ्गतिं बोधयितुं वि-

य एषोऽक्षिणि पुरुषो दृश्यते। एष आत्मेति होवाचैतदमृतमभयमेतद् ब्रह्मेति । तद् यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनी एव गच्छतीत्यादि श्रूयते । तत्र संशयः । प्रतिबिम्बपुरुषस्य ब्रह्मत्वेनोपासनापरमिदं वाक्यं, ब्रह्मनामकमेवेति वा। विरुद्धार्थवाचकत्वात् सन्देहः ।

तत्र दृश्यत इति वचनात् प्रतिबिम्ब एवायम । ब्रह्मप्रकरणस्य च समाप्तत्वादेषा सौम्य तेऽस्मद्विद्या आत्मविद्या चेत्युपसंहारदर्शनात् तत्सिद्ध्यर्थमुपासनापरत्वेन वाक्यस्य युक्ता ।

यवाक्यमुदाहरन्ति । * य एष इत्यादि * । * श्रूयते इति * छान्दोग्ये षष्ठे प्रपाठके उपकोसलविद्यायां श्रूयते । वाक्यार्थस्तु, ब्रह्मेत्यन्तं पुरःस्फूर्तिकः। अग्रे तु पूर्ववाक्ये यदाचार्येणोक्तम्, अहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यत इति फलम । तत्र निदर्शनं स आह । *तद् यद्यपीत्यादि* तत् तत्र इदं निदर्शनम्। यद्यप्यस्मिन् अक्षिपुरुषस्थानभूते अक्षिणि, सर्पिर्वा उदकं वा सिञ्चति धारया भूयः पातयति, वर्त्मनी अक्ष्यावरणादिभूते पक्ष्मणी एव गच्छति प्राप्नोति । ते एवार्द्रे स्निग्धे च भवतो, न त्वक्षि। तथाच यत्स्थानस्येदृशं माहात्म्यं तस्य ज्ञाने सति पापसंश्लेषो न भवतीत्यत्र किं वक्तव्यमिति बोध्यः ।

अत्रान्यैश्चतुष्कोटिकः संशय उपन्यस्तः। किमत्र प्रतिबिम्बात्मा निर्दिश्यते, विज्ञानात्मा वा, इन्द्रियाधिष्ठातृदेवता वा, परमेश्वरो वेति । स न युक्तो, दृश्यत इतिपदेन विज्ञानात्मदेवतयोरदृश्यमानयोर्निरासादिति बोधयितुं संशयाकारमाहुः *तत्रेत्यादि* । ननु दर्शनविषयत्वं ब्रह्मणोऽपि नास्तीति संशय एवात्र न घटत इति शङ्कायां तद्बीजमाहुः । * विरुद्धेत्यादि * दृश्यते इत्युक्तं दर्शनम, अमृतत्वादिकं च परस्परविरुद्धार्थौ, तद्वाचकत्वात् तथेत्यर्थः । पूर्वपक्षमाहुः । * तत्र दृश्यते इत्यादि *। प्रकरणसमाप्तौ हेतुरुपसंहारदर्शनादिति। *तत्सिद्ध्यर्थमित्युपसंहारसिद्ध्यर्थम्। ननु मास्तु तत्रोपसं-

अविरोधे हि ब्रह्मपरता । उपास्यत्वेन ब्रह्मधर्माणामन्वयो भविष्यतीत्येवं प्राप्त उच्यते । अन्तरः, अक्षिमध्ये दृश्यत इत्युक्तः परमात्मैव । कुतः । उपपत्तेः । उपपद्यते हि तस्य दर्शनमार्षम् । सर्वत्र ब्रह्म पश्यन् बहिः सन्निधाने तस्य स्थानस्योत्कृष्टत्वात् तत्र भगवन्तमुपादिशति । लोकं वा व तेऽवोचमहं तु ते तद्वक्ष्यामीति महदुपक्रमाच्च ।

हारस्तथा सति प्रकरणैक्याद् ब्रह्मवाक्यत्वमेवास्येत्यत आह । * अविरोधे हीत्यादि । यदि हि दृश्यत इत्युक्तं दर्शनं न विरुध्यते तदा तथात्वं शक्यवचनं, न तु तद्बाधेऽपीत्यर्थः । ननु त्वन्मतेऽप्यभयादिपदविरोध इत्यत आह । * उपास्यत्वेनेत्यादि * सिद्धान्तं व्याचष्टे *उपपद्यत इत्यादि* । *आर्षमिति* साधनविशेषजन्यम् । तद्व्युत्पादयति *सर्वत्रेत्यादि* । *उत्कृष्टत्वादिति* जलाद्यसंश्लेषेण तन्माहात्म्यबोधकत्वात् । तेन स्थानव्यपदेशोऽपि न तस्य ब्रह्मत्वबाधक इत्यर्थः । नन्वात्मविद्योपसंहारस्य पूर्वं दर्शितत्वात् प्रकरणानुग्रहे हेतोः साध्यसमत्वे कथं ब्रह्मतासाधकत्वमित्यत आह । * लोकमित्यादि * उपकोसलेन ब्रह्मोपदेशोऽपह्नुतोऽपीमे नूनमीदृशा अन्वाहता इति वदता आचार्येणाग्निकृते उपदेशे ज्ञाते, उपकोसलेनाचार्याज्ञयाऽग्न्युक्तेऽनूदिते, आचार्यो लोकं वाव किल तेऽवोचन्नित्यनेन कं ब्रह्म खं ब्रह्मेति यदवोचन्नग्नयस्तल्लोकं प्राप्यमवोचन् । श्रुतौ लोकानिति पाठे स्वर्गिविद्याप्राप्याः पृथिव्यादय, आत्मविद्याप्राप्यं ब्रह्म चैकशेषवृत्त्या सङ्गृह्यते । तत्राग्निविद्योक्तलोकप्राप्त्युपायस्यादित्यपुरुषोपासनादिरूपस्य तैरुक्तत्वादात्मविद्योक्तलोकप्राप्त्युपायभूताम्, आचार्यस्तु ते गतिं वक्तेति तैराचार्यवक्तव्या गतिर्या बोधिता साऽवशिष्यते । सा तु ज्ञातापि तदा भवति यदा प्रतिबन्धकापगम इत्यभिसन्धायाचार्य आह । अहं तु ते तद्वक्ष्यामीत्यादि । तत एवं फले श्रुते, उपकोसलः श्रद्धापूर्वकं ब्रवीतु भगवानिति विज्ञापितवांस्तदा, य एषोऽक्षिणीत्याद्युक्तम् । तेन तद्वक्ष्यामीति या प्रतिज्ञा सा महत आत्मविद्यागतिकथनस्यैवोपक्रमस्तस्मात् । तथाचाग्निभिस्त-

प्रतिबिम्बमात्रस्य च न पुरुषत्वनियमः । तस्माद् विरोधाभावाद् ब्रह्मवाक्यमेव ॥ १३ ॥

स्थानादिव्यपदेशाच्च ॥ १४ ॥

एतं संयद्वाम इत्याचक्षते । एतं हि सर्वाणि वामान्यभिसंयन्ति । एष उ एव वामनीरेष हि सर्वाणि वामानि नयति । एष उ एव भामनीरेष हि सर्वेषु लोकेषु भातीति । वामानि कर्मफलानि । तेषामेव मनोहरत्वेन तदर्थं कर्मकरणात् । कर्मफललयः कर्मफलदानं च यत इति स्वर्गापवर्गफलदातृत्वमुक्तम् । सर्वलोकेषु भानं च । एष इति तमेवाऽक्षिपुरुषं निर्दिश्य स्थानादि व्यपदिश्यते । न हि प्रतिबिम्बात्मनः स्थानादिव्यपदेशः सम्भवति ।

दुपसंहारे कृतेऽपि पुनस्तस्या एवोपक्रान्तत्वेन प्रकरणस्य समत्वाच्च हेतोः साध्यसमत्वमित्यर्थः । ननु तथापि प्रकरणे श्रुत्यपेक्ष्य आह लत्वाद्दर्शनश्रुतिसङ्कोचोऽनुचित इति प्रतिबिम्बपुरुष एवात्राक्षिपुरुष इत्यत आहुः *प्रतिबिम्बेत्यादि*। सत्यं सङ्कोचोऽनुचितः स्याद् यदि दर्शनविषयस्य प्रतिबिम्बस्य पुरुषत्वं नियतं स्यात् । तदेव तु न । अन्येषामपि प्रतिबिम्बत्वात् । अतो विषयवशेन दर्शनश्रुतिसङ्कोचस्त्वन्मतेऽपि तुल्यः । प्रकरणविरोधश्चाधिक इति न प्रतिपुरुषस्योपासनाविधायकमिदं, किन्तु ब्रह्मवाक्यमेवेत्यर्थः ॥ १३ ॥

स्थानादिव्यपदेशाच्च ॥ पूर्वसूत्रोक्तस्य हेतोर्वादकवलितत्वात् सूत्रान्तरं पठतीत्याशयेन सूत्रं पठित्वा व्याचक्षते । * एतमित्यादि * तथा चान्तरपदेन पूर्वसूत्रादेव स्थानप्राप्तेरस्मिन् सूत्रे स्थानादीत्यत्रातद्गुणसंविज्ञान इत्यर्थः । एतेषां संयद्वामत्वादीनां कथं ब्रह्मत्वगमकतेत्याकाङ्क्षायामेतद् व्याकुर्वन्ति * वामानीत्यादि * । * कर्मफललय इति * एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतेः, सर्वं पद हस्तिपदे निमग्नमितियत् सर्वेषां सुखानां तत्रैव श्लिष्टत्वेन लोकादीनां तदवयवत्वेन च तत्रैव लय इत्यर्थः । एतेन स्थानपदस्यो-

चकारादेतत्तुल्यवाक्यस्याप्ययमेवार्थः । इन्द्रविरोचनप्रजापतिसंवादे । अथ योऽयं भगवोऽप्सु परिख्यायत इत्यादि । न तु य एषोऽक्षिणि पुरुषो दृश्यत इत्यादि । तस्मादक्षिपुरुषो ब्रह्मैव ॥ १४ ॥

सुखविशिष्टाभिधानादेव च ॥ १५ ॥

ननु किमिति निर्बन्धेन ब्रह्मवाक्यत्वं सम्पाद्यते । उपासनापरत्वे को दोष इत्याशङ्क्याह । सुखविशिष्टाभिधानात् । एतदमृतमभयमेतद् ब्रह्मेति । यद्यत्रोपासना विधीयेत, एष आ-

---

करीत्या लयार्थकत्वमित्यपि व्याख्यातम् । तदा तु तद्गुणसंविज्ञानं ...व । तथा चैतैः संयद्वामत्वादिभिरसाधारणधर्मैरत्र ब्रह्मैव निश्चीयते । ...: पूर्वसूत्रोक्तो हेतुरपि तस्यैव साधक इत्यर्थः । एवं न्यायं वा... ...न्ततेऽप्यतिदेष्टुं सूत्रे चकार इत्याहुः * चकारादित्यादि * । त... ...त्यन्ति * इन्द्रेत्यादि * । तत्रापि प्रथमे पर्याये, य एषोऽक्षिणी... ...स्यैतद् ब्रह्मेत्यन्त एवमेवोपदिष्टत्वात् तदित्यर्थः । ननु तत्र, अथ ...यमित्यादिना प्रश्ने प्रजापतिना, एष एवैषु सर्वेष्वन्तेषु परिख्यायत ...त प्रतिबिम्बस्यैव निगमनात् कथं तस्यैतदेकवाक्यत्वमिति शङ्कायामाहुः * अथेत्यादि * । एतदग्रे, उदशराव इत्यादिना इन्द्रविरोचनयोर्बोधं परीक्ष्य ताभ्यां शरीर एवात्मत्वेन ज्ञाते प्रजापतिना, अनुपलभ्यात्मानमित्यादिना तद्दोपकथनात् तस्यैवासुरत्वं बोधितम् । श्रुत्या चोपपादितम् । अनस्तदेवासुरं, न तु ततः पूर्वतनमपीत्यर्थः । नच प्रजापतिनैवं क्लिष्टं किमित्युपदिष्टमिति शङ्क्यम् । अधिकारपरीक्षार्थत्वात् । नच मिथ्याभाषित्वं प्रतारकत्वं वा । अन्तर्यामिब्राह्मणे तस्य सर्वान्तरत्वश्रावणात् प्रतिबिम्ब अवादौ चात्मनः सत्त्वेन, यत एतदुपनिषदो भविष्यन्ति देवा वाऽसुरा वा ते पराभविष्यन्तीति कथनेन तदुभयाभावादिति ॥ १४ ॥

सुखविशिष्टाभिधानादेव च ॥ अभिधानं विवृण्वन्ति * एतदमृतमित्यादि * । अयमर्थः । अत्र द्वेतादिदोषत्रयं पूर्वमभिधायाग्रे

रयेति । तदा अमृतादिवचनं व्यर्थं स्यात् । तद्धर्माणां पूर्वमेव प्राप्तत्वात् । तस्मादमृतमानन्दः, अभयं चिद्, ब्रह्म सद्, सच्चिदानन्द आत्मेत्युक्तं भवति । अत, एष इत्यक्षिपुरुषं निर्दिश्य सुखविशिष्टमभिधीयते । सच्चितोर्न ब्रह्मव्यापकत्वमिति सुखमेव निर्दिष्टम् । अतः सुखविशिष्टाभिधानादेव ब्रह्मवाक्यमिति । एषा मुख्योपपत्तिरित्येवकारः ।

चकारात् सदादिभिरपि। तस्माद् ब्रह्मैवाक्षिपुरुषः ॥१५॥

श्रुतोपनिषत्कगत्यभिधानाच्च ॥ १६ ॥

स्वरूपतो निर्णीय फलतो निर्णयमाह । श्रुतोपनिषत्कस्य, श्रुता उपनिषद् विद्या येन तस्य ब्रह्मविदो या गतिर्देवयानाख्या

संयद्वामत्वादय उच्यन्ते । तेनैतत्त्रयस्य स्वरूपबोधकत्वमिति ज्ञायते । तच्च सच्चिदानन्दात्मकमतोऽत्राऽमृतपदमानन्दवाचकमिति सनत्कुमारेण सुखरूपं भूमानं प्रस्तुत्य, यो वै भूमा तदमृतमिति छान्दोग्ये श्रावणाज्ज्ञेयम् । अभयपदं चिद्वाचकमिति त्वभयं ह वै जनक प्राप्तोऽसीति ज्ञानोपदेशोत्तरमभयपदेनोपसंहारात् । ब्रह्मपदं सद्वाचकमिति च, सत्यं ज्ञानमनन्तं ब्रह्मेत्यत्र प्रथमनिर्देशादिति । एव सति पूर्वं यदग्निभिः कपदेन सुखविशिष्टमुक्तं, तदत्राऽमृतपदेनाभिधीयते । नच सच्चितोरपि स्वरूपभूतत्वाद् ब्रह्मविव्यापकत्वं शङ्क्यम् । तयोर्यथायथं जडे जीवे च प्रकटत्वेनैकान्तिकतथात्वाभावात् । अतः सुखमेव विशेषणत्वेन निर्दिष्टम् । * सदादिभिरिति * आनन्दसहभूतैः सच्चित्संयद्वामत्वादिभिः ।

रामानुजाचार्यास्त्वेतदग्रे, अत एव च स ब्रह्मेति सूत्रान्तरं पठन्ति । अर्थस्तु, अत एव सुखविशिष्टाभिधानादेव, स खंपदोपदिष्ट आकाशो ब्रह्मेति । तत् पूर्वसूत्रेण गतार्थत्वादन्यैर्नाद्रियते ॥१५॥

श्रुतोपनिषत्कगत्यभिधानाच्च ॥ एतत्सूत्रप्रयोजनमाहुः । * स्वरूपत इत्यादि * । * फलत इति * ,फलस्य तात्पर्यलिङ्गत्वात् तथैः

साऽक्षिपुरुषविदोऽप्युच्यते । अथ यदु चैवास्मिन् शव्यं कर्म कुर्वन्ति, यदि च नार्चिषमेवाभिसम्भवन्तीत्युपक्रम्य चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयति । एष देवपथो ब्रह्मपथ इत्येतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते इति ब्रह्मविदोऽप्येष एव मार्गः पुनरावृत्तिविरहितः । चकारस्तूक्तसमुच्चयेनाधिकरणपूर्णत्वबोधकः ॥ १६ ॥

अनवस्थितेरसम्भवाच्च नेतरः ॥ १७ ॥

त्यर्थः * ब्रह्मविदो या गतिरिति * एतया ब्रह्मविदो गतित्वं छान्दोग्य एव पञ्चाग्निविद्यायां तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसम्भवन्तीत्यादिना श्रावितम् । सैवात्र प्रत्यभिज्ञायते । गीतायामप्यग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्, तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना इत्यनेन च । *अथेत्यादि* वाक्यार्थस्तु, अथेति प्रतिज्ञायाम् । यदु चैव यदि, अस्मिन् पुरुषवेत्तरि मृते, शव्यं शवसंस्काररूपमौर्ध्वदैहिकं कुर्वन्ति ज्ञातयो, यदि च न कुर्वन्ति, उभयथापि तेषामक्षिपुरुषविदां न परलोके फलवैषम्यमित्युक्त्वा विद्यावतां गमनप्रकारं वदति । अर्चिषमित्यादिना । अमानव इति । मनुकुलसृष्ट्यवनुत्पन्नः । मनवश्च शिवपर्यन्ता बोध्याः । सलोकपाला मुनयो मनूनामाद्यं मनुं प्राञ्जलयः प्रणेमुरिति चतुर्थस्कन्धे मैत्रेयेण महादेवेऽपि मनुपदप्रयोगात् । तेन भगवतो दूत इत्यर्थः । देवपथ इति । देवैर्गमयितृभिरुपलक्षितो मार्गः । *ब्रह्मपथ इति* ब्रह्मणः प्राप्यस्य परस्य सम्बन्धी मार्गः । * आवर्तमिति * आवृत्तिसाधनभूतमार्गम् ।

मायावादिनस्तु, ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः सद्योमुक्तिमङ्गीकुर्वाणा इमां गतिं नाद्रियन्ते । तत्तु व्याख्येयश्रुतिविरोधादेवोपेक्ष्यम् । अतिकृपानन्दभावसहकारेण सद्योमुक्तिक्रममुक्त्योरुपपत्त्योक्तश्रुतिविरोधाभावेनैतद्वक्तुर्भ्रान्तत्वापत्त्या चैतत्त्यागायोगादिति ॥ १६ ॥

अनवस्थितेरसम्भवाच्च नेतरः ॥ सूत्रप्रयोजनमाहुः । *

इदमेवाधिकरणं पुनर्निषेधमुखेन विचारयति । ननूपासनापरत्वेऽपि सर्वमुपपद्यते । तद्धर्मव्यपदेशेनैवोपासनोपपत्तेः । अतः सर्वा उपपत्तयो व्यपदेशिवद्भावेन सङ्गच्छन्त इत्येवं प्राप्त उच्यते । इतरो नात्र वाक्यार्थः । अनवस्थितेरस्थिरत्वात् । उपदेशकवाक्यत्वादुपदेष्टुरेव चक्षुर्गतं भवेत् । तथाच वक्तुर्दर्शनाभावादनाप्तत्वम् । द्रष्टुरपगमे त्वपगच्छति सद्वितीये तु सद्वितीयः । उपासनाकाले च सुतरामनवस्थितिः । सद्वितीयोपासनायामपि श्रवणमननयोर्भिन्नविषयत्वादनवस्थितिः । वक्तुरेव नियमे गुरोर्निर्बन्धेन सुतरामनवस्थितिः ।

इदमित्यादि * तथाचोक्ताधिकरणद्वयविषयवाक्ये उपासनाप्रसङ्गाभावेन सन्देहानुदयादत्र तु तदुदयात् पुनर्विचार इत्यर्थः । पूर्वपक्षं ग्राहयन्ति *नन्वित्यादि* । विभजन्ते *तद्धर्मेत्यादि* प्रतिबिम्बपुरुषस्य ह्युपासना ब्रह्मत्वेन कर्तव्यात्रोच्यते । ब्रह्मत्वे तु तदेव बुद्धावारोहति, यदा ब्रह्मधर्मास्तत्र व्यपदिश्यन्ते । अतो व्यपदेशिवद्भावेन व्यपदेशवता ब्रह्मणा तुल्यं वर्तमानतया प्रतिबिम्बपुरुषेऽवगते उपासना सिद्ध्यतीति तत्परत्वे सर्वा उपपत्तयो गत्यभिधानान्ताः सङ्गता भवन्तीति दर्शनश्रुतिसङ्कोचो न युक्तस्तस्याः प्रथमावगतत्वेनासञ्जातविरोधतया मुख्यत्वादित्यर्थः । सिद्धान्तं व्याचक्षते * इतरो नेत्यादि* । *भवेदिति* दृश्यत इति पदेन दृश्यतया प्रतिपाद्यं भवेत् । अयमर्थः । त्वया ह्यक्षिस्थाने दृश्यत्वकथनात् प्रतिबिम्बपुरुषो वाक्यार्थत्वेनापाद्यते । तत् तदा स्याद् यदि दृश्यत्वं तस्य नियतं स्यात् । तदेव तु न । कुतः । अस्थिरत्वात् । तथाहि । किमत्राचार्येण स्वचक्षुर्गत उपदिश्यते, परचक्षुर्गतो वा । आद्ये वक्तुरनाप्तत्वादस्थिरत्वम् । द्वितीये तु द्रष्टरि यदवस्थेय प्रतिबिम्बात् तदपगमे प्रतिबिम्बस्याप्यपगमादस्थिरत्वम् । द्रष्टरि सद्वितीये तस्य सद्वितीयत्वादेकत्वोपदेशस्य विरोधादस्थिरत्वम् । उपासनाकाले च चित्तस्य स्थैर्याय नेत्रनिमीलने

त्वादानन्दमूर्त्तिर्भगवानेव । ब्रह्मवादे त्वेषैव मर्यादा । सगुणवादो ब्रह्मवादाज्ञानादिति ॥ १७ ॥

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ १८ ॥

दान्तत्वं किमर्थमाद्रियत इत्यत आहुः * ब्रह्मवादे इत्यादि * । ब्रह्मैव सर्वमिति वादो ब्रह्मवादः । स च बहु स्यामित्यादिश्रुतिसिद्धः । तत्र च सर्वतःपाणिपादान्तत्वं श्रुतौ गीतायां च सिद्धमतस्तथाङ्गीक्रियते । यः पुनः सगुणवादः स तु ब्रह्मवादाज्ञानादेकदेशमादाय, जघन्याधिकारिणः प्रति प्रवृत्तो नाद्रियत इत्यर्थः । भोगस्थानाक्षिपुरुषस्य मण्डलब्राह्मणे, स एष एवेन्द्रो योऽयं दक्षिणेऽक्षन् पुरुषोऽथायमिन्द्राणीत्यादिना हृदयदेशे जीवसंसारदशायां श्रावितः । इन्द्राणी च भगवान् स्वात्मानमेव कृतवान् । स आत्मानमेव द्वेधाऽपातयत् ततः पतिश्च पत्नी चाभवतामिति पुरुषविधब्राह्मणश्रुतेः । एवञ्चैतेनाधिकरणत्रयेण सम्भोगप्राप्तिसूत्रभाष्ये सूचित सर्वरूपत्वानन्दरूपत्वस्वकर्तृत्वभेदेन त्रिविधमपि वैशिष्ट्यं साधितं ज्ञेयम् । एवञ्चात्र निर्दोषत्वरूपं वैशिष्ट्य एव प्रकटसच्चिदानन्दरूपत्वात्मकं तज्ज्ञातुरपि दोषनिवारकत्वरूपं च हेतुद्वयमुपोद्घातत्वेनोक्तमितीदमपि तस्यैव शेषः ।

अत्र विज्ञानेन्द्रेण काण्वपञ्चमाध्यायस्थं, यत् साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति प्रश्ने प्रवृत्तम्, एष त आत्मा सर्वान्तरो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येतीति वाक्यमुपन्यस्य तदर्थस्य ब्रह्मत्वं चिन्तितम् । तदविरुद्धमित्युपरम्यते ।

शैवस्तु, अनवस्थितिसूत्रे भिन्नमधिकरणं स्वीकृत्य, 'अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः । ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुग्' इति तैत्तिरीयमहोपनिषद्वाक्यं विषयत्वेनोदाहृतवान् । तत्र प्राणो वा ब्रह्म वेति संशय्य, ब्रह्मैवेति निर्णीय, तं शिवत्वेन निगमितवान् । तत्र शिवत्वांशे दूषणं प्रहस्ते प्रपञ्चितमित्युपरम्यते ॥ १७ ॥ ॥ ५ ॥

अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ पूर्वाधिकरणे भोग-

य इमं च लोकं परञ्च लोकं सर्वाणि च भूतान्यन्तरो यमयतीत्युपक्रम्य श्रूयते । यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयतीत्येष त आत्मान्तर्याम्यमृत इत्यादि ।

वैलक्षण्यसाधकं वैशेष्यमन्तर्गुहास्थितेऽक्षिपुरुषे चोपपादितम् । वाजसनेयिनां मण्डलब्राह्मणे, स एष एवेन्द्रो योऽयं दक्षिणेऽक्षन् पुरुषोऽथेयमिन्द्राणीत्यादिना हृदयदेशे तयोर्भोगस्य श्रावणात् । अतः परं तदेव वैशेष्यं सुषुप्तदशायाममृतत्वादन्तर्यामिणि सर्वहृदयदेशवर्तिन्यस्तीति बोधनायेदमधिकरणमारभ्यत इत्याशयेन विषयवाक्यमुदाहरन्ति * य इमं चेत्यादि * । * श्रूयत इति * वाजिशाखिनां बृहदारण्यके श्रूयते * इत्यादीत्यादिपदेनाबग्न्याकाशवाय्वादित्यचन्द्रतारकदिग्विद्युत्स्तनयित्नुसर्वलोकसर्ववेदसर्वयज्ञसर्वभूतप्राणवाक्चक्षुःश्रोत्रमनस्त्वक्तेजस्तमोरेतआत्मान्तान्येवंविधानि वाक्यानि संगृह्यन्ते । एतेषु स्तनयित्न्वन्तानि दशाधिदैववाक्यानि । ततो यथायथमेकैकमधिलोकाधिवेदाधियज्ञाधिभूतवाक्यम् । ततः प्राणादीनि दशाध्यात्मवाक्यानीत्येवं चतुर्विंशतिः । स त आत्मेति माध्यन्दिनपाठे । काण्वपाठे त्वन्तरिक्षमधिकम् । आत्मस्थाने विज्ञानमुच्यत इति भेदः । ततः, अदृष्टो द्रष्टा अश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञाता नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञातैष त आत्मान्तर्याम्यमृतोऽतोऽन्यदार्तमित्युपसंहारः । वाक्यार्थस्तु य इमं च लोकम् एतज्जन्मीनं देहं, परं च लोकं जन्मान्तरीयं देहं सर्वाणि भूतानि ब्रह्मादितृणस्तम्बान्तानि, अन्तरोऽभ्यन्तरवर्ती सन् यमयति दारुयन्त्रवद् भ्रामयति स्वस्वमुचितव्यापारं कारयतीत्येवं कार्यद्वारा तं ज्ञापयित्वा, तत्स्वरूपप्रश्न उद्दालकेन कृत इत्युपक्रमे उक्त्वा याज्ञवल्क्योक्तमुत्तरं, यः पृथिव्यामित्यादिना कथयति । तत्र तादृशान्तर्यामिसत्तायां, भीषाऽस्माद् वातः पवते, एतस्यैवाक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत इत्यादिश्रुतीः प्रमाणत्वेनाभिप्रेत्याह । यः पृथिव्यामित्यादि । तत्र यः पृथिव्यां तिष्ठन् सोऽन्तर्यामीत्युक्ते जडाद् भेदसिद्धावपि पृथिव्यधं-

तत्राधिदैवमधिलोकमधिवेदमधियज्ञमधिभूतमध्यात्मं च कश्चिदन्तरवस्थितो यमयिताऽन्तर्यामीति श्रूयते । तत्र संशयः । किमन्तर्याम्यधिदैवादिषु सर्वत्रैक एव, अथाधिदैवादीनां भेदाद्

स्थितेषु सर्वप्राणिष्वतिप्रसङ्ग इति तद्वारणाय विशिनष्टि । यः पृथिव्या अन्तर इति । अभ्यन्तर इत्यर्थः । एवं बहिष्ठप्राणिवारणेऽपि तदन्तःस्थस्याभिमानिनो वारणं न सम्भवतीति तद्वारणार्थं विशिनष्टि । यं पृथिवी न वेदेति । पृथिव्यभिमानिनी देवतात्मा यं न वेद न जानातीति । तेन तद्भिन्न इत्यर्थः । एवं जडाज्जीवाच्च भेदे सिद्धेऽपि तस्य तत्र स्थितेः किं प्रयोजनमित्याकाङ्क्षायामाह । यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयतीति । गामाविश्य च भूतानि धारयाम्यहमोजसेति भूतधारणकार्यसिद्ध्यर्थं, सा शरीरम् । तन्नियमनं च तत्कार्यसिद्ध्यर्थम् । अन्यथा तद्व्यसम्मतौ कार्यं न सिद्ध्येदिति । अत्र द्वितीयमन्तरपदं नामधातुनिष्पन्नम्, अन्तरं करोत्यन्तरयतीत्यन्तर इति सर्वान्तःस्थापकत्वबोधनार्थम् । अन्त नदस्याप्तेरिति । एवं सर्वत्र बोध्यम् । अत्र प्रश्नवाक्यानुक्त बोधनं तज्ज्ञानज्ञापकं ज्ञेयम् ।

अस्मिन् वाक्यसमूहे कुत्र संशय इत्यपेक्षायामाहुः । *तत्राधीत्यादि* । संशयाकारं तद्बीजं चाहुः *किमित्यादि* तथाच सर्वान्तर्यामिणोपसंहारात् सर्वत्रैकः । अधिदैवादिपदानामव्ययीभावेन तत्र तत्राधिकरणे यौगिकत्वेऽपि, पुरुषश्चाधिदैवतं, स्वभावोऽध्यात्ममुच्यते, अधिभूतं क्षरो भावः, अधियज्ञोऽहमेवात्रेति गीतायां, तं योगमनादृत्य रूढेर्वा, तत्तदधिकृत्य यो वर्तत इति योगान्तरपुरस्कारेण योगरूढेर्वा बोधनादेतेषां नामत्वमवधार्यते । समानन्यायादधिवेदाधिलोकयोरपि तथात्वम् । नपुंसकलिङ्गं तु लोकाश्रयत्वादार्षम् । एवं सिद्धे तेषां नामत्वे तैरप्युपसंहाराद् भिद्यते वेति तद्बीजमित्यर्थः । नन्वन्तर्यामिणः पृथिव्याद्यन्तर्वर्तित्वस्यात्र कथनादन्तर्वर्तिनश्च प्रधानस्यान्तस्तद्धर्मोपदेशादित्यत्र साधितत्वादत्र सन्देह एव न घटत इति किमर्थमधिकरणारम्भ इत्याकाङ्क्षायां तदुपगम्य सन्देहं

भिद्यत इति । सामान्यतस्त्वन्तस्तद्धर्मोपदेशादिति न्यायेनाऽत्रापि ब्रह्मत्वं सिद्धमेव । तथा शब्दभेदात् सन्दिह्यते । अधिदैवादिषड्भेदा आधारधर्मा भगवत्युपचर्यन्ते, अथवा संज्ञाविशिष्टा अन्य एवेति। तत्र तत्तदधिकृत्य यो वर्ततेऽभिमानेन तस्य तादृशशब्दप्रयोगः ।

अधिलोकादयश्च शाखान्तरेऽन्यत्रैव प्रसिद्धा योगरूपकाः पञ्चस्वधिकरणेषु । अधिलोकमधिज्यौतिषमित्यादि । अतोऽधिदैवादिशब्दा यौगिकाः सन्तो न भगवति वर्तितुमुत्सह-

---

समर्थयन्ति * सामान्यत इत्यादि * । * तथा शब्दभेदादिति * अधिदैवादिशब्दभेदात् । कथं ततः सन्देह इत्यत आहुः * अधिदैवेत्यादि * देवानां समूहो दैवम् । दैवे इत्यधिदैवमित्येवमधिकरणार्थेकाव्ययीभावनिष्पन्ना एते शब्दा योगेन तांस्तानाधारानभिदधाना अत्र पृथिव्यादिवाक्यसमुदायान्ते सर्वलोकाद्येकैकवाक्यचतुष्टयान्ते प्राणादिवाक्यसमुदायान्ते च यथायथमुपनिबद्धा अधिलोकादिषु पुनरुक्ततामापद्यमाना व्यर्थाः सन्तः स्वप्रयोगसामर्थ्येनाधिदैवत्वादिरूपान् धर्मांस्तत्तदाधारेषु बोधयन्तीति ते षड्भेदा आधारधर्माः शब्दतः सन्निहितेऽन्तर्यामिणि भगवत्युपचर्यन्ते । * अथवा तत्तदधिकृत्य येऽभिमानेन तत्र तत्र वर्तन्तेऽभिमानिनोऽधिदैवादिसंज्ञाविशिष्टाः षडन्ये कल्पनीया, यद्धर्मा भगवत्युपचाराद् भवेयुरित्येवं सन्देहो घटत एवेत्यर्थः । एवं सन्देहं समर्थयित्वा पूर्वपक्षमाहुः । * तत्रेत्यादि * । * तत्तदधिकृत्येति * तत्तत् पृथिव्यादिकमधिकरणीकृत्य अभिमत्याऽहमिति स्वीकुर्वन् यो वर्तते तत्र तिष्ठति तत्सम्बन्धी अधिदैवादिप्रयोगः । सांख्यपक्षाश्रयवृत्तौ तत्तदभिमानिषु,प्रसिद्धत्वादिति । ननु योगद्वयस्य तौल्येऽन्यत्राभिमानिग्रहणे को हेतुरित्याकाङ्क्षायां तमुपपादयन्नधिकरणपक्षं दूषयति * अधिलोकेत्यादि * । * शाखान्तरे इति * तैत्तिरीयाणां शिक्षोपनिषदि । *अन्यत्रैवेति* लोकादिष्वधिकरणेषु । *अत,इत्यादि * वैदिकप्रसिद्धेर्बलिष्ठत्वात् ते तत्र यौगिकाः सन्तो यौगिका-

न्ते । नाप्यन्ये कल्पनीया यद्धर्मा उपचाराद् भगवति भवेयुः । कल्प्यमानस्य सर्वानुस्यूतस्य तादृशस्य भगवद्व्यतिरिक्तस्यासम्भवात् । तस्मादन्तर्यामिब्राह्मणं कुत्राप्ययुक्तं सत् तत्तदभिमानिदेवतास्तुतिपरमेव तत्तदुपासनार्थं भविष्यति ।

अज्ञानं चासन्देहे सन्देहवदुपपद्यते । देहोऽसवोऽक्षा इति

नामौपचारिकप्रयोगादर्शनात् ते तत्र तथा भवितुं न शक्ता इत्येष हेतुरित्यर्थः । तर्हि मास्तु भगवति वृत्तिरन्येष्वभिमानिष्वेव साऽस्त्वित्यतस्तामपि दूषयति * नापीत्यादि * । * कल्पनीया इति * संज्ञित्वेन कल्पनीयाः । कुतो नेत्यत आह * कल्प्यमानस्येत्यादि * एते हि शब्दाः क्वचिद्वाक्यसङ्घाते, क्वचिच्च बहुवचनान्तसर्वलोकादिशब्दघटितवाक्यान्ते प्रयुक्ता इति तेषु तत्तत्सङ्घातानुस्यूतस्याभिप्रेतत्वात् तादृशस्यापि कस्यचित् प्रतीतस्य तत्त्वदर्शनेनात्र च तदनुक्त्या भगवद्व्यतिरिक्तस्याभिमन्तुः संज्ञितयाऽत्र कल्पयितुमशक्यत्वेनासम्भवादित्यर्थः । सिद्धमाह * तस्मादित्यादि * । * तस्मादिति * एतेषां शब्दानामधिकरणं वर्तने वैयधिकरण्यस्य बाधकतया, भगवति वर्तनेऽभिमानस्य बाधकतया, सङ्घाताभिमानिनि जीवे वर्तने च तदनुक्तेर्बाधकतयाऽधिकरणस्य भगवतोऽतिरिक्तस्याभिमन्तुश्च तत्संज्ञित्वेन वक्तुमशक्यत्वे संज्ञोपजीविन उपचारस्यापि वक्तुमशक्यत्वादन्तर्यामिब्राह्मणं पूर्वोक्तव्यवस्थयैतुमयुक्तं सत् तथेत्यर्थः । नन्वेवमपि वक्तुमशक्यम् । तेषु वाक्येषु यं पृथिवी न वेदेत्यादिभिरुक्तस्यान्तर्याम्यज्ञानस्य श्रावणात् तस्य चाभिमानिधर्मत्वादित्यत आह * अज्ञानं चेत्यादि * उक्तविधमज्ञानमपि, सो अङ्ग वेद यदि वा न वेदेत्यत्र यथा सन्देहः कल्पनयोच्यते तथाऽत्राऽज्ञानमप्युच्यत इत्युपपद्यत इत्यर्थः । ननु तथापि ज्ञाने अज्ञानं काल्पदृष्टं कथं कल्पनीयमित्यतो हेत्वन्तरमाह * देह इत्यादि * इदं षष्ठस्कन्धे हंसस्तुतावस्ति । 'देहोऽसवोऽक्षा मनवो भूतमात्रा नात्मानमन्यं च विदुः परं यत् । सर्वं पुमान् वेद गुणांश्च तज्ज्ञो न वेद सर्वज्ञमनन्तमीडे' इति । अत्र मनवोऽन्तःकरणानि । अर्थस्तु देहादयो मात्रान्ता आत्मानं दृश्यं स्वस्व-

न्यायात् । न तु निषिद्धसंज्ञा भगवति कल्पयितुं शक्येति । एवं प्राप्ते, उच्यते ।

अन्तर्याम्यधिदैवादिषु । अन्तर्यामी अधिदैवादिषु भगवानेव । नान्यस्तादृशो भवितुमर्हति ।

ननु चोक्तं भगवति कथं निषिद्धकल्पनमिति । तत्राह । तद्धर्मव्यपदेशात् । तेषां धर्मास्तद्धर्माः । तत्प्रयुक्तबोधकाः । ते विशेषेण भगवत्यपदिश्यन्ते । सर्वेषां तत्तत्कार्यसामर्थ्यं च भगव-

---

रूपम्, अन्यम् इन्द्रियवर्गदेवतारूपेण विदुः । यद् उक्तं सर्वं तत् तन्मूलभूतान् गुणान् सत्त्वादींश्च पुमाञ्जीवो वेद । तज्ज्ञः पूर्वोक्तसर्वज्ञोऽपि सन् यम इतोऽप्यधिकं सर्वज्ञं न वेद, तमनन्तं भगवन्तमहमीडे स्तौमीति । तथाच यथात्र देहादीनां जडतया योग्यताभावेनासम्भवन्निषेधो नित्यानुवादस्तथा, यं पृथिवी न वेदेत्यादावपि पृथिव्यादिपदैर्जडपरामर्शाज्ज्ञाननिषेधो नित्यानुवाद इति तन्न्यायादुपपद्यत इत्यर्थः । ननु कुतोऽयमाग्रहः क्रियते, भगवत्संज्ञात्यमेव कुतो नाद्रियत इत्यत आह * न त्वित्यादि * । * निषिद्धसंज्ञेति * निषिद्धेनाभिमानेन कृता संज्ञा सा निकृष्टा । अनुत्कृष्टस्य ह्युत्कृष्टत्वेनोपासनं दृश्यते, मनो ब्रह्मेत्यादौ, न तूत्कृष्टस्य निकृष्टत्वेन । अतः कल्पयितुमशक्येत्यर्थः । एवं पूर्वपक्षमुक्त्वा सिद्धान्तं व्याचक्षते * उच्यत इत्यादि * । अत्र तेष्वधिदैवादिपदेष्वन्तर्यामी भगवानेवोच्यते । न ह्यन्य एकः सर्वानुस्यूतो भवितुमर्हति । नन्वभिमानिष्वेताः संज्ञाः प्रसिद्धाः । भगवति तु नाभिमान इति निषिद्धस्याभिमानस्य कल्पनं कथं कर्तव्यमित्याशङ्कायां तद्वारणायैतत्प्रवृत्तिनिमित्तं सूत्रे आचार्य आह । तद्धर्मव्यपदेशादिति । तेषां पृथिव्यादीनां तदभिमानिनां च ये धर्मास्ते तद्धर्मास्तत्प्रयुक्तस्तत्कार्यव्यापारांचबोधका भूतधारकत्वादयस्तदभिप्रायकास्त्वादयश्च ते नियमयितृत्वरूपेण विशेषेण भगवत्यपदिश्यन्ते । पृथिव्यादिष्वक्यपत्वाभिमान्यंशयन्तृत्वस्य पृथिव्यादेः शरीरत्वस्य पृथिव्यादिपदैस्तदुभयं गृहीत्वा तदमनस्य च बाधनेन कथ्यन्ते, तस्मात् । एतस्यैव व्याख्याने * सर्वेषामित्यादि * चोऽप्यर्थे * ।

तो, न तु स्वतस्तेषामिति। एवञ्च सत्यन्यत् सर्वं सङ्गतं भवति। तस्माद् ब्रह्मवाक्यमेव ।

एवञ्चेत्यत्र चोऽवधारणे तथा चायमर्थः। सांख्ये हि तत्तदभिमान्येव नियामकतयाऽधिदैवपदेनोच्यते। करणमेव शरीरे वर्तमानतयाऽध्यात्मपदेन। विषयश्च भूतेषु वर्तमानतयाऽधिभूतपदेन। गीतादौ तु पुरुषादय उच्यन्ते। अत्र तु ततोऽप्यधिकाः शब्दा इति सांख्योक्ता गीतोक्ताश्चार्था नात्राभिप्रेताः। अथ प्रश्नानुरोधान्न्यूनतादोषं परिहृत्य गीतोक्ताः स्वभावद्यो आद्यास्तत्रापि तेषां ये धर्मास्तत्तदधिष्ठातृत्वादयस्तेऽपि भगवन्नियमितास्त्ववश्यं वाच्याः। एकस्य सर्वानुस्यूतस्य नियन्तृबोधनार्थमेवान्तर्यामिब्राह्मणस्य प्रवृत्तत्वात्। एवं सति यदि तेऽतिरिक्ता अत्राभिप्रेताः स्युस्तदा पृथिव्यादिवत् तानपि नियम्यतया वदेत्। अतस्तेऽत्राधिदैवादिपदेषु नाभिप्रेताः। किन्तु, इत्यधिदैवतमित्यादावितिशब्दः प्रकारे हेतौ वा अर्थस्तथा वा तेन हेतुना वाऽधिदैवतादिशब्दानां भगवद्वाचकत्वमेव बोधयतीति। तेनेदं सिद्ध्यति। विषयवाक्य उद्दालकेनैतल्लोकपरलोकयोः सर्वभूतानां चान्तर्वर्तित्वे सति सन्नियामकोऽन्तर्यामिशब्दवाच्यः पृष्टः। तत्र चेद् याज्ञवल्क्यस्तावदेव वदेत् तदाऽन्तर्यामिमाहात्म्यं न स्फुटीभवेदत उद्दालकश्रुतांस्तद्धर्मान् विशेषतः पृथिव्यादिवाक्यैः प्रकाशयति। तत्र पृथिव्यधिकार्यं भगवत्प्रयुक्तमिति गीताद्वादशाध्याये, गामाविश्य च भूतानीति सार्धेनोक्तम्। ततः सर्वस्य चाहं हृदि संनिविष्ट इत्यादिनाऽन्तर्यामित्वं पुरुषोत्तमार्थं च निगमितम् ।

अन्यथा त्वधिकरणारचना, अन्तस्तद्धर्माधिकरणेन गतार्थत्वादयुक्तैव ॥ १८ ॥

त्वयुक्तत्वबोधनात् परलोकात्मकजन्मान्तरीयदेहयमपितृत्वज्ञानं स्वस्य याज्ञवल्क्येन प्रकाशितम् । ततो लोकपदस्य भूरादिष्वाधारेष्वपि प्रयोगाद्, अथाधिलोकमिति प्रतिज्ञाय तत्सम्बन्धि सर्वं पूर्ववद् बोधितम् । ततो लोकान् कथं यमयतीत्यपेक्षायां, वेदयज्ञाभ्यां यमयतीति बोधनायाधिवेदाधियज्ञवाक्यद्वयमुक्तम् । ततः सर्वभूतयमनं पूर्ववदेवेति बोधनायाधिभूतवाक्यम् । तत एतल्लोकनियमनबोधनाय दशाध्यात्मवाक्यानीत्येवं कार्यज्ञानमुक्त्वा, तत्स्वरूपमिदमित्थतया वक्तुमशक्यमिति बोधनायादृष्टो द्रष्टेत्याद्याह । तत्र उपसंहारे, अतोऽन्यदार्तमित्यनेन तस्य सुखरूपत्वं यदाऽऽह तदान्तर्यामिज्ञातृत्वं वक्तुरुषस्तोद्दालकस्तूष्णीं भूत इत्युक्तम् । तेन सर्वेषां स्वदेवेषु महत्स्वन्यसापेक्षेषु तन्निरपेक्षेष्वपि कार्येषु यत् सामर्थ्यं तदन्तर्यामिणः सकाशादेव, न तु स्वत इति साधितम् । तदेव, यत्किञ्चित् पौरुषं पुंसां मेने कृष्णानुकम्पितमिति श्रीभागवते । तेनाधिदैवादिपदप्रवृत्तिनिमित्तभूतो योऽभिमानः सोऽपि भगवत्प्रयुक्त इति तेषां पदानामभिमानिष्वौपचारिकत्वबोधनायैव तत्कथनं, नो चेत् तद्वैयर्थ्यमेव । तदनुक्तावपि विवक्षितज्ञापनस्याप्रत्यूहत्वादिति सिद्ध्यति । तेन सूत्रस्थमधिदैवादिष्विति पदं देहलीदीपवदुभयत्रापि सम्बध्यते । तथाचानेनास्पष्टलिङ्गेनान्तर्यामिण एकत्वसाधनाच्चाधिकरणवैयर्थ्यमिति । मतान्तरं दूषयन्ति * अन्यथेत्यादि * । सा रचनात्वेवम् । अस्मिन् वाक्येऽन्तर्यामीत्यपूर्वसंज्ञादर्शनात् किमधिदैवाद्यभिमानी देवतात्मा, किं वा परमात्मेत्यादिः संशयः । तत्र पृथिव्येवास्यायतनमग्निर्लोको मनो ज्योतिरिति श्रुतौ कार्यकरणवत्त्वात् पृथिव्यादीनन्तस्तिष्ठन् यमयतीति देवतात्मनः स्थितेरुक्तत्वात् तस्य यमयितृत्वसम्भवादित्येवं प्राप्ते, तद्धर्माणामात्मत्वाऽमृतत्वपृथिव्याद्यज्ञातत्वादीनां निर्देशात् परमात्मैवोच्यत इत्यादिरूपा । सा त्वन्तस्तद्धर्माधिकरणे स्पष्टलिङ्गैरेव सिद्धा । अत्राऽप्यमृतत्वादिभिः स्पष्टैरेव लिङ्गैरुपपाद्यत इति तदेतदर्थः ॥ १८ ॥

तो, न तु स्वतस्तेषामिति। एवञ्च सत्यन्यत् सर्वं सङ्गतं भवति। तस्माद् ब्रह्मवाक्यमेव।

एवञ्चैश्वर्य चोऽवधारणे तथाचायमर्थः। सांख्ये हि तत्तदभिमान्येव नियामकतयाऽधिदैवपदेनोच्यते। करणमेव शरीरे वर्तमानतयाऽध्यात्म पदेन। विषयश्च भूतेषु वर्तमानतयाऽधिभूतपदेन। गीतादौ तु पुरुषादय उच्यन्ते। अत्र तु ततोऽभ्यधिकाः शब्दा इति सांख्योक्ता गीतोक्ता वा-र्था नात्राभिप्रेताः। अथ प्रश्नानुरोधान्न्यूनतादोषं परिहृत्य गीतोक्ताः स्वभावद्वयो ग्राह्यास्तदापि तेषां ये धर्मास्तत्तदधिष्ठातृत्वादयस्तेऽपि भगवन्नियमितास्त्ववश्यं वाच्याः। एकस्य सर्वानुस्यूतस्य नियन्तु-र्बोधनार्थमेवान्तर्यामिब्राह्मणस्य प्रवृत्तत्वात्। एवं सति यदि तेऽति-रिक्ता अत्राभिप्रेताः स्युस्तदा पृथिव्यादिवत् तानपि नियम्यतया व-देत्। अतस्तेऽत्राधिदैवादिपदेषु नाभिप्रेताः। किन्तु, इत्याधिदैवतमि-त्यादाविति शब्दः प्रकारे हेतौ वा वर्तस्तथा वा तेन हेतुना वाऽधिदै-वतादिशब्दानां भगवद्वाचकत्वमेव बोधयतीति। तेनेदं सिद्ध्यति। विषयवाक्य उद्दालकेनैतल्लोकपरलोकयोः सर्वभूतानां चान्तर्वर्तित्वे सति सन्नियामकोऽन्तर्यामिशब्दवाच्यः पृष्टः। तत्र चेद् याज्ञवल्क्य-स्तावदेव वदेत् तदाऽन्तर्यामित्वं न स्फुटीभवेदत उद्दालकश्रुता-स्तत्कर्मान् विशेषतः पृथिव्यादिवाक्यैः प्रकाशयति। तत्र पृथिव्यव-ग्निकार्यं भगवत्प्रयुक्तमिति गीताद्वादशाध्याये, गामाविश्य च भूता-नीति सार्द्धेनोक्तम्। ततः सर्वस्य चाहं हृदि संनिविष्ट इत्यादिना-ऽन्तर्यामित्वं पुरुषोत्तमत्वं च निगमितम्। आकाशकार्यस्य तथात्वं तृतीयस्कन्धे, अदो ददाति श्वसतां पदं यन्नियमात्मम इति स्फुटम्। वाय्वादित्यकार्यस्य तथात्वं, भीषाऽस्मादिति श्रुतौ। तत्राग्नीन्द्रयोः कार्यं न स्फुटं, तदपि तृतीयस्कन्धे, यतेन्द्रो दहत्यग्निरित्यनेन बो-धितम्। अत्र त्विन्द्रस्थाने विद्युत्स्तनयित्नू। एवमन्येषां कार्यस्यापि भगवत्प्रयुक्तत्वं ततस्ततो बोध्यम्। विषयश्रुतावधिदैवतपदं, सूत्रे त्वधिदैवपदं, तथापि न तयोरर्थभेदः। गीतायाम्, अधिदैवं किमु-च्यत इति प्रश्ने, पुरुषश्चाधिदैवतमित्युत्तरात्। एवं दैवधर्माणां भगव-

अन्यथा त्वधिकरणारचना, अन्तस्तद्धर्माधिकरणेन गतार्थत्वादयुक्तैव ॥ १८ ॥

त्वयुक्तत्वबोधनात् परलोकात्मकजन्मान्तरीयदेहयमयितृत्वज्ञानं स्वस्य याज्ञवल्क्येन प्रकाशितम् । ततो लोकपदस्य भूरादिष्वाधारेष्वपि प्रयोगाद्, अथाधिलोकमिति प्रतिज्ञाय तत्सम्बन्धि सर्वं पूर्ववद् बोधितम् । ततो लोकान् कथं यमयतीत्यपेक्षायां, वेदयज्ञाभ्यां यमयतीति बोधनायाधिवेदाधियज्ञवाक्यद्वयमुक्तम् । ततः सर्वभूतयमनं पूर्ववदेवेति बोधनायाधिभूतवाक्यम् । तत एतल्लोकनियमनबोधनाय दद्याध्यात्मवाक्यानीत्येवं कार्यज्ञानमुक्त्वा, तत्स्वरूपमिदमित्थतया वक्तुमशक्यमिति बोधनायादृष्टो द्रष्टेत्याद्याह । तत उपसंहारे, अतोऽन्यदार्तमित्यनेन तस्य सुखरूपत्वे यदाऽऽह तदान्तर्यामिज्ञातृत्वं वक्तुरगतत्वादुद्दालकस्तूष्णीं भूत इत्युक्तम् । तेन सर्वेषां स्वरूपेषु मध्यस्थान्यसापेक्षेषु तन्निरपेक्षेष्वपि कार्येषु यत् सामर्थ्यं तदन्तर्यामिणः सकाशादेव, न तु स्वत इति साधितम् । तदेव, यत्किञ्चित् पौरुषं पुंसां मेने कृष्णानुकम्पितमिति श्रीभागवते । तेनाधिदैवादिपदप्रवृत्तिनिमित्तभूतो योऽभिमानः सोऽपि भगवत्प्रयुक्त इति तेषां पदानामभिमानिष्वौपचारिकत्वबोधनायैव तत्कथनं, नो चेत् तद्वैयर्थ्यमेव । तदनुक्तावपि विवक्षितज्ञापनस्याप्रत्यूह[illegible]दिति सिद्ध्यति । तेन सूत्रस्थमधिदैवादिष्विति पदं देह[illegible]दीपवदुभयत्रापि सम्बद्ध्यते । तथाचानेनास्पष्टलिङ्गेनान्तर्या[illegible] पक्षत्वसाधनादधिकरणवैयर्थ्यमिति । मतान्तरं दूषयन्ति [illegible] अन्यथेत्यादि * । सा रचनास्त्वेवम् । अस्मिन् वाक्येऽन्तर्यामि[illegible] पूर्वसंज्ञादर्शनात् किमधिदैवाद्यभिमानी देवतात्मा, किं वा [illegible]मात्मेत्यादिः संशयः । तत्र पृथिव्येवास्यायतनमग्निर्लोको मनो [illegible]तिरिति श्रुतौ कार्यकरणवत्त्वात् पृथिव्यादीनन्तस्तिष्ठन् यमयत[illegible] देवतात्मनः स्थितेरुक्तत्वात् तस्य यमयितृत्वसम्भवादित्येवं [illegible], तद्धर्माणामात्मत्वाऽमृतत्वपृथिव्याद्यज्ञातत्वादीनां निर्देशात् [illegible]मात्मैवोच्यत इत्यादिरूपा । सा त्वन्तस्तद्धर्माधिकरणे स्पष्ट[illegible]रेव सिद्धा । अत्राऽप्यमृतत्वादिभिः स्पष्टैरेव लिङ्गैरुपपादित[illegible] तयेत्यर्थः ॥ १८ ॥

नच स्मार्तमतद्धर्माभिलापात् ॥ १९ ॥

ननु ब्रह्मवादे अन्तर्यामी न प्रसिद्धः। जीवब्रह्मजडानामेव प्रसिद्धत्वात्। अतोऽन्तर्यामिणः सांख्यपरिकल्पितस्य गुणायोगात् तादृशस्य ब्रह्मत्वे वा कः पुरुषार्थो भवेत्।

न हीश्वरं प्रकृतिपर्यारूढमन्तर्यामिणं मन्यन्ते। तादृशस्योपनिषत्स्वभावात् पूर्वपक्षन्यायेन स्तुतिपरता, तन्मतस्य वा श्रौतत्वमित्याशङ्कां परिहरति। नच स्मार्तं, स्मृतिप्रसिद्धं स्मार्तं सांख्यमतसिद्धमिति यावत्। तादृशमन्तर्यामिरूपमत्र भवितुं नार्हति।

नच स्मार्तमतद्धर्माभिलापात् ॥ सूत्रमवतारयितुं किञ्चिदाशङ्काहुः * नन्वित्यादि *। अयमर्थः। सर्वं खल्विदं ब्रह्म, सन्मूलाः सोम्येमाः प्रजा इत्यादिश्रुतिसिद्धो वादो ब्रह्मवादः। तत्र तु कार्यत्वेन जडजीवौ, कारणत्वेन ब्रह्मेति त्रय एव पदार्थाः प्रसिद्धाः। अन्तर्यामी तूभयथापि न प्रसिद्धः। अतो नियमनरूपेण चेतनधर्मेणाऽऽत्मत्वेन च प्रधानं जडं व्युदस्य, ब्रह्म वा जीवो वा कश्चित् कल्प्यः। तत्र ब्रह्मणोऽशरीरत्वात् साधारणजीवस्य च सर्वनियामकत्वादर्शनात् कार्येश्वरभूत एव कल्पनीयः। तादृशश्च महत्तत्त्वं प्रकृतिं वा योऽभिमन्यते, स भवति। तत्रापि महत्तत्त्वावस्थान्तररूपसूत्रात्मगतत्वं नास्य विवक्षितमिति प्रकृत्यभिमान्येव भवतीति तादृशस्यान्तर्यामिणः सांख्यपरिकल्पितस्य तद्गुणानां सत्त्वादीनां तमस एव वा योगात् सर्वनियामकस्य ब्रह्मत्वे साधिते कः पुरुषार्थः सिध्येत्। अभिसन्धौ हेतुः * न हीत्यादि * तथाचोपनिषत्सु तादृशेश्वरस्याभावेन श्रुतिविरोधभयनाश्च कोऽपि पुरुषार्थं सिद्ध्येत्। अतः पूर्वपक्षन्यायेनान्तर्यामिब्राह्मणस्य प्रकृत्यभिमानिस्तावकत्वं वा, सांख्यमतस्य श्रौतत्वं वाङ्गीकार्यमित्याशङ्कां परिहरन्तीति। एवं सूत्रप्रयनार्थं तदपि पर्य्यस्यन्तो, देवतास्तुतिपरत्वस्याग्रिमसूत्रे निरसनीयत्वाद् द्वितीयमेव परिहरन्तीत्याहुः * नचेत्यादि *। नपुंसकप्रयोगं समर्थयन्ति। * अन्तर्यामिरूपमिति *। हेत्वंशं द्विधा व्याकुर्वन्ति

कुतः । अतद्धर्माभिलापात् । तद्धर्माणामनभिलापात् । तद्विरुद्धधर्माणां चाभिलापात् । न ह्यत्र सत्त्वरजस्तमोगुणास्तत्कार्यं वा अभिलप्यते । तद्विरुद्धाश्चेते धर्मा, यस्य पृथिवी शरीरमित्यादि । तस्मात् सांख्यपरिकल्पितं नान्तर्यामिरूपमत्र भवितुमर्हतीति सिद्धम् । एवं सति ब्रह्मधर्मा एवैते भवन्तीति ब्रह्मवादः फलिष्यति ॥ १९ ॥

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ २० ॥

नन्वुक्तन्यायेन शारीर एव भवतु । को दोषः, किमिति ब्रह्मपरत्वं कल्प्यमिति । तत्राह । शारीरश्च । नेत्यनुवर्तते । शारीरश्च जीवो नान्तर्यामिब्राह्मणे तत्तदभिमानिरूपो, यस्य पृथिवी शरीरमितिवाक्यानुरोधेन भवितुमर्हति । ततोऽपि भिन्नतयाऽन्तर्यामिणो वचनात् । उभयेऽपि काण्वमाध्यन्दिनब्राह्मणद्वयेऽपि एनं जीवं भेदेनैवाधीयते ब्राह्मणाः । निःसन्देहार्थमुभ-

---

तद्धर्मेत्यादि * । के विरुद्धा धर्मा इत्यत आहुः * तद्विरुद्धा इत्यादि * न हि महदादौ विद्यमाने तदात्मनन्तुर्व्यपदिष्टाः पृथिव्यादयः शरीराणि युगपद् भवितुमर्हन्ति । नच योगिवदिति वाच्यम् । गुणप्रधानभावगमकानुपलम्भात् । नापि गमकं कल्पयितुं शक्यम् । तद्धर्मानभिलापस्य बाधकस्योक्तत्वादिति । स्फुटमन्यत् ।

रामानुजाचार्यास्तु, शारीरश्चेत्यन्तमिदं सूत्रमङ्गीकुर्वन्ति ॥१९॥

शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ सूत्रमवतारयन्ति * नन्वित्यादि * तथाच यथा संवर्गादिविद्या अङ्गविद्यास्तथाऽन्तर्यामिब्राह्मणमपीति देवतात्मस्वाचकत्वेऽपि ब्रह्मवादाविरोधात् को दोष इत्यर्थः । परिहारं व्याकुर्वते * नेत्यादि * । * ततोऽपीति * अभिमानिदेवतातोऽपि । * उभय इति * ब्राह्मणा इत्यस्य विशेषणम् । * निःसन्देहार्थमिति * । विज्ञानपदेन बुद्धिरुच्यत इति सन्दे-

यग्रहणम् । यो विज्ञाने तिष्ठन्निति काण्वाः । य आत्मनि तिष्ठन्निति माध्यन्दिनाः । नचाऽऽत्मशब्देनान्यः सम्भवति । अन्येषां पूर्वमेव पठितत्वात् । अन्ते हि जीवमाह । तस्मादन्तर्यामिब्राह्मणे ब्रह्मैव वाक्यार्थ इति सिद्धम् ॥ २० ॥

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ २१ ॥

मुण्डके हि श्रूयते । कस्मिन्नु भगवो विज्ञात इति पृष्टे, द्वे विद्ये वेदितव्ये इत्युत्तरमाह । तत्र नामरूपात्मकजगतो विज्ञानार्थं नामांशे वेदादिः । रूपांशे परा च । तत्र वेदादिविद्यायां

दनिरासार्थम् । नन्वत्रापि व्याप्नोतीत्यात्मेति योगमादाय दिगाकाशप्राणेष्वन्यतमः कश्चिद् ग्रहीतुं शक्य एवेति कुतो न सम्भवतीत्यत आहुः * अन्येषामित्यादि * । हिहेतौ । स्फुटमन्यत् । एवञ्चात्र स्थितिकर्तृत्वनिर्वाहकतयोपोद्घातेन सर्वनियमनं विचारितमिति तदसम्भवः परिहृतः ॥ २० ॥ ॥ ६ ॥

अदृश्यत्वादिगुणको धर्मोक्तेः ॥ पूर्वाधिकरणविषयवाक्ये, अमृत इति, अतोऽन्यदार्तमिति च कथनादन्तर्यामिणि सर्वहृदयदेशवर्तिनि भोगवैलक्षण्यसाधकं वैशिष्ट्यं दर्शितम् । सृष्टिदशायां नियामकत्वं चोक्तम् । तत्र पुनरदृष्टो द्रष्टेत्याद्युक्तम् । तत् कुत इत्याकाङ्क्षायां तत्र हेतुबोधनाय सृष्टिपूर्वदशायां सर्वाभावान्नियामकत्वं न भविष्यतीत्याशङ्कायां च तदाप्यक्षरं नियमयतीति बोधनाय चोपोद्घातेनेदमधिकरणमारभ्यत इति प्रसङ्गरूपां सङ्गतिं बोधयितुं विषयवाक्यमुदाहरन्ति * मुण्डके हीत्यादि * अत्र सर्वा उपनिषद् विषयवाक्यतया ज्ञेया । * इति पृष्ट इति * अनेन वाक्येनैकविज्ञानेन सर्वविज्ञाने पृष्टे । * इत्युत्तरमाहेति * इत्यादिनोत्तरमाह । किमुत्तरमाहेत्यपेक्षायामाहुः । * तत्रेत्यादि * । * तत्रेति * उत्तरमध्ये । तथाचैतद्विद्याद्वयं सर्वविज्ञानार्थमाहेत्यर्थः । अत्र कस्मिन्नंशे सन्देह इत्यपेक्षायामाहुः । * तत्र वेदेत्यादि * । कुतः सन्देह इत्यपेक्षायां तद्बीजः

न सन्देहः । परायां सन्दिह्यते । किमेषा सांख्यमतविद्या ब्रह्मविद्या वेति । सांख्यधर्माभिलापात् सन्देहः । अथ परा यया तदक्षरमधिगम्यते, यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं, तद्भूतयोनिं परिपश्यन्ति धीरा इत्यादि । अग्रे च, दिव्यो ह्यमूर्तः पुरुषः स बाह्याऽभ्यन्तरो ह्यजः । अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः पर इत्युक्त्वा, एतस्माज्जायते इति निरूप्य, अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्यावित्यादिना रूपमुक्त्वा पुनः पुरुषात् सृष्टिमाह ।

तत्रैकप्रकरणत्वादेकवाक्यता वक्तव्या । तत्राक्षरपुरुषयोर्भेदः प्रतीयते । तयोरुभयोरपि सृष्टिः । तद् ब्रह्मवादे न सङ्गच्छते ।

माहुः । *सांख्यधर्मेत्यादि * तथाचोपक्रमे, स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहेति प्रतिज्ञानादग्रे सांख्यधर्माभिलापाच्च सन्देह इत्यर्थः । तदभिलापमुपपादयन्ति * अथेत्यारभ्य * । * सृष्टिमाहेत्यन्तम् * । * अग्र इति * द्वितीयमुण्डके । तथाच पूर्वमुण्डके, अद्रेश्यत्वादिगुणकस्य भूतयोनित्वकथनात् तादृशत्वस्य प्रधाने सांख्यैरङ्गीकारात् । द्वितीयमुण्डके च, पुरुषं तद्रूपं ततोऽग्रे पुमान् रेतः सिञ्चति योषितायां बह्वीः प्रजाः पुरुषात् सम्प्रसूता इति कथनात् प्रकृतिसंयोगेन पुरुषरूपस्य सृष्टेश्च तैरङ्गीकारात् तदभिलाप इत्यर्थः । एवं सन्देहबीजमुक्त्वा पूर्वपक्षमाहुः * तत्रेत्यादि * मुण्डकत्रये एकस्यैव मतस्य प्रतिपादितत्वेन वाक्यानामितरेतरसाकाङ्क्षत्वैकप्रकरणत्वादेकवाक्यता सर्वस्य वक्तव्येत्यर्थः । तर्ह्युपक्रमस्याऽसञ्जातविरोधित्वेनावान्तरवाक्यापेक्षया प्रबलत्वाद् ब्रह्मवाक्यत्वेनैव सा भवत्वित्यत आहुः * तत्राक्षरेत्यादि * । * प्रतीयत इति * अक्षरात् परतः पर इत्यत्र प्रतीयते । * सृष्टिरिति * एतस्माज्जायते प्राण इत्यादिनोक्ता सृष्टिः । * न सङ्गच्छत इति * बाधकोपपत्तेरुपक्रमापेक्षया प्राबल्यान्न सङ्गच्छते । ननु सांख्ये प्रकृतेरेव सृष्टिरङ्गीक्रियते,

तस्मात् सांख्यमतमेवैतत्। प्रकृतिपुरुषयोः श्लिष्टत्वादन्यतरप्राधान्येनोभयोः स्रष्टृत्वम्। उभयात्मकत्वाज्जगतः। रूपमपि समष्टेर्व्यष्टीनामग्रे ह्युत्पत्तिरिति। तिरोहितरूपत्वान्न ब्रह्मविद्या। किन्तु स्मृतिरेवेति। ब्रह्मविद्या वेदविद्या, उपचाराद्वेति। एवं प्राप्त उच्यते। अदृश्यत्वादिगुणकः परमात्मैव। ब्रह्मविज्ञानेनैव सर्वविज्ञानात्। तत एव विद्याया अपि परत्वम्। अक्षरस्यापि ब्रह्मत्वं, पुरुषस्यापि। तयोः परापरभावः। अभेदश्च। एतादृश एव हि

न पुरुषादतः कथं तन्मतसिद्धिरित्यत आह * प्रकृतिपुरुषयोरित्यादि *। * उभयात्मकत्वादिति * जीवजडात्मकत्वात्। * रूपमपि समष्टेरिति * अग्निर्मूर्द्धेत्याद्युक्तं रूपमपि श्लिष्टस्यैवेत्यर्थः। अत्र युक्तिमाहुः * व्यष्टीनामित्यादि *। नन्वेतत्सर्वं ब्रह्मवादेऽपि तुल्यमित्यत आह * तिरोहितेत्यादि * सच्चिदानन्दरूपस्य विग्रहस्याकथनेनानुक्तत्वेन तिरोहितरूपत्वान्न तथेत्यर्थः। ननु तथापि ब्रह्मविद्यापदविरोधो दुर्वार इत्यत आह * ब्रह्मविद्येत्यादि * ब्रह्मपदस्य वेदेऽपि शक्तेस्तथा। नन्वग्रे विद्ययोः परापरविभागमुक्त्वा तत उपनिषत्समाप्तावक्षरविद्यासमाप्तेः, तेषामेवैतां ब्रह्मविद्यां वदेतेति प्रकृतपरामर्शपूर्वकं ब्रह्मविद्यापदकथनाद् वेदविद्यापक्षो न साधीयानित्यत आह * उपचाराद्वेति *। एवं पूर्वपक्षमुक्त्वा सिद्धान्तं वक्तुं सूत्रं व्याचक्षते * उच्यत इत्यादि *। * ब्रह्मविज्ञानेत्यादि * एकविज्ञानेन सर्वज्ञानस्य ब्रह्मविद्यालिङ्गत्वम्, अपि वा तमादेशमप्राक्ष्य इत्यादिश्रुत्यन्तरे सिद्धम्। प्रकृतेऽपि, कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति प्रश्नस्योत्तरत्वेनादृश्यत्वादिगुणकस्य ततः सृष्टेश्च कथनेन तद्विज्ञानादेव सर्वविज्ञानबोधनादक्षराधिगमकत्वादेव विद्यायाः परत्वबोधनाच्च तल्लिङ्गमत्रापि दृश्यत इति स परमात्मैव, न तु प्रकृतिः। तद्विज्ञानेन पुरुषाविज्ञानात् तद्विद्यया मोक्षाभावेन परत्वानङ्गीकाराच्च तथेत्यर्थः। अत्रापि धर्मोक्तेरेव हेतुत्वम्। नन्वत्राक्षरपुरुषावुक्तौ तत उभयोर्विज्ञानेन तथात्वमुच्यते, न त्वेकविज्ञानेनेति नायं हेतुरित्यत आहुः * अक्षरस्येत्यादि *। * एतादृश एव हीति * अन्यथा पुरुषस्वरूप-

ब्रह्मवादः । तत्र प्रथममक्षरस्य ब्रह्मत्वमाह । अदृश्यत्वादिगुणकः परमात्मैव । कुतः । धर्मोक्तेः । तथाऽक्षरात् सम्भवतीह विश्वमिति । इयं चोपनिषत् । न ह्यत्र ब्रह्मव्यतिरिक्ताज्जगदुत्पत्तिरस्ति । पुरुषस्य ब्रह्मत्वं निःसन्दिग्धमेव । ईषदानन्दतिरोभावेन ब्रह्माऽक्षरमुच्यते । प्रकटानन्दः पुरुष इति । ब्रह्मविदाप्नोति परमित्यत्रैव तथा निर्णयात् । तस्माददृश्यत्वादिगुणकः परमात्मैव ॥ २१ ॥

विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ २२ ॥

ननु पूर्वपक्षन्यायेन ब्रह्मविद्याख्यायामपि स्मृतिर्ब्रह्मविद्यैवाऽस्तु । द्वे ब्रह्मणी वेदितव्ये मूर्तं चाऽमूर्तं चेत्यत्र विकार-

---

कथनस्य पादत्रयेणैव सिद्धेरक्षरात् परतः पर इति तुरीयं पादं न वदेत् । प्रयोजनाभावात् । तथाच ब्रह्मवादस्य परापरभावपूर्वकाभेदघटितत्वेनात्राप्येकविज्ञानादेव सर्वविज्ञानस्याभिप्रेतत्वेन हेतुरस्त्येवेत्यर्थः । ननूभयोः कथमभेद इत्याकाङ्क्षायामाहुः * तत्रेत्यादि * । * तत्रेति * अभेद उभयोपक्रम्ये । विश्वोत्पत्तेः कथं ब्रह्मधर्मत्वमत आहुः * इयमित्यादि * । नन्वेवं ब्रह्मत्वेनोभयोरभेदे, अक्षरात् परतः पर इति कथं परापरभावव्यपदेश इत्यत आहुः । * ईषदित्यादि * तथाचावस्थाभेदमादायायं भेदव्यपदेशो, न तु वस्तुभेदादतो, न ब्रह्मवादव्याघात इत्यर्थः । एवं भेदप्रत्ययस्य श्लिष्टस्पष्टत्वस्य तिरोहितरूपत्वस्य च सांख्यधर्मत्वं निराकृतम् । अतः परं पूर्वमवस्थाभेदस्यानुक्तत्वादत्र तदङ्गीकारे प्रतिज्ञान्तरस्य निग्रहस्थानस्यापत्तिरित्येतन्निराकुर्वन्ति * ब्रह्मविदित्यादि * । तथानन्दमयसूत्रस्य द्वितीयवर्णक उपपादितम् । अतो न दोषापपत्तिरित्यर्थः । सिद्धमाहुः * तस्मादित्यादि * ॥ २१ ॥

विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ सूत्रमवतारयन्ति * नन्वित्यादि * । * स्मृतिर्ब्रह्मविद्यैवेति * । स्मृतिरेव ब्रह्मविद्येति योजना ।

स्यैव ब्रह्मपदवाच्यत्वम् । अतः प्रकृतिपुरुषावेव वाक्यार्थं इति परिहरति । इतरौ न भवतो वाक्यार्थरूपौ । कुतः । विशेषणभेदव्यपदेशाभ्याम् । विशेषणभेदो व्यपदेशश्च ताभ्याम् । अदृश्यत्वादयो गुणा न प्रकृतेर्भवन्ति । सर्वस्यापि तद्विकारत्वात् । न हि घटदर्शनेन मृत्त्र दृश्यत इति वदितुं युक्तम् । ब्रह्मवादे पुनः सर्वभवनसामर्थ्याद् ब्रह्मणि विरोधाभावः । न हि नित्यं सदैकरूपं विक्रियमाणं च भवितुमर्हति । सर्वत्र ब्रह्मधर्मतुल्यत्वे तदेव ब्रह्मेति जितं ब्रह्मवादिभिः ।

अयमर्थः । पञ्चशिखसूत्रावव्यक्तपर्यायेषु नपुंसकलिङ्गस्याऽक्षरपदस्य पाठाद् योनिपदस्योपादानवाचकत्वाद् भूतयोनित्वमव्यक्तलिङ्गम् । अक्षरात् परत्वं च पुरुषलिङ्गम् । अनस्तत्सर्वं न्यक्कृत्य ब्रह्मविद्यार्थं न स्थापयितुं शक्यम् । कस्मिन् विज्ञाते इति प्रश्नवाक्ये कस्मिन् मते विज्ञाते इत्यर्थस्य शक्यवचनत्वादेतस्य सर्वविज्ञानस्य ब्रह्मविद्यालिङ्गत्वाभावात् । नापि ब्रह्मविद्येति समाख्यया । द्वे ब्रह्मणी इति श्रुत्या ब्रह्मपदस्य विकारेऽपि शक्तौ प्रतिहतायां तस्या अप्यन्यथासिद्धत्वात् । लिङ्गापेक्षया पञ्चमत्वेनातिदौर्बल्याच्च । अतो लिङ्गबलात् प्रकृतिपुरुषावेव वाक्यार्थं इति परिहरतीत्यर्थः । सूत्रं व्याकुर्वन्ति । * इतरावित्यादि * । * व्यपदेश इति व्यपदेशाभेदः । आद्यं व्युत्पादयन्ति । * अदृश्येत्यादि * । ननु ब्रह्मवादेऽप्ययं दोषस्तुल्य इति सोऽपि न वदितुं युक्त इत्यत आहुः । * ब्रह्मवाद इत्यादि * । ननु प्रकृतावपि तथासामर्थ्यमङ्गीक्रियते । अतः परिहारतौल्यमेतदपि ब्रह्मवादलिङ्गमित्यत आहुः । * न हीत्यादि * । * भवितुमर्हतीति * । प्रधानस्य परिणामित्वस्यैवाङ्गीकारात् सदैकरूपं भवितुं नार्हति । तथाचोक्तरीत्यैकदेशदर्शने तद्रूपत्वस्यावश्यवचनत्वादेतेनैव प्रकृतिवादनिरास इत्यर्थः । तस्येतादृशत्वमेव तस्याः फलत्वमित्यत आहुः । * सर्वेत्यादि * । * जितमिति * । सांख्यवादिनः प्रतिज्ञासंन्यासप्रतिज्ञान्तरयोरु-

यः सर्वज्ञः सर्वविदित्यादयस्तु सुतरामेव न प्रकृतिधर्माः । व्यवधानाच्च न पुरुषसम्बन्धः । अक्षरनिरूपण एव पुरुषविशेषणाच्च । येनाक्षरं पुरुषं वेद सत्यमिति । तस्मादक्षरविशेषणानि, न प्रकृतिविशेषणानि । नापि पुरुषविशेषणानि सांख्यपुरुषस्य । न हि दिव्यत्वादयो गुणाः पुरुषस्य भवन्ति । न हि तन्मते पुरुषभेदो ह्यङ्गीक्रियते जीवब्रह्मवत् । नच तस्य बाह्याभ्यन्तरत्वम् । सर्वत्वाभावात् । न हि तस्माज्जायते प्राणादिः । तस्मात् पुरुषविशेषणान्यपि न सांख्यपुरुषविशेषणानि । अतो विशेषणभेदः ।

पाताजितमित्यर्थः । अन्यमपि विशेषणभेदमाहुः । * य इत्यादि * नन्वेतानि पुरुषविशेषणानीति न दोष इत्यत आहुः । * व्यवधानादित्यादि * अदृश्यत्वसर्वज्ञत्वादयः प्रथममुण्डके, पुरुषनिरूपणं च द्वितीयमुण्डक इति व्यवधानात् तथेत्यर्थः । पुनर्विशेषणान्तरमाहुः । * अक्षरेत्यादि * । तथाचाक्षरनिरूपणे आद्यन्तयोः पुरुषविशेषणदर्शनात् पुरुषात्मकमक्षरमत्राभिप्रेतं, न प्रकृत्यात्मकमतस्तथेत्यर्थः । येनेति वाक्यं तु प्रथममुण्डकसमाप्तिस्थम् । ननु पञ्चशिखवृत्तौ पुंलिङ्गस्याक्षरपदस्य पुरुषपर्यायेषु पाठान्नपुंसकत्वमनादृत्य पूर्वत्रापि पुरुष एव ग्राह्यः । तथा सति पुरुषविशेषणानि कुतो न सांख्यपुरुषविशेषणानीत्यत आहुः । * न हि दिव्येत्यादि * साक्षित्वकैवल्यमाध्यस्थ्यद्रष्टृत्वाकर्तृत्वातिरिक्तधर्मानङ्गीकारात् तथेत्यर्थः । ननु बहुषु कश्चित् तादृशोऽप्यस्तु, को दोष इत्यत आहुः । * न हि तन्मत इत्यादि * । तथाच नानापुरुषाङ्गीकारेऽपि सर्वेषां तुल्यत्वमेव तन्मते, न तु नियम्यनियामकभावादिनोत्कर्षापकर्षौ, अतस्तथाङ्गीकारस्तन्मतभञ्जक इत्यर्थः । ननु दिव्यत्वं दिविभवत्वमलौकिकत्वं वा । तदुभयमपि व्यापकत्वप्राकृतगुणवैलक्षण्याभ्यामुपपद्यते । एकत्वं च जात्यपेक्षया । शेषास्त्वमूर्तत्वादयः सिद्धान्तेन तुल्या इति कथं ते तत्र नेष्यत आहुः । * नचेत्यादि * । किञ्चै-

व्यपदेशभेदश्च । ब्रह्मविद्यैवेपेति । स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामित्युपक्रमे, प्रोवाच तां तत्त्वतो ब्रह्मविद्यामिति मध्ये, तेषामेवैतां ब्रह्मविद्यां वदेतन्ते । तस्मान्न सांख्यपरिकल्पितौ प्रकृतिपुरुषौ वाक्यार्थः । न हि ब्रह्मा ज्येष्ठपुत्राय स्मृतिरूपां विद्यां वदतीति चकारार्थः ॥ २२ ॥

रूपोपन्यासाच्च ॥ २३ ॥

अग्निर्मूर्द्धा चक्षुषी इत्यादिरूपं न हि प्रकृतिपुरुषयोरन्यत-

---

कत्वस्य जातिप्रयुक्तत्वे सर्वेषां तौल्याद्, दिव्यो ह्यमूर्त इति मन्त्रानन्तरमन्त्रोक्ता सृष्टिरपि सर्वेभ्यः स्यादिति सापि सांख्ये तथानङ्गीकाराद् विभिद्यते । तथा महदादिक्रमेण तत्र सृष्टिर्न तु प्राणादिक्रमेण, न वा सह, न वा ततः साक्षात् । अतोऽपि तथेत्यर्थः । एवं विशेषणभेदरूपं दूषणं व्युत्पादितम् । द्वितीयं व्युत्पादयन्ति । * व्यपदेशेत्यादि * । तथाच यदि सांख्यमतविद्याऽत्राभिप्रेता स्यात् तदा तेषु कश्चित् सांख्यविद्यामिति, तत्त्वविद्यामिति वा वदेत् । अतो विद्याव्यपदेशभेदादपि तथेत्यर्थः । * ब्रह्मेति * हिरण्यगर्भो वेदाचार्यः ॥ २२ ॥

रूपमपि समष्टिव्यष्टिजनकस्य यदुक्तं तदपि सांख्यमताद् भेदज्ञापकमित्याशयेन सूत्रं पठित्वा व्याकुर्वन्ति ॥ रूपोपन्यासाच्च ॥ नचेदं रूपं क्लिष्टस्येति वाच्यवचनम् । यथा सुदीप्तात् पावकादिति मन्त्रेण केवलादक्षरात् सृष्टिमुक्त्वा, ततो, दिव्यो ह्यमूर्त इति मन्त्रेण केवलस्य पुरुषस्याक्षरात् परत्वमुक्त्वा, तत, एतस्माज्जायत इति मन्त्रे एतत्पदेन केवलं पुरुषं परामृश्य ततः प्राणादिसमष्टिसृष्टिमुक्त्वा तस्यैव रूपमग्निर्मूर्द्धेतिमन्त्रे वदन्ती श्रुतिर्मन्त्रान्ते, एष सर्वभूतान्तरात्मेति केवलं परामृशति । ततोऽग्रे, तस्मादग्निः समिध इत्यादिभिर्व्यष्टिसृष्टिं वदतीति । इदं च न केवलस्य तन्मतीयस्य । तथा तैरनङ्गीकारात् । नापि केवलायाः । अन्तरात्मत्वोक्तिविरोधात् । अतः प्रकृतिपुरुषयोरन्यतरस्य न सम्भवतीति । ब्रह्मवादे तु विश्वरूपत्वेन विश्व-

रस्य सम्भवति । ब्रह्मवादे पुनर्विश्वकारणस्यैतद्रूपम् । सूत्रविभागात् पुनर्मुख्योपपत्तिरेवेति सूचितम् । चकारेण श्रुत्यन्तराविरोध एकवाक्यता च सर्वेषां वेदान्तानामिति। तस्मादक्षरशब्देन पुरुषशब्देन च ब्रह्मैव प्रोक्तमिति ब्रह्मविधिरेवेति सिद्धम् ॥२३॥

कार्यरूपस्यैवोक्तत्वादुपपन्नतरम् । अतो नात्र सांख्यगन्धोऽपीत्यर्थः । विशेषणभेदव्यपदेशरूपोपन्यासेऽप्य इत्यनुक्त्या यदत्र भिन्नं सूत्रमुक्तं तत्तात्पर्यमाहुः * सूत्रेत्यादि * । *चकारेणेत्यादि* । तथाचैतद्द्वयमपि तन्मतबाधकतया चकारेण सङ्गृहीतमित्यर्थः । तेन सांख्यमतसिद्धे कार्येश्वरेऽतिव्याप्तिर्निवारिता ।

रामानुजाचार्यास्तु, यथा तदक्षरमधिगम्यत इत्युपक्रान्तस्य भूतयोनेरक्षरस्यैव, यः सर्वज्ञः सर्वविदित्यग्रिमवाक्ये परामर्शादक्षरपदेन परमात्मैवोच्यते । अक्षरात् परतः पर इत्यत्र तु पञ्चम्यन्तेनाऽक्षरपदेन भूतसूक्ष्ममचेतनमुच्यते । तथाचाक्षराद्व्याकृतात् परः पुरुषस्तस्मादपि परः परमात्मैव । अत्र गमकं तु भूतयोनित्वं परात्परत्वं रूपं च लिङ्गत्रयात् । भूतसूक्ष्मस्याक्षरत्वं तु, अश्नुत इति वा, न क्षरतीति वा स्वविकारव्याप्त्या महदादिवन्नामान्तराभिलापयोग्यस्वरूपाभावाद्वा योगेन कथञ्चिदुपपद्यत इत्याहुः । तत्रेदमवधेयम् । गीतायां द्वादशे, 'एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते । ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः' इति प्रश्ने तदुत्तरेण चाक्षरपुरुषोत्तमयोरैक्यमवस्थाभेदेन भिन्नत्वं च बोधितम् । ततः पञ्चदशे, द्वाविमौ पुरुषौ लोक इति सन्दर्भे अक्षरपुरुषोत्तमत्वं स्वस्योक्तम् । श्वेताश्वतरश्रुतावपि, क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एक इत्यक्षरस्यात्मत्वं, देवस्य क्षराक्षरेशितृत्वं चोक्तम् । अत्राप्यक्षरस्य पुरुषत्वं पूर्वमुक्त्वा अक्षरात् परत्वं पुरुषस्य यदुच्यते तेन गीताद्युक्तरीतिकमेवाक्षरपुरुषयोः स्वरूपं ज्ञाप्यते । न तु तदक्षरमतिहाय भूतसूक्ष्मरूपम् । प्रकृतहानाप्रकृतकल्पनयोः प्रसङ्गात् । नच परत इति पञ्चम्यन्तवैयर्थ्यम् । एतस्याक्षरविशेषणत्वेनोपपत्तेः । सांख्ये प्रधानस्याप्यक्षरपदवाच्यत्वेन तद्वार-

णस्यात्रावश्यकत्वादिति ।

भास्कराचार्यास्तु, परत इति पदमक्षरविशेषणत्वेनाङ्गीकुर्वन्ति । अक्षरपदं चात्र प्रधानबोधकमङ्गीकुर्वन्ति । रूपं च कारणात्मनः कार्यात्मनावस्थितस्येति चाहुः ।

शङ्कराचार्यास्त्वग्निर्मूर्द्धेत्यादिनोक्तं रूपं परमेश्वरस्येति व्याख्याय, नेदं रूपं परमेश्वरस्य । जायमानमध्ये एतदुपन्यासात् । एतस्माज्जायते प्राण इति पूर्वं प्राणादीनां, तस्मादग्निः समिधो यस्य सूर्य इत्यनन्तरं च दर्शनात् । नच सर्वात्मत्वबोधनाय मध्ये पाठ इति युक्तम् । पुरुष एवेदं विश्वं कर्मेत्यस्य सृष्टिकथनोत्तरं वक्ष्यमाणत्वात् । अतो हिरण्यगर्भः समवर्तताग्र इति, स वै शरीरी प्रथम इति श्रुतिस्मृतिभ्यां तस्यैव जायमानत्वशरीरित्वयोर्निश्चायनात् तस्यैवेदं रूपम् । नच सुत्रवैयर्थ्यम् । परमेश्वरप्रतिपत्तिहेतुतया तस्योक्तत्वादित्यन्ये मन्यन्त इत्याहुः ।

वाचस्पतिस्तु प्रकरणापेक्षया सन्निधेर्निर्बलत्वात् प्रकरणिन एवेदं रूपमिति यद्यपि सिद्ध्यति, तथापि प्रकरणिनः शरीरेन्द्रियादिरहितस्य विग्रहवत्त्वाविरोधात् सिद्धे प्रकरणिनोऽसम्बन्धे मूर्धादिश्रुतीनामत्यन्तविप्रकृष्टप्रकरणापेक्षयाऽतिबलिष्ठत्वाज्जायमानमध्यपातित्वं जायमानग्रहणे कारणमुपन्यस्तं भाष्यकृतेत्याह । तन्मन्दम् । भाष्यकृता एतस्यान्यमतत्वेनैवोपन्यासात् । तदुपन्यासारम्भे, अन्ये पुनर्मन्यन्त इति पुनःशब्देनास्य पक्षस्येश्वरस्य स्वयमेवापादनात् । भाष्यकारस्यैवमभिप्राये तेन मूर्द्धादिश्रुतिरेव प्रमाणतयोपन्यस्येत । अतः सूत्रं भाष्यं च स्वाग्रहमात्रेण विरुद्धप्रतिपादितं द्योतयतीति बोध्यम् । एतेनैव भैक्षवमपि दत्तोत्तरम् ।

शैवस्तु पूर्वानुसार्येव ।

माध्वास्तु, 'अपरं त्वक्षरं या सा प्रकृतिर्जडरूपिका । श्रीः परा प्रकृतिः प्रोक्ता चेतना विष्णुसंश्रया । तामक्षरं परं प्राहुः परतः परमक्षरम् । हरिमेवाखिलगुणमक्षरत्रयमीरितम्' इति स्कान्दादक्षरपदं द्विष्वपि रूढमङ्गीकृत्य, अक्षरात् परतः पर इत्यत्र प्रकृतितः परं यल्लक्ष्मीरूपमक्षरं तस्मादपि परोऽदृश्यत्वादिगुणकोऽक्षरशब्दवाच्यः पुरुषस्तदुभयभिन्न उक्तविशेषणादेव । यः सर्वज्ञ इत्यादिविशेषणात् प्रकृतितोऽपि भिन्नः । तस्मादेतद् ब्रह्म नामरूपमन्नं च जायत इति

वैश्वानरः साधारणशब्दविशेषात् ॥ २४ ॥

अधिकरणत्रयेण भोगमुपपाद्य पूर्वाधिकरणे अदृश्यत्वादिगुणानुक्त्वा प्रसङ्गाद् रूपमुपन्यस्तम्। अधुना साकारब्रह्मतामुपपादयितुमिदमधिकरणमारभते। को न आत्मा किं ब्रह्मेति, आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूहीति चोपक्रम्य द्युसूर्यवाय्वाकाशवारिपृथिवीनां सुतेजस्त्वादिगुणयोगमेकैकोपासननिन्दया च मूर्द्धादिभावमुपदिश्याऽऽम्नायते।

नामरूपाद् ब्रह्मणः शब्दब्रह्मरूपाच्चतुर्मुखाद्भेदेन व्यपदेशाच्च विरुद्धः। द्युष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक इतीशान्यत्वव्यपदेशाच्च रुद्रः। यदापश्यः पश्यते रुक्मवर्णं कर्त्तारमीशं पुरुषं ब्रह्मयोनिमिति रूपोपन्यासाच्च न प्रकृत्यादावित्याहुः ॥२३॥ ॥७॥

वैश्वानरः साधारणशब्दविशेषात् ॥ एवमदृश्यत्वाद्यधिकरणेनाऽन्तर्यामिणोऽदृष्टत्वेऽदृश्यत्वरूपो हेतुः प्रसङ्गाद्दर्शितः। अतः परं प्रस्तूयमानाधिकरणस्य पूर्वोक्तसर्वोपपादकत्वबोधनाय तत्प्रयोजनमाहुः * अधिकरणत्रयेणेत्यादि *। अत्ता चराचरग्रहणाद्, गुहां प्रविष्टावात्मानौ हि तद्दर्शनाद्, अन्तर उपपत्तेरित्यधिकरणत्रयेण वैशेष्यबोधनात् त्रिविधं भोगमुपपाद्यान्तर्याम्यधिकरणे तद्वैशेष्यमन्तर्यामिणि निगमयित्वा, अदृश्यत्वाद्यधिकरणे तस्यादृष्टत्वोपपादकान् अदृश्यत्वादिगुणानुक्त्वा रूपाभावादेवादृश्यत्वादीतिशङ्कानिरासायाक्षरात्मनस्तत्प्रसङ्गाद्रूपमुपन्यस्तम्। परमात्माक्षरयोरभेदः परापरभावश्चोक्तः। तत् तदा सङ्गच्छते, यदि ब्रह्मणः साकारता वास्तवी स्यात्। परमात्मनो विरुद्धधर्माश्रयत्वं च स्यात्। अतस्तदुपोद्घातत्वेनाऽधुनेदमधिकरणमारभत इत्यर्थः। एवं सङ्गतिमुक्त्वा विषयवाक्यमुदाहरन्ति * को न आत्मेत्यादि *। इदं च छान्दोग्ये सप्तमप्रपाठके वर्तते। तत्रोपक्रमे, प्राचीनशालसत्ययज्ञेन्द्रद्युम्नजनबुडिलनामानः पञ्चापि श्रुताध्ययनवृत्तसम्पन्नाः क्वचन समेत्य मीमांसां चक्रुः। को न

आत्मा, किं ब्रह्मेति । अत्र स्वात्मब्रह्मणी अभिन्ने भिन्ने वेति संशयो न तेषां विचारबीजं, किन्त्वस्मदुपास्य आत्मा कः, किं ब्रह्म, तदेकदेशो वेति संशयो विचारबीजमित्यनुपदमेव व्युत्पादयिष्यामः ।

यदत्र कैश्चिद् व्याख्यातम् । आत्मब्रह्मशब्दयोरितरेतरविशेषणविशेष्यत्वाद् ब्रह्मेत्यध्यात्मपरिच्छिन्नमात्मानं निवर्तयत्यात्मेति चात्मव्यतिरिक्तस्यादित्यादिब्रह्मण उपास्यत्वं निवर्तयति । अतो, ब्रह्म आत्मैव, आत्मा ब्रह्मैवेत्यभेदेन सर्वात्मा वैश्वानरो ब्रह्म स्व आत्मेति फलिष्यतीति । तन्न । किम आवृत्त्या वाक्यभेदस्य स्फुटत्वेन विशेषणविशेष्यभावप्रतीत्यनुदयादेतदुपपादनभूताग्रिमग्रन्थानुरोधेन तथाङ्गीकारेऽपि तत्रात्मन उपास्यत्वेनैव सिद्धतया तत्र प्रत्यगात्माभेदापादनस्यासङ्गतत्वादिति । अतः पूर्वोक्तसंशय एव विचारबीजम् । मीमांसाफलं त्वग्रे वक्तव्यम् । ततः स्वविचारणया तन्निश्चयमलभमाना उद्दालकनामानमन्यं वैश्वानरोपासकं संशयवारकत्वेन सम्भावितवन्तः । सर्वेऽपि तन्निकटे यदा गतास्तदा तेन विचारितम् । एते प्रश्नार्थमागता महाश्रोत्रिया अहमिव वैश्वानरोपासका, नाहमेभ्योऽधिकोऽतोऽन्यमप्यनुशास्मामीति । तत एवं निश्चित्य तद्वेत्तारं कैकेयमुपदिष्टवान् । ततस्ते षडपि कैकेयराजनिकटे गताः । तदा स राजा तेषां पृथक् पृथक् पूजां पुरोहितादिद्वारा कारयित्वा धनं दातुमारब्धवान् । यदा न जगृहुस्तदा, न मे स्तेनो जनपद इत्यादिना स्वस्य सद्वृत्ततामुक्तवान् । तथापि ते धनं न जगृहुस्तदा तेषामधिकाराल्पतां सम्भाव्याहं यक्ष्यमाणोऽस्मि, ऋत्विक्समानं धनं प्रत्येकं दास्यामि, तावत् स्थातव्यमित्युक्ते, ते स्वाभिप्रायमुक्तवन्तः । आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूहीति । तदा राजा तदधिकारपरीक्षार्थं, प्रातर्वः प्रतिवक्तास्मीत्युक्त्वा अन्तःपुरं प्रविष्टः । ततो द्वितीयेऽह्नि ते समित्पाणयो राजसमीपं गताः । ततो राज्ञा, एते धनविद्याप्रतिष्ठावन्तोऽपि स्वाभिमानं परित्यज्यैतज्जिज्ञासयैव समागता अतोऽधिकारिण इत्यवगत्य तत्प्रतिभापरीक्षणाय प्रत्येकं पप्रच्छ, कं त्वमात्मानमुपास्स इति । तदा तैः क्रमेण द्युसूर्यादिषु स्वस्वोपास्यात्मत्वेनोक्तेषु, एष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्स इत्यादिना, द्युसूर्यवाय्वाकाशवारिपृथिवीनां क्रमेण सुतेजस्त्वविश्वरूपत्वपृथग्वर्त्मात्मत्वबहुलत्वरयि-

यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति । तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुदर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचनमास्यमाहवनीय इत्यादि ।

स्थप्रतिष्ठात्वगुणयोगं मूर्द्धविपातान्धत्वप्राणोत्क्रमणदेहविशरणबस्तिभेदपादविम्लानिकथनरूपया एकैकोपासननिन्दया च मूर्द्धचक्षुःप्राणदेहमध्यभागबस्तिपादभावमुपदिश्याग्रे आम्नायत इत्यर्थः ।

* यस्त्वेतमित्यादि * एतदर्थस्तु, यस्त्वेवं भवत्पृष्टम्, एवं मदुक्तप्रकारेण तत्तदवयवविशिष्टमेकं, प्रादेशमात्रं, मात्रं कार्त्स्न्येऽवधारणे इति कोशाद्द्युलोकपृथिव्यन्तरे मूर्द्धचिबुकान्तराले प्रतिष्ठितत्वकथनात् प्रादेशपरिमाणकत्वेनावधारितम्, अभिविमानं तादृशपरिमाणकत्वेऽप्यभितः सर्वतो विगतं मानं परिमाणं यस्मात् तादृशम्, आत्मानं नियामकं, वैश्वानरं विश्वान् नरान्नयतीति यास्केन पृषोदरादितया निरुक्तं स्वप्रापकम् उपास्ते चिन्तयति । स सर्वेषु लोकेषु द्युप्रभृतिषु, सर्वभूतेषु चराचरेषु शरीरेषु सर्वेष्वात्मसु जीवेष्वन्नमत्ति सर्वात्मभूतः संस्तांस्तानेकदेशाभिमानिनो न्यक्कृत्य तत्तद्वृत्तिभिस्तत्तदाद्यद्रव्यैश्च तद्भोग्यं स्वयं भुङ्क्ते । तस्य ह वा एतस्य सर्वावयवविशिष्टस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजाः, त्वदुपास्यद्युरूपः सुतेजस्त्वगुणविशिष्टः । एवमग्रेऽपि । विश्वरूपो नानारूपवानादित्यः । पृथग्वर्त्मात्मा आवहोद्वहादिभेदेन वान् वायुः । सन्देहो देहमध्यभागः । बहुलः सर्वगतत्वादाकाशः । बस्तिर्नाभ्यधोभागः । रयिः, अन्नोत्पादनद्वारा धनजनकत्वाद्धनरूपा आपः । प्रतिष्ठा पादौ पृथिवी । वेदिराकारसाम्यात् । बर्हिरास्तीर्णत्वसाम्यात् । हृदयं गार्हपत्यो, हृदयाद्धि मनः प्रणीतमिवानन्तरं भवतीति साम्यात् । अन्वाहार्यपचनो दक्षिणाग्निः । आहवनीयो हवनस्थानत्वसाम्यात् । एवं

तत्र संशयः । किं वैश्वानरशब्देन ब्रह्म प्रतिपादयितुं शक्यते, न वेति । अर्थस्यातिसन्दिग्धत्वात् सन्देहः । तत्रोपक्रमे ब्रह्मात्मपदप्रयोगोऽस्ति नान्यत् किञ्चित् । उपपादने त्वतद्धर्मा एव । साकारस्य तु लोकन्यायेनाब्रह्मत्वम् ।

वैश्वानरो यद्यप्यग्नावेव प्रसिद्धस्तथापि पूर्वकाण्डसिद्धत्वा-

---

विषयमुक्त्वा संशयाकारं तद्बीजं चाहुः । * किमित्यादि * । * अर्थस्येत्यादि च * । कथमतिसन्दिग्धत्वमित्यत आहुः * तत्रेत्यादि * तद्बीजं विचार्य । उपक्रमे विचाराकारकथने ब्रह्मात्मपदयोः प्रयोगोऽस्ति, को न आत्मा, किं ब्रह्मेति । तत्र किम आवृत्त्या वाक्यभेदापगमाद्विशेषणविशेष्यभावाप्रतीत्या द्वयोः प्रकरणित्वमापातः प्रतीयते नान्यत् किञ्चिदन्यतरस्य प्रकरणित्वोपपादकम् । अत उपक्रमस्य सन्दिग्धत्वादर्थस्यातिसन्दिग्धत्वम् । अथाग्रिमग्रन्थे, कं त्वमात्मानमुपास्स इति प्रश्नस्य दिवमेव भगवो राजन्नित्यादिप्रत्युत्तरादुपास्यस्यैवात्मनो विचारविषयत्वं, न प्रतीचोऽस्य । ततश्च समस्तोपास्यस्य खण्डोपास्यरूपप्रकाशनेन संविदं कुर्वेत्यर्थात्, को न आत्मेत्यत्रोपास्य तथा परामृष्टस्यैव विशेषजिज्ञासाबोधकं किं ब्रह्मेति वाक्यम् । तथा सत्युपपादनमन्यादृ ब्रह्मण एव प्रकरणित्वं निश्चीयत इत्युच्यते, तदापि तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा इत्यादिरूपस्य तन्निष्कर्षग्रन्थस्य विचारे त्वब्रह्मधर्मा एव सिद्ध्यन्ति । सुतेजःप्रभृतीनां जन्यानामेवार्थानां मूर्धादिरूपत्वनिष्कर्षात् । न च, 'यच्छब्दयोगः प्राथम्यं सिद्धत्वं चाप्यनूद्यता । तच्छब्दयोग औत्तर्यं साध्यत्वं च विधेयता' इत्यनूद्यविधेयलक्षणयोर्विचारे मूर्धादीनां सिद्धानामर्थानामनूद्यत्वस्य सुतेजआदीनां जन्यानां विधेयत्वस्य चावगमात् साकारस्य ब्रह्मणोऽवयवानां नित्यानामेव तद्रूपत्वं कल्पनयोपदिश्यत इति न ब्रह्मत्वहानिरिति शङ्क्यम् । यतः साकारस्य तु लोकन्यायेनाब्रह्मत्वम् । विमतो वैश्वानरो न ब्रह्म । साकारत्वात् । घटप्रभृतिलोकवदिति प्रयोगात् । अत एवमप्यर्थस्यातिसन्दिग्धत्वमित्यर्थः । एवं सन्देहबीजमुपपाद्य पूर्वपक्षमाहुः । * वैश्वानर इत्यादि *

देवतात्मपरिग्रहो युक्तः। ततश्च, संवत्सरो वा अग्निर्वैश्वानर इति श्रुतेः संवत्सरस्य प्रजापतित्वाच्च हिरण्यगर्भोपासनापरमिदमिति गम्यते। ब्रह्मात्मशब्दावपि हि तत्रैव युक्ततरौ। तदुपासकस्यैवान्नभोजनत्वमपि सर्वत्र युक्तञ्च। प्रादेशमात्रत्वमपि मुख्यजीवत्वादस्मदाद्यपेक्षया स्थूलत्वाभिप्रायम्। विराडभिमानित्वाच्च लोकावयवत्वम्। वेदगर्भत्वादग्नित्रयात्मकत्वमिति। तस्माद्धिरण्यगर्भोपासनापरमेवैतद्वाक्यं, न भगवदुपासनापरमित्येवं प्राप्ते।

उच्यते। वैश्वानरः परमात्मैव। कुतः। साधारणशब्दविशेषात्। साधारणशब्दाद् विशेषः। ये पूर्वपक्षे साधारणशब्दा

अग्निर्वैश्वानरो वह्निरिति कोशस्मृतेर्वैश्वानरशब्दो भूताग्नावेव प्रसिद्धः। तथापि पूर्वकाण्डे, विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्नित्यादावहःकेतुत्वकथनेनोत्कर्षवत्तया सिद्धत्वाद् देवतात्मपरिग्रहो युक्तः। पूर्वकाण्ड एव, वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीरिति देवतात्मन्यपि सिद्धत्वात्। तत एवं देवतात्मपरिग्रहप्राप्तावप्युत्तरकाण्डे वाजिनां बृहदारण्यके सप्तान्नब्राह्मणे, संवत्सरो वा अग्निर्वैश्वानर इति श्रवणात् तैत्तिरीयाणां बृहन्नारायणोपनिषदि प्रजापतिः संवत्सर इति श्रुतेः संवत्सरस्य प्रजापतित्वाच्च हिरण्यगर्भोपासनापरमिदं वाक्यमिति गम्यते। यद्यपि माण्डूक्यादौ, विश्वो वैश्वानरः प्रथमः पाद इति श्राव्यते, तथापि तैजसो हिरण्यगर्भो द्वितीयः पाद इति श्रावणात् तत्परत्वमेव युक्तम्। तस्य च ब्रह्मनामकत्वाज्जीवसमष्टिरूपत्वाद् ब्रह्मात्मशब्दावपि तत्रैव युक्ततरौ। तं योऽहंमहद्योपास्ते तस्य यथा क्रतुरितिन्यायेन तद्भावात् तदुपासकस्यैव सर्वत्रान्नभोजनं युक्तम्। भोजनत्वमितिपाठे, भोजनत्वं भोक्तृत्वम्। नन्द्यादित्वाल्ल्युः। शेषमुक्तार्थम्। एवं पूर्वपक्षमुक्त्वा सिद्धान्तं विशदीकुर्वन्ति। * उच्यत इत्यादि *। हेतुं व्याकुर्वन्ति *साधारणेत्यादि* अत्र साधार-

हिरण्यगर्भपरतया ततोऽपि विशेषोऽस्ति । येन भगवानेव वैश्वानरो भवति । प्रादेशमात्रस्यैव द्युमूर्द्धत्वादिधर्मः । न हि विरुद्धधर्माश्रयत्वं भगवद्व्यतिरिक्ते सम्भवति । सर्वभवनसामर्थ्याभावात् । साधारणाद्धर्माच्छब्द एव विशेष इति वा । विशेषादिसेव वक्तव्ये साधारणशब्दशब्दौ प्रादेशमात्रस्यैव वैश्वानरशब्दवाच्यत्वं, द्युमूर्द्धत्वादिकं तस्यैवेति समासेन द्योतयतः । अन्यथा विरोधाभावात् ।

यदपि लोकात्मकं स्थूलं रूपं तदपि भगवत एव, न हिरण्यगर्भस्येति । पुरुषत्वात्तस्य ।

णशब्दशब्दस्य, ये इत्यादिना विभजनात् साधारणशब्देऽयो विशेष इत्येवं बहुवचनविग्रहस्य विवक्षितत्वेऽपि, ग्रहणके च एकवचननिर्देशः स ब्रह्मादिपदान्नभोजनवाक्यगनेकजात्यभिप्रायात् । विशेष आधिक्यं, तत्किमित्यपेक्षायां स्फुटीकुर्वन्ति * प्रादेशेत्यादि * । अस्मिन् पक्षे शब्दशब्दस्य पदवाक्यसाधारण्यात् सन्देहः स्यादिति समासान्तरेण तमर्थमाहुः । * साधारणादित्यादि * । तथाच शब्दे विशेषः शब्दविशेषः । वाक्योक्तात् साधारणाद् द्युमूर्द्धत्वादेर्धर्माद् वाक्यरूपे शब्द एव यो विशेषो विरुद्धधर्माधारत्वलक्षणस्तस्मादित्यर्थः । ननु विशेषस्यैव हेतुत्वे साधारणशब्दयोः कथनस्य किं प्रयोजनमत आहुः * विशेषादित्यादि * । * सम सेन द्योतयत इति * समासघटिकायाः पञ्चम्या ल्यब्लोपप्रयुक्तत्वेन श्रौतयोस्तत्प्रकृतिभूतयोः प्रादेशमात्रवाक्यद्युमूर्द्धादिवाक्यरूपयोः शब्दयोः समभिव्याहारेण परस्परसामानाधिकरण्यसूचनाद् द्योतयतः । * अन्यथेति * वैयधिकरण्ये । एतेन ल्यब्लोपपक्षग्रहणे युक्तिरुक्ता । ननु सूत्रसिद्धं विरुद्धधर्माश्रयत्वं तु प्रादेशमात्राभिधिमानपदयोः पौर्वापर्यसमभिव्याहाराभ्यां लभ्यते । तावता द्युमूर्द्धत्वादेर्हिरण्यगर्भसाधारण्यं कथं निवर्ततामित्यत आहुः * यदपीत्यादि * । तत्र हेतुः * पुरुषत्वात् तस्येति * शेषमर्थः । श्रुतौ पुरुषशब्दश्चतुर्धा प्रयुज्यते । पुरा आसेति, पुरमुप-

तीति, पुरि शेत इति त्रिधा योगेन । एकधा आकारविशेषे रूढ्या । प्रकृते च मूर्द्धाद्यङ्गश्रावणाद् रूढ एवाभिप्रेयते । सा च कुत्र मुख्येति विचारे सामान्यतः शब्दमात्रस्याङ्काराविकृतित्वेन तद्वाच्ये ब्रह्मण्येव मुख्या । आनन्दमयाधिकरणेऽन्तःस्थस्यानन्दमयस्य परस्यैव विज्ञानमयादिषु पुरुषाकारसमर्पकत्वेन विमृष्टत्वाच्च । सहस्रशीर्षा पुरुषः, वेदाहमेतं पुरुषं महान्तमित्यादावपि तथैव सिद्धत्वाच्च । एवं सति, पुरुषौ चात्ममानवावित्यभिधानकोशेनान्यत्र शक्तिग्राहणेऽपि, 'तथा पुरुषशब्दोऽयं वासुदेवेऽवतिष्ठते । विना तं पुण्डरीकाक्षं कोऽन्यः पुरुषशब्दभाक् ॥ भगवानिति शब्दोऽयं तथा पुरुष इत्यपि । निरुपाधी च वर्तेते वासुदेवे सनातने ॥ ब्रह्माद्याः सकला देवा यक्षगन्धर्वकिन्नराः । ते सर्वे पुरुषांशत्वात्पुरुषत्वे पुरुषा इति' इति शिवतत्त्वविवेकलिखितपुराणात्, 'स एव वासुदेवोऽयं साक्षात् पुरुष उच्यते । स्त्रीप्रायमितरत् सर्वं जगद् ब्रह्मपुरःसरम् ॥ स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः । प्रकृतिस्पर्शराहित्यात् स्वातन्त्र्याद् वैभवादपि' इति नृसिंहपुराणाच्च परास्मन् ब्रह्मणि वासुदेवे एव मुख्यः । अतस्तस्यैव पुरुषत्वादितरवारणाच्च । तथेतरवारणेऽपि न शिवस्य वारणमिति शङ्क्यम् । प्रकृतिस्पर्शराहित्यस्वातन्त्र्ययोरभावात् तस्यापि वारणात् । शिवः शक्तियुतः शश्वदिति श्रीभागवतवाक्येन, 'जगत्कारणतापन्नः शिवया मुनिपुङ्गवाः । स तस्यापि भवच्छक्तिस्तया हीनो निरर्थक' इत्यादिपञ्चविंशद्भिः सूतसंहितावाक्यैश्च सर्वदा सर्वावस्थासु शिवस्य प्रकृतियुक्तत्वतदधीनत्वयोरुक्तत्वात् । शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं नचेदेवं देवो न खलु कुशलः स्पन्दितुमपीति सौन्दर्यलहर्यां शङ्कराचार्यैरपि तथाङ्गीकारादिति । नच कारणस्य सर्वाभिः कार्यावस्थाभिरवस्थावत्त्वात् तादृशं रूपं ध्यानार्थमेवोच्यते, न तु तद्वास्तवं कारणरूपमिति वाच्यम् । अत्र मूर्द्धैव सुतेजा इत्यादिना सिद्धान्यवाङ्गानि निर्दिश्य तेषां द्युप्रभृतिरूपताविधानादङ्गानामवास्तवत्वस्याशक्यवचनत्वात् । नच पूर्वोक्तेष्य वाद्ववित्यत्र विपरीतोद्देश्यविधेयभावाभिप्रायमिति शङ्क्यम् । पूर्ववाक्ये उद्दालकं प्रति, पादौ त्वेतावात्मन इत्युक्तत्वात् । नच वैश्वके, मूत्राशयपुटो वस्तिरितिकथनादत्र तद्वुल्लेखेन कार्यरूपस्यैवाकारस्य शङ्क्यम् । वस्तिर्नाभेरधो द्वयोरितिकोशोक्तायाः नाभ्यधोभागमात्रताया अत्र विवक्षित-

विश्वस्य जडस्य नरस्य जीवस्य च भगवदंशत्वेन देवता-त्वाद् देवताद्वन्द्वे चेति विश्वानरौ । तौ निवासो यस्येति, तस्य निवास इत्यण् । तेन परमेश्वर एव वैश्वानरो भवति, नान्यः ।

त्वात् । अन्यथा जलस्य भूमीभावेनाऽप्रयोजकत्वे तस्मिन् हविर्त्वक-थनस्य विरुद्धत्वप्रसङ्गात् । तस्य जलनामत्वाभावात् । एतद्वा अपां नामधेयं गुह्यं यदाधाव इतिवद् गुह्यनामत्वेनाप्यश्रावणाच्च । नच, साकारस्य पूर्वपक्षोक्तेन लोकन्यायेनाऽब्रह्मत्वं शङ्क्यम् । विरुद्धधर्मा-श्रयत्वेन सिद्धे वैश्वानरस्य ब्रह्मत्वे तस्याप्रयोजकत्वात् । अलौकिका-ऽऽकारत्वेन सत्प्रतिपक्षत्वाच्च । नचात्र मानाभावः शङ्क्यः । सहस्र-शीर्षा पुरुषः, सर्वतः पाणिपादं तदित्यादिश्रुतीनामेव मानत्वात् । सर्वनैकस्यैव ब्रह्मणः प्रतिपाद्यत्वात् । अतः साकारस्यैव ब्रह्मताप्रति-पादनार्थमिदं कथनमिति, नात्र हिरण्यगर्भादिरूपता प्रतिपादयितुं शक्येति ।

तेन शङ्करभास्कराचार्याभ्यां यद् व्याख्यातं, साधारणयोर्वै-श्वानरात्मशब्दयोर्विशेषो द्युमूर्द्धत्वादिस्तस्मादिति । तद्धिरण्यग-र्भसाधारण्याद्यसङ्गतमिति बोधितम् ।

ननु भवत्वेवं, तथापि वैश्वानरशब्दस्य कथं ब्रह्मणि समन्वय इत्याकाङ्क्षायां योगरूढ्येति बोधयितुं योगं बोधयन्ति । *विश्वस्येत्या-दि* । विश्वो वैश्वानरः प्रथमः पाद इतिश्रावणाद् ब्रह्माण्डदेहस्य विश्वस्य जडस्य तैजसो हिरण्यगर्भो द्वितीयः पाद इति श्रावणा-त्तस्य तदन्तर्गतस्य सुषुप्तजीवस्य च पादत्वे भगवदंशत्वेन देवतात्वा-द्देवताद्वन्द्वे कृते, देवताद्वन्द्वे चेति सूत्रेणानङि जाते, विश्वानरौ । ततो निवासार्थेऽणा कृते तयोर्निवास इत्यर्थः । तस्य निवास इत्यण् इति पाठे तु, विश्वानरयोर्निवास इति विग्रहान्तरमपि बोध्यते । तथा सत्येकोऽ-र्थो विग्रहोपन्यासेनैतरश्च सूत्रोपन्यासेनेत्येवमपि विरुद्धधर्माश्रय-त्वात्र संगृहीतं भवतीति बोधितं ज्ञेयम् । यद्यपि निरुक्ते, वैश्वानरस्य व्युत्पत्तौ ह्यात्मस्य, विश्वान्नरान्नयति, विश्व एनं नरा नयन्तीति वा,

भगवदंशत्वादन्यत्रोपचाराद् प्रयोगः । तस्माद् वैश्वानरः परमात्मा ॥ २४ ॥

अथवा विश्वानर एवेति निरुक्तेनामुक्तिः । सायणीये च विश्वेषां नराणां हित इति । अन्यत्रापि च, नरे संज्ञायामिति विश्वपदस्य दीर्घं विधाय ऋष्यणा व्युत्पादनम् । तथाप्यत्र जीवजडव्यावृत्त्यर्थमेवाचार्यस्य प्रवृत्तत्वादेवं व्युत्पादितम् । ननु भवत्वेवं, योगरूढ्योः सर्वसाधारणत्वाद् व्युत्पादनमनतिप्रयोजनमिति शङ्कायामाहुः । *भगवदंशेत्यादि* । तथाच पुरुषपदवदत्रापि रूढ्यादिच्छायामात्रम् । वस्तुतस्तु जातिनिबन्धना प्रशंसानिबन्धना वा गौणीत्यर्थः । सिद्धमाहुः * तस्मादित्यादि * । * तस्मादिति * । उक्तरीतिकाद् विशेषात् सर्वेषां पदवाक्यानां तदनुगुणत्वादित्यर्थः ।

रामानुजाचार्यास्तु, विशेष्यत इति विशेषो विशेष्यमाणत्वम् । जाठरभूतदेवतात्मपरमात्मसाधारणस्य वैश्वानरशब्दस्य परमात्मासाधारणधर्मैर्विशेष्यमाणत्वादित्येवं सौत्रं हेतुं व्याख्याय, औपमन्यवादीनां षण्णां, को न आत्मा, किं ब्रह्मेति विचार्य भवस्य निर्दिष्टाज्जीवात्मत्वे निवारिते, तेषां जीवात्मनामात्मभूतं ब्रह्म जिज्ञास्यमिति निश्चयं तज्जिज्ञासुभिर्वैश्वानरात्मकं कैकेयं राजानमागम्य पृच्छ्यमानो वैश्वानर आत्मा परमात्मैवेति विज्ञायते । किञ्चात्मब्रह्मशब्दाभ्यामुपक्रम्य पश्चात् सर्वेषु वाक्येष्वात्मब्रह्मशब्दाभ्यां व्यवहारे कर्तव्ये ब्रह्मशब्दस्थाने निर्दिश्यमानो वैश्वानरशब्दो दृश्यतेऽतः स शब्दो ब्रह्मैवाभिधत्त इति विज्ञायते । किञ्च । सर्वलोकसर्वभूतसर्वात्मस्वभादनमग्निहोत्रेषीकातूलदाहवत् सर्वपाप्मदाहश्चास्मे वैश्वानरात्मविज्ञानफलत्वेन श्रूयमाणौ ज्ञानविषयं वैश्वानरं परब्रह्मत्वेन विज्ञापयत इत्याहुः । अत्र ब्रह्मधर्मैर्विशेष्यमाणत्वं स्वाप्नादि, परस्यातिक्लेशेनेति बोध्यम् ।

भिक्षुशैवौ तु, सर्ववेदान्तसाधारणो यः शब्दविशेष आत्मब्रह्मरूप इति व्याचख्यतुः । तस्यात्मब्रह्मशब्दयोर्ब्रह्मपरतायां उपपादनसापेक्षतया तयोः साध्यसमत्वेन सिद्धवद्धेतुनागर्हत्वादुपेक्ष्यमेव ।

माध्वास्तु, आत्मशब्दः परे विष्णौ नान्यत्र क्वचिदिष्यत इतिस्मरणाद् विष्णुसाधारणेनात्मपदेन विशेषणादिति व्याकुर्वन्ति ।

स्मर्यमाणमनुमानं स्यादिति ॥ २५ ॥

व्याख्यानेन भगवत्परत्वाद् वाक्यस्य प्रमाणान्तरमाह ।

तदध्यात्मशब्दस्योपक्रमस्य संशयवाक्याग्रिमप्रश्नादिवाक्यतदग्रिमनिष्कर्षवाक्येषु प्रयोगेण जीवसाधारण्यदर्शनेन चोपपादनसापेक्षतया शिथिलमेव ।

तस्मात् सिद्धान्तोक्तहेतुरेव प्रबलः । यत्तु छान्दोग्यभाष्ये प्रादेशमात्राभिविमानपदयोर्व्याख्यानम् । प्रादेशा द्युमूर्धादिपृथिवीपादान्तास्तैरध्यात्मं मीयते ज्ञायत इति प्रादेशमात्रो, मुखादिषु करणेष्वर्तृत्वेन मीयत इति वा, द्युलोकादिपृथिव्यन्तप्रदेशपरिमाणो वा, प्रकर्षेण शास्त्रेणादिश्यन्त इति प्रादेशा द्युलोकादय एव, तावत्परिमाणो वा । शाखान्तरे तु मूर्धादिचिबुकप्रतिष्ठ इति प्रादेशमात्रं कल्पयन्ति । इह न तथाभिप्रेतः । तस्य ह वा एतस्यात्मन इत्युपसंहारात् । प्रत्यगात्मतया अभिविमीयते ज्ञायत इत्यभिविमान इति । तत्तु न युज्यते । मूर्धचिबुकप्रतिष्ठतया प्रादेशमात्रत्वस्य काल्पनिकत्वे मानाभावात् । नच, तस्य ह वा एतस्यात्मन इत्यादिना द्युमूर्धत्वादिकथनमेव मानमिति वाच्यम् । तदेजति, तन्नैजति, अणोरणीयान् महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः, अणीयान् व्रीहेर्ज्यायानाकाशादित्यादिश्रुतिभिः सिद्धे विरुद्धधर्माधारत्वे, अभिन्ननिमित्तोपादानतोपगमेन स्वयमभ्युपगते, मायायां युक्तिविरोधस्य भूषणत्वे च स्वीकृते द्युमूर्धत्वप्रादेशमात्रत्वयोः स्वमतपरमताभ्यामविरोधस्य भूषणत्वे च स्वीकृते द्युमूर्धत्वप्रादेशमात्रत्वयोः स्वमतपरमताभ्यामविरोधसिद्धेस्तथा कथनस्य काल्पनिकत्वानुपष्टम्भकत्वात् । प्रत्यगात्मत्वेन विमीयमानस्य विश्वरूपत्वाग्रहणत्वस्य भामत्यां स्वीकारात् । व्याख्येयग्रन्थेऽपि, को न आत्मा, किं ब्रह्मेत्येतयोर्भिन्नवाक्यत्वपक्ष एकवाक्यत्वपक्षे च प्रत्यगात्मब्रह्माभेदस्तात्पर्यस्योपपादितत्वाच्च । तस्माद् विरुद्धधर्माधारत्वादिकमप्रतिवादम् ॥ २४ ॥

स्मर्यमाणमनुमानं स्यादिति ॥ ननु पूर्वसूत्रोक्तहेतुना सिद्धे वैश्वानरस्य परमात्मत्वे किमिति सूत्रान्तरारम्भ इत्याकाङ्क्षायामाहुः । * व्याख्यानेनेत्यादि * । तथाच स्वारस्येन तथाप्रतीत्यभावादाग्रहया-

केचित् स्वदेहे हृदयावकाशे प्रादेशमात्रं पुरुषं वसन्तम् ।
चतुर्भुजं कञ्जरथाङ्गशङ्खगदाधरं धारणया स्मरन्तीति ।

स्मर्यमाणं रूपमनुमानं स्यात् । प्रादेशमात्रवैश्वानरस्य ब्रह्मत्वे । स्मरणं हि मननं श्रुतस्य भवति । श्रुतिवाक्येभ्य एव हि श्रवणम् । यदि प्रादेशमात्रवैश्वानरप्रतिपादकजातीयानां न ब्रह्मवाक्यत्वं स्यात् तदा स्मरणं नोपपद्यते । अत, इति हेतोः प्रादेशमात्रवैश्वानरो भगवानेवेति सिद्धम् ॥ २५ ॥

शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न, तथा दृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते ॥ २६ ॥

किञ्चिदाशङ्क्य परिहरति । ननु यदि स्मर्यमाणमनुमानं

किञ्चिदाशङ्क्येति नन्विधारणायारम्भ इत्यर्थः । स्मर्यमाणं स्फुटीकुर्वन्ति * काश्चिदित्यादि * । स्मर्यमाणस्य कथमनुमानत्वमित्यत आहुः * स्मरणं हीत्यादि * । * स्मरणं नोपपद्येतेति * ये हि ब्रह्म स्मरन्ति ते श्रुतितः श्रुत्वैव स्मरन्त्यतस्तदभावे तन्नोपपद्येत । तथाच प्रादेशमात्रत्वस्मरणं प्रादेशमात्रत्वस्य श्रुत्यर्थत्वानुमापकमित्यर्थः । तेन,

अनन्तशाखासापेक्षे वैदिकार्थस्य निर्णये ।
स्वबुद्धिकल्पितादर्थाद् बलीयानुपबृंहितः ॥
इति बोध्यम् ।

अन्ये तु, 'द्यां मूर्द्धानं यस्य विप्रा वदन्ति खं वै नाभिं चन्द्रसूर्यौ च नेत्रे । दिशः श्रोत्रे विद्धि पादौ क्षितिं च सोऽचिन्त्यात्मा सर्वभूतप्रणेता' इति । 'यस्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ क्षितिः । सूर्यश्चक्षुर्दिशः श्रोत्रे तस्मै लोकात्मने नमः' इत्युदाहृत्य स्मर्यमाणं श्रुत्यनुमापकं स्यादिति व्याकुर्वन्ति ॥ २५ ॥

शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात् पुरुषमपि चैनमधीयते ॥ शङ्कां व्याकुर्वन्ति * नन्वित्यादि *

स्यादिति वाक्यार्थो निर्णीयते, तदा स्मृत्यन्तरेणान्यथापि व्याख्येयम् । 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्' इति जाठर एवाग्निर्वैश्वानरो भवति । तस्यैव भगवद्विभूतित्वात् । वाक्यार्थो यथाकथञ्चिद् योजयिष्यते । न तु विरुद्धधर्माणां विद्यमानत्वाद् भगवत्परत्वं वाक्यस्य । विरुद्धधर्माः शब्दादयः । अन्तःप्रतिष्ठानं च । अग्निर्वैश्वानर इति शब्दः केवलवैश्वानरपदे भवेत् । भगवत्परत्वं योगेन । तदग्निसाहचर्यादग्निरेव भवेत् । तस्यैव च त्रेताग्निकल्पनमुपासनार्थम् । प्राणो हि देवता तद् यद्भक्तं प्रथममागच्छेत् तद्धोमीयमित्यादिना । तदेतेभ्यो हेतुभ्योऽन्तःप्रतिष्ठितत्वमपि न भगवद्धर्मः । पुरुषेऽन्तःप्रतिष्ठितं वेदेति भिन्नहेतुर्हेतुश्च भवतीति न चकारः । तस्माद् विरुद्धधर्माणां विद्यमानत्वान्न भगवान् वैश्वानर इति चेत् ।

---

* इति वाक्यार्थो निर्णीयत इति * एवं प्रकारेण स्मरणेन निर्णीयते । ननु भगवद्विभूतौ चेद् योज्यं, तदा भगवति योजनं कुतो निषिद्ध्यत इत्यत आह * न स्विस्यादि * । कः शब्द इत्यतस्तं दर्शयति * अग्निरित्यादि * । अयमर्थः । वाजिनां वैश्वानरविद्याप्रकरणे, स एषोऽग्निर्वैश्वानर इति वैश्वानरसमानाधिकरणतया अग्निरिति श्रूयते । तथाच यदि समानप्रकरणे केवलो वैश्वानरशब्दः स्यात् तदा तस्मिन् पूर्वोक्तेन योगेन भवेद् भगवत्परत्वम् । प्रयुक्ते तु शब्दान्तरे । तत * तस्मादग्निसाहचर्यादग्निरेव वैश्वानरो भवेत् । यास्कोक्तस्य योगान्तरस्य तत्रापि शक्यवचनत्वात् । नच योगतौल्येऽग्नौ कुतः पक्षपात इति शङ्क्यम् । अत्राप्ययं हृदयं गार्हपत्य इत्यादिना तस्यैव वैश्वानरस्य त्रेताग्निकल्पनमुपासनार्थं दृश्यते । नचेदमप्युभयत्र तुल्यमिति शङ्क्यम् । प्राणो हि देवतात्राग्रे पठ्यते । तद्यद्भक्तं प्रथममागच्छेत् तद्धोमीयम् । स यां प्रथमामाहुतिं जुहुयात् तां जुहुयात् प्राणाय स्वाहेत्यादिना स्वाहायोगाच्चतुर्थ्यां चावगतेः । तस्य

न । तथा दृष्ट्युपदेशात् । सर्वभोक्तृत्वं भगवतो वक्तुं तथा दृष्टिरुपदिश्यते । विरुद्धधर्माणां तत्तद्भावापत्तिरित्यैश्वर्यमेव भगवतो वर्णितम् ।

तर्हि कार्यवाक्यमेवास्तु स्मृत्यनुरोधादिति चेत् तत्राह । असम्भवात् । न हि तस्य द्युमूर्द्धत्वादयो धर्माः सम्भवन्ति । उपचारादुपासनार्थं परिकल्पनं भविष्यतीति चेन्न । पुरुषमपि चैनमधीयते, वाजसनेयिनः । स एषोऽग्निर्वैश्वानरो यत्पुरुषः । स यो हैतमेवाग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेति ।

मुखं च जाठर एव । आहुतिप्रापकत्वात् । अयमग्निर्वैश्वानरो योऽयमन्तःपुरुषे येनेदमन्नं पच्यते यदिदमद्यते इति वाजसनेयिब्राह्मणोक्तादिलिङ्गात् । तदिदं सूत्रस्थेनादिपदेन सूचितम् । तदेतेभ्यो हेतुभ्यो जाठर एव ग्राह्यो, न परमात्मा । न चाऽन्तःप्रतिष्ठानात् परमात्मा ग्रहीतुं शक्यः । यतोऽन्तःप्रतिष्ठितत्वमपि न भगवद्धर्मः । वाजसनेयिभिः, स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेति समाम्ननात् । यद्यप्यन्तःप्रतिष्ठानं वाक्यस्य जाठरपरतासाधने भिन्नो हेतुरिति सूत्रे चकारोऽपेक्षितः । तथापि भक्तस्य होमीयत्वमाहुतेर्देवताप्राप्तिश्च या आदिपदेन संगृहीता, तत्राप्येतदेव प्रयोजकमिति हेतुरपि भवतीति तथात्वबोधनाय न चकारः । स्फुटमन्यत् । परिहारांशं व्याकुर्वते *न तथेत्यादि* । पूर्वोक्तहेतुना वाक्यस्य जाठरविभूतिपरत्वं न वक्तुं शक्यते । कुतः । तथादृष्ट्युपदेशात् । भगवतः सर्वभोक्तृत्वं वक्तुं जाठरदृष्टिरत्रोपदिश्यते, तस्मात् । नचोत्कृष्टे हीनदृष्टेर्दोषावहत्वस्य पूर्वं साधितत्वादत्र तादृशदृष्ट्युपदेशस्यायुक्तत्वं शङ्क्यम् । भगवतः सर्वकारणत्वेन भगवन्निष्ठानां तेषां तेषां विरुद्धधर्माणां तत्तद्भावापत्तिः । यथा कारणत्वस्याष्टाविंशतितत्त्वादिरूपता, तथा पाचकत्वस्य जाठराग्निरूपतेति स्वयं स्वविक्रिय एकरसएवेति भगवत ऐश्वर्यमेव वर्णितमतो न दोष इत्यर्थः । * तर्हीत्यादि * ननु धर्माणां तत्तद्भावापत्तिः कार्यार्थेति कार्यं मुख्यम् । तर्हीदं कार्यवाक्यमेवास्तु । गीतास्मृत्यनुरोधात् । न तु ब्रह्मवाक्यमिति चेत् तत्राहेत्य-

तस्मात् पुरुषत्वं, पाठान्तरे पुरुषविधत्वं वा जाठरस्य न सम्भवतीति भगवानेव वैश्वानरः । भगवत्परत्वे सम्भवत्यन्यकल्पना न युक्तेति ॥ २६ ॥

अत एव न देवता भूतं च ॥ २७ ॥

वैश्वानरो न उक्तेत्यादिमन्त्रैर्देवताया महाभूताग्नेर्वा वाक्यार्थतेति कस्य चिद् बुद्धिः स्यात् । तदप्यतिदेशेनैव परिहरति । मुख्योपपत्तिर्भगवत्परत्वे सम्भवति नान्यकल्पना युक्तेति ॥ २७ ॥

साक्षादप्यविरोधं जैमिनिः ॥ २८ ॥

अधुना परिमाणविशेषो विचार्यते । प्रादेशमात्रत्वं भगवतः स्वाभाविकं कृत्रिमं वेति । अस्मिन् सिद्ध एव पूर्वोक्तं सिद्धं भवेदिति विचार्यते । तत्रास्मिन्नर्थे चत्वार ऋषयो वेदार्थचिन्तकाः प्रकारभेदेन । तत्र केवलं शब्दबलविचारका आचार्याः ।

र्थः । शेषमुत्तानम् * । पाठान्तर इति * सौत्रे पुरुषविधमिति पाठान्तरे । ननु पुरुषत्वादिकमपि काल्पनिकं पूर्ववदस्त्विति चेत् तत्राहुः । * भगवदित्यादि * सर्वे वेदा इत्यादिश्रुतिभिर्मुख्यसम्भवे गौणस्यान्याय्यत्वाच्च तथैत्यर्थः ॥ २६ ॥

अत एव न देवता भूतं च ॥ * इत्यादीत्यादिपदेन, वैश्वानरं क्रतुमहाग्निमित्यादीनां संग्रहः ॥ २७ ॥

साक्षादप्यविरोधं जैमिनिः ॥ एतदादिषु पञ्चसूत्रेषु, मन्यत इत्यस्याध्याहारो बोधः । ननु चतुर्भिः सूत्रैः सर्वस्मिन्नधिकरणार्थे सिद्धे पञ्चानां सूत्राणां किं प्रयोजनमित्याकाङ्क्षायामाहुः । * अधुनेत्यादि * । * पूर्वोक्तमिति * । असाधारणभगवद्धर्मरूपं विरुद्धधर्माश्रयत्वम् । * शब्दबलेत्यादि * शब्दस्य बलमुच्चारणक्रमादितात्पर्यम् । तद्वि-

शब्दार्थयोर्जैमिनिः । आश्मरथ्यस्तु शब्दोपसर्जनेनार्थविचारकः । केवलार्थविचारको बादरिरिति । आचार्यः पुनर्विचाराविचारयोर्दोषं पश्यन् विचारमपि वदंस्तेषामल्पबुद्धिख्यापनाय नामान्याह ।

तत्र जैमिनिरुभयबलविचारकः प्रथमं निर्दिश्यते । व्यापकस्य प्रादेशमात्रत्वे साक्षादपि कल्पनाव्यतिरेकेणापि स्वरूपविचारेणैवाविरोधं मन्यते जैमिनिः । आकाशवद् व्यापकं सर्वतःपाणिपादान्तं ब्रह्म । अत एव साकारत्वमनन्तमूर्तित्वं ब्रह्मणः स्वेच्छया परेच्छया स्वभावतश्च विभक्तामिव । त्रयोऽपि नियतपरिमाणाः । अनियतपरिमाणास्तु आकाशवद् परिच्छेदनिरूपाः । तद् वृद्धिह्रासाभ्यां तथा भवन्ति ।

चारेणार्थविचारको व्यासपादा इत्यर्थः । ननु तथापि त्रुटिनामकथनस्य किं प्रयोजनमत आहुः । * आचार्यः पुनरित्यादि * । बृहदारण्यके प्रथमे गार्गिब्राह्मणे, मा ते मूर्धा व्यपप्तदनतिप्रश्न्यां वै देवता अतिपृच्छसि गार्गि मातिप्राक्षीरित्यतिप्रश्ने दोषश्रावणेन, कठवल्ल्यां, नैषा तर्केण मतिरापनेयेति निषेधेन च काल्पनिकातिविचारे दोषः पर्यवसितः । तैत्तिरीये च, तस्यैव भयं विदुषोऽमन्वानस्येत्यविचारेऽपि दोषः श्रावितः । अत आचार्यस्तमिमं विचाराविचारयोर्दोषं पश्यन्, तदन्वेष्टव्यं, तद्विजिज्ञासितव्यं, सोऽन्वेष्टव्यः, स विजिज्ञासितव्य इत्यादिश्रुत्युक्तत्वाच्छब्दबलेनैव कर्तव्यं विचारमपि स्वशास्त्रे वदंस्तथा आह । तथा च शब्दबलविचारस्य मुख्यत्वज्ञापनमेव प्रयोजनमित्यर्थः । जैमिनेः प्राथम्ये हेतुः * उभयबलविचारक इति * । सूत्रं व्याकुर्वन्ति * व्यापकस्येत्यादि * कल्पनाव्यतिरेकेण व्यापकत्वप्रादेशमात्रत्वयोः कथमविरोध इत्याकाङ्क्षायां तं प्रकारमुपपादयन्ति * आकाशेत्यादि * । यद्यपि श्रुतौ प्रादेशमात्रमभिविमानमिति क्रमेणोक्तं, तथापि शब्दक्रमादार्थः क्रमो बली-

अभिव्यक्तेरित्याश्मरथ्यः ॥ २९ ॥

निराकारमेव ब्रह्म मायाजवनिकाच्छन्नं तदपगमेन पुरुषाकारेणाधिदैविकदेवताधिष्ठितेनाभिव्यक्तः पुरुषोऽन्तर्यामी । अत एव पुरुषविध इति । अभिव्यक्तेर्हेतोः साकारत्वमपि मायापगमनकृतत्वान्न स्वाभाविकत्वम् । तथापि निर्दिश्यमानं सच्चिदानन्दरूपमेवाश्मरथ्यो मन्यते ॥ २९ ॥

अनुस्मृतेर्बादरिः ॥ ३० ॥

बादरिः केवलयौक्तिकाश्चिन्तनवशात् प्रादुर्भूतरूपानुवादिका श्रुतिरिति। यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहायेति वाक्यानुरोधात् । अन्यथा बहुकल्पनायां बुद्धिसौकर्याभावात् तार्किकादिमतेष्वपि तथात्वाद् युक्त्यनुरोधेन ब्रह्मवादोऽप्यन्यथा नेय इति हि मन्यते । अस्मिन् पक्षे स्वतात्त्विकत्वम् । अथवा मायास्थाने अनुस्मृतिः। अभिव्यक्तिस्तु तुल्या। एवं सति बादरिमतेऽपि तात्त्विकमेव रूपम् ॥३०॥

सूत्रद्वयं शतदूषणीकृता व्यङ्कटाचार्याभिधेन स्वग्रन्थ उपन्यस्तम् ॥२८॥

अभिव्यक्तेरित्याश्मरथ्यः ॥ यदादिषु त्रिषु सूत्रेष्वविरोधांशस्यास्यानुषङ्गोऽधिको ज्ञेयः । * आधिदैविकदेवताधिष्ठितेनेति * आधिदैविकी देवेषु प्रणवमात्राद्यात्मकेषु वर्तमाना या देवता ब्रह्मविष्ण्वादिरूपा तत्तद्गुणगुणसमष्ट्यभिमानिनी तयाधिष्ठितेन शरीरतयाङ्गीकृतेन *अत एवेति*। अधिष्ठानादेव । सूत्रोक्तस्य हेतोः साकारपक्षेऽप्युपपत्तेस्तमपि पक्षमाहुः । * अभिव्यक्तेरित्यादि * । * न स्वाभाविकत्वमिति * किन्त्वमेकीकःसूत्रोक्तयोर्महदृष्टान्तेनोपरवदागन्तुकत्वम् ॥ २९ ॥

अनुस्मृतेर्बादरिः ॥ अत्रापि भाष्यमुत्तानार्थम् ॥ ३० ॥

सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ३१ ॥

जैमिनिमते साकारवादे नियतसाकारं मन्यमानस्तदेकदेशी नियतमेव प्रादेशमात्रं भगवद्रूपं मन्यते। तन्निराकरणाय सर्वत्र प्रादेशत्वं सम्पत्तिकृतमित्याह।

तत्र का सम्पत्तिः कथमिति स्वयमेव श्रुत्वा प्रदर्शयति। वाजसनेयिब्राह्मणे द्युप्रभृतीन् पृथिवीपर्यन्तान् वैश्वानरस्यावयवान्, अध्यात्म्ये च मूर्द्धप्रभृतिषु चिबुकपर्यन्तेषु सम्पादयन् प्रादेशमात्रमिह वै देवाः सुविदिता अभिसम्पन्नास्तथा तु व एतान् वक्ष्यामि यथा प्रादेशमात्रमेवाभिसम्पादयिष्यामीति। स होवाच मूर्द्धानमुपदिशन्नेष वा अतिष्ठा वैश्वानर इत्यादिना स-

---

सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ननु पूर्वं जैमिनेर्मतं प्रदर्शितमधुना प्रकारान्तरेण किमिति प्रदर्श्यत इत्याकाङ्क्षायामाहुः। * जैमिनिमत इत्यादि * परममहत्परिमाणप्रादेशमात्रयोः साक्षादविरोधबोधके जैमिनिमते यः साकारवादस्तस्मिन् य एकदेशी इदर्श भगवत्स्वरूपं मन्यते। प्रादेशमात्रत्वस्य प्रदेशविशेषकृतत्वे तावन्मात्रस्य पुरुषाकारत्वाभावेन पुरुषश्रुतिविरोधादिति तदाशयः। अभिविमानत्वं जगन्निर्मातृत्वाद्, द्युमूर्द्धत्वादिकं तूपासनार्थमित्यविरुद्धम्। तन्निराकरणाय सर्वत्र * सर्वेषु वैश्वानरस्य प्रदेशेषु प्रादेशमात्रत्वं तथाह। तत्र सम्पत्तिकृतत्वे वाच्ये सा केत्याद्याकाङ्क्षायां सम्पत्तिं तत्कृतं प्रादेशमात्रत्वं च स्वयं जैमिनिः श्रुत्वा प्रदर्शयतीत्यर्थः। *सम्पादयन्निति* केकेय इति शेषः। श्रुतिं पठन्ति *प्रादेशमात्रमित्यादि*। *इत्यादिनेति* चक्षुषी उपदिशन्नुवाच, एष वै सुतेजा वैश्वानर इति। नासिके उपदिशन्नुवाच, एष वै पृथग्वर्त्मात्मा वैश्वानर इति। मुख्यमाकाशमुपदिशन्नुवाच, एष वै बहुलो वैश्वानर इति। मुख्या अप उपदिशन्नुवाच, एष वै रयिर्वैश्वानर इति। चिबुकमुपदिश-

स्मृतावप्युक्तम् ।
विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः ।
प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम् ॥
तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यत इति ।

तानीति पञ्चमस्य, श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वादर्थोऽन्यथेति प्रथमसूत्रे विचारितमग्निहोत्रं जुहोति यवागूं पचतीत्येन सिद्धम् । अर्थक्रमस्य बलिष्ठत्वानादरे अदृष्टकल्पनाप्रसङ्गात् । तदनादराद्वरणीयम् । अन्यथाऽत्र विरुद्धधर्माधारत्वकल्पना प्रसज्ज्येत । सम्भवति चार्थक्रमानुरोधेन परिमाणाविरोधिनं प्रकारमनिहाय विरुद्धधर्माश्रयत्वकल्पनमयुक्तम् । तस्मिन् प्रकारे कथं सम्भव इति चेदित्थम् । आकाशवत् सर्वगतश्च नित्य इति, सर्वतःपाणिपादं तदिति श्रुतिभ्यामेवंविधं ब्रह्मस्वरूपं सिद्धमतः स्वरूपबलादेव ब्रह्मणः साकारत्वमनन्तमूर्तित्वं च । यदेकमव्यक्तमनन्तरूपमिति, पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रश इति श्रुतिस्मृतिभ्यां सिद्धम् । तत्र क्वचिद्, बहु स्यामिति श्रुतेः स्वेच्छया, क्वचिच्च, यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहायेति वाक्यात् परेच्छया, क्वचिच्च पूर्वोक्तरीत्या स्वभावतश्च तं तं प्रति तत्तत्प्रकारकोपासनेन प्रकटीभवति । प्रणयस इत्यस्य तत्तद्गोचरत्वं प्रापयस इत्यर्थात् । नच रूपभेदे ब्रह्मभेदः शङ्क्यः । यदेकमिति श्रुतेरविभक्तं च भूतेषु विभक्तमिव च स्थितमिति च गीतावाक्यात् । अतः पुरुषं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितमिति त्रयोऽपि प्रकारा नियतपरिमाणाः । यदि चाकाशवदिति श्रुत्या विचार्यास्तदा ते अनियतपरिमाणा आकाशवत् परिच्छेदकनिरूप्याः परिच्छेदकवृद्धिह्रासाभ्यां नानापरिमाणा भवन्ति । ननु श्रुतौ पुरुषं पुरुषविधमित्यादिकं वैश्वानरविशेषणं, न तु प्रकाराणाम् । परिमाणं च द्रव्यधर्मो, न तु धर्मधर्मोऽतो नेदं युक्तमत आहुः । * स्मृतावित्यादि * । * उक्तमिति * पुरुषत्वमुक्तम् । तथाच वैश्वानरस्यैव त्रिधा वर्तमानत्वान्नोक्तानुपपत्तिरिति सर्वमुपपन्नमित्यर्थः । तृतीयस्यानन्तरूपत्वं नियतपरिमाणत्वं च व्याकुर्वन्ति ।

भूतेषु पञ्चधा । उदरेऽङ्गुष्ठमात्रः । हृदये प्रादेशो मूर्द्धनि च मनसीन्द्रियेषु चाणुः । चित्ते व्यापकः । एकस्याप्युपक्रमे सर्वेषु तथात्ववादो विभूतिरभेदाय । तस्माद् वैश्वानरस्य पुरुषत्वाद् सच्चिदानन्दरूपेणैव प्रादेशमात्रत्वं न विरुध्यते । अतः साकारब्रह्मवाद एव जैमिनेः सिद्धान्तः ॥ २८ ॥

---

* भूतेष्वित्यादि * । * पञ्चधेति * ध्यानार्थं प्रादेशमात्र अ.श्रयार्थमङ्गुष्ठमात्रः स्वामित्वार्थमक्षिस्थितः फलार्थं सर्वदेहस्थित आनन्दमयो वैश्वानरः शिरसि प्रतिष्ठितः सर्वार्थं इति निबन्धोक्तपञ्चकार्यार्थं पञ्चभिः प्रकारैः । * उदरेऽङ्गुष्ठमात्र इति * अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठतीति श्रुतेस्तथा । स च, अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठतीति तैत्तिरीयश्रुतेरुदरे शारीरत्वस्यार्थम् । * प्रादेश इति * प्रादेशमात्रः । स हृदये व्याख्यातो, मूर्द्धन्यग्रे वक्ष्यते । तत्र हृदि ध्यानार्थम् । शिरसि सर्वार्थम् । चक्षुषश्चक्षुरित्यादिश्रुतेस्तन्नियमनार्थं तेषु तिष्ठन् मनःप्रभृतीनामणुत्वस्य वक्ष्यमाणत्वात् तदनुरोधेनाणुः । तत् सर्वव्यापकं चित्तमाकृष्य भ्रुवोर्निधारयेदिति वाक्ये चित्तस्य व्यापकत्वोक्तेस्तत्र तिष्ठंस्तद्दृढ्यर्थं व्यापकः । ननु प्रादेशमात्रस्यात्र प्रकृतत्वात् तद्विचार एव कार्योऽन्यविचारस्य किं प्रयोजनमित्यत आहुः । * एकस्येत्यादि * एकस्य प्रादेशमात्रस्याप्युपक्रमे सर्वभूतस्थेषु नानारूपेषु भगवत्त्ववादो विभूतिरूपस्य भगवदभेदं बोधयितुम् । तथाच वैश्वानरस्वरूपे विचारितया दिशा सर्वेषु विरुद्धधर्माधारत्वं बोध्यमिति व्यासाशयप्रकटनायायं विचार इत्यर्थः । तेन सिद्धमाहुः । * तस्मादित्यादि * । * पुरुषत्वादिति * आत्मत्वात् । पुरुषो ब्रात्ममानवाविति कोशात् । तथाचाकाशवदित्यादिश्रुतिद्वयोक्तरीत्या स्वरूपविचारेणैव परिमाणद्वयाविरोधो जैमिनिमत इत्यर्थः । ननु जैमिनिमते साकारवाद इत्यत्र किं मानमित्याकाङ्क्षायां, जैमिनीयचतुर्लक्षणीसमाप्तौ, स विष्णुराह हि, तद् ब्रह्मेत्याचक्षते तद् ब्रह्मेत्याचक्षत इति सूत्रद्वयात तदनुसारेणाहुः । * अत इत्यादि * । * अत इति * एवमुभयबलविचारकरणात । इदं च

अभिव्यक्तेरित्याश्मरथ्यः ॥ २९ ॥

निराकारमेव ब्रह्म मायाजवनिकाच्छन्नं तदपगमेन पुरुषाकारेणाधिदैविकदेवताधिष्ठितेनाभिव्यक्तः पुरुषोऽन्तर्यामी । अत एव पुरुषविध इति । अभिव्यक्तेर्हेतोः साकारत्वमपि मायापगमनकृतत्वान्न स्वाभाविकत्वम् । तथापि निर्दिश्यमानं सच्चिदानन्दरूपमेवाश्मरथ्यो मन्यते ॥ २९ ॥

अनुस्मृतेर्बादरिः ॥ ३० ॥

बादरिः केवलयौक्तिकचिन्तनवशात् प्रादुर्भूतरूपानुवादिका श्रुतिरिति । यद्यद्धिया त उरुगाय विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहायेति वाक्यानुरोधात् । अन्यथा बहुकल्पनायां बुद्धिसौकर्याभावात् तार्किकाभिमतेष्वपि तथात्वाद् युक्त्यनुरोधेन ब्रह्मवादेऽप्यन्यथा नेय इति हि मन्यते । अस्मिन् पक्षे त्वतात्त्विकत्वम् । अथवा मायास्थाने अनुस्मृतिः । अभिव्यक्तिस्तु तुल्या । एवं सति बादरिमतेऽपि तात्त्विकमेव रूपम् ॥३०॥

सूत्रद्वयं शतदूषणीकृता वेङ्कटाचार्याभिधेन स्वग्रन्थ उपन्यस्तम् ॥२८॥

अभिव्यक्तेरित्याश्मरथ्यः ॥ एतदादिषु त्रिषु सूत्रेष्वविरोधमित्यस्यानुषङ्गोऽधिको ज्ञेयः । * आधिदैविकदेवताधिष्ठितेनेति * आधिदैविकी देवेषु प्रणवमात्राद्याख्येषु वर्तमाना या देवता ब्रह्मविष्ण्वादिरूपा तत्तद्गुणगुणसमष्ट्यभिमानिनी तयाधिष्ठितेन शरीरतयाङ्गीकृतेन * अत एवेति * । अधिष्ठानादेव । सूत्रोक्तस्य हेतोः साकारपक्षेऽप्युपपत्तेस्तमपि पक्षमाहुः । * अभिव्यक्तेरित्यादि * । * न स्वाभाविकत्वमिति * किन्त्वर्भकौकःसूत्रोक्तव्योमदृष्टान्तेनोपरवद् । गन्तव्यम् ॥ २९ ॥

अनुस्मृतेर्बादरिः ॥ अत्रापि भाष्यमुत्तानार्थम् ॥ ३० ॥

सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ३१ ॥

जैमिनिमते साकारवादे नियतसाकारं मन्यमानस्तदेकदेशी नियतमेव प्रादेशमात्रं भगवद्रूपं मन्यते । तन्निराकरणाय सर्वत्र प्रादेशत्वं सम्पत्तिकृतमित्याह ।

तत्र का सम्पत्तिः कथमिति स्वयमेव श्रुत्या प्रदर्शयति । वाजसनेयिब्राह्मणे द्युप्रभृतीन् पृथिवीपर्यन्तान् वैश्वानरस्यावयवान्, अध्यात्मे च मूर्द्धप्रभृतिषु चिबुकपर्यन्तेषु सम्पादयन् प्रादेशमात्रमिह वै देवाः सुविदिता अभिसम्पन्नास्तथा तु व एतान् वक्ष्यामि यथा प्रादेशमात्रमेवाभिसम्पादयिष्यामीति । स होवाच मूर्द्धानमुपदिशन्नेष वा अतिष्ठा वैश्वानर इत्यादिना स-

---

सम्पत्तेरिति जैमिनिस्तथा हि दर्शयति ॥ ननु पूर्वं जैमिनेर्मतं प्रदर्शितमधुना प्रकारान्तरेण किमिति प्रदर्श्यत इत्याकाङ्क्षायामाहुः । * जैमिनिमत इत्यादि * परममहत्परिमाणप्रादेशमात्रयोः साक्षाद्विरोधबोधके जैमिनिमते यः साकारवादस्तस्मिन् य एकदेशी ईदृशं भगवत्स्वरूपं मन्यते । प्रादेशमात्रत्वस्य प्रदेशविशेषकृतत्वे तावन्मात्रस्य पुरुषाकारत्वाभावेन पुरुषश्रुतिविरोधादिति तदाशयः । अभिविमानत्वं जगन्निर्मातृत्वाद्, द्युमूर्द्धत्वादिकं तूपासनार्थमित्यविरुद्धम् । तन्निराकरणाय सर्वत्र * सर्वेषु वैश्वानरस्य प्रदेशेषु प्रादेशमात्रत्वं तथाह । तत्र सम्पत्तिकृतत्वे वाच्ये सा केत्याद्याकाङ्क्षायां सम्पत्तिं तत्कृतं प्रादेशमात्रत्वं च स्वयं जैमिनिः श्रुत्या प्रदर्शयतीत्यर्थः । *सम्पादयन्निति* केकय इति शेषः । श्रुतिं पठन्ति *प्रादेशमात्रमित्यादि* । *इत्यादिनेति* चक्षुषी उपदिशन्नुवाच, एष वै सुतेजा वैश्वानर इति । नासिके उपदिशन्नुवाच, एष वै पृथग्वर्त्मात्मा वैश्वानर इति । मुख्यमाकाशमुपदिशन्नुवाच, एष वै बहुलो वैश्वानर इति । मुख्या अप उपदिशन्नुवाच, एष वै रयिर्वैश्वानर इति । चिबुकमुपदिश-

म्पत्तिनिमित्तमेव प्रादेशमात्रत्वं वैश्वानरस्याह । न तु प्रादेशमात्र एव वैश्वानर इति । तदेकदेशिपरिहारं जैमिनिर्मन्यते ॥ ३१ ॥

आमनन्ति चैनमस्मिन् ॥ ३२ ॥

मुख्यं स्वसिद्धान्तमाह । व्यापक एव प्रादेश इति । न हि विरुद्धमुभयं भगवत्यनवगाह्यमाहात्म्ये । तस्मात् प्रमाणमेवानुस-

---

न्नुवाच, एष वै प्रतिष्ठा वैश्वानर इतीत्येतावता सन्दर्भेण । अर्थस्तु, देवा द्युप्रभृतयः, सुविदिता, वैश्वानरमूर्द्धादिरूपेण भवद्भिर्मत्तः सुज्ञाताः । प्रादेशमात्रमिव ह वै अभिसम्पन्नाः प्रादेशपरिमाणकमिव वैश्वानरं, ह वै प्रसिद्ध्या प्राप्तवन्तः । कथं प्राप्तवन्त इत्याकाङ्क्षायां प्रकारं प्रतिजानीते, तथा तु व इत्यारभ्य सम्पादयिष्यामीत्यन्तम् । प्रतिज्ञातं विवृणोति । स होवाच मूर्द्धानमित्यादिना । एष द्युलोकात्मा देवः, अतिष्ठा वैश्वानरः । अतिष्ठागुणको वैश्वानरावयवः । वैश्वानरशब्दात् तस्येदमिति शैषिकोऽण् । एवमग्रेऽपि । तथाच मूर्द्धानमित्यादिनाऽध्यात्मं जीवावयवेषु तान् देवान् सम्पादयन् सम्पत्तिनिमित्तं तदाह । अतः स्थानानुरोधेन तदनुगुणा स्थितिः सम्पत्तिस्तदनुरोधनिमित्तं प्रादेशमात्रत्वं, न तु स्वाभाविकमित्यर्थः । एवं द्युप्रभृतीनामाध्यात्मिकं रूपमादायानियतपरिमाणपक्षव्याख्यानस्य श्रौतत्वसमर्थनेन नियतपरिमाणमङ्गीकुर्वाणः एकदेशी निराकृतः ॥ ३१ ॥

आमनन्ति चैनमस्मिन् ॥ अतः परमेतस्यापि पक्षत्वसमर्थनाय सूत्रार्थं व्याकर्तुमवतारयन्ति * मुख्यमित्यादि * । * मुख्यमिति * यद्यपि विचारेण सिद्धम् । तत्स्वरूपं तु व्यापक एव प्रादेश इति । व्यापकरूपेणैव प्रादेशमात्रो, न तु प्रदेशभेदरूपभेदाभिव्यक्त्यनुस्मृतिसम्पत्तिवशात् । तत्र प्रमाणम् * न हीत्यादि * । अयं श्रीभागवतपष्ठस्कन्धीयगद्यस्यार्थोपन्यासः । तेन सिद्धमाहुः । * तस्मादित्यादित्यादि * नैषा तर्केण मतिरापनेयेति श्रुतेस्तर्कस्य निषेधेन श्रौता-

तेऽर्थं, न युक्तिः । शब्दबलविचार एव मुख्यः । ननु प्रतीतिकविरोधादन्यथात्वकल्पनम् । वैश्वानरस्य पुरुषत्वं, पुरुषविधत्वं पुरुषेऽन्तःप्रतिष्ठितत्वं च वाजसनेयिनः समामनन्ति । न हि तस्य तद्विधत्वं, तस्मिन् प्रतिष्ठितत्वं च सम्भवतीति युक्त्या । अतोऽन्ये ऋषयो भ्रान्ता एव येऽन्यथा कल्पयन्तीत्यभिमेत्य स्वमतमाह ।

एवं वैश्वानरमस्मिन् मूर्द्धचिबुकान्तराले जाबालाः समामनन्ति । एषोऽनन्तोऽव्यक्त आत्मा योऽविमुक्ते प्रतिष्ठित इति । सोऽविमुक्तः कस्मिन् प्रतिष्ठित इत्यादिना भ्रुवोः घ्राणस्य च

त्युपपत्तिं विना युक्तेरनादरणीयत्वादुपबृंहणेन विरोधे निरस्ते श्रौतक्रमानादरस्याप्रयोजकत्वात् तथेत्यर्थः । एवं सूत्रतात्पर्यमुद्धाट्य तत्र श्रुत्यन्तरसंमतिं प्रदर्शयन्तो व्याकुर्वन्ति *वैश्वानरस्येत्यादि* । *समामनन्तीति * स एषो वैश्वानरो यत् पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेत्यग्निरहस्ये पठन्ति । * सम्भवति युक्त्येति * भेदादिरूपया युक्त्या । तथाच ब्रह्मणः श्रुत्येकसमधिगम्यत्वात् तद्बलेन विचारे तत्र भेदानुक्त्या तदभावेऽपि सन्निहितत्वं मन्तव्यमित्यर्थः । एवमेकमामननं प्रदर्शितम् । यद्यपि सम्पत्तिरूपा युक्तिः श्रौती, तथापि कैकेयस्तथा तु व एतान् वक्ष्यामीत्यादिना मध्वादिवत् कल्पनयोपदिष्टवान् । न तु वास्तवरूपम् । स्वकृततथासम्पादनवचनात् । तथा सति द्युमूर्द्धत्वादीनामध्यात्मं कल्पनोपदेशो, न तु स्वाभाविकं तत्र मानम् । तच्च शब्दबलविचारे अप्रयोजकम् । दहरविद्यायां, यावान् वा अयमाकाशस्तावानन्तर्हृदय आकाश इत्यादिना कल्पनां विनैव तन्मानकथनवद्त्रापि श्रुत्यन्तरे कथनात् । तथा सति सम्पत्तिकृतं प्रादेशमात्रपरत्वं जघन्याधिकारिणामुपासनार्थत्वेन पर्यवस्यति । तथोत्तमाधिकारिणामनादरणीयमित्याशयेनाहुः । * अत इत्यादि * सूत्रे चकारादपरमामननं प्रदर्शयन्तो व्याकुर्वन्ति *एवमित्यादि* । *इत्यादिनेति* कस्मिन् प्रतिष्ठि-

ऽपत्तिनिमित्तमेव प्रादेशमात्रत्वं वैश्वानरस्याह । न तु प्रादेशमात्र एव वैश्वानर इति । तदेकदेशिपरिहारं जैमिनिर्मन्यते ॥ ३१ ॥

आमनन्ति चैनमस्मिन् ॥ ३२ ॥

मुख्यं स्वसिद्धान्तमाह । व्यापक एव प्रादेश इति । न हि विरुद्धमुभयं भगवन्नवगाह्यमाहात्म्ये । तस्मात् प्रमाणमेवानुस-

---

न्नुवाच, एष वै प्रतिष्ठा वैश्वानर इतीत्येतावता सन्दर्भेण । अर्थस्तु, देवा द्युप्रभृतयः, सुविदिता, वैश्वानरमूर्द्धादिरूपेण भवद्भिर्मत्तः सुज्ञाताः । प्रादेशमात्रमिव ह वै अभिसम्पन्नाः प्रादेशपरिमाणकमिव वैश्वानरं, ह वै प्रसिद्ध्या प्राप्तवन्तः । कथं प्राप्तवन्त इत्याकाङ्क्षायां प्रकारं प्रतिजानीते, तथा तु व इत्यारभ्य सम्पादयिष्यामीत्यन्तम् । प्रतिज्ञातं विवृणोति । स होवाच मूर्द्धानमित्यादिना । एष द्युलोकात्मा देवः, अतिष्ठा वैश्वानरः । अतिष्ठागुणको वैश्वानरावयवः । वैश्वानरशब्दात् तस्येदमिति शैषिकोऽण् । एवमग्रेऽपि । तथाच मूर्द्धानमित्यादिनाऽध्यात्मं जीवावयवेषु तान् देवान् सम्पादयन् सम्पत्तिनिमित्तं सदाह । अतः स्थानानुरोधेन तदनुगुणा स्थितिः सम्पत्तिस्तदनुरोधनिमित्तं प्रादेशमात्रत्वं, न तु स्वाभाविकमित्यर्थः । एवं द्युप्रभृतीनामाध्यात्मिकं रूपमादायानियतपरिमाणपक्षव्याख्यानस्य श्रौतत्वसमर्थनेन नियतपरिमाणमङ्गीकुर्वाणःएकदेशी निराकृतः ॥ ३१ ॥

आमनन्ति चैनमस्मिन् ॥ अतः परमेतस्यापि पक्षत्वसमर्थनाय सूत्रार्थं व्याकर्तुमवतारयन्ति * मुख्यमित्यादि * । * मुख्यमिति * बलाबलविचारेण सिद्धम् । तत्स्वरूपं तु व्यापक एव प्रादेश इति । व्यापकरूपेणैव प्रादेशमात्रो, न तु प्रदेशभेदरूपभेदाभिव्यक्त्यनुस्मृतिसम्पत्तिवशात् । तत्र प्रमाणम् * न हीत्यादि * । अयं श्रीभागवतचतुस्कन्धीयगद्यस्यार्थोपन्यासः । तेन सिद्धमाहुः । * तस्मादित्यादित्यादि * नैषा तर्केण मतिरापनेयेति श्रुतेस्तर्कस्य निषेधेन श्रोता-

तेऽयं, न युक्तिः । शब्दबलविचार एव मुख्यः । ननु प्रातीतिकविरोधादन्यथात्वकल्पनम् । वैश्वानरस्य पुरुषत्वं, पुरुषविधत्वं पुरुषेऽन्तःप्रतिष्ठितत्वं च वाजसनेयिनः समामनन्ति । न हि तस्य तद्विधत्वं, तस्मिन् प्रतिष्ठितत्वं च सम्भवति युक्त्या । अतोऽन्ये ऋषयो भ्रान्ता एव येऽन्यथा कल्पयन्तीत्यभिप्रेत्य स्वमतमाह ।

एवं वैश्वानरमस्मिन् मूर्द्धचिबुकान्तराले जावालाः समामनन्ति । एषोऽनन्तोऽव्यक्त आत्मा योऽविमुक्ते प्रतिष्ठित इति । सोऽविमुक्तः कस्मिन् प्रतिष्ठित इत्यादिना भ्रुवोः प्राणस्य च

न्नुपपत्तिं विना युक्तेरनादरणीयत्वादुपबृंहणेन विरोधे निरस्ते श्रौतक्रमानादरस्याप्रयोजकत्वात् तथेत्यर्थः । एवं स्वमतात्पर्यमुद्धाट्य तत्र श्रुत्यन्तरसंमतिं प्रदर्शयन्तो व्याकुर्वन्ति *वैश्वानरस्येत्यादि* । *समामनन्तीति* स एषो वैश्वानरो यत् पुरुषः स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदेत्यग्निरहस्ये वदन्ति । *सम्भवति युक्त्येति* भेदादिरूपया युक्त्या । तथाच ब्रह्मणः श्रुत्येकसमधिगम्यत्वात् तद्बलेन विचारे तत्र भेदानुक्त्या तदभावेऽपि तन्निर्णयं मन्तव्यमित्यर्थः । एवमेकमामननं प्रदर्शितम् । यद्यपि सम्पत्तिरूपा युक्तिः श्रौती, तथापि कैकयस्तया तु व एतान् वक्ष्यामीत्यादिना मध्वादिवत् कल्पनयोपदिष्टवान् । न तु वास्तवरूपम् । स्वकृततयासम्पादनवचनात् । तथा सति द्युमूर्द्धत्वादीनामध्यात्मं कल्पनोपदेशो, न तु स्वारसिकः तत्र मानम् । तच्च शब्दबलविचारे अप्रयोजकम् । दहरविद्यायां, यावान् वा अयमाकाशस्तावानन्तर्हृदय आकाश इत्यादिना कल्पनां विनैव तन्मानकथनवद्यत्रापि श्रुत्यन्तरे कथनात् । तथा सति सम्पत्तिफलं प्रादेशमात्रपरत्वं जघन्याधिकारिणामुपासनार्थत्वेन पर्यवस्यति । तच्चोत्तमाधिकारिणामनादरणीयमित्याशयेनाहुः । *अत इत्यादि* सूत्रे चकारात्परमामननं प्रदर्शयन्तो व्याकुर्वन्ति *एवमित्यादि* । *इत्यादिनेति* कस्मिन् प्रतिष्ठि-

यः सन्धिः स एष द्यौर्लोकस्य परस्य च सन्धिर्भवतीति । न ह्यनन्तः संकुचितस्थाने भवति । विशेषणवैयर्थ्यापत्तेः । युक्तिगम्या त्वब्रह्मविद्यैव । अविरोधेऽपि वक्ष्यति । श्रुतेस्तु शब्दमूलत्वादिति । ननु तथापि काचिद् वेदानुसारिणी युक्तिर्वक्तव्या, शास्त्रसाफल्यायेति चेद् । उच्यते । विरोध एव नाशङ्कनीयो वस्तुस्वभावात् । अयस्कान्तमणिसन्निधौ लोहपरिभ्रमणे या युक्तिर्गर्भस्योदर्यादाहे, रेतसो मयूरत्वादिभावे । न हि सर्वत्र स्वभावदर्शनाभ्यामन्योपपत्तिः कैश्चिदपि शक्यते वक्तुम् । तस्यान्ते सुषिरमित्यादिना श्रुतिरेवमेवाह ।

त इति प्रश्ने, वरणायां नास्यां च मध्ये प्रतिष्ठित इति । का वै वरणा का च नासीति । सर्वानिन्द्रियकृतान् दोषान् वारयति तेन वरणा भवतीति । सर्वानिन्द्रियकृतान् पापान्नाशयति तेन नासी भवतीति । कतमच्चास्य स्थानं भवतीति । भ्रुवोः प्राणस्य च यः सन्धिः स एष द्यौर्लोकस्य परस्य च सन्धिर्भवतीत्यन्तम् । नन्वत्रापि प्रदेशादिभेदपक्षा एव भवन्तु, को दोष इत्यत आहुः । * न हीत्यादि * नचानन्त इत्यत्र कालापरिच्छेद एवोच्यते, न देशापरिच्छेद इति शङ्क्यम् । आत्मत्वेनैव सिद्धे कालापरिच्छेदेऽनन्त इति विशेषणवैयर्थ्यापत्तेः । अतस्तद्बलाद्विरुद्धधर्माश्रयत्वमेवाभिप्रेतमित्यर्थः । ननु युक्त्या साधने को दोष इत्यत आहुः । * युक्तीत्यादि * नैषा तर्केणेतिश्रुतेस्तथेत्यर्थः । ननु सूत्रकृता स्फुटतयाऽनुक्तत्वेऽयमेव सूत्राशय इत्यत्र किं गमकमत आहुः । * अविरोधेऽपीत्यादि * यद्यपि जाबालश्रुतौ वैश्वानरः स्फुटतया नोक्तस्तथापि चिबुकान्तरेऽनन्तस्य प्रतिष्ठितत्वकथनात् प्रादेशमात्रस्याभिविमानत्वं प्रत्यभिज्ञायते । अतस्तत्परत्वं तद्वाक्यस्य बोध्यम् । * नन्वित्यादिनोक्ता युक्तिस्तु स्फुटतरैव । तस्याः कथं श्रुत्यनुसारित्वमित्यत आहुः । * तस्यान्ते इत्यादि * तस्यान्ते सुषिरं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितमिति तैत्तिरीये बृहन्नारायणोपनिषदि

यशोदास्तनन्धयस्य च भगवतो मुखारविन्दे विश्वमेव दृष्ट्वा स्वप्नमायाऽविद्यानिराकरणाय सिद्धान्तमाह । अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोग इति । उलूखलबन्धने चायमर्थो निर्णीतः । तस्मादानन्दांशस्यैवायं धर्मो, यत्र स्वाभिव्यक्तिस्तत्र विरुद्धसर्वधर्माश्रयत्वमिति चकारार्थः । तस्मात् प्रादेशमात्रो व्यापक इति वैश्वानरो भगवानेवेति सिद्धम् ॥ ३२ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये प्रथमस्याध्यायस्य द्वितीयः पादः ॥ १ ॥ २ ॥

सहस्रशीर्षानुवाके सुषिरस्य सूक्ष्मता तत्र सर्वप्रतिष्ठा च श्राव्यते । सा वस्तुस्वभावादेवोपपद्यतेऽतस्तथात्वमित्यर्थः । दर्शनमुपन्यस्यन्ति * यशोदेत्यादि * अत्र स्तनन्धयपदेन अदन्तस्य षड्दिनस्य पूतनाऽसुपयःपानकर्तृतयाऽप्यसाधनविरोधोऽपि स्मार्यते । * निर्णीत इति * बन्धनानां द्व्यङ्गुलन्यूनतायाः, पुनः स्वेच्छया बन्धनस्य च कथनान्निर्णीतः । शेषमतिरोहितार्थम् । एवञ्चात्र निराकारत्वादिना कर्तृत्वासम्भवमाशङ्क्य तन्निरासाय साकारब्रह्मता विचारिता । श्रुतौ तु वरणा भ्रूः । तस्य स्थानमित्यस्येति पदेनानन्तः परामृश्यते । प्राणपदेन च नासिका । नासिके उपदिशन्नित्यत्र पृथग्वर्त्मात्मनः कथनात् । द्यौरित्याकाशः । तत्र हेतुः । लोकस्य परस्य च सन्धिरिति । जीवलोकस्य परब्रह्मणश्च सन्धाजनकत्वादिति ।

अथात्र मतान्तराणि विचार्यन्ते । तत्र जाठराग्निप्रतीकस्य जाठराग्न्युपाधिकस्य वा परमेश्वरस्योपास्यत्वं व्यासमते । जैमिनिमते तु तदुभयकल्पनं विनैव साक्षात् परमेश्वरोपासनं विधीयत इति साक्षादपीति सूत्रे व्याख्यायामित्यस्त्वादिसूत्रेषु प्रादेशमात्रत्वस्याविरोधो विचार्यत इति शङ्कराचार्याः प्राहुः ।

तत्रेदमवधेयम् । आचार्यास्तद्गुरुः सर्ववेदव्यासकर्ता स्वयं समन्वयं प्रतिज्ञाय सरलां सुन्दरीं जैमिनिविचारितां युक्तिं श्रुत्यादि-

संमतं जानानः किमिति नोपगतवान् । अथ दुष्टं तर्हि कुतो न दूषितवानिति ।

भास्कराचार्यास्तु, नायं वैश्वानरशब्दो जाठराग्न्यभिप्रायेण प्रयुक्तो, येनात्र तद्गुणकोपासनं कल्प्येत । किन्तु यौगिकोऽयं शब्दो, विश्वान्नरान् नयतीति । तद्धितस्तु राक्षसवायसादिवत् स्वार्थे । अभिविमानशब्दश्चाभिमुख्येन विविधं जगन्निर्मिमीत इति वा, अभिगतश्चासौ विगतमानश्चेति वा योगेन । वैश्वानरशब्दस्य यौगिकार्थग्रहणे जाठरानलविशिष्टोपासनमनभिप्रेतं बादरायणस्येति साक्षात्सूत्रे व्याचक्रुः । तत्र बीजं तु सौत्रोऽपिशब्दः । साक्षादविरोधं जैमिनिरपीत्यन्वयादिति तदाशयः ।

रामानुजाचार्यास्तु मतद्वयेऽपि जाठरविशिष्टपरमात्मोपासनमङ्गीकृत्य, वैश्वानरशब्दोऽग्निसाधारणोऽपि परमात्मधर्मविशेषितो यथा विश्वेषां नराणां नेतृत्वादिना गुणेन परमात्मानमेवाचष्ट इति निश्चीयते । तथा स एषोऽग्निर्वैश्वानरो यत्पुरुष इति वाजसनेयिपठितोऽग्निशब्दोऽपि येनैवाग्रनयनादिना गुणेन योगाज्ज्वलने वर्तते तस्यैव गुणस्य निरुपाधिकस्य काष्ठां गतस्य परमात्मनि सम्भवादस्मिन् प्रकरणे परमात्मासाधारणधर्मविशेषितः साक्षादव्यवधानेन परमात्मानमेवाभिधत्त इति साक्षात्सूत्रार्थमाहुः ।

सम्पत्तिसूत्रे चोपासकैः क्रियमाणायाः प्राणाहुतेरग्निहोत्रत्वसम्पादनार्थमुरःप्रभृतीनां वेदित्वाद्युपदेश इति । आमनसूत्रे च, एनं द्युमूर्द्धत्वादिविशिष्टं वैश्वानरमस्मिन्नुपासकशरीरे प्राणाहुत्याधारत्वामनन्ति च । तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्द्धैव सुतेजा इत्याहुः ।

तत्रापीदमवधेयम् । अत्र औपमन्यवादिसंवादवाक्येषु, मूर्द्धा त्वेष आत्मनश्चक्षुष्ट्वेतदात्मन इत्यादिना यदुक्तं, तस्य निगमनमत्र प्रतीयते । तस्य ह वा एतस्यात्मनो वैश्वानरस्येति सर्वैः पदैस्तमेव परामृश्य मूर्द्धप्रभृतीनां समभिव्याहरणात् । तत्कथं सन्निहितपरित्यागेन व्यवहितस्योपासकस्य परामर्शः कर्तुं शक्यते । न चात्र सुतेजःप्रभृतिभ्योऽतिरिक्तानामुरःप्रभृतीनां वेद्यादित्वकथनात् तथेति वाच्यम् । भगवतो विश्वकायत्वाय तन्मूर्द्धादीनां सुतेजस्त्वादिरूपेणोपदेशवत्तस्य यज्ञत्वाय तदुरआदीनां वेद्यादिरूपेणोपदेशस्य शक्यत्व-

चनतया तस्योपास्यकावयवगमकताया निश्चेतुमशक्यत्वात् । नचैवं सति तद् यदुक्तं प्रथममागच्छेदित्यादौ यः प्राणाग्निहोत्राधारत्वेनोपासकास्यादिपरिग्रहः स कथं सङ्गच्छेतेति शङ्क्यम् । सम्पत्तिसूत्रविषयवाक्ये वैश्वानरावयवानामुपासकमूर्द्धादिसम्पत्तिकथनेन तेषां तत्र मानवदनुक्तानां तदुरःप्रभृतीनामप्युपासकोरःप्रभृतिषु सम्पत्त्या मानस्याभिप्रेततया सुखेनैव तदास्यादिपरिग्रहसङ्गतेः । अत एव सर्वत्र वैश्वानरस्थितिबोधनायोपसंहारे, तस्माद्धुहैवंविद् यद्यपि चण्डालायोच्छिष्टं प्रयच्छेदात्मनि हैवास्य वैश्वानरे हुतं स्यादिति श्रावितम् । तस्मादत्र न जाठराग्नीकोपासना, न वा तदुपाधिकोपासना, नापि तद्विशिष्टोपासना । किन्तु केवलपरमात्मोपासनेति निश्चयः ।

शैवभिक्षू अप्यनेनैव दत्तोत्तरौ, माध्वाश्च ।

प्रकृतमनुसरामः । एवमस्मिन् पादे जीवपुरःसरेणार्थसन्देहो निवारितः । मनोमयत्वादिधर्मवान् हिरण्मयश्मश्रुत्वादिधर्मवानत्ताऽलौकिकभोगयोगेऽपि दोषरहितः प्रकटसच्चिदानन्दस्वरूपोऽधिदैवादित्रयनियामकोऽक्षरादुत्कृष्टः स्वत एव साकारो विरुद्धधर्माश्रयो भगवानेव, न जीव इति । तेन सर्वान्तर्याम्येको भगवानिति सिद्धम् । आधेयरूपो विचारित इति च ॥ ३२ ॥ ॥ ८ ॥

इति श्रीवल्लभाचार्यचरणनखचन्द्रनिवारितहृदयान्धकारेण
पीताम्बरतनुजपुरुषोत्तमेन कृते भाष्यप्रकाशे प्रथ-
माध्यायस्य द्वितीयः पादः ॥ १ ॥ २ ॥

प्रथमाध्यायस्य तृतीयः पादः ।

द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥

द्वितीयपादे आधेयरूपो भगवान् प्रतिपादितः । आधाररूपोऽत्र प्रतिपाद्यते । तेन सर्वं ब्रह्मेति फलिष्यति ।

द्युभ्वाद्यायतनं स्वशब्दात् ॥ अथ तृतीयपादं विवरिषवोऽध्यायसङ्गतिस्फोरणाय पूर्वपादार्थं वदन्तः प्रस्तुतस्यार्थमाहुः । * द्वितीयेत्यादि * । अयमर्थः । पूर्वपादस्यान्तस्तद्धर्माधिकरणप्रपञ्चरूपतयाऽऽद्याधिकरणयाम, 'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः । यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वर' इति लक्षणं विचारितम् । तत्र प्रथमेऽन्तःस्थस्य मनोमयत्वादीनां धर्माणां, द्वितीये हिरण्यश्मश्रुत्वादीनां च बोधनेन तादृशधर्मविशिष्टं स्वरूपमन्तर्बोधितम् । ततस्त्रिभिः कार्यबोधनेन बिभर्तिपदार्थस्य धारणपोषणात्मकं स्वरूपं बोधितम् । ततोऽन्तर्याम्यधिकरणेऽन्तर्यं परमात्मत्वमात्रेण सपरिकरं लोकत्रयं च बोधितम् । ततोऽदृश्यत्वाद्यधिकरणद्वये अव्ययत्वमीश्वरत्वं चाक्षरात्पुरुषोत्तमत्वेन विरुद्धधर्माधारत्वेन च विचारितम् । तदेतदुक्तम् * आधेयरूपो भगवान् प्रतिपादित इति । तथा अदृश्यत्वाद्यधिकरणे, यस्मात् क्षरमतीतोऽहमित्यपि विचारितमेव । अतः परं तल्लिङ्गाद्यधिकरणेषु य आधाररूपो निरूपितः सोऽत्र विचार्यते । तेन, 'पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया । यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्' इति वाक्योत्तरार्द्धोक्तं विमृष्टं भविष्यति । तदेतदुक्तम् । * आधाररूपोऽत्र प्रतिपाद्यत इति । द्वितीयपादोक्तमनन्यभक्तिलभ्यत्वं तु गुणोपसंहारपादे फलिष्यतीत्यतो नोक्तम् । एवं पादद्वयोक्तस्य फलं समन्वयतात्स्वरूपं वदन्ति * तेनेत्यादि * । ननु पूर्वपादे आधेयनिरूपणेऽन्तर्यामित्वात्मत्वाक्षरब्रह्मत्वोदनकत्वयोः शरीरकत्वादिभिर्व्यापकत्वात्यपधारणं आधाररूपताऽप्यधारिता इ

इदं श्रूयते । यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः । तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथाऽमृतस्यैष सेतुरिति ।

वाधकानां बलिष्ठत्वात् साधकानामभावतः ।
आधारधर्मो बाध्येरन्निति पादोऽभिधीयते ॥
यस्मिन्नित्यादिवाक्ये च वाक्यार्थः सर्वबाधितः ।
अर्थात् प्रकरणाल्लिङ्गादिति पूर्वं विचार्यते ॥

अत्र संशयः । द्युभ्वाद्यायतनं ब्रह्म, आहोस्वित् पदार्थान्तरमिति । अर्थान्तरमेव च भवितुमर्हति । द्युभ्वादीनां सूत्रे मणिगणा इव प्रोतानां भारवाहकत्वात्र तद्वाहकः परमात्मा ।

भवतीति ध्वर्थः पादारम्भ इत्यत आहुः । * बाधकानामित्यादि * तेषु प्रेत्याभिसम्भवाध्ययनारम्भान्तरात्मत्वादीनां साधितत्वेन बाधकानां बलिष्ठत्वात् साधकानामसाधितत्वेन नैर्बल्यात्तदभावत आधारधर्मो ज्यायस्त्वादयो बाध्येरन्नतस्तथेत्यतो न व्यर्थ इत्यर्थः । क्रमनियामिकाऽवसरसङ्गतिः । सा च जडार्थवारणरूपा द्वितीयपादारम्भ एवोक्तेति न पुनरुच्यते । एवं संगतिं प्रयोजनं चोक्त्वाऽधिकरणं विवरीतुं विषयवाक्यमुपक्षिपन्ति * इदं श्रूयत इत्यादि * । * श्रूयत इति * आथर्वणोपनिषद्द्वितीयमुण्डके श्रूयते । एतस्यैव वाक्यस्य प्रथमतः कुतो विचार इत्याकाङ्क्षायामाहुः । * यस्मिन्नित्यादि * । * वाक्ये-त्यादि * । * सर्वबाधित इति * सर्वैः प्रकारैर्बाधितः । * इतिहेतौ । अत्र बुद्धिस्थानात्मिकाधिकरणसङ्गतिरपि बोध्यते । तल्लक्षणं तु, बुद्धिस्थं चिन्त्यते यत्र बुद्धिस्थानात्मिका तु सेति । तथाच तल्लिङ्गाद्यधिकरणे आकाशपदस्य ब्रह्मवाचकत्वमङ्गीकृत्य ब्रह्मलक्षणस्य भूताकाशेऽतिव्याप्तिवारणेऽपि सांख्यमतसिद्धे प्रधानेऽतिव्याप्तिमाशङ्क्य वारणात् । बाधादिकं विवरीतुं संशयपूर्वपक्षावाहुः । * अत्र संशय इत्यादि * । * अर्थान्तरमेव चेत्यादि च * । ब्रह्मवाचकपदबाधकान् हेतून् विवृण्वन्तः पूर्वमर्थाद् बाधं विवृण्वन्ति * द्युभ्वित्यादि * । एवं पूर्वपक्षे

अन्यथाग्निशोकश्चासङ्गतः । एकविज्ञानेन सर्वविज्ञानस्य पृथ-त्त्वात् कथमन्यविशोकः । सेतुश्च गतिसाधनः । तस्मादफलत्व-मपि । आत्मलाभान्न परं विद्यत इति विरोधश्च । अतो न ब्रह्मविद्यापरमेतद् वाक्यम् । किन्तु स्मृतिमूलं भविष्यतीत्येवं प्राप्ते ।

उच्यते । द्युभ्वाद्यायतनं ब्रह्मैव । द्यौर्भूश्चादिर्येषां ते द्युभ्वा-दयः । तेषामायतनम् । यस्मिन् द्यौरितिवाक्योक्तानां साधकं वदन् प्रथमपरिहारमाह । स्वशब्दात् । आत्मशब्दो व्याख्यातः स्वशब्देन । अत्र न जीवस्यात्मत्वेनोपासनार्थमात्मपदं, किन्तु पूर्वोक्तानामात्मभूतम् । तेन न भारकृतो दोषः । कारणे हि का-

---

षेमोतं भवाति । सेतुत्वं च युज्यते । तज्ज्ञानेनाऽमृतत्वप्राप्तेः । अभेदेऽपि ब्रह्मविदाप्नोति परमितिवदर्थः । तस्मादवधारितार्थत्वाल्लक्ष्यस्य सर्वगतत्वच्युत्पादकत्वाद् द्युभ्वाद्यायतनं ब्रह्मैव ॥१॥

मुक्तोपसृप्यव्यपदेशात् ॥ २ ॥

ननु चोक्तं सर्वविज्ञानस्योपक्रान्तत्वादन्यवाक्यमोको विरुद्ध इति । नैष दोषः । मुक्तोपसृप्यव्यपदेशात् । मुक्तानां जीवन्मुक्तानां शरीराद्यध्यासरहितानामवान्तरप्रकरणशरधनुर्न्यायेन ब्रह्मत्वेन ज्ञातं पृथक्त्वेन वा जीवं लक्ष्ये योजयितुं तदुपसृप्यता व्यपदिश्यते । तेन शरीराद्यध्यासविशिष्टं न ब्रह्मणि योजनीयमिति ।

दोषपरिहारमाहुः । * सेतुरित्यादि * । ननु सेतुत्वेनाऽमृतसाधनत्वमस्यांऽपते, न त्वेनज्ज्ञानस्येति कथमेवमित्यत आहुः । * अभेदेऽपीत्यादि * तथाच भेदेऽप्यवस्याभेदेन भेद्'दुभयसामञ्जस्यमिति नानुपपत्तिरित्यर्थः । सिद्धमाहु. * तस्मादित्यादि * । * तस्मादिति * भारादिदोषद्वयस्य वारणात् । * लक्ष्यस्येति * । लक्ष्यं सर्वगतं चैव शिरो मे सर्वतोमुख इति पूर्वमन्त्रोक्तस्य ब्रह्मणो लक्ष्यस्य ॥ १ ॥

मुक्तोपसृप्यव्यपदेशात् ॥ एवं दोषद्वये परिहृतेऽपि तृतीयस्यापरिहृतत्वादाक्षिपति * ननु चेत्यादि * । * मुक्तोपसृप्यव्यपदेशादिति * मुक्तोपसृप्य इति भावप्रधानः । मुक्तनिष्ठा या उपसृप्यता भगवन्निकटगमनयोग्यता तया कृत्वा भगवतस्तस्या उपदेशो मुक्तोपसृप्यव्यपदेशस्तस्मात् । एतद्व्यपदेशेन कथं दोष परिहार इत्यतस्तदेव व्याकुर्वते * मुक्तानामित्यादि * मुक्तपदेनात्र जीवन्मुक्ता एवोच्यन्ते । * तदुपसृप्यतेति * 'मुक्तनिष्ठा उपसृप्तुं योग्यता । तत्र प्रमाणमवान्तरप्रकरणम् । तत्र प्रोक्तो यः शरधनुर्न्यायस्तेन तथा ज्ञातं तथेति । अयमर्थः । अवान्तरप्रकरणं हि, तद्धे-

किञ्च । वाग्विमोक एव, न वस्तुविमोकः । वस्तुनो ब्रह्मत्वात् । वाचारम्भणमात्रत्वाद्विकारस्य । अतो न सर्वविज्ञानबाधः । अतो बाधकाभावादिदं ब्रह्मवाक्यमेव ।

ये तु श्रुतेरन्यथार्थत्वं कल्पितमतानुसारेण नयन्ति, ते पूर्वोत्तरपक्षश्रुतिविरुद्धार्थवादिन उपेक्ष्याः ॥ २ ॥

लक्ष्यं सौम्य विद्धीत्यैकाग्र्येण तदेकतानतां प्रतिज्ञाय सा कथं स्यादित्याकाङ्क्षायां, 'धनुर्गृहीत्वौपनिषदं महास्त्रं शरं ह्युपासानिशितं सन्धीयीत । आयम्य तद्भावगतेन चेतसा लक्ष्यं तदेवाक्षरं सौम्य विद्धीति' शरधनुर्न्यायेन तां बोधयित्वा, किमस्त्रं कः शर इत्याद्याकाङ्क्षायां, 'प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेद्' इत्यनेन शरस्य यथा प्रवेशेन लक्ष्यनिखाततया लक्ष्यप्रचुरता तथा आत्मनोऽपि तन्निखाततया तत्प्रचुरतेति तथा ब्रह्मत्वेन ज्ञातम् । अथवा, 'लक्ष्यं सर्वगतं चैव शरो मे सर्वतोमुखः । वेद्धा सर्वगतश्चैव विद्धं लक्ष्यं न संशयः' इति ब्रह्मणः सकाशात् पृथक्त्वेन ज्ञातं जीवं लक्ष्ये ब्रह्मणि योजयितुमुपासानिशितत्वाधायकतद्भावगतचेतःसिद्ध्यर्थमन्यवाग्विमोकोऽत्रोच्यते । स च शरीराद्यध्यासराहित्य एव सिद्ध्यतीति तन्मुखेन भगवतो मुक्तोपसृप्यता व्यपदिश्यते । उक्तरीत्या जीवयोग्यताकथनद्वारोच्यते । तेन शरीराद्यध्यासविशिष्टं लिङ्गशरीरं न ब्रह्मणि योजनीयमिति बोधनाय वाग्विमोकोऽत्रोच्यते । न तु सर्वविज्ञानविघाताय । लक्ष्यादीनां त्रयाणां सर्वगतत्वश्रावणादतो नैतत्कथनमुपक्रमविरोधायेत्यर्थः । एवमन्यवाग्विमोकस्य दोषत्वं प्रकरणेन निवारितम् । अतः परमर्थेनाऽपि निधारयन्ति * किञ्चेत्यादि * अर्थस्तु स्फुट एव । एवं सूत्रार्थं व्याख्यायैकदेशिमतमनूद्य दूषयन्ति * ये त्वित्यादि * । ये मायावादिनः परब्रह्मणः साकारताममन्वानाः श्रुतेर्व्याख्येयायाः, यस्मिन् द्यौरित्यस्या अन्यथार्थत्वं, सन्मूलाः सौम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठा इत्यायतनवद्भावस्य, सर्वं ब्रह्मेति सामानाधिकरण्यस्य च श्रावणाद् यथा शाखा स्कन्धो मूलं चेत्यनेकात्मको वृक्ष एवं नाना-

नानुमानमतच्छब्दात् ॥ ३ ॥

ननु जडधर्मा जडदृष्टान्ताः प्रकरणे बहवः सन्ति । अरा इव ब्रह्मपुरे मनोमय इत्यादि ।

रसो विचित्र आत्मेतिशङ्कासम्भवे तद्वारणायात्र, तमेवैकं जानथात्मानमिति सावधारणमाह । यथा, यस्मिन्नास्ते देवदत्तस्तद् आनयेत्युक्ते आसनमेवानयति, न देवदत्तम् । तद्वदायतनभूतस्यैकरसस्यैवात्मनो विज्ञेयत्वमुपदिश्यते । अन्या वाचः इत्यनेन विकारानृताभिसन्धस्य चापवादः । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति दोषश्रावणात् । सर्वं ब्रह्मेति सामानाधिकरण्यं तु प्रपञ्चप्रविलापनार्थं, नानेकरसताप्रतिपादनार्थम् । स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेति श्रावणादित्येवमर्थत्वं, प्रपञ्चो मायिक इतिकल्पितमतानुसारेण प्रापयन्ति । ते * पूर्वोत्तरस्पष्टश्रुतिविरुद्धार्थवादिनो, 'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद् विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्तीति । एतस्माज्जायते प्राण इति । अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्यावित्यादि । आविःसन्निहितं गुहाचरं नाम महत्पदम् । अत्रैतत्सर्वमर्पितमेजत्प्राणन्निमिषच्च यद्' इत्यादयः पूर्वाः । अरा इव रथनाभावित्याद्या आसमाप्तिवर्तमाना उत्तराः, स्पष्टास्तत्तद्दृष्टान्तपूर्वकब्रह्मकार्यब्रह्मरूपविरुद्धधर्माधारत्वादिब्रह्मधर्मप्रतिपादकतया स्फुटा यो वा भूतमस्तद्विरुद्धो यः प्रपञ्चमायिकत्वादिरूपोऽर्थस्तद्वादिनो वेदार्थैकदेशिकमादाय तं निर्णीतत्वेन वदन्त, उपेक्ष्या आग्रहवादित्वाद् भूताविष्टा इवानादरणीया इत्यर्थः ॥ २ ॥

नानुमानमतच्छब्दात् ॥ इदमेवाधिकरणं पुनर्निषेधमुखेन विचारयन् पूर्वं जडं निरस्यतीत्याशयेनात्र पूर्वपक्षं दर्शयन्ति * नन्वित्यादि * । कुत्र सन्तीत्यपेक्षायां तन्मन्त्रप्रतीकं दर्शयन्ति * अरा इव रथनाभौ संहता यत्र नाड्यः स एषोऽन्तश्चरते बहुधा जायमान इत्यत्र नाडीसङ्घाताधिकरणत्वं शरीरधर्मत्वाज्जडधर्मः । रथ-

भेदव्यपदेशात् ॥ ५ ॥

विशेषहेतुमाह । तत्रैवैकं जानथेति कर्मकर्तृभावः प्रतीयते । अतो भेदव्यपदेशान्न प्राणभृज्जीवः ॥ ५ ॥

प्रकरणात् ॥ ६ ॥

जीवजडसाधारणतानिराकरणाय विशेषहेतुमाह । प्रकरणं हीदं ब्रह्मणः । ब्रह्म देवानामित्यारम्भे, स ब्रह्मविद्यामिति, तेषामेवैतां ब्रह्मविद्यामित्यन्ते च ब्रह्मविद्याया एव प्रकरणित्वमवगम्यते । ब्रह्मैवेदममृतं पुरस्तादित्यादिभिर्विस्पष्टो ब्रह्मवादः प्रतीयते ॥ ६ ॥

स्थित्यदनाभ्यां च ॥ ७ ॥

सर्वस्याप्यन्यथाभावशङ्कया विशेषहेतुमाह । द्वा सुपर्णेति

धाय । तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृतं यद्विभाति' इति मन्त्रे आनन्दरूपस्यामृतस्य विभातो विज्ञानेन दर्शनविषयत्वश्रावणेनानन्दरूपत्वस्यात्मधर्मतायाः स्फुटत्वाच्चेति ॥ ४ ॥

भेदव्यपदेशात् ॥ * विशेषहेतुमाहेति * उक्तस्य हेतोर्मन्त्रान्तर्गतत्वेन प्राकरणिकत्वात् प्रकरणस्य ब्रह्मपरतासाधकत्वं, न तु विषयवाक्यस्य तथात्वसाधकत्वमित्यतस्तन्मन्त्रगतं हेतुमाहेत्यर्थः ॥५॥

प्रकरणात् ॥ * जीवेत्यादि * ननु यद्यपि मन्त्रगतो हेतुर्जीववाचकस्तथाप्येकशब्दस्य मुख्यार्थत्वाङ्गीकारे द्वितीयसिद्धावेवकारस्यासङ्कुचितान्ययोगव्यवच्छेदकताया उपगन्तुमशक्यत्वात्, तथापि जानथ, ततोऽपि मुख्यमात्मानं जानथेत्येवं वचनव्यक्तावस्य मन्त्रस्य जडजीवसाधारणता स्यादतस्तदभावाय तथाहेत्यर्थः । शेषं स्फुटम् ॥ ६ ॥

स्थित्यदनाभ्यां च ॥ * सर्वस्येत्यादि * ब्रह्मपदस्य जीवसा-

वाक्ये, अनश्नन्नन्यो अभिचाकशीतीति केवलस्थितिः परमात्मनः, कर्मफलभोगो जीवस्य। अतः स्थित्यदनाभ्यां जीवपरमात्मानाविह मध्ये परामृष्टौ। न हि सांख्यमतमेतादृशं भवति। अतोऽस्य वैशेषिकोपपत्तेर्विद्यमानत्वात् प्रातिलोम्येन सर्वा उपपत्त्यो दृष्टा इति द्युभ्वाद्यायतनं भगवानेवेति सिद्धम्। यद्यपि पैङ्ग्युपनिषदि, द्वा सुपर्णेत्यस्यान्यथा व्याख्यानं प्रतिभाति, तदृचां प्रदेशविशेषेऽन्यथा व्याख्यानं न दोषाय। तस्मात् सत्त्वक्षेत्रज्ञौ जीवब्रह्माणौ व्याख्येयौ ॥ ७ ॥

भूमा संप्रसादादध्युपदेशात् ॥ ८ ॥

इदं श्रूयते। यो वै भूमा तत् सुखमिति। सुखलक्षणमुक्त्वा भूम्नो लक्षणमाह। यत्र नान्यत् पश्यति नान्यच्छृणोति। नान्यद्विजानाति स भूमेति। तत्र संशयः। भूमा बाहुल्यमाहोस्विद् ब्रह्मेति। तत्र प्रपाठकारम्भे, ततस्त ऊर्ध्वं वक्ष्यामीति प्रतिज्ञात-

---

धारण्यात् सर्वस्य प्रकरणस्य जीवपरत्वशङ्कया तद्गतं तमाहेत्यर्थः। * प्रातिलोम्येनेति * स्थित्यदनयोः प्रकरणबलाधायकत्वं, तस्य तत्पूर्वहेतुबलाधायकत्वमित्येवं वैपरीत्येन। ननु न दृष्टाः। द्वासुपर्णेति मन्त्रस्य पैङ्गिरहस्यब्राह्मणे सत्त्वक्षेत्रज्ञपरत्वेन व्याख्यानादित्यत आहुः। * यद्यपीत्यादि *। * जीवब्रह्माणाविति * व्यष्टिसमष्टिजीवौ। अमुक्तमुक्तजीवौ वा। इदं यथा तथा मया, गुहां प्रविष्टावित्यधिकरणस्थे, विशेषणाच्चेति सूत्रे सम्यगुपपादितमिति, नात्रोच्यते। एवमत्राधिकरणे, यस्यान्तःस्थानि भूतानीति विचारितम् ॥ ७ ॥ ॥ १ ॥

भूमा सम्प्रसादादध्युपदेशात् ॥ विषयवाक्यमुपन्यस्यन्ति * इदं श्रूयत इत्यादि * श्रूयत इति * छान्दोग्यनवमप्रपाठके सनत्कुमारनारदसंवादे श्रूयते। अत्र कः संशयः, कुतश्चेत्यत आहुः *तत्रेत्यादि*

तस्मात् प्रकृतिपुरुषनिरूपकसांख्यानुमापकमेवैतत्प्रकरणमस्तु । निर्णीतमप्यक्षराधिकरणे जडधर्मात् पुनरुज्जीवनम् । तस्माद् द्युभ्वाद्यायतनं प्रकृतिरेव भवितुमर्हतीति चेन्न। अनुमानं तन्मतानुमापकं न भवति । कोऽपि शब्दो निःसन्दिग्धस्तन्मतज्ञापको नास्ति। ब्रह्मवादज्ञापकास्तु बहवः सन्त्यात्मसर्वज्ञानन्दरूपादिशब्दाः । अतः सन्दिग्धा जडधर्मत्वेन प्रतीयमाना

नाभिदृष्टान्तो जडदृष्टान्तः । तथा, यः सर्वज्ञः सर्वविद् यस्यैष महिमा भुवि । दिव्ये ब्रह्मपुरे ह्येष व्योम्न्यात्मा प्रतिष्ठित इत्यत्र पुरमिव पुरमिति पुरपदबोधितो दृष्टान्तो भूमिष्ठमहिमवत्त्वं शरीरधर्मः । तथा, मनोमयः प्राणशरीरनेता इत्यत्र मनोमयत्वं विकारधर्मः । * इत्यादीत्यादिपदेन, हिरण्मये परे कोश इत्यादिमन्त्रोक्तानां शुभ्रत्वप्रकाशमानत्वादीनां संग्रहः । आत्मसर्वज्ञादिशब्दाश्चेतनधर्मबोधकाः पुरुषनिरूपकाः । * तस्मादिति * प्रकृतिपुरुषबोधकपदसत्त्वात् । नन्वस्य प्रकरणस्यादृश्यत्वाधिकरणे ब्रह्मपरतया व्युत्पादितत्वात् सिद्धं तथात्वे पुनः किमर्थोऽयं प्रयास इत्यत आहुः । * निर्णीतमित्यादि * । यद्यपि तत्र तथा निर्णीतं, तथापि तत्रान्तरात्मत्वेनाधेयतया ब्रह्म सिद्धं, न त्वाधारतयेति । रथनाभ्यादिदृष्टान्तसहकृतानाडीसङ्घाताधारत्वादिरूपाज्जडधर्मादाधारभूतेऽक्षरे प्रकृतिरूपतायाः पुनरुज्जीवनं सम्भवतीति विशिष्टाद्वैतमेव भवेन्न तु शुद्धब्रह्मवाद इति तदभावाय प्रयास इत्यर्थः । सिद्धान्तं व्याचक्षते * अनुमानमित्यादि * इदं प्रकरणं सांख्यमतमूलभूतं, तदसाधारणधर्मबोधकशब्दवत्त्वादित्यनुमानं तन्मतानुमापकं न भवति । तत्र हेतुः । * कोऽपीत्यादि * । प्रकटार्थः । एतेषु मन्त्रेषु यच्छब्दात् तयोश्च नित्यसम्बन्धान्नाडीसङ्घाताधिकरणत्वमन्तःप्रविष्टस्य सञ्चरतो भोक्तुः प्रतीयते । दृष्टान्तस्तु पिण्डमयत्वमात्रे । अन्यथा दृष्टान्तीयाशेषधर्मापत्तिः पक्षे भवन्ती अनुमानमेवोच्छेदयेत् । एवं, सर्वत इत्यत्राप्यात्मन एव महिमा । एव सर्वेषां शब्दानां स-

अपि ब्रह्मधर्मा एवेति युक्तम्। न हि ब्रह्मवादः श्रुतिव्यतिरिक्ते सिद्धोऽस्ति। येन ब्रह्मधर्माभावो निश्चेतुं शक्येत।

तस्मात् सर्वाधारत्वेन निरूप्यमाणः परमात्मैव, न प्रधानमिति ॥ ३ ॥

प्राणभृच्च ॥ ४ ॥

नन्वस्ति निर्णायकं प्राणानामोतत्ववचनम्। मनोमयः प्राणशरीरनेतेति च। अतो जीवधर्माः केचन, जडधर्माश्चापरे सर्वज्ञत्वादयोऽपि योगमभावाज्जीवधर्मा इति। तस्माज्जडजीवविशिष्टः सांख्यवाद एव युक्त इति चेत्। न। प्राणभृज्जीवो न सम्भवति। अतच्छब्दादेव। नह्यानन्दाऽमृतरूपः स भवितुमर्हति तन्मते। पृथग्योगकरणमुत्तरार्थम् ॥ ४ ॥

न्द्रिगधर्मे न तैः सांख्यमतसिद्धिरित्यर्थः। ननु मास्तु सांख्यमतसिद्धिस्तैर्मतान्तरस्यैव सिद्धिरस्त्वित्यत आहुः * न हीत्यादि *। किं तन्मतान्तरम्। ब्रह्मबोधकमन्यद्वा। यद्याद्यः पक्षस्तदा तु श्रुत्येकसिद्धत्वाद् ब्रह्मवादस्यैव सिद्धिः। यद्यन्यस्तदा त्वात्मत्वसर्वज्ञत्वानन्दरूपत्वादीनां ब्रह्मधर्मत्वाभावसाधकं हेत्वन्तरं मृग्यम्। तच्चात्र न दृश्यत इति न तस्यापि सिद्धिरित्यर्थः। सिद्धमाहुः। * तस्मादित्यादि * ॥ ३ ॥

प्राणभृच्च ॥ निषेधमुखविचारे जीवनिरसनायात्र पूर्वपक्षं दर्शयन्ति * नन्वित्यादि *। * निर्णायकमिति * सांख्यमतनिर्णायकम्। सिद्धान्तमाहुः। * नेत्यादि *। * पृथग्योगकरणमिति *। सूत्रपृथक्करणं, नशब्दयोगकरणं चोत्तरसूत्रेष्वन्वयार्थमित्यर्थः। नचानन्दाऽमृतरूपत्वमुपासनार्थमुच्यत इति वाच्यम्। विभातीयस्य विरोधात्। उपासनायां विभानामायात्। नच तत् फलबोधकमिति वाच्यम्। तन्मत आनन्दस्य प्रकृतिधर्मत्वेन फलताया वक्तुमशक्यत्वात्। ' मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्नि-

त्वाद् वेदादीनां नामत्वमुक्त्वा ततो भूयस्त्वं वागादीनां प्राणपर्यन्तानामुक्त्वा मुख्यप्राणविद्याया अवरब्रह्मविद्यात्वख्यापनायार्द्धप्रपाठकं समाप्य ततोऽपि विज्ञानादीनामन्तरङ्गाणां सुखान्तानां भूयस्त्वमुक्त्वा सुखस्य फलत्वात् तस्यैव भूयस्त्वं वदति ।

यद्यपि, तरति शोकमात्मविदिति नारदप्रश्नाद् भूम्नो ब्रह्मत्वं प्रकरणाद् वक्तुं शक्यते, तथापि तस्यैवाथात आत्मादेश इत्यहङ्कारादेशवदात्मादेशोऽप्यस्ति । तेनाब्रह्मत्वेऽपि प्रश्नसिद्धिः । तस्य सुखबाहुल्यस्य स्वे महिम्नि प्रतिष्ठितत्वं सर्वतः पू-

---

* वदतीत्यन्तम् * । * समाप्येति * अपह्नवनिवारणश्रावणेन समाप्य । तथात्र भूयस्त्वमुपक्रम्यान्ते, यत्र नान्यदित्यादिना निरवधिसुखभूयस्त्वमेवोपसंहरति । तस्माद् बाहुल्यं वाक्यार्थत्वेन वक्तुं शक्यते । मध्ये च मुख्यप्राणविद्याया अवरत्वबोधनं ब्रह्मलिङ्गम् । बृहदारण्यके व्रतमीमांसायां ब्रह्मोपासकस्य जीवस्यापि मुख्यप्राणव्रतधारणस्यैवाभिप्रेततया जीवापेक्षया प्राणस्योत्कर्षे बोधितेऽप्येष तु वा अतिवदति यः सत्येनातिवदतीत्यनेन सत्यापेक्षयां निकर्षबोधनात् । अतो ब्रह्मापि तथा वाक्यार्थत्वेन वक्तुं शक्यते । अत एवं संशय इत्यर्थः । पूर्वपक्षमाहुः । *यद्यपीत्यादि* । *तस्यैवेति भूम्न एव । अयमर्थः । यद्यप्यत्र भूयस्त्वं प्रकृतं, तथाप्यस्य वाक्यस्यात्मज्ञानार्थिनारदप्रश्नेन प्रवृत्तत्वादात्मैव प्रकरणी । स एवोपसंहारेऽपि भूमत्वेन निश्चायितोऽमृतत्वेन विशेषितश्चात उपक्रमोपसंहाररूपात् प्रकरणाद् भूम्नो ब्रह्मत्वं वक्तुं शक्यते । तथाप्युपान्ते, अथातोऽहङ्कारादेश इतिवदथात आत्मादेश इत्यादिनोक्त आत्मादेशोऽप्यस्त्यहङ्कारादेशे सर्वत्र विद्यमानत्वेन सर्वात्मना च भूमत्वेनोक्तस्याप्यहङ्कारस्य तदुपहितस्यात्मनो वा यथा न ब्रह्मत्वं तथा आत्मादेशे तथोक्तस्य केवलस्यात्मनोऽपि न ब्रह्मत्वम् । आत्मा चात्र सुखस्य स्वरूपमेव । पूर्वाधिकरणेऽनारोपितानन्तु-

णैर्विषयलाभेऽपि भवति, सुषुप्तावपीति तयोरन्यतरद् ग्राह्यम् । तत्राप्यन्तरङ्गत्वात् सुषुप्तिरेवात्र भूमत्वेनोच्यते । न सुखबाहुल्यम् । सुषुप्तिरूपमेव भूमत्वेवं प्राप्ते ।

उच्यते । भूमा भगवानेव । कुतः । सम्प्रसादादध्युपदेशात् । सम्प्रसादः सुषुप्तिः । तस्मादधि आधिक्येनोपदेशात् । यद्यपि नान्यत् पश्यतीत्यादि समानं, तथापि स एवाधस्तादि-

---

त्वस्य वस्तुस्वरूपस्यैवात्मपदवाच्यतया उपगमात् । नच शोकतरणरूपफलाभावात् प्रश्नापूर्तिः शङ्क्या । विविक्तजीवात्मज्ञानस्यैव तादृशसुखस्वरूपज्ञानस्याप्यात्मज्ञानत्वेनात्मविज्ञानामुक्तफलोपपत्त्या पूर्तिसिद्धेः । ब्रह्मण एवात्मत्वादिना ज्ञानस्य विवक्षितत्वे मानकानुपलम्भात् । नच भूम्नः स्वमहिमप्रतिष्ठितत्वश्रावणात् तस्य च ब्रह्मासाधारणत्वाद् ब्रह्मत्वं शङ्क्यम् । तस्यार्थस्याप्यभावात् । अधस्तादित्यादिना तस्य सर्वत्र व्याप्तेरुक्तत्वात् सर्वतः पूर्णविषयलाभे सुखपूर्णतयाऽनाकाङ्क्षायां तस्य पूर्णत्वानुसन्धाने स्वप्रतिष्ठितायाः सम्भवदुक्तिकत्वात् । यदि च तस्य लाभस्य प्रयाससाध्यत्वेन सुखबाहुल्यं नाङ्गीक्रियते तदा सुषुप्तिरस्तु । तत्रापि न कञ्चन कामं कामयत इति तद्यथा प्रियया स्त्रिया सम्परिष्वक्त इत्यादिश्रावणात् । अत उभयोर्मध्ये यदुचितं तदङ्गीकार्यमिति तदेवस्यार्थः । सिद्धान्तं व्याकुर्वते *उच्यत इत्यादि* । *सम्प्रसादः सुषुप्तिरिति* बृहदारण्यकेऽस्ति । स वा एष एतस्मिन् सम्प्रसादे रत्वा चरित्वेति । सम्यक् प्रसीदत्यस्मिन्निति व्युत्पत्त्या सम्प्रसादः सुषुप्तिः । तत्र यद्वैतन्न पश्यतीत्यादिनाऽन्यदर्शनाद्यभाव उच्यत इति, नान्यत् पश्यतीत्यादि सुषुप्त्या समानम् । तथापि, स एवाधस्तादित्यादिनोक्ता सर्वत्र व्याप्तिः सर्वत्वं च ततोऽधिकमुच्यते । तत्र सङ्गतं भवत्यात्मशब्दस्य मुख्यवृत्त्या च विरुध्यते । नच भावार्थप्रत्ययं प्रकृत्य, बहोर्लोपो भू च बहोरिति पाणिनीयसूत्रे व्युत्पादितो भूमशब्दो नानात्वं बाहुल्यं वा वक्ति । तत्रापि प्रकृते, यदल्पं तन्मर्त्यमिति श्रावणात् संख्यां परित्यज्य बाहुल्यमेव वदिष्यति । स च धर्म एव,

त्यादिना तु ततोऽप्यधिकधर्मा उच्यन्ते । न हि सुषुप्तेः सर्वत्वादिधर्माः सम्भवन्ति । आत्मशब्दश्च मुख्यतया परिगृहीतो भवति । भावशब्दस्यापि सर्वत्वाद् भगवति वृत्तिरदोषः । तस्माद् भूमा भगवानेव ॥ ८ ॥

न तु ब्रह्मेति शङ्कनीयम् । भगवतः सर्वत्वस्यात्र श्रावणेन सर्वत्वाद् भावशब्दस्यापि भगवति वृत्तिरदोषः । सर्वशब्दबीजभूतप्रणवार्थत्वेन तत्रैव सर्वेषां मुख्यवृत्तत्वाच्चेति । तस्माद् भूमा भगवानेवेति सिद्धमित्यर्थः ।

अत्र संशयोपन्यासे प्रथमकोटौ शङ्करभास्करमध्वाचार्याः शैवश्च प्राणमाहत्य सुषुप्तौ तस्य जागरणात् सम्प्रसादत्वं तस्याहुः ।

तद्विज्ञानेन्द्रभिक्षुणैवं दूष्यते । प्राणस्य सुखरूपताया एवासम्भवेन संशयासम्भवात् । तस्मिन् प्रकरणे प्राणादाधिक्योपदेशाभावात् सम्प्रसादशब्दस्य प्राणावाचकत्वाच्च । श्रुतौ सम्प्रसादशब्दो जीवे सुषुप्ताख्यतदवस्थायां च दृश्यते । स एष सम्प्रसादोऽस्माच्छरीरात् समुत्थायेति, स वा एष एतस्मिन् सम्प्रसादे रत्वा चरित्वेति । तत्र जीवे सम्प्रसादस्यौपाधिकतया धर्मधर्म्यभेदेनौपचारिकः । सुषुप्तावस्थायां तु प्रतिक्षणं सत्त्ववृद्ध्या सम्प्रसीदति चित्तमस्यामिति व्युत्पत्त्या यौगिकः । प्रसादप्रीत्योः पर्यायत्वात् सुख एव सम्प्रसादशब्दो मुख्यः । सत्त्वे तु प्रसादरूपिणि सकलस्मृतिषु प्रसिद्ध एव सम्प्रसादशब्द इति । प्राणे च सम्प्रसादशब्दो न क्वापि दृश्यत इति सम्प्रसादशब्दस्य प्राणार्थत्वोपवर्णनमनुचितमिति ।

अत्रापि कश्चिद् विशेषः । क्रमसंक्रमशब्दयोरिव प्रसादसम्प्रसादशब्दयोरपि नैकार्थत्वम् । अतः सम्प्रसादशब्दः सुखविशेष यौगिक एव । सत्त्वे तु स्मृतावपि न प्रसिद्ध इति तदनुपन्यासादेव ज्ञायते । सुषुप्तौ च न प्रतिक्षणं सत्त्ववृद्धिः । तस्यास्तामसावस्थात्वात् । तमोऽभिभूतः सुखरूपमेतीति श्रुतिः सत्सम्पत्तिमेव वदतीति न तयापि तथात्वसिद्धिः । जागर्यां तु ज्ञानप्रधानेन सत्त्वेनेति मम प्रतिभाति ।

रामानुजाचार्यास्तु संशये भूमगुणविशिष्टं प्रत्यञ्चं प्रथमकोटौ

धर्मोपपत्तेश्च ॥ ९ ॥

नान्यत् पश्यतीत्यादयोऽपि धर्मा ब्रह्मणि न विरुद्ध्यन्ते । स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हीति न्यायेन । यत्र हि द्वैतमिव भवतीत्यादिश्रुत्या उभयत्राम्नानात् । अन्यादर्शनादयो

निक्षिप्य प्राणसहचारित्वादन्त्योपक्रोशानुपक्रोशाभ्यां तस्य चेतनत्वं निश्चित्य प्राणशब्दवाच्यत्वं चाङ्गीकृत्य सूत्रव्याख्याने तस्यैव सम्प्रसादत्वमुक्तश्रुत्याऽऽहुः । तदुक्तमेव । सप्तमीतत्पुरुषेण सुषुप्ताविव षष्ठीतत्पुरुषेण जीवेऽपि योगस्य सत्त्वात् । सिद्धान्ते तु जीवापेक्षया प्राणोत्कर्षस्य बोधनाज्जीवस्यापि निवृत्तत्वात्सम्प्रसादत्वागमकत्वाच्चा-भावाच्च तदनुल्लेखः ।

विषयवाक्ये तु रामानुजमध्वभास्कराचार्या भिक्षुशैवौ च, यत्र नान्यत् पश्यतीत्यादेर्भूमातिरिक्तवस्तुदर्शननिषेधो नार्थः । किन्तु निरवधिसुखरूपे ब्रह्मण्यनुभूयमाने ब्रह्मस्वरूपतद्विभूत्यन्तर्गतत्वात् कृत्स्नस्य वस्तुजातस्यैश्वर्यविशिष्टब्रह्माभिन्नत्वेन न पश्यतीति । एतदेवोपपादयति वाक्यशेषः, स वा एष एवं पश्यन्नेवं मन्वान इत्यादिः । 'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् । सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वशः' इति मन्त्रश्च । इदं चास्माकमप्यभीष्टम् ॥ ८ ॥

धर्मोपपत्तेश्च ॥ ननु भवतु सम्प्रसादाद् भूम्न आधिक्योपदेशस्तथापि भूमजिज्ञासया प्रश्ने भूमलक्षणत्वेन, यत्र नान्यत् पश्यतीत्यादिवाक्यमुच्यते । तत्र योऽन्यदर्शनादिनिषेधः स तु सुषुप्तेस्साधारणः । तदितरल्लक्षणं तु नेहोच्यते । भूम्न इति भूमपर्यन्ता अन्याविशाऽस्तु । ततो भूमाधारमात्मपरमात्मनिश्चयेति शङ्कायामिदमुच्यते ॥ धर्मोपपत्तेरिति ॥ तदेतद् व्याकर्तुं गृह्णन्ति । * नान्यदित्यादि * कुतो न विरुद्ध्यन्त इत्याकाङ्क्षायां विभजन्ते * स्वाप्ययेत्यादि * । यथाऽस्मिन् सूत्रे ब्रह्मधर्माविर्भावः स्वाप्ययसम्पत्त्योर्नियतः । मय्येव सकलं जातमित्यादिवाक्यानुरोधात् । अन्यत्रानियत इति वामदेवसूत्रे व्युत्पादितम् । तेन न्यायेनान्यदर्शनाद्यभावोऽपि मैत्रेयीब्राह्मणे;

भगवति न विरुद्ध्यन्ते । चकारात् फलं तस्यैवोपपद्यत इत्याह ।

स वा एष एवं पश्यन्नित्यादिना सहस्राणि च विंशतिरित्यन्तेन । तेन भूमा ब्रह्मैवेति सिद्धम् ॥ ९ ॥

अक्षरमम्बरान्तधृतेः ॥ १० ॥

गार्गीब्राह्मणे कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति । स होवाच एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूलमन-

---

स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद् यतो यतस्त्वाददीत लवणमेवैतदित्यैक्यीभावदशायां, यद्वैतन्न पश्यति पश्यन् वै तद् द्रष्टव्यं न पश्यति, न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वान्नास्ति तु ततोऽन्यद्विभक्तं यत् पश्येदित्यविभागदशायां चेत्युभयत्राम्नानाद्दशाद्वये नियतः । यत्र नान्यत् पश्यतीति वाक्योक्तस्तु भूमविद्यायामनियतः । न पश्य इति मन्त्रे, सर्वं हि पश्यः पश्यतीति वाक्यानुरोधाद्, यस्मिन् विदिते सर्वं विदितं भवतीत्यादिवाक्यानुरोधाच्चेत्यर्थः । अत एतेऽन्यादर्शनादयो धर्मा भगवति न विरुद्ध्यन्तेऽतो लक्षणेऽतिव्याप्त्यभावाद् भूमविद्या ब्रह्मविद्या, नान्यविद्येत्यर्थः । एतदेव विशदयन्ति । * चकारादित्यादि * । * तस्यैवेति * अविभागद्रष्टुः प्रलये संज्ञाभावात् स्वेन रूपेण द्रष्टृत्वाभावादिति । इदं सर्वं तृतीयाध्याये लिङ्गभूयस्त्वाधिकरणे व्युत्पाद्यमतोऽत्र नोच्यते । फलं किमित्यत आहुः । * स वा इत्यादि * । तथाचेदमविभागदशागमकमित्यर्थः । एवञ्चानेनाधिकरणेन यद्दिग्योक्तस्याप्यानन्दमयत्वं साधितम् । तथानन्दमयाधिकरणोक्तस्यानन्दमयत्वस्य बुद्धिवृत्तिरूपसुषुप्तिधर्मत्ववारणं कृतमतः प्रसङ्ग एव सङ्गतिः । तथा येन सर्वमिदं ततमित्यपि साधितम् । सर्वस्य विस्तारस्य सुखप्रयुक्तत्वादिति । भक्त्या लभ्यस्त्वनन्ययेति तु साधनाध्याये विचार्यम् ॥ ९ ॥ २॥

अक्षरमम्बरान्तधृतेः ॥ विषयादिकमुपन्यस्यन्ति * गार्गीब्राह्मण इत्यादि * । अत्र प्रथमे ब्राह्मणं, यदिदं सर्वमप्स्वोतं च प्रोतं च

ण्वेत्यादि श्रूयते । तत्र संशयः । किमक्षरशब्देन पदार्थान्तरं, ब्रह्म वेति ।

तत्राचेतनसाधारण्याद् वर्णतुल्यत्वादाकाशवदस्याप्यब्रह्मत्वमेव । द्युभ्वाद्यायतनविरोधस्तु तुल्यः । अत एवागतार्थता अदृश्यत्वाद्यधिकरणेन । न हि तत्र विरुद्धधर्मा आशङ्क्य निराक्रियन्ते । अतोऽचेतनतुल्यत्वाद् ब्रह्मवादस्यासमाप्तत्वादाग्रहाविष्टत्वात् प्रष्टुः स्त्रीत्वाच्च, स्मरो वा व आकाशाद्भूयानितिवत् कयाचिदुपपत्त्या स्मरणकालभूतसूक्ष्मप्रकृतिजीवविशेषाणामन्यतरपरिग्रह इति वक्तव्यमुपासनार्थम् । अत्र हि प्रापञ्चिकसर्वधर्मराहित्यं ब्रह्मधर्मत्वं च प्रतीयते । तदुपासनार्थत्व उपपद्यते । ब्रह्मत्वपरिग्रहे तु वैयर्थ्यमेव । उपदेष्टृत्वाभावात् । तस्मादक्षरमन्यदेव ब्रह्मधर्मत्वेनोपास्यमित्येवं प्राप्ते ।

कस्मिन् वाऽऽप ओताश्च प्रोताश्चेत्यादिप्रश्नोत्तरैर्यथाक्रमाकाशान्तरिक्षलोकद्युलोकादित्यलोकचन्द्रलोकनक्षत्रलोकदेवलोकगन्धर्वलोकप्रजापतिलोकब्रह्मलोकपर्यन्तं पूर्वपूर्वस्योत्तरोत्तरस्मिन्नोतप्रोतत्वं निरूप्य पुनः प्रश्नान्तराभावार्थं, मा ते मूर्धा व्यपप्तदनतिप्रश्न्यां वै देवता अति पृच्छसि गार्गि मातिप्राक्षीरित्युक्तम् । तत आरुणिसंवादोत्तरं पुनरपि गार्गी प्रपच्छ । यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद् भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं चेति । तत्र आकाश इत्युत्तरे, पुनराकाशविषयके ओतप्रोतत्वप्रश्ने, एतद्वै तदक्षरं गार्गीत्याद्युत्तरम् । सोऽत्र विषयः । तत्राक्षरशब्दे संशयः । किं पदार्थान्तरं ब्रह्म वेति । अत्र पदार्थान्तरपदेन जडजीवयोर्ग्रहणम् । तत्र ओतप्रोतत्वं विकारित्वापादकतया जडलिङ्गम् । अमृताक्षरं हरः, क्षरात्मानावीशते देव एक इति श्रुत्यन्तरे अक्षरपदं जीवबोधकतया प्रसिद्धं जीवलिङ्गं, प्रशासनं च ब्रह्मलिङ्गमिति त्रिष्वपि बीजम् । पूर्वपक्षमाहुः । * तत्राचेतनेत्यादि * । ओतप्रोततया विकारित्वेनाचेतनसाधारण्यात् । अहं त्वा

उच्यते । अक्षरं परमात्मैव । कुतः । अम्बरान्तधृतेः । श्रुतौ व्याख्याय सिद्धं हेतुमाह । अत्रैक एव प्रश्न उत्तरं चैकम् ।

याज्ञवल्क्य यथा काश्यो वा वैदेहो वोग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वां द्वाभ्यां प्रश्नाभ्यामुपोदस्थामिति द्वयोः प्रश्नयोः क्लेशजनकतया प्रथमप्रश्नोत्तरभूताकाशवदस्य द्वितीयप्रश्नोत्तरभूतस्याक्षरस्याप्यब्रह्मत्वमेव । किञ्च । यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतमित्यत्र यथोतत्वं पदार्थभेदेन भारवाहकत्वमवगमयत्येवमत्र प्रोतत्वमपि, मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इवेति स्मार्तदृष्टान्ताद् भारवाहकत्वमेव गमयिष्यतीति द्युभ्वाद्यायतनत्वेन विरोधोऽपि तुल्यः * तत्रेवात्रापि समानः । किञ्च । द्युभ्वाद्यधिकरणे अक्षरस्य ब्रह्मरूपतायाः सुविचारितत्वात् किमनेनाधिकरणेन । अतः पृथग्विचारादेव विषयभेदोऽवसीयत इति न तेनास्य गतार्थता । न हि तत्र विरुद्धधर्मा आशङ्क्य निराक्रियन्ते । अत्र तु ते तथा क्रियन्त इति सिद्धो विषयभेदः । अतो विषयभेदाद्दृष्टान्ततुल्यत्वाद् ब्रह्मवादस्यारुणिसंवादेऽन्तर्यामिनिरूपणेनैव समाप्तत्वात् प्रष्टुर्गार्गीरूपस्याब्रह्मविद्त्वेन स्त्रीत्वेन च ब्रह्मविद्याश्रवणेऽनधिकारित्वादत्र, स्मरो वा आकाशाद् भूयानित्यत्र यथा आकाशं सांख्यत्वेन बृहतः स्मरणस्य तद्व्याप्त्या बृहत्त्वयोगेन भूयस्त्वं, तथा, अश्नुत इति, न क्षरतीति वा योगेन कयाचिदुपपत्त्या स्मरणाद्यन्यतमस्याचेतनस्य जीवविशेषस्य चोपासनार्थं परिग्रह इति वक्तव्यम् । यत् पुनरत्राक्षरेऽस्थूलादिवाक्यैः प्रापञ्चिकधर्मराहित्यं प्रशासनरूपब्रह्मधर्मवत्त्वं च प्रतीयते, तदुपासनार्थम् । नचात्रैतदनुरोधेन ब्रह्मैव वाक्यार्थ इति युक्तम् । प्रष्टुर्ब्रह्मश्रवणानधिकारस्योपपादितत्वेनात्र वक्तुरुपदेष्टृत्वाभावाद्वाक्यवैयर्थ्यापत्तेरिति । सिद्धान्तं व्याकुर्वन्ति * उच्यत इत्यादि * । नन्वम्बरान्तधृतेर्विषयवाक्ये अदृश्यमानतया तस्याक्षरे वक्तुमशक्यत्वात् स्वरूपासिद्धोऽयं हेतुरित्याशङ्क्याहुः । * श्रुतिमित्यादि * तथाच तात्पर्यसिद्धत्वान्न स्वरूपासिद्ध इत्यर्थः । तात्पर्यसिद्धत्वं व्याकुर्वन्ति *अत्रैक इत्यादि* । यद्यप्यत्र

आकाशस्यावान्तरत्वमेव । तेनाम्बरान्तानां पृथिव्यादीनां विधारकः परमात्मैव । द्युभ्वाद्यायतनासिद्धो धर्मोऽत्र हेतुः । न तदश्नोति कश्चनेति मुख्यतया परिगृहीतो भवति । अन्यथा मूर्ध्नो विपतनं च भवेत् । न ह्यन्यः सर्वाधारो भवितुमर्हति । परोक्षेण ब्रह्मकथनार्थमक्षरपदमन्यनिराकरणार्थं तद्धर्मोपदेशश्च । तस्मादक्षरं परमात्मैव ॥ १० ॥

द्वाभ्यां प्रश्नाभ्यामुपोदस्यामिति द्वौ प्रश्नौ प्रतीयेते, तथापि पूर्वब्राह्मणे यथा तावत्सु प्रश्नेषु कृतेष्वपि न प्रश्नपरिसमाप्तिरेवमत्राकाशप्रश्नेऽपि, ततः कस्मिन् वा आकाश ओतश्च प्रोतश्चेति प्रश्ने आकाश एवेत्युक्त्वा तमाकाशमक्षरत्वेन निगमयत्येतद्वै तदक्षरमिति । एतत् स्वकृतद्वितीयप्रश्नोत्तरभूतं यदाकाशं तदक्षरमित्येवं वचनव्यक्तेः । अत आकाशस्याप्यवान्तरत्वमेवेति पूर्वब्राह्मणे सर्वपादोक्तां पृथिवीमारभ्यात्र प्रथमं य आकाश उक्तस्तदन्तानां या धृतिर्धारणं तेन हेतुना अम्बरान्तानां पृथिव्यादीनां विशेषेण परानपेक्षतया धारकः परमात्मैव । अयमर्थः । पूर्वब्राह्मणे अव्याख्यवनन्तरमाकाशस्योक्तत्वेऽप्यत्र पुनर्यदाकाशकथनं, तन्न भूताकाशपरम् । किन्तु भूतसूक्ष्मकालप्रकृत्यन्यतमं यद् वस्तु तत्परम् । तच्च मतान्तरे पदार्थान्तरम् । सिद्धान्ते तु प्रथमं कार्यं तत् । ततोऽधिको धारको न जीवविशेषोऽपि भवति । उक्ताकाशोतप्रोतत्वस्य जीवे क्वाप्यसिद्धत्वात् । एवं जडजीवयोर्निवृत्तौ तद् ब्रह्मकार्यत्वेनैव निश्चीयते । पुनर्विचारस्तु विरुद्धधर्माधारत्वसमर्थनायेति प्रागेवोक्तम् । पदार्थभेदस्तु प्रोतत्वमात्रेणैव, न त्वोतप्रोतत्वेन । तस्योपादानकारणतागमकत्वात् । 'नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे । ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः' इति श्रीभागवतवाक्येन तथा निश्चयात् । नातो भारवाहकत्वापत्तिः । अत्र, न तदश्नोतीत्यस्य विकरणव्यत्ययेन भोजनार्थग्रहणेऽन्यकर्तृकतन्निषेधः पुरुषभोग्यां प्रकृतिं व्यावर्तयति । अन्यकर्मकतन्निषेधश्च सर्वभक्षयितारं कालम् । पदव्यत्ययेन व्याप्त्यर्थग्रहणे तु द्वावपि निषेधौ व्यापकत्वं तदभावं च बोधयन्तौ विरुद्धधर्माश्रयत्वं वस्तुपरिच्छेदराहित्यं च तस्य स-

मर्थयतः । अतो, न तदश्नोतीत्यादिना ब्रह्मापेक्षयाधिकस्य ब्रह्मापेक्ष्यान्यस्य च निराकरणेन, द्युभ्वाद्यायतनाधिकरणे सिद्धस्य तत्स्वरूपात्मकतया तद्धारकत्वस्य हेतोर्मुख्यतया मूर्द्धविपाताभावाय परिगृहीतत्वात् । नच श्रोतृदोषादवक्तव्यत्वम् । तस्यास्तथात्वेऽपि ब्रह्मवित्त्वेनाधिकारित्वात् । पूर्वमतिप्रश्ने ब्रह्मसत्त्वाभावसम्भावनया मूर्द्धविपातस्योक्तत्वेन गार्ग्या अब्रह्मवित्त्वे उक्तप्रश्नान्मूर्द्धविपतनं च भवेत् । तत्तु न जातमतस्तस्या अधिकारित्वेन तां प्रत्युपदेशो नायुक्त इति सर्वाधारत्वेनात्र ब्रह्मैवोपदिश्यते । न ह्यन्यो निरङ्कुशः सर्वाधारो भवितुमर्हतीत्युक्तत्वात् । नन्वेवं सति ब्रह्मपदस्य कुतो नोक्तिरिति शङ्क्यम् । परोक्षेण कथनार्थमक्षरपदात् । तत्रापि गमकं, न तदश्नोति कश्चनेत्यादिना ब्रह्मधर्मोपदेशः । अत एव ब्रह्मवादस्यापि न समाप्तिः । तस्माद् बाधकानामभावात् साधकानां सत्त्वाच्चाक्षरं परमात्मैवेत्यर्थः ।

अत्र शङ्कराचार्यास्तु, अक्षरशब्दस्य वर्णे प्रसिद्धत्वादत्रोङ्कार एव व्यावर्त्य इत्याहुः ।

तद्भास्कराचार्यैरेवं दूषितम् । ॐकारोऽत्र न वक्तुं शक्यः । अलोहितमच्छायमित्येवमादिनिषेधानुपपत्तेरिति ।

भिक्षुणा तु द्रव्यधर्माणां स्थूलत्वादीनां प्रणवे प्रसक्त्यभावेन तन्निषेधानौचित्याद् वर्णसामान्यवाचिनोऽक्षरशब्दस्य प्रणवरूपवर्णविशेषवाचितायां ॐमित्यादिविशेषणानां क्वाप्यदर्शनाच्चेत्यप्युक्तम् ।

यत्तु वाचस्पतिमिश्राः । अत्र प्रधानस्य पूर्वपक्षकोटिनिक्षेपेण परमात्मनः सिद्धान्तीकरणे अम्बरान्तधृतिरूपेण हेतुना प्रधाननिराकरणासम्भवः । तस्यापि सांख्यैरुपादानत्वेन सर्वाधारत्वाङ्गीकारात् । अत्र नाधिकरणत्वमात्रं धृतिः, किन्तु प्रशासनाधिकरणता तदा, अक्षरं प्रशासनादिति सूत्रकारो वदेत् । तावतैव प्रधानाऽपाकरणसिद्धेः । तस्माद् वर्णाक्षरनिराक्रिया सूत्रार्थः । नच स्थूलत्वादीनां वर्णेष्वप्राप्तेरस्थूलमित्यादिनिषेधानुपपत्तिरिति शङ्क्यम् । निषेधे प्राप्तिपूर्वकत्वनियमस्याभावात् । नान्तरिक्षे न दिवीत्यग्निचयननिषेधस्याप्राप्तावपि दर्शनात् । अतो न किञ्चिदेतदित्याहुः ।

तन्मन्दम् ।

सा च प्रशासनात् ॥ ११ ॥

ननु कचिद्वाक्ये विधारणं ब्रह्मधर्मत्वेनाश्रितमित्यन्यत्रापि न तथाश्रयितुं शक्यते । नियामकाभावादित्यत आह । सा च विधृतिरत्रापि वाक्ये ब्रह्मधर्म एव । कुतः । प्रशासनात् । एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत इति प्रशासनेन विधारणमन्यधर्मो भवितुं नार्हति । अप्रतिहताज्ञाशक्तेर्भगवद्धर्मत्वात् । तस्मादक्षरं ब्रह्मैव ॥ ११ ॥

ङ्गतत्वात् । चयनस्थलेऽपि देवप्रभृतीनां कर्माधिकारस्याग्रे स्थाप्यत्वात् तेषां लोकान्तरेऽपि करणसामर्थ्यसत्त्वेन तद्धारणार्थत्वात् सिद्धान्तोक्तरीत्या सुखेन प्रधानवारणसम्भवेन गत्यन्तरस्य सत्त्वादिति । अतो वृथाऽयं प्रयास इति ध्येयम् । अत्रैवं प्रयोगः सिद्ध्यति । अस्थूलादिवाक्योक्तमक्षरं परमात्मैव । इतराभोग्यस्य इतराभोक्तृत्वे च सत्यम्बरान्तधारकत्वात् । यन्नैवं तन्नैवमिति । अब्लोतेर्व्योम्स्वधर्मत्वे तु विरुद्धधर्माधारत्वे सति तथात्वादिति ॥ १० ॥

सा च प्रशासनात् ॥ सूत्रमवतारयन्ति * नन्वित्यादि * । * कचिद्वाक्ये इति * यस्मिन् द्यौरिति वाक्ये । व्याकुर्वन्ति * सा चेत्यादि * श्रुतिव्यतिरिक्तशास्त्रसिद्धं यन्मूलकारणं तदत्र विषयवाक्य आकाशत्वेनोक्तम् । तद्धारणस्यान्यधर्मत्वं न सम्भवत्येव । तथापि, मूले मूलाभावादमूलं मूलमिति सांख्यप्रवचनसूत्रोक्तन्यायेन द्वितीयवाक्योक्ताकाशमपि पूर्ववाक्योक्ताकाशत्वेनादृत्य, तस्यैवाक्षरत्वं चादृत्य तस्य स्वाधारत्वेनाम्बरान्तधृतेरन्यधर्मत्वं ग्रहिलतया यदुच्यते, सा त्वयाऽन्यधर्मत्वेनाभ्युपगम्यमानापि विधृतिर्ब्रह्मधर्म एव । न हि तत् स्वसामर्थ्येन विधपति, किन्त्वेतस्यैवेति श्रुत्युक्तशासनसामर्थ्येन । यथा स्वर्गात् पततस्त्रिशङ्कोर्विधृतिस्तिष्ठेति विश्वामित्राज्ञया जायमाना तद्धर्म एव, न तु त्रिशङ्कुधर्मस्तद्वत् । नचं 'अक्षरं प्रशासनात्' इति सूत्रापत्तिः । ग्रहिलतयाऽन्यधर्मत्वेनापाद्यमानाया एव तद्धृतेः प्रशासनहेतुकताया ग्रहिलतावारणार्थं विवक्षितत्वेनाम्बरान्तधृतिपदस्यावश्यकतया तदपरयमावादित्यर्थः ॥११॥

अन्यभावव्यावृत्तेश्च ॥ १२ ॥

ननूक्तमुपासनापरं भविष्यतीति । तत्राह । अन्यभावव्यावृत्तेः । अन्यस्य भावोऽन्यभावः । अब्रह्मधर्म इति यावत् । तस्यात्र व्यावृत्तेः । अब्रह्मत्वे हि ब्रह्मत्वेनोपासना भवति । कार्यकारणभावभेदेन । न ह्यत्र तादृशो धर्मोऽस्ति ।

चकाराद्, यो वा एतदक्षरमविदित्वा गार्गीत्यादिना शुद्धब्रह्मप्रतिपादनमेव, नोपासनाप्रतिपादनमिति । तस्मादक्षरं ब्रह्मैवेति सिद्धम् ॥ १२ ॥

अन्यभावव्यावृत्तेश्च ॥ सूत्रमवतारयन्ति * नन्वित्यादि * प्रशासनहेतुकत्वं विधरणे उपासनार्थमारोपितं भविष्यतीत्यर्थः । सिद्धान्तं व्याकुर्वते *अन्यस्येत्यादि* कार्यकारणभावभेदेनेत्यस्य अब्रह्मत्वे हीत्यनेनान्वयः । ततश्चायमर्थः । एतद्वै तदक्षरं गार्गि अदृष्टं द्रष्टृ श्रुतं श्रोतृ अमतं मन्तृ अविज्ञातं विज्ञातृ नान्यदस्ति द्रष्टृ नान्यदस्ति श्रोतृ, नान्यदस्ति मन्तृ नान्यदस्ति विज्ञात्रेतस्मिन्नु खल्वक्षरे गार्गि यस्मिन्नाकाश ओतश्च प्रोतश्चेत्याकाशधर्तर्यक्षरे द्रष्टृत्वादिचेतनधर्मकथनेन धरणे जडधर्मत्वव्यावृत्तेर्धरणस्य चाकाशोतप्रोतत्वरूपस्वरूपबोधनेन जीवधर्मत्वव्यावृत्तेरक्षरस्याब्रह्मत्वनिवृत्तावब्रह्मणि ब्रह्मत्वेनोपासनाया वक्तुमशक्यत्वादिति । युक्त्यन्तरमाहुः । * चकारादित्यादि * यो वा एतदक्षरमविदित्वा गार्गि अस्मिँल्लोके जुहोति ददाति तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति । यो वा एतदक्षरमविदित्वा गार्ग्यस्माल्लोकात् प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात् प्रैति स ब्राह्मण इति श्रावणं चकारेण संगृह्यत इत्यर्थः । अत्र च विरुद्धधर्माणामाशङ्का निराकरणादुपोद्घातः सङ्गतिः । आशङ्का निराकरणं च द्वितीयसूत्रे हेतोः साधनाज्ज्ञेयम् । एतेनाधिकरणेन परत्वं साधितम् । तेन स्थितिकर्तृत्वं, तदाधारत्वं च पदार्थान्तरभूते प्रधाने आशङ्क्य तत्रातिव्याप्तिर्निवारितेति सैवाधिकरणसङ्गतिः ॥ १२ ॥ ॥ ३ ॥

ईक्षतिकर्मव्यपदेशात् सः ॥ १३ ॥

पञ्चमप्रश्ने, एतद्वै सत्यकाम परञ्चापरं च ब्रह्म यदोङ्कारस्तस्माद् विद्वानेतेनैकतरमन्वेति यद्येकमात्र इत्यादिना एकद्वित्रिमात्रोपासनया ऋग्यजुःसामभिर्मनुष्यलोकसोमलोकसूर्यलोकप्राप्तिपुनरागमने निरूप्यार्धचतुर्थमात्रोपासनया परं पुरुषमभिध्यायीत। स तेजसि परे सम्पन्नो यथा पादोदरस्त्वचेत्यादिना, परात् परं पुरिशयं पुरुषमीक्षत इति। तत्र संशयः। परपुरुषः परमात्मा ध्यानविषय, आहोस्विद् विराट् पुरुषो, ब्रह्मा वेति। तत्रामुख्यप्रवाहपतितत्वाद् ब्रह्मलोकं गतस्य तदीक्षणमेव च फलं श्रूयते। न हि परमपुरुषस्य ब्रह्मत्वे तज्ज्ञानमेव फलं भवति। तस्माद् विराड् ब्रह्मा वा अभिध्यानविषय इत्येवं प्राप्ते।

ईक्षतिकर्मव्यपदेशात् सः ॥ विषयवाक्यमुपन्यस्यन्ति। * पञ्चमप्रश्न इत्यादि *। * पञ्चमप्रश्न इति * आथर्वणानां प्रश्नोपनिषदः पञ्चमे प्रश्ने। * ईक्षत इति * पश्यतीति शेषस्तुरीयो। संशयस्तु ध्येयविषय इत्याहुः * तत्रेत्यादि *। परापरयोरुभयोरपि ब्रह्मत्वं सन्देहबीजम्। पूर्वपक्षमाहुः * तत्रामुख्येत्यादि *। अत्रोङ्कारेणोपायेन ब्रह्मोपासनार्थमोङ्कारस्य द्विविधब्रह्मरूपतामुक्त्वा तेनैवायनेनैकतरमन्वेतीत्येकतरप्राप्तिं प्रतिज्ञाय साधनैक्ये कथं फलभेद इत्याकाङ्क्षायां भावनाप्रकारभेदस्य तत्र नियामकत्वं बोधयितुमेकद्वित्रिमात्रोपासनया तत्तल्लोकप्राप्तिपुनरागमने निरूप्यार्द्धचतुर्थमात्रोपासनया परे तेजसि सम्पत्तिं पापनिर्मोकं ब्रह्मलोकप्राप्तिं चोक्त्वाऽन्ते परपुरुषेक्षणं फलत्वेन वदति। तत्र परपुरुषध्यानस्य त्रिमात्रेणाप्युक्तत्वादर्द्धचतुर्थमात्रेण परपुरुषध्यानस्यापि तत्तुल्यकक्षत्वेनामुख्यप्रवाहपतितत्वात् तत्प्राप्यब्रह्मलोकस्याप्यमुख्यत्वात् तं लोकं गतस्य यत् परपुरुषेक्षणं तत् पूर्वापेक्षया परात् परस्यैवेक्षणं फलं श्रूयते। न तु सर्वतः परस्य। न हि तत्रोक्तस्य परम-

उच्यते । सः, अभिध्यानविषयः परपुरुषः परमात्मैव । कुतः । ईक्षतिकर्मव्यपदेशात् । जीवघनात् केवलजीवाधारभूताद् ब्रह्मलोकात् पररूपपुरुषदर्शनमीक्षतिः । तस्याः कर्मत्वेन व्यपदेशादुभयोः कर्मणोरेकत्वमपरं त्रिमात्रपर्यन्तं निरूप्य परं ह्यग्रे निरूपयति । तत्रैव च श्लोके तिस्रो मात्रा इत्यादि ।

अभिध्यानस्य हि साक्षात्कारः फलम् । अतः फलरूपज्ञानस्य

पुरुषस्य ब्रह्मत्वे तज्ज्ञानमेव फलं भवतीति वक्तुं शक्यते । ब्रह्मविदाप्नोति परमित्यादिश्रुत्यन्तरे तत्प्राप्तेः फलत्वेनोक्तत्वात्, सोऽश्नुत इत्यादिना विवरणाच्च । अतस्तस्मात् फलरूपात् तात्पर्यलिङ्गात् परमात्मनो वक्तुमशक्यत्वेन विराड् वा, तदभिमानी ब्रह्मा वा ध्यानविषयः । नच जीवघनादिति परविशेषणमन्वयः । अत्र लयश्लोपपत्त्या पूर्वेभ्यः परं जीवघनं प्राप्य पुरिशयमित्यन्वयेन परविशेषणत्वाभावादिति प्राप्त इत्यर्थः । सिद्धान्तं व्याकुर्वते । * उच्यत इत्यादि * । * जीवघनादित्यादि * । जीवानां केवलानां मुक्तानां घनः पिण्डीभावो यत्र तादृशात् केवलजीवाधारभूताद् ब्रह्मलोकादक्षरात् । * उभयोः कर्मणोरेकत्वमिति * ध्यानेक्षणकर्मणोरेकविषयत्वम् । तद्विवृण्वन्ति * अपरमित्यादि * तथाच पूर्वं द्वे ब्रह्मणी उक्त्वा, ओंकारेणैकतरमन्वेतीत्यादिना अपरं ब्रह्म त्रिमात्रपर्यन्तं निरूप्य, परं ब्रह्म ह्यग्रे निरूपयति । यदि तत्र निरूपयेत् प्रतिज्ञा न पूर्येत । तत्रैव चाग्रिमे श्लोके तिस्रो मात्रा इत्यादिना मात्रात्रयस्य मृत्युमत्त्वादिकमुक्त्वा ऋग्भिरेतमिति द्वितीयमन्त्रे, सामभिर्यत् तत् कवयो वेदयन्त इति त्रयीमय तृतीयमात्राफलं निरूप्योत्तरार्द्धे तमोङ्कारेणेत्यादिना यत्तच्छान्तमजरममृतमभयं परं परायणं चेति फलान्तरं न वदेत् । नच जीवघनादित्यादौ ल्यब्लोपे पञ्चम्यपि । तथा सति प्राप्तौ आतायामीक्षणस्यार्थादेव सिद्ध्या वाक्यवैयर्थ्यमित्याशयेन युक्त्यन्तरमाहुः । * अभिध्यानस्येत्यादि * नन्वस्मिन् पादे आधाररूपस्वरूपस्य निरूप्यत्वादत्र च तस्या अ-

विषयत्वात् परपुरुषः परमात्मैव । मन्दशङ्कानिवृत्त्यर्थमेवेदं सूत्रम् । अत्र सर्वसङ्करवादिनामन्यथा पाठो भ्रमात् । तत्रापि विचारस्तुल्यः ॥ १३ ॥

दर्शनादेतत्सूत्रप्रणयनस्य किं प्रयोजनमत आहुः । * मन्देत्यादि * परं ब्रह्म न दृश्यमिति मन्दशङ्कानिवृत्त्यर्थमित्यर्थः । एतेन प्रसङ्गः सङ्गतिरित्यपि बोधितम् । तेन बुद्धिस्थानात्मिकाऽधिकरणसङ्गतिरपि बोधिता । आधारत्वं तु परायणपदादेव प्राप्यत इति न दोषः । ननु शङ्कराचार्यैर्यः पुनरेतत्त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नः स सामभिरुन्नीयते ब्रह्मलोकमिति पाठोऽङ्गीक्रियते । न तु, सामभिरुन्नीयते सूर्यलोकं स सूर्यलोके विभूतिमनुभूय पुनरावर्तते यः पुनरर्द्धचतुर्थमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत स तेजसि परे सम्पन्न इति सोऽप्यर्धभिरुन्नीयते ब्रह्मलोकमिति पाठोऽतोऽस्याधिकत्वाच्च पूर्वोक्तरीतिकोऽर्थ इत्याशङ्कायामाहुः । * अत्र सर्वसङ्करेत्यादि * इदानीन्तनपुस्तकेष्विदानीन्तनेष्वध्येतृष्वप्येतस्याधिकपाठस्य दर्शनात् तिसृणामपि मात्राणां मृत्युमत्त्वेन तौल्यात् साधनवैजात्याभावे फलवैजात्यस्यानुपपन्नत्वान्माण्डूक्यादौ तुरीयोपासनार्थमर्द्धमात्रोक्तिदर्शनाच्च तेषां तथा पाठो भ्रमादेव । नच निचारवैसादृश्यम् । तत्रापि पाठे विचारस्तुल्य इति न दोष इत्यर्थः । एवं भास्कराचार्याङ्गीकृतपाठेऽपि द्रष्टव्यम् ।

अत्र माध्वाः, सदेव सौम्येति छान्दोग्यवाक्यं विषयत्वेनोपन्यस्य कारणतया सच्छब्देनोच्यमानं किं प्रधानमुत विष्णुरिति सन्देहे, बहु स्यां प्रजायेयेति सतो बहुभावाख्यविकारश्रवणाद्, विष्णोस्तु, अविकारः सदा शुद्धो नित्य आत्मा सदा हरिरितिवाक्येनाऽविकारित्वबोधनात् प्रधानमेवेति प्राप्तौ, तदैक्षत बहु स्यामितीक्षणरूपं यत् कर्म चेतनकर्तृकेक्षणक्रिया तद्व्यपदेशात् सत्पदवाच्यः स विष्णुरेव । नच बहुभावोक्तिविरोधः । अजायमानो बहुधा विजायत इति श्रुत्यन्तरोक्तस्वरूपबहुत्वेनैव तदुपपत्तेरिति व्याचक्रुः ।

तच्चिन्त्यम् । ईक्षतिमात्रप्रयोगेऽपि क्रियात्ववैशिष्ट्यबोधसुकरतया कर्मपदवैयर्थ्यप्रसङ्गात् । किञ्चात्रेक्षणक्रियायां कर्मत्वेनान्वीय-

मानस्य बहुभवनस्य स्वरूपबहुत्वादेव चारितार्थ्ये, प्रजायेयेत्याकान्तरोल्लेखस्यापि वैयर्थ्यप्रसङ्ग इत्यपि ध्येयम् ।

विज्ञानेन्द्रभिक्षुस्तु शङ्कराचार्योक्तं विषयवाक्यपाठं तद्रीत्याऽधिकरणरचनां चोपन्यस्य तत्रोदाहृतवाक्यस्थां त्रिमात्रप्रणवेनोक्तामुपासनामुत्तरस्मिन् प्रश्ने, तिस्रो मात्रा मृत्युमत्यः प्रयुक्ता इत्यनेन विनिन्द्य तुरीयाख्यस्यामात्रस्य परब्रह्मण उपासनां तत्रैव प्रश्ने वक्ष्यति, नातः परमस्तीति प्रशंसापूर्वकम् । अतोऽवधार्यते, पञ्चमे प्रश्ने परब्रह्मोपासनां न विदधातीति । किञ्च । यदभिध्यायति तत् साक्षात्करोतीति सामान्यत एव प्राप्ततया तद्वचनं व्यर्थमतः पञ्चमप्रश्ने कार्यब्रह्मोपासनायाः परब्रह्मदर्शनं फलमुक्तमित्येवं तद्बोधरूपं दूषणमुक्त्वा षष्ठप्रश्नस्थस्य स इतिशब्दस्य सूत्रे प्रत्यभिज्ञायमानत्वात् तत्रत्यम्, इहैवान्तः शरीरे स पुरुषो यस्मिन्नेताः षोडशकला: प्रभवन्तीति वाक्यं विषयत्वेनोदाजहार । स जीवः, परमात्मा वेति संशये, सः, सशब्देनोक्तः पुरुषः परमात्मैव । कुतः । ईक्षतिकर्मव्यपदेशात् । स ईक्षाञ्चक्र इति वाक्यशेषे सशब्देन परामृष्टस्य यथोक्तपुरुषस्य ईक्षणरूपकर्मकथनाद् गौणकर्मणां प्राणादीनां वा कथनात् । नहीदं प्राणादिषोडशकलासृष्ट्यर्थमीक्षणं जीवस्य सम्भवति । ईक्षायाः करणादीनां तदानीमभावादित्येवं सौत्रं हेतुं द्विधा व्याचख्यौ ।

अत्रापि पूर्वव्याख्याने सूत्रस्थकर्मपदवैयर्थ्यमेव दोषः । द्वितीये तु कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति आचितस्य मुख्यस्येक्षतिकर्मणस्त्यागः स्वयमेव बोधित इति स एव दोषः । तिस्रो मात्रा इति निन्दावाक्यं च पञ्चमप्रश्नस्थमेव, न तु षाष्ठमित्यपि ।

शैवस्तु शङ्कराचार्योक्तमेव विषयवाक्यमुपन्यस्य, परमेश्वरोऽन्यो वेति संशये, ईक्षतिविषयः परमेश्वर एव । उत्तरत्र, तमोङ्कारेणायतनेनान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परं परायणं चेति तदसाधारणशान्तत्वादिधर्मव्यपदेशादिति व्याचख्यौ ।

तदप्यसङ्गतम् । हेतोरसौत्रत्वात् । तद्धर्माधिकरणेनैव गतार्थतयाऽधिकरणवैयर्थ्यापाताच्च । सूत्रे हेतुशरीरे प्रविष्टस्येक्षतिकर्मण ईक्षतिविषयत्वेन पक्षतयाङ्गीकाराच्च । विशेषतस्तु प्रश्नस्त

दहर उत्तरेभ्यः ॥ १४ ॥

अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वा व विजिज्ञासितव्यमित्यादि श्रूयते । तत्र संशयः । किं जीवोऽन्वेष्टव्यो ब्रह्म वेति ।

एव वृत्तोत्तर इत्युपरम्यते ॥ १३ ॥ ॥ ४ ॥

दहर उत्तरेभ्यः ॥ विषयवाक्यमाहुः । * अथ यदिदमित्यादि * । * श्रूयत इति * छान्दोग्ये दशमप्रपाठकारम्भे श्रूयते । संशयमाहुः । * तत्रेत्यादि * । अत्र हि ब्रह्मपुरे शरीरे दहरपुण्डरीकं हृदयकमलं वेश्म । तस्यान्तर्दहराख्य आकाशः । तदन्तर्यद्वर्तते तदन्वेष्टव्यत्वेनोपदिष्टम् । तत आकाशान्तः किं विद्यत इति प्रश्ने, यावान् वेत्यादिना हार्दाकाशस्य व्यापकत्वकथनपूर्वकं, तस्मिन् द्यावापृथिव्यादिसर्वसमाधानं प्रत्युत्तरयति । तेषां च स्वेन रूपेण प्रत्यक्षादिसिद्धतया नान्वेष्टव्यत्वं सिद्ध्यतीति केन रूपेणान्वेष्टव्यता, कस्यचिदन्यस्य वेति । किञ्च । पुरप्रध्वंसे किमिति शिष्यत इति प्रश्नान्तरे, नास्य जरयैतदित्यादिना ब्रह्मपुरस्य नित्यतामुक्त्वा तस्मिन् कामानां समाधानं चोक्त्वा, एष आत्मेत्यादिना अपहतपाप्मत्वादिगुणकमात्मानं प्रत्युत्तरयति । तेन शरीररूपादनित्याद् ब्रह्मपुरादन्यः सत्यब्रह्मपुररूपः पूर्वोक्तद्यावापृथिव्यादिरूपसर्वकामाधार एष आत्मेत्यादिनोक्त आत्मा सत्यब्रह्मपुरत्वेन सिद्ध्यति । यदि च कामवदात्मनोऽप्याधेयत्वमुच्यते, तदा पुराकाङ्क्षा न पूर्यते । अत आत्मन एवातिशिष्टब्रह्मपुरत्वमिति निश्चयः । एवं सति, ब्रह्मपुरमित्यत्र यदि षष्ठीसमासस्तदाऽस्यात्मनो जीवत्वम् । यस्यात्मा शरीरमिति श्रुत्यन्तरात् । यदि समानाधिकरणसमासस्तदा आत्मा ब्रह्मैव । अतोऽनित्यपुरनाशेऽतिशिष्टो यो नित्यो दहराकाशरूप आत्मा, स जीवो वा, ब्रह्म वेत्येव संशयाकारः पर्यवस्यति । न तु भूताकाशकोटेस्तत्र निवेशः । उक्तरूपत्वस्य तत्राभावादिति । अत्र दहरान्तर्वर्तिन उत्तरप्रकरणे चात्मनोऽन्वेष्टव्यत्वं भाव्यते । ततश्चान्वेष्टव्यः क इत्यपि संशयः । तदेतदुक्तम्, * किं जीवोऽन्वेष्टव्यो, ब्रह्म वेति । ननु तद्वि-

जीवब्रह्मवादो निर्णीयते । श्रुत्यर्थो हि निर्णेतव्यः । तद् यदस्मिन् वाक्ये परमार्थतो जीव एव ब्रह्म चेच्छास्त्रं च तत्रैव समाप्तं चेद् व्यर्थमधिकरणारम्भः । इदमेव च वाक्यं, श्रुत्या वक्तव्यं च भवेत् । तस्मादस्मिन्नधिकरणे मुख्या सर्वसङ्करवादादिनिराकृतिः । किं तावत् प्राप्तम् । दहर आकाशो जीव इति । अवान्तरप्रकरणद्वयम् । तत्र द्वितीये प्रजापतिप्रकरणे जीव एवाऽमृताऽभयरूपः प्रतिभाति । स्पष्टार्थं च द्वितीयप्रकरणम् । तस्मात्

ज्ञाधिकरणे आकाशशब्दोदितस्य सर्वाधारत्वप्रश्नतयोर्विचारितत्वात्, किमनेनाधिकरणेनेति शङ्कायां तत्प्रणयनप्रयोजनमाहुः । * जीवेत्यादि * उपाधिभेदाद् भेदेऽपि वस्तुतश्चैतन्यमात्रत्वाज्जीवाभिन्नमेव ब्रह्मेति वादो जीवब्रह्मवादः । स सम्भवति, न वेति निर्णीयते । तथाचैतन्निर्णयस्य पूर्वमकृतत्वात् तदर्थमेतत्प्रणयनमित्यर्थः । ननु किं तन्निर्णयेनेत्यत आहुः । * श्रुत्यर्थ इत्यादि * । हि यतो हेतोः सन्देहनिरासायैव प्रवृत्तत्वाच्छ्रुत्यर्थो निर्णेतव्यः । तथाच तन्निर्णयायैतन्निर्णय इत्यर्थः । एतेन शुद्धिस्थस्य विचारादुपोद्घातगर्भः प्रसङ्गः सङ्गतिरिति बोधितम् । नन्वस्याधिकरणस्यैतदेव प्रयोजनमित्यत्र किं गमकमत आहुः । * तदित्यादि * । * समाप्तमिति * पर्यवसितम् । * व्यर्थमिति * सामान्ये न पुंसकम् । तथाच यदि तथा स्यात् तदोपाधिभेदस्येतरत्वाप्रयोजकत्वादाकाशतुल्यतासम्भवाद्, इतरपरामर्शसूत्रव्याहत्याऽधिकरणारम्भो व्यर्थ एव स्यात् । एतस्यैव वाक्यस्य श्रुतिवाच्यत्वापातेन, नेति निषेधोऽपि न सम्भवेत् । तस्मादस्मिन्नधिकरणे जीवब्रह्मैक्यकृतसर्वसङ्करवादस्य मायावादस्य च निराकृतिरेव मुख्या । अतोऽधिकरणसार्थक्यानुपपत्तिरेव प्रणयनप्रयोजनगमिकेत्यर्थः । एवं संशयाकारादिकं निश्चित्य पूर्वपक्षमाहुः । * किं तावदित्यादि * । * उपपादयति * अत्रेत्यादि * अत्र दहरबोधके महावाक्येऽवान्तरप्रकरणद्वयम् । एकं दहरविद्यारूपं, द्वितीयमिन्द्रप्रजापतिसंवादरूपम् । उभयत्राप्यपहतपाप्मत्वा-

प्रथमेऽपि जीव एव तादृशधर्मवान् भवितुमर्हति । अर्थानुगुण्यमपि व्याख्येयम् । अयमेव जीवो ब्रह्म । अयमात्मा ब्रह्मेति श्रुतेः । मैत्रेयीब्राह्मणं चानुगुणं भविष्यति । तस्य पुरं शरीरम् । तत्र हृदयकमलं सूक्ष्मम् । तत्राराग्रमात्रो जीव एवाकाशः । तात्स्थ्यात् तद्व्यपदेश इति । अन्वेष्टव्यस्तु तस्मिन् विद्यमानस्तन्महिमा । वासनारूपेण सर्वं तत्र वर्तत इति ।

द्विगुणश्च आत्मैव प्रतिपाद्यः । तत्र द्वितीये प्रजापतिप्रकरणे चतुर्भिः पर्यायैर्जाग्रत्स्वप्नसुषुप्तमुक्तावस्थभेदेन जीवस्यैव प्रतिपादनाज्जीव एवाऽमृताऽभयरूपः श्रावितः प्रतिभाति । तच्च प्रकरणं स्पष्टार्थम् । य एषोऽक्षिणि पुरुषो दृश्यत इति दृष्टारमुपक्रम्य, एतं त्वेव ते भूयोऽनुव्याख्यास्यामीति प्रतिपर्यायं प्रतिज्ञादर्शनात् । एवमसन्दिग्धस्य तस्य पूर्वप्रकरणव्याख्यारूपताया औचित्यात् । अतस्तदनुरोधेन प्रथमेऽपि जीव एवाऽपहतपाप्मत्वादिधर्मवान् भवितुमर्हति । किञ्च । यदि कश्चिदर्थः पीड्यते, तदा प्रकरणान्तरं भिन्नं कल्प्येत । अतस्तदभावायार्थानुगुण्यमपि व्याख्येयम् । तच्चैवम् । अत्र हृदयाकाशं प्रक्रम्य, तस्य ब्रह्मपुरत्वं चोक्त्वा, तत्र, एष आत्मा अपहतपाप्मेत्यङ्गुल्येव निर्दिश्यते । तेनायमेव जीवो ब्रह्मेति सिद्ध्यति । अयमात्मा ब्रह्म विज्ञानमय इति श्रुतेश्च । एवञ्च मैत्रेयीब्राह्मणमप्यनुगुणं भविष्यति । तत्रापि, न वा अरे पुत्राणां कामायेत्याद्युक्तानां जीवलिङ्गानां बाहुल्येन तस्यापि जीवपरत्वात् । नचैतन्मात्रमेवार्थानुगुण्यं, किन्त्वन्यदपि । तदेव भाष्ये * तस्य पुरं शरीरमित्यादिना व्याख्यातम् । * सूक्ष्ममिति * हार्दाकाशरूपम् । तस्यान्ते सुषिरं सूक्ष्ममिति श्रुत्यन्तरात् । मैत्रेयीब्राह्मणादत्रैतावान् विशेषः । तत्र श्रोतव्यत्वादिकं जीवस्योच्यते । आत्मावारे श्रोतव्य इति श्रावणात् । अत्र तु तस्मिन् यदन्तस्तदन्वेष्टव्यमित्याकाशान्तर्वर्तिनोऽन्वेष्टव्यत्वमुच्यत इति । तथा सत्यत्र तन्महिम्नोऽन्वेष्टव्यत्वम् । तदाह * अन्वेष्टव्य इत्यादि * । महिम्नः स्वरूपमाह * वासनेत्यादि * । तथाच वासनारूपेण तत्र विद्यमानमत्रोक्तं सर्वमेव तन्महिमेत्य-

अन्यथोभयव सर्वकथनं विरुद्धमापद्येत । भूतानि महाभूतानि । पुत्रादयो वा । तं चेद् ब्रूयुरित्यादिना नियततामुपपाद्य एष आत्मेत्यादिना तस्यैव ब्रह्मत्वमुपदिशति । तज्ज्ञानं च प्रशंसति ।

र्थः । इदमेव तापनीयेऽप्युक्तं, सर्वं सर्वमयं सर्वे जीवाः सर्वमयास्तथाप्यल्पा इति । नन्वत्रेदृश एव महिमोच्यत इति कथं ज्ञेयमत आह * अन्यथेत्यादि * यदि जीवमहिम्नो वासनारूपत्वं नोपगम्येत, तदा, यावानित्यादिनाऽन्तर्बहिश्च सर्वनिरूपणं प्रत्यक्षविरुद्धमापद्येत । नच वासनारूपस्य सर्वस्याङ्गीकारे यथा कथञ्चिद् द्यावापृथिव्यादिवासनासम्भवेऽपि, सर्वं समाहितं सर्वाणि च भूतानीति भूतपदविरोधः स्यात् । न हिंस्यात् सर्वा भूतानीत्यादौ भूतपदस्य जीवविशिष्टदेहवाचकताया निश्चितत्वात् प्रकृते च भूतपदस्य सर्वपदेन विशेषणाल्लोके च तत्तज्जीवविशिष्टसर्वदेहविषयकानुभवस्य वक्तुमशक्यतया तद्विषयकवासनाया अशक्यवचनत्वादिति शङ्क्यम् । विशेषणीभूतस्य सर्वपदस्य वृत्तिसङ्कोचे भूतानीत्यनेन महाभूतानि पुत्रादयो वा ग्रहीतुं शक्यन्त इति तदभावात् । नन्वेतस्य जीववाक्यत्वाङ्गीकारे, तं चेद् ब्रूयुरस्मिन्नेदिदं ब्रह्मपुर इत्यादिनोक्ता दहरनियता, तदन्तःस्थस्य ब्रह्मत्वोपदेशाद्भिन्न विरुद्ध्येतेति शङ्कायामग्रिमग्रन्थं योजयन्ति । * तं चेदित्यादि * । * तस्यैव ब्रह्मत्वमुपदिशतीति * जीवस्यैव ब्रह्मत्वमुपासनार्थमुपदिशति । य इहात्मानमनुविद्य व्रजन्तीत्यादेस्तात्पर्यमाह । * तज्ज्ञानमित्यादि * तथाच न विरोध इत्यर्थः । ननु भवत्वेवमन्यवाक्यानां सङ्गतिस्तथापि, इमाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्तीत्यादेर्ग्रन्थस्य सङ्गतिस्तु न भविष्यति । जीवान्तराणां जीवान्तरे गमनाभावात् । अहरहर्गमनकथनेन ब्रह्मणो लोको ब्रह्मलोक इति षष्ठीसमासस्योपगन्तुमशक्यतया सत्यलोकादेरविवक्षितत्वाद् ब्रह्मैव लोको ब्रह्मलोक इति मयूरव्यंसकादिवत् समानाधिकरणसमासस्यैवाश्रयणीयतया ब्रह्मण एव तत्र विवक्षितत्वेन ब्रह्मलोकपदासङ्गतेश्चेतिचेत्, तत्राह

स्वात्मज्ञानिनः कामसिद्धिं चाह । य इहेत्यादिना । येऽपि च विरुद्धा धर्माः प्रतिभान्ति, अहरहर्गमनादयस्तेऽपि स्वकल्पितजीवानां स्वप्नमायामनोरथादिषु तेषामेव गमनागमने प्रति । स्वातिरिक्तस्य ब्रह्मणोऽभावात् ।

एवं लोकाधारत्वमपि । ब्रह्मचर्यञ्च तस्य साधनमिति । योगश्च, तयोर्ध्वमायन्नमृतत्वमेतीति च । तस्माज्जीव एव दहर इत्येवं

---

*येऽपीत्यादि * । * स्वकल्पितजीवानामिति * स्वाज्ञानकल्पितजीवानाम् । तादृशा जीवाः कुत्र सिद्धा इत्याशङ्कायामाह । * स्वप्नेत्यादि * । * प्रतिर्लक्षणे । स्वप्नादिषु तेषां जीवानां सिद्धत्वादहरहर्वाक्यं तानेव लक्ष्यीकृत्य प्रवृत्तम् । श्रुत्यन्तरे, सता सौम्य तदा सम्पन्नो भवतीति सुषुप्तावेव सत्सम्पत्तेर्दृष्टत्वात् । ततः पूर्वं स्वप्नावस्थायां कल्पितजीवबाहुल्यात् । अतस्तेषामेव ते तथोच्येतेऽतो न तद्विरोध इत्यर्थः । नन्वेवं कल्पने किं बीजमत आह * स्वातीत्यादि * । तत् त्वमसि, अयमात्मा ब्रह्म, स यो ह वै तत् परं ब्रह्म वेद ब्रह्मैव भवतीत्यादिश्रुत्यन्तरे तथैव सिद्धत्वादित्यर्थः । ननु तथापि, य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदायेति लोकाधारत्वं यदुक्तं तस्य कथं सङ्गतिरित्यत आह * एवमित्यादि * यथा गन्तारोऽज्ञानकल्पितास्तद्वल्लोका अपीति तादृशतदाधारत्वमपि नासङ्गतमित्यर्थः । नन्वग्रे, तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्तीत्यादिना यज्ञादीनां ब्रह्मचर्यत्वेन रूपेण ब्रह्मलोकप्राप्तिसाधनत्वमुक्तम् । ततोऽग्र या एता हृदयस्य नाड्य इत्यादिना, तयोर्ध्वमायन्नमृतत्वमेतीत्यन्तेन तत्र गमनस्योपायभूतो योगो गमनप्रकारश्चोक्तः । तत् सर्वं गन्तुः काल्पनिकत्वे कथं सङ्गच्छते । तत्राह । * ब्रह्मचर्यमित्यादि * । *तस्येति * अज्ञानकल्पितस्याविदुषः । कर्मणामविद्वदधिकारकत्वादविद्वत्त्वस्य चाज्ञानिकत्वात् तादृशस्यैव तत्साधनमुपायः प्रकारश्च । न हि विदुषो ब्रह्मभूतस्य व्यापकस्य तत् सम्भवतीति जीवभावस्याज्ञानकल्पितत्वाङ्गीकारे सर्वस्यापि सङ्गतिः । सिद्धमाह । * तस्मादित्यादि * पूर्वमाद्यतादुत्तरप्रकरणस्वारस्यात् तथेत्यर्थः । एवं पूर्व-

प्राप्ते, उच्यते । दहरः परमात्मा, न जीवः । कुतः । उत्तरेभ्यः । उत्तरत्र वक्ष्यमाणेभ्यो हेतुभ्यः । तेषामपि साध्यत्वादेवमुक्तम् । जीवो नाम भगवदंशो, न भगवानेवेत्यग्रे वक्ष्यते । अंशो नानाव्यपदेशादिति । नापि ब्रह्म तावन्मात्रमिदमप्यग्रे वक्ष्यते । अधिकं तु भेदनिर्देशादिति । तस्मादिदं प्रकरणं न जीवब्रह्मविद्यापरम् । किन्तु ब्रह्मवाक्यमेवेति ॥ १४ ॥

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गञ्च ॥ १५ ॥

उत्तरहेतूनां मध्ये हेतुद्वयमाह । गतिशब्दाभ्याम् । गतिर्ब्रह्मलोकगमनम् । एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्तीति । एष आत्मा अपहतपाप्मा सत्यकामः सत्यसङ्कल्प इति केवलभगवद्वाचकाः शब्दा ब्रह्मलोकशब्दश्च । ननूक्तं जीवस्यैवैते शब्दा गतिश्च मनोरथादिकल्पितानामिति । तन्निराकरणायाह । तथाहि । तथैव गतिशब्दौ भगवत्येव युक्तौ । अनृतेनापिधानं हि तेषां विशेषणम् । अज्ञानावेष्टितत्वमित्यर्थः । न त्व-

---

पक्षमुक्त्वा सिद्धान्तं व्याचक्षते * उच्यत इत्यादि * । * न जीव इति * वस्तुतो ब्रह्माभेदेऽप्यज्ञानकल्पितभिन्नभावो जीवो न । एतादृशस्य निवारणे अंशभूतस्य जीवस्य निवारणमनुक्तसिद्धम् । अत उभयविधोऽपि जीवो नेत्यर्थः । * उत्तरत्रेति * वाक्यशेषे । उभयविधोऽपि जीवोऽत्र निराक्रियत इति बोधयितुं जीवस्वरूपमाहुः * जीवो नामेत्यादि * । * नापीत्यादि च * एतेन स्वोपपादनीयस्य प्रकारस्याकाल्पनिकत्वं बोधितम् ॥ १४ ॥

गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गञ्च ॥ सूत्रमवतारयन्ति * उत्तरेत्यादि * । व्याकुर्वन्ति * गतिरित्यारभ्य * युक्तावित्यन्तम् * गतेरज्ञानकल्पितजीवपरत्वं यदुक्तं तत् परिहरन्ति * अनृतेनेत्यादि * विशेषणमित्यन्तम् * । * तेषामिति * प्रजाशब्दोक्तानां जीवाना-

ज्ञानपरिकल्पितत्वम् । दृष्टत्वात् । तथैव हि दृश्यते । सर्वोऽप्याह, न किञ्चिदवेदिषमिति । नच गन्तुरभाव एव । शास्त्रवैफल्यापत्तेः । न ह्यात्मनाशः पुरुषार्थः । कर्मकर्तृविरोधश्च ।

म । अयमर्थः । पूर्वपक्षी हि जीवपरमात्मनोरज्ञानकल्पितं भेदं पारमार्थिकमभेदं च वदन्नज्ञानकार्यान्तःकरणावच्छिन्नत्वाज्जीवस्वरूपमज्ञानकल्पितं मन्यते । अज्ञाननाशोऽवच्छेदकनाशात् तन्नाशं चानुजानाति । आत्मनो व्यापकत्वाद् गमनागमने उपाधिनिष्ठे अङ्गीकुर्वंस्ते जीवात्मन्यौपचारिके मन्यते । तदिदमेतद्वाक्यविचारे विरुध्यते । अत्र हि ब्रह्मलोकेऽहरहर्गच्छतामपि ब्रह्मलोकाज्ञाने हेतुभूतं विशेषणम्, अनृतेन प्रत्यूढा इति । तत्रानृतपदस्याज्ञानवाचकत्वाङ्गीकारेऽपि प्रत्यूढपदं पिहितत्वमेव ब्रूते । अनृतापिधाना इति वाक्यान्तरस्वारस्यात् । न तु तत्कल्पितत्वम् । क्वापि तथा अदर्शनात् । अतस्तस्याज्ञानावेष्टितत्वमर्थो, न त्वज्ञानकल्पितत्वम् । तत्र हेतुर्दृष्टत्वम् । यतः सुप्त्वापात्थितः सर्वोऽपि, न किञ्चिदवेदिषमिति सुषुप्तौ स्वस्याज्ञानावेष्टितत्वमेवाहेति दृश्यते । यदि हि गन्ता अज्ञानकल्पितः स्यात् तदा जागरणे अज्ञाननाशे तस्यापि नाशात् स्मरणं नावकल्प्येत । अतो गन्तृत्वेन स्वाभिकादीनां कल्पनमसङ्गतम् । नाप्यवच्छिन्नस्य गन्तृत्वम् । प्रदेशानामचलत्वेनोपाधावेव तत्पर्यवसानात् । नचाराग्रमात्रत्वस्य बुद्धिगुणकृतत्वेनावास्तवत्वाद् वस्तुतो ब्रह्मरूपस्य जीवस्य व्यापकत्वेनौपचारिकमेव गमनमतो गन्तुरभाव एव वास्तव इति युक्तम् । तथा सति, अननुविद्य व्रजन्तीत्यादिना अज्ञानिनः फलाभावस्य श्रुत्यैवोक्तत्वेन, ज्ञानिनश्चाज्ञाननाशाद् गमनाऽभावस्य त्वया व्युत्पादितत्वेन, अथ य इहात्मानमनुविद्य व्रजन्तीत्याद्युक्तस्य गन्तुरनङ्गीकारे द्विविधगतिबोधकशास्त्रवैफल्यापत्तेः । नचाराग्रमात्रत्वस्य चरमवृत्तावेव नाशात् ततः पूर्वं मूलाज्ञानमात्रत्वेनाराग्रमात्रत्वसत्तया गन्तुरपि सत्वान्न शास्त्रवैफल्यमिति वाच्यम् । तथा सत्यत्र गन्तृत्वेन विवक्षितस्यात्मनश्चरमवृत्तौ नाशात् तस्या वृत्तेर्हेयत्वापत्तिः । नह्यात्मनाशः पुरुषार्थ इति । किञ्च । जीवस्य वस्तुतो ब्रह्माभेदेन गन्तुरनङ्गी

तथा अपहतपाप्मत्वं च । तद्विरुद्धधर्माणामनुभवात् । भगवति तु इदानीमेव तेषामनुभवः । ध्यानादावुपलब्धेः । पृथिवीशरावबदेव जीवब्रह्मविभागो, न त्वज्ञानकृतः ।

तथाहि । अज्ञानं नाम चैतन्यान्तर्भूतं तच्छक्तिरूपमनादि, उत बहिर्भूतम । साङ्ख्यवत् । न । बहिर्भूतं चेत् । साङ्ख्यनिराकरणेनैव निराकृतम् । अन्तःस्थितायाः शक्तिरूपायाः स्वरूपाविरोधि-

---

कारे, आत्मानमन्तुविध्य मज्जन्तीत्युक्तस्य स्नानक्रियायामात्मगङ्गयोः कर्मकर्तृभावस्यापि विरोधः । कृतकायव्यूहस्य योगिन इवोपाधिभेदेऽप्यात्मभेदस्फूर्तेरदर्शनात् । अव्यक्तकर्मकर्तृभावस्य च भेदमूलकताया एकवचनबहुवचनयोः प्रयोगादेव स्फुटत्वादिति । एवममृतेन प्रत्युक्ता इत्यस्याज्ञानापेक्षितत्वमात्रबोधकत्वात् तस्य च सुषुप्तिसाक्षिणा दृष्टत्वाज्जीवपरमात्मनोरंशांशिभावेन भेदसिद्धौ तद्वृत्तेर्ब्रह्मविषयकत्वमेव युक्तमिति दृष्टत्वेन हेतुना साधितम् । अतः परं शब्दस्य ब्रह्मपरत्वं दृष्टत्वेन साधयन्ति * तथेत्यादि * अपहतपाप्मत्वं च धर्मान्तराणामप्युपलक्षकम् । तेषां जीवपरतायामयुक्तत्वे ब्रह्मपरतायां युक्तत्वे च दृष्टं प्रमाणत्वेन दर्शयन्ति * तद्विरुद्धेत्यादि * । तथाचोभयत्रापि दृष्टस्यैव साधकत्वात् तेऽपि शब्दा ब्रह्मपरा एव युक्ता इत्यर्थः । ब्रह्मलोकपदस्य ब्रह्मपरत्वं पूर्वपक्षग्रन्थ एव साधितमतो नात्र शङ्कांशः । ननु ब्रह्मवादेऽपि सर्वस्य ब्रह्मात्मकत्वाज्जीवब्रह्मणोरंशांशिभावजनकस्य विभागस्याज्ञानकृतत्वमेव वाच्यम । क्रियया विभागाङ्गीकारे ब्रह्मणोऽप्यनित्यत्वापत्तेः । अतो घट्टकुटीप्रभातन्यायापाताद् किं तन्मतदूषणप्रयासेनेत्यत आहुः । * पृथिवीत्यादि * । तथाच, बहु स्यामित्यादीच्छया कृत इति विभागवत्तयैवाविभागोऽपि पृथिवीशरावदृष्टान्तादेव सिद्ध्यतीति न दोष इत्यर्थः । ननु विभागस्याज्ञानकृतत्वेऽप्येतत्तुल्यमित्याकाङ्क्षायां तद् दूषयितुमज्ञानं विकल्पयन्ति * तथाहीत्यादि * द्वितीयपक्षदूषणं स्फुटम । प्रथमं दूषयन्ति * अन्तरित्यादि * । अयमर्थः । यदि सा स्वरूपाविरोधिनी तदा स्वरूपभूताज्जीवाद् न व्याप्नुयात् । अथ

न्या न स्वरूपविभेदकत्वम्। आश्रयनाशप्रसङ्गात्। कल्पनायाश्चाप्रामाणिकत्वात्। बहिःस्थितस्यैव हि भेदकत्वम्। कुठारादिवत्। नापि वायुवत्। तच्छक्तित्वात्। किञ्च। कोऽयं ब्रह्मवादे प्रद्वेषो येन मिथ्यावादः परिकल्प्यते। अज्ञानादिति चेत्। पीतशङ्खप्रतिभानवदुक्तं मतकरणम्। ब्रह्मविदुपासनयानुगमिष्यति। शर्कराभक्षणेनेव पीतिप्रतीतिः।

सर्वज्ञेन हि वेदव्यासेन भाविमिथ्यावादनिराकरणेनेदमधिकर-

स्वरूपविरोधिनी तदा जीवानिव परमात्मानमपि व्याप्य जीवमिव तं कुर्यात्। तथा सति तस्या आश्रयनाशप्रसङ्गाद् ब्रह्मशक्तित्वमपि भज्येत। यदि च तस्यास्त्रिगुणात्मकत्वमुपगम्य शुद्धसत्त्वेनेश्वरोपाधित्वं, मिश्रसत्त्वेन जीवोपाधित्वमित्येवं स्वरूपाविरोधविरोधाविरोधाभ्यां विभेदकत्वं कल्प्येत तदा श्रुत्याद्यनुक्तत्वेन तस्याः कल्पनाया एवाप्रामाणिकत्वादसङ्गतमेव विभेदकत्वम्। यतो लोके शास्त्रे च बहिःस्थितस्यैव भेदकत्वं कुठारादिवत्। ननु, नासिके निरभिघेतां दोधूयति नभस्वतीत्यत्रान्तःस्थस्यापि वायोर्भेदकत्वं दृष्टमिति चेत् तत्राहुः। * नापीत्यादि *। तथाच वायोरन्तःस्थत्वेऽपि ब्रह्माण्डशक्तित्वाभावादेतस्यास्तु ब्रह्मशक्तित्वाद् दृष्टान्तवैषम्येणायं पक्षोऽप्यसङ्गत इत्यर्थः। एवं जीवब्रह्मभेदस्याज्ञानिकत्वं दूषयितुमज्ञानं विकल्प्य दूषितम्। अतः परं तन्मतस्य प्रत्यक्षश्रुतिविरुद्धत्वाय दूषणान्तरमाहुः। * किञ्चेत्यादि *। बहु स्यामिति प्रत्यक्षश्रुतिसिद्धे ब्रह्मवादे कोऽयं प्रद्वेषो येन प्रपञ्चमिथ्यावादः कल्प्यते। प्रत्यक्षादिना प्रपञ्चे ब्रह्मत्वाज्ञानादिति चेत्। तर्हि * पीतशङ्खेत्याद्युक्तरीत्या सत्सङ्गेन तादृशाज्ञाननिवृत्तौ तदादरस्यापि निवृत्तेरपार्थं मतकरणमित्यर्थः। ननु भवत्वेवं, तथाप्येतस्य मतस्याधुनिकत्वादेतन्निराकरणायाधिकरणप्रणयनकथनं त्वयुक्तमेवेत्यत आहुः।* सर्वज्ञेनेत्यादि *।* निराकरणेनेति हेतौ तृतीया। प्रकृत्यादिभ्य उपसंख्यान-

णमारभ्य। तस्माज्जीवानामेवाज्ञानदर्शनाद् ब्रह्मणः सर्वज्ञत्वदर्शनाद् गतिशब्दौ ब्रह्मविषयावेव, न जीवविषयौ। किञ्च, लिङ्गं च वर्तते। यथेह कर्मजितो लोकः क्षीयत एवमेवामुत्र पुण्यजितो लोकः क्षीयत इति। न हि स्वाज्ञानं स्वस्य सम्भवति। हिताकरणमसक्तिश्च। नच ज्ञानेन सामर्थ्यमुद्बुद्धमिति वाच्यम्। विरोधित्वात्। न हि ज्ञाने जाते कर्तृत्वमस्तीति विप्लववादिनोऽङ्गीकुर्वन्ति।

मिति वार्तिकात् स्वरूपे वा। तथाच पुराणेषु भाविसूतोक्तिकथनवदत्र भाविमिथ्यावादनिराकरणेन हेतुना वा तन्निराकरणरूपं वा इदमधिकरणमतस्तथा कथनं नायुक्तमित्यर्थः। सिद्धमाहुः। * तस्मादित्यादि * अत्र दर्शनद्वयं क्रमेण गतिशब्दयोस्तथात्वसाधकं ज्ञेयम्। एवं हेतुं व्याकृत्य लिङ्गं व्याकुर्वन्ति। * किञ्च, लिङ्गमित्यादि *। गतिशब्दयोर्ब्रह्मपरत्वे लिङ्गमपि वर्तते इत्यर्थः। पूर्वं गतेर्लिङ्गं व्युत्पादयन्ति। * यथेत्यादि *। अत्र हि वाक्यशेषे, तद्य इहात्मानमननुविद्य व्रजन्तीत्यात्माज्ञानं लोकक्षयहेतुत्वेनोच्यते। यद्यात्मा ब्रह्माभिन्नः स्यात् तदा अपहतपाप्मादिगुणकत्वात् स्वस्य स्वाज्ञानं न सम्भवति। अत इदमज्ञानं जीवस्य ब्रह्मभिन्नत्वं बोधयद्गतेर्ब्रह्मविषयत्वे लिङ्गमित्यर्थः। किञ्च। यदि गन्तॄणां मनोरथादिकल्पितत्वं स्यात् तदा अज्ञानिवज्ज्ञानिनामपि तेषां मिथ्यात्वात् तेषु सर्वलोककामचाररूपहितस्याप्यकरणमसक्तिः। अत इदं हितकरणमपि गतेः सत्यजीवकर्तृकत्वं बोधयद्गतेर्जीवभिन्नब्रह्मविषयत्वे लिङ्गमित्यर्थः। नन्विदं हितकरणं न गतेर्जीवभिन्नब्रह्मविषयत्वे लिङ्गम्। ज्ञानेनाज्ञाननाशात् कल्पितरूपनिवृत्तौ सामर्थ्योद्बोधेन ब्रह्माभिन्नेऽपि तस्मिन् हितस्योपयोगादित्यत आहुः। * नचेत्यादि * * विरोधित्वादिति * अनुविद्य व्रजन्तीति श्रुत्युक्तव्रजनविरोधित्वात्। तदेव व्युत्पादयन्ति * न हीत्यादि * तथाचैवं कल्पनस्यासङ्गतत्वाद्धितकरणस्य जीवभिन्नब्रह्मविषयकगतिलिङ्गत्वमक्षुण्णमित्यर्थः। एवं गतेर्लिङ्गं व्याख्याय शब्दस्य तथात्वे लिङ्गं व्युत्पाद-

विरुद्धा च कल्पना । अहं ब्रह्मास्मीति । अत एव सर्वभावश्रुतेः । तज्ज्ञानं च तस्य सार्वज्ञे लिङ्गम् । तस्य हि स गुणो भगशब्दवाच्यानामन्यतरः । स चेज्जीवे समायाति तत्कृपया तस्यैवास्यापि माहात्म्यं भवति । तस्माल्लिङ्गादपि गतिशब्दौ ब्रह्मविषयौ । चकारात्, तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुत्या ब्रह्मत्वेन ज्ञानं नात्मनो मोक्षाय । ब्रह्मण एव तु ज्ञानमात्मत्वेनापि ।

यन्ति * विरुद्धेत्यादि * जीवस्य ब्रह्माभिन्नत्वकल्पनापि श्रुतिविरुद्धा । बृहदारण्यके, तद्यो यो देवानां प्रत्यबुध्यत तथर्षीणां तथा मनुष्याणामित्यनेकजीवानुपक्रम्य, तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीति ज्ञानानन्तरमेव श्रुतेः । यदि हि जीवस्य ब्रह्माभेद एव स्यात् तदा ब्रह्मणः सर्वभावस्य पूर्वमुक्तत्वात् पुनस्तत्सजातीयेन ज्ञानेन पश्चाज्जीवानां सर्वभावं न वदेत् । प्रागुक्तेनैव चारितार्थ्यादिति । न च पाश्चात्यात् ब्रह्माऽहमिति ज्ञानात्तदभेदसिद्धिः । यतस्तज्ज्ञानं जीवस्य सर्वज्ञत्वे लिङ्गम् । यदि हि सर्वज्ञो न स्यात् स्वस्य ब्रह्मात्मत्वं नानुसन्दध्यादिति । तच्च ज्ञानं भगवत एव गुणो, भगशब्दवाच्यानामैश्वर्यादीनामन्यतम इति पाश्चात्यत्वाद् गम्यते । स च तत्कृपया जीवे समायाति । तदा भगवत इव जीवस्यापि माहात्म्यं भवति । यथा वामदेवादेः । एवं प्रकृतेऽपि सर्वलोककामचारसत्यसङ्कल्पादिरूपं माहात्म्यमपि भगवद्दत्तैश्वर्यरूपत्वाज्जीवभिन्नब्रह्मज्ञाने लिङ्गम् । तस्मादप्यपहतपाप्मादिरूपः शब्दो जीवभिन्नब्रह्मपर इति । एवं साधयित्वा निगमयन्ति * तस्मादित्यादि * । सौत्रस्य चकारस्य प्रयोजनमाहुः । * चकारादित्यादि * । * ब्रह्मत्वेन ज्ञानं नात्मनो मोक्षायेति * । आत्मनो ब्रह्मत्वेन ज्ञानं न मोक्षायेति योजना । अयमर्थस्तूक्तश्रुतिस्थात्, तमेवेति तत्पदसम्बन्धादेवकाराद् गम्यते । एवञ्च, य एवं वेदाहं ब्रह्मास्मीति पुरुषविधब्राह्मणोक्तं ज्ञानं सर्वभावमात्रफलकत्वात् पूर्वकक्षैवेति । वस्तुतस्तु तत्रापि पूर्वं ब्रह्मणः सर्वरूपत्वज्ञानानन्तर-

तस्माद् दहरः परमात्मा ॥ १५ ॥

मेवैवं ज्ञानमिति न विरोधः । एवमहंब्रह्मोपासनेऽपि बोध्यम् । सिद्धमाहुः । * तस्मादित्यादि * एवं दृष्टलिङ्गाभ्यामुपष्टम्भाद् गतिशब्दरूपाद्धेतुद्वयात् तथेत्यर्थः ।

शाङ्कराचार्यादयस्तु, गतेर्ब्रह्मपरत्वं, सता सौम्य तदा सम्पन्नो भवतीति श्रुत्यन्तरे दृष्टम् । एतदेवाहरहर्ब्रह्मलोकगमनं दृष्टं ब्रह्मलोकपदस्य सामानाधिकरण्यवृत्तिपरिग्रहे लिङ्गमिति व्याचक्रुः ।

रामानुजाचार्यास्तु, एवमेव खलु सौम्येमाः सर्वाः प्रजाः सति सम्पद्य न विदुः सति सम्पद्यामह इति, सत आगम्य न विदुः सत आगच्छाम इति च गतेर्ब्रह्मपरत्वे दृष्टम् । एष ब्रह्मलोकस्सम्राडिति होवाचेति ब्रह्मलोकशब्दस्य ब्रह्मपरत्वे दृष्टम् । दहराकाशं प्रकृत्य सर्वेषां क्षेत्रज्ञानां प्रलयकाल इव सुषुप्तिकाले श्रूयमाणं गमनमवस्थानं तस्य दहरस्य ब्रह्मपरत्वे पर्याप्तं लिङ्गम् । तथा ब्रह्मलोकशब्दश्च समानाधिकरणवृत्त्याऽस्मिन् दहराकाशे प्रयुज्यमानोऽस्य ब्रह्मपरत्वे पर्याप्तं लिङ्गम् । निषादस्थपतिन्यायाच्च षष्ठीसमासात् समानाधिकरणसमासो न्याय्यः । अथवा; अहरहर्गच्छन्त्य इति न सुषुप्तिविषयम् । किन्त्वन्तरात्मत्वेन वर्तमानस्य दहराकाशस्य परमपुरुषार्थभूतस्योपर्युपरि गच्छन्त्यः सर्वस्मिन् काले वर्तमानास्तमजानन्त्यस्तं न विन्दन्ति न लभन्ते यथा हिरण्यनिधिं निहितं तदज्ञाना इति । एषा अजानतीनां प्रजानां सर्वदा गतिरस्य दहराकाशस्य ब्रह्मतां गमयति । परस्य ब्रह्मणोऽन्तरात्मतयाऽवस्थितस्य स्वस्मिन् वर्तमानाभिः प्रजाभिरवेदनमन्तर्यामिब्राह्मणे दृष्टम् । य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयतीत्येवं गतेर्ब्रह्मपरत्वे दृष्टं लिङ्गञ्च द्विधा व्याचक्रुः ।

मध्वाचार्यास्तु, उत्तरेभ्य इत्यस्य, एष आत्माऽपहतपाप्मा सोऽन्वेष्टव्यः स विजिज्ञासितव्य इत्युत्तरप्रकरणस्थां श्रुतिं हेतुबोधकत्वेनोपन्यस्य, गतिशब्दसूत्रे दहरप्रकरणस्थयोर्गतिशब्दयोरग्रिमसूत्रस्थधृत्यादेश्च पृथग्धेतुत्वमाहुः ।

धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥ १६ ॥

अपरं हेतुमाह । धृतेः । अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसम्भेदायेति ।

तत्र पूर्वप्रकरणस्थहेतूननारत्य वादकवलितानां हेतूनां पूर्वं किमर्थमादरस्तैर्दहरस्य परमात्मत्वसिद्धौ च किमर्थं सूत्रान्तरप्रणयनं, तेषां निर्विवादत्वे वा, इतरपरामर्शादिसूत्राणां किमर्थमारम्भ इति चिन्त्यम् ।

यदपि जयतीर्थः । यो वेद निहितं गुहायां, तस्यान्ते सुषिरं सूक्ष्मं, इयेष आत्मेति श्रुतिभिर्ब्रह्माकाशजीवेषु साधारणस्य हृदयपद्मस्थत्वलिङ्गस्य भगवति समन्वयप्रतिपादनाद्दत्ति शास्त्रादिसङ्गतिरित्याह ।

तत्रापि सूत्रकृता दहरपदोच्चारणाद्दहरत्वेन पक्षत्वं बोध्यते । न तु हृत्पद्मस्थत्वेनेति तस्य विचारविषयत्वमेव चिन्त्यम् । कथञ्चित् तद्विषयत्वापादनेऽपि तस्य जीवाकाशसाधारण्यस्यापरिहारादधिकरणवैयर्थ्यस्यापि प्रसक्तिरित्यवधेयम् ।

एवं रामानुजाचार्यमतमपि विषयवाक्यगतस्य हृदस्य लिङ्गस्य सिद्धान्तोक्तरीत्या प्राप्तस्याविचारेणान्यमिकस्य तस्य ग्रहणाच्चिन्त्यम् ।

एवं शाङ्करेऽपि बोध्यम् ।

किञ्च, परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्य इतिवद्, दहरो गतिशब्दधृतिमहिमप्रसिद्धिभ्य इत्येवं वक्तुं शक्यत्वेऽपि यदुत्तरेभ्य इत्युत्तरवाक्यगतत्वेनैवोल्लेखः सूत्रकृता कृतो, न स्वेन रूपेणातो ज्ञायते, एते हेतवः साध्यत्वेनैव सूत्रकारस्याभिमता इति । यदि हेतूनां सिद्धत्वं स्यात् तदा स्वेनैव शब्देन वदेत् । गत्यादिसूत्राणि च न प्रणयेत् । अतस्तेषां स्वतन्त्रतया व्याख्यानमपि चिन्त्यम् ॥ १५ ॥

धृतेश्च महिम्नोऽस्याऽस्मिन्नुपलब्धेः ॥ सूत्रमवतारयन्ति । * अपरमिति * । उत्तरेभ्य इत्यनेन हेतुबाहुल्यस्य प्रतिज्ञातत्वात् तत्पूरणार्थमन्यं हेतुमाहेत्यर्थः । विषयवाक्ये विधृतिशब्दः, किञ्चको च

न हि सर्वलोकविधारकत्वं ब्रह्मणोऽन्यस्य सम्भवति । चकारात् सेतुत्वमपि । तदन्वेष्टव्यं तद्विजिज्ञासितव्यमिति लोकविधारणस्य माहात्म्यरूपत्वात् तस्यैव कर्मत्वमित्याह । महिम्न इति । महिमैव पुरुषस्य, न तु वासनारूपेण तस्मिन् विद्यमानत्वम् । संसारिधर्मत्वेनामाहात्म्यरूपत्वात् । नच विरुद्धमुभयत्रैकस्य दर्शनमिति वाच्यम् । अस्याऽस्मिन्नुपलब्धेः । अस्य एतादृशविरुद्धधर्माश्रयमाहात्म्यस्यास्मिन् भगवत्येवोपलब्धेः । ज्यायानाकाशाद्, यावान् वा अयमाकाशः, अणुः स्थूल इति । यशोदा-

---

संज्ञायामित्येतद्विहितकर्त्रर्थककिजन्तः । तथाच विधारक इत्यर्थः । तदत्र विधारकत्वं सूत्रे धृतिपदेनोच्यत इत्याशयेन हेतुं व्याकुर्वन्ति । * न हीत्यादि * । * सेतुत्वमिति * स्वयं साधनीभूय निःसाधनपारप्रापकत्वम् । श्रुतौ त्वसम्भेदपदमसाङ्कर्यबोधकम् । अग्रिमं व्याकुर्वन्ति * तदित्यादि * । उक्तश्रुतिनिरूपितमन्वेषणादिकर्मत्वम् । तस्य * विधारणस्येत्याशयेन हेत्वन्तरमाहेत्यर्थः । * महिमेत्यादि * पुरुषसूक्ते, एतावानस्येति मन्त्रे महिम्नो ब्रह्मज्यायस्त्वगमकत्वं श्रुत्यैवोक्तमतोऽस्मान्महिम्नोऽपि तथेत्यर्थः । एवञ्च लोकधारणस्य स्वेन रूपेण महिमत्वेन रूपेण चेति द्वेधा हेतुत्वमित्याशयः । लोकविधारणस्य कथं महिमरूपतेत्यतस्तद् व्युत्पादयन्ति * नचेत्यादि * । एकस्य द्यावापृथिव्यादेरुभयत्र * अन्तर्बहिश्च दर्शनं विरुद्धमिति न वाच्यमित्यर्थः । ज्यायानित्यत्राकाशादाधिक्यस्य, यावानित्यत्र तत्तौल्यस्य, अणोरणीयान् महतो महीयानित्यत्राणुः स्थूल इति प्रत्यक्षश्रुतौ, श्रीयशोदादिभिश्चैकस्यैव प्रपञ्चस्य बहिश्च मुखान्तश्चोपलब्धेर्विरुद्धधर्माधारत्वस्य स्फुटत्वान्महिमरूपत्वमित्यर्थः । नच तन्मायया प्रदर्शितमिति वाच्यम् । ' किं स्वप्न एतदुत देवमाया किं वा मदीयो बत बुद्धिमोहः । अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक *आत्मयोगः* ॥ अथो यथावन्न वितर्कगोचरं चेतोमनःप्राणवचोभिरञ्जसा । यदाश्रयं येन यतः प्रतीयते सुदुर्विभाव्यं प्रणताऽस्मि तत्पदम् ' इति मायादिपक्षनिराकर-

दयश्च वहिःस्थितमपि जगदन्तः प्रपश्यन्ति । न त्वेतादृशो जीवो भवितुमर्हति । तस्माद् ब्रह्मैव दहरः ॥ १६ ॥

प्रसिद्धेश्च ॥ १७ ॥

आकाशशब्दवाच्यत्वप्रसिद्धिः । अपहतपाप्मत्वादिप्रसिद्धिः । किं बहुना प्रकरणोक्तसर्वधर्मप्रसिद्धिर्भगवत्येव; न जीवे सम्भवस्ततोऽपि भगवानेव दहरः । चकारादिदंविधिमुखेनाधिकरणसमाप्तिः सूचिता ॥ १७ ॥

अन्यनिषेधमुखेन पुनर्विचारयति ॥

इतरपरामर्शात् स इति चेन्नासम्भवात् ॥ १८ ॥

ननु ब्रह्मैतादृशं, जीवो नेतादृश इति न कश्चित् सिद्धमस्ति । श्रुत्येकसमधिगम्यत्वादुभयस्वरूपस्य ब्रह्मवादे । अतो येषां सर्वत्र

णपूर्वकं भगवद्योगदर्शनकारणताप्यापन्नादिति । तदेतन्निगमयन्ति । * नन्वित्यादि * ॥ १६ ॥

प्रसिद्धेश्च ॥ * प्रकरणोक्तसर्वधर्मप्रसिद्धिरिति * । अरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके इत्यादिनोक्ता । ऐरम्मदः सोमसवनाश्वत्थाऽपराजिताख्यब्रह्मपुरप्रभृतिसर्वधर्मप्रसिद्धिः । एतदुपबृंहणं च 'अरण्यामाऽमृताम्भोधिपर्यन्ताऽमृतसागर' इति वाराहे चातुर्मास्यमाहात्म्ये । तदुभयान्तःस्थश्रीमागाख्यनित्यभगवल्लोकप्रसिद्धिः । पुराणान्तरेऽन्येषां च धर्माणां भगवदीयत्वप्रसिद्धिश्चेति ज्ञेयम् ॥ १७ ॥

इतरपरामर्शात् स इति चेन्नासम्भवात् ॥ अत्र चतुःसूत्र्या भूताऽऽकाशवारणं, ततोऽग्रिमचतुःसूत्र्या जीववारणमिति रामानुजाचार्या मेनिरे । प्रकृते त्वादित एव जीवब्रह्मवादो निवारित इत्यस्याश्चतुःसूत्र्याः किं प्रयोजनमत आहुः । * अन्यनिषेधेत्यादि * । तयाच तत्र दहरस्य जीवव्यतिरिक्तपरमात्मत्वं स्थापितम् । अत्र त्वितरस्य दहरत्वं दूषयतीति नानर्थक्यमित्यर्थः । आशङ्कांशमवतारयन्ति । * नन्वित्यादि * जीवासाधारणधर्माणां प्रदर्शनार्थं पराम-

ब्रह्मणोऽसाधारणधर्मदर्शनात् तत्तत्प्रकरणं ब्रह्मण इति निश्चीयते । एवमिहापि जीवस्यासाधारणधर्मदर्शनाज्जीवप्रकरणमिति कुतो न निश्चीयते । निश्चिते तु तस्मिन्नाकाशतुल्यत्वादयो धर्मा जीवस्यैव भविष्यन्ति, नान्यस्येत्यभिप्रायेणाह । इतरपरामर्शात् सः । इतरो जीवस्तस्य परामर्शः । उपक्रमोपसंहारमध्यपरामर्शैः सन्दिग्धे निर्णयः । तत्रात्मविदः सर्वान् कामानुक्त्वा मध्ये, अथ य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत एष आत्मेति होवाचैतदमृतमभयमित्यादि मध्ये । अग्रे, य आत्मा स सेतुरिति ।

तत्र सम्प्रसादः सुषुप्तिः । जीवावस्था । तत्र परसम्बन्धनिमित्तेन स्वेनैव रूपेणाभिनिष्पत्तिवचनाज्जीव एवैतादृश इति गम्यते । न ह्यत्र परमात्मनोऽयं धर्मः सम्भवति । अतः सर्वमेव प्रकरणं

र्शमुदाहरन्ति । * तत्रात्मविद इत्यादि * । * अभयमित्यादीति * उक्त्वेति शेषः । * सेतुरिति * । वक्तीति शेषः । उपक्रमे, स यदित्यादिकथनेन स्फुटत्वान्मध्यस्य जीवपरत्वं व्याकुर्वन्ति *तत्रेत्यादि* अत्र मध्ये तद्यथापि हिरण्यनिधिमित्यनात्मविदो ब्रह्मसमीपगमनेऽपि ब्रह्माप्राप्तिं प्रतिपाद्य आत्मनो हृदि स्थितिं यत् प्रतिपादयति तद् ब्रह्मविदः प्रशंसार्थम् । ततोऽथ य एष सम्प्रसाद इत्यादिना तस्यैवात्मनो मध्ये ब्रह्मत्वं प्रतिपाद्याग्रे समाप्तौ, अथ य इत्यादिना सेतुत्वमात्मनो वक्ति । तत्र मध्ये उक्तस्य सम्प्रसादस्य जीवावस्थाविशेषत्वं बृहदारण्यके, अस्मिन् सम्प्रसादे रत्वा चरित्वेत्यत्र सिद्धम् । अत्र च तस्यामवस्थायां परसम्बन्धेनास्य स्वरूपाभिनिष्पत्तिवचनं जीवाऽसाधारणं लिङ्गम् । तेनोपक्रमगतमात्मवेत्तृत्वमपि स्ववेत्तृत्वरूपं जीवस्यैव धर्म इति गम्यते । अज्ञानस्य जीवधर्मत्वं तु स्फुटमेव । मध्यवर्तित्वं च सेतुत्वम् । तेन तथात्वं तस्यापि । तथाचात्र प्राप्यत्वादिना ब्रह्मणः प्रतिपादनेऽपि, न तस्य प्रकरणित्वम् । अतो जीव एव

जीवपरं भविष्यतीति स एव जीव एव प्रकरणार्थ इति चेत् । न । जीवस्तादृशो न भवति । विरुद्धधर्मत्वेनैव सर्वत्र तन्निश्चयात् । उभयोरेकरूपत्वे ह्युभयत्वमेव न स्यात् । ऋतं पिबन्तावित्यादिवाक्यविरोधश्च । अतो न जीवस्तादृश इत्यभिप्रायेणाह । असम्भवात् । न हि जीवे जगदाधारत्वादिकं सम्भवति । न हि परामर्शमात्रेण सर्ववेदान्तविरुद्धं कल्पयितुं शक्यते । परामर्शस्यान्यार्थत्वमुत्तरत्र वक्ष्यति । तस्माद् दहरो जीवो न भवितुमर्हति । वाक्यार्थो यथोपपद्यते, तथोत्तरत्र वक्ष्यते । ब्रह्म त्वेकमेव, नोभयमिति निश्चयः ॥ १८ ॥

उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ १९ ॥

उत्तरात् प्रकरणात् प्राजापत्यात् । तत्र हि दिव्ये चक्षुषि मनोरूपे प्रतीयमानो जीव एवाऽमृताऽभयरूपो निरूपितः ।

प्रकरणार्थ इत्यर्थः । एवमितरपरामर्शं व्याख्याय तस्यासाधकत्वं स्फुटीकुर्वन्ति * नेत्यादि * । * तादृश इति * प्रकरणार्थः । * तन्निश्चयादिति * जीवत्वनिश्चयात् । तथाच स्याज्जीवः प्रकरणी । यदि ब्रह्मविरुद्धधर्मत्वं जीवस्य सर्वत्र नोच्येत । उच्यते तु ततो नात्र जीवः शक्यवचन इत्यर्थः । ननु पूर्वमुक्तं यज्जीवान्नातिरिक्तं ब्रह्मेति, विरुद्धधर्माणां त्वध्यास इति । अतस्तदङ्गीकारे को दोष इत्यत आहुः । * उभयोरित्यादि * । असम्भवं व्याकुर्वते * न हि जीव इत्यादि * हृदयान्तर्वर्तिनि जीवे अखिलजगदाधारत्वस्यासम्भवादित्यर्थः । गतिशब्दयोरुपपादनसापेक्षत्वाच्चतुमयमत्र नोक्तम् । तर्हि परामर्शस्य का गतिरित्यत आहुः । * न हि परामर्शेत्यादि * । * नोभयमिति * नावस्थाभेदाभिन्नम् । स्फुटमन्यत् ॥ १८ ॥

उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ तस्य प्रकरणस्य जीवपरत्वं व्युत्पादयति । * तत्रेत्यादि * । * दिव्ये चक्षुषि मनोरूपे इति * मनोऽस्य दैवं चक्षुरिति प्रजापतिना वक्ष्यमाणत्वाद्, य एषोऽक्षिणि

तस्यैवोदशरावे जाग्रत्साक्षित्वं, तदनु स्वप्नसाक्षित्वं, तदनु सुषुप्तिसाक्षित्वं निरूप्य सर्वत्र तस्याऽमृतरूपत्वमेव निरूप्यावस्थानामतात्त्विकत्वमुक्त्वा समाध्यवस्थायां मनसि तमेव जीवं तादृशं प्रतिपादयति । अतो जीवोऽपि वस्तुतस्तादृश एवेति प्रकृतेऽपि परामर्शात् स एवेति चेत् । एवमाशङ्क्य परिहरति तुशब्देन । नायमर्थो दृश्यते, किन्तु किञ्चिदन्यदस्तीति न नकारप्रयोगः ।

पुरुषो दृश्यत इत्यत्रोपदिश्यमाने तस्मिन् । नन्वग्रे, योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एष इति प्रश्ने, एष उ एवैषु सर्वेष्वन्तरेषु परिख्यायत इति प्रत्युत्तरात् प्रतिबिम्बपुरुष एवात्र प्रतीयत इति कथमस्य मनसि प्रतीयमानजीवरूपत्वमित्यत आह । * तस्येत्यादि * । यदि हि प्रतिबिम्बात्मैवात्रोपदेश्यः स्यात् तदा, उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतमित्यनेन यत्सम्बन्धिप्रतिबिम्बे अज्ञातं तस्यात्मत्वं बोधितम् । ततस्ताभ्यामुदशरावेऽवेक्षणेन शरीरस्यात्मत्वे स्वज्ञानविषये बोधिते ततोऽपि निवार्य आत्मसाक्षिणे मनस्यहंवित्त्या प्रतीयमानं बोधयितुं साध्वलङ्कृतौ सुवसनौ परिष्कृतौ भूत्वोदशरावेऽवेक्षेथामित्यादिना, एष आत्मेति वाक्येन प्रत्यगात्मा बोधितः । ततस्तावता तदज्ञाने देहात्मज्ञानवतां पराभवं तेषामसुरत्वं चोक्त्वा तत इन्द्रस्य पुनः प्रत्यागमने तं प्रति जीवस्यैव स्वप्नसाक्षित्वं पुनः सुषुप्तिसाक्षित्वादिकं प्रतिपादयति । अतोऽत्र जीव एवोपदेश्यो, न प्रतिबिम्बो, नापि शरीरमित्यर्थः । तेन सिद्धमाह * अत इत्यादि * । * तादृश इति * अमृताऽभयादिरूपत्वादपहतपाप्मादिरूपत्वाच्च वस्तुतो ब्रह्मात्मक एवोत्तरप्रकरणे सिद्ध इति पूर्वत्रापि स एव ग्राह्य इत्यर्थः । परिहारं व्याकुर्वते * एवमित्यादि * । ननु प्रकरणस्य जीवपरत्वं निराकार्ये अत्र नकारः कुतो नोक्त इत्यत आहुः । * नायमर्थ इत्यादि * * किञ्चिदिति * तत्र कारणम् । तर्हि कथं परिहार इत्यत आहुः ।

तदाह । आविर्भूतस्वरूपः । स्वाप्ययसम्पत्त्योर्भगवदाविर्भावो जीवे भवति । नृसिंहोपासकस्य नृसिंहाविर्भाववत् । ब्रह्मण उपदेशसमये भगवदाविर्भावात् । सर्वत्र स्वात्मानं पश्यन्निन्द्रेऽपि तथैवोपदिष्टवान् प्रजापतिः । अन्यथा प्रतिबिम्बादावमृताऽभयवचनं मिथ्या स्यात् । इन्द्रे त्वाविर्भावाभावात् प्रजापत्यसन्निधाने विपरीतं पश्यति । अतस्तावन्मात्रदोषपरिहारायान्यथोपदेशः । स्व-

---

* तदाहेति * तस्माद्धेतोः कारणभूतं प्रकारमाहेत्यर्थः । * आविर्भूतस्वरूप इति * प्रजापतिवाक्ये परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रावणात् । आविर्भूतं प्रकटीभूतं ब्रह्मस्वरूपं यस्मिन् स तथेत्यर्थः । आविर्भाव एव कथमित्यत आहुः । * स्वाप्ययेत्यादि * अनुगमाधिकरणे, मय्येव सकलं जातमित्यादिवाक्यानुरोधादुत्तमाधिकारिणामुपदेशभावनादिष्वपि जीवे ब्रह्मसम्पत्तिर्भवतीत्युपपादितम् । अतोऽत्रापि प्रजापतिर्जीवे ब्रह्माविर्भावाज्जीवे अमृताऽभयरूपत्वाद्युपदिश्यते । न तु जीवो वस्तुतस्तथेत्यर्थः । नन्वेवमर्थोऽत्र किं गमकमत आहुः । * अन्यथेत्यादि * । * प्रतिबिम्बादावित्यत्रादिपदेन शरीरसंग्रहः । तथाच यदि पुरःस्फूर्तिकमाद्रियते, तदा बाधितार्थत्वप्रसङ्गः । यदि चैतं त्वेव त इत्यादिवाक्यानुरोधात् प्राकरणिकमाद्रियते, तदा तु प्रजापतिना स्वाभिसंहितस्य परमात्मन एवानुव्याख्येयत्वकथनादिन्द्रस्य तदबोधेन तत्र जीवोक्तिभ्रमे तन्निवृत्त्यर्थं तस्य परं ज्योतिःसम्बन्धेन स्वरूपाभिनिष्पत्तिवचनाच्च तस्य तथात्वं स्वाभाविकमपि तु ब्रह्मस्वरूपाविर्भावकृतमेवेति नैतदनुरोधेन पूर्वप्रकरणेऽपहतपाप्मत्वादिगुणकत्वं प्रकरणित्वं च जीवे वक्तुं शक्यम् । प्रजापतिवाक्येऽपि जीवस्य प्रकरणित्वेनासिद्धत्वादित्यर्थः । नन्वेवं सतीन्द्रस्य कुतः सन्देहसम्भव इत्यत आहुः । * इन्द्रे त्वित्यादि * । * प्रजापत्यसन्निधाने इति * अन्यथा तदानीमेव व्युत्तिष्ठेदनाप्तत्वं वा प्रजापतौ निश्चिनुयात् । * तावन्मात्रदोषपरिहारायेति * स्वासन्निधाने विपरीतदर्शनपरिहाराय । * अन्यथोपदेश इति * देहादिविलक्षणतयोपदे-

प्नादिषु तथा प्रकृतेऽपि । स्वप्नावस्थायां भगवदाविर्भावात् तथा वचनम् । तस्मादुभयमपि भगवत्प्रकरणमेव । एवमन्यत्रापि भगवदावेशकृता भगवद्धर्माभिलापा ग्राह्याः । तस्माद्दहरः परमात्मैव ॥ १९ ॥

अन्यार्थश्च परामर्शः ॥ २० ॥

परामर्शस्य प्रयोजनमाह । अन्य एवार्थः प्रयोजनं यस्य । तस्माद् यमहरहर्वा एवंविद् स्वर्गं लोकमेति । स्वस्यैवं ज्ञाने हि ब्रह्मसुखं फलं ब्रह्मज्ञानापेक्षायामुपयुज्येत । भगवतश्च तदाविर्भा-

---

शः । * तथा वचनमिति * स्वरूपाभिनिष्पत्तिवचनम् । शेषं स्फुटम् ॥ १९ ॥

अन्यार्थश्च परामर्शः ॥ सूत्रमवतारयन्ति * परामर्शस्येत्यादि * । सोऽर्थः को वेत्यपेक्षायामाहुः । * तस्मादित्यादि * प्रथमे प्रकरणे, तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति, तानि ह वा एतानि त्रीण्यक्षराणि स ति यमिति । तद्यत् सत् तदमृतमथ यत् ति तन्मर्त्यमथ यद् यं तेनोभे यच्छति । यदनेनोभे यच्छति तस्माद्यमहरहर्वा एवंवित् स्वर्गं लोकमेतीति वाक्ये स्वस्य भगवद्विषयके अमृतमर्त्ययमयितृत्वज्ञाने सति ब्रह्मसुखं फलमुक्तम् । अतस्तत्साधनभूतब्रह्मज्ञानाऽपेक्षायाममृतभूतजीवज्ञानमुपयुज्येत । युक्तं चैतत् । न हि यन्तव्यज्ञानं विना तद्यमयितृत्वं ज्ञातुं शक्यते । अतो मर्त्यस्य प्रसिद्धत्वादमृतज्ञापनार्थं जीवपरामर्श इत्यर्थः । किञ्च । इतः पूर्वमथ य एष सम्प्रसाद इत्यादिना स्वरूपाभिनिष्पत्तिकथनात् तदा ज्ञानदशायां भगवदाविर्भावो ज्ञापितः । सोऽयमेतत्सूत्रस्थस्य चकारस्यार्थः । तेन सूत्रेऽन्यार्थ इत्यस्य, स्वरूपयोग्यतासिद्ध्यर्थः, सम्पत्तौ भगवदावेशकथनार्थश्चेत्यर्थः सिद्ध्यति । तथाच फलार्थे स्वरूपयोग्यतासहकारिसम्पत्त्योर्बोधनाय जीवपरामर्श इत्यर्थः । अन्यैस्तु, यदस्योपसत्तव्यं परं ज्योतिस्तद् अपहतपाप्मत्वादिगुणविशिष्टतयोपास्यमित्येतदर्थं जीवपरामर्श इति नानाव्याख्यानादयमेव सूत्रार्थ इति कथं निश्चेय-

वो भवतीति चकारार्थः। सम्पत्तौ भगवदाविशकथनार्थं वक्ष्यति च, स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हीति चतुर्थे। तस्मान्न परामर्शेनान्यथा कल्पनम् ॥ २० ॥

अल्पश्रुतेरिति चेत्तदुक्तम् ॥ २१ ॥

ननु न वयं जीवे उपपत्तिरस्तीति जीवप्रकरणं कल्पयामः। किन्तु ब्रह्मणि नायमर्थ उपपद्यते। अल्पश्रुतेः। अल्पे हि पुण्डरीके कथं भगवदवस्थानम्। व्यापकत्वश्रवणात्। यावान् वायमाकाश इति। तस्माद् विरोधपरिहाराय जीव एवाराग्रमात्रस्तथा भवत्विति कल्प्यत इति चेत्तर्हि भवान् सम्यग्विचारकोऽस्मदीय एव। परं तत्समाधानं पूर्वमेवोक्तं, निचाय्यत्वादेवं व्योमवच्चेत्यत्र। तन्न प्रष्टव्यम्। विरोधस्तु सर्वभवनसमर्थे ब्रह्मणि नाशङ्कनीयः। तथा पुरुषशरीरश्च।

पुरुषत्वे च मां धीराः सांख्ययोगविशारदाः।
आविस्तरां प्रपश्यन्ति सर्वशक्त्युपबृंहितम् ॥

इति भगवद्वाक्यात्। तस्माद् भगवानेव दहर इति सिद्धम् ॥ २१ ॥

अनुकृतेस्तस्य च ॥ २२ ॥

मित्यत आहुः। * वक्ष्यतीत्यादि * तथाचैतत्सूत्रस्वारस्यादयमेवार्थ इत्यर्थः ॥ २० ॥

अल्पश्रुतेरितिचेत्, तदुक्तम् ॥ * तथा पुरुषशरीरं चेति *। विजिघत्सोऽपिपास इत्यादिभिर्धर्मैः सूचितं पुरुषशरीरं च विरुद्धमिति नाशङ्कनीयमित्यर्थः। स्फुटमन्यत्। अत्र च, यावान् वेति वाक्येन स्थितिकर्तृत्वं हार्दाकाशेऽतिव्याप्तमाशङ्क्य तन्निवारितमिति बुद्धिस्थानात्मिकैवाधिकरणसङ्गतिः ॥ २१ ॥ ॥ ५ ॥

अनुकृतेस्तस्य च ॥ उपोद्घातरूपामधिकरणसङ्गतिं बोधयि-

दहरविरुद्धं वाक्यमाशङ्क्य परिहरति। न तत्र सूर्यो भाति, न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति कठवल्ल्यामन्यत्र च श्रूयते। यच्छब्दानामेकार्थत्वं प्रकरणाद् ब्रह्मपरत्वं चाऽवगतम्। अर्थाच्च सन्देहः।

यस्मिन् द्यौरित्यत्र सूर्यादीनां ब्रह्माधारत्वमुक्तम्। अस्मिंश्च वाक्ये पूर्वार्द्धे तत्र तेषां भानं निषिद्धयते।

यत्र यत् सर्वदा तिष्ठेत् तत्र चेत्तन्न भासते।
क्व भासेताप्यपेक्षायां कर्मत्वेश्रुतिबाधनम्॥

यत्रेत्यधिकरणसप्तमी। यत्र लोकान्तरस्थितानामप्यभानं,

शुमाहुः। * दहरेत्यादि * मुण्डककठवल्ल्योर्ब्रह्मप्रकरणत्वस्याद्दहरत्वाद्यधिकरणेषु साधितत्वात् तद्वाक्यस्य ब्रह्मपरत्वेन तद्विरुद्धदहरवाक्यं न ब्रह्मपरमित्येतन्निरसितुं तथाऽऽशङ्केत्यर्थः। * कठवल्ल्यामन्यत्र चेति * तस्याः पञ्चमवल्लीसमाप्तौ, मुण्डकस्य द्वितीयमुण्डकसमाप्तौ श्रूयते। विषयमुक्त्वा संशयं तद्बीजं चाहुः। * यच्छदित्यादि *। कठवल्लीस्थानां, य एष सुप्तेषु जागर्ति, मन्त्रान्तरे, तस्मिन् लोकाश्रिताः सर्वे इति। अस्मिन् मन्त्रे तमेव भान्तमिति। मुण्डके, यत्र देवः क्रतुभिर्भूतिभावन इति, मन्त्रान्तरे, न तत्र सूर्यो भातीति यच्छब्दानामेकार्थत्वं ब्रह्मपरत्वं चावगतम्। तथाप्यर्थादेव सन्देह इत्यर्थः। अर्थात् कथं सन्देह इत्याकाङ्क्षायां समुपपादयन्ति * यस्मिन्नित्यादि * उक्तमुण्डकश्रुतौ द्युलोकादीनां भगवदाधारकत्वकथनात् सूर्यादीनां ब्रह्माधारत्वमुक्तम्, एतद्वाक्यपूर्वार्द्धे च भानं निषिद्ध्यते। अतः सन्देहः। नच भाननिषेधमात्रात् कथं सन्देह इति शङ्क्यम्। यत्र यदित्याद्युक्तरीत्या बाधितार्थत्वेन सन्देहसम्भवात्। नचोत्तरार्द्धे तमेवेत्यादिना तदपेक्षयाधिकभान एव निषेधपर्यवसानसिद्धेर्न बाधितार्थत्वमिति वाच्यम्। तदाप्यकर्मकस्य धातोः कर्मकथनेन कर्मत्वे श्रुतिबाधनम्। तेन सन्देह इत्यर्थः। अत्र पूर्वपक्षी

तत्राग्नेः का वार्तेति वचनात् सत्यलोकस्थितः कश्चित् तेजोविशेष एव वाक्यार्थ इत्येवं प्राप्ते।

उच्यते। अनुकृतेस्तस्य। भगवदनुकारार्थमेवैतद्वचनम्। स्वतो भाननिषेधः पूर्वार्द्धे। सर्वोऽपि पदार्थस्तमेवानुकरोति, सूर्यरश्मय इव, छाया पुरुषमिव। तस्माद् वाक्ये भगवदनुकारित्ववचनान्न नानार्थकल्पनम्। किञ्च। तस्य भासा सर्वमिदं विभातीति सूर्यादीनां स्वतः प्रकाशो नास्त्येव। घटवत्। भगवत्प्रकाशेनैव प्रकाशवत्त्वमिति चकारार्थः। तस्मात् स्वतो भाने लक्षणया कर्मत्वे वा भगवत्परत्वे सिद्धे नान्यार्थकल्पनम्॥ २२॥

श्रुतिं व्याकुर्वन् समाधत्ते * तत्रेत्यादि * अस्याः श्रुतेर्न सूर्यादीनामभाने तात्पर्यं, किन्तु, गजा यत्र न गण्यन्ते मशकानां तु का कथेतिवद् यत्र लोकेत्याद्युक्तरीत्या वचनादन्यभान एव तात्पर्यमतो न पूर्वार्द्धे दोषः। उत्तरार्द्धे तु, तमेव भान्तमिति कथनादन्यप्रकाशशालिनि सत्यलोके स्थितः कश्चित् तेजोविशेष एवोच्यते सूर्यादितेजोऽभिभावकः। इदानीमपि 'खद्योतो द्योतते तावद् यावन्नोदयते शशी। उदिते तु सहस्रांशौ न खद्योतो न चन्द्रमाः' इति तेजोविशेषस्यैव सजातीयाभिभावकत्वस्य प्रसिद्धत्वात्। नच कर्मत्वांशे श्रुतिबाधः। अनोः कर्मप्रवचनीयत्वेन तद्योगे जाताया द्वितीयाया उपपदविभक्तित्वेनार्थाभावादतः स एवाबाधितो वाक्यार्थ इत्येवं प्राप्ते इत्यर्थः। समाधिं व्याकुर्वते * भगवदित्यादि * सत्यलोके अन्यभाने वाक्यपूर्वार्द्धतात्पर्यं यदुक्तं, तन्न। उत्तरार्द्धे सर्वस्य तदनुकारित्वकथनात् सर्वस्य तद्भासा भानकथनाच्च। तथा सति सर्वस्य भगवदनुकारार्थमेवैतद्वचनम्। एतस्यैव विवरणं, * स्वतो भाननिषेधः पूर्वार्द्धे * इत्यादि। तर्हि पूर्वपक्षोक्ततेजोविशेषानुकारार्थमेव वाक्यप्रवृत्तिरस्त्विति चेत्तत्राहुः। * तस्मादित्यादि * उपनिषद्वाक्येऽपि वाक्यस्य प्रकरणसन्दष्टत्वात् प्रकरणिभूतभगवदनुकारित्ववचनमनुसन्धाय अन्यार्थभूततेजोविशेषकल्पनं न युक्तमित्यर्थः। सिद्धमाहुः। * तस्मादित्यादि *। तस्य भासेत्यादिवाक्यशेषात् स्वतोऽभाने

अपि स्मर्यते ॥ २३ ॥

व्याख्यातेऽर्थे सम्मतिमाह । अपीति समुच्चयः । 'न तद् भासयते सूर्यो न शशाङ्को न पावकः । यदादित्यगतं तेजो जगद्भासयतेऽखिलम् । यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्' इति च । तस्माद् भगवानेव सर्वावभासकः । तमेव सर्वमनुकरोतीति सिद्धम् ॥ २३ ॥

अनुकरणवचनात् कर्तृक्रियया अनाप्यस्यापीप्सितमत्वमात्रेणाऽऽप्यसारूप्यप्रयुक्तया गौण्या कर्मत्वे च वाक्यस्य भगवत्परत्वसिद्धौ नान्यार्थकल्पनं युक्तमित्यर्थः ॥ २२ ॥

अपि स्मर्यते ॥ अत्र भाष्यमुत्तानार्थम् । एवमत्र सूर्याद्यवभासनाशङ्कितविरोधपरिहारेण दहरवाक्यानुगुण्यमस्य साधितम् । तेनेदमधिकरणं पूर्वाधिकरणोपोद्घाततया तस्यैव शेषः ।

रामानुजाचार्यास्तु, इदं सूत्रद्वयं पूर्वाधिकरण एव योजयन्ति । अर्थं त्वेवमाहुः । तस्य दहराकाशस्य ब्रह्मणोऽनुकारादयमपहतपाप्मादिगुणको विमुक्तबन्धः प्रत्यगात्मा, न दहराकाशः । तदनुकारस्तत्साम्यम् । तच्च, निरञ्जनः परमं साम्यमुपैतीत्यत्र श्रूयते । अतोऽनुकर्ता प्रजापतिवाक्यनिर्दिष्टः । अनुकार्यं ब्रह्म दहराकाश इति । स्मृतिश्च, 'इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागता' इति । अधिकरणान्तरत्वे बाधकं त्वेवमाहुः । न तत्र सूर्यो भातीतिमन्त्राकरभूतस्य वाक्यस्य ब्रह्मप्रकरणत्वम्, अदृश्यत्वाद्यधिकरणद्युभ्वाद्यायतनाधिकरणाभ्यां निर्णीतम् । ज्योतिश्चरणाद्यधिकरणेषु परस्य ब्रह्मणो भारूपत्वमभ्युपगतमतो ब्रह्मत्वे भारूपत्वे च सन्देहाभावेन पूर्वपक्षानुत्थानात् । श्रुतावनुभातिपदेन सूत्राक्षरवैरूप्याच्चेति।

तत्र प्रकरणेन सन्देहापायेऽप्यर्थस्य लिङ्गरूपत्वेन प्रबलतया पूर्वोक्तरीत्या पूर्वपक्षस्य शक्यवचनत्वात्, स्वकृतव्याख्यानेऽपि विषयवाक्ये साम्यपदेन सूत्राक्षरवैरूप्यस्य तौल्याच्च तच्चिन्त्यम् ।

भिक्षुस्तु विषयानुल्लेखात्साधिकरणान्तरम् । किन्तु पूर्वसूत्रो-

शब्दादेव प्रमितः ॥ २४ ॥

प्रसङ्गात् पुनर्बाधकान्तरमाशङ्क्य परिहरति । अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य न ततो विजुगुप्सति । तथा, अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवा धूमक इति तत्रैव श्रूयते । यावान् वा अयमाकाश इति व्यापकत्वमन्तःस्थितस्य प्रतीतम् । अङ्गुष्ठमात्रता चात्र प्रतीयते । अतो विरोधाज्जीवस्यैव लोकान्तरगन्तृदेहवत उपासनार्थमीशानत्वादिधर्माः ।

काल्पश्रुतिदूषणपरिहारायेदं द्वयम् । तदनुकारित्वं च मुखतत्प्रतिबिम्बयोरिव शक्तिशक्तिमतोर्जीवब्रह्मणोः समानव्यापारफलत्वम् । तथाच जीवे लिङ्गानुकरणादिव ब्रह्मणि जीवानुकरणादुपपद्यते । शक्तेरल्पत्वं शक्तिमत्युपचर्यत इति भावः । स्मृतिश्च, कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्य इति । शब्दादेव प्रमित इति सूत्रमप्यल्पत्वसाधनार्थम् । परमात्मा, अणोरणीयान् महतो महीयानित्यादिशब्दादेव अत्यल्पः प्रकर्षेण मितोऽवगत इत्यर्थात् । न त्वधिकरणान्तरमित्याह ।

तदपि मन्दम् । तदुक्तमिति सूत्रांशेनैव स्थानाल्पत्वदोषपरिहारसिद्धौ पुनस्तदर्थकप्रयासस्य वैयर्थ्यात् । जीवाल्पत्वस्य लिङ्गानुरोधेनौपचारिकत्वात् तस्य किं वानुकरणमित्यप्यसङ्गतम् । सङ्कुच्य प्रदेशविशेषेण स्थितिरूपस्यैव व्यापारस्य पूर्वत्रापि सिद्धेर्विशेषाभावाच्च । अल्पत्वस्य पूर्वोक्तयुक्तिभिरवास्तवत्वाङ्गीकारे पुनस्तस्य शब्देन प्रमितत्वोक्तेरप्यसङ्गतत्वाच्चेति । न च विषयानुल्लेखादधिकरणान्तरत्वाभाव इत्यपि युक्तम् । उक्तरीत्याऽर्थेन सन्देहे तन्निरासस्यावश्यकत्वादिति दिक् ॥ २३ ॥ ॥ ६ ॥

शब्दादेव प्रमितः ॥ * बाधकान्तरमिति * परिमाणविरोधरूपं तदित्यर्थः । * तत्रैव श्रूयते इति * । अस्य विषयः कठवल्ल्याश्चतुर्थवल्लीसमाप्तौ श्रूयते । संशयमाहुः । * यावानित्यादि * । तथाचातो विरोधात् संशय इत्यर्थः । पूर्वपक्षमाहुः । * अत इत्यादि * । * जीवस्यैवेति * । अङ्गुष्ठमात्रो रवितुल्यरूपः सङ्कल्पाहङ्कारसम-

अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति तन्निरासार्थम् । तस्मादङ्गुष्ठमात्रो न भगवानेवं माप्राप्त उत्तरमाह ॥ शब्दादेव प्रमितः ॥ अत्र सन्देह एव न कर्तव्यः । शब्दादेव प्रकर्षेण विमानात् । यथा दहरवाक्ये सूक्ष्मस्यैव व्यापकत्वं, तथाऽङ्गुष्ठमात्रस्यैवेशानत्वम् । यदि भगवाँस्तादृशो न स्यादन्यस्य तादृशत्वं नोपपद्येत । तस्माद् भगवतः सर्वतःपाणिपादान्तत्वाद् यत्र यावानपेक्ष्यते तत्र तावन्तं श्रुतिर्निरूपयतीति अङ्गुष्ठमात्रः परमात्मेति सिद्धम् ॥ २४ ॥

हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ २५ ॥

नन्वनेकरूपत्वं विरुद्धधर्मवत्त्वं माहात्म्यार्थं स्वरूपे निरूपय-

---

न्वितो य इति श्रुत्यन्तरात् तस्यैवेत्यर्थः । ननूपासनार्थमपीशानत्वादिधर्माणामेव ग्रहणे को हेतुरित्यत आहुः । * अङ्गुष्ठेत्यादि * । तथात्र तस्मादङ्गुष्ठमात्राद् व्यतिरिक्तत्वमस्मिन् मुक्तजीवे बोधयितुमेतेषां धर्माणां निरूपणमित्यर्थः । अङ्गुष्ठमात्रमिति वाक्यं तु सावित्र्युपाख्याने । अथ सत्यवतः कायात् पाशबद्धं वशं गतमिति तत्पूर्वार्द्धम् । सत्यवाँस्तु सावित्र्याः पतिरिति । सिद्धान्तं व्याकुर्वन्ति । * अत्रेत्या दि * । * शब्दादेवेत्यादि * । वाक्ये पूर्वार्द्धेऽङ्गुष्ठमात्रत्वमुक्त्वोत्तरार्द्धे तावन्मात्रस्यैव भूतभव्येशानत्वं वक्तीति वाक्यरूपाच्छब्दादेव प्रकर्षेण विरुद्धधर्माश्रयतया मानादित्यर्थः । तदेव व्याकुर्वन्ति * यथेत्यादि * किञ्च । पूर्वाधिकरणविषयवाक्ये सर्वस्य भगवदनुकारत्वसिद्धेरत्र प्रत्यक्षस्यापि दृष्टान्तविधया गमकत्वं वक्तुं तर्कमाहुः । * यदीत्यादि * । * अन्यस्य तादृशत्वमिति * स्वल्पस्यापि राजादेरनेकजनेशनशीलत्वम् । सिद्धमाहुः । * तस्मादित्यादि ॥ २४ ॥

हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ अन्ये तु, अपेक्षयेत्यस्य

ति । प्रादेशमात्रत्वं च ध्यानार्थम् । अङ्गुष्ठमात्रत्वस्य कोपयोग इति चेत् तत्राह । तुशब्देन निष्प्रयोजनत्वं निराक्रियते । अस्ति प्रयोजनम् । तदाह । हृदि अङ्गुष्ठमात्रं निरूप्यते । केन हेतुना। अपेक्षया । ईश्वरकार्यापेक्षया । ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठतीति स्मृतेः । रक्षार्थमङ्गुष्ठमात्र इत्यर्थः । ननु प्रमाणान्तरत्वे किमेतन्न सम्भवति, तत्राह । मनुष्याधिकारत्वात् । मनुष्यानधिकृत्येदं मृत्यूपाख्यानं प्रवृत्तम् । अतो मनुष्याणां हृदयस्याङ्गुष्ठमात्रत्वात् । यद्यपि हृदयं स्थूलं, तथापि धर्मरूपं तावदेव । तावन्मात्रस्यैवावदानश्रवणात् । तस्मादङ्गुष्ठमात्रस्यैव सर्वधर्मरक्षकत्वादङ्गुष्ठमात्रो भगवानेवेति सिद्धम् ॥ २५ ॥

तदुपर्यपि बादरायणः सम्भवात् ॥ २६ ॥

अङ्गुष्ठमात्रनिरूपणार्थं मनुष्याधिकारे निरूपिते कस्यचिद् भ्रमो भवेत् सर्वत्र ब्रह्मविद्यायां मनुष्याणामेवाधिकार इति । तन्निराकरणार्थं देवादीनामधिकारमाह ।

हृदयस्थानापेक्षयेत्यर्थं वदन्ति । तन्मते परिमाणमौपाधिकम् । सिद्धान्ते तु, अणोरणीयान् महतो महीयानिति, यदेकमव्यक्तमनन्तरूपमिति श्रुतिभ्यामुभयथा तात्त्विकं परिमाणमिति भेदः । * प्रमाणान्तरत्व इति * परिमाणान्तरत्वे स्फुटमितरत् । इदमप्यधिकरणं दहराधिकरणस्यैव शेषः । अग्रिमं चाधिकरणद्वयमधिकारनिरूपकत्वात् प्रासङ्गिकम् ॥ २५ ॥ ७ ॥

तदुपर्यपि च बादरायणः सम्भवात् ॥ अत्रानुप्रसङ्गः सङ्गतिरिति बोधयन्तः सूत्रमवतारयन्ति * अङ्गुष्ठमात्रेत्यादि * । * कस्यचिदिति * जैमिनीयादिदर्शनाभिनिविष्टस्य । जैमिनीया ह्येवं मन्यन्ते । अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तश्च वैदिके कर्मण्य-

तदुपर्यपि । मनुष्यापेक्षयार्वाक्तनानामधिकारो नास्ति । तत्रापि वैदिकधर्महेतोस्त्रैवर्णिकानां धर्मयुक्तानामागतम् । ततोऽपि ये साध्यादयो धर्मयुक्तास्तेषामप्यधिकारः । तत्र जैमिनिप्रभृतीनां न संमतिरिति स्वनामग्रहणम् । विशिष्टत्रैवर्णिकानारभ्य प्रजापतिपर्यन्तं शतानन्दिनामधिकारं मन्यते बादरायणः । कुतः । सम्भवात् । सम्भवति तेषां ज्ञानाधिकारः । धर्मज्ञानाभ्यां सातिशयाभ्यां हि तादृशजन्मसम्भवात् । न हि तेषां पूर्वसंस्कारो लुप्यते । अक्षरपर्यन्तं शतोत्कर्षश्रवणादुपर्यपेक्षा ।

धिकारी । तत्र पूर्वं सामर्थ्यमपेक्षितम् । तच्च देवादीनां नास्ति । तेषां शरीराभावात् । नच मन्त्रार्थवादाभ्यां तत्सिद्धिः । तयोः कर्मविधिशेषत्वेनान्यपरतया तत्प्रतिपादने तात्पर्याभावात् । कर्मविधयश्च सापेक्षितोद्देश्यत्यातिरिक्तं देवतागतं धर्मान्तरं किमपि नापेक्षन्त इति तच्छेषभूतौ तौ तदतिरिक्तं विग्रहं न साधयितुं शक्तौ । शरीराभावादेव च नार्थित्वमपीति । तदेतन्निराकर्तुं देवादीनामधिकारमाहेत्यर्थः । नन्वधिकारविचारे सर्वेषामेव विचारणीयः संकुतो न विचार्यत इत्यतः सूत्रं विवृण्वन्ति * तदुपरीत्यादि * मनुष्यादर्वाक्तनेषु योग्यताभावादेव नास्ति । मनुष्येष्वपि वैदिकधर्मं प्रति कारणभूतस्योपनयनादेः सत्त्वात् त्रैवर्णिकानां धर्मयुक्तानामेवाधिकार इति जैमिनिसूत्रेष्वेव सिद्धम् । तदुक्तानामप्यविरुद्धानामवाभ्यासादिवदुपादेयत्वात् । तथाप्यपिशब्दोक्तिमहिम्नैवावगतं सूचितमित्यर्थः । शेषं प्रकटार्थम् । सम्भवं विवृण्वन्ति * धर्मेत्यादि * । तं विद्याकर्मणी समन्वारभेते इति श्रुत्या शरीरारम्भं प्रति तयोः कारणत्वात् तयोः सातिशयत्वे ताभ्यां तादृशदेवादिजन्मसम्भवात् । जन्मनि, यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत् सहजं पुरस्तादिति मन्त्रोक्तलिङ्गेन जन्मत एव प्रजापतेरुपनीतत्वे, यो वै वेदांश्च प्रहिणोति तस्मा इति वेदाध्ययनत आक्षेपादपि च सिद्धेः । ब्रह्मणे ब्राह्मणमालभते, क्षत्राय राजन्यं, मरुद्भ्यो वैश्यमिति

अतोऽक्षरप्राप्तेः शुद्रब्रह्मविद्याहेतुकत्वादुत्तरोत्तरमुपदेष्टॄणां विद्यमानत्वात् प्रजापतिपर्यन्तं सर्वेषामधिकारः सम्भवति । सम्भव-वचनाद् दुर्लभाधिकारस्तत्रेति सूचितम् । यो यो देवानां प्रत्यबुध्य-त स एव तदभवत् तथर्षीणां तथा मनुष्याणामिति । तदुपर्यप्य-धिकारः सिद्धः ॥ २६ ॥

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥२७॥

श्रुत्या ब्राह्मण्यादीनां देवतात्वात् तासां चोपनयनादिनाऽनुग्रहतपः-प्रभृतिभ्योऽपि मतङ्गविश्वामित्रप्रभृतिषु स्मरणादुपनयनाभावे ब्रा-ह्मण्यादौ सिद्धे, देवादिष्वपि शतानन्दिश्रुतौ, श्रोत्रियस्य चाका-महतस्येति लिङ्गादध्ययने सिद्धे, 'कालेन नष्टा प्रलये वाणीयं वेद-संज्ञिता । मयादौ ब्रह्मणे प्रोक्ता' इति सन्दर्भेण देवादीनामध्य-यने पुराणेऽप्युपबृंहितेऽधिकारयुक्तजन्मसम्भवादित्यर्थः । नच सा-तिशयत्वेऽपि पूर्वसंस्कारस्य कालेन लोपादसम्भव इति शङ्क्यम् । न हि तेषां पूर्वसंस्कारो लुप्यते । यथा नारदस्य । नच मन्त्रार्थवा-दयोर्देवविग्रहासाधकत्वम् । यज्ञोपवीतमन्त्रस्य क्वापि विधौ शेष-भावाभावाद्, यस्यै देवतायै हविर्निरुप्तं स्यात् तां मनसा ध्यायेदिति ध्यानविधेर्देवताविग्रहमन्तरेणानर्थक्यप्रसङ्गाददशरीराया देवताया बुद्धावनारोहात् । अत एव, वज्रहस्तः पुरन्दर इत्यादयोऽपि वि-द्यमानगुणप्रकाशन एव स्मारकत्वं प्राप्नुवन्ति । अर्थवादा अपि स्तावकत्वं तदैव लभन्ते यदि देवताया विग्रहो भवति । स्तुतेरु-त्कर्षाधायकगुणवर्णनरूपत्वेन गुणाभावे असत्कथनं प्रतारकतां स-म्पादयेदतस्तावकत्वेऽपि विग्रहसाधकत्वमक्षुण्णम् । एवं सामर्थ्ये विद्वत्त्वे च सिद्धे शतानन्दश्रुतावक्षरपर्यन्तं शतोत्कर्षश्रावणादुप-र्यपेक्षापि निर्बाधैव । अधिकारपर्युदासस्तु न क्वापि श्रूयते । सिद्ध-माहुः । * अत इत्यादि * । नन्वत्र सत्त्वादित्यनुक्त्वा, सम्भवादिति कस्मादुक्तमित्यत आहुः । * सम्भवेत्यादि * ॥ २६ ॥

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥

नन्वेवमुपरितनानां ज्ञानाधिकारे स्वीक्रियमाणे तत्पूर्वभाविष्वप्यधिकारो वक्तव्यः । कर्मणि वेदाध्ययने उपनयनादिषु च । ततश्च तेषां ब्राह्मण्याद्यभावाद्देशद्रव्याद्यभावाच्च पौराणिकेन मतेन देवान्तराभावाच्च तदभावेऽपि क्रियमाणे कर्मणि श्रुतिविरोध इति चेन्न ।

अनेकप्रतिपत्तेर्दर्शनात् । बहूनां प्रतिपत्तिर्दृश्यते । बहवोऽत्र कर्मणि प्रवर्तमाना दृश्यन्ते । साध्या वै देवाः सुवर्गकामा एतत् षड्रात्रमपश्यत् तमाहरत् तेनाऽयजन्त । सोऽग्निष्टोमेन वसूनयाजयत् । स उक्थ्येन रुद्रानयाजयत् । सोऽतिरात्रेणादित्यानयाजयदित्यादि । यथैकशतं वर्षाणि प्रजापताविन्द्रो ब्रह्मचर्यमुवासेति । भूपावागस ऋषीन् वृत्वा यज्ञकरणं च श्रूयते, देवा वै सत्रमासते-

---

*तत्पूर्वभाविष्वित्यस्यैव व्याख्यानं, * कर्मणीत्यादि * । * ततश्चेत्यादि * । ततश्च अङ्गीक्रियमाणादधिकारादेव तेषां ब्राह्मण्याद्यभावात् । अधिकारस्य विप्रतिपन्नतया तद्बलेन ब्राह्मण्यादेर्वर्णस्याक्षेप्तुमशक्यत्वात् । पूर्वोक्तरीत्या सदापादनेऽपि देशस्य पृथिवीरूपस्य व्रीह्यादिरूपद्रव्यस्य आदिपदेन स्वर्लोकादौ सूर्यादिगत्यभावाद्दर्शादिकालस्याऽभावाच्च । पुराणं हृदयं स्मृतमिति तेषु, चेन्द्राद्यतिरिक्तास्तेऽन्ये न प्रसिद्धा इति पौराणिकेन मतेन देवान्तराभावाच्च । ऐन्द्रं दध्यमावास्यायामित्यादावधिन्द्रस्येन्द्रान्तराभावात् स्वयं स्वस्य यजने अपूर्वानुत्पत्तिप्रसङ्गादप्रयोजकत्वाच्च तदभावे प्राप्ते, तथात्वेऽपि क्रियमाणे कर्मणि श्रुतिविरोध इत्यर्थः । सिद्धान्तांशं व्याकुर्वन्ति । * बहूनामित्यादि * । एतस्यैव व्याख्यानं, * बहव इत्यादि * । वर्णसत्तायाः पूर्वं साधितप्रायत्वादाश्रमसत्तामाहु. । * यथेत्यादि * देशसत्तामाहुः । भूमावित्यादि * । एतेन, आदित्या वा अस्माल्लोकादमुं लोकमायन्नित्यादि स्मारितम् । तेन कालद्रव्यसत्तापि सि-

सादौ । दर्शनवचनाद् स्वस्यापि ऋत्विक्त्वं कर्मकरणं च द्योतयति । अथवा सर्वपदार्थानामनेका प्रतिपत्तिर्बहुधोपयोगो वेदे दृश्यते । यथा चतुर्द्धाकरणादि, परिधिप्रहरणादि, तुषोपवापादि, तद्विद्यमाने क्रियते, नाविद्यमाने । तथा यत्र ये पदार्था न सन्ति तत्र कर्म तदभावेऽपि भवति । तथाहि दृश्यते । पर्वते सोमवाहकाऽनोऽभाववत् । यज्ञेन यज्ञमयजन्त देवाः । 'इति सम्भृतसम्भारः पुरुषावयवैरहम् । तमेव पुरुषं यज्ञं तेनैवाऽयजमीश्वरम्' इत्यादिवाक्यैः सर्वसम्भृत्युपपत्तिश्च । आधुनिकान् प्रति वेदविभागाज्जैमिनेस्तथा निर्णयः । तस्माद् कर्माधिकारः कर्मकरणं चोपर्यपि सिद्धम् ॥ २७ ॥

द्युतति । ऋत्विजोऽपि, अग्निर्होता अश्विनाध्वर्यू उभौ हि वै देवानां शमितारौ अग्रिगुश्चापापश्चेत्यादिश्रुत्या ज्ञेयम् । प्रकारान्तरेण हेतुं व्याकुर्वन्ति । * अथवेत्यादि * । नाविद्यमाने * इत्यन्तमेकधा प्रतिपत्तिर्व्याख्याता । प्रकारान्तरं दर्शयन्ति । * तथा यत्रेत्यादि * । * सोमवाहकाऽनोऽभाववदिति * । सोमवाहकं यदनः शकटं तदभाववत् । तथाच कृष्णलेष्ववघातो यथा चैतुष्यरूपद्वारबाधाल्लुप्यते, तथात्र मार्गरूपद्वारबाधादनोऽपि लुप्यत इति तस्मिन् क्वचिदविद्यमानेऽपि कर्म क्रियत इति तद्वदित्यर्थः । * यज्ञेनेत्यादि * । एतेन देवतासद्भावोऽप्युक्तः । पुरुषावयवरूपाणां तेषां सत्त्वादिति । तथाच प्राथमिकानां यागे भगवानेव देवतास्थानापन्नः । एकं सद्विप्रा बहुधा वदन्तीति । अतो देवतान्तराभावेऽपि न तेषां कर्मकरणे विरोध इत्यर्थः । तर्हि जैमिनीयस्मृतेः का गतिरित्यत आहुः : * आधुनिकेत्यादि * । तथाचासर्वज्ञान् प्रत्येकवेदस्य मनुष्यमात्राधिकारनिर्णय इत्यर्थः । तेन, जैमिनीये च वैयासे न विरोधोऽस्ति कश्चनेति पुराणवाक्यमपि समर्थितं ज्ञेयम् ।

अन्ये तु देवानां विग्रहाङ्गीकारे एककालिकनानायागेषु तत्सन्निधानविरोध इत्येवं व्याख्याय सौभर्यादिवद्योगेनानेकशरीरग्र-

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् ॥ २८ ॥

ननु मास्तु कर्मकरणे विरोधः। शब्दे तु भविष्यति। अर्थज्ञानानन्तरं हि कर्मकरणम्। वेदाद्वार्थज्ञानम्। तत्र साध्यादीनां वेद एव कर्मकरणं श्रूयते। तत्र ज्ञाने कर्मकर्तृविरोधः। अन्यकल्पनायां त्वनवस्था। व्यवस्थापकाभावात्। वेदो वस्तूनां वृत्तान्तं वदन् वस्तूनामधिकारं वदेत। वदन् वा कथमनित्यो न भवेदिति चेन्न। अतः प्रभवात्। अतः शब्दात् प्रभवः शब्दोक्तपदार्थानाम्।

ष्णमनेकप्रतिपत्तिपदार्थत्वेन व्याख्याय समादधते ॥ २७ ॥

शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् ॥ आशङ्कांशं व्याकुर्वन्ति * नन्वित्यादि *। पूर्वोक्तरीत्याऽधिकारव्यवस्थापनेन देवेषु कर्तृत्वापादनात् तैः कर्मकरणे मास्तु विरोधस्तथापि शब्दे तु भविष्यति। कथमित्याकाङ्क्षायां व्युत्पादयन्ति। * अर्थेत्यादि *। * ज्ञाने कर्मकर्तृविरोध इति * तत्र वेदजन्यज्ञाने विचार्ये तस्य ज्ञानस्य साध्यादिदेवसाध्ययागात्मककर्मरूपविषयसापेक्षत्वात् तत्कर्तॄणां साध्यादिदेवानां तद्यागार्थं प्रवृत्तत्वेन वाक्यार्थप्रमितिसमये तस्य विषयस्याभावेनोत्पत्तौ सतो वात्माश्रयाज्ज्ञाने कर्मकर्तृविरोधः। श्रुतौ यागकर्तॄणां भूतत्वेन निर्देशाज्ज्ञानविषयभूतानां समनन्तरभाविज्ञाने कर्मकर्तृविरोध इति वा। नच ते साध्याख्या देवाः, सा यागव्यक्तिश्चान्यैवेति युक्तम्। अन्यकल्पनायां त्वनवस्था। व्यवस्थापकाभावात्। तस्माद् वेदो वस्तूनां वृत्तान्तं वदंस्तेषामधिकारं वदेत। ततश्चैवमधिकारं वदंस्तदानीमर्थाभावेन शब्देऽर्थसम्बन्धस्यादानयवचनत्वादिदानीन्तनेन तेन सम्बन्धं प्राप्नुवन् पदपदार्थसम्बन्धद्वारा शब्दस्य पाश्चात्यत्वं सम्पादयन् कथमनित्यो न भवेत्। तथाच देवानां कर्माधिकाराङ्गीकार एवं शब्दे विरोध इत्यर्थः। परिहारांशं व्याकुर्वन्ति। * अतः शब्दादित्यादि *। * प्रभव इति * प्रकर्षेण भवो विद्यमानता। तथाच शब्दोक्तपदार्थानां

वेदोक्ताः सर्व एव पदार्था आधिदैविका एव पुरुषावयवभूताः । सर्वानुकारित्वाद् भगवतः । अतो नामप्रपञ्चो वेदात्मको भिन्न एवाङ्गीकर्तव्यः । स केवलं शब्दैकसमधिगम्यः । वेदैश्च सर्वैरहमेव वेद्य इति । अतस्तस्य प्रपञ्चस्य भिन्नत्वान्न विरोधः शब्दे । कथमेवमत आह । प्रत्यक्षानुमानाभ्याम् । प्रत्यक्षं तावदिदानीमपि यजमानो यजमानकृत्यम् ऋत्विजश्च स्वकृत्यं वेदादेवावगच्छन्ति । नचाकृतिमात्रवाचकत्वेनाविरोधः । सर्वत्र लक्षणा-

---

शब्दादेव नित्यतावधारणाच्च पूर्वोक्तो विरोध इत्यर्थः । तदुपपादयन्ति । * वेदोक्ता इत्यादि * । * सर्वानुकारित्वादिति * सर्वमनुकारि यस्य तादृशत्वात् । अतोऽनुकारिणः सकाशादनुकार्यस्य भिन्नत्वात् । * अत इति * वेदैकवेद्यत्वेन लौकिकप्रमाणाविषयत्वात् । * वेदात्मक इति * ज्ञानात्मकः । तथाच साध्यादिभिर्देवैर्वेदादवगम्यमानस्य प्रपञ्चस्य भिन्नत्वात् तेनैव सह पदानां सम्बन्धाच्च ज्ञाने कर्मकर्तृविरोधो, न वा वेदानित्यत्वम् । भूतभावित्वव्यवहारकालेऽपि तद्धर्मवत्त्वेन तस्य सत्त्वात् । अन्यथा भूतत्वभावित्वयोर्निराश्रयत्वप्रसङ्गेन तयोर्धर्मत्वस्य व्यवहारस्य चोच्छेदप्रसङ्गात् । अतो न विरोधः शब्द इत्यर्थः । अत्र प्रत्यक्षविरोधमाशङ्कते । * कथमित्यादि * । युक्तिं व्याकुर्वते । * प्रत्यक्षमित्यादि * । * वेदादेवावगच्छन्तीति * । सिद्धमेव कृत्यं वेदादेव वृद्धव्यवहारादिनाऽवगच्छन्ति । तथाच यथा कर्म तद्वेदैकगम्यं तथा पदार्था अपीत्यर्थः । ननु पदार्थसम्बन्धनित्यत्वार्थमतिरिक्तप्रपञ्चाङ्गीकारोऽनर्थकः । जैमिनीयोक्तरीत्या आकृतिवाचित्वेऽपि तत्सिद्धेः । नच व्यक्त्यप्रतीत्यापत्तिः । आक्षेपादेव तत्सिद्धेरित्येकदेशिनो मन्यन्ते । तदसङ्गतमित्याशयेनाहुः । * नचाकृतीत्यादि * । अयमर्थः । व्यक्तेराक्षेपलभ्यत्वं वदतामाक्षेपो नाम कः पदार्थ इति वक्तव्यम् । स किमनुमानं, लक्षणा वा । नाद्यः । शब्दस्यानुमानविधया बोधकत्वे प्रमाणान्तरत्वभङ्गप्रसङ्गात् । शब्दसहकृतानुमानस्यैव प्रमाणत्वे लाघवात् । नचानुमानस्यैव सहकारित्वमिति वाच्यम् । नियामकाभावात् । नेतरः ।

प्रसङ्गात् । यः सिक्तरेताः स्यादित्यादिषु विरोधश्च ।

न च प्रवृत्तिनिमित्तस्यैव वाच्यत्वम् । प्रवृत्तिवैयर्थ्यापत्तेः । सङ्केतग्रहविरोधाच्च । सर्वस्यापि पदार्थस्य भगवत्त्वेनानुपस्थितिदोषः । सङ्केतग्रहेऽपि ।

सर्वत्र लक्षणाप्रसङ्गात् । तथाच पक्षद्वयेऽपि दोषप्रसङ्गाज्जैमिनीयानुसरणेनाविरोधसाधनमसङ्गतमित्यर्थः । अनुमानपक्षस्त्वतिशिथिलत्वाद् भाष्ये नोट्टङ्कित इति ज्ञेयम् । नन्वस्तु लक्षणा, जैमिनेरप्यस्मिन्नंशे आदरणीयत्वात् प्राचीनवृत्तिकारैरेकशास्त्र्यस्यैवादृतत्वादित्यत आहुः । * य इत्यादि * । अयमर्थः । न हि सर्वत्र वेदे रूढा एव शब्दाः प्रयुज्यन्ते । किन्तु यौगिका अपि । यथा, यः सिक्तरेताः स्यात् प्रथमायां तस्य जिह्वामुपदध्यादिति सिक्तरेतःपदम् । न हि तत्राकृतिः काचित् सम्भवति, या व्यक्तिरूपं सिक्तरेतसमाक्षिपेत् । किन्तु सिक्तरेतस्त्वं तत्रोपाधिः । स च रेतःसेकानन्तरभावित्वादनित्य इति । अवयवशक्त्या बोधनेऽपि सिक्तत्वं सेकानन्तरभावित्वादनित्यमतस्तत्र पदसम्बन्धाङ्गीकारे शब्दानित्यत्वस्यापरिहाराद्दोषतादवस्थ्यमित्यर्थः । ननु नास्माभिर्जातावुपाधौ वा शक्तिरङ्गीक्रियते, अपि तु पदप्रवृत्तिनिमित्ते । स कोऽप्यस्तु । तस्य नित्यत्वान्न कोऽपि दोष इत्यत आहुः । * न च प्रवृत्तीत्यादि । * प्रवृत्तिनिमित्तस्य धर्मस्य सर्वत्र नित्यतैवेति नियमाभावान्नित्यसम्बन्धाभावे च तेन व्यक्त्यनाक्षेपात् तां विना कार्यासम्भवे पदप्रवृत्तिवैयर्थ्यापत्तेरित्यर्थः । अथ तादृशस्याप्यर्थबलादाक्षेपकत्वमाक्षेपश्चोपनय इति विभाव्यते तदा दूषणान्तरमाहुः । * सङ्केतेत्यादि * । तादृशस्थले हि सङ्केतग्रहो व्यवहारादिना वाच्यः । तत्र व्यवहारादिस्तु व्यक्तावेव पर्यवसन्नानुपस्थिते प्रवृत्तिनिमित्ते सङ्केतं ग्राहयिष्यति । यदि च, मागृहीतविशेषणन्यायेनोपस्थितिरङ्गीक्रियते तदापि समानसंवित्संवेद्यत्वापातेन विशिष्ट एव शक्तेः पर्यवसानमनित्यतानुद्धार इति तद्विरोधादित्यर्थः । ननु मास्त्वेकदेशिमतं, तथापि वैदिकसृष्टेरतिरिक्ततयाङ्गीकारे तस्या भगोचरत्वेनानुपस्थितत्वात् तत्र सङ्केतग्रहो दुर्लभ इत्यत आहुः । * सर्वस्येत्यादि * । तथाच पूर्वेषां प्रह्लादीनां

जमदग्नीनां पञ्चावत्तमित्यनुमानम्। न हि स्वयं जामदग्न्य इति प्रत्यक्षोऽनुभवोऽस्ति। परोक्षव्यवहारस्यैवानुमानत्वमिति प्रवादः। तस्मात् प्रत्यक्षानुमानाभ्यामिदानीन्तनभौतिकयज्ञपदार्थेषु भगवदवयवावेशस्तथाऽमुत्रापि। तस्माद् वैदिकः पदार्थः सर्वोऽप्याधिदैविको भिन्न इति सिद्धम्॥ २८॥

भगवद्दर्शनेनोपस्थितेः सुकरत्वाददोषः। ततोऽर्वाचीनानामिदानीन्तनपर्यन्तानां तु सम्प्रदायपारम्पर्यात् सर्वस्य भगवदनुकारित्वेन लौकिकसदृशतयोपमानेन सङ्केतग्रहसौकर्याददोषः। अन्यथाधादिनां स्वज्ञानमेवातो न कोऽपि दोष इत्यर्थः। अतो जैमिनिमते वेदार्थावगतिरिव व्यासमते वैदिकपदार्थानामप्यवगतिरिति कर्मावगतिप्रत्यक्षेण साधितम्। अनुमानेन साधयितुं तदाहुः। * जमदग्नीत्यादि *। नच मनुष्यत्ववत् तदपि प्रत्यक्षमिति वाच्यम्। भारते ब्राह्मण्यविचारे, 'जातिरत्र महासर्प मनुष्यत्वे महामते। सङ्करात् सर्ववर्णानां दुष्परीक्ष्येति मे मतिः। सर्वे सर्वास्वपत्यानि जनयन्ति सदा नराः' इति कथनात्। स्त्र्यपराधात् कर्तुश्च पुत्रदर्शनमिति जैमिनीयसूत्रेऽपि पुत्रदर्शनमात्रकथनेन तज्जात्यदर्शनसूचनात्। प्रवरानुमन्त्रणश्रुत्या, यन्मे माता प्रममाद यच्चचारानुव्रतमिति श्रुत्या च तथा निश्चयात्। नच, बीजाद्योनिर्बलीयसीति प्रसिद्धेर्मातृगोत्राद् गोत्रनिर्णय इति वाच्यम्। 'माता भस्त्रा पितुः पुत्रो येन जातः स एव सः' इति शास्त्रापेक्षया तस्या दुर्बलत्वादिति। नन्वत्र जामदग्न्यज्ञाने हेत्वदर्शनात् कथमस्यानुमानत्वमित्यत आहुः * परोक्षेत्यादि *। तथाच परोक्षेण स्वस्य यथा जामदग्न्यत्वावगतिस्तथा परोक्षेणापि तस्य प्रपञ्चस्यावगतिरित्यर्थः। सिद्धमाहुः। * तस्मादित्यादि *।

शङ्कराचार्यादयस्तु, एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यानित्यादिप्रत्यक्षश्रुतिं, सर्वेषां स तु नामानि रूपाणि च पृथक् पृथगित्यादिस्मृतिरूपमनुमानं चोपन्यस्य शब्दनिमित्तिकां व्यक्त्युत्पत्तिमङ्गीकृत्य सूत्रं व्याचक्षते।

अत एव च नित्यत्वम् ॥ २९ ॥

साधिकां विशेषोपपत्तिमाह । अत एव अस्मादेव हेतोर्वेदस्य नित्यत्वम् । सर्वप्रपञ्चवैलक्षण्येन । चकाराद् ब्रह्मतुल्यत्वम् । शब्दब्रह्म वेदपुरुष इत्यादिवाच्यत्वम् । अस्यास्तु सृष्टेर्ब्रह्मोपादानस्य सर्वज्ञतया कथनं तन्माहात्म्यनिरूपणार्थम् । वन्धिका होषा । मोचिका तु सा । अत एव ऋषीणामप्यत्र मोहः । निःश्वसितवचनाच्च । तस्याप्ययं प्रमाणभूतो नित्य इति । अर्थप्रधान्याद् ब्रह्मविद्या परा विद्या । प्रपञ्चभेदादेव लौकिकवैदिकशब्दव्यवहारभेदौ ।

तथा सति, समाननामरूपसूत्रस्यानावद्यकता स्यादित्यवधेयम् ॥ २८ ॥

अत एव च नित्यत्वम् ॥ सूत्रमवतारयन्ति * साधिकामित्यादि * । व्याकुर्वन्ति * अत एवेत्यादि * । * अस्मादित्यस्यैव विवरणं, * सर्वप्रपञ्चवैलक्षण्येनेति * । ननु यदि वैदिकसृष्टिरन्यैव तदा श्रुतौ, यतो वा इमानीत्यादिषु ब्रह्मण एतत्सृष्ट्युपादानत्वकथनं निष्प्रयोजनकं स्यादित्यत आहुः । * अस्या इत्यादि * । * ब्रह्मोपादानस्येति * । ब्रह्मरूपस्योपादानस्य । * तन्माहात्म्यनिरूपणार्थमिति * । तस्या वैदिक्याः सृष्टेः प्रकटसच्चिदानन्दरूपत्वब्रह्मधर्मसम्पन्नत्वादिरूपमाहात्म्यनिरूपणार्थम् । उभयोर्वैलक्षण्यं स्फुटीकुर्वन्ति । * वन्धिकेत्यादि * । स्मृत्यन्तरविरोधमाशङ्क्य परिहरन्ति । * अत एवेत्यादि * । तथाच श्रुतिविरुद्धं तदुक्तमप्रमाणमित्यर्थः । सूत्रस्थस्य चकारस्यार्थान्तरमाहुः । * निःश्वसितेत्यादि * ननु सर्वस्य वेदस्य भगवन्निरूपकत्वे उपनिषत्सु, अथ परेत्यादिनोक्तः परापरविभागो न स्यादित्यत आहुः । * अर्थप्राधान्यादित्यादि * । तथाच सर्वस्य वेदस्य तथात्वेऽपि ऋग्वेदादिविद्यायाः कर्मादिप्राधान्येन निरूपणात्र प्राधान्यम् । ब्रह्मविद्यायास्तु तत्प्रधान्यमतो न परापरविभागभङ्ग इत्यर्थः । वैदिकप्रपञ्चस्य भिन्नत्वे गमकान्तरमाहुः । * प्रपञ्चेत्यादि * । यद्यपि, लोकेऽवगतसामर्थ्यः शब्दो वेदेऽपि बोधक इति लोकवेदाधिकरणे लोकवेदयोः

तस्मादाधिदैविकप्रतिपादकत्वाद् वेदस्य नित्यत्वम् ॥ २९ ॥

समाननामरूपत्वादावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च॥ ३०॥

एवं शब्दबलविचारेण वेदप्रामाण्यस्य सिद्धये भिन्न एव प्रपञ्चो ह्याधिदैविकः सर्वत्र सिद्धः। इदानीमर्थबलविचारेणोत्तरकाण्डे किञ्चिदाशङ्क्य परिह्रियते दार्ढ्यार्थम् । नन्वस्य प्रपञ्चस्याऽनुकारित्वेन वाच्यत्वेन वा स्वीक्रियमाणत्वे सृष्टिप्रलययोर्विद्यमानत्वाद् नित्यसंयोगः प्राप्नोति । तत्राह॥ समाननामरूपत्वादावृत्तावप्यविरोधः ॥ वस्तुतस्तु भगवद्रूपत्वादाविर्भावतिरोभावेच्छयैव तथात्वान्नावृत्तिशङ्कापि । तथापि लोकबुद्ध्यनुसारेणावृत्तावपि समाननामरूपत्वाद् ।

शब्दैक्यं वार्तिकेऽङ्गीकृतम् । तथापि तस्य जैमिनिनानुक्तत्वात् । तत्कल्पितमतः शब्दभेदः । व्यवहारभेदस्तु प्रसिद्ध एवेति तावपि तद्भ्रमकावित्यर्थः । सिद्धमाहुः । तस्मादित्यादि ॥ २९ ॥

समाननामरूपत्वादावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥

सन्देहाभावाय पूर्वसूत्रसिद्धमनुवदन्तः सूत्रमवतारयन्ति * एवमित्यादि * । * सर्वत्रेति * । सर्वस्मिन्नेव वेदे । तेन, आदित्या वा अस्माल्लोकात्, अथ यदिदमस्मिन् ब्रह्मपुरे, धन्वन्निव प्रपा असीत्यादौ विधेयस्तुत्यर्थं परिचायनार्थं दृष्टान्ताद्यर्थं वा लौकिकसृष्टिकीर्तनं, तत्रापि, सदेव सौम्येति, हन्ताहं मदेव मन्मात्रं द्वितीयमिति, विश्वं वै ब्रह्म तन्मात्रमित्यादिभिर्ब्रह्मरूपत्वेन तस्या अपि नित्यत्वावधारणाच्च सम्बन्धानित्यतेति वेदस्य नित्यत्वमक्षुण्णमेवेत्यर्थः । * अर्थबलविचारेणेति * । तत्तजोऽसृजतेत्यादेः सृष्टचनित्यताबोधकत्वात्तादृगर्थबलविचारेण । एतद्विचारेणाशङ्कामाहुः । * नन्वित्यादि * । समाधिं व्याकुर्वन्ति * वस्तुत इत्यादि * । * तथात्वादिति * अनित्यत्वेन प्रतीयमानत्वात् । तथोक्तं विष्णुपुराणे प्रथमेऽंशे 'तदेतदक्षयं नित्यं जगन्मुनिवराऽखिलम् । आविर्भावतिरोभावजन्मनाशविकल्पवद् ' इति । एतद्विकल्पचतुष्टयवद्वा । आविस्तिरोभावाभ्यां तथा विकल्पवद्वेत्यर्थः । उभयथापि, न वास्तव-

समुद्रे जलप्रक्षेपवत् । पुनरुत्पादाने तदेवेति निश्चयाभावेऽपि नामरूपयोस्तुल्यत्वादन्यस्य भेदकस्याभावाच्चानित्यसंयोगविरोधः। कुतः । दर्शनात् । दृश्यते हि तथा । वेदपितृमातृस्त्रीभर्तृशरीरगङ्गादिषु तदेवेदमिति व्यवहारस्य सिद्धत्वात् । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्, दिवं च पृथिवीं चान्तरिक्षमथो सुवरिति। स्मृतेश्च ॥ 'सर्ववेदमयेनेदमात्मनाऽऽत्मयोनिना । प्रजाः सृज यथापूर्वं याश्च मय्यनुशेरते ' इत्यादिस्मृतेः । सर्वस्मृतेश्च ऋषीणां पूर्वचरितस्मरणं स्मृतिरुच्यत इति । अतोऽर्थबलविचारेऽपि पदार्थानां नित्यत्वाच्च वेदस्यानित्यसम्बन्धः ॥ ३० ॥

मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॥ ३१ ॥

अर्थबलविचारे एवैकदेशेन पूर्वपक्षमाह । ननु मध्वादिविद्यासु देवानामनधिकारात् सर्वत्रैवानधिकारः । तथाहि । असौ वा

नित्यत्वबाधः । आवृत्तावपीत्यस्यैव व्याख्यानं * समुद्र इत्यादि * । * प्रक्षेपवदिति * सप्तम्यर्थे वतिः । दर्शने व्याकुर्वन्ति । * वेदेत्यादि * । तथाच नित्यप्रलयविचारे शरीरादेः प्रतिक्षणमन्योन्यत्वेऽपि प्रवाहैक्येनैवैकस्मिन् शक्यताभिमन्यत इति तत्तत्प्रवाह एव पदानां शक्तिः । स चानादिसृष्टिवादिनो मीमांसकस्य मतेऽप्यविच्छिन्नत्वान्नित्यः । अतो यथा, अव्यतिरेकश्चार्थेऽनुपलब्धे इत्यत्र व्यवहाराव्यतिरेकेण प्रवाहनित्यतया शब्दसम्बन्धतद्ग्रहौ, तथा वस्त्वन्तरेऽपीति नानित्यसंयोग इत्यर्थः । अविच्छेदे प्रमाणं दर्शयन्ति । * सूर्येत्यादि * । सर्वासां स्मृतीनां कथं प्रवाहाविच्छेदसाधकत्वमित्यत आहुः । * ऋषीणामित्यादि * । लक्षणार्थविचारादेवाविच्छेदावगतिरित्यर्थः ॥ ३० ॥

मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॥ सूत्रमवतारयन्ति । * अर्थेत्यादि * । * एकदेशेनेति * उपासनाविशेषरूपेण तदेकदेशेन । अनधिकारं व्युत्पादयितुं विषयवाक्यस्थं प्रमेयं पूर्वमाहुः । * तथा हीत्यादि * तन्माऽऽविवसन्तम् * । नाडतिव, मधुच्छिद्र-

आदित्यो देवमधु तस्य द्यौरेवेत्यादिना सूर्यस्य देवमधुत्वं प्रतिपादितम् । रश्मीनां वेदत्वं च । तत्र वसुरुद्रादित्यमरुत्साध्याः पञ्चदेवगणाः स्वमुख्येन मुखेनाऽमृतं दृष्ट्वैव तृप्यन्ति । पञ्चविधा एव च देवाः । स्वतः सिद्धं च तेषां तन्मधु । अनुपासकत्वाच्च देवान्तरकल्पना । कृतार्थत्वाच्च । ब्रह्मणोऽपि देवत्वम् ।

आदिशब्देन सर्वा एव देवोपासनविद्या गृहीताः । अतस्ते-

त्वम् । * स्वमुख्येन मुखेनेति * अग्नीन्द्रवरुणसोमब्रह्मरूपेण मुखेन । * पञ्चविधा एवेति * तावतामेव तत्रोक्तत्वात्तथा । अनधिकारं स्फुटीकुर्वन्ति । * अनुपासकेत्यादि * । अयमर्थः । ब्रह्मविद्याधिकाराभ्युपगमे विद्यात्वाविशेषान्मधुविद्यायामपि देवानामधिकारो वक्तव्यः । तत्रासौ वा आदित्यो देवमध्विति मधुत्वेनोपवर्ण्यमानस्यादित्यस्य विद्याविषयत्वादादित्यः कमन्यमादित्यमुपासीत । किञ्चाग्रे आदित्याश्रितानि पञ्च रोहितादीन्यमृतान्यनुक्रम्य वसुरुद्रादित्यमरुत्साध्याख्यान् पञ्चदेवगणाँस्तदुपजीवकानुक्त्वा, स य एतदेवममृतं वेद वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवाऽमृतं दृष्ट्वा तृप्यतीत्यादिना वस्वाद्युपजीव्यान्यमृतानि विजानतो वस्वादिरूपत्वप्राप्त्या स्वगणमुख्यमुखेन तृप्तिरुच्यते । सा चोपासनातः प्रागेव वस्वादिरूपेण वर्तमानानां पुनस्तत्प्राप्तिकथनात् प्राप्यप्राप्त्रोर्वेद्यवेत्त्रोरैक्यापत्त्याऽनुपपन्ना भवति । नच वस्वादिप्राप्त्या वेद्यास्त्वन्ये कल्पयितुं शक्यन्ते । प्रमाणाभावात् । अधिकारानङ्गीकारे तु तेषामनुपासकत्वात् कृतार्थत्वाच्च न देवान्तरकल्पना । नच मास्तु मधुविद्याधिकारः । तावता ब्रह्मविद्याधिकारो न वारयितुं शक्यः । तेषां मोक्षार्थित्वात्, तत्र बाधकाभावाच्चेति वाच्यम् । यतो ब्रह्मणोऽपि देवत्वं, देवत्वेन च तस्याप्युपासकमध्ये प्रवेशेनोपास्यत्वप्राप्यत्वयोर्विघटनादिति । अत्र च, * मध्वादीत्यादिपदेन, अग्निः पादो वायुः पाद आदित्यः पादो दिशः पाद इति, वायुर्वाव संवर्ग इति, आदित्यो ब्रह्मेत्यादेश इत्याद्याः सर्वा एव देवोपासनविद्या गृहीताः । तेन सिद्धमाहुः । * अत इत्यादि * । ननु मोक्षेच्छायां सत्यां कुतो

पाशुपास्यत्वात् कृतार्थत्वाच्च नाधिकारः । न हि प्रयोजनव्यतिरेकेण कस्य चित् प्रवृत्तिः सम्भवति । मोक्षस्याप्यधिकारानिवृत्तावुत्तरमार्गवर्तित्वात् स्वत एव सिद्धिः । यावदधिकारमिति न्यायात् । वसूनयाजयदित्यत्रापि भाविन्येव संज्ञा । तस्मान्मनुष्याधिकारकमेव ज्ञानं कर्म चेति न देवानामधिकार इति जैमिनिराचार्यो मन्यते । मनुष्याणामेव ज्ञानकर्मणोस्तरतमभाववतां तत्तद्रूपभोगानन्तरं मोक्षप्राप्तेरिति ॥ ३१ ॥

ज्योतिषि भावाच्च ॥ ३२ ॥

किञ्च । तेषां सर्वेषामनधिकारः प्रत्यक्षत एव दृश्यते । सर्वे हि नक्षत्रादिरूपेण महाभोगवन्तो जगदवभासकत्वेन ज्योतिश्चक्रे दृश्यन्ते । अग्निः पुच्छस्य प्रथमं काण्डमित्यादिश्रुतेश्च । न हि तादृशां प्राप्तैश्वर्यवतां सर्वोपास्यानां मोक्षदातॄणां ज्ञानकर्मणोः कश्चनोपयोगोऽस्ति । तस्मादनधिकार एव देवानामित्येवं प्राप्ते ॥ ३२ ॥

उच्यते ।

भावं तु बादरायणोऽस्ति हि ॥ ३३ ॥

नाधिकारः । ब्रह्मविद्यामन्तरेण तदसिद्धेरित्यत आहुः । * मोक्षेत्यादि * । पूर्वोक्तरीत्याऽनुपपत्तिबलादधिकारनिवृत्तौ तेषां मोक्षेच्छासत्त्वे तु देवयानस्योत्तरमार्गत्वादेतेषां च देवत्वेन तद्वर्तित्वात् स्वतो मार्गबलादेव मोक्षस्यापि सिद्धेर्न विद्यावश्यकत्वमित्यर्थः । अत्र प्रमाणं, * यावदित्यादि * । ननु सोऽग्निष्टोमेन वसूनयाजयदित्यादिश्रुत्या यागाधिकारे सिद्धे ब्रह्मविद्यायामपि तत्कल्पने को दोष इत्यत आहुः । * वसूनित्यादि * । तथाच मूल एव कुठार इत्यर्थः । सिद्धमाहुः । * तस्मादित्यादि * ॥ ३१ ॥

ज्योतिषि भावाच्च ॥ अग्निः पुच्छस्येति श्रुतिस्तैत्तिरीयाणामारण्यके शिशुमारोपस्थानेऽस्ति । शेषं निगदेन व्याख्यातम् ॥ ३२ ॥

भावं तु बादरायणोऽस्ति हि ॥ वेदे सत्त्वमुपपादयन्ति ।

तुशब्दः पक्षं व्यावर्तयति । भावं देवानामधिकारस्य सद्भावम् । बादरायण आचार्यः । गौणसिद्धान्ताभावाय स्वनामग्रहणम् । किमार्षेण ज्ञानेन । तथा सति तुल्यत्वमत आह । अस्ति हि । अस्ति वेदे, प्रजापतिरकामयत प्रजायेयेति । स एतदग्निहोत्रं मिथुनमपश्यत् । तदुदिते सूर्येऽजुहोदिति । देवा वै सत्रमासतेत्यादिभिः कर्माधिकारो निश्चितः । तद् यो यो देवानां प्रत्यबुध्यत स एव तदभवदित्यादि । तथेन्द्रप्रजापतिसंवादे, ब्रह्मा देवानामिति च । एवमेवंविधैर्वाक्यैर्देवानामप्यधिकारोऽस्ति । यत्र च पुनर्देवानां फलभोग एव प्रतीयते, न करणं, तत्रापि तेषामधिकारोऽङ्गीकर्तव्यः । हि युक्तोऽयमर्थः । एते हि वसव आधिदैविकभगवदवयवभूताः । अनशनात् । अन्यथा वसुत्वादिविरोधः । यद्वसूनां प्रातःसवनमित्यादिवत् । न हि जीवविशेषा दृष्ट्वा तृप्यन्ति ।

प्रजापतिरित्यादि । अयमर्थः । अयं हि भूतार्थवादो यस्यैवं विदुषोऽग्निहोत्रं जुहुतीति विद्वद्वाक्यशेषः । स यदि स्वार्थे प्रमाणं न स्यात्, तदा तादृशज्ञानेनान्यस्याप्यग्निहोत्रिणः प्रजारूपं फलमपि न स्यात् । अतोऽग्निहोत्रदृष्टत्वं तज्जोतृत्वं चावश्यमभ्युपेयम् । नचात्र प्रजापतिरिति भाविनी संज्ञा वक्तुं शक्या । ततः पूर्वमन्यस्याभावात् । यो ब्रह्माणं विदधाति पूर्वमिति श्रुतेः । एवं सिद्ध एकत्राधिकारे, देवा इत्यादिभिः कर्मणि, यो य इत्यादिभिर्ज्ञाने च देवानामधिकारो निश्चितः । * एवमित्यादिकं स्फुटार्थम् । तत्र बाधकस्य सत्त्वात् कथं युक्त इत्यत आहुः । *एते हीत्यादि* । साधकं हेतुमुक्त्वा बाधकं तर्कमाहुः । *अन्यथेत्यादि* । अतिरिक्तानङ्गीकारे पूर्वपक्षोक्तरीत्या वसुत्वादिविरोधः । तत्र दृष्टान्तः, *यद्वसूनामित्यादि* । यथा तत्र यजमानाय वस्वादयोऽधिकारिणो यासत्वादिसामगानेन प्रातरादिसवनानि प्रयच्छन्ति, तथात्राप्यमृतदानमेवोच्येत, न तु वस्वादिभावोऽपि । अतोऽत्र येतुर्वस्वादिभावार्थोपपत्त्या उपास्या अतिरिक्ता अङ्गीकार्या इत्यर्थः । अनशनस्यैतत्साधकत्वे युक्तिमाहुः । * न हीत्यादि * ।

तस्मादिदं ब्रह्म प्रकरणमेव । योऽपि देवोपासनवत् प्रतीयते स भगवदंश एवाधिदैविकः । न वा पूर्वकल्पेन निर्णयः । तथा सति तेषामभावादनुपास्यत्वम् । अनित्यता च वेदस्य स्यात् । तस्माद् देवानामप्यधिकार इति शब्दवलविचार एव युक्त इति सिद्धम् ॥ ३३ ॥

शुगस्य तदनादरश्रवणात् तदाद्रवणात्

सूच्यते हि ॥ ३४ ॥

इदानीं शूद्रस्याधिकारो निराक्रियते । यथा कर्मणि, एतया

तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि ॥ अनुप्रसङ्गकृतिं बोधयितुमाहुः । * इदानीमित्यादि * । जैमिन्यनभिप्रेते [illegible] सम्भाव्यत इत्याशङ्कायां स निराक्रियत इत्यर्थः । ननूपनयनाद्यभावेन वैदिककर्मादावनधिकारस्य तस्मिन् सिद्धत्वात् सम्भावनैव कुत इति चेन्न । ब्रह्मविद्याया उपनयनानपेक्षत्वात् । वैश्वानरविद्यायां तान्हानुपनीयैतदुवाचेति श्रावणात् । नच तत्र प्राचीनशालादीनां ब्राह्मणत्वेन तस्योत्सर्गसिद्धत्वाद् वैशेषिकस्यैव तत्रानपेक्षा, न त्वौत्सर्गिकस्येति वाच्यम् । तथा सति तस्य प्रतिनियतवर्णोचितशास्त्रीयसंस्कारत्वे पर्यवसानात् सच्छूद्रे च तदुचितस्य तस्य सत्त्वेनैवाधिकारसिद्धेः । नच तस्य सामर्थ्यार्थित्वयोरभावः शङ्क्यः । विद्यायां बौद्धसामर्थ्यस्यैवापेक्षणात् । तस्य च प्राक्तनपुण्येनैव सिद्धे । श्रावयेच्चतुरो वर्णानिति पुराणश्रावणविधानात् तच्छ्रवणेऽर्थित्वस्यापि सिद्धेः । तर्हि [illegible] बाधकोऽस्त्विति चेत् तत्राहुः । * यथेत्यादि * ।

निषादस्थपतिं याजयेत् सा हि तस्येष्टिरिति श्रुतेर्हविष्कृदाधावेति शूद्रस्येति लिङ्गाद् दोहादौ च शूद्रस्याधिकारः । एवमिहापि संवर्गविद्यायां शूद्रस्याधिकार इति तन्निराकरणार्थमिदमधिकरणमारभ्यते ।

एवं श्रूयते । जानश्रुतिर्ह पौत्रायण इत्यत्र हंसवाक्यश्रवणानन्तरं सयुग्वनो रयिकस्य समीपं गतः जानश्रुतिः पौत्रायण रयिकेमानि षट्शतानि गवामित्यादिना देवतां पृष्टः प्रत्युवाच । अ ह हारेत्वा शूद्र तवैव सह गोभिरस्त्वित्यादिना जानश्रुतिं शूद्रशब्देन सम्बोध्य, पुनश्च, शूद्राऽनेन मुखेनेत्युक्त्वा संवर्गविद्यामुपदिष्टवान् । अतोऽत्र विद्यायां जातिशूद्रस्याप्यधिकारइत्याशङ्क्य परिहरति । नात्र शूद्रशब्दो जातिशूद्रवाची । किन्तु मत्सरयुक्तस्त्वमत्र नाधिकारीति तथा सम्बोधनम् । तदाह । शुक् शोकः, अस्य जानश्रुतेः समजनि । तत्र हेतुः । तदनादरश्रवणात् । तस्माद्धंसादनादरस्य श्रवणात् । कं वर एनमेतत् सन्तᳯ संयुग्वानं-

---

संवर्गविद्यायां कथमधिकार इति शङ्कायां तद्बीजं द्योतयितुं विषयवाक्यमुदाहरन्ति । * एवमित्यादि * उपदिष्टवानित्यन्तम् * । * श्रूयते इति * । छान्दोग्ये पञ्चमपाठकारम्भे एवं श्रूयते । * सयुग्वन इति * । युक्तयानिति युग्वा शकटविशेषः । तेन सह वर्तमानः सयुग्वा तस्य । रयिक * इति तस्य रूढं नाम । * जानश्रुतिरिति * । जनश्रुतेरपत्यम् । * पौत्रायण इति * । पुत्रस्य पौत्रः । * देवतामिति * । उपास्यां देवताम् । * अ ह हारेत्वा शूद्र तवैव सह गोभिरस्त्विति * । अः प्रतिषेधे । हेत्याश्चर्ये । हारेत्वा हारेण युक्त इत्वा रथः । शूद्रेति सम्बोधनम् । गोभिः सह यदानीतं तत्सर्वं तव निकट एव तिष्ठत्वित्यर्थः । केचित्तु, अरे शूद्र त्वा त्वाम अहह धिक् । स आनीतो रथादिर्हं तवैवास्त्वित्येवं व्याकुर्वन्ति । * मुखेनेति * । द्वारेण । सूत्रमवतार्य व्याकुर्वन्ति । * अत इत्यादि * । * कं वर एनमेतदित्यादि * । कं वरे, कम उ अरे एनं राजानमेतावत्कर्मक-

मिव रयिकमात्थेति स्वापकर्षश्रवणात् । किमतो ? यद्येवमत आह। तदाद्रवणात् । तत् तदनन्तरम् आद्रवणात् । शुचमनु आद्रवतीति शूद्रः । परोक्षवादार्थं दीर्घः सर्वज्ञत्वख्यापनाय । रूढिर्योगमपहरतीति न्यायात् कथमेवमत आह । सूच्यते हि । स्वस्य सर्वज्ञत्वं सूच्यते । हंसवाक्याच्छोके जाते, त्वमागत इति । अन्यथा मपन्नस्य धिक्कारवचनमनर्थकं स्यात् । युक्तश्चायमर्थो, ब्रह्मविदः सर्वज्ञतेति । तस्य मात्सर्यनिराकरणं वा सम्बोधनफलम् । तस्माच्छुचं मत्साद्रवणादेव शूद्रपदप्रयोगो, न जातिशूद्रवाची ॥ ३४ ॥

कुत एवमत आह ।

क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ ३५ ॥

जानश्रुतेः पौत्रायणस्य क्षत्रियत्वमवगम्यते । गोनिष्करथकन्यादानात्। न हि क्षत्तृप्रभृतयो ह्येते क्षत्रियादन्यस्य सम्भवन्ति।

तोरं सन्तं सयुग्वानं रयिकमिवात्थेत्यर्थः । * शुचमन्वित्यादि * । अत्र, * दीर्घः पृषोदरादित्वाद् वर्णान्तरलोपस्याप्युपलक्षकः । * रूढिरित्यादि * । पूर्वतन्त्रे उक्तन्यायाद् रथकारपदे रूढिरेवादृता, न तु योग इति कथमत्र तद्विरुद्धमाद्रियत इत्यर्थः । ननु सूचनमेवात्राभिप्रेतमिति कथं ज्ञेयमत आहुः । * अन्यथेत्यादि * । ननु स्वस्य सर्वज्ञत्वख्यापनार्थं प्रपन्नधिक्कारवचनमपि ब्रह्मविदोऽनुचितमित्यरुच्या पक्षान्तरमाहुः। * तस्य मात्सर्येत्यादि * । एवमुक्ते मत्सरख्यातिदोषत्वं ज्ञात्वा तं स त्यजेत् तदुपाख्यानं श्रुत्वाऽन्योऽपि त्यजेदित्येतदर्थं तथा वचनमतो नानुचितमित्यर्थः । * तस्मादिति * । गमकेन योगोपोद्बलने रूढेरकिञ्चित्करत्वात् ॥ ३४ ॥

क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ सूत्रमवतारयन्ति। * कुत इत्यादि *। ननु मास्तु शूद्रशब्दोऽत्र जातिशूद्रवाची, तथापि जानश्रुतिजातेरनुक्तत्वात् तदपेक्षायां स एवानुपूर्वीसामान्याज्जातिमपि बोधयिष्यतीति कुतस्तदनादर इत्यत आहेत्यर्थः । * क्षत्तृप्रभृतय इति * । यदुपास्यत्वायसत्यकरणब्राह्मणभोजनक्षत्रन्ताः ।

राजधर्मत्वात्। न ह्यन्यो ब्राह्मणाय भार्यात्वेन कन्यां दातुं शक्नोति। न च प्रथमहंसवाक्यं शूद्रे सङ्गच्छते। उपदेशाच्चेति चकारार्थः।

तथापि संवर्गविद्यायां शूद्रस्यैवाधिकारं मन्वानस्य निराकरणार्थं हेतुमाह। उत्तरत्र चैत्ररथेन लिङ्गात्। अथ ह शौनकं

बहुपाक्यत्वादीनां धर्मिष्ठे धनवति शूद्रे कदाचित् सम्भवेऽपि क्षत्तृस्थापनस्य राजधर्मत्वेनान्यत्रासम्भवात् तत्प्रभृतित्वमुक्तम्। तस्यापि कथञ्चित् सम्भवमाशङ्क्य हेत्वन्तरमाहुः। * न ह्यन्य इत्यादि *। पुराणादौ तद्दानस्य क्षत्रियकृतत्वेन स्मरणात् तथेत्यर्थः। शूद्रादारोपसंग्रहस्य मनुप्रभृतिभिरुक्तत्वात् तस्य च कन्यादानहेतुकत्वात् तस्यापि सम्भवमाशङ्क्य हेत्वन्तरमाहुः। * नचेत्यादि *। * प्रथमहंसवाक्यमिति *। होहोयि मल्लाक्ष मल्लाक्ष जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततं तन्मा प्रसाङ्क्षीत् तत्त्वा मा प्रधाक्षीरिति वाक्यम्। होहोयीति भयसूचकं सम्बोधनम्। दिवेति द्युलोकेन दिनेन वा। प्रधाक्षीरिति पुरुषव्यत्ययः। मा प्रदहत्वित्यर्थः। त्वा इत्यत्र सोऽर्द्धदेशो वा। तथाचैतादृशमाहात्म्यस्य शूद्रे अश्रुतत्वादस्मृतत्वाच्च न शूद्रे सङ्गच्छत इत्यर्थः। * उपदेशादिति * रयिककृतावुपदेशात्। शूद्रे विद्योपदेशस्य काप्यसिद्धत्वादत्रापि शूद्रश्रोतृकत्वस्याशक्यवचनत्वात् तथेत्यर्थः। एतेन यथा कृताय विजितायाधरेयाः संयन्त्येयमेतं तमभिसामैति यत्किञ्च प्रजाः साधु कुर्वन्तीति रयिकमाहात्म्यबोधकस्य द्वितीयहंसवाक्यस्याप्यत्र प्रामाण्यं बोधितम्। हीनान्यवर्णकन्यायाः प्रथमतः संग्रहे स्ववर्णहानेर्भलन्दनोपाख्याने सिद्धत्वाद्रयिकप्रथमविवाहस्यान्यत्राप्रसिद्धेरेतत्कन्याग्रहणेन दूष्यतायां रयिके तादृशमाहात्म्यस्यासङ्गत्यापत्तेरिति। ननु हंसवाक्यस्य धर्मिष्ठत्वादिमात्रबोधकत्वं, न तु क्षत्रियासाधारण्यमिति शङ्कायां सूत्रशेषमवतारयन्ति। * तथापीत्यादि *। एवं प्रहिलवादेन तथा मन्वानं निराकर्तुं हेतुमाहेत्यर्थः। * उत्तरत्रेति * उपसंहारवाक्ये। कथं तत्र क्षत्रियत्वावगतिरित्यत आहुः।

च कापेयमभिप्रतारिणं च काक्षसेनिमित्युत्तरत्र ब्राह्मणक्षत्रियौ तौ निर्दिष्टौ । कक्षा सेना यस्येति । कक्षसेनस्यापत्यं काक्षसेनिरिति । अस्य व्याख्यानं, चैत्ररथ इति । चित्रा रथा यस्य तस्यापत्यं, तेन चैत्ररथेन । कक्षारूपा रथा इति व्याख्यानम् । एतेन वै चित्ररथं कापेया अयाजयन्निति । शौनकश्च कापेयो याजकश्च । याज्यश्च चित्ररथस्य पुत्रः काक्षसेनिरिति । ब्रह्मचारी ब्रह्मवित् । इमौ तु संवर्गविद्योपासकौ । प्राणाय हि भिक्षा । तस्मान्न ददतुः । उभावपि श्लोकौ भगवतः ।

---

* कक्षा सेनेत्यादि * । * तेन चैत्ररथेनेति * क्षत्रियत्वावगतिरिति शेषः । काक्षसेनिपदस्य कथं चित्ररथपदव्याख्यानत्वमित्यत आहुः । * कक्षारूपा इत्यादि * । 'कक्षः स्यादन्तरीयस्य पश्चादञ्चलपल्लवे । स्पर्द्धापदे च दोर्मूले' इति कोशे स्पर्द्धास्थानं कक्षापदेनोच्यते । तथाच चित्रत्वात् स्पर्धास्थानरूपा रथा इति हेतोः कक्षापदं चित्रपदव्याख्यानम् । सेनापदं च रथपदव्याख्यानमित्यर्थः । एवं क्लेशेन व्याख्याने किं बीजमित्याकाङ्क्षायां लिङ्गपदं विवृण्वन्ति । * एतेनेत्यादि * । इदं च छन्दोगानां द्विरात्रे श्रूयते । एतेन वै चैत्ररथं कापेया अयाजयँस्तमेकाकिनमन्नाद्यस्याध्यक्षमकुर्वँस्तस्माच्चैत्ररथो नामैकः क्षत्रपतिर्जायत इति । तथाच समानान्वयानां समानान्वया एव याजका भवन्तीति प्रायेण दृष्टम् । अतः कापेयसम्बन्धात् काक्षसेनिश्चैत्ररथ इति तथेत्यर्थः । परिविष्यमाणौ ब्रह्मचारी बिभिक्षइत्यादेस्तात्पर्यमाह । * ब्रह्मचारीत्यादि * । इमौ शौनकाभिप्रतारिणौ संवर्गविद्योपासकौ । संवर्गस्त्वधिदैवतं वायुरध्यात्मं प्राणः । यतो हेतोः प्राणाय भिक्षा । अन्नस्य प्राणभोगार्थत्वात् । तदयं ब्रह्मचारी जानाति न वेति सन्दिह्य न ददतुः । ततो 'महात्मनश्चतुरो देव एकः कः स जगार भुवनस्य गोपाः । तं कापेय नाभिपश्यन्ति मर्त्या अभिप्रतारिन् बहुधा वसन्तम्' इति ब्रह्मचार्युक्तः श्लोकः । आत्मा देवानां जनिता प्रजानां हिरण्यदंष्ट्रो बभसो नसूरिः ।

तेन प्रकृतेऽप्येतौ गुरुशिष्यौ ब्राह्मणक्षत्रियावेवेति गम्यते। तस्मान्न जातिशूद्रः संवर्गविद्यायामधिकारी ॥ ३५ ॥

संस्कारपरामर्शात् तदभावाभिलापाच्च ॥ ३६ ॥

इदानीं शूद्रस्य क्वचिदपि ब्रह्मविद्यायामधिकारश्चेदत्राऽपि

महान्तमस्य महिमानमाहुरनद्यमानो यदनन्नमत्ति ' इति कापेयोक्तश्चेत्युभावपि श्लोकौ, * भगवतः प्रजापतिरूपबोधकत्वात् परम्परया भगवत्सम्बन्धिनौ । श्लोकार्थस्तु, महात्मनो माहात्म्ययुक्तान्, चतुरश्चतुःसंख्याकान् अग्निसूर्यचन्द्रापरूपान् देवान् वायुरूपेण, वाक्चक्षुःश्रोत्रमनोरूपान् प्राणान् प्राणरूपेण यो देव एकः कः प्रजापतिः सो जगार ग्रसितवान्। भुवनस्य भूतोद्भवस्थानस्य भूरादिलोकस्य गोपा रक्षकः । हे कापेय तं मर्त्या मरणधर्माणो विवेकशून्या नाभिपश्यन्ति । न जानन्ति । हे अभिप्रतारिन् बहुधा अध्यात्माधिदैवताधिभूतप्रकारैर्वसन्तमिति। द्वितीयश्लोके तु, हिरण्यदंष्ट्र इति, अमृतदंष्ट्रः । बभसो भक्षणशीलः। नसूरिः, न विद्यतेऽन्यः सूरिर्यस्मात् सः । अनद्यमानोऽन्यैरभक्ष्यमाणः। यद् यस्माद् अनन्नम् अग्निवागादिरूपमत्ति भक्षयति तस्मान्महामहिम इत्येवं वयं जानीम इति । तथाचेयं परम्परिता ब्रह्मविद्या, न तु साक्षात् । तेन सिद्धमाहुः । * तेनेत्यादि * । उत्तरस्मिन् वाक्यशेषे । संवर्गविद्योपासकयोर्ब्राह्मणक्षत्रिययोरेवोक्तत्वेन प्रकृते तथेत्यर्थः । फलितमाहुः। * तस्मादित्यादि * । तथाच परम्पराविद्यायामपि यत्र नाधिकारस्तत्र साक्षाद्विद्यायां किं वाच्यमिति भावः॥ ३५॥

संस्कारपरामर्शात् तदभावाभिलापाच्च ॥ ननु, श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति जैमिनिना श्रुत्यपेक्षया लिङ्गादीनां दौर्बल्यस्य साधितत्वात् तत्रापि क्लिष्टानां तेषां सुतरां तथात्वाच्छ्रुत्यैवाधिकारः शूद्रस्यादर्तव्य इत्याशङ्कायां सूत्रं पठित्वार्थमाहुः। * इदानीमित्यादि * । बुद्धिस्थायां शङ्कायाम्, अधीहि भगव इति होपससादेति सनत्कुमारनारद-

कल्प्येत । तत्तु नास्ति । सर्वत्र संस्कारपरामर्शात् । उपनयनसंस्कारः सर्वत्र परामृश्यते । तं होपनिन्ये । अधीहि भगव इति होपससाद । तान् हानुपनीयेत्यादिप्रदेशेऽपूपनयनपूर्वकमेव विद्यादानं प्रतीयते । शूद्रस्य तु, तदभावाभिलापात् । चतुर्थ एकजातिस्तु शूद्र इति, न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हतीति शूद्रस्य संस्कारनिषेधात् । चकाराच्च शूद्राय मतिं दद्यादिति निषेधः ॥ ३६॥

तदभावनिर्द्धारणे च प्रवृत्तेः ॥ ३७ ॥

इतश्च न शूद्रस्य सर्वथाधिकारः । तदभावनिर्द्धारणे शूद्रत्वाभावनिर्द्धारण एव गुरुशिष्यभावप्रवृत्तेः । सत्यकामो ह जाबाल इत्यत्र, गौतमः सत्यकाममुपनिन्ये । नैतदब्राह्मणो विवक्तुमर्हतीति सत्यवचनेन शूद्राभावं ज्ञात्वैव । चकार एवार्थे । चकारेण निर्द्धारणमुभयज्ञानार्थम् । वर्णत्वं शूद्राभावश्च । तस्मान्न शूद्रस्याधिकारः ॥ ३७ ॥

संवादस्थं प्रतीकम् । तत्र च, यद्वेत्थ तेन मोपसीदेत्यामन्त्रणे, ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमिति वेदाध्ययनलिङ्गादेवोपनयनसंस्कारप्राप्तिः । तान् हानुपनीयैवेति वैश्वानरविद्यायामपि प्राचीनशालादीनां षण्णां महाश्रोत्रियत्वलिङ्गादेव तत्प्राप्तिः । निषेधस्तु वैशेषिकस्यैवेति न दोषः । शेषं स्फुटम् । तथाचात्र 'आनर्थक्ये प्रमाणानां विपरीतं बलाबलम्' इति न्यायान्न शूद्रश्रुतिमात्रेणाधिकारसिद्धिरित्यर्थः ॥ ३६ ॥

तदभावनिर्द्धारणे च प्रवृत्तेः ॥ किमुभयमित्यपेक्षायामाहुः । * वर्णत्वमित्यादि * । अयमर्थः । तद्वाक्यान्निश्चितेऽपि ब्राह्मणबीजत्वे व्यभिचारजन्यत्वाच्छूद्रता स्यात् । तदभावस्तु वामदेव्यसामोपासकस्य न काञ्चन परिहरेदिति सर्वगामित्वाभ्यनुज्ञानात् तज्जन्यस्य व्यभिचारदोषानाक्रान्तत्वाद् वर्णत्वशूद्रत्वाभावं ज्ञात्वेति पूर्वेण सम्बन्धः ॥ ३७ ॥

श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ॥ ३८ ॥

दूरे ह्यधिकारचिन्ता । वेदस्य श्रवणमध्ययनमर्थज्ञानं त्रयमपि तस्य प्रतिषिद्धम् । तत्सन्निधावन्यस्य च । अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमिति । पद्युवा एतच्छ्मशानं यच्छूद्रः । तस्माच्छूद्रसामीप्ये नाध्येतव्यमिति । उदाहरणे जिह्वाच्छेदो, धारणे शरीरभेद इति । दोहादौ शूद्रसंबन्धे मन्त्राणामभाव एव ।

स्मृतिप्रयुक्त्यापि वेदार्थे न शूद्राधिकार इत्याह ॥ स्मृतेश्च ॥ वेदाक्षरविचारेण शूद्रः पतति तत्क्षणादिति । चकारस्त्वधिकरणसम्पूर्णत्वद्योतकः । स्मार्तपौराणिकज्ञानादौ तु कारणविशेषेण शूद्रयोनिगतानां महतामधिकारः । तत्रापि न कर्मजातिशूद्राणाम् । तस्मान्नास्ति वैदिके क्वचिदपि शूद्राधिकार इति स्थितम् ॥३८॥

श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च ॥ * पद्यु वेति * । पद्यु वेति पदच्छेदः । शेषं निगदेन व्याख्यातम् । एवं सूत्राणि व्याख्याय प्रासङ्गिकमाहुः * स्मार्तपौराणिकेत्यादि * । अयमर्थः । पुराणान्तरे, श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रत इति शूद्रस्यापि सामान्यतः श्रावणविधानात् । स्मृतिकौमुद्यां स्कान्दे । 'अस्ति शूद्रस्य शुश्रूषा पुराणेनैव वेदनम् । वदन्ति केचिद् विद्वांसः स्त्रीणां शूद्रसमानताम्' इति । 'सिद्धान्तश्रवणं प्राहुर्द्विजानां मुनिसत्तम । शूद्राणां च विरक्तानां तथा स्त्रीणां महामुने । सिद्धान्तश्रावणं प्रोक्तं पुराणश्रवणं बुधैरिति' श्रवणबोधनात् । एकादशस्कन्धेऽपि, माधवे शुचये श्रूयाद् भक्तिः स्याच्छूद्रयोषितामिति भगवद्वाक्यात् । प्रथमस्कन्धे, 'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा । इति भारतमाख्यानं कृपया मुनिना कृतम्' इति वाक्याच्च भारतपुराणश्रवणमसन्दिग्धम् । ततश्च बुद्धिमतां ज्ञानमपि भवत्येव । परन्तु तादृशज्ञाने, 'आसक्तो भगवानेव शापं दापयति क्वचित् । अहङ्कारेऽथवा लोके तन्मार्गस्थापनाय हि' इत्युक्तरीतिकेन शापादिना

कारणविशेषेण शूद्रयोनिगतानां महतां विदुरधर्मव्याधादिदासीसुतसदृशां फलमुखोऽधिकारः । तादृशामेव तत्र कृतार्थत्वस्मरणात् । तत्र शूद्रयोनिगतत्वेऽपि न कर्मजातिशूद्राणाम् । 'अत्रापि वेदनिन्दायामधर्मकरणात् तथा । नरके न भवेत् पातः किन्तु हीनेषु जायते' इत्युक्तरीतिकेन कर्मणा जातिशूद्राणां न फलमुखोऽधिकार इति । * ज्ञानादावित्यादिपदेन, 'जपस्तपस्तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम् । देवताराधनं चैव स्त्रीशूद्रपतनानि षड्' इत्येतेषां संग्रहः । विदुरादीनां तीर्थयात्रादिदर्शनात् । इतरेषां त्वेतानि निषिद्धान्येव । अत एवेदानीन्तनानां तत्कर्तॄणां कामक्रोधादय एव दृश्यन्ते, न तूपशम इति । एतदधिकरणद्वयं प्रासङ्गिकम् ।

अथ प्रसङ्गादिदं विचार्यते । शूद्रादयः सर्वे भारतं पुराणं च पठेयुर्न वेति । तत्र, 'भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः । दृश्यते यत्र वै धर्मः स्त्रीशूद्रादिभिरप्युत' इति प्रथमस्कन्धे, 'विप्रोऽधीत्याप्नुयात् प्रज्ञां राजन्योदधिमेखलाम् । वैश्यो निधिपतित्वं च शूद्रः शुद्ध्येत पातकाद्' इति द्वादशस्कन्धे च धर्मदर्शनश्रीभागवताध्ययनयोर्बोधनात् । 'तस्माद् भारत सर्वात्मा' इत्यत्राभयेच्छायां सर्वसाधारण्येन कीर्तनविधानाच्च सर्वमेव भारतं पुराणं च सर्वे पठेयुरित्येवं प्राप्ते ।

अभिधीयते । ब्रह्मज्ञानमार्गांशव्यतिरिक्तमेव पठनीयम् । धर्मब्रह्मणोरतीन्द्रियत्वेन प्रथमवाक्ये दर्शोर्मुख्यार्थस्य ग्रहीतुमशक्यतया धर्मादिशब्दज्ञानमात्रार्थकत्वेन पाठाप्रापकत्वात् । द्वितीयेऽप्यधीत्येत्यस्य स्मरणाध्ययनसाधारण्यात् स्मृत्वा गुरुमुखाद्वा गृहीत्वेत्यर्थेन तथात्वात् । नच स्वाध्यायब्राह्मणश्रुतौ, प्राङासीनः स्वाध्यायमधीयीतेत्यादौ केवलोच्चारणेऽपि तथा प्रयोगात् तत्प्राप्तिरिति वाच्यम् । विनिगमनाविरहात् । नचैतः पूर्वं, य एतां श्रावयेदिति सर्वां संहितां पठन्नश्नन् प्रयत इति पाठं प्रक्रम्य, विप्रोऽधीत्येति श्लोककथनादुपक्रम एव विनिगमकोऽस्त्विति वाच्यम् । तत्रापि श्रावणाद्युत्तरमेतत्कथनेनाध्ययनशब्दमहिम्ना च श्रवणौचित्ये सिद्धे, कपिलदेवैः स्वमातुरप्यौपनिषद्भागवतज्ञानयोरनुक्तत्वेन स्त्रीशूद्रयोस्तदंशाश्रावणे तयोस्तच्छ्रवणानधिकारे च सिद्धे, 'शूद्रयोनावहं जातो नातोऽन्यद् वक्तुमुत्सहे । कुमारस्य तु या बुद्धिर्वेद

तां शाश्वतीमहम्' इत्युद्योगे सनत्सुजातीयारम्भे विदुरवाक्या-ज्ज्ञानोत्तरमपि वदनानधिकारे च सिद्धे, श्रवणपठनयोः पठन एव वा तावद्देशस्यागस्यैवौचित्यात् । तथा प्रणवादिमान् वैदिकमन्त्रयुक्तोऽपि त्याज्यः । वेदः प्रणव एवाग्र इति, स सर्ववेदोपनिषद्वेदबीजं सनातनमित्यादिवाक्यैः प्रणवस्य विशेषतो वेदत्वनिश्चयात् । औपनिषदानां नारायणाष्टाक्षरादीनां मन्त्राणां नारायणकवचादौ प्रत्यभिज्ञानाच्च । नच देवतादिवाचकपदवत् प्रत्यभिज्ञाया अप्रयोजकत्वमिति शङ्क्यम् । 'नाममन्त्रस्तु शूद्रस्येति' 'स्वाहाकारनमस्कारौ मन्त्रौ शूद्रे विधीयते । ताभ्यां शूद्रः पाकयज्ञैर्यजेत व्रतवान् स्वयम्' इत्याद्युदाहृतनिकपर्यादौ तदनुज्ञादर्शनेन तेषां च तदभावेनैः तददृष्टान्तस्यात्र वक्तुमशक्यत्वात् । किञ्च द्वितीयस्कन्धे श्रीशुकैः 'श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्च' इति श्रवणात् तृतीयं स्मरणमुक्तम् । प्रथमे सूतेनापि, 'श्रोतव्यःकीर्तितव्यश्च ध्येयः पूज्यश्च' इति तथोक्तम् । एवं प्रकृतेऽपि श्रवणपठनफलकथनोत्तरं स्मरणस्यापि तद्वाच्यम् । अन्यथाऽऽकाङ्क्षान्तरोदयप्रसङ्गात् । अतः सादेवादध्यधीयेति पदं स्मरणार्थकमवसीयते । यत्तु 'ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगतीपतिः । वैश्यः पठन् विट्पतिः स्याच्छूद्रः सत्तमताः मियाद्' इति चतुर्थस्कन्धीयम् । तत्तु पृथुचरितमुपक्रम्य पठितत्वात् प्रकरणावरुद्धमिति न तेन सर्वपाठः प्रापयितुं शक्यते । नच 'पठेच्च नियमं कृत्वा श्रीभागवतमादराद्' इति निबन्धे श्रीमदाचार्यैरुक्तत्वात् सर्वं पठनीयमिति शङ्क्यम् । तत्रापि तद्देशत्यागे बाधकाभावात् । अन्यथा 'यदौपनिषदं ज्ञानं श्रीभागवतमेव वा । वर्णिनामेव तद्धि स्यात् स्त्रीशूद्राणां ततोऽन्यथा' इति तृतीयस्कन्धीयनिबन्धवाक्यस्य, 'भागवतज्ञानमपि त्रैवर्णिकानामेव। उपासनायाः प्राधान्यात् । यदेव भगवता ब्रह्मणे प्रोच्यते, तत् त्रैवर्णिकानामेवेति ज्ञातव्यम्' इति तत्प्रकाशग्रन्थस्य च विरोधापत्तेः । नचैकादशस्कन्धेऽपि, 'एष तेऽभिहितः कृत्स्नो ब्रह्मवादस्य संग्रहः' इति कथनाच्चतुःश्लोकीतुल्यतयोपदेशस्य तत्रापि सत्त्वात् तत्राप्यनधिकारः शङ्क्यः । तदग्रे, 'नैतत् त्वया दाम्भिकाय नास्तिकाय शठाय च । अशुश्रूषरभक्ताय दुर्विनीताय दीयताम् ॥ एतैर्दोषैर्विहीनाय ब्रह्मण्याय प्रियाय च । साधवे शुचये ब्रूयाद् भक्तिः स्याच्छूद्रयोषि-

कम्पनात् ॥ ३९ ॥

कठवल्लीविचारेण निश्चिता ह्यधिकारिणः ।
वाक्यान्तरं च तत्रस्थं चिन्त्यते प्रलयावधि ॥
यदिदं किञ्च जगत् सर्वं प्राण एजति निःसृतं महद्भयं वज्र-

ताम् ' इति कथनात् कर्मज्ञानादिभिन्नतयोपदेशाच्च तादृशां श्रावणे बाधकाभावेन तत्र तेषां श्रावणाधिकारस्य सिद्धेः । अन्यथा तद्विरोधापत्तेश्च । नचाभयेच्छायां तदर्थे कीर्तनस्य विरोधः शङ्क्यः । तत्र भगवत एव कथनाच्छ्रीभागवतपदाभावाच्चोक्तैकदेशातिरिक्तभागवतकीर्तनादपि तत्परिहारसिद्धेः । पुरुषोत्तमसहस्रनाम्न स्यापि फलोक्तिप्रसङ्गे, सहस्रं यैस्तु पठितैः पठितं मित्याचार्याणां वाक्यात् तस्मादपि तत्सिद्धेश्च । ये पुनरेतानि वाक्यान्याश्रित्य स्वस्यापि पाठाधिकारं शूद्रा आपादयन्ति, तेषां मात्सर्यादिदोषग्रासेन श्रीभागवतोक्तधर्मेष्वप्यनधिकारः । 'धर्मः प्रोज्झितकैतवोऽत्रपरमो निर्मत्सराणां सताम् ' इति वाक्यात् । किं पुनः पाठे । एतेनैव गीतापाठो व्याख्यातः । तत्राप्यध्यायसमाप्तौ, उपनिषत्सु ब्रह्मविद्यायामिति दर्शनात् । तस्मादुक्तातिरिक्तमेव शूद्रैः पठनीयम् । न तु श्रावणीयं, पाठनीयं वा । विध्यभावादिति निष्कर्षः ॥ ३८ ॥ ॥ ९ ॥

कम्पनात् ॥ एवं प्रासङ्गिकमधिकारनिरूपणं कृत्वा पूर्वप्रस्तुतमेव पुनः सिंहावलोकनेन विचारयतीत्याहुः । * कठवल्लीत्यादि * । हि * यतो हेतोर्मृत्यूपाख्यानं मनुष्यानधिकृत्य प्रवृत्तम् । अतः, शब्दादेव प्रमित इत्यधिकरणे प्रस्तुतेन कठवल्लीस्थाङ्गुष्ठमात्रविचारेणाधिकारिस्मरणे प्रसङ्गात् ते निश्चिताः । च * पुनः प्रासङ्गिकसमाप्तौ तत्रस्थं षष्ठवल्लीस्थं वाक्यान्तरं चिन्त्यते । अवसर. विचार्यते । तच्चिन्तनस्य किं प्रयोजनमत आहुः । * प्रलयावधीति * तद्वाक्यप्रतिपाद्यं रूपं प्रलयस्यावधिभूतम् । तस्य ज्ञाने तत्र लयः स्यादतो हेतोश्चिन्त्यत इत्यर्थः । विषयवाक्यं, सन्देहबीजं, सन्देहाकारं चाहुः * यदिदमित्यादि * । * वेतीत्यन्तम् * । ननु प्र-

मुखतं य एतद्विदुरमृतास्ते भवन्तीति । अत्र प्राणवज्रोद्यमनशब्दाभ्यां सन्देहः । किं प्राणोपासना, इन्द्रोपासना वा, ब्रह्मवाक्यं वेति । बाधकशब्दस्य श्रुतित्वान्न प्रकरणेन निर्णयः । अमृतं वै प्राणा इति श्रुतेः । प्राणोपासकस्याप्यमृतप्राप्तिर्युज्यते । इन्द्रस्याप्यमरत्वात् । वज्रमुद्यतमिति प्राणपक्षे वियोजने मरणजनकत्वाद् भयरूपत्वम् । इन्द्रपक्षे बलाधिष्ठातृत्वात् प्राणत्वम् । तस्मात् प्राण इन्द्रो वा वाक्यार्थ इत्येवं प्राप्ते । उच्यते ॥ कम्पनात् ॥ कम्पनमत्र प्रथमवाक्यार्थः । स च भयहेतुकः । अविशेषेण सर्वजगत्कम्पनं भगवद्धेतुकमेव भवति ।

करणस्य प्राबल्यात् तेनैव निश्चये विचारोऽनर्थक इति शङ्कायामाहुः । * बाधकेत्यादि * । तथाच प्रकरणापेक्षया श्रुतेर्बलिष्ठत्वान्न प्रकरणेन न निर्णय इत्यतो विचार आवश्यक इत्यर्थः । पूर्वपक्षमाहुः । * अमृतमित्यादि * । तथा अमृतपदस्याप्यनेकार्थत्वाद् वाक्योक्तफलेनापि न निर्णय इत्यर्थः । तर्हि प्राणविधैवास्त्वित्यत आहुः । * इन्द्रस्येत्यादि * । तदुपासकस्याप्यमृतत्वप्राप्तिर्युज्यत इति पूर्वेण सम्बन्धः । इन्द्रस्यात्र कथं प्राप्तिरित्यत आहुः । * वज्रमुद्यतमिति * । तथाच लिङ्गात् प्राप्तिरित्यर्थः । * तस्मादिति * प्रकरणापेक्षया श्रुतिलिङ्गयोः प्रबलत्वात् । तथाच ब्रह्मवाक्यत्वाभावे पूर्वपक्षे तात्पर्यम् । सिद्धान्तं व्याचक्षते । * उच्यत इत्यादि * । अत्र हि, यदिदं किञ्चेति पादत्रयमेकं वाक्यम् । य एतदिति तुरीयपादो भिन्नं वाक्यम् । तत्र, यदिदं किञ्च परिदृश्यमानमपरिदृश्यमानं च सर्वं जगत् प्राणे विद्यमाने निःसृतं बहिरागतं सदेजति कम्पते । तत्र हेतुः । महतां भयं तस्मात् तादृशं वज्रमायुधमुद्यतं जगन्नियमनायोल्लासितमिति पदसम्बन्धात् कम्पनमत्र प्रथमवाक्यार्थः । स च भयहेतुकः । तेन स्वतः कम्पनं वार्यते । तथा, यदिदं किञ्चेत्यनेन सर्वपदे सङ्कोचो वार्यते । अतोऽविशेषेणासङ्कोचेनेदृशं सर्वं जगत्कम्पनं भगवद्धेतुकमेव भवति । न प्राणे । तस्य स्ववियोगेन भयजनक-

नचैकान्ततो वज्र इन्द्रस्यैवायुधं भवति । अग्निहृदयत्वात् । तस्य तातस्य हृदयमाच्छिन्दत् साऽशनिरभवदिति श्रुतेः । तस्मान्मारकरूपमेवेदं भगवतः । प्राणशब्दवाच्यत्वं तु पूर्वमेव सिद्धम् । तस्मात् सर्वजगत्कम्पनं भगवत्कृतमिति भगवानेव वाक्यार्थः ॥३९॥

ज्योतिर्दर्शनात् ॥ ४० ॥

य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरभि-

तयेदृशकम्पनाहेतुत्वात् । ननु तर्हि श्रुतेः साधारणत्वान्माऽस्तु प्राणः, किन्त्विन्द्र एवास्तु । वाक्यापेक्षया लिङ्गस्य प्राबल्यादित्यत आहुः * नचेत्यादि * । सिद्धमाहुः * तस्मादित्यादि * । यस्मादिन्द्रप्राणौ नात्र शक्यवचनौ तस्मात् तथेत्यर्थः । ननु तथापि प्राणशब्दवाच्यत्वस्य, अत एव प्राण इत्यधिकरण एवावधारितत्वादस्याधिकरणस्य किं प्रयोजनमत आहुः । * प्राणेत्यादि * । * तस्मादिति * । यस्मादुक्तवाक्यार्थरूपत्वं न पूर्वत्र प्राणशब्दशब्दिते सिद्धं तस्मात् । अत्रैतादृशस्य हेतोर्वाक्यान्तरे अदर्शनाद्धेतुरेव पक्षमाक्षेप्स्यतीत्याशयाद्विमृष्टनिष्ठविशेषान्तरविमर्शावधारणेनैव तत्स्फुरणाच्च पक्षानुल्लेख इति न न्यूनता । आधारता तु विषयवाक्य एव स्फुटा । अत्राऽवान्तरप्रलयकर्तृत्वं प्राणे आशङ्क्य तन्निवारणाय अक्षभयोत्पादकत्वेन तद् ब्रह्मणि साधितम् । तेन शुद्धिस्थानात्मिकैवाधिकरणसङ्गतिः ।

यत्तु शङ्कराचार्यैरत्र ब्रह्मप्रतिपत्तौ पूर्वोत्तरपर्यालोचनादिति हेतुरुक्तः । तत्तु सूत्रमेव विरुणद्धि । सूत्रे कम्पनस्यैव हेतुत्वेन कथनात् । योऽप्येजयितृत्वस्य ब्रह्मधर्मत्वेन प्राणनेति मन्त्रस्य तद्बोधकतयोपन्यासः । सोऽपि तथा । मन्त्रे जीवनस्य तथात्वेनोक्ततया कम्पनाबोधकत्वादिति ॥ ३९ ॥ ॥ १० ॥

ज्योतिर्दर्शनात् ॥ * य एष इत्यादि * इदं छान्दोग्ये दशमप्रपाठके दहरविद्यायामिन्द्रप्रजापतिसंवादे च पठ्यते । एतावान् परं विशेषः । पूर्वत्र, निष्पद्यत इत्यनन्तरं, स आत्मेति वाक्यशेषः ।

सम्पद्य स्वेन रूपेणाभिनिष्पद्यत इति । तत्र संशयः । परं ज्योतिर्महाभूतरूपं ब्रह्म वेति ।

ब्रह्मधर्माश्च ये केचित् सिद्धा युक्त्यापि साधिताः ।
निर्णायकास्ततोऽप्यन्ये चत्वारोऽत्र निरूपिताः ॥

तत्र रूढ्योपपत्त्या च महाभूतमेव ज्योतिरित्येवं प्राप्ते । उच्यते । ज्योतिर्ब्रह्मैव । कुतः । दर्शनात् । सर्वत्र दर्शनं न्याय इति

द्वितीये तु, स उत्तमः पुरुष इति । तत्रोत्तरवाक्यमसन्दिग्धम् । गीतायाम्, उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इत्युपबृंहणेनास्य जीवबोधकताया वक्तुमशक्यत्वात् । तेन स तत्र पर्येति जक्षन् क्रीडन्नित्यस्मिन् वाक्ये तच्छब्दद्वयेनोभयोः परामर्शेऽपि विभक्तिसामानाधिकरण्यं सन्निधिं चानादृत्य व्यवहितं व्यधिकरणविभक्तिबोधितमपि ब्रह्मैवादरणीयमिति निश्चयात् । अतो दहरविद्यास्थं वाक्यमेव विषयः । संशयस्तु स्फुट एव । तद्बीजं तु प्रकरणापेक्षया श्रुतेः प्राबल्यम् । ज्योतिश्चरणाधिकरणेनास्य गतार्थतानिरासायास्य प्रयोजनं कारिकयाहुः । * ब्रह्मेत्यादि * । * चत्वार इति * । उपसम्पत्तव्यत्वम् उपसम्पन्नस्वरूपाभिनिष्पादकत्वम् । पूर्ववाक्यगतं हृदयत्वं, सत्यपदोक्तं मर्त्यामृतनियामकत्वं चोत्तरवाक्यगतम् । तद्यथापि हिरण्यनिधिमित्यारभ्यैवंवित् स्वर्गं लोकमेतीति वाक्यैक्यात् । * निरूपिता इति * । निर्णायका निरूपिताः । अतो न गतार्थतेत्यर्थः । पूर्वपक्षमाहुः । * तत्रेत्यादि * । * उपपत्त्येति * । अस्माच्छरीरात् समुत्थायेत्यादिबोधितया तया । राजशिबिरपणि तीरात् समुत्थिता नौरित्यादौ लोके समुत्थानस्योद्गमने प्रयोगदर्शनादत्र च शरीरादुद्गमनोत्तरं ज्योतिष उपसम्पत्तिबोधनात् । तस्याश्चार्चिरादिमार्गेण जीवस्य गमने अर्चिराद्यपेक्षया आदित्यादेः परत्वादिति । सिद्धान्तमाहुः । * उच्यत इत्यादि * । * सर्वत्र दर्शनमिति * । समानप्रकरणे एतत्स्थाने ब्रह्मवाचकपददर्शनम् । तथाच यत्र ब्रह्मवाचकं पदमभिधीयते तस्मिन् स्थाने । अत्र ज्योतिःपदं दृश्यते । अतस्तथेत्यर्थः । तदेव

नचैकान्ततो वज्र इन्द्रस्यैवायुधं भवति । अग्निहृदयत्वात् । तस्य तातस्य हृदयमाच्छिन्दद् साऽशनिरभवदिति श्रुतेः । तस्मान्मारकरूपमेवेदं भगवतः । प्राणशब्दवाच्यत्वं तु पूर्वमेव सिद्धम् । तस्मात् सर्वजगत्कम्पनं भगवत्कृतमिति भगवानेव वाक्यार्थः ॥३९॥

ज्योतिर्दर्शनात् ॥ ४० ॥

य एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरभि°

तयेदृशाकम्पनाहेतुत्वात् । ननु तर्हि श्रुतेः साधारणत्वान्माऽस्तु प्राण किन्त्विन्द्र एवास्तु । वाक्यापेक्षया लिङ्गस्य प्राबल्यादित्यत आहुः * नचेत्यादि * । सिद्धमाहुः * तस्मादित्यादि * । यस्मादिन्द्रप्राणौ नात्र शक्यवचनौ तस्मात् तथेत्यर्थः । ननु तथापि प्राणशब्दवाच्यत्वस्य, अत एव प्राण इत्यधिकरण एवावधारितत्वादस्याधिकरणस्य किं प्रयोजनमत आहुः । * प्राणेत्यादि * । * तस्मादिति * । यस्मादुक्तवाक्यार्थरूपत्वं न पूर्वत्र प्राणशब्दशब्दिते सिद्धं तस्मात् । अथैतादृशस्य हेतोर्वाक्यान्तरे अदर्शनाद्धेतुरेव पक्षमाक्षेप्स्यतीत्याशयाद्धिमृष्टनिष्ठविशेषान्तरविमर्शावधारणेनैव तत्स्फुरणाच्च पक्षानुक्तेय इति न न्यूनता । आधारता तु विषयवाक्य एव स्फुटा । अत्राऽवान्तरप्रलयकर्तृत्वं प्राणे आशङ्क्य तन्निवारणाय अक्षभयोत्पादकत्वेन तद् ब्रह्मणि साधितम् । तेन बुद्धिस्थानारम्भिकैवाधिकरणसङ्गतिः ।

यत्तु शङ्कराचार्यैरत्र ब्रह्मप्रतिपत्तौ पूर्वोत्तरपर्यालोचनादिति कः । तत्तु सूत्रमेव विरुणद्धि । सूत्रे कम्पनस्यैव हेतुत्वेन कथनात् । योऽप्येजयितृत्वस्य ब्रह्मधर्मत्वेन प्राणेनेति मन्त्रस्य तद्बोधकतयोपन्यासः । सोऽपि तथा । मन्त्रे जीवनस्य तथात्वेनोक्ततया कम्पनाबोधकत्वादिति ॥ ३९ ॥ ॥ १० ॥

ज्योतिर्दर्शनात् ॥ * य एष इत्यादि * इदं छान्दोग्ये दशमप्रपाठके दहरविद्यायामिन्द्रप्रजापतिसंवादे च पठ्यते । एतावान् परं विशेषः । पूर्वत्र, निष्पद्यत इत्यनन्तरं, स आत्मेति वाक्यशेषः ।

पावत । सुषुप्तौ सर्वत्र, सता सौम्य तदा सम्पन्नो भवति । सति सम्पद्य न विदुः । सति सम्पद्यामह इति । अहरहर्ब्रह्मलोकं गच्छन्तीत्यादिमदेशेषु ब्रह्मसम्पत्तिरेवोक्ता । अत्रापि सम्प्रसादवचनात् परं ज्योतिर्ब्रह्मैव । तस्माद् यः कश्चन शब्दो ब्रह्मस्थाने पठितस्तद्वाचक एवेति ॥ ४० ॥

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ ४१ ॥

आकाशो वै नामरूपयोर्निर्वहिता ते यदन्तरा तद् ब्रह्मेति श्रूयते । तत्राकाशशब्दे सन्देहः । भूताकाशः परमात्मा वेति । नामरूपनिर्वाहमात्रत्वमवकाशदानाद् भूताकाशस्यापि भवतीति न ब्रह्मपरत्वम् । अन्यस्य च नियामकस्याभावादिसेवं माप्ते ।

दर्शयन्ति । * सुषुप्तावित्यादि * । * सम्प्रसादवचनादिति * । सुषुप्तावस्थत्वबोधकात्तद्वचनात् । सिद्धमाहुः । * तस्मादित्यादि * । अत्र जीवस्वरूपापत्तिहेतुत्वेन महाभूतरूपे ज्योतिषि प्रलयकर्तृत्वस्यातिव्याप्तिर्बुद्धिस्था निवारिता ॥ ४० ॥ ॥ ११ ॥

आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥ * श्रूयते इति * । छान्दोग्यसमाप्तौ श्रूयते । * आकाशशब्दे सन्देह इति * । उभयत्र प्रयोगसाधारण्यात् । श्रुतौ वैशब्दात् प्रसिद्ध्यनुग्रहेण ब्रह्मशब्दोक्त्या चोभयोर्बोधनाच्च शब्दे सन्देह इत्यर्थः । अनेन बीजमुक्तम् । पूर्वपक्षमाहुः * नामेत्यादि * । नामरूपयोर्निर्वाहोऽविच्छेदेन चालनम् । तत्कर्तृत्वमात्रमत्र प्रतीयते, न तु कश्चिदन्यो धर्मः । तत्त्ववकाशदानाद् भूताकाशस्यापि सम्भवतीत्याकाशपदस्य न ब्रह्मपरत्वम् । नच धर्मस्य सामान्यत्वेन प्रकरणबलाद् ब्रह्मपरत्वमेव कुतो नाद्रियत शङ्क्यम् । प्रजापतिरुवाचेत्यस्य द्विरुक्त्या ब्रह्मप्रकरणस्य गमात् । श्यामाच्छबलमित्यादिना प्रकरणान्तरेण व्यवधानाच्च । नापि जीवपरत्वं शङ्कितुं शक्यम् । अभिसम्भवानीत्यस्य तत्प्रकरणस्यापि समाप्तेः । आकाशपदस्य जीवे क्वापि

उच्यते। आकाशः परमात्मा । अर्थान्तरत्वादिव्यपदेशात् । यद्भूताकाशस्य प्रयोजनं श्रुतिसिद्धं, तस्मादन्यस्य व्यपदेशः कार्यान्तरादिव्यपदेशश्च । यत्रैव हि सिद्धवत्कारेणोत्कृष्टधर्मा अतदीयास्तदेव ब्रह्मेति । नापि नामरूपनिर्वाह आकाशस्य माहात्म्यहेतुर्भवति । वै निश्चयेनेति सिद्धवत्कारान्नोपासनापरत्वम्।

च। अतोऽस्यैव धर्मस्य यद् ब्रह्मधर्मतानियामकं तदत्र किमपि न दृश्यते। नचोपसंहारगतानां ब्रह्माऽमृतात्मशब्दानां तथात्वम् । अवकाशदानकृतबृंहणनित्यत्वव्यापकत्वगुणयोगेन प्रशंसानिबन्धनया गौण्यापि नेतुं शक्यत्वात् । नापि, ते यदन्तरेत्युक्तस्य नामरूपान्तर्वर्तित्वस्य तथात्वम् । व्यापकतयाऽऽकाशेऽपि तत्सिद्धेः । अत उपक्रमगतस्याकाशपदस्योच्चारणमात्रेण भूताकाशावगमात् स एव ग्राह्य इत्येवं प्राप्त इत्यर्थः । सिद्धान्तं व्याचक्षते । * यद्भूतेत्यादि * । अर्थः प्रयोजनं यद्भूताकाशस्य श्रुतिसिद्धं वायुजननं, तस्मादन्यस्य व्यपदेशः । ते यदन्तरेत्यनेनोक्तस्यासमन्तात् तदन्तःस्थापनरूपस्यादिपदेन ब्रह्मत्वादेश्च यो व्यपदेशः कथनम् । तथाच, अन्तरः अर्थो यस्मादित्यर्थान्तरम् । वाऽऽहिताग्न्यादिष्विति परनिपातः । एवमत्र बहुव्रीहिणा कर्ता बोध्यते । अन्योऽर्थोऽर्थान्तरमिति नित्यसमासपक्षे लक्षणया कर्तृलाभः । तस्य भावोऽर्थान्तरत्वम् । तदादीनि । ते यदन्तरेत्युक्तं बहिःप्रान्तःस्थापनम् । ब्रह्मादिश्रुतयश्च । तेषां व्यपदेशात् कथनादाकाशो ब्रह्मैव । नहि रूपान्तर्गतस्य निरूढस्याकाशस्यासङ्कुचितं तन्निर्वोढृत्वं सम्भवति न वा क्वापि श्रुतावाकाशमाहात्म्यहेतुत्वेन तदुक्तमस्ति । नाप्यसङ्कुचितं तयोरन्तःस्थापनं बृंहणं वा तथा । वायुजनकत्वस्यैव श्रावणात् । अत आकाशकार्यातिरिक्तकार्यकर्तृत्वादेरत्रोक्तत्वाद् ब्रह्मादिश्रुतीनां चानुकूल्यादुपसंहारस्य प्राबल्यमिति ब्रह्मैवाकाशः । स्वारसिकं च शब्दानां ब्रह्मवाचकत्वमतो न लक्षणादोषोऽपि । तेनेदं सिद्धम् । यत्रैव सिद्धवत्कारेणोत्कृष्टधर्मा अतदीयास्तदेव ब्रह्मेति । अथ लोकदृष्ट्या विचार्यते । तदसङ्गतम् । 'अग्नी ददाति श्वसतां पदं यन्नियमात्मम' इति

निर्वाहस्य ब्रह्मधर्मत्वं न श्रुत्यन्तरसिद्धमिति विचारः । अर्थापत्तिसूचकस्त्वयमेव न्याय इति ।

तस्माद् यत्रैवातद्धर्मकथनमन्यवाच्यस्य तत्रैव ब्रह्मपरत्वमिति सिद्धम् ॥ ४१ ॥

स्मृतेस्तस्यापि भगवदधीनत्वान्नामरूपनिर्वाह आकाशस्य माहात्म्यहेतुरपि न भवति । नच तदुपासनार्थं तदुक्तिराकाशोऽस्त्विति वाच्यम् । यतो, वै निश्चयेनेति सिद्धवत्कारान्नोपासनापरत्वं वक्तुं शक्यते । तस्माद् ब्रह्मधर्म एवायं निर्वाह इत्यर्थः । ननु यद्ययं निर्वाहो ब्रह्मधर्म एव, तदा, तद्धर्मोधिकरणेन वा, तल्लिङ्गाधिकरणेन वा गतार्थत्वाद् व्यर्थः सूत्रारम्भ इत्यत आहुः । * निर्वाहस्येत्यादि * । तत्रापि विशेषमाहुः । * अर्थापत्तीत्यादि * । यद्यपि कम्पनमपि न प्रसिद्धश्रुत्यन्तरसिद्धं, तथापि प्रकरणबलादुत्तरवाक्ये कम्पनहेतोर्ब्रह्मणः सकाशाद् भयस्योक्तत्वाच्च तस्य ब्रह्मकार्यत्वनिश्चयेन ब्रह्मवाक्यत्वसाधकता तस्य युक्ता । प्रकृते तु वाक्यस्यानारभ्याधीतत्वात् प्रमाणान्तराभावाच्च न कथमपि ब्रह्मवाक्यत्वसिद्धिरतोऽयमेव न्यायस्तथेत्यर्थः । नन्वस्त्वेवं, तथापि पक्षनिर्देशोऽत्र न युक्तः । किन्तु ब्रह्मत्वमात्रं साधनीयम् । ततश्च वाक्यस्यापि ब्रह्मवाक्यत्वं सुखेनैव सिद्ध्येदित्यत आहुः । * तस्मादित्यादि * । * अन्यवाच्यस्येति * अन्यवाचकपदवाच्यस्य । तथाचैतदर्थं पक्षनिर्देश इत्यर्थः । एवं प्रयोजनकथनेनास्य, तल्लिङ्गाधिकरणेन गतार्थता तत्प्रपञ्चत्वं च निवारितम् । अत्र चाकाशस्य नामादिनिर्वाहकत्वेन स्थितिकर्तृत्वस्यातिव्याप्तिमाशङ्क्य युक्तिसा सा निवारिता ।

यत्तु शिवतत्त्वविवेके, उपक्रमस्थाभ्यामाकाशश्रुतिप्रसिद्धलिङ्गाभ्यामस्य वाक्यस्य भूताकाशपरत्वेऽपि पाश्चात्यानामसङ्कुचितनामरूपनिर्वोढृत्वतदर्थान्तरत्वामृतत्वलिङ्गब्रह्मात्मश्रुतीनां भूयस्तया प्राबल्यात् तदनुरोधेनोपक्रमप्रापितमपि भूताकाशपरत्वमपोह्य ब्रह्मपरत्वं स्थाप्यत इत्युक्तम् ।

तत् सूत्रविरुद्धमेव । लिङ्गभूयस्त्वस्यात्र हेतुत्वानुल्लेखात् ।

यत्तु शङ्कराचार्याः । ते यदन्तरेत्यस्य नामरूपे यद्भिन्ने इत्यर्थान्नामरूपाभ्यां व्यतिरिक्तमर्थान्तरं व्यपदिशतीति नामरूपव्यतिरिक्तत्वं ब्रह्मलिङ्गं हेतूकृत्यास्य तल्लिङ्गाधिकरणप्रपञ्चत्वमूचुः ।

तन्मतेऽधिकरणवैयर्थ्यमेव । निर्वाहस्य स्थितिरूपत्वेन तल्लिङ्गाधिकरणविषयवाक्यादेव प्राप्ततया प्रपञ्चरूपत्वस्य वक्तुमशक्यत्वात् । नामरूपव्यतिरिक्तत्वस्य स्पष्टलिङ्गत्वेनैतत्प्रणयनानावश्यकताया अपरिहाराच्च ।

भास्कराचार्योक्तमप्येतेनैव व्याख्यातप्रायम् ।

यदपि विज्ञानभिक्षुः । यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः । आकाशो वै नामरूपयोर्निर्वहिता । परमे व्योमन् प्रतिष्ठितेत्यादिषु ब्रह्मैवाकाशशब्दवाच्यं भवति । अर्थान्तरत्वादिव्यपदेशात् । अर्थस्य अन्तरोऽर्थान्तरः । तस्य भावस्तत्त्वम् । आदिपदेन नित्यत्वासङ्गत्वसूक्ष्मत्वादयो ग्राह्याः । तेषां व्यपदेशात् । आकाशवत् सर्वगतश्च नित्य इत्यादिषु कथनादित्याह ।

तन्मते व्यापकत्वकृतस्यार्थान्तरधर्मस्यैवाकाशसाधारण्याद्, यावान् वेत्येतद्भिन्नेपूक्तवाक्येष्वाकाशपदेन केवलब्रह्मासिद्ध्या लिङ्गसत्त्वे च तल्लिङ्गाधिकरणेन गतार्थत्वापत्त्याऽधिकरणवैयर्थ्यमेव ।

शैवस्तु । आकाशो भूतं, जीवो, ब्रह्म वा ? इति सन्दिह्य, अमृतत्वादितद्धर्मव्यपदेशादित्याह ।

तदपि, यदस्ति तदमृतमिति, अमृताक्षरं हर इति जीवेऽप्यमृतप्रयोगात् सौत्रहेतोरयोगाच्चासङ्गतमेव ।

रामानुजाचार्यास्तु । आकाशपदोक्तो मुक्तात्मा, परमात्मा वा ? इति सन्देहे । अश्व इव रोमाणि विधूय पापमिति मन्त्रे मुक्तस्यानन्तरं प्रकृतत्वात्, ते यदन्तरेत्यत्रापि नामरूपविमुक्तस्य तस्यैवाभिधानात् । नामरूपनिर्वाहकत्वस्य तत्पूर्वावस्थायां सम्भवात् । मुक्तावस्थायां ब्रह्मादिशब्दानां सम्भवात् । असङ्कुचितप्रकाशयोगेनाकाशप्रयोगस्यापि सम्भवान्मुक्तजीव एवात्रोच्यत इति पूर्वपक्षे । अत्र परमात्मैव । अर्थान्तरत्वादिव्यपदेशात् । आकाशो वै नामरूपयोर्निर्वहितेति निर्वोढृत्वमत्रोच्यते । तथामुक्तस्य नामरूपभाक्त्वान्मुक्तस्य जगद्व्यापाररहित्यादित्येयमुभयोर्न सङ्गच्छते । ईश्वरस्य तु, मनेन

निर्वाहस्य ब्रह्मधर्मत्वं न श्रुत्यन्तरसिद्धमिति विचारः । अर्थापत्तिसूचकस्त्वयमेव न्याय इति ।

तस्माद् यत्रैवातद्धर्मकथनमन्यवाच्यस्य तत्रैव ब्रह्मपरत्वमिति सिद्धम् ॥ ४१ ॥

स्मृतेस्तस्यापि भगवदधीनत्वान्नामरूपनिर्वाह आकाशस्य माहात्म्यहेतुरपि न भवति । नच तर्ह्युपासनार्थं तदुक्तिराकाशेऽस्त्विति वाच्यम् । यतो, वै निश्चयेनेति सिद्धवत्कारान्नोपासनापरत्वं वक्तुं शक्यते । तस्माद् ब्रह्मधर्म एवायं निर्वाह इत्यर्थः । ननु यद्ययं निर्वाहो ब्रह्मधर्म एव, तदा, तद्धर्माधिकरणेन वा, तल्लिङ्गाधिकरणेन वा गतार्थत्वाद् व्यर्थः सूत्रारम्भ इत्यत आहुः । * निर्वाहस्येत्यादि * । तत्रापि विशेषमाहुः । * अर्थापत्तीत्यादि * । यद्यपि कम्पनमपि न प्रसिद्धश्रुत्यन्तरसिद्धं, तथापि प्रकरणबलादुत्तरवाक्ये कम्पनहेतोर्ब्रह्मणः सकाशाद् भयस्योक्तत्वाच्च तस्य ब्रह्मकार्यत्वनिश्चयेन ब्रह्मवाक्यत्वसाधकता तस्य युक्ता । प्रकृते तु वाक्यस्यानारभ्याधीतत्वात् प्रमाणान्तराभावाच्च न कथमपि ब्रह्मवाक्यत्वसिद्धिरतोऽयमेव न्यायस्तथेत्यर्थः । नन्वस्त्वेवं, तथापि पक्षनिर्देशोऽत्र न युक्तः । किन्तु ब्रह्मत्वमात्रं साधनीयम् । ततश्च वाक्यस्यापि ब्रह्मवाक्यत्वं सुखेनैव सिद्ध्येदित्यत आहुः । * तस्मादित्यादि * । * अन्यवाच्यस्येति * अन्यवाचकपदवाच्यस्य । तथाचैतदर्थं पक्षनिर्देश इत्यर्थः । एवं प्रयोजनकथनेनास्य, तल्लिङ्गाधिकरणेन गतार्थता तत्प्रपञ्चत्वं च निवारितम् । अत्र चाकाशस्य नामादिनिर्वाहकत्वेन स्थितिकर्तृत्वस्यातिव्याप्तिमाशङ्क्य युक्तिस्था सा निवारिता ।

यत्तु शिवतत्त्वविवेके, उपक्रमस्थाभ्यामाकाशश्रुतिप्रसिद्धलिङ्गाभ्यामस्य वाक्यस्य भूताकाशपरत्वेऽपि पाश्चात्यानामसङ्कुचितनामरूपनिर्वोढृत्वतदर्थान्तरत्वामृतत्वलिङ्गब्रह्मात्मश्रुतीनां भूयस्तया प्राबल्यात् तदनुरोधेनोपक्रमप्रापितमपि भूताकाशपरत्वमपोह्य ब्रह्मपरत्वं स्थाप्यत इत्युक्तम् ।

तत् सूत्रविरुद्धमेव । लिङ्गभूयस्त्वस्यात्र हेतुत्वानुल्लेखात् ।

यत्तु शङ्कराचार्याः । ते यदन्तरेत्यस्य नामरूपे यद्भिन्ने इत्यर्थान्नामरूपाभ्यां व्यतिरिक्तमर्थान्तरं व्यपदिशतीति नामरूपव्यतिरिक्तत्वं ब्रह्मलिङ्गं हेतूकृत्यास्य तल्लिङ्गाधिकरणप्रपञ्चत्वमूचुः ।

तन्मतेऽधिकरणवैयर्थ्यमेव । निर्वोढृत्व स्थितिरूपत्वेन तल्लिङ्गाधिकरणविषयवाक्यादेव प्राप्ततया प्रपञ्चरूपत्वस्य वक्तुमशक्यत्वात् । नामरूपव्यतिरिक्तत्वस्य स्पष्टलिङ्गत्वेनैतत्प्रणयनानावश्यकताया अपरिहाराच्च ।

भास्कराचार्योक्तमप्येतेनैव व्याख्यातप्रायम् ।

यदपि विज्ञानभिक्षुः । यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाशः । आकाशो वै नामरूपयोर्निर्वहिता । परमे व्योमन् प्रतिष्ठितेत्यादिषु ब्रह्मैवाकाशशब्दवाच्यं भवति । अर्थान्तरत्वादिव्यपदेशात् । अर्थस्य अन्तरोऽर्थान्तरः । तस्य भावस्तत्वम् । आदिपदेन नित्यत्वासङ्गत्वसूक्ष्मत्वादयो ग्राह्याः । तेषां व्यपदेशात् । आकाशवत् सर्वगतश्च नित्य इत्यादिषु कथनादित्याह ।

तन्मते व्यापकत्वकृतस्यार्थान्तर्वर्तित्वस्याकाशसाधारण्याद्, यावान् वेत्येतद्भिन्नेषूक्तवाक्येष्वाकाशपदेन केवलब्रह्मासिद्ध्या लिङ्गसत्त्वे च तल्लिङ्गाधिकरणेन गतार्थत्वापत्त्याऽधिकरणवैयर्थ्यमेव ।

शैवस्तु । आकाशो भूतं, जीवो, ब्रह्म वा ? इति सन्दिह्य, अमृतत्वादितद्धर्मव्यपदेशादित्याह ।

तदपि, यदस्ति तदमृतमिति, अमृताऽक्षरं हर इति जीवेऽप्यमृतप्रयोगात् सौत्रहेतोरयोगाच्चासङ्गतमेव ।

रामानुजाचार्यास्तु । आकाशपदोक्तो मुक्तात्मा, परमात्मा वा ? इति सन्देहे । अश्व इव रोमाणि विधूय पापमिति मन्त्रे मुक्तस्यानन्तरं प्रकृतत्वात्, ते यदन्तरेत्यत्रापि नामरूपविमुक्तस्य तस्यैवाभिधानात् । नामरूपनिर्वाहकत्वस्य तत्पूर्वावस्थायां सम्भवात् । मुक्तावस्थायां ब्रह्मादिशब्दानां सम्भवात् । असङ्कुचितप्रकाशयोगेनाकाशप्रयोगस्यापि सम्भवान्मुक्तजीव एवात्रोच्यत इति पूर्वपक्षे । अत्र परमात्मैव । अर्थान्तरत्वादिव्यपदेशात् । आकाशो वै नामरूपयोर्निर्वहितेति निर्वोढृत्वमत्रोच्यते । तथामुक्तस्य नामरूपभाक्त्वान्मुक्तस्य जगद्व्यापाररहित्यादित्येवमुभयोर्न सङ्गच्छते । ईश्वरस्य तु, अनेन

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ ४२ ॥

बृहदारण्यके ज्योतिर्ब्राह्मणे, याज्ञवल्क्य किंज्योतिरयं पुरुष इत्यारभ्य, अभयः ह वै ब्रह्म भवति य एवं वेदेत्यन्ते सन्देहः । किं ब्रह्मवाक्यमेतद् उत जीवस्येति ।

र्थेनात्मनेति, यः सर्वज्ञः सर्ववित्, तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते, सर्वाणि रूपाणि विचिन्त्येत्यादिषु श्रुत्यन्तं तदेवोपपादयति । ते यदन्तरेति । यद् यस्मात् अयमाकाशस्ते नामरूपे अन्तरा ताभ्यामस्पृष्टोऽर्थान्तरभूतस्तस्मात् तयोर्निर्वोढा अपहतपाप्मत्वात् सत्यसङ्कल्पत्वाच्च निर्वहिता । आदिपदेन ब्रह्मत्वादीनां संग्रहः । तथा चान्योऽर्थोऽर्थान्तरं, तस्य भावस्तत्त्वम् । तदादीनां व्यपदेशादित्यर्थः । नच मुक्तस्यानन्तरं प्रकृतत्वादेवमिति वाच्यम् । मन्त्रेऽपि, ब्रह्मलोकमभिसम्भवानीति परस्यैव ब्रह्मणः प्रकृतत्वादित्याहुः ।

तत्र सर्वापेक्षया प्रबलां श्रुतिमतिहाय लिङ्गाद्यपेक्षया निर्बलं प्रकरणमादाय संशयोत्थापनं चिन्त्यम् ।

मध्वभाष्यव्याख्यायां जयतीर्थैस्तु । ते यदन्तरेत्यस्य, यद् ब्रह्म ते अन्तरा नामरूपे विना वर्तेत इति व्याख्यानं कृत्वा, नामरूपराहित्याख्यविलक्षणार्थव्यपदेशात्, तद् ब्रह्मेति ब्रह्मत्वव्यपदेशाच्च । यद्वा । अर्थान्तरत्वं रूपराहित्यम् । आदिपदेनाऽनामत्वमित्येवं सौत्रं हेतुं व्याचख्यौ । तच्चानामरूपत्वं भाष्यकारैरनामासौ प्रसिद्धत्वादरूपो भूतवर्जनादिति ब्राह्मवाक्येनोपबृंहितम् ॥ ४१ ॥ ॥ १२ ॥

सुषुप्त्युत्क्रान्त्योर्भेदेन ॥ विषयवाक्यमाहुः । * बृहदारण्यक इत्यादि * य एवं वेदेत्यन्ते सन्देह इति * । * बृहदारण्यक इति * तस्य षष्ठे प्रपाठके । अत्र, पत्यादिशब्दसूत्रात् तावदन्तं विषयवाक्यं, ब्राह्मणभेदेऽपि द्विरुक्तत्वादिरूपवाक्यभेदकादर्शनाद्धेति ज्ञेयम् । तेन ज्योतिर्ब्राह्मणं शारीरब्राह्मणं चेत्युभयोरत्र विषयवाक्यत्वात् तत्र सन्देह इत्यर्थः । सन्देहाकारमाहुः * किं ब्रह्मेत्यादि * । तथाच

जीवस्य ब्रह्मत्वप्रतिपादने जीववाक्यत्वम् । स्वातन्त्र्येण ब्रह्मण एव ज्ञानकर्मत्वे ब्रह्मवाक्यत्वमिति ।

यद्यप्यर्थज्ञाने न सन्देहस्तथापि नियामकं हेतुमाह ॥ भेदेनेति ॥ तस्यायमर्थः । किंज्योतिरयं जीव इति प्रश्ने सूर्यचन्द्राग्निवाङ्निराकरणानन्तरम्, आत्मज्योतिः । आत्मा भगवानेवास्य ज्योतिरि-

---

वाक्यमेव सन्दिग्धं, न तु पूर्ववद्वाक्यगतः कश्चिदेव शब्द इत्यर्थः । सन्देह बीजमाहुः । * जीवस्येत्यादि * । * स्वातन्त्र्येणेति * । मुख्यतया । * ज्ञानकर्मत्वे इति * ज्ञेयत्वे । तथाचोभयथापि वाक्यवचनत्वं सन्देहबीजमित्यर्थः । अत्र पूर्वा कोटिः शङ्कराचार्योक्ता बोध्या । तर्ह्युभयथा वाक्यवचनत्वे कथं सन्देहनिवृत्तिरित्याकाङ्क्षायामर्थज्ञानान्निवृत्तिरित्यभिप्रेत्य तत्तात्पर्यबोधकं हेतुमवतारयन्ति । * यद्यपीत्यादि * । सन्देहो ह्युभयसाधारणैः पदैस्तादृशैरवान्तरवाक्यैश्च भवति । यदा पुनस्तेषां प्रयोजनविचारात् तात्पर्यमवधार्यते नदैकतरपक्षपाते सोऽपैतीत्यर्थज्ञाने सति न सन्देहस्तथापि तदेव कथं स्यादित्याकाङ्क्षायां विवक्षितार्थनियामकं हेतुमाहेत्यर्थः । * भेदेनेति * । व्यपदेशादिति पूर्वसूत्रोक्तहेत्वेकदेशोऽत्रानुवर्तते । तथाच, भेदेन व्यपदेशादित्येतावानत्र हेतुरित्यर्थः । नन्वयं हेतुर्जीवब्रह्मताप्रतिपादकवाक्यत्वाङ्गीकर्तृभिस्तत्प्रतिपादकत्वेनैवाद्रियते । तथाहि । अत्र, योऽयं विज्ञानमयः प्राणेष्वित्युपक्रमे जीवलिङ्गादुपसंहारे च, स वा एष इत्यनेन तस्यैव परामर्शान्मध्ये बुद्धान्ताद्यवस्थोक्तेश्च संसार्युच्यत इत्याशङ्क्य पुनः पुनर्मोक्षप्रश्नात् तत्र तत्रानन्वागतपदस्य पुण्यपापबुद्धान्ताद्यवस्थासम्बन्धराहित्यबोधकस्य प्रयोगाच्च तैर्मुक्तं तत्स्वरूपं प्राज्ञपदोक्तादीश्वराद् भेदेनोच्यत इति कथनात् । अतः कथमस्य विवक्षितार्थनियामकत्वमित्यपेक्षायां तद् व्युत्पादयन्ति । * तस्यायमर्थ इत्यादि * । * अयमिति * वक्ष्यमाणरीतिकः । * जीव इति * श्रौतस्य पदस्यार्थः । * आत्मा भगवानिति * याज्ञवल्क्यस्याशय उक्तः । तत्र युक्तिस्तु यदि जीवः स्वज्योतिः स्यादादित्यादिसत्तायामपि तदनपेक्ष एव पर्ययनादिकं कुर्यात् । एवं त्वादित्यादिवद् यदा भगवाननुगृह्णाति तदा तत् कुरुते, नो चेन्नेति कार्यकादाचि-

त्युत्तरानन्तरं, कतम आत्मेति प्रश्ने, योऽयं विज्ञानमयो ज्ञानरूप इन्द्रियेषु हृदि च प्रकाशमान इत्युत्तरे, जीवोऽप्येतादृश इति तन्निराकरणार्थं स समानः सन् जीवतुल्यः सन् क्रीडतीत्याह ।

त्स्वरूपाऽवगन्तव्या । तस्या अनुकल्पादात्मज्योतिरित्युत्तरानन्तरं राज्ञा आत्मविषयकः, कतम आत्मेति प्रश्नः कृतः । स च न देहेन्द्रियप्राणान्तःकरणेष्वन्यतमस्यात्मत्वसम्भावनामूलकः । सम्राट्त्वेन बहुश्रुततया तस्य तत्कोट्यनुपस्थानात् । मेधावी राजेत्यग्रे कथनाच्च । किन्तु जीवब्रह्मकोटिमूलक एव । तादृशे प्रश्ने, योऽयमित्यादिनोक्तमुत्तरम् । ह्रदान्तर्ज्योतिरित्यस्य तेषु प्रकाशमान इत्यर्थः । इदं च प्रकाशमानत्वं जीवस्याभिमानतया भगवतस्त्वन्तर्यामितयेत्युभयसाधारणम् । अत एतावत्युत्तरे उक्ते जीवोऽप्येतादृश इति तस्य सन्देहो नापैष्यतीति तन्निराकरणार्थं, स समानः सन्नित्याद्याह । एवं विज्ञानमयत्वस्य प्राणान्तर्वर्तित्वस्य च साधारण्यबोधनेन तयोर्जीवलिङ्गता निवारिता । तेनैवोपसंहारस्यापि जीवपरत्वं वारितप्रायमेव । अतः परं स समान इत्यादेरर्थो विचार्यते । तत्र स इत्यादित्यादिवज्जीवानुग्रहकः । क्रीडा तु, उभौ लोकौ सञ्चरति ध्यायतीव लेलायतीवेत्युक्ता । लेलायतीवेत्यस्य लोलायतीवेत्यर्थः । ओकारस्थान एकारः ।

यत्तु विज्ञायतेऽनेनेति विज्ञानं बुद्धिः । तन्मयस्तत्प्रायः प्राणेष्विति सामीप्ये सप्तमी । बुद्धीन्द्रियकर्मेन्द्रियप्राणात्मकपञ्चदशप्राणसमीपस्थो हृद्यन्तर्ज्योतिरिति लक्षणया हृदयस्थबुद्धावन्तर्वर्तमाने ज्योतिरात्मा । आत्मनैवायं ज्योतिषेत्युपक्रमात् । पुरुषः पूर्णः स हृद्यन्तर्ज्योतीरूप आत्मा समानः सन् प्रकृतत्वात् सन्निहितत्वाच्च बुद्ध्या सदृशः सन्नन्योन्यधर्माध्यासे सति तप्तायःपिण्डवत् तादात्म्यमापन्नः सन्निति कैश्चिद् व्याख्यातम् ।

तन्मन्दम् । बुद्धेरत्राप्रकृतत्वेन तत्साहृदयकथनस्यासङ्गतत्वात् । विज्ञानमय इत्यत्र विज्ञानपदे, नित्यं विज्ञानमानन्दं ब्रह्मेति

तस्योभयधर्मा अप्युच्यन्ते क्रियामात्रस्य तन्मूलत्वाय । तत्र हि चत्वारि स्थानानि । अयं लोकः परलोकः स्वप्न इति त्रयं जीवसमानतया अनुभवति । तत्र स्वप्नस्य मिथ्यात्वाद् द्वयमेव । सुषुप्तं च चतुर्थम् । जीवस्य तु मोक्षोऽपि ।

ब्रह्मवाचकत्वत्यागेन योगग्रहणे बीजाभावे बुद्धेर्ग्रहीतुमशक्यत्वात् । यद्यत्र बुद्धिरभिप्रेता स्याद्, वाङ्निराकरणोत्तरं, बुद्धिज्योतिरित्यपि मध्ये वदेत् । अतोऽत्र विज्ञानमयपदे ज्ञानप्रचुरं सर्वज्ञं ब्रह्मैवाभिप्रेतम् । अनुग्राहकत्वेनात्मन एवोक्तत्वात् । तस्य चान्तर्यामितया सर्वेष्वेव प्राणेष्ववस्थानात् । हृदयमिति श्रुतेर्हृदयेप्यवस्थानात् । एवञ्च हृदीत्यत्र लक्षणापि न स्यात् । परं त्वेतेषां पदानां कथञ्चिज्जीवेऽपि वृत्तेस्तस्य निराकरणाय स समानः सन्नित्यादि वदतीत्येव युक्तम् । श्लेषेण परोक्षवादस्तु, समेनेन वदिष्य इति प्राथमिकाभिसन्धानाद् भगवतः परोक्षप्रियत्वज्ञापनाय । तस्मादुक्त एवार्थ इति निश्चयः । ननु यद्यत्र ब्रह्म प्रतिपाद्यं स्यात् तदा ब्रह्मधर्मा एवात्र उक्ताः स्युर्न जीवधर्मा इत्यत आहुः । * तस्योभयेत्यादि* । जीवमुख्यप्राणलिङ्गसूत्रे ब्रह्माश्रितत्वेन हेतुना जीवधर्माणां ब्रह्ममूलकत्वस्य साधितत्वात् तद्वदत्रापि जीवक्रियाणां तन्मूलत्वं बोधयितुं तद्धर्मा उच्यन्ते । भगवद्धर्मांश्चोच्यन्त इति तस्यैवोभये धर्मा इति न ब्रह्मप्रतिपादकत्वक्षतिरित्यर्थः । एवं ब्रह्मधर्मकथनव्युत्पादनेन प्रकरणस्य ब्राह्मत्वं प्रतिपाद्य क्रीडां व्युत्पादयितुमुभौ लोकावित्यादेरर्थमाहुः । * तत्रेत्यादि * तत्र भगवत्क्रीडायामेतल्लोकपरलोकसन्ध्यसम्प्रसादाख्यानि चत्वारि स्थानानि । तेष्वेतल्लोकादित्रयं जीवसमानतयाऽनुभवति । समानः सन्नुभौ लोकौ सञ्चरतीति श्रावणात् । नच त्रयाणां सत्त्वे कथं द्वयोर्निर्देश इति शङ्क्यम् । तत्र * तेषु स्थानेषु, स्वप्नस्य मिथ्यात्वात् *, सत्यं द्वयमेवेत्यभिप्रायेणोभयनिर्देशात् । सुषुप्तं च चतुर्थम् । स एष तस्मिन् सम्प्रसादे रत्वा चरित्वेति वक्ष्यमाणाल्लिङ्गात् । जीवस्य तु मोक्षोऽपि *, पञ्चम इति शेषः । एषोऽस्य परमो लोक इति वक्ष्यमाणत्वात् । तत्र समान-

तत्रास्मिँल्लोके जीवस्यानीशित्वं प्रत्यक्षसिद्धम् । मोक्षे त्वैक्यम् । स्वप्नस्तु माया । अतः परं द्वयमवशिष्यते । तत्र श्रुत्यैव भेदः प्रतिपादितः ।

तत्र भगवतो जीवसाम्ये अन्तःकरणेन्द्रियधर्माः प्राप्नुवन्तीति तत्रानुकरणमाह । ध्यायतीव लेलायतीवेति । बुद्धिसहितः स्वयमेव स्वप्नो भूत्वा जागरणानुसन्धानं न करोति । एवं जाग्रत्स्वापौ-न्-छणो लोकद्वयं जीवस्य स्थानत्रयमाह । स वा अयमिति कण्डिकाद्वयेन। स इति पूर्वप्रक्रान्तो जीवः। जीवस्य शरीरेन्द्रियाणां दुः-

---

ताया भेदस्तन्न्यस्त्वात् तं सर्वत्र वक्तुं विशेषमाहुः । * तत्रास्मिन्नित्यादि * । तत्राद्येऽनीशत्वाद् भेदः प्रत्यक्षसिद्धोऽतो नोक्तः । मोक्षे त्वैक्यमविभागे सत्यभेदप्रतीतिविषयत्वलक्षणमत्र, ब्रह्मैव सन् ब्रह्माप्येतीति श्रुत्यैव वक्ष्यतेऽतस्तत्रापि नोक्तः । स्वप्नस्तु माया । अतस्तत्रापि नोक्तः । अतः परं द्वयमवशिष्यते * । सुषुप्तिः परलोकश्च । तत्र भेदः श्रुत्यैव * । अयं शारीर आत्मा प्राज्ञेनात्मना सम्परिष्वक्त इति । अयं शारीर आत्मा प्राज्ञेनात्मनान्वारूढ इत्यनेन प्रतिपादितः । तथाच मोक्षव्यतिरिक्तेषु सत्स्वेषु सर्वेषु स्थानेषु भेदस्य सिद्धत्वात् तस्यैव जीवे ब्रह्मतानिरासकतया विवक्षितार्थनियामकत्वमित्यभिप्रेत्याचार्यः सुषुप्त्युत्क्रान्त्योरित्याहेत्यर्थः । एवं विशेषं बोधयित्वा इह लोके क्रीडाप्रकारमाहुः * तत्रेत्यादि * । तथाचेह लोकेऽनुकरणेन क्रीडेत्यर्थः । इदञ्चावतारदशायामपि पुराणेषु तत्र सिद्धम् । चेरतुः प्राकृतौ यथेत्यादौ च। स्वप्ने क्रीडाप्रकारमाहुः । * बुद्धीत्यादि * । अर्थं च, सधीः स्वप्नो भूत्वेत्यादेरर्थः । तथाच तत्र मायारूपेण जागरणाननुसन्धानरूपा जीववत् क्रीडेत्यर्थः । एवमुभयत्र भगवत्क्रीडामुक्त्वा, स वा अयं पुरुष इति, तस्य वा एतस्य पुरुषस्येति कण्डिकाद्वयस्यार्थमाहुः । * जीवस्येत्यादि * । * पूर्वप्रक्रान्त इति * । किञ्ज्योतिरयं पुरुष इति प्रश्ने प्रक्रान्तो, न तु, स समान इत्यत्रोक्तः । अयमितीदमा प्रत्यभिज्ञानात् । कण्डिकाद्वयसिद्धमर्थमाहुः । * जीवस्येत्यादि । दुःखदातृत्वञ्च पाप्मपदाज्ज्ञेयम् । तथाचैतद्बोधनेनानी-

सदातृत्वमेव । अथेति भगवच्चरित्रम् । स तु स्वस्यानन्दं जीवस्य दुःखं च पश्यति ।

भेदोऽथशब्दात् । जीवस्यानीशित्वात् येन प्रकारेणायं जीवः परलोके गच्छति तमुपायं भगवानेव करोति ।

शत्वख्यापनार्थमेतत्कण्डिकाद्वयकथनमित्यर्थः । अथ यथाक्रममित्यादेरर्थमाहुः । * अथेतीत्यादि * । चरित्रस्य स्वरूपमाहुः । * स त्वित्यादि * । तदुक्तम्, अथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्योभयान् पाप्मन आनन्दांश्च पश्यति स इत्यन्तेन । श्रुत्यर्थस्तु, अथेति भिन्नप्रक्रमे । यथाक्रमः । आक्रमत्यनेनेत्याक्रम आश्रयोऽवष्टम्भो विद्याकर्मपूर्वप्रज्ञालक्षणो यादृश आक्रमो यस्यासौ यथाक्रमः । अयं जीवः परलोकस्थाने भवति । परलोकस्थाने प्राप्तव्ये सति यादृशविद्याकर्मपूर्वप्रज्ञायुक्तो भवति तम् आक्रमं विद्यादिलक्षणमाक्रम्यावष्टभ्य । उभयान् एतस्यैव व्याख्यानं, पाप्मन आनन्दांश्चेति । पश्यतिं स परमात्मेति । तथाच जीवस्य क्वचिद् विद्यया परलोकः, क्वचित् कर्मपूर्वप्रज्ञाभ्याम् । भगवाँस्तु तत्तदन्तर्यामितया लोकान्तर्यामितया च तत्तन्नियमयन् स्वस्यानन्दं जीवस्य दुःखं च सुखं च पश्यतीत्येषा परलोके जीववत् क्रीडेत्यर्थः । नन्वस्यां कण्डिकायां भगवच्चरित्रमेवोच्यत इत्यत्र किं गमकमत आहुः । * भेदोऽथशब्दादिति * तथाच क्रमभेद एव गमक इत्यर्थः । तत्र यत् सिद्धं, तदाहुः । * जीवस्येत्यादि * । तथाचैषा द्वितीया तत्रत्या क्रीडेत्यर्थः ।

यत्रायं प्रस्वपितीत्यारभ्य, न प्रतिपद्यत इत्यन्ते यत् सिद्ध्यति तदत्र न प्रदर्शितमतः प्रदर्श्यते । यत्रायं प्रस्वपिति । यत्र स्थाने अयं जीवः प्रस्वपिति निद्राति, तत्र जीवस्य स्वाप्नानुभवप्रकारं वक्ष्यँस्तद्धेतुभूतं भगवत्स्वापप्रकारमाह । अस्य जाग्रदवस्थायामनुभूयमानस्य लोकस्य, सर्वावतः सर्वपदार्थयुक्तस्य, मात्रां वासनात्मकमंशम् उपादाय गृहीत्वा स्वयं भगवान् विहृत्य वासनाग्रहणे ज्ञानस्य स्थूलरूपतिरोभावाज्जाग्रद्देहं निःसम्बोधं कृत्वा स्वयं निर्माय वक्ष्यमाणप्रकारेण

मानापदार्थनिर्माणं कृत्वा, तत्र करणं स्वेन भासा स्वधर्मात्मकेन ज्ञानेनेति स्वेन ज्योतिषा प्रस्वपिति, अलुप्तदृक्स्वभावेन स्वरूपेण, स सर्वधीवृत्त्यनुभूतसर्व इत्यत्र स्वप्नजनेक्षितैकपदव्याख्यानव्युत्पादितया रीत्या सर्वं स्वाप्निकं विपर्यासीकुर्वन् प्रस्वपितीति प्रकार उक्तः । अतः परं जीवस्य तत्प्रकारमाह । अत्रायमित्यादि । अत्रास्मिन् भगवत्स्वापे, अयं पुरुषो जीवः स्वयञ्ज्योतिर्भवति । भगवज्ज्योतिषा स्वप्नमनुभवन्नात्मज्योतिर्भवतीत्यर्थः । ननु हृदयानां बहिःस्थत्वात् स्वप्नेऽन्तःस्थः किं पश्यतीत्याकाङ्क्षायां स्वाप्नसृष्टेर्भिन्नत्वाय तत्र भगवत्कृतां सृष्टिमाह । न तत्र रथा इति कण्डिकायाम् । अत एव, स हि कर्तेत्युक्तं, न त्वयं कर्तेति । किञ्च, स्वप्नेऽपि सर्वपदार्थान् प्रति न जीवस्य कर्तृत्वं प्रतीयते । सिद्धवदेव बहूनां भानात् । स्वदुःखजनकपदार्थे प्रतिस्वकर्तृत्वस्यासङ्गतत्वाच्च । अत्राप्यग्रे, घ्नन्तीव जिनन्तीवेति श्रावणाच्च । तस्माद् भगवानेव स्वप्नसृष्टिकर्तेति निश्चयः । इममेवार्थं श्लोकैः संगृह्णाह । तदप्येते श्लोका इति । तत तत्र पूर्वोक्तेऽर्थेऽपि, एते वक्ष्यमाणाः श्लोका मन्त्राः सन्तीति शेषः । तानाह । स्वप्नेनेति । स्वप्नेन मायिकेन रूपेण शारीरं जीवमभिप्रहत्य तिरस्कृत्य असुप्तः स्वयं, सुप्तान् प्राणादीन् अभिचाकशीतीति प्रकाशयति । शुक्रं शुद्धं स्वप्रकाशितं जीवमिन्द्रियादिकं चादाय पुनरैति आगच्छति । स्थानं जाग्रल्लोकं, हिरण्मय आनन्दमयः, पौरुषः पुरुषः, पुरुषस्य जीवस्य सखा । एकहंसः । एको मुख्यः सन् सुप्ततिरस्कृतान् हसतीत्यर्थः । अन्यदपि स्वाप्नं विशेषमाह । प्राणेनेति । प्राणेन पञ्चवृत्तिना आसन्येन, अपरं निकृष्टं स्थूलं, कुलायं नीडं शारीरं रक्षन् मरणशून्यं कुर्वन् अमृतः । पञ्चम्याः स्वादेशः । अमृतात् कुलयाद् बहिर्बुद्धिसंपर्करहिते देशे चरित्वा स्वाप्नं भोगं कृत्वा तत्कौतुकं दृष्ट्वेति यावत् । सः परमात्मा, यत्र कामम् । लिङ्गमशिष्यम् । यत्रेच्छा तत्र, अमृतः, अमरणधर्मा ईयते गच्छति । हिरण्मय इत्यादिकं पूर्ववत् । यत्र काममिति विवृणोति । स्वप्नान्ते स्वप्नदेशे । ईयमानः प्राप्नुवन् । शेषं स्फुटम् । रूपाणि देव इत्यादेः प्रदर्शितस्वप्नकथनस्य प्रयोजनं स्वयञ्ज्योतिष्ट्वसमर्थनमित्यभिप्रायेणाह । आराममिति । आरामम् आरमणं क्रीडेति यावत् । अत्र यदि जीवः कर्तृत्वेनाभिप्रेतः स्यात् तदा, आरामं स्वस्य पश्यन्ति न सं पश्यति कश्चनेति श्रुतिर्ब्रूयात् । तं क-

अथो खल्विति भगवतो न जागरितस्वप्नभेदोऽस्तीति पक्षः। परं स्वयञ्ज्योतिष्ट्वं तत्र स्पष्टम् ।

एतावद्दूरे भगवच्चारित्रमङ्गीकृत्य जीवविमोक्षार्थं प्रश्नः ।

श्नेति कर्मकर्तृभावे च न ब्रूयात् । एवं क्रीडां बोधयित्वा तस्या दुर्ज्ञेयत्वाय जागरणं निषेधति । तदित्यादि । तत् तस्मात् को वेद तस्मिन् समये भगवान् किं प्रदर्शितवानिति ज्ञानाभावात् कारणात् । आयतं गाढसुप्तं, न बोधयेत् । न जागरयेत् । तत्र हेतुः । इत्याहुरित्यादि । इति एवं वक्ष्यमाणं चिकित्सका आहुः । दुर्भिषज्यं दुश्चिकित्स्यत्वम् अस्मै सुप्ताय भवति । यदि बोधयेत् । यं देशमयं पश्यन् स्थितस्तमेव न प्रतिपद्यते, न प्राप्नोति । एवं भगवतः स्वप्नमङ्गीकृत्य स्वयंज्योतिष्ट्वं साधितम् । अतः परं भगवतः स्वप्नमनङ्गीकृत्य तथात्वं साधयतीत्याहुः । * अथो इत्यादि * । तथाच मतान्तरतयोल्लेखादयमन्यः पक्ष इत्यर्थः । श्रुत्यर्थस्तु । अथो इति भिन्नप्रक्रमे । खल्वाहुः । अर्थादन्ये । किम् ? । एष पूर्वोक्तोऽस्य भगवतो जागरितदेश एव । हि येतो हेतोः । यान्येव पदार्थजातानि जाग्रत् पश्यति तान्येव सुप्तः पश्यतीति । तदुक्तं श्रीभागवतेऽपि, लोकानपीतान् ददृशे स्वदेह इति । तथाच यथापीतानामपि दर्शनं, तत्र स्थितानां दर्शने कः सन्देह इति भगवतो न जागरितस्वप्नभेद इति प्रलय इवात्रापि स्वयञ्ज्योतिष्ट्वमिति तदाशयः । एतस्य मतान्तरत्वे हेतुमाहुः * परमित्यादि * । * तत्रेति * । व्याख्याते पक्षे पूर्वमादित्यादीनां कथनाज्जागरिते स्वयञ्ज्योतिष्ट्वस्यास्पष्टत्वादत्रास्यानुपयोगित्वम् । परप्रतिपत्त्यभावादतः पूर्वोक्त एव पक्षो युक्त इति तदाशय इत्यर्थः । एतच्छ्रवणोत्तरम्, एवमेवं तद् याज्ञवल्क्येति जनकेनाङ्गीकारात् प्रश्नोत्तरपूर्तिर्ज्ञातेति सिद्धम् । अतः परं यो मोक्षप्रश्नः, अत ऊर्ध्वं विमोक्षायैव ब्रूहीति स कुत इत्यपेक्षायामाहुः । * एतावदित्यादि * । समानः सन्नित्यारभ्य स्वप्नपर्यन्तं भगवच्चरित्रं बन्धकमङ्गीकृत्य मोक्षस्तर्हि कथमित्याशयेन तत्प्रश्न इत्यर्थः । तर्हि मोक्षसाधनं तत्र वाच्यम् । जीवा-

स वा एष इति जीववाक्यम् । तस्य सहजः सङ्गो नास्तीति स्वप्नसङ्गाभावं प्रसक्तः प्रदर्शयन्नसङ्गत्वमाह । तावतापि जागरणावस्थायामसङ्गत्वज्ञानाय पुनः प्रश्नः । तत्र मत्स्यदृष्टान्तोऽवस्थाभेदज्ञानाय क्रियाज्ञानप्रधानः ।

ऽवस्थादिकथनस्य कः प्रसङ्ग इत्यत आहुः । * स वा एष इत्यादि * । जीववाक्येनाहेत्यर्थः । श्रुत्यर्थस्तु, स वा एष जीव एतस्मिन् स्वप्नान्ते स्वप्नदेशे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रातिलोम्येन नितराम् आयो गमनं यथा स्यात् तथा, प्रतियोनि यौति मिश्रीभवतीति योनिर्जागरितादिस्थानं तल्लक्ष्यीकृत्य आद्रवत्यागच्छति बुद्धान्ताय जागरणायैव । एवं जीवस्य क्रियां बोधयित्वा तस्यासङ्गत्वं व्युत्पादयति । स यदत्र किञ्चित् पश्यत्यनन्वागतः । अनुलक्ष्यीकृत्याऽऽगतोऽन्वागतस्तद्भिन्नोऽनन्वागतः साक्षिभूत उदासीनः सन् पश्यतीत्यनुभवसिद्धम् । तत्रत्यसुखदुःखेषु तत्साधने चानासक्तेरनुभवसिद्धत्वात् । तेन साक्षित्वेन हेतुना भवत्यसङ्गोऽनासक्तो हि निश्चयेनायं पुरुष इतीति । तथाच मोक्षे स्वरूपयोग्यताबोधनं प्रसङ्ग इत्यर्थः । द्वितीयप्रश्नतात्पर्यमाहुः । * तावतापीत्यादि * । स्वप्ने असङ्गत्वे ज्ञातेऽपि जाग्रत्यासक्तिदर्शनात् तस्या योग्यताया अकिञ्चित्करत्वमतस्तत्रासङ्गत्वज्ञानाय पुनः प्रश्न इत्यर्थः । भूतावत ऊर्ध्वमित्यस्य स्वप्नादुत्कृष्टायां जाग्रदवस्थायामित्यर्थः । उत्तरस्य तात्पर्यमाहुः । * तत्रेत्यादि * । * तत्रेति * उत्तरे । * क्रियाज्ञानप्रधान इति * क्रियाया ज्ञानं मुख्यं यत्र तादृशः । तथाच यथा नदीक्रियाविलक्षणया क्रियया मत्स्ये नदीभिन्नत्वज्ञानं, कूलद्वये सञ्चरणात् तत्र तत्र सहजासक्तिशून्यत्वज्ञानं च । तथा जीवस्य स्वप्नदेशे बुद्धदेशे च सञ्चरणक्रिययाऽवस्थाद्वयभिन्नत्वज्ञानम् । उभयत्र सञ्चरणाच्च तत्र तत्र सहजासक्तिरहितत्वज्ञानम् । अतोऽयं दृष्टान्तस्तदर्थं तथेत्यर्थः । एवं जागरितेऽप्यस्यासङ्गत्वे ज्ञाते, एतस्य सहजासक्तिः केत्याकाङ्क्षा स्यात्, तदर्थं प्रश्नं च कुर्यादतस्तदर्थं स्वत एवाग्रिमं वरदानानुरोधाद् वक्तीत्यग्रेऽनु-

श्येनसुपर्णदृष्टान्तस्तु सुषुप्तौ भगवत्स्वरूपमाप्तयेऽवस्थान्तः । यत्रेति च भगवान् । पञ्चवर्णनाडीकृत एवास्य क्लेशो, भगवत्कृत एवानन्द इति स्वप्नानन्दो भगवद्रूपः परमो लोकः । सुषुप्तिस्त्व-कामरूपो भगवान् । अत्र ज्ञानाभावादुभयोः स्पष्टतया भेदनिर्देशः । शारीरः प्राज्ञ इति ।

शशासेति पदोक्त्या ज्ञायते । तदर्थं सर्वस्य प्रघट्टकस्यार्थं व-क्ष्यन्तः श्येनादिदृष्टान्ततात्पर्यमाहुः । * श्येनेत्यादि * । तत्र भगवत्सत्त्वे किं मानम् ? अत आहुः । * अवस्थेत्यादि * । एतस्मादन्ताय धावतीत्यन्तपदोक्तोऽवसान्तः । यत्र सुप्त इत्यग्रिमं वाक्यं च सुषुप्तौ भगवत्सत्त्वे मानम् । श्रुतौ, सल्लयायैव ध्रियत इ-त्यस्य सम्यग् लयः श्लेषो यत्र तादृशस्थानाय गच्छतीत्यर्थादन्तपदेन भगवल्लाभात् । यत्रेति वाक्ये तु सर्वकामनाभावकथनेन तल्लाभादि-त्यर्थः । तत्प्राप्तिश्च न धावनमात्रेण, किन्तु हेत्वन्तरेणेति वक्तुं, ता वा अस्यैता इत्यादेस्तात्पर्यमाहुः । * पञ्चेत्यादि * । * भगवद्रूप इति * अक्षरात्मकः । तथा श्रुतौ नाडीः प्रक्रम्यान्ते, अविद्याभय-मन्यत इत्युपसंहारात् तास्वेवाविद्यासम्बन्धो दुःखदः । अग्रे तु भगवत्सम्बन्धात् साभिभूयते । ततोऽथेति प्रक्रमान्तरादुपसंहारे लोकपदाच्चाक्षरम् । ततः पुनरथशब्दात् कामाभावरूपलिङ्गप्रत्यभि-ज्ञानाच्च सुषुप्तिः सुष्ठु सुप्तिर्यत्रेति तत्स्थानं भगवान् । तेन तत्स-म्बन्धादस्यापि सुषुप्तिरित्यर्थः । तत्र जीवेश्वरयोर्निर्देशस्य तात्पर्य-माहुः । * अत्रेत्यादि * । तद्वा अस्यैतदात्मकाममिति श्रुतौ तद्-अन्ताय धावदेतद् उच्यमानमस्य जीवस्य आत्मकामरूपमकाममाप्त-काममित्युक्तम् । अत उभयोः साधर्म्ये भेदज्ञानाभावात् तज्ज्ञानार्थं स्त्रीदृष्टान्तपरिष्वङ्गक्रियातृतीयाविभक्तिभिर्भेदनिर्देशः कृत इत्यर्थः । बाह्याभ्यन्तरज्ञानाभावस्तु परिष्वङ्गहेतुक इति श्रुतावेव स्फुटम् । तथा च यद्यवस्थात्रयमुक्तं जीवस्वरूपमेतन्महावाक्ये विवक्षितं स्यात् तदा शारीरप्राज्ञयोर्भिन्नावस्थावैशिष्ट्येऽपि स्वरूपभेदादत्रोक्तमेतत्त्रयं विरुद्ध्येत । यदि च परिष्वङ्गो नामात्यन्तमैक्यमिति विभाव्यते,

नाड्याच्छादनाभावोऽतिच्छन्दः । तत्र भगवत्स्वरूपं गतस्य बाह्येन्द्रियधर्माभावमाह । विजानीयादित्यन्तेन बाह्येन्द्रियाणां सलिलत्वमिति पूर्वोपपत्तिः ।

तत्रापि लक्षणादोषो दृष्टान्तविरोधश्च दुरुद्धरः । तस्मादेवं जीवब्रह्मतामतिपादकं वाक्यमिति हृदयम् । 'जाग्रत् स्वप्नः सुषुप्तिश्च गुणतो बुद्धिवृत्तयः । तासां विलक्षणो जीवः साक्षित्वेन विनिश्चित' इत्यादिवाक्योक्ता वृत्तयस्तु विषयोपधानाज्जायन्ते । जाग्रति तथा निश्चयात् । विषयस्तु ततो भिन्न इति भगवतः सुषुप्तित्वोक्तौ न किञ्चिद् बाधकम् । तमोऽभिभूतः सुखरूपमेतीति श्रुत्युक्तोऽभिभवस्तु भेदज्ञानाभावे हेतुः । अविद्याप्युपकाराय विपच्चायते नृणामिति मार्कण्डेयपुराणोक्तन्यायादागमनं प्रति च । ततोऽन्यत्र दुष्टान्ताय गमनं चाविद्ययैवेति न कोऽपि कापि विरोधः । अतः परम आत्मकामे रूपे आप्तकामत्वमकामत्वं च कुत इत्याकाङ्क्षापूरणाय, तद्वा अस्यैतदतिच्छन्द इत्यादिग्रन्थ इत्याशयेन तत्तात्पर्यमाहुः । * नाड्येत्यादि * । * तत्रेति * सुषुप्तौ । * बाह्येन्द्रियधर्माभावमिति * बाह्यादीनां त्रयाणामभावम् । * पूर्वोपपत्तिरिति * पूर्वोक्ते सर्वस्मिन् युक्तिः । श्रुत्यर्थस्तु, तद् आत्मकामं वै निश्चयेन अस्य जीवस्य एतत् प्राज्ञपरिष्वक्तम् अतिच्छन्दः । छादयतीति छन्दो नाडी । अतिक्रान्तं छन्दांसीत्यतिच्छन्दस्तदादिगुणकमतस्तथा । तर्ह्यपहतपाप्मत्वादिकमेव कथमित्यत आह । अत्र पितेत्यादि । तथाच नाडीछादनाभावेन पित्रादीनां देहसम्बन्धिनां स्तनादीनां देहानां च सम्बन्धविरहादपहतपाप्म, पुण्यपापाऽसम्बन्धाद् अभयं, तीर्णशोकत्वादशोकान्तरमित्यर्थः । तर्हि पित्रादीनां पापान्तानां सत्त्वे कथं तदसम्बन्ध इत्यत आह । यद्वैतदित्यादि । वै एवकारार्थः । यद् वै यदेव तत् पूर्वोक्तं पित्रादिकं न पश्यति, सुषुप्तौ भगवत्स्वरूपं प्राप्तो न चक्षुर्विषयीकरोति तत् द्रष्टव्यं पूर्वोक्तं पश्यंश्चक्षुर्गोचरीकुर्वन्नेवं न पश्यति । एवमुभयं प्रतिज्ञाय पूर्वं दर्शनमुपपादयति । हि यतो हेतोर्द्रष्टुर्जीवस्य दृष्टेस्तद्धर्मरूपस्य ज्ञानस्य विपरिलोपो

एष ब्रह्मलोक इत्यारभ्य, अनुशशासैतदमृतमित्यन्तेनानन्दरूपो भगवान् प्रतिपादितः फलत्वाय। एतावता उभयासङ्गः प्रतिपादितः।

दर्शनसाधनतद्विषययोस्तत्राभावेन विरोधात् सर्वात्मना अदर्शनं तत्र विद्यते। कुतः। अविनाशित्वात्। प्रकाशकस्यात्मज्योतिषः, सर्वे जीवाः सर्वमया इति श्रुत्यन्तरात् सर्वप्रचुरस्य जीवस्वरूपस्य च नित्यत्वात्। तर्ह्यदर्शनं कुत इत्यतस्तदुपपादयति। तुः शङ्कानिरासे। यत् पश्येदत्र यत्पदेन करणस्य विषयस्य च संग्रहः। तद् द्वितीयं करणं विषयश्च ततोऽन्यद् विभक्तं नास्ति। तथाच बाह्यस्य विषयस्य विभक्तस्य करणस्यचाभावात्। तद्धर्मरूपस्य दर्शनस्याभाव इत्यर्थः। एवमग्रेऽपि रूपेण एवमत्र बाह्येन्द्रियधर्माणामभावः प्रतिपादितः। अतः परमन्यत्वाविभक्तयोरभाव एव कथमित्यतस्तदुपपादयति। सलिल इत्यादि। एको मुख्यो द्रष्टा भगवानेव सलिलः। यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवतीति श्रुत्यन्तरात् सलिलवत्। अद्वैतः। द्विधा इतं द्वीतम्। तस्य भावो द्वैतम्। न विद्यते द्वैतं यस्मिन्नित्यद्वैतो भवतीति तदानीं भगवतः सर्वात्मकत्वप्राकट्येन द्वैतराहित्यादन्यत्वविभक्तत्वयोरभाव इत्यर्थः। तदिदमाहुः *बाह्येत्यादि *। एतदग्रिमग्रन्थस्य तात्पर्यमाहुः। * एष इत्यादि * एष इत्यनेन, एको द्रष्टेत्यनेनोक्तं मुख्यं द्रष्टारं परामृश्य ब्रह्मलोकपदेन तस्य ब्रह्मात्मकस्थानत्वं विधाय जीवस्य तावत्पर्यन्तं प्राप्तिरिति बोधनाय, एषास्य परमा सम्पदित्याद्युक्त्वा तस्य माहात्म्यबोधनायाऽन्येषामानन्दानामेतदंशत्वं बोधयित्वा, एष ब्रह्मलोकः सम्राडिति निगमयित्वा तस्य परब्रह्माभिन्नत्वाय भूमवाचकेनाऽमृतपदेनोपसंहारात् तथेत्यर्थः। ननु स्वप्ने जीवस्यासङ्गत्वश्रवणेऽपि जागरिते सङ्गेन स्वरूपयोग्यताविघटनमाशङ्क्य तत्रापि तज्ज्ञानार्थं मोक्षसाधनप्रश्ने, तद्यथा महामत्स्य इति महामत्स्यदृष्टान्तेन पुनः पुनः स्वप्नान्तबुद्धान्तसञ्चरणादेवासङ्गत्वं सिद्धम्। तदुत्तरं श्येनसुपर्णमारभ्य यदेतावत् सुषुप्तिमाहात्म्यमुक्तं तस्य किं प्रयोजनमत आहुः। * एतावतेत्यादि * । पुनः पुनरुभयत्र सञ्चरणादुभ-

तस्यानुभवारूढत्वाय पुनः प्रश्नः। दर्शनादर्शनावापोद्वापाभ्यां सिद्धमसङ्गो ह्ययं पुरुष इति । एवं जीवं सुषुप्तौ भगवन्तं च ज्ञात्वा मोक्षोपायं पृच्छति । तत्र याज्ञवल्क्यस्य भयं जातं, सुबुद्धिरयं निर्बन्धेनापि सर्वं ज्ञास्यतीति जीवब्रह्मधर्मानेकीकृत्य जीवोपक्रमेण ब्रह्मोपसंहारेणाह । तत्र, स यत्रेति जीवस्य मूर्च्छोपता-

---

यत्र समाना तस्यासक्तिरिति स्यादतस्तामवृत्त्यर्थमेतावान् ग्रन्थ इत्यर्थः । तर्हि पुनर्मोक्षसाधनप्रश्नस्य किं प्रयोजनमत आहुः । * तस्येत्यादि * । यदि सुषुप्तेः सकाशात् तस्य भेदो न ज्ञायेत, तदेश्वरादू भेदोऽपि न ज्ञायेतेति तस्यानुभवारूढत्वाय स इत्यर्थः । उत्तरस्य तात्पर्यमाहुः । * दर्शनेत्यादि * । तत्रापि स्वप्नान्तवद् वाक्यम् । अत्र संप्रसादः सुषुप्तिः । सम्यक् प्रसादो यत्रेति समासात् । रमणं स्वरूपानन्दानुभवः । आनन्दभुगिति श्रुतेः । चरणं सत्सम्पत्तिः । सता सोम्य तदा सम्पन्नो भवतीति श्रुतेः । पुण्यदर्शनमानन्दानुभवः । तस्य तत्फलत्वात् । अत्र सुखमस्वाप्समित्यनुस्मरणात् । पापदर्शनं तु, न किञ्चिदवेदिषमित्यज्ञानानुस्मरणम् शेषं पूर्ववाक्यसमानम् । अत्र बुद्धान्ताऽऽद्रावणकृतो यो दर्शनावापोऽदर्शनोद्वापश्च, ताभ्यां कृत्वा सुषुप्तावपि साक्षित्वेनैव दर्शनं सिद्धम् । अतस्ततोऽपि भिन्न इति तत्राप्यनासक्तत्वादसङ्गो ह्ययं पुरुष इति सिद्धम् । तत्स्वरूपस्यावस्थातो भिन्नत्वं, तास्वनासक्तत्वं च सिद्धम् । तावता तस्य मोक्षे स्वरूपयोग्यताऽनुभवारूढा जातेत्यर्थः । अग्रिमप्रश्नतात्पर्यमाहुः । * एवमित्यादि * । जीवं मोक्षयोग्यत्वेन, भगवन्तं तद्दातृत्वेन च ज्ञात्वा तत्प्रश्न इत्यर्थः । उत्तरस्य तात्पर्यमाहुः । * तत्रेत्यादि * । * सर्वं ज्ञास्यतीति * । कामप्रश्नव्याजेन सर्वं ज्ञानं मदीयं ग्रहीष्यतीति । * आहेति * । कामप्रश्नवरदानस्य भयस्य चानुरोधादुक्तरीत्या मोक्षोपायं वक्तुं पूर्वं सकामस्य कर्तुर्मरणावस्थां सप्रकारामुक्त्वा ततो निष्कामस्य कर्तुर्मोक्षोपायं सुषुप्त्यवस्थयैकीकृत्य श्लिष्टतया आहेत्यर्थः । श्रुतौ तु, अन्तेभ्य उदरौत्सीदिति प्रश्ननिर्णयावसानेभ्यः पुनः पुनरवरोधं कृतवानिति हेतोर्भयं जातमित्यर्थः । उत्तरं विवृण्वन्ति । * स यत्रेत्यादि * । श्रुतौ तु,

पावस्था । तद्यथा अन इति मरणावस्था । तत्र भगवानेवैनं लोकान्तरे नयति ।

तद्यथा राजानमिति भगवत्सन्मानम् । एवंविदमिति वचनात् । जीवस्तु नैवंवित् । सिद्धवद्वचनान्न ज्ञानविधिः । वाक्यभेदप्रसङ्गाच्च ।

अणिमानं स्थूलशरीरकार्श्यम् । उपतपतेति । उपतापजनकेन ज्वरादिना, न्येति प्राप्नोति । ततोऽणिमानं ज्ञानकार्श्यरूपां मूर्च्छां नितरां गच्छति । बन्धनादिति वृन्तात् । सम्प्रमुच्येति ममतात्यागेन स्वगुणं चैतन्यमाकृष्य । प्रतियोनीति स्थूलशरीरं लक्ष्यीकृत्य । प्राणायेति पुनरुज्जीवनाय । सा स्थूलदेहप्राप्तिरस्य येन हेतुना प्रकारेण च भवति तं हेतुं प्रकारं वक्तुं मरणावस्थोच्यत इत्याहुः । * तद्यथा अन इति * मरणावस्थेति * । हेतुर्भगवान् दार्ष्टान्तिके स्पष्टः । श्रुतौ । सुसमाहितमिति, भाराक्रान्तम् । उत्सर्सर्जेदिति, शब्दं कुर्वत् । शारीर आत्मेति लिङ्गशरीरविशिष्टो जीवः । अन्वारूढ इति शाकटिकेनेवाधिष्ठितः । उत्सर्सर्जेदिति वेदनया दिक्कादिशब्दान् कुर्वन् । अग्रिमकण्डिकयोरर्थमाहुः । * तद्यथा राजानमित्यादि * । श्रुतौ । प्रत्येनसः, पापिनां शासनार्थं नियुक्ताः । ग्रामण्यो, ग्रामनायकाः । प्रतिकल्पन्ते, उद्युज्य स्वोपयोगाय प्रतीक्षन्ते । भूतानि शरीरान्तरारम्भणायेश्वरेण नियुक्तानि । ननु जीवब्रह्मणोरुभयोरपि तत्र गमने कथं ब्रह्मण एव सन्मानमित्यत आहुः । * एवंविदमित्यादि * । * नैवंविदिति * संसारिण उपक्रान्तत्वादेवंवित्पदे परामृश्यमाणो जीवत्वेन न वक्तुं शक्य इत्यर्थः । ननु प्राज्ञान्वारोहान्तज्ञानवन्तमनूद्य, तस्मिन् ब्रह्मायातीति ज्ञानकथनात् पूर्वोक्तकर्मफलविदः संसारिणो जीवस्यैवेदं सन्मानं, न ब्रह्मण इति चेत् तत्राहुः । * सिद्धवदित्यादि * । अत्र किमेवं ज्ञानं विधीयते, उतानूद्यते ? । नाद्यः । सिद्धवचनात् । एवंविद्भवेदिति विधिवाक्यं कल्पयित्वैतद्योजनेन वाक्यभेदप्रसङ्गाच्च । अतोऽनूद्यत इत्येव वक्तव्यम् । तथा सति जीवस्य तथात्वबाधाद् ब्रह्मण एव सन्मानमित्यर्थः ।

स यत्रेति जीवे मोहोऽधिकः । अथैनमेते प्राणा इति भगव-

यत्तु पूर्वं भूतानि राजभृत्यवद्देहमारभ्य प्रतीक्षन्ते । पश्चादात्मा राजवत् तत्र गच्छतीत्यंशोऽत्र विवक्षितः । शरीरारम्भकैर्भूतैः सहैवात्मनो गमनमिति राद्धान्तस्थितेरित्युक्तम् ।

तत् साहसमेव । अविवक्षितत्वे मानाभावात् । दृष्टान्तकथनवैयर्थ्यप्रसङ्गाच्च । प्रथियासावोधिकायामग्रिमकण्डिकायां प्राणोपसमायनोक्तिवद् भूतोपसमायनस्यानुक्तत्वेन भूतैः सह गमनसिद्धान्तस्याप्रयोजकत्वाच्च । श्रुतौ । उपसमायन्तीति स्वस्ववसतिं त्यक्त्वा तेन सह गन्तुं निकटे समायान्ति । यत्रैतदूर्ध्वोच्छ्वासी भवतीति, पूर्वोक्तमरणावस्थाया उपसंहारे स्मारणम् । अतः परं शारीरब्राह्मणस्यार्थमाहुः । * स यत्रेत्यादि * । स यत्रायं शारीर आत्मा लिङ्गविशिष्टो जीवः । अबल्यं नीत्य, पूर्वोक्तोपतापादिना नैर्बल्यं नितरां प्राप्य । सम्मोहमिव न्येति, मरणावस्थायामधिकं मोहं प्राप्नोति । तत्रा तूत्क्रमणस्य कर्तुमशक्यत्वात् तदुपायं भगवानेव करोति । यथाक्रमोऽयं परलोकस्थान इत्यादिना पूर्वं तस्योक्तत्वात् । तदिदानीं सविस्तरं वदामीति ज्ञापनायाथैनमेते प्राणा इत्यथशब्दः । नच प्राणाः स्वत एवायान्तीति शङ्क्यम् । जडत्वात् । अतो जीवे सम्मुग्धे भगवत्प्रेरिता एवायान्तीत्याशयेनाहुः । * अथैनमित्यादि * । श्रुतौ । अथेति भगवत्प्रेरणोत्तरम् । प्राणा वागादयः । स इति जीवः । तेजोमात्रा इति प्रकाशभूतानि करणानि । समभ्याददान इति । उपसंहरन् । अवक्रामति । अन्यतश्चैतन्यमुपसंहृत्य हृदयेऽभिव्यनक्ति । चाक्षुष इति । चक्षुषि भवः सूर्यांशः । पराङ् न पर्यावर्तत इति । स्वकार्यरहितो भवति । अरूपज्ञ इति जीवस्तया भवति । तत्र हेतुः । एकी भवतीति । लिङ्गात्मना करणग्रामे मिश्रीभवति । तदा पार्श्वस्थाः न पश्यतीत्याहुस्तच्छिदः । एवमग्रेऽपि सर्वत्र । एवमुपसंहृते करणग्रामे निष्क्रमणसाधनीभूतं व्यापारमाह । तस्येत्यादिना । हृदयस्याग्रं, हृदयच्छिद्रनाडीमुखं प्रद्योतते भगवज्ज्योतिषा स्वप्न इव तदानीं प्रकाशयुक्तं तिष्ठति । प्राण इति मुख्यः प्राणः । प्राणा इति वागादयः । अनूत्क्रामन्तीति । मुख्यप्राणगम-

च्चरित्रं, सम्पद्यत इसन्तेन । श्लोके तद् ब्रह्म अस्य जीवस्य

नोत्तरं सद्दैकीभूय गच्छन्ति । संज्ञानमिति । पूर्वोक्तप्रद्योताहेतुत्वेन भातां बुद्धिम् । अन्ववक्रामतीति । अन्ववक्रामारोहति । सविज्ञानो भवति, गमनार्थं विशेषज्ञानवान् भवति । तं विद्याकर्मणी सन्मन्वारभेते पूर्वप्रज्ञा चेति । विद्या सदसद्विषयकं ज्ञानम् । कर्मादृष्टरूपं लिङ्गगतिरूपं च । यद्वा, विद्या उपासनात्मकं ज्ञानम् । कर्म यज्ञादिरूपम् । यथाक्रतुरस्मिन् लोक इत्यादिश्रुतेः पूर्वप्रज्ञा, संस्कारात्मना वर्तमानं ज्ञानम् । समन्वारभेते, अनुगच्छतः । जलायुका, जलौका । निहत्येत्यस्य व्याख्यानमविद्यां गमयित्वेति । अज्ञानं प्रापयित्वा, निश्चेष्टं कृत्वेत्यर्थः । पेशस्कारी भ्रमरीविशेषः । पेशसो रूपस्य मात्रामपादायापच्छिद्यान्यं स्वच्छकीटीयं नवतरं रूपं तनुत एवमयं पुरुष इदं स्थूलशरीरं निहत्य तस्माद् रूपाद् वासनया तद्दूरं गृहीत्वेति यावत् । स्वके पूर्वशरीरे वासनया कथं तद्ग्रहणमित्यत उपपादयति । स वा अयमात्मेत्यादिना । तथाच सर्वमयत्वेन नानावासनाशालित्वाद् या वासना तदा कर्मणोद्बुद्ध्यते तया पूर्वस्माद् रूपांशोपादानमित्यर्थः । अत्र पक्षान्तरमाह । अथो खल्वित्यादि । तेन क्वचित् कर्मणा वासनोद्बोधे तदनुरूपो देहः । क्वचित्तु कामाधीनः । यथा नृगस्य । उभयत्रापि भगवदिच्छा नियामिका । एवं जीवस्य लोकान्तरप्रापकं भगवच्चरित्रं विस्तारेणोक्तम् । अस्य भगवच्चरित्रत्वे गमकमाहुः । * श्लोक इत्यादि * । श्लोकस्तु सार्द्धः । 'तदेव तत् सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य । प्राप्यान्तं कर्मणस्तस्य यत् किञ्चेह करोत्ययम् । तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे' इति । अर्थस्तु, स जीवः, तत् सह । तृतीयाया लुक् । तेन ब्रह्मणा प्राप्तेन सह । तदेव इति प्राप्नोति । तत् किमित्यत आह । अस्य जीवस्य लिङ्गं लिङ्गशरीरे प्रधानभूतं मनः । कर्मणा पूर्वकृतेन कर्मणा यस्मिन्नर्थे निषक्तं नितरां सक्तमिति । शेषं स्फुटम् । तथा च पूर्वत्र भगवच्चरित्रं यदि प्रतिपाद्यं न स्यात् तदा श्लोके तत्सहेति न वदेत् । भगवदन्यारूढत्वोक्तिश्च पौर्वत्रिकी मुधा स्यादुक्तत्वेदयर्थः ।

अकामयमानस्य भगवतः स्वरूपं पूर्वमेवोक्तमनुवदति ।

भगवन्निर्गमने हि प्राणानां निर्गमनात् तस्य चेच्छाधीनत्वात् तदभावे इन्द्रियाणि सुषुप्तौ तत्रैव समवलीयन्ते । ब्रह्मैव सन् कूटस्थः सन् । अपिः समुच्चये । सह स्थिते जीवे ब्रह्माविर्भवतीत्यर्थः । जीवे ब्रह्माविर्भावो न सङ्गत इति तत्प्रतिपादनार्थं श्लोकः । जीवोपदेशप्रकरणाभावेन सिद्धवद्वचनान्न जीवन्मुक्तावस्था । नाप्यसम्प्रज्ञातसमाधिः । मतान्तरत्वात् । ब्रह्मप्रकरणत्वान्न जीवस्य

अतः पूर्वोक्तभयादकामयमानस्य मोक्षोपायं गूढतया वदन् मुच्यमानावस्थां सुषुप्तिसमानत्वेन श्लिष्टतयाह । अथाकामयमान इत्यादि, सम्राडित्यन्तेन । तत्र मोक्षावस्थायाः प्रकरणेन प्रतीयमानत्वात् सुषुप्त्यवस्थां व्याकुर्वन्ति । * अकामयमानस्येत्यादि * । अकामयमानस्य जीवस्य भगवत्सम्बन्धि यत् स्वरूपं, तद्धा अस्यैतदाप्तकाममात्मकाममकामं स्वरूपमिति सुषुप्तिस्थले पूर्वमुक्तम् । तत्प्राणस्थित्यर्थमनुवदति । तत्र हेतुः । * भगवन्निर्गमन इत्यादि * भगवन्निर्गमन इति * । भगवतः सकाशाज्जीवस्य निर्गमने । * तस्येति * निर्गमनस्य । * समवलीयन्ते इति * समवनीयन्त इति श्रौतपदस्यार्थकथनम् । अस्मिन् पक्षे, ब्रह्मैव सन्नित्यस्यार्थमाहुः * ब्रह्मैवेत्यादि * । ब्रह्माप्येतीत्यत्र ब्रह्मेति प्रथमान्तम्, एतीत्यस्य कर्तृ । एतीति, प्रादुर्भवतीत्यर्थः । यदा सर्वे प्रमुच्यन्त इति श्लोकप्रयोजनमाहुः । * जीव इत्यादि * । नन्वत्रोत्क्रमणस्यैवोपक्रान्तत्वाज्जीवन्मुक्ताद्यवस्थैवाकामयमानस्य वाच्या, न तु सुषुप्त्यवस्थेति शङ्कायां सुषुप्त्यवस्थाज्ञापनाय ता दूषयन्ति । * जीव इत्यादि * । यथा हि काठके, अन्यच्छ्रेय इत्यादिके जीवोपदेशो, न तथात्र जीवस्वरूपोपदेशः । येन तदनुरोधाज्जीवन्मुक्तिरत्रोच्येत । किन्तु, सिद्धवदुच्यते । अतो न सा । अथो खल्वाहुरित्यादिनोक्तस्य काममयपक्षस्य मतान्तरत्वादकामोऽपि तेनैव मतेनोच्यत इति तेनासम्प्रज्ञातसमाधिरपि न वक्तुं

सद्योमुक्तिः फलम् । उत्क्रमण एव ब्राह्मणस्याप्युक्तत्वात् । तद्य-थेति सुषुप्तशरीरम् । अनस्थिक इत्यादि, सम्राडित्यन्तमुपसंहारः ।

शक्यः । मुख्यं प्रकरणं ब्रह्मणोऽवान्तरश्चोत्क्रमणस्येति स्वतः स्वरूपावस्थानरूपा सद्योमुक्तिरपि न फलत्वेन वक्तुं शक्या । तत्र हेतुः । *उत्क्रमण इत्यादि* । ऊर्ध्वोच्छ्वासी भवतीत्युत्क्रमण एवोपक्रान्ते शारीरब्राह्मणस्योक्तत्वात् । तथाच तदनादृत्य अकामत्वमात्रेण रूपेण उत्क्रान्तिशून्या सद्योमुक्तिरपि न वक्तुं शक्येत्यर्थः । अतः सुषुप्तिप्रकरणाभावेऽप्यकामत्वादिना सौषुप्तिकलिङ्गेन, तद्यथाऽहिनिर्ल्वयनीत्यग्रिमवाक्येऽपि शेत इति शयनलिङ्गेन चावान्तरमुत्क्रमणप्रकरणं बाधित्वा सुषुप्तिरेव जनकेन ज्ञातव्या । तदा तु न बदिष्य इति मदभीष्टसिद्धिः । अथ लिङ्गस्य मुक्त्यवस्थासाधारणत्वात् तदनादृत्य प्रकरणबलेन ज्ञास्यति तदा तु स्वकृतवरदानानुरोधाद् विशिष्य वक्तव्यमित्याशयेन, अथायमनस्थिकोऽशरीरः प्राज्ञ आत्मा ब्रह्मैव लोक एव सम्राडित्यन्तं श्लिष्टवचनमुपसंहारः । अत्र श्रुतावनस्थिक इति स्थूलशरीरराहित्यम् । तच्च जीवन्मुक्तस्य सुषुप्तस्य चाभिमानाभावात् तुल्यम् । प्राज्ञ आत्मेति सुषुप्तिसाक्षिपरमात्मनोर्वाचकमित्यवस्थाद्वयसाधारणम् । तत्र आत्मा इत्यनेन जीवात्मानमनूद्य, ब्रह्मैव लोक एवेति विधत्ते । तत्र मुक्तिपक्षे जीवस्य ब्रह्मत्वविधानम् । सुषुप्तिपक्षे लोकत्वविधानम् । सम्राडिति राज्ञः सम्बोधनम् । अतोऽत्र श्लिष्टतयोपसंहार इत्यर्थः । एतेन सुषुप्तिव्याख्याने बीजं प्रदर्शितम् । याज्ञवल्क्यभयानुरोधादिदमेतावत् सुषुप्तिपरत्वेन व्याख्यातम् । अग्रे च वरदानानुरोधान्मुक्तिपरत्वेन व्याख्यास्यत इति न कोऽपि कापि सन्देहः । एतदग्रे, सोऽहं भगवते सहस्रं ददामीति जनकवाक्यम् । तत्र न पुनर्मोक्षप्रश्नः । तेन एवं श्लिष्टप्रयोगेऽपि जनकेन लिङ्गस्य साधारण्यं प्रकरणस्योत्क्रमगोचरत्वादसाधारण्यं चावगत्य, अथाकामयमान इति निष्कामप्रकरणं मतान्तराद् विविक्तत्वेन सिद्धान्ते निवेश्य तत्र सद्योमुक्त्यवस्थामवधार्य, ब्रह्माप्येतीत्यत्र ब्रह्मपदं च द्वितीयान्तमवगत्य, तत्रास्य ब्रह्मभूतस्य लयं चावगत्य, श्लोकमप्येतदवस्थाप्रति-

श्लोका अत्र त्रयोदश सर्वनिर्द्धारकाः । आद्यो ब्रह्मविद्गतेः । एष इति सुषुप्तौ नाडीत्वाद् पञ्चवर्णाः । अन्धन्तम इति द्वाभ्यामनेवंविदो निन्दा । तदेव सन्त इति बुद्धिमतां वचनम् । आत्मानमिति वैराग्यम् । यस्यानुवित्तिरिति नवभिर्ब्रह्मस्तुतिः । तद्विज्ञानं च । पुनरेतदेव स्पष्टतयोपदिशति । स वा अयमात्मेत्यादि । अभयं वै जनक प्राप्तोऽसीत्यन्तम् । काण्वानां क्वचित् पाठभेदेऽप्ययमेवार्थः । अत्र प्रकरणे जीवो वाच्य इति प्राप्ते ।

मादकत्वेनावगत्य, अहिनिर्ल्वयनीदृष्टान्ते . मृतशरीरपरमेवावगत्य, प्राज्ञ आत्मा ब्रह्मैवेत्यस्य प्राज्ञत्वादयमात्मा ब्रह्मैव सन् लोक एव ब्रह्मार्पितो ब्रह्मलोकात्मको भवतीति निश्चितवान् । तेन जाग्रद्दशायां हृदयस्थसर्वकामप्रमोको मोक्षसाधनत्वेनावधारित इति बोधितम् । तदा याज्ञवल्क्योऽपि तस्य सम्यग्बोधनाय सर्वं सिद्धान्तमाह । तद्विवृण्वन्ति । * श्लोका इत्यादिना * । * अत्र त्रयोदशेति * । एकोपक्रमगतास्त्रयोदश । * आद्यो ब्रह्मविद्गतेरिति * ब्रह्मविदः सद्योमुक्तिमुक्त्वा ततो न्यूनाधिकारिणो ब्रह्मविदः क्रममुक्तेर्बोधकः, अणुः पन्था इति श्लोकः । तस्मिन् शुक्लमिति श्लोकस्तु निष्क्रमणमार्गबोधक इत्याहुः । * एष इत्यादि * । * बुद्धिमतां वचनमिति * । सद्योमुक्तिभाजां ज्ञानवतां ब्रह्मभावेन ब्रह्मप्राप्तिवचनम् । शेषं स्फुटम् । शेषस्यार्थमाहुः । * पुनरित्यादि * । अत्रैतद् बोध्यम् । यस्यानुवित्त इत्यस्योत्तरार्द्धे, स विश्वकृदित्यादिना यत् सर्वकर्तृत्वमुक्तं तत् स वा एष आत्मा सर्वस्य वशीत्यारभ्य, सेतुर्विधरण इत्यन्तेन स्पष्टीकृतम् । तस्य लोक इत्युक्तं लोकाधिपत्यं च, एषां लोकानामसंभेदायेत्यनेन । यत् पुनः पूर्वार्द्धे, यस्यानुवित्त इत्यादिनोक्तम्, अग्रिमश्लोकैश्च तत्, तमेतं वेदानुवचनेनेत्यारभ्य प्रान्तं स्फुटीकृतमिति । पूर्वपक्षमाहुः । * अत्र प्रकरणे जीवो वाच्य इति * । अयमर्थः । अत्रोपक्रमे, कतम आत्मेति प्रश्ने, योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुष इति शारीरलिङ्गादुपसंहारे च, योऽयं विज्ञानमयः प्राणेष्विति कण्वपाठे तदपरित्यागान्मध्ये बुद्धान्ताद्यवस्थोप-

अभिधीयते । ब्रह्मैव प्रकरणार्थः । सुषुप्त्युत्क्रमणे च जीवब्रह्मणोर्भेदेन व्यपदेशात् ।

न्यासेन तस्यैव प्रपञ्चनाच्च। यद्यपि संसारी प्रतीयते, तथापि मध्ये, ध्यायतीव लेलायतीवेति ग्रन्थे संसारिधर्मनिराकरणात् । उपसंहारे च, स वा एष महानज आत्मेति संसारिधर्मरहितपरमेश्वरात्मकत्वबोधनात् । उपक्रमोक्तविज्ञानमयत्वादेस्तस्मिन्नपि सत्त्वेन उपक्रमस्य सन्दिग्धतया नैर्बल्यात् । माध्यमिकबुद्धान्ताद्यवस्थोपन्यासस्य च संसार्यवस्थानुवादेन तद्रहितदशायां परमेश्वराभेदबोधनपरत्वावगमात् । सुषुप्त्यादौ भेदबोधनस्यापि संसारिदशायामेव पर्यवसानात् । पुनः पुनर्मोक्षप्रश्नेन, यत् किञ्चित् पश्यत्यनन्वागतस्तेन भवत्यसङ्गोऽयं पुरुष इति तदुत्तरे पुनः पुनरनन्वागततया असङ्गत्वप्रतिपादनेन, अनन्वागतं पुण्येनानन्वागतं पापेनेति कर्मसम्बन्धराहित्यस्य च प्रतिपादनेन, तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवतीति सर्वदुःखतरणश्रावणेन च परमात्माभिन्नासंसारिरूपप्रतिपादनपरमेवैतद्वाक्यमित्यतोऽत्रासंसारी परमेश्वराभिन्नो जीवो वाच्य इत्यर्थः । सिद्धान्तं व्याकुर्वन्ति । * ब्रह्मैवेत्यादि * । अयमर्थः । सत्यमत्र मुक्तजीवस्तथा निरूप्यते । तथापि स न प्रकरणार्थः । तत्र हेतुः । * सुषुप्तावित्यादि * । तथाच च यदि मुक्तो जीवो ब्रह्माभेदेनात्र प्रतिपाद्यः स्यात् तदा अवस्थाभेदस्याप्रयोजकत्वेन तत्र जीवं परमेश्वराच्च भिन्द्यात् । प्रतिपिपादयिषिते अभेदे भेदकथनस्य प्रयोजनशून्यतया वैयर्थ्यप्रसङ्गात् । नच संसार्यवस्थायां भेदबोधनाय तदिति युक्तम् । तदानीं जाग्रत्स्वप्नयोरकर्त्रादिवैशिष्ट्यस्य प्रत्यक्षसिद्धत्वेन सुषुप्तिमरणयोस्तमोऽभिभवेन तथात्वस्याज्ञानेऽपि सौषुप्तिकस्मरणेन मृतानां भूतादिभावदर्शनेन चानुमानसिद्धतया तत्कथनवैयर्थ्यानपायात् । अतो ज्ञायमानावस्थासिद्धं भेदमनूद्य यदज्ञायमानावस्थासिद्धं भेदमनुवदति तदसंसार्यवस्थायामपि भेदबोधनायैवानुवदति । यथोदकं शुद्धं शुद्धे आसिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमेति काठके तथैव श्रावणात् । नच तर्ह्युपक्रमाद्यनुरोधादसंसारि

आकाशवद् ब्रह्मनिर्द्धार एव युक्तः ॥ ४२ ॥

परमेश्वरसमानधर्मा जीवो वाच्योऽस्त्विति वाच्यम् । उपक्रमे किञ्ज्योतिरयं पुरुष इति प्रकाशकप्रश्ने, आदित्याद्यनन्तरमात्मज्योतिरित्युत्तरे पुरुषस्य प्रकाशापेक्षितत्वेनाप्रकाशकत्वात् । प्रकाशक आत्मा क इत्याशयेन पृच्छति । कतम आत्मेति । तत्र स्पष्टतया वक्तव्येऽप्युत्तरे याज्ञवल्क्यो, न ददिष्य इति स्वाभिसन्धेर्वरदानस्य चानुरोधाच्छ्लिष्टमेवोत्तरं ददातीति पूर्वं व्युत्पादितम् । अतस्तद्विचारे, अत्रायं स्वयञ्ज्योतिर्भवतीति निगमनवाक्ये परमात्मैव स्वयम्पदवाच्यः सिद्ध्यतीत्युपक्रमगतः प्रश्नस्तत्पर एव पर्यवस्यति । तथापि श्लिष्टप्रयोगाज्जनकेन सम्यङ् न ज्ञातः । एतावज्ज्ञातं, संसारिव्यतिरिक्तः प्रकाश इति । ततस्तत्सन्देहनिवारणाय पृच्छति । विमोक्षाय ब्रूहीति । तदापि श्लिष्टमेवोत्तरं ददाति । स एष एतस्मिन् सम्प्रसादे रत्वा चरित्वेत्यादि । तदा जीवस्यासङ्गत्व उक्तेऽपि जनकस्य सन्देहो न निवृत्त इति पुनर्मोक्षाय पृच्छति । तदा पुनरपि मत्स्यादिदृष्टान्तं वदन् स्वप्नसुषुप्ती अवस्थे उक्त्वा सुषुप्तौ परमात्मानम् असङ्गादपि जीवाद् भेदेनाह । तदापि तस्य प्रकाशकसन्देहो न निवृत्त इति पुनर्मोक्षाय पृच्छति । तदा पुनरपि सम्प्रसादवाक्येनैवोत्तरे पुनरपि मोक्षाय पप्रच्छ । तदा याज्ञवल्क्यो राज्ञो मेधावित्वाद् भीतो मरणावस्थां संसारिणो वदन् परमेश्वराज्जीवस्य भेदमाह । तदापि श्लिष्टप्रयोगात् तस्य सन्देहो न निवृत्त इत्यकामयमानस्य सद्योमुक्तिमाह । तत्र, ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः, प्राज्ञ आत्मा ब्रह्मैवेति च श्रुतेर्जीवस्य ब्रह्मभाव एव मुक्तिः । प्राज्ञ आत्मा ब्रह्म योऽस्ति स एव प्रकाशकः । तज्ज्योतिषैवायं जीवः सर्वं करोतीति ज्ञात्वा, सोऽहं भगवते सहस्रं ददामीत्युक्तवान् । तदा याज्ञवल्क्यस्त्रयोदशश्लोकैः सर्वं शास्त्रार्थमुक्त्वा, स एष आत्मेत्यादिना तमेवार्थं स्पष्टमुक्तवान् । तदा जनको विदेहान् स्वात्मानं च दास्यार्थं तस्मै दत्तवान् । विद्यां च याज्ञवल्क्यः समापितवान् । अत उपक्रमोपसंहारयोः परमात्मन एव प्रकृतत्वसिद्ध्या तस्यैव प्रकरणित्वमिति सिद्धम् । तदाहुः । * आकाशवदित्यादि * । त

पत्यादिशब्देभ्यः ॥ ४३ ॥

किञ्च। सर्वस्य वशीत्यादिशब्देभ्यः स्पष्टमेव ब्रह्मप्रकरणमिति ॥ ४३॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते
ब्रह्मसूत्राणुभाष्ये प्रथमाध्यायस्य
तृतीयः पादः ॥ १ ॥ ३ ॥

थाच यथा पूर्वाधिकरणे अन्यथानुपपत्तिबलादाकाशवाक्यस्य ब्रह्मपरत्वनिर्धारस्तथात्र भेदव्यपदेशान्यथानुपपत्तिबलाद् प्रकरणस्य ब्रह्मपरत्वनिर्द्धार इत्यर्थः। किञ्चात्र संसारिणोऽपि जीवस्य परमेश्वराद् भेदसाधनेन मुक्तावस्थायामपि जीवे ब्रह्मलक्षणस्य नातिव्याप्तिरिति बुद्धिस्थं प्रसङ्गाद् बोधितम् ॥ ४२ ॥

पत्यादिशब्देभ्यः ॥ भेदव्यपदेशेन प्रकरणस्य ब्रह्मपरत्वसाधनं क्लिष्टमित्यतो हेत्वन्तरं वदतीत्याशयेनाहुः । * किञ्चेत्यादि * । तेषामुपासनार्थत्वं वारयितुं बहुवचनम् । तथाच यदि ते शब्दा उपासनार्थाः स्युः, सङ्कुचिताः स्युर्न त्वसकृत् । न वा विस्तृताः स्युः। यतस्ते तथा, अतो न जीवस्य तथोपासनार्थाः । किन्तु परमेश्वरस्य जीवाद् भेदनार्था एवेत्यहंग्रहोपासनापेक्षया ईश्वरत्वेन पृथक्त्वोपासनैव युक्तेत्यर्थः ॥

अत्र शङ्कराचार्याः । किमिदं वाक्यं संसारिरूपान्वाख्यानपरमुतासंसारिस्वरूपप्रतिपादनपरमिति संशये, संसारिपरमिति पूर्वपक्षं, संसाररहितपरमेश्वराभिन्नजीवात्मप्रतिपादनपरमिति सिद्धान्तमाहुः । भेदव्यपदेशं च संसारिभेदपरमाहुः ।

तदसङ्गतमित्युपपादितम् ।

भास्कराचार्यास्तु, किं संसारिस्वरूपपरम्, उत पररूपपरमिति संशये, पररूपपरमिति सिद्धान्तयन्ति ।

तन्मतं सन्दिग्धमिव । तत्र यदि मुक्तजीवपरं, तदा तु पूर्वोक्तदूषणमस्तमित्यप्रयोजकम् । यदि केवलपरमेश्वरपरं, तदा तु नदुष्टम् ।

रामानुजाचार्यास्तु, अत्र पक्षानुल्लेखादिदं सूत्रद्वयं पूर्वसूत्रशेषत्वेन योजयन्ति । तेन तन्मतेऽत्र जीवाद् भिन्न एव परमेश्वरः प्रतिपाद्यः । एवं तद्वोरमतेऽपि ।

अत्रेदं बोध्यम् । सत्यमत्र पक्षानुल्लेखस्तथापि, आद्ये विषय-

वाक्ये आकाशः पक्षो, द्वितीये त्वात्मा पक्ष इति पक्षभेदाद्धेतुभेदा-द्वाधिकरणभेद एव युक्तः । अन्यथा, अर्थान्तरत्वादिव्यपदेशादिति सर्वस्य हेतोरनुवृत्त्याऽप्यात्मनः प्रत्यगात्मभेदसिद्धिर्भेदेनेति पदस्य, पत्यादिसूत्रस्य च वैयर्थ्यापत्तेर्दुर्वारत्वादिति ।

माध्वास्तु, स वा एष सम्प्रसादे रत्वा चरित्वेत्यादिना स्वप्नादिद्रष्टा यः प्रतिपादितोऽसङ्गत्वेन च, स जीवो, ब्रह्म वेति संशये, सुषुप्त्यादौ जीवाद् भेदेन व्यपदेशाद् ब्रह्मैवात्र प्रतिपाद्यम्। स्वप्नस्य सत्यत्वात् तद्द्रष्टृत्वं सर्वज्ञे ब्रह्मण्यविरुद्धम् । तस्मादसङ्गं ब्रह्मैवेत्याहुः । द्वितीयसूत्रे च पत्यादिशब्दानां श्रवणात् परमेश्वर एव प्रतिपाद्यो न तु, स वा एष महानज आत्मेति वाक्यप्रतिपादितः । अजशब्दवाच्यश्च चतुर्मुख इत्याहुः ।

भिक्षुस्तु, अत्रोत्क्रान्तिशब्दो जीवस्य देहत्यागमात्रपरतया मोक्षादीनामपि संग्राहकः । मोक्षावस्थायामपि निरञ्जनः परमं साम्यमुपैतीति साम्यान्तर्गतस्य भेदस्य व्यपदेशात् । ब्रह्मैव सन् ब्रह्माप्येतीत्युक्तवाक्येऽप्यव्ययस्य भेदतन्त्रत्वाच्च । ब्रह्मैव सन्निति तु त्यक्तदेहाभिमान इति, प्राप्तगौणब्रह्मभाव इति वेत्यर्थबोधकम् । प्रलयावस्थायां च यत् प्रयन्त्यभिसंविशन्तीत्यादिश्रुतौ कोशखड्गयोरिव ,प्रवेष्टव्यप्रवेष्टोर्भेदोऽवगम्यत इति । नन्वेवमपि सुषुप्तावेकीभावः । तुरीयाख्ये महाप्रलये च ब्रह्मचिन्मात्रावशेषो जीवो माण्डूक्यादिवाक्येभ्यः सेत्स्यतीति चेन्न । उक्तबृहदारण्यकवाक्ययोरविभागपरत्वस्यागत्या वक्तव्यतया तदेकवाक्यत्वेनेतरश्रुतेरपि तत्परत्वावधारणात् । अविभागो वचनादिति सूत्रे व्यासेनापि वक्ष्यमाणत्वाच्चेत्याह ।

तत्र यदविरुद्धं, तद् ग्राह्यम् । शेषे उदासीना वयम् ।

एवमस्मिन् पादे पदार्थान्तरेऽतिव्याप्तिवारणात् तल्लिङ्गाद्यधिकरणोक्तार्थप्रपञ्चनेनोपास्यरूपनिरूपकवाक्यविचाराद्युपासनाधिकारिविचारपूर्वकं त्रयोदशाधिकरण्या आधाररूपो भगवान् विचारितः ॥ ४३ ॥ ॥ १३ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रकिरणनिवारित-
हृदयान्धकारेण पीताम्बरात्मजपुरुषोत्तमेन कृते
ब्रह्मसूत्राणुभाष्यप्रकाशे प्रथमाध्यायस्य
तृतीयः पादः समाप्तः ॥ १ ॥ ३ ॥

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ १ ॥

एवं सर्वेषां वेदान्तानां ब्रह्मपरत्वे निर्णीते, केचिद् वेदार्थाऽज्ञानात् क्वचिद् वेदभागे कापिलमतानुसारिपदार्थदर्शनेन तस्यापि वेदमूलकत्वं वदन्ति । तन्निराकरणाय चतुर्थः पाद आरभ्यते । तत्र, ईक्षतेर्नाशब्दमिति सांख्यमतमशब्दत्वादिति निवारितम् । वेदेन प्रतिपादितमिति तत्राशङ्कते । आनुमानिकमप्येकेषाम् ।

आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ अतीतेषु पादेषु प्रथमेऽतिव्याप्तिजनकशब्दकृतसन्देहवारणाय कार्यनिरूपकाणि वाक्यानि विचार्य, द्वितीयतृतीययोश्च यथायथं जीवजडरूपार्थकृततत्सन्देहवारणायान्तर्याम्युपास्यरूपनिरूपकाणि च वाक्यानि विचार्य, सर्वेषां वेदान्तानां साक्षात् परम्परया च ब्रह्मणि समन्वयः प्रतिपादितः । स तदा दृढीभवति यदा श्रौतत्वेनाभिमन्यमानस्य मतान्तरस्य श्रौतता निराक्रियते । अतस्तदर्थं चतुर्थे पादे जीवजडसमुदायात्मकार्थनिरूपकतया मतान्तरश्रौतताभ्रमजनकानि प्रकीर्णानि वाक्यानि विचार्यन्त इत्युपोद्घातबोधनाय पूर्वपादत्रयसिद्धमर्थमनुवदन्त एतत्पादार्थमाहुः । * एवमित्यादि * । तथाच तन्निराकरणं प्रयोजनं, तादृशवाक्यविचारश्चार्थ इत्यर्थः । नन्वदृश्यत्वाद्यधिकरणे एतादृशमपि वाक्यं विचारितमेवेति, किमनेन विचारेणेत्याशङ्कां समादधानाः सूत्रांशमवतारयन्ति * तत्र, ईक्षतेरित्यादि * । तथाच यद्यपि तद्वाक्यं विचारितं, तथापि तन्मतस्य सर्वथा अश्रौतत्वमेवेति नोपपादितमतो विचार इत्यर्थः । एतेनास्य पादस्य, ईक्षतिसमन्वयसूत्रप्रपञ्चरूपत्वं बोधितम् । नन्वत्र प्रकृतिनिराकरणमेवास्तु । मतस्य श्रौततानिराकरणे किं गमकम् ? इत्याकाङ्क्षायामानुमानिकपदमेव

एकेषां शाखिनां शाखासु सांख्यपरिकल्पितप्रकृत्यादि श्रूयते ।

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।

मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥

महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।

पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिरिति काठके श्रूयते ।

तत्र बुद्धेरात्मा अहङ्कारः । ततो महान् महत्तत्त्वम् । ततोऽव्यक्तं प्रकृतिः । ततः पुरुष इति । न ह्यहङ्कारादयः पदार्था ब्रह्मवादे सम्भवन्ति । तस्मादेवञ्जातीयकेषु तन्मतपदार्थानां श्रवणान्मायाप्रकृत्यविद्यावादा अपि श्रौता इति चेन्न ।

गमकमित्याशयेन व्याकुर्वन्ति । * एकेषामित्यादि * । तथाच पूर्वग्रन्थे, कामाच्च नानुमानापेक्षा, नानुमानमतच्छब्दादित्यादौ केवलानुमानपदादत्र च सम्बन्धितद्धितान्तानुमानिकपदात् सांख्यमतवचनीये, सङ्घातपरार्थत्वात् पुरुषस्येतिसूत्रेऽनुमानेन प्रकृतिसम्बन्धित्वेन सिद्धः पुरुषोऽपि संग्राह्यत्वेन गम्यते । तयोश्च निराकरणे तन्मतमेव निराकृतं भवतीति सौत्रं पदमेव गमकमित्यर्थः । केषां शाखायामित्याकाङ्क्षायां विषयवाक्यमुदाहरन्ति । * इन्द्रियेभ्य इत्यादि * । क्वात्र प्रकृत्यादीत्यतो व्याकुर्वन्ति । * तत्र बुद्धेरित्यादि * । * बुद्धेरात्मा अहङ्कार इति * । पर इत्यनुषज्यते । बुद्धेः सकाशादात्मा । 'सर्वात्मनोऽन्तःकरणं गिरित्रम्' इत्यन्तःकरणत्वेन सिद्धस्य गिरित्रस्य, 'चन्द्रो मनो यस्य दृगर्क आत्मा अहं समुद्रो जठरं भुजेन्द्र' इति स्वस्मिन्नात्मपदप्रयोगाद्वात्माऽहङ्कारः पर इत्यर्थः । शेषं स्फुटम् । तथाचैवमत्र सांख्यमतप्रत्यभिज्ञानात् तन्मतं श्रौतमिति । तदाहुः । * न हीत्यादि * । अपिशब्दार्थमाहुः । * तस्मादित्यादि * । * एवञ्जातीयकेष्विति * । वक्ष्यमाणेष्वजादिवाक्येषु । * मायाप्रकृत्यविद्यावादा इति * । मायान्तु प्रकृतिं विद्यात्, पञ्चारान्तेदां पञ्चपर्वामधीम इत्यादिवाक्येष्वभिमन्यमानाः । पूर्वं पूर्वप-

शब्दसाम्यमात्रेण न तन्मतं सिद्ध्यति ।
सन्दिग्धानां पदार्थानां पौर्वापर्येण निर्णयः ।
न तु सन्दिग्धवाक्येन सर्वव्याकुलतोचिता ॥
अत्र हि पूर्वम् ।
आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयाँस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥

तदनुचत्वारि वाक्यानि । यस्त्वविज्ञानवानित्यादि । तदन्विन्द्रियेभ्यः परा इति । तत्र पूर्वसम्बन्ध एवार्थ उचितः । तमाह ।

शंकामनूद्य तद्दूषकं हेतुमवतारयितुं निषेधं व्याकुर्वन्ति । * शब्देत्यादि * । * तन्मतमिति * । अहङ्कारमहत्तत्त्वप्रकृतिपुरुषाणामुत्तरोत्तरं परत्वबोधकं सांख्यमतम् । कुतो न सिद्ध्यतीत्यतः कारिकया तद्धेतुमाहुः । * सन्दिग्धेत्यादि * । * पौर्वापर्येणेति * पूर्वापरसन्दर्भेण । सन्दिग्धा ह्यस्मिन् वाक्ये पदवाच्या अर्थाः । पदानि वाक्यावयवभूतानि, वाक्यं च महावाक्यस्य । अतो महावाक्यानुरोधेन तदर्थो निर्णयः । न तु सन्दिग्धपदघटितवाक्येनावयविभूतस्य महावाक्यस्य व्याकुलता युक्ता । तथाच तद्व्याकुलीभावादेतन्मतं न सिद्ध्यतीत्यर्थः । तदेतद् व्युत्पादयन्ति । * अत्र हीत्यादि * । * अत्रेति * । प्रकरणे । * हिर्हेतौ । * चत्वारीति * । विज्ञानसारथिवाक्यस्य कचिदिन्द्रियेभ्यः परा इत्याद्यनन्तरं दर्शनाच्चत्वारि । विज्ञानसारथिवाक्यार्थस्त्वग्रे कारिकया वक्तव्यः । एवं सन्दर्भे यत् सिद्धं तद्वक्तुं हेतुं वदतीत्याहुः । * तत्रेत्यादि * । * तत्रेति * । इन्द्रियेभ्य इति वाक्ये । विष्णुधर्मोत्तरे तृतीयकाण्डे । 'उपमानेन तुल्यत्वमुपमेयस्य रूपकम्' इति रूपकलक्षणाद् रूप्यते यत् तद्रूपमिति कर्मणि घञि कृते, इवे प्रतिकृताविति कनि च कृते रूपकमित्यलङ्कारनाम सिद्ध्यतीत्यभिसन्धाय हेतुं

शरीररूपकविन्यस्तगृहीतेः । शरीरेण रूप्यन्ते ये शरीरेन्द्रियादयस्ते विन्यस्ता यत्र रूपकभावेन रथादिषु तेषामेवात्र गृहीतिर्ग्रहणम् । अन्यथा प्रकृतहानाप्रकृतपरिग्रहापत्तिः ।

जीवप्रकरणं ह्येतन्मुक्त्युपायोऽस्य रूप्यते ।
योग्यं शरीरमारुह्य गच्छेदिति हरेः पदम् ॥

तत्र जीवस्य ब्रह्मप्राप्तौ मुख्यं साधनं शरीरम् । स रथः । सर्वसामग्रीसहिताऽपराधीनयानत्वात् । रथस्तु हयाधीनः । हयाश्च

व्याकुर्वन्ति । * शरीरेत्यादि * । स्वस्य स्वज्ञापकत्वेऽपि दोषाभावाच्छरीरेण रूप्यन्ते ये शरीरेन्द्रियादयस्ते यत्र वाक्ये रथादिषु रूपकभावेन अलङ्कारबोधितप्रतिकृतिभावेन विन्यस्ताः स्थापितास्तेषां सर्वेषां रथादिप्रतिकृतिभूतानामेवात्र गृहीतिर्ग्रहणम् । अतः शरीररूपा रूपकविन्यस्ताः । शरीररूपकविन्यस्ताः । रूपकविन्यस्तानां व्यावर्तकं शरीररूपत्वमित्युपसर्जनत्वात् तस्य पूर्वनिपातः । शाकपार्थिवादेराकृतिगणत्वाद् रूपपदलोपश्च । अतः शरीररूपकविन्यस्तानां गृहीतिर्ग्रहणं शरीररूपकविन्यस्तगृहीतिः । तस्मादित्यर्थः । तथाच स्यात् सांख्यमतापत्तिर्यद्यहङ्कारादीनां पदार्थानां तत्त्वेन गृहीतिः स्यात् । सा तु नास्ति । यतः शरीरेण ये रूप्यन्ते शरीरेन्द्रियादयस्ते विन्यस्ता यत्र वाक्ये रूपकभावेन रथादिषु, आत्मानं रथिनं विद्धीत्यादिना, तेषामेवात्र गृहीतेर्ग्रहणात् । यदि ह्येवं नोपगम्येत तदा प्रकृतहानादिदोषापायापद्येताम् । किञ्चेदं हीति निश्चयेन जीवप्रकरणम् । अत्रास्य मुक्त्युपायो, योग्यं शरीरमारुह्य हरेः पदं गच्छेदित्येवं विज्ञानसारथिमन्त्रेण रूप्यते । न ह्येतत् सांख्यमते सम्भवति । स्वरूपायस्यानातिरिक्तस्य भगवत्पदप्राप्तिरूपस्य मोक्षस्य तैरनङ्गीकारात् । अत इन्द्रियेभ्य इति वाक्ये अहङ्कारादितत्त्वरूपो नार्थः । किन्तु वक्ष्यमाणप्रकारकः । तथाहि । तत्र मुक्त्युपायेषु बोधनीयेषु वक्तव्ये रूपके जीवः स्वतन्त्रत्वाद् रथी । * जीवस्येत्यादिना विवृतं शरीरं रथः । तत्र हेतुः । * सर्वेत्यादि * । सामग्री इन्द्रियादिरूपा ।

स्वबुद्ध्यधीनाः । सा च प्रग्रहाधीना । स च सारथ्यधीनः । स च स्वबुद्ध्यधीनः । सा च मार्गाधीना । स च प्राप्याधीन इति । एवं ज्ञात्वा युक्तसामग्रीकस्तद्देशं प्राप्नोति ।तत्रेन्द्रियाणामात्मा विषयाः । ते च मनसा सम्यक्त्वेन भाविताास्तथा भवन्ति । विरक्तेन्द्रि-

---

अपराधीनता तु स्वायत्ततया। तेन शरीरे रथरूपकम्। रथस्तु गमने हयाधीन इतीन्द्रियेषु हयरूपकम् । हयबुद्धिस्थानापन्नाश्चेन्द्रियदेवता। देवताप्राधान्य एवेन्द्रियाणां भगवत्परत्वस्य, देवानां गुणलिङ्गानामित्यत्र तृतीयस्कन्धे सिद्धत्वात्।देवतासाहित्यस्यार्थतः प्राप्तत्वाच्च । एवमग्रेऽपि बुद्धिस्थानापन्ना देवता। एवं हयबुद्धिस्तु प्रग्रहाधीनेतीन्द्रियनियामकमनसि तद्रूपकम् । एवमेव बुद्धौ सारथिरूपकम् । सारथिबुद्धिर्मार्गाधीनेति विषयेषु गोचरपदेन मार्गरूपकम् । रथिस्वरूपबोधनायात्मेन्द्रियेत्यर्द्धश्लोकः । ततो, मार्गस्तु प्राप्याधीन इति तद्बोधनाय प्रापकसामग्रीनिगमनपूर्वका, यस्त्वविज्ञानवानित्याद्यश्चत्वारः श्लोकाः । प्राप्यनिगमनाय पञ्चम इति बोधयितुम्, एवं ज्ञात्वेत्यादिना हयरूपकपर्यन्तग्रन्थस्य तात्पर्यकथनम्।इन्द्रियविषयेषु देशरूपकस्य तात्पर्यं वक्तुम्, इन्द्रियेभ्यः परा इत्यादेस्तात्पर्यमाहुः । * तत्रेन्द्रियाणामित्यादि * । * आत्मेति * 'घ्राणं च गन्ध' इति न्यायेन भगवदिन्द्रियरूपतया तदाधिदैविकत्वात्तु तेषां नियामकाः । श्रौतस्य परपदस्यायमर्थः । यद्यप्याकर्षकत्वान्नियामकत्वमुक्तं श्रीभागवते । ' इन्द्रियैर्विषयाकृष्टैरिति ' । अनुभवश्च कामिनीकुचकुम्भादिदर्शने चक्षुराद्याकर्षस्य । तथापि नात्र तदभिप्रेतम् । मोक्षप्रकरणत्वादित्यभिप्रेत्याहुः । * ते चेत्यादि * । तथाच मोक्षप्रकरणे यदिन्द्रियेभ्यः परत्वं विषयाणामुच्यते, तद् भगवदीयतया मनसा सम्यक्त्वेन भावितानामेव । यथा नवमस्कन्धादावम्बरीषादिचरिते, स वै मनः कृष्णपदारविन्दयोरित्यादिश्लोकत्रयोक्तास्तादृशाम् । न तु सामान्यानाम् । नापि ज्ञानीन्द्रियविषयविवक्षया । विरक्तेन्द्रियाणां विषयानाकृष्टत्वात् । अतः 'तस्यारविन्दनयनस्येत्यादिवद् यत्र भगवदभिप्रायः सा मोक्षप्रणाड्यत्र विवक्षिता,

याणामतथात्वात् । बुद्धेरात्मा विज्ञानम् । तद् ब्रह्मविषयकं महद् भवति । ततः परमव्यक्तं, न प्रकटं, भगवत्कृपैव । सा तु भगवदधीना, न साधनान्तराधीना । स च भगवान् स्वाधीन इति । एवमेवार्थस्तस्योचितः । किञ्च, दर्शयति स्वयमेवेममर्थम् ।

एषु सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति ॥

सूक्ष्मया उपनिषदनुसारिण्या । बुद्ध्या भगवज्ज्ञाने हि तत्प्राप्तिरिति । चकारात्, ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरमिति स्मृतिर्गृहीता । तस्मात् साधनोपदेशान्न सांख्यमतमिह विवक्षितमिति ॥ १ ॥

सूक्ष्मन्तु तदर्हत्वात् ॥ २ ॥

नन्वव्यक्तशब्देन न भगवत्कृपा वक्तुं शक्या । धर्मिप्रवाहादित्याशङ्क्य परिहरति तुशब्दः । सूक्ष्मं तद् ब्रह्मैव । धर्मधर्मिणो-

---

न तु शुष्कज्ञानप्रणाडीति बोधनाय तदुक्तिरित्यर्थः । एतेन अर्थेभ्यश्च परं मन इत्यपि व्याख्यातप्रायम्'। मनसा सम्यक्त्वेन भावन एव तेषां तथात्वादिति । मनसस्तु परा बुद्धिरिति सारथिभावादेव स्पष्टम् । बुद्धेरात्मेत्यादिकं व्याकुर्वन्ति । * बुद्धेरात्मेत्यादि * । * विज्ञानमिति * तत्कार्यभूतं विशिष्टज्ञानम् । तस्य बुद्धिनियामकत्वं तु ब्रह्मविषयकत्वेन महत्त्वादित्यर्थः । शेषं स्फुटम् । एवं हेतुं व्याख्याय दर्शनपदं व्याकुर्वन्ति । * किञ्चेत्यादि * । * इममिति * पूर्वोक्तं कथं दर्शयतीत्यत आहुः । * सूक्ष्मयेत्यादि * । तथाच सूक्ष्मपदेन बुद्धेरुपनिषदनुसारित्वबोधनादुक्तरीत्या भक्तिप्रणाड्या प्राप्तिं दर्शयतीत्यर्थः । तेन श्रुतौ गम्यत इति गतिरिति प्राप्यत्वबोधनात्, स्मृतावपि, विशत इति पदेन तस्यैवार्थस्योपबृंहणादत्र प्राप्तिरूप एवार्थोऽभिप्रेतो दृश्यते, न तु रूक्षदर्शनरूपोऽतो नात्र सांख्यमतप्रत्यभिज्ञानमिति भावः ॥ १ ॥

सूक्ष्मं तु तदर्हत्वात् ॥

रभेदात् । अव्यक्तशब्देन हि सूक्ष्ममुच्यते । तदेव हि सर्वप्रकारेण न व्यज्यते । अर्हत्वात् । तदेव अर्हं योग्यम् । उभयथाप्ययं हेतुः । तस्माद्धर्मधर्मिणोरभेदाद् भगवानेव सूक्ष्ममिति तत्कृपैवाऽव्यक्तवाच्या ॥ २ ॥

तदधीनत्वादर्थवत् ॥ ३ ॥

ननु धर्मित्वे परत्वमनुपपन्नम् । अन्यथा पूर्वोक्तो दोष इत्यत आह । अभेदेऽपि कृपायास्तदधीनत्वात् परत्वम् । तत्र दृष्टान्तः । अर्थवत् । अर्थः पुरुषार्थः फलं, तद्वत् । ब्रह्मविदाप्नोति परमित्यत्र एकस्यैव ब्रह्मणः सच्चिद्रूपेण विषयत्वमानन्दरूपेण फलत्वमिति । तथैवाक्षरपुरुषोत्तमविभागोऽपि । स्वधर्मा अपि स्वाधीनाः ।

---

* उभयथेति * । अव्यक्तस्य ब्रह्मत्वे, भगवत्कृपात्वे च । अयमर्थः । बुद्धेरात्मा महान् पर इत्यत्र, अथ परा यया तदक्षरमधिगम्यत इति श्रुत्यन्तरोक्तं ज्ञानं बुद्धिनियामकत्वेन परामृष्टम् । तच्च, नायमात्मेति श्रुत्यन्तराद्वरणाधीनम् । वरणं च कृपयैवेति ज्ञानात् परत्व विमर्शे योग्यताबलात् कृपैव तथात्वेन सिद्ध्यति । सा च भगवद्धर्मः । धर्मधर्मिणोश्चाविनाभावेन स्थितत्वादभेद इति तस्या अपि ब्रह्मत्वं योग्यताबलादेव सिद्ध्यतीति तथेति । तथाच न प्रायपाठविरोध इत्यर्थः ॥ २ ॥

तदधीनत्वादर्थवत् ॥ उक्तं समाधिमाक्षिपति * नन्वित्यादि * यदि पूर्वोक्तयुक्त्या कृपाया ब्रह्मत्वं, तदा धर्मित्वे तद्भिन्नत्वरूपं परत्वं युक्तिरहितम् । यदि कयाचिद्युक्त्या धर्मत्वं तदा धर्मिप्रायपाठविरोधरूपो दोष इति पूर्वोक्तः समाधिरसङ्गत इत्याशङ्कायामस्यापि समाधिमाहेत्यर्थः । समाधिं व्याचक्षते । * अभेदेऽपीत्यादि * । तथाचाभेदे यथैकरूपेण ग्रहणं युक्तिस्तथा भेदे नियम्यनियामकभावो युक्तिरित्युभयमप्युपपन्नमित्यर्थः । एकत्वेऽपि नियम्यनियामकभाव एव कथमित्यत आहुः । * तत्रेत्यादि * । * तथैवेति * एकत्वेऽपि गणितानन्दस्यागणितानन्दस्यात्मकरूपभेदेनैव । तथाच रूपभेदेन सोऽप्युपपन्न इत्यर्थः । एतदेव निगमयन्ति । * स्वधर्मा इत्यादि *

स्वयमपि स्वाधीन इति । तथा कृपाविष्टः साधनमानन्दरूपः फलमिति ।

अथवा अव्यक्तं सच्चिद्रूपमक्षरमेवास्तु । तस्मिन् सति विज्ञानस्य विषयाधीनत्वमर्थः ।

एतेनान्येऽपि सर्वसंप्लववादिनो निराकृता वेदितव्याः । अतस्त्वद्धाभिलापाच्च ।

फलमितीत्यन्तम * । अस्मिन् पक्षे अव्यक्तपदस्य यौगिकत्वाच्छैथिल्यं शङ्क्येतेत्यरुच्या पक्षान्तरमाहुः । * अथवेत्यादि * । अक्षरमेव, अव्यक्तोऽक्षर इत्युक्त इति गीतावाक्यादव्यक्तमस्तु । नच लिङ्गविरोधः । अक्षरं ब्रह्म परममिति ब्रह्मत्वविवक्षायां, तत्रापि नपुंसकलिङ्गप्रयोगात् तस्य भगवतः सकाशाद् भेदाभेदौ, गीतायाम्, एवं सततयुक्ता ये इति प्रश्नोत्तरसन्दर्भे स्फुटौ । धामत्वाद्भगवदधीनत्वं च स्फुटम । अतस्तदधीनत्वादक्षरमेवाव्यक्तम् । अस्मिन् पक्षे यो दृष्टान्तस्तमाहुः । * तस्मिन्नित्यादि * । * तस्मिन्नक्षरे स्फुरिते सति, * विज्ञानस्य बुद्धेर्यदक्षरात्मकविषयाधीनत्वं सोऽत्र दृष्टान्तभूतोऽर्थो ग्राह्यः । तथाच तद्विज्ञानं यथा अक्षरसारूप्येऽप्यक्षराद् भिन्नमक्षराधीनं च, तथा अक्षरमपि ब्रह्मसरूपं ब्रह्मणः परस्माद् भिन्नं तदधीनं चेत्यैक्येऽपि न परत्वानुपपत्तिप्रवाहविरोधावित्यर्थः ।

एवं त्रिसूत्रीव्याख्यानेनैकदेशिकृतं व्याख्यानान्तरमपि निराकृतमित्याहुः । * एतेनेत्यादि * । अयमर्थः । मायावादिनो ह्यानुमानिकसूत्रे अव्यक्तशब्देन रथरूपकविन्यस्तं शरीरमङ्गीकृत्य तस्य कथमव्यक्तशब्दितत्वमित्याकाङ्क्षायां द्वितीयसूत्रे भूतसूक्ष्मस्याऽव्यक्तशब्दार्हत्वात् तत्कार्यस्य शरीरस्याव्यक्तशब्देन ग्रहणं, यथा, गोभिः श्रीणीतमत्सरमित्यत्र गोशब्देन पयस इत्युक्त्वा, तृतीयसूत्रे, तत् भूतसूक्ष्मं न स्वतन्त्रं येन प्रधानकारणवादः प्रसज्ज्येत । किन्तु परमेश्वराधीनम । तच्चावश्यकम । शक्तिरहितस्य कर्तृत्वानुपपत्तेः । अतस्तदर्थवदित्युक्त्वा, अव्यक्तशब्दवाच्यामविद्यां वदन्ति । यथोक्तं तेषां भाष्ये । अविद्यात्मिका हि सा बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिर्यस्यां स्वरूपप्रबोधरहिताः शेरते

अनेकरूढिशब्दानां वाच्यं ब्रह्मैव नापरम् ।
शक्तितश्चैव तथा ब्रूयुस्ते सन्मार्गाद् बहिष्कृताः ॥
तस्मादिन्द्रियेभ्यः परावरे नानुमानिकं किञ्चिदस्ति ॥ ३ ॥

संसारिणो जीवास्तदव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टम् । एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति श्रुतेः । क्वचिदक्षरशब्दोदितम् । अक्षरात् परतः पर इति श्रुतेः । क्वचिन्मायेति सूचितम् । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति मन्त्रवर्णादिति ।

तदेतदसङ्गतम् । कारणग्रहणेनैव सम्भवति गत्यन्तरे कारणवाचिशब्देन कार्यग्रहणस्य लक्षणादोषयुक्तस्यानुचितत्वात् । द्वाविमौ पुरुषौ लोक इति गीतोक्ते अक्षरे कारणत्वस्य श्रुत्यादिषु, तन्मायाफलंरूपेणेत्याद्येकादशस्कन्धवाक्यैर्निर्द्धारणात् । अधीनत्वस्य धामत्वादेव सिद्धेश्च । तद्विहाय तत्प्रथमकार्यरूपमायापदवाच्यशक्तिग्रहणस्यानुचितत्वात् । यो वेद निहितं गुहायां परमे व्योमन् ऋचो अक्षरे परमे व्योमन्नित्यादिश्रुताकाशपदवाच्यत्वस्यापि तत्रैव स्पष्टत्वात् । अक्षरात् परतः पर इत्यत्रापि परत इति विशेषणेन मायाशक्तिव्यावृत्त्या भगवद्धामरूपस्यैव तस्य सिद्धेः । अतो व्यासाशयविरुद्धत्वाद् अयमसम्बद्धाऽभिलाप एव । जगद्बीजं तु भगवानेव । बीजं मां सर्वभूतानामिति गीतावाक्यात् । अक्षरस्य कारणत्वं तु योनित्वात् । मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहमिति वाक्यात् । नच पुरुषत्वोक्तिविरोधः । त्वं स्त्री त्वं पुमानित्यादिश्रुत्या सर्वरूपत्वेन सिद्धत्वादिति ।

तदेतत् सर्वमभिसन्धायाहुः । * अनेकेत्यादि * । * शक्तित इति * जैमिन्युक्तं भाट्टप्रसिद्धं लोकवेदाधिकरणमाश्रित्य लौकिकशक्तितः । * तथेति * प्रकृतिवाचकत्वम् । शाक्तास्तां चेदिति क्वचित् पाठः । तदा तु, तां प्रकृतिं तथा जगद्बीजभूतां ब्रूयुरित्येवं योजना । तथाच, 'शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं नचेदेवं देवो न खलु कुशलः स्पन्दितुमपि ' इत्यादि स्वश्रद्धाजाड्याद् वदन्तो वेदान्तविरुद्धवादित्वात्तथेत्यर्थः । सिद्धमाहुः । * तस्मादित्यादि ॥ ३ ॥

ज्ञेयत्वावचनाच्च ॥ ४ ॥

पूर्वापरसम्बन्धेनार्थः प्रतिपादितः । केवलैतद्वाक्यविचारेऽपि न तदभीष्टं प्रकृतिरूपमव्यक्तं सिध्यतीत्याह । अत्र हि वाक्ये अव्यक्तं ज्ञेयत्वेन नोक्तं, तेषां तु प्रकृतिपुरुषान्तरं ज्ञातव्यम्। न हि सिद्धवन्मात्रनिर्देशे तेषां मते पुरुषार्थः सिध्यति। अपुरुषार्थसाधनत्वे वा असम्बद्धार्थवाक्यत्वमेव स्यात् । परत्ववचनं चासङ्गतम् । श्लिष्टत्वादुभयोरिति चकारार्थः । अयं हेतुः पूर्वमुक्तोऽप्यवसरे स्मारितः । तस्मादव्यक्तं न प्रकृतिः ॥ ४ ॥

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥

ननु ज्ञेयत्वावचनमसिद्धम् । पूर्वं निर्देशमात्रमुक्त्वाऽग्रे ज्ञेयत्ववचनात् ।

अशब्दमस्पर्शमरूपमव्ययं तथाऽरसं-नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात् प्रमुच्यते।

इत्युत्तरवाक्ये वदतीति चेन्न । प्रकरणस्य नियामकत्वेनैकवाक्यत्वे द्वयोः सर्वैकवाक्यत्वेन प्राज्ञः परमात्मैव निचाय्यः ।

ज्ञेयत्वावचनाच्च ॥ सूत्रमवतारयन्तः प्रयोजनमाहुः । * पूर्वेत्यादि * । व्याकुर्वन्ति । * अत्र हीत्यादि * । * ज्ञातव्यमिति * । गुणपुरुषान्तरज्ञानात् कैवल्यमिति प्रवचनसूत्रात् । विभूतिविशेषाप्तये प्रधानस्यापि ज्ञेयत्वस्मरणाच्च तथेत्यर्थः । * परत्वेत्यादि * । परापरभावो हि विश्लेषेऽवगन्तुं शक्यते, न तु संश्लेषे। इदानीमज्ञानदशायां तु श्लेष एवेत्युदासीनतयोक्तौ पुरुषस्य परत्ववचनमप्यसङ्गतं स्यादित्यर्थः । * अयमिति * । चकारसूचितः । * पूर्वमिति * अदृश्यत्वाद्यधिकरणे ॥ ४ ॥

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ * प्रकरणस्येत्यादि * ।

न तु द्वयोरेवैकवाक्यत्वं वक्तुं शक्यम् । तस्मात् प्रकरणस्य नियामकत्वे अशब्दवाक्यमपि भगवत्परमेव ॥ ५ ॥

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥

ननु न वयं सर्वमेकं प्रकरणमिति वदामः । किन्तु, इन्द्रियेभ्यः परा इत्यारभ्य, नाचिकेतमुपाख्यानमित्यन्तं भिन्नं प्रकरणम् । तत्र प्रथमं पदार्थनिर्देशः । तदनु, एष सर्वेषु भूतेष्विति पुरुषज्ञानम् । अशब्दमिति तु प्रकृतिज्ञानम् । तस्मादेतत्प्रकरणे साङ्ख्यमतनिरूपणादशब्दत्वमसिद्धमित्याशङ्क्य परिहरति ॥ त्रयाणामेवमुपन्यासः प्रश्नश्च ॥

अस्मदुक्तव्याख्याने त्रिप्रकरणत्वमन्यथा चतुष्प्रकरणत्वं

अव्यक्तश्रुतेः परत्वलिङ्गस्य तद्घटितवाक्यस्य च साधारणत्वात् प्रकरणस्य निर्णायकत्वं वक्तव्यम् । अतस्तस्य नियामकत्वेनैकवाक्यत्वे वाच्ये, महतः परमव्यक्तमिति, अशब्दमस्पर्शमिति द्वयोरेवैकवाक्यत्वं, नान्येषामित्यत्र नियामकाभावात् सर्वेषामेवैकवाक्यत्वं वक्तव्यम् । प्रकरणं च, ऋतं पिबन्तावित्यारभ्य नाचिकेतमुपाख्यानमित्यन्तमेकम् । तत्र चात्मानावेव परामृश्य जीवात्मनो रथित्वं, तदुपकरणं, तत्फलं चोक्त्वाग्रे, एष सर्वेषु भूतेष्वित्यारभ्य वल्लीसमाप्तिपर्यन्तं परमात्मैव ज्ञेयत्वेन परामृष्टः । मृत्युमुखप्रमोकरूपफलदर्शनात् । प्रधानज्ञानेन सांख्यैस्तदनभ्युपगमात् । चेतनात्मज्ञानादेव तदभ्युपगमाच्च । अतः प्रकरणस्य नियामकत्वे अशब्दवाक्यस्यापि भगवत्परत्वाज्ज्ञेयत्वावचनं नासिद्धमित्यर्थः ॥ ५ ॥

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ * किन्त्विन्द्रियेभ्य इत्यादि * । तथाचात्रैवं पदार्थनिर्देशानन्तरं पुरुषविषयस्य प्रकृतिविषयस्य च ज्ञानस्य पार्थक्येन निर्देशात् तयोरन्तरमेव ज्ञातं भवतीति नेदमीश्वरबोधकत्वेन वक्तुं शक्यमिति प्रधानस्याशब्दत्वकथनमयुक्तमित्यर्थः । * अस्मदुक्तेत्यादि * । अयमर्थः । उभयाऽऽकाङ्क्षा हि प्रकरणम् । सात्र त्रयाणामग्निजीवब्रह्मणामेव प्रश्नोत्तरा-

स्यात् । तृतीया चैषा वल्ली । स त्वमग्निं स्वर्गमध्येऽपि मृत्यो प्रब्रूहि तं श्रद्धधानाय मह्यमिति प्रश्नः प्रथमः । प्रतिब्रवीमि तदु मे निबोध स्वर्ग्यमग्निं नाचिकेत प्रजानन्नित्याद्युत्तरम् । येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके इति द्वितीयः प्रश्नः । देवैरत्रापीत्यग्रे उत्तरम् । अन्यत्र धर्मादन्यत्राधर्मादिति तृतीयः प्रश्नः । सर्वे वेदा यत् पदमामनन्तीत्यादिना उत्तरम् । एवमग्निजीवब्रह्मणां प्रश्नोत्तराणि । तत्र यदि साङ्ख्यमतनिरूपणीयम्, इन्द्रियेभ्य इत्यादि स्यात् तदा चतुर्थस्याप्युपन्यासः स्यात् । उपन्यासे हेतुः प्रश्नः । अत एव पश्चाद् वचनम् । तस्य प्रकृतेऽभावादस्मदुक्तरीत्या त्रीण्येव प्रकरणानीति सिद्धम् । उत्तरप्रश्नाभावार्थं चकारः ॥ ६ ॥

ऽयां प्रतीयते । यदि तृतीयस्यां वल्ल्याम्, इन्द्रियेभ्य इत्यारभ्य प्रकरणान्तरं स्यात् तदा पूर्ववदत्रापि प्रश्नोत्तरे स्याताम् । यदि च स्वत एव वरान्तरं दद्यात्, तदा, तमब्रवीत् प्रीयमाण इतिवत् तमप्युपक्षिपेत् । किञ्चैतस्य प्रकरणान्तरस्य किं प्रयोजनमित्यपि विचारणीयम् । यदि मुक्तिस्तदा तु, अन्यच्छ्रेयो अन्यदुतैव प्रेय इत्यारभ्य, सोऽध्वनः पारमाप्नोति, तद्विष्णोः परमं पदमित्यन्तैरेव वाक्यैः सपरिकरायास्तस्या उक्तत्वात् किमनेन । यदि च परमपदप्राप्तितोऽप्युत्कृष्टा स्वरूपावस्थानरूपा काचिदन्याभिमन्यते, तदा तु, 'स तु तत्पदमाप्नोति यस्माद् भूयो न जायते । सोऽध्वनः पारमाप्नोति' इत्येतस्य पूर्वग्रन्थस्य विरोधः । त्रिविधदुःखात्यन्तनिवृत्तेः पदमाप्त्यैवोक्तत्वात् । विज्ञानरूपस्य स्वरूपावस्थानसाधनस्यापि ततः प्रागेवोक्तत्वाच्च । किञ्चाशब्दमन्त्रे प्रकृतिज्ञानाङ्गीकारस्तु मृत्युमुखात् प्रमुच्यत इति फलोक्त्यैव विरुद्ध्यते । तस्माच्चतुष्प्रकरणत्वमसङ्गतमिति । किञ्च, तृतीयैषा वल्ली । अतस्तृतीयप्रश्नोत्तरत्वमेवात्र युक्तम् । न त्वाकस्मिकं सांख्यमतनिरूपकत्वेन प्रकरणान्तरत्वम् । यतः, स त्वमग्निमित्यादिना, प्रतिब्रवीमीत्यादिना च त्रीण्येव प्र-

श्चोत्तराणि प्रतीयन्ते । नच पितृसौमनस्येनाग्निजीवप्रश्नाभ्यां च वरत्रयपूर्तेस्तृतीयप्रश्नस्य काल्पनिकत्वं शङ्क्यम् । यत् तत् पश्यसि तद् वदेति श्रुत्यैव सिद्धत्वात् । नच निर्हेतुकत्वम् । तमब्रवीत् प्रीयमाणो महात्मेत्युक्तवरत्वदस्यापि यमसुप्रीतिहेतुकत्वात् । नच तत्प्रीतेः काल्पनिकत्वम् । नैषा तर्केणेति वाक्यस्यास्य प्रेष्ठपदस्यैव गमकत्वात् । नच, यत् साम्पराये महति ब्रूहि नस्तदितिवदस्यापि पूर्वप्रश्नानुवादत्वं शङ्क्यम् । विषयनिर्देशविरोधात् । नच, येयं प्रेत इत्येतदुत्तरस्य ब्रह्मप्रश्नात् प्रागभावात् तत्पूर्वग्रन्थस्य तदुत्तरत्वं शङ्क्यम् । न साम्पराय इति वाक्ये परलोकासत्त्वमानिनः पुनः पुनः स्ववशगत्वोक्त्या तादृशस्याप्यस्तिबोधनस्यैवोत्तरत्वात् । नच तदग्रिमग्रन्थवैयर्थ्यं शङ्क्यम् । उत्तमाधिकारदर्शनेनाधिकप्रश्नोदयार्थमेव तदुक्त्या अवैयर्थ्यात् । तत एव श्रेयःप्रेयसोर्विद्याविद्ययोश्च कथनमपि युज्यते । अतस्तं दुर्दर्शमिति वाक्यद्वयान्तसन्दर्भ एव तृतीयवरप्राप्तस्य द्वितीयप्रश्नस्य पूर्तेरन्यत्र धर्मादित्यनेनोक्तस्य प्रश्नस्य तृतीयत्वं प्रसादहेतुकत्वं च मन्तव्यम् । नच प्रसङ्गाभावः शङ्क्यः । जीवप्रश्नप्रत्युत्तरोपसंहारस्थे दुर्दर्शवाक्योत्तरम्, 'एतच्छ्रुत्वा सम्परिगृह्य मर्त्यः प्रवृह्य धर्म्यमणुमेतमाप्य । स मोदते मोदनीयं हि लब्ध्वा विवृतं सद्म नचिकेतसं मन्य' इत्यस्मिन् वाक्ये, एतत्पूर्ववाक्योक्तं, देवं व्यवहर्तारं जीवम्, आचार्यमुखाच्छ्रुत्वा सम्परिगृह्य सम्यगात्मत्वेनोपादाय मर्त्यः शरीरद्वयव्यतिरिक्तत्वज्ञानेन हर्षशोकशून्योऽपि, येऽन्येऽरविन्दाक्षेतिवाक्योक्तन्यायान्मरणधर्मैव सन् प्रवृह्य धर्म्यं, न हि सुविज्ञेयमणुरेष धर्म इत्युपक्रमवाक्ये धर्मत्वेनोक्तो यो जीवस्तस्मादनपेतं सच्चित्त्वान्निकटस्थं प्रकर्षेणालम्ब्य, अणुमेतमाप्य, सः, जीवं ज्ञात्वा विद्वान्, मोदनीयं सर्वथालम्बनेन प्रसादनीयं ब्रह्म लब्ध्वा प्राप्य मोदते । एष ह्येवानन्दयातीति श्रुतेः । मोदते हि यतो हेतोरतो, नचिकेतसं त्वामधिकारिणं प्रति सद्म सदनभूतं ब्रह्म विवृतमपावृतद्वारं मन्य इति कथनेन ब्रह्मणः स्मारणात् । नच पञ्चमवल्लीस्थस्य, यथाच मरणं प्राप्येति सार्द्धवाक्यस्योत्तरत्वं शङ्क्यम् । व्यवहितत्वात् । हन्त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनमिति प्रतिज्ञानन्तरपठितत्वेन तल्लीलाबोधनार्थत्वावगमाच्च । नचात्र लीलाङ्गीकारे मानाभावः

शङ्काः । य एष सुप्तेषु जागर्तीत्यारभ्य वल्लीसमाप्तिलीलाकथनदर्शनेनापि तथावसायादिति ।

यत्तु वरदानानुरोधेन ब्रह्मप्रश्नस्य जीवप्रश्नान्तर्गतत्वं शङ्कराचार्यैरङ्गीकृतम् ।

तदसङ्गतम् । वक्तृप्रसादस्यैवात्र प्रश्नकारणतादर्शनात् । नच त्रीन् वरान् वृणीष्वेति वाक्यबाधापत्तिः । स्वस्ति मेऽस्त्विति वाक्योक्तस्य स्वाविनाशार्थकवरत्रयस्य सौमनस्याग्निजीवप्रश्नाभ्यां च पूर्त्या तदभावात् । नच तृतीयप्रश्नस्य काल्पनिकत्वम् । वदेति श्रुत्यैव तन्निरासात् । नचाधिक्यं दोषः । दोषत्वाभावस्योपपादितत्वात् । अतोऽस्य भिन्नप्रश्नत्वेऽपि कल्पनाया अभावेन, यथा वरव्यतिरेकेण प्रश्नकल्पनायामदोष एवं प्रश्नव्यतिरेकेण प्रधानोपन्यासकल्पनायामप्यदोष इति । साङ्ख्योक्तप्रतिबन्देरपि परिहाराद् व्यर्थ एव, प्रत्ययभेदमनादृत्य, 'स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति महान्तं विभुमात्मानं मत्वा धीरो न शोचति' इत्यादिश्रुत्युक्तं जीवब्रह्मणोर्धर्मभेदं चानादृत्य प्रश्नद्वयस्यैक्यसाधनप्रयास इति दिक् ।

रामानुजाचार्यास्तु, उपायोपेयोपेतॄणां त्रयाणां प्रश्नोपन्यासावत्राङ्गीकुर्वन्ति । तथाहि । नचिकेता हि मुमुक्षुर्मृत्युना दत्ते वरत्रये प्रथमवरेणात्मनः पुरुषार्थयोग्यतापादनायात्मनि पितुः सौमनस्यं प्रतिलभ्य द्वितीयेन वरेणाग्निविद्यां वव्रे । सा च मोक्षोपायभूता । प्रश्नवाक्ये, अमृतत्वं भजन्त इत्युत्तरवाक्ये, त्रिकर्मकृत् तरति जन्ममृत्यू इति कथनात् । तृतीयेन वरेण मोक्षप्रश्नद्वारेण उपेयस्वरूपमुपेतृस्वरूपमुपायभूतानुष्ठितकर्मानुगृहीतोपासनस्वरूपं च पृष्टं, येयं प्रेत इत्यनेन । इत्येवं मोक्षे पृष्टे, तस्योपदेशयोग्यतां परीक्ष्य, तं दुर्दर्शं गूढमित्यनेनोपदिदेश । तदा नचिकेताः प्रीतः सन्, देवं मत्वेत्युपास्यतया निर्दिष्टस्य प्राप्यस्य देवस्य, अध्यात्मयोगाधिगमेनेति धर्तिव्यतया निर्दिष्टस्य प्राप्तुः प्रत्यगात्मनः, मत्वेत्यनेनोक्तस्य ब्रह्मोपासनस्य च स्वरूपावधानाय पुनः पप्रच्छ, अन्यत्र धर्मादन्यत्राधर्मादिति । एवं पृष्टे प्रथमं, सर्वे वेदा इत्यादिना प्रणवं प्रशस्य तद्वाच्यं प्राप्यस्वरूपं, तदन्तर्गतं प्रत्ययस्वरूपं, वाचकस्वरूपं चोपायं पुनरपि सामान्येन स्थापयन् पूर्वं प्रणवमुपदिदेश । प्रशशंस च । ततो, न जायत इत्यादिना प्राप्तुः स्वरूपमुक्त्वा, अणोरणीयानि-

त्यारभ्य, क इत्था वेद यत्र स इत्यन्तेन प्राप्यस्य विष्णोः स्वरूपं यदत्र मध्ये, नायमात्मेत्यनेन उपायभूतस्योपासनस्य भक्तिरूपतामप्याहेत्यादि चाहुः।

तेन तन्मते प्रश्नद्वयस्य सामान्यविशेषभावेनैक्यादन्यत्र धर्मादिति प्रश्नोऽपि तृतीयं परमनुरुन्धे। शैवमतेऽप्येवम्। अत्रोदासीना वयम्।

भास्कराचार्यास्तु जीवपरयोर्गोपुरुषवदत्यन्तभेदो नास्ति। पररूपादर्शनमेव चाविद्या। सा च विद्यया निवर्त्यते। ततश्च स्वरूपं प्रतिपद्यत इति पूर्वसूत्र उक्त्वाऽस्मिन् सूत्रे सौमनस्यापेक्षया जीवप्रश्नस्य तृतीयत्वमुक्त्वा ब्रह्मप्रश्नस्य ततोऽतिरिक्तत्वं सूचयामासुः। तेन तन्मते जीवप्रश्नस्याऽनतिप्रयोजनत्वम्।

माध्वास्तु, आनुमानिकसूत्रे, अव्यक्तात् पुरुषः पर इत्यत्राऽव्यक्तशब्देन, योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिन इत्यत्र देहिशब्देन च सांख्यानुमानकल्पितं प्रधानं जीवश्चोच्यते, उत विष्णुरिति सन्देहे विष्णुरेवोच्यते। कुतः। शरीररूपकविन्यस्तगृहीतेः। शरीरस्य रूपमिव शरीररूपकम्। कमल्ययः कुत्सने। तथाच यथा शरीरं पुरुषतन्त्रं, तथा परमात्मतन्त्रत्वेन शरीरसमे प्रधानादौ विन्यस्य गृहीतेः। नन्वत्र शरीरं रथमेव त्विति ओक्तं शरीरम्, आत्मानं रथिनं विद्धीत्यत्रोक्तो जीव एव च गृह्यताम्। परमात्मग्रहणे किं मानमिति शङ्काम्। सूत्रकृतः कुत्सार्थकमल्ययप्रयोगस्य रूपपदप्रयोगस्य च मानत्वात्। अन्यथा तद्वैयर्थ्यात्। नच सूत्रकृता कथनेऽपि श्रुतेस्तथैवाशय इत्यत्र किं गमकमिति शङ्काम्। तुच्छेनाभ्यपिहितं यदासीदिति श्रुतावल्पेन विभोरपिधानं दर्शयति। अव्यक्तमचलं शान्तमिति पिप्पलादशाखायामव्यक्तपदवाच्यतां च दर्शयति। अक्षरं ब्रह्म परममित्युक्ते अक्षरे, अव्यक्तोऽक्षर इत्युक्त इतिगीतास्मृतेरित्याहुः। तथाऽग्रेऽपि।

तत्रापि व्याख्यानस्य क्लिष्टत्वाच्छ्रुत्यर्थस्यान्यथापि सम्भवाद् गीतायां भगवद्वाक्यान्यव्यक्तपदप्रयोगाच्च वयं ततोदासीनाः।

विज्ञानभिक्षुस्तु, आनुमानिकसूत्रे, अजामेकामिति श्वेताश्वतरश्रुतिमुदाहृत्य श्रुत्यन्तरे ब्रह्मकारणताया अत्र च प्रकृतिकारणताया उक्तत्वात् कपालद्वयं घटस्येव जगतोऽपि द्वयं कारणं भव-

महद्वच्च ॥ ७ ॥

ननु तथापि मतान्तरेऽन्यत्र सङ्केतिताः कथं ब्रह्मवादे ब्रह्मपरतया योज्यन्त इत्याशङ्क्य परिहरति ॥ महद्वत् ॥ यथा महच्छब्दः । महान्तं विभुमात्मानं, वेदाहमेतं पुरुषं महान्तमित्यादौ महच्छब्दो ब्रह्मपरो योगेन । एवमव्यक्तशब्दोऽप्यक्षरवाचक इति । न हि सांख्यमत इव वेदान्तेऽपि महच्छब्दः प्रथमकार्ये वक्तुं शक्यः ।

त्विति शङ्कायां ब्रह्मणो न कारणत्वं, विकारित्वापत्तेः । किन्तु प्रकृतेरेवेति पूर्वपक्षदलार्थः । तमिमं पूर्वपक्षं शक्तिशक्तिमद्भावेनोभयोः कारणत्वेन समाधत्ते । न शरीरेत्यादि । यस्तन्तुनाभ इव तन्तुभिः प्रधानजैः स्वभावतो देव एकः समावृणोति स नो दधातु ब्रह्माऽव्ययमित्यादिषु वाक्यशेषेषु शरीरेण रूपकेण दृष्टान्तेन विन्यस्तमुपन्यस्तं यन्मायाख्यं प्रधानं तस्यैवाज्ञावाक्ये ग्रहणं, न तु स्वातन्त्र्येण परेच्छाननुविधायित्वरूपेण । अतो न तस्याः स्वातन्त्र्येण कारणत्वमिति व्याख्याय, त्रयाणामेवेति सूत्रे त्रयाणामपीति पाठमङ्गीकृत्य प्राज्ञस्य प्रकरणित्वसमर्थनार्थं तदित्याशयेन तत्सूत्रमेवं व्याचख्यौ । भोक्ता भोग्यं प्रेरितारं च मत्वेति श्रुत्युक्तानां त्रयाणां पुरुषप्रकृतिदेवतावर्गाणामपि वाक्योपक्रमे उपन्यासः, प्रतिवचनं, तत्प्रश्नश्च प्रसज्ज्येयाताम् । न ह्येवं दृश्यते । किं कारणं ब्रह्म कुतः स्म जाता इत्यादिना केवलब्रह्मण एव प्रश्नदर्शनात् । यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक इत्यादिना केवलब्रह्मण एवोपन्यासदर्शनाच्चेति ।

तदसङ्गतम् । अपिशब्दघटितपाठस्य क्वाप्यदर्शनात् । सांख्येऽपि देवतावर्गस्याधिदैवतत्वेन भोग्यकोटिपतिततया पृथग् ज्ञेयत्वाऽनङ्गीकारेण त्रयाणां प्रश्नाद्यापत्तेरपि दातुमशक्यत्वात् । किं कारणमिति श्रुतावपि विचारस्यैव दर्शनेन तत्र प्रश्नत्वायोगात्, ते ध्यानयोगानुगता अपश्यन्नित्यग्रेऽपि दर्शनकथनेन प्रतिवचनादर्शनाच्च । एवं पूर्वोत्तरग्रन्थेऽप्यवगतव्यमिति दिक् ॥ ६ ॥

महद्वच्च ॥ अत्र भाष्यं निगदव्याख्यातमित्युपरम्यते । मायादि-

क्यते । तस्मादिन्द्रियादिवाक्ये सांख्यपरिकल्पितानां पदार्थानां नामापि नास्तीति सिद्धम् । चकारोऽधिकरणसम्पूर्णत्वद्योतकः ॥ ७ ॥

चमसवदविशेषात् ॥ ८ ॥

पुनः श्रुत्यन्तरेण प्रसक्तस्थितं निराकर्तुमधिकरणान्तरमारभते। ननु प्रकरणवशात् पूर्वमस्मदुक्तोऽर्थोऽन्यथा वर्णितः । यत्र प्रकरणापेक्षैव नास्ति मन्त्रे तदस्माकं मूलम् । अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति । यद्यपीदं श्वेताश्वतरोपनिषदि चतुर्थाध्याये विद्यमानत्वात् पूर्वापरसम्बन्धमेव वक्तव्यम् । तत्र, ब्रह्मवादिनो वदन्तीत्युपक्रम्य ब्रह्मविद्यैव निरूपिता।

धादानां निराकृतिरपि शरीररूपकविन्यस्तगृहीतेरेव बोध्या ॥७॥१॥

चमसवदविशेषात् ॥ अधिकरणप्रयोजनमाहुः । * श्रुत्यन्तरेणेत्यादि * । अत्रापि साध्यमानुमानिके श्रौतत्वाभावरूपमेव । अजामन्त्रस्थोऽजाशब्दस्तु पूर्वपक्षोत्थाने द्वारमतः संशयं तद्बीजं चानुल्लिख्य पूर्वपक्षं विषयवाक्यं चाहुः । * नन्वित्यादि * । नन्वस्य मन्त्रस्य श्वेताश्वतरोपनिषच्चतुर्थाध्याये, य एको वर्णो बहुधा शक्तियोगाद् वर्णाननेकान्निहितार्थो दधातीत्यादिमन्त्रैर्ब्रह्म प्रकृत्यैव पठितत्वाद् उपनिषदारम्भेऽपि, किं कारणं ब्रह्मेति ब्रह्मणः एव प्रकृतत्वात् कथमस्य कारणानपेक्षत्वमित्याकाङ्क्षायां तदनपेक्षतामुपपादयति * यद्यपीत्यादि * तथाच यथा प्रणयादिमन्त्राणामर्थान्तरवाचकानां प्रकृतोपयोग, इमं मे वरुण इत्यादीनां च सूर्योपस्थाने, तथास्यापि मन्त्रस्य कपिलमतसिद्धार्थवाचकस्यैव ब्रह्मविद्योपयोग इत्येष मन्त्रः स्वार्थनिरपेक्ष एवेति शङ्केत्यर्थः । किञ्चात्र यद्येक एव मन्त्र एतादृशोऽन्ये त्वन्यादृशा इति स्यात् तदा बहूनामनुग्रहो न्याय्य इत्यस्यैवार्थोऽन्यथा कल्प्येतापि। यथा कठवल्लीमन्त्रस्य । इह तु

तथापि पूर्वकाण्डे प्रणवादिमन्त्राणां नायं नियम इति प्रकृतेऽपि मतान्तरवाचकस्यैव प्रकृतोपयोग इति शङ्का । ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामिति च । तथा ज्ञाज्ञौ द्वावजावीशानीशावजा ह्येका भोक्तृभोग्यार्थयुक्ता । अग्रे च यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वाः । ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानं च पश्येदित्यादि च वाक्यानि कपिलतन्मतवाचकानि वर्तन्त इति सांख्यमतमपि वैदिकमेवेत्येवं प्राप्ते । उच्यते ॥ चमसवदविशेषात् ॥ अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन् यशो निहितं विश्वरूपम् । तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदानेति मन्त्रे यथा न विशेषो विधातुं शक्यते । न हि कर्मविशेषं कल्पयित्वा तत्रार्वा-

---

मन्त्राणां बहूनां तादृशत्वात् तदपि न वक्तुं शक्यमित्याह । * ते ध्यानेत्यादि * । तथाचात्र स्वगुणैर्निगूढत्वम् । अग्रिमे मुक्तामुक्तात्मसङ्घौ भोक्तृभिर्भोग्यार्थैर्मन्त्रादिकार्यैर्युक्ता अनादिः प्रकृतिः । तदग्रिमे चाधिष्ठातृत्वम् । तदग्रिमे च कपिलस्य नाम तद्धर्मोश्च प्रत्यभिज्ञायन्ते । एतावान् परं विशेषो, यत् कापिलैः प्रकृतिः स्वतन्त्रोच्यते । अत्र तु परमेश्वरशक्तित्वेनेति । न तावता तस्या अजात्वहानिः । शक्तेर्नित्यत्वात् । अतः शक्तित्वमात्रेण विशेषेण कपिलमतप्रत्यभिज्ञापकनानापदानादरणमनुचितमिति सांख्यमतस्यानुमानिकत्वोक्तिः प्रधानस्याशब्दत्वोक्तिश्चानुपपन्नेति प्राप्ते इत्यर्थः । सूत्रं पठित्वा सिद्धान्तं व्याकुर्वन्ति * उच्यते इत्यादि * । एकपदमिदं सूत्रम् । चमसेन तुल्योऽविशेषश्चमसवदविशेषस्तस्मात् । स्यात् सांख्यमतमत्र, यदि तस्याः सृष्टिकरणे स्वातन्त्र्योपपादको रजःसत्त्वतमःसाम्यावस्थात्मकः स्वरूपस्य विशेषो विधातुं शक्येत । स च न शक्यते । शक्तित्वेन शक्तिमदधीनोदयतया तत्सापेक्षतयैव सिद्धत्वात् । न च स्वगुणैर्निगूढत्वं तद्गमकम् । तत्र स्वपदेन ब्रह्मण

बिलचमसं कल्पयित्वा तत्र यशोरूपं सोमं होतारो मन्त्रेण भक्षयेयुरिति कल्पयितुं शक्यते । तथा प्रकृते रोहितशुक्लकृष्णशब्देन रजःसत्त्वतमांसि कल्पयित्वा न तद्वशेन सर्वमेव मतं शक्यते कल्पयितुम् । कपिलऋषिवाक्यमप्यनित्यसंयोगभयान्नित्यऋषेरेवानुवादकम् । तस्माच्च मन्त्रमात्रेण प्रकरणश्रुत्यन्तरनिरपेक्षेण विशेषः कल्पयितुं शक्यः ॥ ८ ॥

ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॥ ९ ॥

ननु चमसमन्त्रे अर्वाग्बिल इति मन्त्रव्याख्यानमस्ति । शिरश्चमसः प्राणा वै यशः प्राणा वा ऋषय इति । नात्र तथा व्याख्यानमस्तीतीमां शङ्कां परिहरति तुशब्दः । अजाशब्देन ज्योतिरेवोच्यते । यथा ह्यजा अल्पदोग्ध्री तथेयं नश्वरसुखदात्री ।

एव प्रहीतुं शक्यतया तद्गुणानामेव ग्राह्यत्वात् । उत्तरार्धे, यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक इत्यनेनापि तस्यैव परामृष्टत्वाच्च । नापि भोक्तृभोग्यार्थयोगस्तथा । जन्यायां शक्तावपि तथात्वस्य पुराणासिद्धत्वात् । नापि, योनिं योनिमिति तद्बाधकम् । वीप्साया बहुत्वस्य च बाधकत्वात् । नाप्यंशभेदात् समाधिः । तस्यापि शक्तिसाधारणत्वात् । अतश्चमसवाक्यवद्वाक्यानुरीत्या कल्प्यमानस्य विशेषस्याभावाच्च सांख्यमतासिद्धिः । कपिलवाक्यादसिद्धिस्तु भाष्य एवोपपादितेति पूर्वाधिकरणोक्तमक्षुण्णमित्यर्थः ॥ ८ ॥

ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॥ सूत्रमवतारयन्तो व्याकुर्वन्ति * नन्वित्यादि * । * इतीमामिति * इति हेतोश्चमसदृष्टान्तस्य वक्तुमशक्यत्वादजाशब्दे यौगिकार्थमादृत्याध्यात्मप्रकरणासंयुक्तत्वाद्रूढार्थं च विहायात्र सांख्यसिद्धा प्रकृतिरेवाङ्गीकार्येतीमामित्यर्थः । नन्वजाशब्दार्थानिर्द्धारे कथं तत्परिहार इत्यत आहुः । * अजेत्यादि * । तर्ह्यजाशब्दप्रयोगः कुत इत्यत आहुः । * यथेत्यादि * । तथाच पद्य नीलोत्पलदलश्यामाभिःसरन्ति शिताः शरा इति-

अग्निसूर्यसोमविद्युद्रूपा ब्रह्मणो हंसोक्तचरणरूपा । भगवत्कार्यांशरूपत्वात् । तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति श्रुतेश्च प्रथमोत्पन्ना देवता अजाशब्देनोच्यते ।। तत्र हेतुः । उपक्रमात् । अत्रैवोपक्रमे, तदेवाग्निस्तद्वायुस्तदादित्यस्तदु चन्द्रमा इति । द्वा सुपर्णेति चाग्रे । मध्ये चायं मन्त्रः पूर्वोत्तरसम्बद्धमेव वदति । सा मुख्या सृष्टिः । अजाद्वयं जीवब्रह्मरूपमिति । अत्र प्रकरणे न स्पष्ट इति निरूपयति । तथाहि श्रुत्यन्तरे स्पष्टमेव अधीयत एके।

यक्षिगीर्योऽध्यवसानेन तथात्वबोधनाय प्रयोग इत्यर्थः । ननु किं तज्ज्योतिर्यद्देवमुच्यत इत्यत आहुः । * अग्नीत्यादि * । अग्निसूर्यसोमविद्युद्रूपत्वाज्ज्योतिः । रूपादिति पाठे भावप्रधानो निर्देशः । रूपेति पाठः श्रीहस्ताक्षरेषु सन्दिग्धत्वाद् बोध्यः । छान्दोग्ये षष्ठे प्रपाठके सत्यकामाय हंसेन, अग्निः कला सूर्यः कला चन्द्रः कला विद्युत् कलैप वै सौम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नामेत्युक्तो यश्चरणस्तद्रूपा । तस्य चरणरूपत्वं तु, तत् तेजोऽसृजतेति श्रुत्युक्तभगवत्कार्यांशत्वात् तस्य त्रिरूपत्वं, कार्यत्वक्लीत्वे च । तासां त्रिवृतमिति श्रुतेः । चोऽवधारणे । अतः प्रथमोत्पन्ना या देवता तेजोरूपा सैवात्राजापदेनोच्यत इत्यर्थः । ननु तस्या अत्र कथं प्रत्यभिज्ञानमित्यत आहुः । * तत्र हेतुरित्यादि * । तथापि चेतनाधिष्ठितत्वस्य कथ प्रत्यभिज्ञानमित्यत आहुः । * द्वा इत्यादि * । सैव कुत उच्यत इत्यत आहुः । * सा मुख्या सृष्टिरिति * । सा त्रिवृत्कृतदेवतारूपा मुख्या सृष्टिः । सृष्ट्यन्तरकरणसमर्थमाद्यं कार्यमत उच्यत इत्यर्थः । एवमत्राजामन्त्रस्य पूर्वार्द्धं व्याख्यातम् । उत्तरार्द्धं व्याकरोतीत्याहुः । * अजाद्वयमित्यादि * । नन्वक्षाया ज्योतिष्ट्वेन निरूपणमयुक्तम् । छान्दोग्ये तेजस उत्पत्तिकथने त्रिरूपताया अनुक्तत्वात् । भाष्ये च हंसोक्तचरणरूपत्वेन व्याख्यानमयुक्तम् । तस्यापि तत्रानुक्तत्वादित्याशयेन सूत्रशेषमवतारयन्ति * अत्रेत्यादि * । अत्र प्रथमकार्यप्रकरणे त्रिरूपत्वं, हंसोक्तश्चरणो न स्पष्ट

यदग्ने रोहितᳬ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्येति । एवमग्रेऽपि कलात्रये । अनेन जीवेनात्मनेति जीवब्रह्मणोश्चानुप्रवेशः । बीजेऽपि त्रैविध्यमिति सरूपत्वम् । भगवतोऽभोगे हेतुः—जीवेन भुक्तभोगामिति । तस्मात् प्रकृतेऽपि चमसवच्छ्रुतावेवार्थकथनान्न सांख्यमतप्रतिपादकत्वम् ॥ ९ ॥

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ १० ॥

ननु द्विविधा शब्दप्रवृत्तिः । योगो, रूढिर्वा । तत्राजाशब्दश्छागायां रूढः । न जायत इति योगः । अनुभयरूपत्वात् कथं सृष्टिवाचकत्वमित्याशङ्क्य परिहरति ॥ कल्पनोपदेशाच्च ॥ कल्पनात्रोपदिश्यते ।

इति हेतोस्तत्रत्यं श्रुत्यन्तरं दर्शयतीत्यर्थः । श्रुतिमाहुः । * यदग्नेरित्यादि * । ननु यदि तेजोरूपा देवताभिप्रेता तदा सूत्रकृता तेजःपदमेव कुतो नोक्तमित्यत आहुः । * एवमित्यादि * । * कलात्रय इति * सूर्यसोमविद्युद्रूपे । तथाचैतदग्ने, यदादित्यस्य रोहितं रूपं यच्चन्द्रमसो यद् विद्युत इत्यादिनिरूपणात् तत्र हंसोक्तपादरूपतादिधर्मनिरूपणार्थं ज्योतिःपदं प्रयुक्तं, न तेजःपदमित्यर्थः । अस्यां श्रुतौ जीवब्रह्मणी कुत्रोक्ते इत्याकाङ्क्षायामाहुः । * अनेनेत्यादि * । जीवेनेति सहार्थतृतीययाऽऽत्मनेतिकरणतृतीयया च बोधिते इत्यर्थः । सरूपत्वकथनप्रयोजनमाहुः । * बीजेऽपीत्यादि * । बीजं मां सर्वभूतानां विद्धि पार्थ सनातनमिति वाक्यात् बीजं भगवान् । तत्रापि सच्चिदानन्दरूपत्वात् त्रैविध्यमस्तीत्यतः प्रजासरूपत्वम् । तथाच कार्यकारणयोः सालक्षण्यस्यौत्सर्गिकत्वेनार्थात् प्राप्तावपि यत् सरूपत्वकथनं, तत् प्रजानां तेजोऽबन्नात्मकत्वेऽपि बीजधर्मस्य सच्चिदानन्दरूपत्वस्य ज्ञापनार्थमित्यर्थः । * तस्मादिति * यस्मादेवं वाक्यतात्पर्यं तस्मात् ॥ ९ ॥

कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * । परिहारं व्याकुर्वन्ति * कल्पनाऽत्रेत्यादि * ।

आद्या सृष्टिः कल्पनया अजाशब्देनोच्यते । यथा छाजा वर्करसहिता सवत्सा स्वामिहिता तथेयमिति उपदेशपदात् तथोपासनमभिमतम् । चकारात् परोक्षवादोऽपि देवस्य हिताय । यथा आदित्यो वै देवमधु, वाचं धेनुमुपासीत । द्युलोकादीनां चाग्नित्वं पञ्चाग्निविद्यायां तथा प्रकृतेऽप्यविरोधः । योगरूढिव्यतिरेकेणाप्येषा वेदे शब्दप्रवृत्तिः । तस्मादजामन्त्रेण न सांख्यमतसिद्धिः ॥ १० ॥

एतस्यैव विवरणम् * आद्येत्यादि * । कल्पनाया विवरणं * यथेत्यादि * । तथाच तस्या भगवत्साहित्येन कार्यसाहित्येन चोपासनार्थं गौण्याऽजत्वोपदेश इत्यर्थः । गूढाभिसन्धिमुद्घाटयन्ति । * चकारादित्यादि * । चोऽप्यर्थे । तत् तेषां न प्रियं यन्मनुष्या विद्युरिति श्रुतेर्मनुष्याणां ज्ञानं देवहिताय न भवतीति तद्धिताय, यथेन्धे इन्द्र इति परोक्षवादस्तथात्र चतुर्मुखाऽजन्यायेनास्मदादिसाधारणजन्माभावात् प्रथमकार्ये ज्योतीरूपेऽजेति परोक्षवादो, भगवत्प्रियत्वाय वा परोक्षवाद इत्यर्थः । दृष्टान्तं व्याकुर्वन्ति * यथेत्यादि * । अयमाशयमर्थः । सांख्यसमासत्राणां पञ्चशिखवृत्तौ सूर्यस्य चक्षुरधिदैवतत्वेन सिद्धत्वान्मधुविद्योक्तस्य मधुत्वस्य तस्मिन् वक्तुमशक्यत्वेन सांख्यवादिनापि तत्र गौण्येव वृत्तिः कल्पनोपदेशमात्रार्थैवादरणीया । अन्यथा श्रुतिविरोधापत्तेः । निर्गुणादिश्रुतिविरोधश्चेति सूत्रयतः कापिलाऽऽचार्यस्यापि तद्विरोधस्यासह्यत्वात् । अतो यथा मध्वादिविद्यायां कल्पनोपदेशस्त्वयाङ्गीक्रियते तथा श्रुतिविरोधपरिहारायात्राप्यङ्गीकार्यमिति प्रतिवादिबोधनार्थं तदनुसारेणोक्तम् । वस्तुतस्तु पुरुषविधब्राह्मणे रमणार्थं सृष्टिं प्रकृत्य अजेतरामवत् वस्त इतर इति श्रावणादत्रापि तादृगाकारमादाय चतुर्मुखाऽजन्यायबाधादजात्वमाद्यसृष्टेरुच्यते बन्धकत्वाय । नचात्र मानाभावः । समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमान इत्यग्रिमग्रन्थेन तथावसायात् । एवं मधुविद्यायामपि, इहैव तृप्यन्तीति तृप्तिलिङ्गादादित्यस्य मधुत्वम् । नच विरोधः । सैषा त्रय्येव

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥

मन्त्रान्तरेण पुनराशङ्क्य परिहरति । बृहदारण्यकपष्ठे श्रूयते । यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः । तमेवमन्य आत्मानं विद्वान् ब्रह्माऽमृतोऽमृतमिति । यद्यप्यत्र पञ्चजनाः पञ्चोच्यन्ते, न पञ्चानां पञ्चगुणत्वम् । समासानुपपत्तेः । तथाहि । आद्यः

विद्या तपतीति श्रुत्या शब्दात्मकत्ववद् रसात्मकत्वेऽप्यदोषात् । एवमेव वाचो धेनुत्वमपि धरणीवज्ज्ञातव्यम् । एवं द्युलोकादीनामग्नित्वमपि । सर्वं सर्वमयमिति तापनीयश्रुते सर्वत्र सर्वसत्त्वात् तत्तदुद्भवानुद्भवयोर्भगवदिच्छाया नियामकत्वेन प्रत्यक्षविरोधस्याकिञ्चित्करत्वादिति । तदेतदुक्तं—चकारात् परोक्षवादोऽपीति * । अनेनैवाशयेन सुबोधिन्यां निगमकल्पतरोरित्यत्र, असौ वा आदित्यो देवमधिवति स्वर्गस्थानां सुर्यो मधु । यथास्माकं सारघमित्युक्तम् । एतावान् परं विशेषो यच्छ्रुतौ परोक्षवादोऽत्र नेति न कोऽपि शङ्कालेशः ॥ १० ॥ २ ॥

न संख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च ॥ सूत्रमवतारयन्ति * मन्त्रान्तरेणेत्यादि * । * आशङ्क्येति * सांख्यमतस्य श्रौतत्वमाशङ्क्य । तेन विषयरूपहेतुभेदादधिकरणान्तरत्वं वा, पूर्वशेषत्वाश्रयेत्यपि बोधितम् । विषयमाहु. । * बृहदित्यादि * । अत्र षष्ठ इति काण्वपाठाभिप्रायेणोक्तम् । माध्यन्दिनानां चतुर्थे दर्शनादिति । मन्त्रार्थस्तु, यस्मिन्नेते पञ्चादय आकाशान्ताः प्रतिष्ठितास्तमात्मानमेव ब्रह्माऽमृतं विद्वानन्यो जीवः, अमृतो मुक्तो भवतीति शेषः । अन्यैस्तु तमेवात्मानं ब्रह्माऽमृतं विद्वानहममृत इति मन्य इति व्याक्रियते । अनेन मन्त्रेण कथमाशङ्केत्यानमित्याकाङ्क्षायामस्मिन् मन्त्रे पञ्चशब्दद्वयदर्शनात् पञ्चसंख्याविषयकपञ्चसंख्यान्तरश्रवणाभिमानरूपेण मूढग्राहेणेति वक्तुं तं व्युत्पादयन्ति * यद्यपीत्यादि * । तथाच तद्विवक्षितसंख्यानुपसङ्ग्रहान्मूढमाह इत्यर्थ. । कथं समासानुपपत्तिरित्याकाङ्क्षायां तां व्युत्पादयन्ति * तथाहीत्यादि * । अप-

आद्या सृष्टिः कल्पनया अजाशब्देनोच्यते । यथा छजा वर्करसहिता सत्रसा स्वामिहिता तथेयमिति उपदेशपदात् तयोपासनमभिमतम् । चकारात् परोक्षवादोऽपि देवस्य हिताय । यथा आदित्यो वै देवमधु, वाचं धेनुमुपासीत । द्युलोकादीनां चाग्नित्वं पञ्चाग्निविद्यायां तथा प्रकृतेऽप्यविरोधः । योगरूढिव्यतिरेकेणाप्येषा वेदे शब्दप्रवृत्तिः । तस्मादजामन्त्रेण न सांख्यमतसिद्धिः ॥ १० ॥

एतस्यैव विवरणम् * आद्येत्यादि * । कल्पनाया विवरणं * यथेत्यादि * । तथाच तस्या भगवत्साहित्येन कार्यसाहित्येन चोपासनार्थं गौण्याऽजत्वोपदेश इत्यर्थः । गूढाभिसन्धिमुद्घाटयन्ति । * चकारादित्यादि * । चोऽप्यर्थे । तत् तेषां न प्रियं यन्मनुष्या विद्युरिति श्रुतेर्मनुष्याणां ज्ञानं देवहिताय न भवतीति तद्धिताय, यथेन्धे इन्द्र इति परोक्षवादस्तथात्र चतुर्मुखाऽजन्यायेनास्मदादिसाधारणजन्माभावात् प्रथमकार्ये ज्योतीरूपेऽजेति परोक्षवादो, भगवत्प्रियत्वाय वा परोक्षवाद इत्यर्थः । दृष्टान्तं व्याकुर्वन्ति * यथेत्यादि * । अत्रायमर्थः । सांख्यसमाससूत्राणां पञ्चशिखवृत्तौ सूर्यस्य चक्षुरधिदैवतत्वेन सिद्धत्वान्मधुविद्योक्तस्य मधुत्वस्य तस्मिन् वक्तुमशक्यत्वेन सांख्यवादिनापि तत्र गौण्येव वृत्तिः कल्पनोपदेशमादायैवादरणीया । अन्यथा श्रुतिविरोधापत्तेः । निर्गुणादिश्रुतिविरोधश्चेति सूत्रयतः कपिलाऽऽचार्यस्यापि तद्विरोधस्यासह्यत्वात् । अतो यथा मध्वादिविद्यायां कल्पनोपदेशस्त्वयाङ्गीक्रियते तथा श्रुतिविरोधपरिहारायात्राप्यङ्गीकार्यमिति प्रतिवादिबोधनार्थं तदनुसारेणोक्तम् । वस्तुतस्तु पुरुषविधब्राह्मणे रमणार्थं सृष्टिं प्रकृत्य अजेतराभवद् वस्त इतर इति श्रावणादत्रापि तादृगाकारमादाय चतुर्मुखाऽजन्यायबाधादजात्वमाद्यसृष्टेरुच्यते बन्धकत्वाय । नचात्र मानाभावः । समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमान इत्यभिमग्रन्थेन तथावसायात् । एवं मधुविद्यायामपि, दृष्ट्वैव तृप्यन्तीति तृप्तिलिङ्गादादित्यस्य मधुत्वम् । नच विरोधः । सैषा त्रय्येव

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥ ११ ॥

मन्त्रान्तरेण पुनराशङ्क्य परिहरति। बृहदारण्यकषष्ठे श्रूयते। यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः। तमेवमन्य आत्मानं विद्वान् ब्रह्माऽमृतोऽमृतमिति । यद्यप्यत्र पञ्चजनाः पञ्चोच्यन्ते, न पञ्चानां पञ्चगुणत्वम्। समासानुपपत्तेः। तथाहि। आद्यः

विद्या तपतीति श्रुत्या शब्दात्मकत्ववद् रसात्मकत्वेऽप्यदोषात् । एवमेव वाचो धेनुत्वमपि धरणीवज्ज्ञातव्यम् । एवं द्युलोकादीनामग्नित्वमपि । सर्वं सर्वमयमिति तापनीयश्रुतेः सर्वत्र सर्वसत्त्वात् तत्तदुद्भवानुद्भवयोर्भगवदिच्छाया नियामकत्वेन प्रत्यक्षविरोधस्याकिञ्चित्करत्वादिति । तदेतदुक्तं—चकारात् परोक्षवादोऽपीति * । अनेनैवाशयेन सुबोधिन्यां निगमकल्पतरोरित्यत्र, असौ वा आदित्यो देवमधिवति स्वर्गस्थानां सूर्यो मधु। यथास्माकं सारघमित्युक्तम्। एतावान् परं विशेषो यच्छ्रुतौ परोक्षवादोऽत्र नेति न कोऽपि शङ्कालेशः ॥ १० ॥ २ ॥

न संख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च ॥ सूत्रमवतारयन्ति * मन्त्रान्तरेणेत्यादि * । * आशङ्क्येति * सांख्यमतस्य श्रौतत्वमाशङ्क्य । तेन विषयरूपहेतुभेदादधिकरणान्तरत्वं वा, पूर्वशेषत्वान्नवेत्यपि बोधितम् । विषयमाहुः । * बृहदित्यादि * । अत्र षष्ठ इति काण्वपाठाभिप्रायेणोक्तम् । माध्यन्दिनानां चतुर्थे दर्शनादिति। मन्त्रार्थस्तु, यस्मिन्नेते पञ्चादय आकाशान्ताः प्रतिष्ठितास्तमात्मानमेवं ब्रह्माऽमृतं विद्वानन्यो जीवः, अमृतो मुक्तो भवतीति शेषः । अन्यैस्तु तमेवात्मानं ब्रह्माऽमृतं विद्वानहममृत इति मन्य इति व्याक्रियते । अनेन मन्त्रेण कथमाशङ्कोत्थानमित्याकाङ्क्षायामस्मिन् मन्त्रे पञ्चशब्दद्वयदर्शनात् पञ्चसंख्याविषयकपञ्चसंख्यान्तरश्रवणाभिमानरूपेण मूढग्राहेणेति वक्तुं तं व्युत्पादयन्ति * यद्यपीत्यादि * । तथाच तद्विवक्षितसंख्यानुपसङ्ग्रहान्मूढग्राह इत्यर्थः। कथं समासानुपपत्तिरित्याकाङ्क्षायां तां व्युत्पादयन्ति * तथाहीत्यादि * । अयु-

पञ्चशब्दः संख्यावाची, संख्येयवाची वा ? । आद्ये पञ्चसंख्याया एकत्वान्न षष्ठीसमासः । संख्यायां संख्याभावाच्च । संख्येयपरत्वे द्वितीयस्य संख्यात्वे पञ्चत्वमेव पूर्ववच्चेदनन्वयः । विधायकाभावाच्च ।

अतो वीप्सा । पञ्चजनसंज्ञाविशिष्टानां वा पञ्चत्वमिति य-

मर्थः । संख्योपसङ्ग्रहार्थं पञ्चानां पञ्चेति समासे वाच्ये पञ्चसंख्याया एकत्वाद् ब्राह्मणसमाज इत्यत्र ब्राह्मणानामित्यस्येव पञ्चानामित्यस्य संख्यावाचिनो बहुवचनान्तस्य प्रवेशो न घटतुं शक्य इति न षष्ठीसमासः । यदि पञ्चशब्दस्य नित्यं बहुवचनान्तत्वेन दारा इत्यादिवद् बहुत्वस्याविवक्षितत्वेन प्रवेशो विभाव्यते, तदापि पञ्चपञ्चेत्यस्य पञ्चसंख्यासम्बन्धिनी पञ्चसंख्येत्यर्थो वक्तव्यः । सम्बन्धश्च विषयतया वक्तव्यः । तथा सति तस्यां संख्यायां तत्संख्याऽभावात् समासानुपपत्तिः । अनेन सप्तमीसमासोऽपि निरुक्तप्रायम् । एवमन्येऽपि बोध्याः । यदि चाद्यस्य पञ्चशब्दस्य संख्येयपरत्वेन द्वितीयस्य संख्यापरत्वेन सप्तमीसमासो भाव्यते, तदा पञ्चसंख्यासंख्येयेषु पञ्चसंख्येत्यर्थलाभादभीष्टाया: संख्याया असिद्ध्या समासवैयर्थ्यम् । यदि च पूर्ववदाद्यस्य संख्यार्थत्वं, द्वितीयस्य संख्येयार्थत्वं, तदापि षष्ठीसमासे संख्येयबोधकपदादेव विशेषणीभूतसंख्यालाभेन पूर्वपदस्यानन्वयः । सप्तमीसमासे तु संख्यायां संख्येयाभावादुत्तरपदस्यानन्वयः । नचात्रासूर्यं पश्या राजदारा इतिवदसमर्थसमास एवास्त्विति वाच्यम् । तत्रासूर्यललाटयोर्दर्शितपोरितिवत् तादृशसमासज्ञापकाभावादिति । एतेनान्येऽप्यसमर्थसमासा निवारिताः । एवं समासानुपपत्त्या तन्मतं दूषयित्वा सूत्रोक्त पूर्वपक्षहेतुं साधयितुं पुनस्तन्मतोत्थापनायाहुः । * अत इत्यादि * । यतः पूर्वोक्तरीत्या न पञ्चविंशतिसंख्योपसङ्ग्रहोऽतस्तयोः असमस्तयोरेव पञ्चपञ्चेति पदयोर्वीप्सा द्विरुक्तिर्वा, समासान्तरेण पञ्चजनसंज्ञाविशिष्टानां वा पञ्चत्वं यथासम्भवं त्वदभीष्टं यथा स्यात् तथार्थो वक्तव्यः । स चेत्थम् । वीप्सापक्षे पञ्चसंख्यायायाः पञ्चगुण-

धासम्भवमर्थः। तथापि मूढग्राहेण संख्योपसंग्रहादपि लक्षणार्थं केन-चिद्धर्मेण पञ्चसंग्राहकेण भाव्यम् । स च तेषां मते न सम्भवति । तथा सति पञ्चैव तत्त्वानि स्युः । अतस्ते नानाभावादेव स्वीकर्तव्याः । यद्यपि भूततन्मात्राकृतिचित्त्यन्तःस्थितत्वधर्मा वक्तुं श-

---

क्यबोधकस्याभावाद्दशानामेव बोधो न पञ्चविंशतीनाम् । अतो, यस्मिञ्जनाः पञ्चशः पञ्चेत्येवं संख्योपसङ्ग्राह्या । द्वितीयपक्षादरे तु पञ्चजनपदस्य, दैत्यः पञ्चजनो महानित्युक्ते दैत्ये वा; स्युः पुमांसः पञ्चजना इतिकोशोक्तेषु मनुष्येषु वा रूढिमाश्रित्य पञ्च पञ्चपूल्य इतिवत् पञ्चानां पञ्चजनानां समाहारः पञ्चजना इति समासो, लिङ्गव्यत्ययादेश्छान्दसत्वं वक्तव्यम् । अथवा दिक्संख्ये संज्ञाया-मित्यनेन सप्तर्षय इतिवत् पञ्च च ते पञ्चजनाश्चेति संज्ञासमासो वा वक्तव्यः। तत्र पूर्वस्मिन् विकल्पे दैत्यस्यैकत्वेन समाहारास-म्भवान्न समासः । द्वितीयविकल्पे तु मनुष्याणां बहुत्वेन समूहघ-टकतया समाससम्भवेऽपि विशेषणीभूतपञ्चत्वोपपत्त्यर्थं, वैवस्वतो न तृप्यति पञ्चभिर्मानवैर्यम इति मन्त्रोक्ता वा, जना यदग्निमयजन्त पञ्चेति यागसम्बन्धलिङ्गेन निषादपञ्चमाश्चत्वारो वर्णा वा ग्राह्याः। तदापि न पञ्चविंशतिसंख्योपसङ्ग्रहः । संख्याया एकस्मिन्नेव पञ्च-शब्दे प्रविष्टत्वेन गुणकसंख्यान्तरस्याभावात् । तथा संज्ञासमासपक्षे-ऽपि वस्तुतस्तु विशिष्टादिषु सप्तर्षय इतिवत् पञ्च पञ्चजना इति संज्ञायाः कुत्राप्यभावात् समासस्यैवानुपपत्तिः । अत एतत्सर्वं वि-हाय जनयन्तीति जना इति योगं चाश्रित्य तत्त्वानि ग्राह्याणि । ततः पञ्चानां जनानां समाहारः पञ्चजनाः, पञ्चानां पञ्चजनानां सः पञ्चपञ्चजना इति समाहारसमासद्वयस्य वा, पञ्चगुणिताः पञ्च प-ञ्चपञ्च, ते च ते जनाश्चेत्युत्तरपदलोपिगर्भस्य कर्मधारयस्य वा आश्रयणेन पञ्चविंशतिसंख्यामुपसंगृह्य वेदान्ते मोक्षाधिकारान्मु-मुक्षुभिः कपिलस्मृतिसिद्धानि पञ्चविंशतितत्त्वानि ग्राह्याणीति त-न्मतस्यापि श्रौतत्वकल्पनं मूढग्राह इतीदं सर्वं, संख्योपसङ्ग्रहादपी-त्यनेनोत्थाप्य, नेत्यनेन निषेधन्ति । तत्र हेतुः—नानाभावादिति * ।

क्यन्ते । तथापि न ते तथोक्तवन्तः । मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुष इत्यन्यथोपगमात् ।

पुरुषे वैलक्षण्याभावप्रसङ्गश्च । किञ्च नायं श्रुत्यर्थ इति श्रुता-

---

तद् व्याकुर्वन्ति * तथापीत्यादि * । एवं बाधेऽप्युक्तरीत्या मूलग्राहेण संख्योपसङ्ग्रहेऽपि जनशब्दवाच्यानां तत्त्वानां प्रत्यभिज्ञानार्थं तत्पञ्चकनिष्ठपञ्चत्वसङ्ग्राहकेण केनचिद्धर्मेण सांख्यमते भाव्यम् । तादृशश्च धर्मस्तन्मते अप्रसिद्ध इति न सम्भवति । तदसम्भवे सति पञ्चैव तत्त्वानि स्युर्न तु पञ्चपञ्च । अतस्तेषां संख्यासङ्ग्रहस्यावश्यकत्वात् पञ्चकनिष्ठपञ्चत्वसङ्ग्राहका धर्मा नानाभावाः प्रकृतित्वादिधर्मेभ्योऽतिरिक्तो भावो धर्मो येषां तादृशाः स्वीकर्तव्याः । नच तादृशामभावः । भूतादिषु भूतत्वतन्मात्रत्वाकृतित्वचित्तित्वानां प्रकृतिपुरुषमहदहङ्कारमनस्स्वन्तःस्थत्वस्येत्येवं तादृशां वक्तुं शक्यत्वात् । यद्यप्येवं शक्यते वक्तुं तथापि न ते तथोक्तवन्तः । मूलप्रकृतिरित्यादिना एकैकनिष्ठसप्तनिष्ठषोडशनिष्ठानां चतुर्णामेव धर्माणां स्वाभिमतसंख्यासङ्ग्राहकत्वेनोपगमात् । तथाचायं सूत्रार्थः । पञ्चपञ्चजना इत्यत्र केन चित् समासेन संख्योपसंग्रहादपि न सांख्यमतस्य शब्दवत्त्वम् । कुतः ? । नानाभावात् । संख्यासङ्ग्राहकधर्माणां तन्मते पञ्चपञ्चकनिष्ठधर्मभिन्नत्वेन विद्यमानत्वात् । यदि हि तत्त्वेषु श्रौतत्वं तदभिप्रेतं स्यात् सङ्ग्राहकधर्माणां श्रौतशब्दविरुद्धसंख्याकत्वं न ब्रूयुरतस्तथेति । भाष्ये, आकृतित्वं कर्मेन्द्रियाणां धर्मः । चित्तित्वं ज्ञानेन्द्रियाणाम् । अन्तःस्थितत्वं प्रकृतिपुरुषमहदहङ्कारमनसाम् । सांख्यकारिकायां तु प्रकृतित्वं तत्त्वान्तरोपादानत्वम् । प्रकृतिविकृतित्वं किञ्चित्तत्त्वोपादानत्वे सति किञ्चित्तत्त्वोपादेयत्वम् । विकारत्वं साक्षात् तत्त्वोपादेयत्वम् । पुरुषत्वं चोक्तत्रितयविलक्षणत्वं बोध्यम् । जनशब्दोऽपि तन्मते विरूढत्वात् इति दूषणान्तरमधिकमाहुः । * पुरुष इत्यादि * । जनशब्दस्य जनकत्वोपाधिना तत्त्व-

वेव प्रतीयते । अतिरेकादाकाशश्चेति । चकारादात्मा यस्मिन्नि-सधिकरणत्वेनोक्तः । तस्मान्नानेनापि मन्त्रेण तन्मतसिद्धिः ॥११॥

प्राणादयो वाक्यशेषात् ॥ १२ ॥

नन्ववश्यं मन्त्रस्यार्थो वक्तव्यः । तदनुरोधेन लक्षणयापि ज्योतिःशास्त्रवत् पञ्चपञ्चशब्दः पञ्चविंशतिवाचकतया परिकल्प्यः । स्पष्टमाहात्म्यार्थमात्माकाशयोराधाराधेयभावः प्रदर्शित-

---

वाचकत्वेन गृहीतत्वात् पुरुषेऽपि तदापत्त्या तथेत्यर्थः । नच छत्रिणो यान्तीतिवद् गौण्या तत्सङ्ग्रहान्न दोष इति शङ्क्यम् । तत्र प्रत्यक्षसेधान्न गौणीनियामकस्याभावेन तस्या वक्तुमशक्यत्वाज्जनशब्दे युगपद् वृत्तिद्वयापातादगतिकगतित्वाच्चेति । हेत्वन्तरं व्याकुर्वन्ति । किञ्चेत्यादि । आकाश आत्मा चेत्येतयोरतिरेकाज्जनशब्दोक्तेभ्य आधिक्यात् संख्याविरोधे सति न तन्मतसिद्धिरित्यर्थः ॥ ११ ॥

प्राणादयो वाक्यशेषात् ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * । अयमर्थः । पञ्चविंशतिसंख्योपसंग्रहे मन्त्रवर्णविरोधो दोषत्वेनोक्तः । सोऽस्माभिः परिक्रियते । यतो मन्त्रस्यार्थो भवतामस्माकं चावश्यं वक्तव्यः । तत्र भवन्मते आत्मनि प्रतिष्ठिता द्विपञ्चसंख्याकाः पञ्चविंशतिसंख्याका वा एते जनाः, पञ्चसंख्याका वा एते पञ्चजना इति निश्चेतुमशक्यत्वादस्मन्मते तु पञ्चविंशतिसंख्याकानां तत्त्वानां निश्चितत्वादस्मन्मतमेव ज्यायः । एवं सति तदनुरोधेन यथा, पञ्च सप्त च वर्षाणि न ववर्ष शतक्रतुरित्यत्र द्वादशसंख्याघटकतया पञ्च सप्तेति पदद्वयेऽप्यपदार्थेन समुदाये लक्षणा । तथात्र पञ्चविंशतिसंख्याघटके पञ्चेतिपदद्वये समुदायलक्षणया, अथवा, त्रिणवेनौजस्कामं याजयेत्, युद्धं त्रिणवरात्रं तदभूत्तुमुलमुल्वणमित्यत्र यथा त्रयो नव यत्रेति बहुव्रीहिस्तथात्र पञ्च पञ्च यत्रेति बहुव्रीहिणा सुप्लुका च गणलक्षणयापि ज्योतिःशास्त्र इव पञ्चपञ्चशब्दः पञ्चविंशतिवाचकतया परिकल्प्यः । एवं वाचकत्वे कल्पितेऽत्र पञ्चविंशतितत्त्वसिद्धावेवं मन्त्रार्थः । यस्मिन् पञ्चविंशतिसंख्याकानि तत्त्वानि आकाशश्च प्रतिष्ठित उत्कर्षं प्राप्तस्तमात्मानमेव, ब्रह्माऽमृतं

स्तत्रस्ययोरेव । अतो मन्त्रे तन्मतसिद्धिरित्याशङ्क्य परिहरति । प्राणादयः पञ्चजनाः । वाक्यशेषस्य मन्त्रार्थनियामकत्वात् । प्राणस्य प्राणमुतचक्षुषश्चक्षुः श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो मन इति ।

ननु कथमस्य वाक्यशेषत्वम् । उच्यते । प्राणादयः संज्ञाशब्दाः करणवाचकाः । ते ज्ञानरूपं वा, क्रियारूपं वा कार्यं जनयन्ति स्वव्यापारेण। तेन तेषां करणान्तरापेक्षाभावात् प्राणादीनां

विद्वान् अमृतो मुक्तो भवतीति मन्य इति । नच तत्त्वेष्वात्माकाशयोः प्रविष्टत्वात् पुनस्तत्कथनमतिरेकापादकतया बाधकमिति शङ्क्यम् । यतोऽत्र तत्रस्ययोर्गणस्थयोरेवात्माकाशयोराधाराधेयभावः । आत्मनः स्पष्टमाहात्म्यार्थं प्रदर्शितो योऽन्यत्र सर्वाधारत्वादिधर्मवत्तया प्रसिद्धः सोऽपि यस्मिन्निति । अत्रात्मन आधारता, मोक्षे इच्छाऽस्तीतिवद् विषयतया । तथाच यस्मिन्नात्मनि विषये तत्त्वान्याकाशश्च सङ्घातरूपतया परार्थत्वेन ज्ञेयत्वरूपां प्रतिष्ठां प्राप्तवन्तस्तमात्मानं विद्वाँस्तथेति निर्गलितोऽर्थः । अतो मन्त्रे तन्मतसिद्धिरित्याशङ्क्य परिहरतीति । परिहारं व्याकुर्वन्ति * प्राणादय इत्यादि * । भवेदयं मन्त्रविरोधपरिहारो यद्यस्मन्मते पञ्चजनानामनिश्चयः स्यात् । स तु नास्ति । यतः प्राणादयो निश्चिताः पञ्चजनाः । कुतः ? । वाक्यशेषात् । बहूनां प्राप्तौ वक्ष्यमाणस्य वाक्यशेषस्य मन्त्रार्थनियामकत्वात् । एतस्य वाक्यशेषत्वे प्रत्यवतिष्ठते * नन्वित्यादि * । एकवाक्यलक्षणे परस्परसाकाङ्क्षत्वस्यैकवाक्यताबीजस्य सूचितत्वात् तस्याश्चात्राप्रतीयमानत्वे एकवाक्यत्वाभावेन शेषताया निश्चेतुमशक्यत्वात् कथमस्य वाक्यशेषत्वमित्यर्थः । एवं प्रत्यवस्थाने तां व्युत्पादयन्ति * उच्यते * प्राणाऽऽद्य इत्यादि * । सत्यमापाततो नाकाङ्क्षा प्रतीयते । तथापि सूक्ष्मविचारे, प्राणादय इत्यादिनोक्तप्रकारेण पुनः प्राणादिमत्त्वं बाधितं स्यादित्यतः प्रतीयते । किञ्च । ते निचिक्युरित्युत्तरार्द्धाद् भगवतो माहात्म्यनिरूपणार्थमिदं वाक्यं प्रवृत्तम् । सांख्यमते चेश्व-

पुनः प्राणादिमत्त्वं बाधितं स्यात् । भगवतो माहात्म्यविरोधश्च । अतः स्वार्थनिर्वाहार्थमन्यार्थो वर्तते पञ्चजनवाक्यस्य च । अतो बुद्धेः पञ्चवृत्तीर्जनयन्तीति प्राणादयः पञ्चजनाः । "संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च । स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तितः पृथग्" इति । तेषां तत्तत्प्रकारकं स्वकार्यजननं न स्वतः किन्तु भगवत इति द्वयोरेकार्थत्वे सर्वं सङ्गतं स्यात् । खण्डत्वाच्च शेषत्वम् । सर्वप्रवृत्तिकत्वाद् भगवतो न माहात्म्यविरोधः । तत्र

रानङ्गीकाराद् भगवतो माहात्म्यविरोधश्च स्यादतो ऽपि सा प्रतीयते । अतस्तथद्रीत्या वाक्यस्याबोधकत्वात् तस्य स्वार्थनिर्वाहार्थमन्योऽर्थो वर्तते । अन्यार्थे वर्तत इति सप्तम्यन्तपाठे तु, तद्वाक्यमन्यार्थे वर्तत इत्येवं व्याख्येयम् । पञ्चजनवाक्यस्य च सांख्यरीत्या पञ्चपञ्चकनिष्ठधर्मपञ्चकानुपलम्भात् पञ्चपञ्चजननिश्चायकोऽन्योऽर्थो वर्तते । स क इत्यपेक्षायां संशयादिरूपपञ्चबुद्धिवृत्तिजनकाः पञ्चजनास्ते पञ्चेति पञ्चानां ब्रह्मणि प्रतिष्ठितत्वमर्थः प्रतीयते । तदेतदुक्तम् * अतो बुद्धेरित्यादि * । एवं सति प्राणवाक्यं तेषां करणत्वं बोधयत् पञ्चजनवाक्यसूचितं कार्यमाकाङ्क्षते, पञ्चजनवाक्यं च तेषां तदित्यादिनोक्तरीत्या प्राणवाक्योक्तं भगवन्तमाकाङ्क्षत इति द्वयोर्विभागे साकाङ्क्षत्वे ब्रह्मबोधकतया च द्वयोरेकार्थत्वे ब्रह्मज्ञानार्थतया द्वयोरेकप्रयोजनकत्वे च सति यद्यत्रानुपपद्यमानत्वेनोक्तं तत् सर्वं सङ्गतं स्यादतोऽस्य वाक्यशेषत्वम् । यदि चोभयोः परस्परसाकाङ्क्षत्वाद् गौणमुख्यभावाच्च एकस्य शेषित्वमपरस्य शेषत्वमिति नोपेयते, तदा तु साकाङ्क्षत्वेन खण्डत्वादेव शेषत्वमतो न वाक्यशेषत्वानुपपत्तिरित्यर्थः । ननु प्राणादिप्रवर्तकत्वं जीवस्याप्यस्तीति भगवन्माहात्म्यमत्र वाक्यद्वये ऽपि न स्फुटतीति तद्विरोधात् कथमस्य ब्रह्मवाक्यत्वमित्यत आहुः । * सर्वेत्यादि * । नन्वत्र पञ्चैव प्राणादयः प्रमीयन्ते, नान्ये इति कथमत्र सर्वप्रवर्तकत्वसिद्धिरित्यतः पञ्चसु सर्वनिवेशं व्युत्पादयन्ति * तत्रेत्यादि * । प्राण-

प्राणशब्देन त्वग्घ्राणप्राणा गृहीताः । रसना चान्ने प्रतिष्ठितेत्यन्नं गृहीतम् । वाग् वा तेजसि । अत्ता चान्नं चैकत्र भवतः । सहभावित्वात् । क्वचिदेकग्रहणं, क्वचिदुभयग्रहणमिति तेनैते सर्वे पञ्चैव भवन्त्यतिरिच्यते परमाकाशः ।

तस्मात् प्राणादय एव पञ्चजना इति न तन्मतसिद्धिः ॥१२॥

शब्दो मुख्यप्राणवाचकः । स च वायुरूप इति प्राणशब्देन वायुविकारभूता त्वक्, तत्सहभूतं घ्राणं मुख्यप्राणस्य रूपान्तरभूता अन्ये ऽपानादयः प्राणा गृहीताः । रसना चान्ने प्रतिष्ठिता । तच्चिरन्नस्य वर्द्धते इति वाक्यादत्यन्तान्नाकाङ्क्षिणीति तद्ग्रहणार्थमान्नं गृहीतम् । पाठान्तरेऽन्नस्थाने ज्योतिः पठितम् । तच्च तेजः । वाक् च तैजोमयीति सा तैजसीति तेन वाक्सङ्ग्रहः । अत्ता चान्नं चैकत्र भवतः । अत्तार्थमेवान्नप्राकट्यात् । अतोऽन्नग्रहणेनैवात्तापि गृहीतः । तथाच तस्य तत्तत्सहभावित्वात् क्वचिदेकग्रहणं, क्वचिदुभयोर्ग्रहणम् । तेजस्येकस्या वाचो ग्रहणम् । प्राणान्नयोस्तूभयोस्त्वग्घ्राणयो रसनान्नयोश्च ग्रहणमिति सिद्ध्यति । तेन प्राणादिपदैरन्येषां सङ्गृहीतत्वेन, चक्षुःश्रोत्रमनसां च कण्ठत उक्तत्वेनैते सर्वे प्राणवाक्ये पञ्चसु निविष्टत्वात् पञ्चैव भवन्ति । अतः पञ्चजनवाक्येऽपि पञ्चजनपदेनैत एव सङ्गृह्यन्ते । अतिरिच्यते परमाकाशः । स च भूतत्वादिविधया पृथिव्यादीनां भूतानां तद्गुणानां च सङ्ग्राहक इति तेषां सर्वे ब्रह्मणि प्रतिष्ठितत्वकथनात् प्राणवाक्ये च तत्प्रवर्तकत्वकथनाज्जीवे तादृशत्वाभावेन वाक्यद्वयेऽपि भगवन्माहात्म्यमेव स्फुरतीति ब्रह्मवाक्यत्वमेतयोरविवादमित्यर्थः । एतेन बुद्धिवृत्तिजनकत्वं चक्षुःश्रोत्रमनसामेव, न तु प्राणान्नयोरतः कथं प्राणादीनां पञ्चजनत्वमित्याशङ्कापि निरस्ता । केवलानां चक्षुरादीनां न तथात्वमपि तु कर्णगोलकादियुक्तानाम् । अतस्तद्विशिष्टानामेव पञ्चजनत्वमिति बोधनात् । किञ्चात्रैव ब्रह्मणि सर्वप्रतिष्ठासिद्ध्या पञ्चसंख्यादीनामपि न नितात्पर्यकत्वम् । परोक्षवादत्वाच्चैव श्रुतिरिति सर्वं सुस्थम् । तदेतदभिसन्धायाहुः । * तस्मादित्यादि * ।

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥

काण्वपाठे, अन्नस्यान्नमिति नास्ति, तदा कथं पञ्च ? तत्राह।

एवञ्चात्र पञ्चजनपदे योग आदृतः।

शङ्कराचार्यास्तु, ते वा एते पञ्च ब्रह्मपुरुषा इत्यत्र पञ्चसु प्राणेषु प्रयुक्तत्वात् प्राणो हि पिता प्राणो मातेत्यत्रापि पित्रादिरूपेण प्राणस्यैवोक्तत्वाच्च जनसम्बन्धेन प्राणादीनां जनशब्दभाक्त्वे सिद्धे दिक्संख्येति संज्ञासमासबलात् पञ्चजनेतिसमुदायस्यापि प्राणादिषु रूढत्वमविरुद्धमित्याहुः। तच्चिन्त्यम्। ते वा एत इति श्रुतौ जनवचनस्य पुरुषपदस्य प्राणापानादिषु प्रयुक्तत्वेनान्येषु रूढ्यभावात् समुदायस्यापि तत्रैवं रूढिसिद्ध्या वाक्यशेषोक्तेषु चक्षुरादिषु पञ्चजनशब्दस्य रूढेर्दूरनिरस्तत्वात्। नच प्राणापानादय एव पञ्चजनाः सन्त्विति वाच्यम्। तथा सति प्राणा इति बहुवचनेनैव चारितार्थ्ये आदय इत्यस्य वैयर्थ्यप्रसङ्गात्। त्वन्मतेऽपि वाक्यशेषगता विपश्यन्त इति कथनविरोधप्रसङ्गाच्चेति। समुदायशब्दार्थेऽवयवार्थस्याभावेन जनशब्दस्य तत्रानर्थकतया तेन तदुपपादनस्याशक्यत्वादित्यन्ये।

यदपि, देवाः पितरो गन्धर्वा असुरा रक्षांसि वा निषादपञ्चमाश्चत्वारो वर्णा वा यत् पाञ्चजन्यया विशेति प्रजापरः पञ्चजनशब्द इति तत्परिग्रहेऽपि न दोषः। आचार्येण तु, न तत्त्वानामिह प्रतीतिरस्तीत्येतावन्मात्राभिप्रायेण वाक्यशेषोक्तमादृतमित्याहुः। तदपि स्वप्रज्ञाविलसितमात्रम्। पूर्वोक्तपक्षद्वयोपगमे सर्वाधारत्वरूपब्रह्ममाहात्म्यासिद्ध्या पञ्चसंख्याया निस्तात्पर्यकत्वप्रसङ्गस्य दुर्वारत्वात्। वाक्यशेषानादरे खलेकपोतिकावत् सर्वपक्षापातेन वाक्यार्थनिर्णयाभावप्रसङ्गाच्च। वाक्यशेषस्यानिर्णायकत्वेन न्यायचर्यावैयर्थ्यापत्तेश्च।

अन्ये तु वाक्यशेषबलादेव पञ्चजनशब्दस्य प्राणादिषु रूढिमाहुः। तत् पूर्वोक्तपक्षापेक्षया सम्यगपि वाक्यशेषस्य वराहं गावोऽनुधावन्तीत्यादौ नियामकत्वेन शक्तिग्राहकत्वदर्शनात्तियमस्य च प्रसिद्धप्रयुक्तरशक्तिसापेक्षत्वात् प्रकृते च प्रसिद्ध्यभावाच्चिन्त्यम्। तस्माद् योग एव साधीयानिति दिक् ॥ १२ ॥

ज्योतिषा संख्यापूर्तिस्तेषाम् । यस्मादर्वाक् संवत्सर इति पूर्वं पठितो मन्त्रः । तत्र तद्देवा ज्योतिषां ज्योतिरिति । अन्नस्थाने ज्योतिर्ग्राह्यम् । व्याख्यानं पूर्वमेव । तस्मादसिद्धं तन्मतस्य श्रुतिमूलत्वम् ॥ १३ ॥

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ १४ ॥

श्रुतिविप्रतिषेधात् स्मृतिरेव ग्राह्येति मतं दूरीकर्तुं श्रुतिविप्रतिषेधो नास्तीत्यधिकरणमारभते । तत्र श्रुतौ सृष्टिभेदा बहवः । क्वचिदाकाशादिका । आत्मन आकाशः सम्भूत इति । क्वचित् तेजःप्रभृतिका । तत् तेजोऽसृजतेति । क्वचिदन्यथैव । एतस्माज्जायते

ज्योतिषैकेषामसत्यन्ने ॥ * व्याख्यानं पूर्वमेवेति * ज्योतिषा तेजोवाची ग्रहीतव्ये । मनसोऽन्नमयत्वेन मनसाऽन्नाभूरसना ग्राह्या। चक्षुषैकं चक्षुरेव ग्राह्यमित्येवं पूर्वोक्तरीतिकमेवेत्यर्थः । ननु काण्वमाध्यन्दिनपाठविरोधादिह वाक्यशेषगतप्राणादिग्रहणं न युक्तम् । विकल्पापादकत्वादिति चेन्न । तुल्यबलतया षोडशिग्रहणाग्रहणवत् श्रुत्यभिप्रेतत्वेन विकल्पस्यादुष्टत्वात् । नच तत्रातिरात्रयागे व्यक्तिभेदेन ग्रहणाग्रहणयोरुपपत्तिवत् प्रकृते ग्रहणपक्षत्वेन ग्राह्याणां प्राणादीनामन्यान्यत्वेन युगपद् ग्रहीतुमशक्तिरिति शङ्क्यम् । प्रकृतेऽपि तेषामेव सत्त्वेन ग्राहकशब्दमात्रभेदस्य तत्तत्पाठकरूपाधिकारिभेदाद् ग्रहीतुं शक्यतया सुखेनैवोपपत्तेरिति । भाष्यं तु निगदव्याख्यातमेवेति शुभम् ॥ १३ ॥ ३ ॥

कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः ॥ ननु पूर्वाधिकरणैः सांख्यमतस्य श्रौतत्वे निराकृते पुनरस्य किं प्रयोजनमित्याकाङ्क्षायामधिकरणप्रयोजनमाहुः । * श्रुतेरित्यादि * । स्मृतिरिति * सांख्यस्मृतिः । * मतमिति * सांख्यानांमतम् । * नास्तीतीति * इति बोधनाय । विप्रतिषेधकं विषयमाहुः । * तत्रेत्यादि * । * असृजतेत्यन्तम् * । * अन्यथैवेति * युगपत् साक्षात् । सन्देहस्तु एकस्यां सृष्टौ एकस्यायामेवं विप्रतिपिद्धनानाप्रकारकथनेन तदनिर्णायकं

माण इति । इदꣳ सर्वमसृजतेति च । एवं क्रमव्युत्क्रमानेकविधसृष्टिप्रतिपादकत्वाद् वस्तुनो द्वैरूप्यासम्भवाद्, ब्रह्मात्वा अनु प्रजापशवः प्रजायन्त इतिवत् सृष्टिवाक्यानामर्थवादत्वेन ब्रह्मस्वरूपज्ञानार्थत्वादध्यारोपापवादन्यायेन न वेदान्तब्रह्मकारणत्वं सिद्ध्यति । अतः परिदृश्यमानजगता कारणान्वेषणेक्रियमाणे बाह्याबाह्यमतभेदेषु सत्सु कपिलस्य भगवज्ज्ञानांऽशावतारत्वात् तन्मतप्रकारेणैव जगद्व्यवस्थाचितेत्येवं प्राप्ते, उच्यते । न सृष्टिभेदेषु ब्रह्मणः कारणत्वे विप्रतिपत्तिः । सर्वप्रकारेषु तस्यैव कारणत्वोक्तेः । आकाशादिषु कारणत्वेन ब्रह्म यथा व्यपदिष्टमेवैकत्र, अन्यत्रापि तदेव कारणत्वेनोक्तम् । न तस्य कार्यं करणं च विद्यत

श्रुतिं विहायैकप्रकारनिर्णायिका स्मृतिरेवादर्तव्या ? उत विप्रतिषेधं परिहृत्य सर्वस्मृत्युपजीव्या श्रुतिरेवादरणीयेति । अनिर्णायकत्वमुपजीव्यता च सन्देहबीजम् । तत्र संशयस्य पूर्वपक्षयुक्तिभिरेवावगमात् तमनुक्त्वा पूर्वपक्षमेवाहुः । * एवमित्यादि * क्रमव्युत्क्रमेति * नानाविधक्रमैर्नानाविधव्युत्क्रमैश्चेत्यर्थः । सृष्टिवाक्यानीतिपाठे स्वर्थवादत्वेनेत्यस्याग्रे, ब्राह्मणीति शेषो बोध्यः । शेषं स्फुटम् । एतत्समाधिं व्याकुर्वते * न सृष्टीत्यादि * । अयमर्थः । श्रुतयो हि ब्रह्मणस्तन्माहात्म्यस्य च बोधनार्थं प्रवृत्ताः । बन्दिनस्तत्पराक्रमैरिति श्रीभागवते वेदस्तुतौ वाक्यात् । तत्रापि माहात्म्यमेव मुख्यम् । बोधनद्वारत्वात् । नचाध्यारोपापवादन्यायाद्दरे ब्रह्मस्वरूपप्रतिपत्तिः । उन्मत्तादिप्रलाप इव तत्रापि वाक्ये अप्रामाण्यस्य, श्रुतौ च प्रतारकत्वस्य स्फूर्त्या विश्वासनाशप्रसङ्गात् । अतस्तस्य न्यायस्यानादरे कारणस्य सिद्धौ न सृष्टिप्रभेदेषु ब्रह्मणः कारणत्वे विप्रतिपत्तिः । सर्वप्रकारेषु कारणत्वोक्तेः । तदेतदाह । कारणत्वेन चाकाशादिष्विति । आकाशतेजःप्रभृतिषु क्रमिकेषु प्राणादिषु चाक्रमिकेषु कार्येषु कारणत्वेन यथाव्यपदिष्टोक्तेः । एकत्र यथैव सर्वज्ञत्वसर्वेश्वरत्वसर्वात्मत्वैकत्वाद्वितीयत्वसच्चिदानन्दरूपत्वादिधर्मवत्तया कारणत्वेन व्यपदिष्टमेवमन्यत्रापि तदेव कारणत्वेनोक्तं, तस्मा-

इत्यादिनिराकरणन्तु लौकिककर्तृत्वनिषेधपरम् । तस्यैव प्रतीतेः । सर्ववैलक्षण्यार्थं वैदिकानामबाधितार्थैकवाक्यत्वस्याभिप्रेतत्वादिति चकारार्थः । कार्यप्रकारे भेदस्तु माहात्म्यज्ञापको न तु बाधकः । बहुधा कृतिसामर्थ्यं लोकेऽपि माहात्म्यसूचकमिति । तस्मान्न श्रुतिविप्रतिषेधात् स्मृतिपरिग्रह इति सिद्धम् ॥ १४ ॥

समाकर्षात् ॥ १५ ॥

पुनरन्यथाशङ्क्य परिहरति । ननु क्वचिदसद्वा इदमग्र आसीदिति । क्वचित्, सदेव सौम्येदमग्र आसीत् । तद्धैक आहुरसदेवेदमग्र आसीत् । अव्याकृतमासीत् । नासदासीन्नो सदासीत् तम आसीदित्यादिवाक्येषु ब्रह्मणोऽपि विगानं श्रूयते । तद्धैक आहुरितिवत् पक्षान्तरं सम्भवति । न ह्यसत्तमःशब्दैर्ब्रह्म प्रतिपादयितुं

दिति । नच, न तस्य कार्यमिति निषेधश्रुतिव्याकोपः । तस्य लौकिककर्तृत्वनिषेधपरत्वात् । निषेधकवाक्योत्तरार्द्धे स्वाभाविकी ज्ञानबलक्रिया चेति स्वाभाविकक्रियासद्भावप्रतिपादनात् । द्वितीयपादे समाऽभ्यधिकनिषेधाच्च । कार्यकारणसापेक्षलौकिककर्तृत्वनिषेधस्यैव प्रतीतेरिति । चकारसूचितं हेत्वन्तरमाहुः । * सर्ववैलक्षण्येत्यादि * । * वैदिकानामिति * पदवाक्यानाम् । सिद्धमाहुः । * तस्मादित्यादि * उक्तरीतौ कस्या अपि श्रुतेर्व्याकोपाभावात् तथेत्यर्थः ॥ १४ ॥ ४ ॥

समाकर्षात् ॥ सूत्रमवतारयन्ति * पुनरित्यादि * । प्रकारान्तरेण श्रुतिविप्रतिषेधमाशङ्क्य परिहरतीत्यर्थः । अत्रापि संशयस्तद्बीजं च पूर्ववदेव । एकस्य ब्रह्मणः कारणत्वे वक्तव्ये नानाशब्दानां कारणे प्रयोगादनिर्णायिकां श्रुतिं विहायेत्येतावान् विशेषः । पूर्वपक्षमाहुः । * ननु क्वचिदित्यादि * । * विगानमिति * विरुद्धं गानम् । कै गै शब्दे । विरुद्धः शब्दः कारणान्तरबुद्ध्युल्लासकः । कर्मपादिति । यथा, मलधद्रासससोऽन्नं नाद्यादिति निषि-

शक्यते । असन्नेव स भवतीति बाधात् । आदित्यवर्णं तमसः परस्तादिति च । तस्मात् कारणत्वेनापि श्रुतिविप्रतिषेधाद् ब्रह्म कारणं नेत्येवं प्राप्ते उच्यते । समाकर्षात् । आकृष्यते स्वस्थानाच्च्याव्यत इत्याकर्षः । सर्वेष्वेतेषु वाक्येषु असदादिपदानां न निरात्मकत्वाद्यर्था उच्यन्ते । किन्तु वैलक्षण्येन । सर्वशब्दवाच्यत्वं च सिद्धं ब्रह्मणः । यथा को अद्धा वेद । क इह प्रावोचत् । सर्वे वेदा यत् पदमामनन्ति । यतो वाचो निवर्तन्ते । मनसैवानुद्रष्टव्य इत्यादि सर्वे विरुद्धधर्मा भगवत्युच्यन्ते । एवमनेकविरुद्धशब्दवाच्य-

---

द्भ्य, अथो खल्वाहुरभ्यञ्जनं वा च स्त्रिया अन्नमभ्यञ्जनमेव न प्रतिगृह्यं कामनयान्यदिति पक्षान्तरं कर्मविशेष उक्तं, तद्वत् । * तमसः परस्तादिति * असन्नेवेत्यत्र यथा वेत्तृनिन्दया बाध एवमत्र तमःपरत्वकथनेन बाधादित्यर्थः । * तस्मादिति * अव्याकृतपदेनाव्यक्तस्य प्रधानस्य ग्रहीतुं शक्यत्वात् । श्रुतौ पक्षान्तरस्याप्यङ्गीकारादसदादिशब्दैर्ब्रह्मणः प्रतिपादयितुमशक्यत्वाच्च । शेषमतिरोहितार्थम् । अत्र समाधानं सूत्रकथनपूर्वकं व्याचक्षते * आकृष्यत इत्यादि * कारणत्वेनेति पूर्वस्मादनुवर्तते । कारणत्वेन ब्रह्मैवादरणीयम् । अतो नात्र श्रुतिविप्रतिषेधः । कुतः ? । समाकर्षात् । आकर्षत इत्याकर्षः । समीचीनो निश्चायनार्थं आकर्षः समाकर्षस्तस्मात् । सामीचीन्यं व्युत्पादयन्ति * सर्वेष्वित्यादि * । * किन्तु वैलक्षण्येनेति * एकश्रुत्युक्तरूपविलक्षणरूपान्तरमभिप्रेत्य श्रुत्यन्तरे तस्य तस्य शब्दस्य स्वार्थात् प्रच्यावनं कृत्वा तत्तद्रूपविशिष्टं ब्रह्मैवोच्यते । नच लक्षणापत्तिः । यतः सर्वशब्दवाच्यत्वमपि सिद्धं ब्रह्मणः । तदप्युपपादितं तल्लिङ्गाद्यधिकरणेषु । नच सर्वत्र ब्रह्मण एव कारणत्वे वक्तव्ये विरुद्धशब्दप्रयोगस्य किं प्रयोजनमिति शङ्कयम् । यथा को अद्धा वेदेत्यत्र सृष्टिकर्तृविषयकमज्ञानं, सर्वे वेदा इत्यत्र साधनैस्तज्ज्ञानं, यतो वाच इत्यत्र वागाद्यप्राप्यत्वं, मनसेत्यत्र तत्प्राप्यत्वमित्येवं ब्रह्मणि विरुद्धा धर्मास्तत्र तत्र ते ते उच्यन्त एवमनेकविरु-

एवं लोकप्रसिद्धतादृशार्थात् समाकर्षादवगम्यते । तं यथा यथोपासते यथा भवतीति फलज्ञापनार्थमसत्त्वेन स भवतीति । यथा कंसादीनां मारकः । तद्धैक आहुरित्यत्र सर्वप्रपञ्चवैलक्षण्यम् । प्रपञ्चरूपोऽपि स इति प्रथमः पक्षः । अव्याकृतमसत्पक्षेण तुल्यम् । नासदासीदिति मनस्तदपि ब्रह्म, तम आसीदित्यनभिव्यक्तम् । कर्मणोऽपि भगवत्त्वात् । पूर्वकाण्डेऽपि तस्मादेव सृष्टिः । न हि तमस्तः स्वेन गूढत्वं लोके सम्भवति । अतः क्वचिद् विलक्षणात् क्वचिदविलक्षणाद् ब्रह्मणो जगत् । भगवत्त्वादेव स्वयं कर्तृकता च । सम्भवति चैकवाक्यत्वे अज्ञानान्निराकरणं चायुक्तम् । तस्माच्छब्दवैलक्षण्येन श्रुतिविप्रतिषेधो वक्तुं न शक्य इति सिद्धम् ॥१५॥

असच्छब्दवाच्यत्वमपि लोकप्रसिद्धो यस्तादृशधर्मविशिष्टोऽर्थस्ततः शब्दस्य समाकर्षादवगम्यते । तस्य प्रयोजनं तु तेन तेन प्रकारेण तद्भावने तादृशतादृशफलाप्तिरिति । तत्रोदाहरणं तु कंसादीनां मारकत्वभावनाद् यथा मृत्युः । एवमसत्त्वेन भावनादसत्त्वमिति । अतस्तत्तत्फलार्थं समाकर्षे ब्रह्मणः कारणत्वमक्षुण्णमित्यर्थः । एवं सूत्रं व्याख्यायासदादिशब्दानां प्रवृत्तिनिमित्तं सिद्धान्तसिद्धं स्फुटीकुर्वन्ति * तद्धैक इत्यादि * । * प्रथमः पक्ष इति * सदेव सोम्येत्युक्तः पक्षः * असत्पक्षेण तुल्यमिति * वैलक्षण्यबोधकम् । तमःशब्देन कर्माप्युच्यते । पूर्वमनभिव्यक्तत्वादित्यभिप्रेत्याहुः । * कर्मण इत्यादि * । कर्मणस्तमःशब्दवाच्यत्वे युक्तिः * न हीत्यादि * शेषं स्फुटम् । एतेनैव यज्ञादिकारणे शिवरुद्रभगवतीयक्षादिशब्दाः प्रयुज्यन्ते अथर्वशिरःशिखासुन्दरीतापनीयगोपथब्राह्मणादिषु तत्राप्ययमेव न्यायो बोध्य इति बोधितम् ।

अन्ये तु समाकर्षादित्यस्य पूर्वकृतपरामर्शादित्यर्थमाहुः । तन्मते भिन्नशब्दप्रयोगप्रयोजनं न किमपि स्फुरति ।

माध्वास्तु भगवद्वाचिनां शब्दानां जगति समाकर्षणमर्थमाहुः । तत्रापि तथा बोध्यम् ॥ १६ ॥ ५ ॥

जगद्वाचित्वात् ॥ १६ ॥

एवं शब्दविप्रतिषेधं परिहृत्यार्थविप्रतिषेधं परिहरति । कौषीतकिब्राह्मणे बालाक्यजातशत्रुसंवादे बालाकिरजातशत्रवे ब्रह्मोपदेष्टुमागतः । आदित्यादिदक्षिणेक्षिपुरुषपर्यन्तं परिच्छिन्नब्रह्मोपासनान्युक्त्वा तथा निराकृते तमेव ज्ञानार्थमुपससाद । ततः सुप्तपुरुषसमीपमुभावागत्य ब्रह्मवाद्यं चक्रतुः ।

जगद्वाचित्वात् ॥ अधिकरणप्रयोजनमाहुः । * एवमित्यादि * । शब्दविरोधकृतो यो ब्रह्मणि कारणत्वप्रतिषेधस्तं परिहृत्य अर्थविरोधकृतं तमनेनाधिकरणेन परिहरतीत्यर्थः । विषयमाहुः । * कौषीतकीत्यादि * । गार्ग्यनामा बालाकिर्बलाकपुत्रोऽजातशत्रवे काशिराजाय ब्रह्मोपदेष्टुं स्वकीर्त्यर्थं स्वत एवागत, आदित्यचन्द्रविद्युत्स्तनयित्नुवाय्वाकाशाग्न्यप्स्वादर्शच्छायाप्रतिश्रुत्काशब्दस्वप्नशरीरदक्षिणाक्षिषु यः पुरुषस्तत्पर्यन्तं यान्युपासनान्युक्तवान्, यथा आदित्यनिष्ठपुरुषस्य बृहत्पाण्डरवासा अतिष्ठाः सर्वेषां भूतानां मूर्द्धेत्येवंगुणकोपासने अतिष्ठाः सर्वेषां मूर्द्धा भवतीति परिच्छिन्नं फलम् । तथान्यत्रापि तत्तद्गुणकोपासने तत्तत्परिच्छिन्नफलमजातशत्रुणा तस्मा उक्तमिति तादृशानि परिच्छिन्नब्रह्मोपासनानि तान्युक्त्वा ततो राज्ञा उक्तप्रकारेण तदुक्ते प्रकारे निराकृते बालाकिस्तमेव पूर्णब्रह्मज्ञानार्थमुपससाद शिष्यत्वेन समित्पाणिर्निकटे गतः । ततो राजा स्नेहेन हस्ते तं गृहीत्वा सभात उत्थाय क्वचिदेकान्ते सुप्तपुरुषसमीपमुभावागत्य, बृहत्पाण्डरवासः सोमराजन्नित्यादिभिः सम्बोधनैस्तं राजा सम्बोधयाञ्चक्रे । तदापि तं सुप्तं दृष्ट्वा यष्ट्या क्षिप्तवान् । स पुरुषस्तत एव समुत्तस्थौ । तदा राजबालाकी वक्ष्यमाणाभ्यां प्रश्नोत्तराभ्यां ब्रह्मवाद्यं चक्रतुः । तत्र, क्वैष एतद् बालाके इत्यादिके बालाकिं प्रति, पुरुषस्वप्नस्थानं, स्वप्नावस्था, तत आगमनं चेति त्रयविषयके राजप्रश्ने पुरुषपदेन जीवः प्रक्रान्तः । यदा च बालाकिस्तं न ज्ञातवांस्तदा राजैव, यत्रैष एतद् बालाके पुरुषोऽशयिष्टेत्यादिनो-

तत्र, क्वैष एतद् बालाके पुरुषोऽशयिष्टेत्यादौ जीवः प्रक्रान्तः । तस्मादेव सर्वोत्पत्तिरुक्ता । ब्रह्मणोऽप्यनुप्रवेशश्च । तत्र सन्देहः । जीव एव ब्रह्मसहितः कर्ता ? ब्रह्मैव वेति ? । तत्र जीव एव कर्ता । सर्वस्य जगतो ब्रह्मत्वादयस्तस्य धर्माः । राजत्ववद् यजमानत्ववद्वा । अस्मिन् प्रकरणे ब्रह्मोपक्रमेण जीवपर्यवसानोक्तेः । सर्वत्रैव ब्रह्मत्वेनोक्तो जीव एव कर्ता । तथा सति लोकेऽपि जीवकर्तृत्वं सहजं भवेत् । बन्धमोक्षव्यवस्था च । एवं सत्यर्थात् प्रकृतेरेव फलिष्यतीत्येवं प्राप्ते उच्यते ।

त्तरं जगाद । तत्र हिताख्यासु हृदयनिकटस्थनाडीषु जीवस्य शयनं, तत्र स्वप्नसुषुप्त्याख्यमवस्थाद्वयं, ततः पुनरत्रागमनं वदता राज्ञा तत एवाग्निविस्फुलिङ्गन्यायेनोत्पत्तिरुक्ता । ततः, स एष प्राण एव प्रज्ञात्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखेभ्यस्तद्यथा क्षुरः क्षुरधानेऽवहितो विश्वम्भरो वा विश्वम्भरकुलाय इति दृष्टान्तद्वयेन ब्रह्मणः प्रज्ञात्मप्राणाख्यस्यानुप्रवेश उक्त इति सर्वोऽपि षष्ठोऽध्यायो विषयः । सन्देहमाहुः । * तत्रेत्यादि * । पूर्वपक्षमाहुः । * तत्र जीव इत्यादि * । सर्वस्य जगतो जीव एव कर्ता । यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्मेति कर्तारं वेदितव्यत्वेनोपक्षिप्य सुप्तपुरुषनिकटगमनाद्युत्तरं तस्मादेव प्राणानां देवानां लोकानां चोत्पत्तिकथनात् । नच ब्रह्मणोऽपि कर्तृत्वम् । तदनुप्रवेशमात्रस्यैव बोधनात् । अतः साहित्यमात्रं ब्रह्मणो भवतु । नच जीवस्य कर्तृत्वे उपक्रमोक्तस्य ब्रह्मत्वस्य बृहत्त्वादीनां धर्माणां च विरोधः शङ्क्यः । यथा तुल्येऽपि सर्वत्र जीवत्वे क्वचिदेव देहे अन्यनियोजकत्वोपाधिना राजत्वं, कर्मकरणे मुख्यत्वोपाधिना यजमानत्वं चोच्यते, तथात्र प्रकृत्यभिमन्तृत्वोपाधिना तेषामप्यागन्तुकानां वक्तुं शक्यत्वात् । नचोपक्रमस्यासञ्जातविरोधत्वेन प्राबल्याद् ब्रह्मण एव कर्तृत्वं युक्तमिति शङ्क्यम् । उपसंहारस्यात्र विवरणरूपत्वेन पूर्वोक्तार्थनिर्णायकत्वादत्र ब्रह्मोपक्रमेण जीवपर्यवसानोक्तेर्ब्रह्मत्वेनोक्तो जीव कर्ता । एवमुपक्रमोपसंहारभेदस्तु सर्वत्रैवैतन्न्यायज्ञापनार्थम् । एवमत्र देह-

जगद्वाचित्वात् । एतेषां पुरुषाणां कर्ता यस्य चैतत् कर्मेत्युपक्रमे एतच्छब्देन जगदुच्यते । पुरुषशब्देन च जीवः । तज्जडजीवात्मकं जगद् ब्रह्मकर्तृकमिति हि पूर्वसिद्धम् । तदनुरोधेनात्रापि ब्रह्मपरत्वमेवोचितं, न तु सर्वविप्लवोऽश्रुतकल्पना च । अतः सुषुप्तावपि ब्रह्मण्येव लयस्तस्मादेव सर्वमिति ज्ञातव्यम् । प्राणात्मशब्दवाच्यत्वं तु पूर्वमेव सिद्धम् । तस्मान्न जीवाधिष्ठिता प्रकृतिः कारणम् ॥ १६ ॥

विशिष्टस्याभिमानिनो देहान् प्रति कर्तृत्वे बोधिते सति लोकेऽपि जीवस्य कर्तृत्वं देहसहभाव्येव भवेत् । तत्तत्कर्मणा बन्धमोक्षव्यवस्था च सुखेनोपपद्येत । एवमभिमानिनः कर्तृत्वे सिद्धे सति यो यादृगभिमानी तेन तादृक् कर्तव्यमिति नियमात् सर्वकर्तृत्वं प्रकृत्यभिमानिनः सेत्स्यति । सांख्यमते प्रकृतौ महत्तत्त्वे वा प्रतिबिम्बितस्यैवेश्वरत्वोपगमान्मलिनबुद्धौ प्रतिबिम्बितस्यैव जीवत्वात् प्रतिबिम्बस्य चाधाराधीनत्वात् । नच ब्रह्मानुप्रवेशोक्तिवैयर्थ्यम् । तस्य साक्षित्वमात्रबोधनार्थत्वात् । तत्त्वं तु, स एष इत्यैक्यविधानान्न ब्रह्मेतो भिन्नम् । अतोऽभिमानिन एव कर्तृत्वात् प्रकृतेरेव कर्तृत्वमर्थादेव फलिष्यतीत्यर्थं प्राप्ते इत्यर्थः । समाधिं व्याकुर्वन्ति * एतेषामित्यादि * । अत्रापि कारणत्वेनेत्यनुवर्तते । कारणत्वेन ब्रह्मैवादरणीयम् । नात्र जीवः कर्तृत्वेन विवक्षितः । कुतः ? । जगद्वाचित्वात् । अत्र हि बालाकिनोक्तानादित्यादीन्निराकृत्य अजातशत्रुणा, यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य चैतत् कर्म स वै वेदितव्य इति सिद्धान्तकथनोपक्रमे, एतेषामित्येतच्छब्देनादित्यमण्डलाद्युल्लेखादुपलक्षणविधया जडं जगदुच्यते । पुरुषशब्देन च जीवरूपम् । तज्जडजीवात्मकं जगद् ब्रह्मकर्तृकमिति हि पूर्वसिद्धम् । आदित्यमण्डलाद्युत्पत्तेः प्रागेव, यतो वा इमानि भूतानि जायन्ते, तत्तेजोऽसृजत, एतस्माज्जायते प्राण इत्यादिष्वादिसृष्टिबोधिकासु श्रुतिषु सिद्धम् । अत्रापि पूर्वमिन्द्रप्रतर्दनसंवादे एवमेव सिद्धम् । अतस्तदनुरोधेनात्रापि कर्तृत्वस्य ब्रह्मपरत्वमेवोचितम् । न तु पुरुषशब्देन देह-

जीवमुख्यप्राणलिङ्गादितिचेत् तद् व्याख्यातम् ॥१७॥

किञ्चिदाशङ्क्य परिहरति । नन्वत्र जीव एव प्रक्रान्तः । क्वैप एतद् वालाके पुरुषोऽशयिष्टेति । ब्रह्म त्वद्यापि न सिद्धम्—एतादृशं, नैतादृशमिति । अतः शयनोत्थानलक्षणजीवधर्मदर्शनात् तस्यैव ब्रह्मत्वं जगत्कर्तृत्वं च । तत् स्वतोऽनुपपन्नं प्रकृतौ फलिष्यति । अथवा मुख्यप्राणलिङ्गमप्यत्रास्ति । प्राण एवैकधा भवतीति सुषुप्तौ तस्यैव वृत्तिरुपलभ्यते । विद्यमानादेव सर्वोत्पत्तिप्रलयौ । स च प्रकृत्यंशोऽतो जडादेव प्रधानात् सृष्टावपि सर्वोत्पत्तिः । अतोऽस्मात् प्रकरणाज्जीवद्वारा साक्षाद्वा प्रकृतेः कार-

---

माश्रमभिप्रेत्य तत्कर्तृत्वस्य प्रकृत्यभिमानिनि सम्भवदुक्तिकत्वेन तदङ्गीकृत्य सर्वश्रुत्युपप्लवो विधेयः । नच, जायते न म्रियते वेति श्रुतेर्जीवोत्पत्तिः सिद्धान्तेऽप्यनिष्टेति जडजीवात्मकजगत्कर्तृत्वकथनमसङ्गतमिति शङ्क्यम् । सर्वे एवात्मानो व्युच्चरन्तीति श्रुत्यन्तरेण व्युच्चरणरूपाया उत्पत्तेस्तत्राप्यङ्गीकारात् । अतो जडवत् स्वरूपान्यथाभावाभावादेव, न जायत इत्युपपत्तेर्न सिद्धान्ते दोषः । नच सिद्धान्ते उपलक्षणविधावत् पूर्वपक्षे सङ्कोच इति दोषतौल्यात् साम्यं शङ्क्यम् । ब्रह्मण उपक्रमे श्रुतत्वेन तदादरस्य युक्ततया उपलक्षणविधाया अदुष्टत्वात् । प्रकृत्यभिमानिनस्त्वश्रुतत्वेन तत्कल्पने श्रुतत्यागोऽश्रुतकल्पना च स्यादिति दोषाधिक्यात् । नच ब्रह्मपदमत्र सांख्याभिमतजडब्रह्मवाचकमिति शङ्क्यम् । स्वरूपलक्षणविरोधप्रसङ्गात् । अतः सर्वश्रुत्येकवाक्यत्वायात्रापि ब्रह्मैव कार्यमिति मन्तव्यत्वात् सुषुप्तावपि ब्रह्मण्येव वागादीनामत्रोक्तानां लयः । तस्मादेव सर्वे यथायतनं विप्रतिष्ठत इति ज्ञातव्यम् । नच प्राण एव प्रज्ञात्मेत्यस्य विरोधः । ब्रह्मणि प्राणात्मशब्दवाच्यत्वस्येन्द्रप्रतर्दनसंवादे पूर्वमेव सिद्धत्वादिति । तस्मादत्र प्रकृत्यभिमानी जीवो न तत्कर्तृत्वेन सिद्ध्यतीति न तदधिष्ठिता प्रकृतिः कारणमित्यर्थः ॥ १६ ॥

जीवमुख्यप्राणलिङ्गादिति चेत् तद् व्याख्यातम् ॥ भाष्यमत

णत्वमित्येवं प्राप्ते उच्यते । तद् व्याख्यातम् । एतयोरुभयलिङ्गत्वमेव नास्तीति, आश्रयत्वादिह तद्योगादिसत्र सर्वमेव कार्यं भगवत एव, नान्यस्मादिति । अतोऽस्माद् ब्रह्मवाद एव सिद्ध्यति, न प्रकृतिवादः ॥ १७ ॥

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि
चैवमेके ॥ १८ ॥

स्वमतेन परिहारमुक्त्वा नियतधर्मवादेनापि परिहारमाह । स्वापप्रतिबोधौ जीवधर्मावेव । चक्षुरादिलयाधारत्वं प्राणस्येति । तस्मिन्नपि पक्षे अन्यार्थं तद्धर्मकीर्तनम् । भेदे हि तन्निराकरणमवश्यं कर्तव्यमिति तुशब्दः । ब्रह्मप्रतिपत्त्यर्थमेव जीवलयोद्गमौ । भूतिवैलक्षण्येन प्राणकीर्तनमाश्रयब्रह्मबोधाय । कुत एतदवगम्यते

निगदव्याख्यातमित्युपरम्यते ॥ १७ ॥

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके ॥ अत्र सांख्यमतमाचार्यदेश्यानामन्येषामप्यनुमतं न भवतीति ज्ञापनाय सूत्रप्रयोजनमाहुः । * स्वमतेनेत्यादि * नियतधर्मवादस्वरूपमाहुः । * स्वापेत्यादि * परिहारमाहुः । * तस्मिन्नित्यादि * यस्मिन् पक्ष एतयोर्जीवमुख्यप्राणधर्मत्वात् तल्लिङ्गत्वमेव, न ब्रह्मधर्मत्वं, तस्मिन्नपि तद्धर्माणां कीर्तनमन्यार्थं ब्रह्मबोधार्थम् । तथाच ब्रह्मपरिचायनाय तच्छेषत्वेनैतत्कथनान्नैतेन सांख्यमतसिद्धिरित्यर्थः । ननु सूत्रे तुशब्दादस्य पक्षस्य पूर्वस्माज्ज्यायस्त्वमेव कुतो नाद्रियत इत्याकाङ्क्षायां तोः प्रयोजनमाहुः । * भेदे हीत्यादि * एतस्य मतस्य पूर्वस्माद् भेदे यतो हेतोर्जैमिनिनापि सांख्यमतनिराकरणमवश्यं कर्तव्यमिति ज्ञापनाय तुशब्दो, न तु सिद्धान्तपक्षादस्योत्कर्षज्ञापनार्थः । गामाविश्य च भूतानीत्यादिभिर्भूतादिसर्वकार्यस्य भगवत्कार्यतयैव सिद्धत्वादिति । तर्ह्यस्मिन् पक्षे जीवप्राणयोः कथमन्यार्थत्वमित्यत उपपादयन्ति * ब्रह्मप्रतीत्यादि * । अपिचेत्यनेन सूचितं हेतुमाहुः । *

तत्राह । उपक्रमोपसंहाराभ्यामेवावगम्यते । यो वै बालाक एतेषां पुरुषाणामित्युपक्रमे मुख्यं ब्रह्मैव निर्दिष्टम् ।तज्ज्ञानेनासुरजयः। सर्वेषां भूतानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं चेति फलम् । न ह्येतद् द्वयममुख्ये सम्भवति । अपि च, प्रश्नव्याख्यानाभ्याम् । क्वैष एतद् बालाके पुरुषोऽशयिष्टेति प्रश्नः । तत्र जीवस्य ज्ञातत्वादधिकरणमेव न ज्ञातम् । यत्रैष एतद्बालाके पुरुषोऽशयिष्टेति व्याख्यानम् । न हि नाडीर्ज्ञापयितुं व्याख्याति, किन्तु प्रतिज्ञातं ब्रह्म । कथमेतदवगम्यते, नाडीव्यतिरिक्त आत्मा ज्ञाप्यत इति तत्राह । एवमेके । एके शाखिनो वाजसनेयिनः । तत्रापि दृप्तबालाकिब्राह्मणे, स होवाचाजातशत्रुर्यत्रैष एतत् सुप्तोऽभूद् य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय, य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते इत्यत्र आकाशशब्दं ब्रह्म सता सौम्य तदा सम्पन्नो भवतीति च । स्वं ह्यपीतो भवतीति च । तस्मादाधारभूतब्रह्मज्ञापनार्थत्वाज्जीवमुख्यप्राणलिङ्गात् प्रकृतिवाद इत्यसङ्गतम् ॥ १८ ॥

वाक्यान्वयात् ॥ १९ ॥

पुनर्जीवब्रह्मवादेन प्रकृतिकारणवादमाशङ्क्य निराकरोति । बृहदारण्यके चतुर्थे षष्ठे च याज्ञवल्क्यमैत्रेयीसंवादे, येनाहं नामृ-

---

उपक्रमेत्यादि * । * फलमिति * उपसंहारे निर्दिष्टं फलम् । * जीवस्य ज्ञातत्वादिति * एष इति पदेन बालाकिज्ञातपदार्थस्यैव निर्देशात् तथेत्यर्थः । शेषं स्फुटम् ॥ १८ ॥ ६ ॥

वाक्यान्वयात् ॥ अधिकरणमवतारयन्ति । * पुनर्जीवेत्यादि * विषयमाहुः । * बृहदित्यादि * भवत्याजेत्यन्तम् * । इदं वाक्य-

ता स्यां किमहं तेन कुर्यामिति विरक्तिमुक्त्वा, यदेव भगवान् वेद तदेव मे ब्रूहीति पृष्टे तामभिमुखीकृत्य, न वा अरे पत्युः कामायेत्यादिना अमृतत्वाय ज्ञानमुपदिशति । षष्ठे पुनरुपसंहारेऽप्येतावदरे खल्वमृतत्वमिति होक्त्वा याज्ञवल्क्यः प्रवव्राजेति ।

तत्र जीवस्य प्रकरणित्वं ब्रह्मणो वेति संशयः । तत्रात्मनः प्रियत्वं स्वप्रतीत्या पुत्राद्यपेक्षया बोधयञ्जीवमेवोपक्रमे आत्मत्वेन वदति । तदनु तत्र दर्शनादि विधत्ते । तेन सर्वं विदितमिति फलमाह । तत्र कथमात्मज्ञानेन सर्वज्ञानमित्याकाङ्क्षायां, ब्रह्म तं परादादित्यादिना, इदं सर्वं यदयमात्मेत्यन्तेन तस्यैव सर्वत्वमाह ।

द्वयं प्रकृतिसम्बन्धशून्यकेवलपुरुषतत्त्वज्ञानपरम् । यथार्द्रैधाग्नेरित्यारभ्य वागेवायनमित्यन्तेन नामरूपात्मकप्रपञ्चोत्पत्तिलयाधारश्रावणात् । सांख्यमते केवलस्य पुरुषस्य तथात्वाभावात् । किन्तु प्रकृतसंसृष्टतत्परम् । तेन तादृशजीवस्य प्रकरणित्वम् । जीवलिङ्गस्य भूयस्त्वात् । अथवा ब्रह्मणः प्रकरणित्वम् । अमृतस्वरूपस्य फलस्योक्तत्वादित्याशयेनाहुः । * तत्रेत्यादि * एवञ्चास्मिन्नपि सूत्रे आनुमानिकं नेत्यानुमानिकसूत्रादाकाशादिषु कारणत्वेन चेत्याकाशादिसूत्राच्चानुवर्तते । तथाच ब्रह्मण्येव वाक्यान्वयाद् ब्रह्मैव कारणत्वेन मन्तव्यं, न तु प्रकृतिविशिष्टो जीवः । सर्वश्रुतीनामेकवाक्यात् । अतो नानुमानिकसूत्रे योजनं पर्यवस्यतीत्याशयेन पूर्वपक्षमाहुः । * तत्रात्मन इत्यादि * । * स्वप्रतीत्येति * लौकिक्या स्वप्रतीत्या । * जीवमिति * प्रकृतिसंसृष्टं पुरुषम् । * तदनु तत्रेति * जीवस्यात्मत्वेन बोधनानन्तरं तद्विषयकमेव । * ब्रह्म तं परादादित्यादिनेति * । ब्रह्म तं परादाद्योऽन्यत्रात्मनो ब्रह्म वेद क्षत्त्रं तं परादादित्यादिना । अर्थस्तु—ब्रह्मक्षत्त्रादिरूपा वर्णाभिमानिनी देवता तं वक्ष्यमाणलक्षणं पुरुषं परादाज्ज्ञानापराधात् पराकुर्यात् । अपराधमाह । योऽन्यत्रात्मनो ब्रह्म वेदेति । यः पुमान् अन्यत्रात्मन आत्मनः

तदनु कथमस्मिन् सञ्ज्ञाते आत्मज्ञानं भवतीत्याकाङ्क्षायां दुन्दुभ्यादिदृष्टान्तत्रयमाह । परम्परया बाह्याभ्यन्तरभेदेन यथा महाकोलाहले दुन्दुभेर्हन्यमानस्य शब्दो गृहीतो भवति। तत्र करणं दुन्दुभिदर्शनं, दुन्दुभ्याघातदर्शनं वा । अनुमानद्वारा चित्ते तत्र निविष्टे तत्साक्षात्कारो भवतीति तथा आत्मनो बोधककार्यानुसन्धाने तत्साक्षात्कारो भवतीति । तत्र कथं सर्वत्वमित्याकाङ्क्षायां तत एवोत्पन्नं सर्वं नामरूपात्मकं तस्मिन्नेव लीयत इति । स यथेति द्वयेनाह । मध्ये स एव नातिरिक्तं विशतीति, स यथा सैन्धवघन इत्यनेनाह । आधेयत्वेन तावन्मात्रतानिराकरणायाह । न प्रेत्य संज्ञास्तीति । कार्यातिरिक्तरूपं कथयितुं न शक्यत इति तत्र विशेषाकाङ्क्षायामतिरिक्ताकथने वञ्चकत्वमाशङ्क्य तत्परिहारायाह। स होवाचेति । अविनाशीत्यनेन कार्यवैलक्षण्यं सिद्धवत्कारेणोक्त्वा विषयसबन्धेन संसारमाह । मात्रासंसर्गस्त्वस्य भवतीति । विशेषतत्त्वकथने हेतुमाह । यद्वैतमित्यादिना, यावत्समाप्ति । चक्षू रूपमेव पश्यति, नात्मानम् । ननु रूपमप्यात्मेतिचेत् । तत्रापश्यन् वै तद् द्रष्टव्यत्वेन न पश्यति । न हि द्रष्टृ स्वरूपं दृश्यज्ञानेन ज्ञातं भवत्यतद्रूपत्वात् । एवं द्रष्टृदृश्यव्यवहारे अज्ञानावस्थायां विशेषतत्त्वज्ञानमशक्यमुक्त्वा ज्ञानोत्तरं कर्मकर्तृभाव एव नास्तीत्याह । यत्र वा अन्यदिव स्यादित्यादिना। इदमेव हि ज्ञानममृतत्वमिति।

सर्वस्मादन्यद् ब्रह्मक्षत्राद्यादि वेदेति । यत्र सार्वविभक्तिकः । तथाचायमात्माभिन्नत्वेन मां पश्यतीत्यपराधात् तमात्मज्ञानरहितं कुर्यादित्यर्थः । * सर्वस्यमादेति * । इदं सर्वं यादित्यन्तमनूद्यभागः । अयमात्मेति विधेयभागः। तथाचात्मनः सर्वत्वादात्मज्ञाने सर्वज्ञानमुपपन्नमिति भावेनात्मनः सर्वरूपत्वमाहेत्यर्थः । * तदन्विति * एवं प्रतिज्ञोपपादनमुखेन तन्माहात्म्यप्रथापणानन्तरं कथमस्मिन्

सङ्घाते आत्मज्ञानं भवतीत्याकाङ्क्षायां दुन्दुभ्यादिदृष्टान्तत्रयमाह । यथा दुन्दुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयात् तद्‍ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीत इत्यादि । अर्थस्तु—यथा दुन्दुभेर्हन्यमानस्य सकाशाद् बाह्यान् अतिरिक्ताञ्छब्दान् महाकोलाहले ग्रहणाय ग्रहीतुं न शक्नुयाञ्च समर्थः पुरुषो भवेत् । किन्तु हन्यमानस्य दुन्दुभेरेव शब्दो गृहीतो भवति । तत्र करणं दुन्दुभेर्दर्शनम् । दुन्दुभ्याघातस्य वा दर्शनम् । तदेतदुक्तं, दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वेति । तथाच महाकोलाहलाभिभावके कस्मिंश्चिच्छब्दे श्रुते, कस्यायमिति जिज्ञासायां योग्यतया सजातीयशब्दान्तरेण वा कारणमनुमिनोति । एवमनुमानद्वारा चित्ते तत्र निविष्टे ततः प्रयत्नेनान्यथा वा तस्य दुन्दुभेः साक्षात्कारो भवतीति दृष्टान्तः । तथात्रात्मबुभुत्सायाम् आत्मनो बोधकानि यानि चेष्टादिरूपाणि तत्कार्याणि तेषां विचारेण चित्तेऽनुमानद्वारा आत्मानुसन्धाने तस्यात्मनोऽप्यस्मिन् सङ्घाते श्रवणादिभिः साक्षात्कारो भवतीति । अत्र प्रथमो दुन्दुभिदृष्टान्तः परम्परया ज्ञानजनने । शरीरसमवेतचेष्टया निमित्तभूतस्यात्मनो ज्ञानात् । द्वितीयस्तु बाह्याद् भेदेन ज्ञानजनने । तत्र बाह्यशब्दा रागादिभेदज्ञापकास्ते शब्दप्रयोजकं भेदस्मभेदेन *प्रत्याययन्तीति* तांस्तद्‍ग्रहणाय न शक्नुयात् । वीणाया वीणावादस्य वा ग्रहणेन तु अयमीदृशः शब्दो न केवलमङ्गुलीसंसर्गप्रयुक्तः, किन्तु मनोव्यापारविशेषप्रयुक्त इति ज्ञायते । अतः स शब्दस्तत्कारणस्य बाह्याद् भेदेन ज्ञापकतया गृहीतो भवति । तृतीयस्त्वभ्यन्तरान्मनसोऽपि भेदज्ञानजनने । तत्र बाह्याः शब्दा मन्द्रतारादयस्ते प्राणस्य न मनोभेदज्ञापकाः । शङ्खस्य शङ्खध्मस्य वा ग्रहणेन तु शब्दस्तत्कारणस्यान्तःकरणाद् भेदेन ज्ञापकतया गृहीतो भवति । मुख्यप्राणस्यायं शब्द इति । एवं सङ्घाताद् भिन्नतया सङ्घातेऽन्तरात्मज्ञाने उपायो मननात्मक उक्तः । तत्र कार्यलिङ्गमनुमानमात्मनि चित्तं निवेशयतीति सिद्धम् । तत्रात्मकार्यविवक्षयैव इतः पूर्वमात्मज्ञाने सर्वज्ञानस्योक्तत्वादात्मा सर्वत्वेन वक्तव्यः । तत्र कथमात्मनः सर्वत्वमित्याकाङ्क्षायां तत एवोत्पन्नं सर्वं तत्रैव लीयत इति घटादेः पूर्वं पश्चाच्च मृदेव सर्वस्यात्मेति बोधनाय, स यथा आर्द्रैधाग्नेरिति स यथा सर्वासामपामिति कण्डिकाद्वयेनाह । तेन

नैयायिकाद्यभिमतं निमित्तमात्रत्वं निराकृतम्। तथापि स्थितिदशायां भेददर्शनात् पूर्वोक्तं सर्वमुपचारमात्रं मंस्यत इति तन्निवारणाय मध्ये स्थितिदशायामपि स आत्मैव केवलो, नातिरिक्तं किमप्याधेयत्वेन विशतीत्यन्तर्बहिस्तस्यैवानन्तरत्वमबाह्यत्वमैकरूप्यं चाह। स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव स्यादेवं वा अरे इदं महद्भूतमनन्तमपारं कृत्स्नः प्रज्ञानघन एवेति। तर्हि सर्वदा कुतो न प्रतीयत इत्यत आह। एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति। एतानि शरीरात्मकानि महान्ति च भूतानि कार्यत्वादस्य ज्ञापकानीति तेभ्यः समुत्थाय तद्द्वारा स्वं ज्ञापयित्वा तानि विनश्यन्ति सत्स्वयमात्माऽप्यनुविनश्यत्यदर्शनं प्राप्नोतीति। तर्हि समुत्थानानुविनाशक्रियादर्शनात् कालपरिच्छिन्नो भविष्यतीत्याशङ्कायां तावन्मात्रतानिराकरणायाह। न प्रेत्य संज्ञास्तीति। प्रेत्य भूतलयोत्तर संज्ञा सम्यग् ज्ञापकं नास्ति। कार्यमेव तस्य ज्ञापकं रूपम्। अतस्तस्मिन् लीने कार्यातिरिक्तं तस्य रूपं वक्तु न शक्यत इति न ज्ञायते। न तु स एव नासीत्यतो न ज्ञायत इति। तथाच तदानीमपि विद्यमानत्वान्न स कालपरिच्छिन्न इत्यर्थः। एवमुक्ते मैत्रेय्या मोहो जातः। सा होवाच मैत्रेयी, अत्रैवमा भगवान् मोहान्तमापीपदन्न वा अहमिदं विजानामि न प्रेत्य संज्ञास्तीति। मोहान्तं मोहमध्यमापीपदद् आपादितवानसि। शेषोऽर्थः स्फुटः। एवं मैत्रेय्या उक्ते तत्र विशेषाकाङ्क्षायामतिरिक्ताकथने वञ्चकत्वमाशङ्क्य तत्परिहारायाह। स होवाचेत्यादि। स होवाच याज्ञवल्क्यः। न वा अरे मोहं ब्रवीम्यविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मा मात्रासंसर्गस्त्वस्य भवतीति। अत्र, अविनाशित्वेन स्वरूपनित्यत्वस्य, न विद्यते उच्छित्तिर्येषां तेऽनुच्छित्तयस्तादृशा धर्मा यस्येत्यनुच्छित्तिधर्मत्वेन स्वरूपधर्माणां च नित्यत्वस्य बोधनात् कार्यवैलक्षण्यं सिद्धवत्कारेणोक्त्वा विषयसम्बन्धेन संसारमाह। मात्रासंसर्गस्त्वस्य भवतीति। तथाच यद्यनित्यः स्याद् विषयसम्बन्धेन पुनः संसारः कस्य स्यादतः सोऽविनाशीत्यर्थः। यद्येवं तर्हि तद्दर्शनार्थं विशेषोऽपि वक्तव्य इत्याकाङ्क्षायां विशेषतस्तदकथने हेतुमाह। यत्र हि द्वैतमित्यादिना, यावत्समाप्ति। यद्वै तन्न पश्यति पश्यन् वै तद् द्रष्टव्यं न पश्यति। न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते अविनाशित्वात्। न तु द्वितीयमस्ति

ततोऽन्यद् विभक्तं यत् पश्येदिति । तन्न पश्यतीत्यत्रानुस्वारस्य परसवर्णः । यतश्चक्षू रूपमेव पश्यति, नात्मानमतो यद्वैतन्न पश्यतीत्यनेनात्मदर्शनाभावमनूद्य कार्यस्य कारणात्मकत्वात् । ननु रूपमप्यात्मेति कथमदर्शनमुच्यत इतिचेत् तत्राह । पश्यन् वै तद् द्रष्टव्यं न पश्यति । रूपात्मकमात्मानं पश्यन्नपि द्रष्टव्यत्वेन न पश्यतीति । तथाचेदं तस्य दर्शनाभावस्य स्वरूपं, न तु सर्वथा अविषयतया तद्दर्शनाभावरूपमित्यर्थः । ननु कथमेतदवगम्यते अस्येदमेव स्वरूपं, न सर्वथा तद्दर्शनाभावरूपमित्यतो युक्तिमाह । न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादित्यादि । दृष्टेरिति पञ्चमी । घ्राणाद् रसादित्यादिपञ्चमीप्रायपाठस्यैवाग्रे दर्शनात् । तथाच द्रष्टुरात्मनो दृष्टेश्चक्षुरिन्द्रियाद् विपरिलोपो विरुद्धः परिलोपः सर्वथा अदर्शनरूपो न विद्यते । कुतः ? । अविनाशित्वात् । स्वरूपतः स्वरूपधर्मतश्च नित्यत्वात् । तर्हि पश्यत्त्वमेव, नापश्यत्त्वं तत्राह । न त्वित्यादि । यद् द्वितीयं पश्येद् यद् दर्शनकरणमिन्द्रियं तत्तु तत आत्मनोऽन्यद् विभक्तं नास्ति । भेदे विभागे च सति द्रष्टृदृश्यभावः । स तु कार्ययो रूपचक्षुषोरेवातो रूपदर्शनम् । न तु कार्यस्य रूपस्य चक्षुषश्च कारणादात्मनो भेदो विभागो वा । अतस्तदभावाच्चक्षुः स्वकारणमात्मानं न पश्यतीत्यपश्यत्त्वम् । न हि द्रष्टुः स्वरूपं दृश्यज्ञानेन ज्ञातं भवति । अतद्रूपत्वात् । एवमग्रेऽपि बोध्यम् । एवं द्रष्टृदृश्यव्यवहारे अज्ञानावस्थायां विशेषतस्तज्ज्ञानमशक्यमुक्त्वा ज्ञानदशायां विशेषतो वक्तुं शक्यो भविष्यतीत्याकाङ्क्षायां ज्ञानोत्तरं कर्मकर्तृभाव एव नास्तीत्याह । यत्र वा अन्यदिव स्यात् तत्रान्योऽन्यत् पश्येदित्यादि । यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येदित्यादि । तथाचावस्थाद्वयेऽप्यशक्यवचनत्वाद् विशेषतो न वक्तुं शक्य इत्यर्थः । तदेतन्निगमयति । येनेदं सर्वं विजानाति तं केन विजानीयाद्, विज्ञातारमरे केन विजानीयादिति । एवमुपदिश्योक्तमुपसंहरति । उक्तानुशासनासि मैत्रेय्येतावदरे खल्वमृतत्वमिति । इदमेव हि ज्ञानं सर्वनिमित्तोपादानभूतमविनाश्येकमेव तत्त्वमित्याकारकज्ञानोत्तरं यस्मिन्निर्विषयमात्मरूपं ज्ञानं तदेवाऽमृतत्वमित्यर्थः ।

एवं विषयवाक्यं व्याख्याय पूर्वपक्षी स्वाभिप्रायमाह *

तत्रादिमध्यावसानेषु जीवप्रकरणमित्येव प्रतिभाति । तस्य ब्रह्मता जगत्कर्तृत्वमित्युत्कर्षः । न तु तस्मादन्यद् ब्रह्मत्वेन वक्तुं युक्तम् । अर्थविरोधाच्च । तस्माद् वेदे सृष्टिवाक्यानामेतन्न्यायेनान्यार्थत्वान्न ब्रह्मजगत्कारणमिति प्रकृतिवाद एव युक्त इत्येवं प्राप्ते उच्यते । वाक्यान्वयात् । इदं वाक्यं भगवत्येवान्वेति, नात्र जीवप्राधान्यगन्धोऽपि सर्वत्र भगवदन्वयेनैव जीवस्यापि प्रियत्वम् । तस्यैव सुखरूपत्वात् । सर्वोपनिषदनुरोधेनैवास्याप्यर्थस्य वक्तुमुचितत्वात् । तमेव विदित्वा अतिमृत्युमेति, आनन्दाद्ध्येव खल्वि-

---

तत्रादीत्यादि * । नन्वयमात्मा ब्रह्मेति श्रुत्यन्तरे एतस्य ब्रह्मत्वं विहितं, न तु ब्रह्मण एतदात्मत्वमतोऽस्मादात्मनो ब्रह्मणोऽतिरिक्तत्वादत्र च जगत्कर्तृत्वजगदात्मकत्वादिरूपब्रह्मलिङ्गादस्य ब्रह्मप्रकरणत्वमेवास्त्विति चेत् तत्राह * तस्य ब्रह्मेत्यादि * । तथा चाभ्यर्हितत्वात् तस्मिन्नेतद्द्वयमुत्कर्षायोच्यते । ननु किमत्र मानमिति चेत् । अन्यथाऽनुपपत्तिमेव जानीहि । एतावदरे खल्वमृतत्वमित्यनेनाऽमृतत्वस्यात्रैव नियमितत्वान्न तु तस्मादन्यद् ब्रह्मत्वेन वक्तुं युक्तम् । अर्थविरोधाच्च । ब्रह्म ह्यविकारं कथं कार्यरूपेण विकुर्यादित्यर्थविरोधादित्यर्थः । सिद्धमाह * तस्मादित्यादि * । अर्थविरोधेन ब्रह्मणः कारणताया बाधितत्वादात्मातिरिक्तब्रह्माभावाच्च वेदे सृष्टिवाक्यानामेतन्न्यायेन जीवस्तुत्यर्थत्वान्नातिरिक्तं ब्रह्म जगत्कारणमिति जीवाधिष्ठिता प्रकृतिरेव कारणम् । तेन प्रकृतिकारणवाद एव युक्त इति प्राप्ते इत्यर्थः ।

सूत्रं पठित्वा सिद्धान्तं व्याकुर्वते * इदमित्यादि * । अत्रापि कारणत्वेनेत्यनुवर्तते । कारणत्वेन ब्रह्मैवावगन्तव्यं, न जीवः । कुतः ? । वाक्यान्वयात् । वाक्ये अन्वयो वाक्यान्वयस्तस्मात् । सर्वस्मिन् वेदरूपे महावाक्ये ब्रह्मण एव कारणत्वेनानुगमदर्शनादिदमपि वाक्यं भगवत्येवान्वेति । नात्र जीवप्राधान्यगन्धोऽपि, येन

मानि भूतानि जायन्ते, सर्वं एवात्मानो व्युचरन्ति, एष ह्येवानन्द-यातीत्यादिश्रुतिसहस्रैर्निःसन्दिग्धैर्ब्रह्मणः स्वरूपं कार्यमंशाश्च प्रतिपादिता इतीदमपि वाक्यं तत्परमेवोचितम् । सर्वव्यवहारस्य तन्मूलकत्वेन पूर्वमुक्तत्वात् । विषयस्पर्शो विज्ञातृत्वमपि तस्यैव ।

प्रकृतिवाद आशङ्क्येत । नचोपक्रमे, न वा अरे इत्यादिना निरुपधिप्रियत्वेन जीवात्मन एव प्रकृतत्वात् कथं न तस्य प्राधान्यमिति शङ्क्यम् । आत्मनः प्रकृतत्वेऽपि प्रियत्वेनैव प्रकृततया स्वेन रूपेणाप्रकृतत्वात् प्रकृततावच्छेदकविचारे सर्वत्र भगवदन्वयेन जीवेऽपि तस्य सत्त्वात् तदन्वयेनैव जीवस्यापि प्रियत्वम् । प्रियत्वस्य सुखधर्मत्वाद्, यो वै भूमा तत् सुखं नाल्पे सुखमस्तीति श्रुत्या ब्रह्मण एव सुखरूपत्वादत्र प्रतीयमानस्यापि प्राधान्यस्य ब्रह्मण्येव पर्यवसानादुपक्रमाद्यपेक्षया उपपत्तेर्बलिष्ठत्वात् । किञ्चेदमवान्तरवाक्यं महावाक्याद् दुर्बलम् । तच्छेषत्वात् । महावाक्यं तूपनिषत् । ततोऽपि महावाक्यं वेदः । स तु सर्वोऽपि भगवत्परं एव । सर्वे वेदा इति श्रुतेः । वेदैश्च सर्वैरित्यादिस्मृतेश्च । उपनिषद्विचारेऽपि, तं त्वौपनिषदमिति, आत्मैवेदमग्र आसीदित्यादिवाक्यदर्शनात् तस्या अपि तत्परत्वमेव । एवमन्यत्रापि । अतः सर्वोपनिषदनुरोधेनैवास्याप्यर्थस्य वक्तुमुचितत्वात् तासु च, तमेव विदित्वा अतिमृत्युमेतीत्यवधारणदर्शनादत्रापि श्रवणादिविधीनां ब्रह्मविषयत्वमेव मन्तव्यम् । तथा अत्रोक्तं यथार्द्रैधाग्नेरित्यादिदृष्टान्तसिद्धं कारणत्वं समुद्रादिदृष्टान्तसिद्धं प्रलयाधारत्वं च तदैव सङ्गच्छेत यदा प्रियं ब्रह्मैवात्राद्रियेत । आनन्दाद्ध्येवेति सावधारणश्रुत्या तत्रैव तन्नियमनात् । नच जीव एव ब्रह्मेति युक्तम् । सर्वं एवात्मानो व्युच्चरन्तीति श्रुतिविरोधात् । अमृतत्वरूपं फलमपि तत एव । एष ह्येवानन्दयातीति सावधारणश्रुतेः । अत उदाहृतजातीयैः श्रुतिसहस्रैस्तथा प्रतिपादनादिदमपि वाक्यं ब्रह्मपरमेवोचितमित्यर्थः । ननु सत्यमेवं, तथापि मात्रासंसर्गस्त्वस्य भवतीति विषयसंसर्गस्त्वस्य भवतीति विषयसंसर्गरूपेण लिङ्गेनात्र जीव एव वक्तव्यः । अन्यथा तद्विरोधस्य दुर्वारत्वादित्यत आहुः । * सर्वेत्यादि * । * पूर्वमिति * ।

एवं सति सर्वमेव सङ्गतं भवेत्। अतो वाक्यान्वयान्न जीवपरत्वं येन प्रकृतिवादः स्यादिति ॥ १९ ॥

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ २० ॥

जीवमुख्यप्राणलिङ्गसूत्रे। तथाच जीवस्य ब्रह्माश्रितत्वाज्जीवधर्मा ब्रह्मण्युच्यन्त इति विषयस्पर्शोऽप्युपपद्यते। न त्वेतावतात्र जीववाक्यत्वम्। विज्ञातृत्वं तु ब्रह्मधर्म एव। नान्योऽस्ति द्रष्टेत्यादिश्रुतेः। स च धर्मस्तदंशत्वाज्जीवेऽपि भासत इति न तेनापि जीववाक्यत्वशङ्का। ननु यथात्र कथाधिकरणदृष्टान्तनिरूपणोत्तरं, स यथा सैन्धवघन इत्यादि श्राव्यते, तथा पूर्वस्मिन् मैत्रेयीब्राह्मणे सर्वासामपामित्याद्युत्तरं, स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद् यतो यतस्त्वाददीत लवणमेवेति श्राव्यते। खिल्यश्च शकल इति ब्रह्मांशस्तत्र प्रतीयत इतीहापि जीवपरास्त्वितिचेत् तत्राहुः। * एवं सतीत्यादि *। सर्वस्यापि व्यवहारस्य ब्रह्ममूलकत्वे सिद्धे सति यदत्रोक्तं, यत्र वा अन्यदिव स्यादित्यादिना कर्मकर्तृभावराहित्यं, तदपि, यत्रैतन्न पश्यतीत्यादिना जीवस्य स्वरूपतो धर्मतश्च नित्यत्वं प्रतिपाद्य विभक्तत्वनिषेधेनाविभागानुसन्धानदशायां द्वितीयस्य विभक्तत्वेन दर्शनं निषिद्ध्य सर्वस्यात्मभावं च बोधयित्वोक्तम्। अतस्तदपि सर्वस्य जीवजडरूपस्य वस्तुतो ब्रह्मत्वादेव सङ्गतं भवेत्। यच्च तत्रोक्तं खिल्यत्वं जीवस्य संज्ञाभावादिकं च तदपि सङ्गतं भवेत्। तत्रापि प्रियस्वरूपस्य प्रकृततावच्छेदकस्य महावाक्यशेषत्वादीनाञ्च तुल्यत्वात् तस्यापि ब्रह्मण्येव तात्पर्यादविरुद्धं भवेत्। तत्र यद्, यत्रैतन्न पश्यतीत्यादिवाक्यराहित्यं पाठभेदादिकं च तदपि मैत्रेय्या अधिकारपरीक्षार्थम्। अत एव तत्र, उक्तानुशासनासीति प्रोक्तम्। पुनरुपदेशस्य चिकीर्षितत्वात् सन्न्यस्तमपि न इह तदुभयमुक्तमतोऽर्थभेदेऽपि तात्पर्यस्यादैकार्थ्यम्। एतस्य तदर्थनिश्चायकत्वात्तस्यैव च प्राबल्यम्। तदेतद् हृदि कृत्वा सिद्धमाहुः। * अत इत्यादि ॥ १९ ॥

प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥ सूत्रमप्यवतारयन्ति *

नियतधर्मवादिनामपि मतेन प्रकृते सिद्धान्तं वक्तुं पक्षान्तराण्याह । तत्र ब्रह्मवादैकदेशिवादाः सन्ति । तत्र जीवो नाम स्वस्य भोगनिष्पत्त्यर्थं स्वांशो भगवता कृतो विस्फुलिङ्गवदित्याश्मरथ्यो मन्यते । अनादिसिद्ध एव जीवश्चैतन्यमात्रं शरीरादिसङ्घाते प्रविष्ट इति चिति तन्मात्रेण प्रवेशे च मोक्ष इति च औडुलोमिराचार्यः । काशकृत्स्नस्तु आसक्त्या विषयभोक्तृरूपं भगवत एव जीव इति तेऽपि स्वमतानुसारेणात्र परिहरन्ति । तत्र पुत्रादिप्रियसहवचनाज्जीवप्रकरणमेवैतदित्याशङ्क्य जीवोपक्रमस्यान्यत् प्रयोजनमित्याह । प्रतिज्ञासिद्धेरिति षष्ठी । तस्या लिङ्गमंशत्वाज्जीवस्य तदभेदेनोपक्रमः प्रतिज्ञासिद्धेर्लिङ्गं भवति । एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञा ।

तस्यैवाग्रे व्युत्पाद्यमानत्वात् तस्या एतत् साधकम् । यथा जीवो भगवानेवं जड इति । एवमाश्मरथ्यो मन्यते । श्रोतव्यादिविषयस्तु भगवानेव । तस्मान्नियतधर्मजीववादेऽपि न जीवोपक्रमो दोषः ॥ २० ॥

नियतेत्यादि *। अतोर्क्त प्रियत्वं जीवधर्म एवेति वादिनां मतेन मैत्रेयीब्राह्मणे प्रकृतिवादनिरासरूपं सिद्धान्तं वक्तुं सम्मत्यर्थं पक्षान्तराण्याहेत्यर्थः । * पुत्रादिप्रियसहवचनादित्यादि * पुत्रादिरूपा ये लौकिकाः प्रियास्तैः सहवचनादात्मनोऽपि लौकिकमेव प्रियत्वं प्रतीयत इति जीव एवात्रात्मनेपदेन परामृश्यते । अतो जीवप्रकरणमेवेदमित्याशङ्क्येत्यर्थः । * तदभेदेनेति * ब्रह्माभेदेन । * एकविज्ञानेन सर्वविज्ञानमिति * । मैत्रेय्यात्मनि वा अरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमिति वाक्योक्तं तत् । प्रतिज्ञासिद्धेरिदं कथं लिङ्गमित्यत आहुः * तस्यैवेत्यादि * । * तस्यैवेति * सर्वत्वस्यैव । * तस्या एतत्साधकमिति * । उपक्रमे जीवात्मकथनं प्रतिज्ञायाः साधकम् । अन्यथा एतद्व्युत्पादनकोटौ जीवस्याकथनाज्जीवज्ञाना-

उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः ॥ २१ ॥

लिङ्गमित्यनुवर्तते । यदत्र जीवोपक्रमेण भगवतः श्रवणादिकमुक्तं, तत् संसारभावादुत्क्रमिष्यतो जीवस्य लिङ्गम् । मुक्तौ जीवो भगवानेव भविष्यतीति ज्ञापकम् । अन्यथा सैव कथममृता भवेत् । इतिशब्दो हेतौ । स्त्रिया विश्वासार्थं गौणाभिप्रायैर्वैराग्यार्थं च जीवोपक्रमः कर्तव्य एवेति औडुलोमिराचार्यो मन्यते । तस्माद् भिन्नजीवपक्षेऽपि नात्र दूषणम् ॥ २१ ॥

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

भावे प्रतिज्ञा बाधिता स्यात् । कृते तूपक्रम उल्लेखे सोऽपि ब्रह्मात्स्वाद्यभिमानितया तत्र निविष्टोदतस्तथेत्यर्थः । तथा सत्यस्मिन् मते प्रतिज्ञैवास्य ब्रह्मणः प्रकरणत्वनियामिकेति ज्ञेयम् । एवमेवाग्रे मतद्वयेऽपि ॥ २० ॥

उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः ॥ एवम्भावादित्यस्य विवरणं, * संसारभावादिति * । एवं कथनस्य मुक्तिप्राप्तिलिङ्गत्वे किं गमकमित्यत आहुः । * अन्यथेत्यादि * चिद्रूपे ब्रह्मणि जीवस्य प्रवेशो हि तन्मते मोक्षः । ब्रह्म तु चिद्रूपं व्यापकमितीदानीमपि जीवस्तत्र प्रविष्टोऽस्त्येव । परं सङ्घातान्तरायेण । यथा कुसूलस्थं वस्तु गृहे । तद् यदा ततो बहिः प्रक्षिप्यते तदा गृहस्थं भवति । तथा जीवोऽपि सङ्घाताद् बहिर्भूय यदा साक्षाच्चित्संबद्धः स्यात् तदा मुच्येतेति सङ्घाताद् विरक्तत्वबोधनार्थमेव जीवोपक्रमः । सा हि मोक्षेच्छुर्विद्यां पृच्छति । तद् यदि तस्यै मोक्षयोग्यं जीवस्वरूपं न ज्ञापयेत् सैव कथममृता भवेत् । अतो, येनाहं नामृता स्यामित्यादिकं तत्कथनमेवैवं कथनस्य मुक्तिलिङ्गत्वे गमकमित्यर्थः । तदेतदाहुः । * इतिशब्द इत्यादिना * । * दूषणमिति * प्रकृतिवादापत्तिरूपं दूषणम् ॥ २१ ॥

अवस्थितेरिति काशकृत्स्नः ॥ जीवस्य ब्रह्मावस्थाविशेषत्वबो-

लिङ्गमित्येव । भगवत एवावस्था जीव इति । अतः संसारदशायामपि जीवो ब्रह्मेति नात्रोत्क्रमणमुपचारो वा । अन्यथा कथमात्मनस्तु कामाय सर्वं प्रियं भवतीति । न ह्यन्यस्य सर्वं प्रियं भवति । मोक्षस्तु ज्ञानमेव । उत्तरत्र कर्तव्याभावात् । अवस्थया व्यवसायात् सिद्धान्ताद्विशेषः । इतिशब्देनैतावदरे खल्वमृतत्वमित्युपसंहारो हेतुरस्य पक्षस्येति काशकृत्स्नो मन्यते । तस्माज्जीवोपक्रमो, भगवत एवावस्थाविशेषो जीव इत्यस्य लिङ्गम् । तस्मान्मैत्रेयीब्राह्मणेनापि जीवद्वारा प्रकृतिकारणवादासिद्धिरिति सिद्धम् ॥ २२ ॥

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ २३ ॥

एवं प्रकृतिकारणवादनिराकरणेन ब्रह्मण एव कारणत्वे सिद्धेऽप्यर्द्धजरतीयतयोभयस्थापनपक्षं परिहर्तुमधिकरणमारभते ।

धनार्थं जीवोपक्रम इत्यत्र किं गमकमित्यपेक्षायामाहुः । * अन्यथेत्यादि * यदि हि जीवस्य ब्रह्मावस्थाविशेषत्वमत्र बोधनीयं न स्यात् तदा, आत्मनस्तु कामाय सर्वं प्रियं भवतीति सर्वभोक्तृत्वमात्मनो न वदेत् । ब्रह्मातिरिक्तस्य सर्वभोक्तृत्वाभावेन सर्वस्मिन् प्रियत्वाभावात् । अतः सर्वभोक्तर्येकस्मिन्नात्मनि वक्तव्ये प्रतिनियततत्तद्विषयभोक्तारं तदवस्थाविशेषमुपक्रमे वदति । तथाच सर्वप्रियत्ववाक्यमेव तद्गमकमित्यर्थः । येनाहं नामृतास्यामिति मोक्षार्थं प्रश्नात् तत्रानुत्तरे तदपूर्तिरित्याशङ्कायां तन्मतेन समाधिमाहुः । * मोक्ष इत्यादि * । * सिद्धान्ताद् विशेष इति * सिद्धान्ते स्वांशत्वेन व्यवसाय इति तथा । * अस्य पक्षस्येति * ज्ञानमेव मोक्ष इति पक्षस्य । शेषमतिरोहितार्थम् ॥ २२ ॥७ ॥

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥ अधिकरणप्रयोजनमाहुः । * एवं प्रकृतीत्यादि * । आनुमानिकाधिकरणमारभ्य वाक्या-

उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः ॥ २१ ॥

लिङ्गमित्यनुवर्तते । यदत्र जीवोपक्रमेण भगवतः श्रवणादिकमुक्तं, तत् संसारभावादुत्क्रमिष्यतो जीवस्य लिङ्गम् । मुक्तौ जीवो भगवानेव भविष्यतीति ज्ञापकम् । अन्यथा सैव कथममृता भवेत् । इतिशब्दो हेतौ । स्त्रिया विश्वासार्थं गौणाभियवैराग्यार्थं च जीवोपक्रमः कर्तव्य एवेति औडुलोमिराचार्यो मन्यते । तस्माद् भिन्नजीवपक्षेऽपि नात्र दूषणम् ॥ २१ ॥

अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

भावे प्रतिज्ञा बाधिता स्यात् । कृते तूपक्रम उल्लेखे सोऽपि ब्रह्मक्षत्त्राद्यभिमानितया तत्र निविशेदतस्तथेत्यर्थः । तथा सत्यस्मिन् मते प्रतिज्ञैवास्य ब्रह्मणः प्रकरणत्वनियामिकेति ज्ञेयम् । एवमेवाग्रे मतद्वयेऽपि ॥ २० ॥

उत्क्रमिष्यत एवम्भावादित्यौडुलोमिः ॥ एवम्भावादित्यस्य विवरणं, * संसारभावादिति * । एवं कथनस्य मुक्तिप्राप्तिलिङ्गत्वे किं गमकमित्यत आहुः । * अन्यथेत्यादि * चिद्रूपे ब्रह्मणि जीवस्य प्रवेशो हि तन्मते मोक्षः । ब्रह्म तु चिद्रूपं व्यापकमितीदानीमपि जीवस्तत्र प्रविष्टोऽस्त्येव । परं सङ्घातान्तरायेण । यथा कुसूलस्थं वस्तु गृहे । तद् यदा ततो बहिः प्रक्षिप्यते तदा गृहस्थं भवति । तथा जीवोऽपि सङ्घाताद् बहिर्भूय यदा साक्षाच्चित्संबद्धः स्यात् तदा मुच्येतेति सङ्घाताद् भिन्नत्वबोधनार्थमेव जीवोपक्रमः । सा हि मोक्षेच्छुर्विधां पृच्छति । तद् यदि तस्यै मोक्षयोग्यं जीवस्वरूपं न ज्ञापयेत् सैव कथममृता भवेत् । अतो, येनाहं नामृता स्यामित्यादिकं तद्वाक्यमेवैवं कथनस्य मुक्तिलिङ्गत्वे गमकमित्यर्थः । तदेतदाहुः । * इतिशब्द इत्यादिना * । * दूषणमिति * प्रकृतिवादापत्तिरूपं दूषणम् ॥ २१ ॥

अवस्थितेरिति काशकृत्स्नः ॥ जीवस्य ब्रह्मावस्थायिदीपत्वबो-

लिङ्गमित्येव। भगवत एवावस्था जीव इति। अतः संसारदशायामपि जीवो ब्रह्मेति नात्रोत्क्रमणमुपचारो वा। अन्यथा कथमात्मनस्तु कामाय सर्वं प्रियं भवतीति। न ह्यन्यस्य सर्वं प्रियं भवति। मोक्षस्तु ज्ञानमेव। उत्तरत्र कर्तव्याभावात्। अन्नस्यया व्यवसायात् सिद्धान्ताद्विशेषः। इतिशब्देनैतावदरे खल्वमृतत्वमित्युपसंहारो हेतुरस्य पक्षस्येति काशकृत्स्नो मन्यते। तस्माज्जीवोपक्रमो, भगवत एवावस्थाविशेषो जीव इत्यस्य लिङ्गम्। तस्मान्मैत्रेयीब्राह्मणेनापि जीवद्वारा प्रकृतिकारणवादासिद्धिरिति सिद्धम्॥ २२॥

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्॥ २३॥

एवं प्रकृतिकारणवादनिराकरणेन ब्रह्मण एव कारणत्वे सिद्धेऽप्यर्द्धजरतीयतयोभयस्थापनपक्षं परिहर्तुमधिकरणमारभते।

धनार्थं जीवोपक्रम इत्यत्र किं गमकमित्यपेक्षायामाहुः। * अन्यथेत्यादि * यदि हि जीवस्य ब्रह्मावस्थाविशेषत्वमत्र बोधनीयं न स्यात्, तदा, आत्मनस्तु कामाय सर्वं प्रियं भवतीति सर्वभोक्तृत्वमात्मनो न वदेत्। ब्रह्मातिरिक्तस्य सर्वभोक्तृत्वाभावेन सर्वस्मिन् प्रियत्वाभावात्। अतः सर्वभोक्तर्येकस्मिन्नात्मनि वक्तव्ये प्रतिनियततत्तद्विषयभोक्तारं तदवस्थाविशेषमुपक्रमे वदति। तथाच सर्वप्रियत्ववाक्यमेव तद्गमकमित्यर्थः। येनाहं नामृतास्यामिति मोक्षार्थं प्रश्नात् तत्रानुत्तरे तदपूर्तिरित्याशङ्कायां तन्मतेन समाधिमाहुः। * मोक्ष इत्यादि *। * सिद्धान्ताद् विशेष इति * सिद्धान्ते त्वंशत्वेन व्यवसाय इति तथा। * अस्य पक्षस्येति * ज्ञानमेव मोक्ष इति पक्षस्य। शेषमतिरोहितार्थम्॥ २२॥७॥

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्॥ अधिकरणप्रयोजनमाहुः। * एवं प्रकृतीत्यादि *। आनुमानिकाधिकरणमारभ्य वाक्या-

न्वयाधिकरणान्तमन्थे आद्यैस्त्रिभिः सांख्यमतस्याशब्दत्वसाधनात् प्रकृतिकारणवादनिराकरणेन, यथाव्यपदिष्टाद्यधिकरणत्रये श्रुतिविप्रतिषेधपरिहाराद्, वाक्यान्वयाधिकरणे जीवब्रह्मवादनिराकरणात् पुरुषच्छायायुक्तप्रकृतिकारणवादनिराकरणेन ब्रह्मण एव जगत्कारणत्वे सिद्धेऽपि ब्रह्मणो निर्विकारत्वात् कार्ये त्रिगुणात्मकत्वादिदर्शनाच्च ब्रह्मणो निमित्तत्वं, स्मृतिसिद्धस्य प्रधानस्य समवायित्वमित्युपेयम । यदि च श्रौत एवाग्रहस्तदाऽपि श्वेताश्वतरादावजावाक्यस्याजापदस्य छागीशरीराभिधायकत्वाच्छागीशरीरं यथा तदधिष्ठातृशारीरात्मशक्तिविषया नानाप्रजाजनकं, तथा सांख्योक्तं प्रधानमपीश्वरोपाधिभूतं सप्तानाविधप्रजाजनकमित्येतमर्थं रूपकातिशयोक्त्या बोधयितुं शक्नोति । यदि चेदं नोपेयते तदापि, 'यस्तन्तुनाभ इव तन्तुभिः प्रधानजैः स्वभावतो देव एकः समावृणोति स नो दधातु ब्रह्माऽव्ययमिति तत्रत्यवाक्यान्तरे तन्तुनाभशरीरस्य दृष्टान्तितत्वेन तन्तूनां प्रधानजत्वकथनेन च ईश्वरशरीरात्मकप्रधानांशैः शरीरैर्जीवानावृणोतीति सिद्ध्यति । अत एव, कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इत्यपि क्वचिदुच्यते तेन शुद्धसत्त्वात्मिका ईश्वरोपाधिः । रजस्तमोमिश्रमलिनसत्त्वात्मिका जीवोपाधिरित्युपाधिविभागोऽपि युज्यते । अत ईश्वराऽधिष्ठिता तच्छरीरभूता प्रकृतिरपि कारणम् । नच सा प्रथमकार्यरूपेति युक्तम् । चूलिकोपनिषदि, 'विकारजननीं मायामष्टरूपामजां ध्रुवाम् । ध्यायतेऽध्यासितां तेन तन्यते प्रेर्यते पुनः । सूयते पुरुषार्थाय तेनैवाधिष्ठिता जगत् । गौरनाद्यन्तवती जनित्री भूतभाविनीति'श्रावणेन तद्विरोधात् । नच माया काचिदतिरिक्तेति वाच्यम् । विकारजननीमित्यनेन षोडशविकारजनकत्वस्य, अष्टरूपामित्यनेन प्रकृतिप्रकृतिविकृतिभेदनाष्टरूपत्वस्य प्रकृतिधर्मस्य तस्यां श्रावणेन, श्वेताश्वतरे मायां तु प्रकृतिं विद्यादिति श्रावणेन, गीतायामपि, दैवी ह्येषा गुणमयी मम मायेति, सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवा इति स्मरणेन च मायाशब्दस्य पर्यायतायामेव पर्यवसानात् । श्वेताश्वतरे, कालः स्वभावो नियतिर्यदृच्छा भूतानि योनिः पुरुष इति चिन्त्यमिति सर्वान् वादानपास्य, ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामिति परमेश्वरशक्तेः स्वगुणनिगूढत्वश्रावणान्मैत्रायणी-

ननु ब्रह्मकारणतां न निराकुर्मः श्रुतिसिद्धत्वात् । किन्तु समवायिकारणं प्रकृतिरेव । कार्यकारणयोर्वैलक्षण्यात् । समवायिकारणानुरोधि हि कार्यम् । अन्यत् सर्वं भगवानस्तु । अपेक्ष्यते च समवायिनिमित्तयोर्भेदः । कर्मण्यपि श्रुतिस्मृतिसमवायो धर्मे । एवं ब्रह्मवादेऽपि स्मृत्युक्ता प्रकृतिः समवायि कारणम् ।

योपनिषदि च, तमो वा इदमग्र आसीदेकं तत्परे स्यात् तत्परेणेरितं विषमत्वं प्रयात्येतद्रूपं वै रजस्तद्रजः सम्प्रेरितं विषमत्वं प्रयात्येतद्वै सत्त्वस्य रूपमिति श्रावणाद् गुणा अपि सत्त्वादय एव ग्राह्याः । अतः पूर्वोक्तन्यायैः सिद्धेऽपि ब्रह्मणः कारणत्वे शरीराख्यशक्तिरूपां तां विना कारणतानिर्वाहाभावादर्द्धजरतीयतया मायायाः समवायित्वं, ब्रह्मणो निमित्तत्वमित्युभयकारणत्वस्थापनपक्षपरिहारः प्रयोजनमित्यर्थः । एवं सति श्रुत्युक्तत्वाविशेषात् समवायिकारणं, प्रकृतिर्निमित्तकारणं ब्रह्म ? उत सर्वविधं कारणं ब्रह्मेति संशयः। स च प्रयोजनकथनादर्थादेव लभ्यते इत्यतो नोक्तः । पूर्वपक्षमाहुः । * नन्वित्यादि * । कार्यकारणयोर्वैलक्षण्यं व्युत्पादयति । * समवायीत्यादि * । तथाच कार्येषु क्वचिद् रजसः, क्वचित् तमसः, क्वचित् त्रयाणामपि गुणानां प्रकाशप्रवृत्तिनियमादिभिरनुवृत्तिदर्शनाद्ध्येयत्वतुच्छत्वादेर्दर्शनाच्च कार्यमात्रं प्रकृत्यनुरोधीत्यतः प्रकृतिरेव समवायिकारणमित्यर्थः । ननु सत्तायाः सर्वत्रानुवृत्तिदर्शनाद् ब्रह्मणोऽपि समवायित्वमस्तु, किं बाधकमित्यत आह । * अपेक्ष्यते चेत्यादि * । यदि हि भगवतः समवायित्वं स्यात् तद्गुणा अपहतपाप्मत्वादयः स्वरूपधर्माः सच्चिदानन्दाश्चानुवर्तेरन् । नचात्र भगवत्सत्तानुवर्तते । प्रतीयमानायास्तस्या भावविकारत्वेन ब्रह्मधर्मत्वाभावात् । किञ्च । यदि भगवानेव समवायी निमित्तं च स्यात् सर्वं कार्यं सर्वदा स्यात् । अपेक्षितस्य सामग्रीमात्रस्य भगवद्रूपतया सत्त्वात् । नचेयं लौकिकी युक्तिर्नैवैदिकैरादरणीयेति वाच्यम् । यतः कर्मकाण्डेऽपि श्रुतिस्मृतिसमवायो धर्मोऽङ्गीक्रियते । अस्मदादिकृतेश्च निमित्तत्वम् । एवं ब्रह्मवादेऽपि स्मृत्युक्ता प्रकृतिः समवायिकारणं,

ब्रह्मनिमित्तकारणमित्येवं भाष्ये उच्यते। प्रकृतिश्च। निमित्तकारणं, समवायिकारणं च ब्रह्मैव। प्रकृतिपदप्रयोगात् स्मृतिसिद्धतृतीय-सर्वधर्मापदेशः। चकाराद्, यत्रेत्यादिसर्वसंग्रहः। कुत एतत्? प्रतिज्ञादृष्टान्तानुपरोधात्। प्रतिज्ञा, अपि वा तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवतीति। दृष्टान्तो, यथैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादित्यादि।

ब्रह्म निमित्तकारणमित्येवाङ्गीकार्यम्। नचैवं तस्याः श्रौतत्वहानिः। यथा हि ब्रह्मणोऽनुमानगम्यत्वेऽपि मुख्यतया उपनिषद एव गमयन्तीत्यौपनिषदत्वमेवं प्रकृतिं मुख्यतया स्मृतिरनुमानं च गमयतीति तस्या आनुमानिकत्वं स्मार्तत्वं चाभिलप्यत इति तावन्मात्रेण तद्वानेरभावादित्येवं भाष्ये इत्यर्थः। अत्र सिद्धान्तं वक्तुं सूत्रं व्याकुर्वन्ति। * प्रकृतिश्चेत्यादि *। ईक्षतिना ईक्षत्यादिभिर्वा कर्तृत्वेन ब्रह्म सिद्धमेवेति न तत्रेदानीं शङ्का। अतः परं लोकन्यायेन कर्तुरुपादानोपकरणसापेक्षत्वादिह तदाकाङ्क्षायां पूर्वपक्षिणा प्रकृतिरुपस्थाप्यते। सा निमित्तकारणभूता समवायिकारणभूता च प्रकृतिरत्र ब्रह्मैव। न तु ततोऽतिरिक्ता। प्रकृतिशब्दश्च स्वरूपे रूढो, मृत्प्रकृतिर्घटः कार्पासप्रकृतिः पट इत्यादिप्रयोगदर्शनात् समवायिकारणमभिधत्ते, प्रकृष्टा कृतिर्येनेति योगमहिम्ना च निमित्तम्। अतः प्रकृतिपदप्रयोगात् स्मृतिसिद्धा ये तृतीयकारणात्मका असमवायिनः सर्वे धर्माः संयोगादयस्तेषामपदेशः कथनम्। चकारात् पुराणोक्तानां, 'यत्र येन यतो यस्य यस्मै यद् यद् यथा यदा। स्यादिदं भगवान् साक्षात् प्रधानपुरुषेश्वर' इत्याधारादीनां सर्वेषां सङ्ग्रहः। तथाच जगतः सर्वविधं कारणं भगवानेवेत्यर्थः। हेतुं व्याकुर्वन्ति * प्रतिज्ञेत्यादि *। अपि वेत्युतशब्दस्यार्थः पाठान्तरं वा। प्रतिज्ञा तु नियमः। संविदागूः प्रतिज्ञानं नियमाश्रवसंश्रवा इति कोशात्। स चात्रैकविज्ञानेन सर्वविज्ञानं भवतीत्याकारको निश्चय इति तद्बोधकं वाक्यमिह वाच्यवाचकयोरभेदविवक्षया प्रतिज्ञापदेनोच्यते। एवं दृष्टान्तवाक्यमपि दृष्टान्तपदेन। दृष्टान्तस्तु श्रोतृबोधसौकर्यहेतुर्वक्तृश्रोत्रोः संप्रतिप-

प्रतिज्ञादृष्टान्तयोरनुपरोधोऽस्याधनं, तस्मात् । समवायिकारणज्ञाने हि कार्यज्ञानम् । उभयोर्ग्रहणमुपचारव्यावृत्त्यर्थम् । उपक्रमोपसंहारवत् । प्रतिज्ञामात्रत्वे अदृष्टद्वारापि भवेत् । दृष्टान्तमात्रत्वे त्वनुमानविधया स्यात् तथा सति सर्वसमानधर्मवद् ब्रह्म स्यान्न समवायिकारणम् । उभयोर्ग्रहणे तु प्रतिज्ञाया दृष्टमेव द्वारमिति समवायित्वसिद्धिः ।

त्तिविषयोरर्थः । तयोर्बोधकं चेदं वाक्यद्वयं तयोरबाधनाद्धेतोस्तथा । तथाच यदि समवायित्वं ब्रह्मणो नाद्रियेत कारकान्तरत्वं च तदिदं वाक्यद्वयं पीड्येत । अतस्तदभावादेव तथाऽभ्युपेयमित्यर्थः । तदाहुः । * समवायीत्यादि * । नन्वेकतरेणापि कार्यसिद्धेः किमित्युभयोरुक्तिरित्याकाङ्क्षायामाहुः । * उभयोरित्यादि * । यथोपक्रमोपसंहारयोरैकार्थ्येनैकस्यार्थस्य सिद्धौ न तत्रोपचार इति शङ्का, तथाच प्रतिज्ञादृष्टान्तयोरैकार्थ्येनेत्यत्र उभयोर्ग्रहणमित्यर्थः । तदेतदुपपादयन्ति । * प्रतिज्ञामात्रत्व इत्यादि * । हेतोरिति शेषः । तथाच हेतुश्चेत् प्रतिज्ञामात्रमभ्युपेयेत तदा अदृष्टा या योगजप्रत्यासत्तिस्तद्द्वाराऽप्येकविज्ञानेन सर्वज्ञानं भवेत् । यथा, 'विश्वं पश्यति दूरतः इति । अनागतमतीतं च वर्तमानमतीन्द्रियम् । विप्रकृष्टं व्यवहितं सम्यक् पश्यन्ति योगिन' इत्यादिवाक्योक्तम् । तथा सति न तेन समवायित्वसिद्धिः । यदि च दृष्टान्तमात्रं हेतुः स्यात् तदा, सर्वं वाच्यं ज्ञेयत्वात् तदेकदेशवत्, घटो वाच्यो ज्ञेयत्वात् पटवदित्यादिवत्, सर्वं सज्ज्ञेयत्वादित्यप्यनुमानं संभवतीत्यनुमानविधया स्यात् । तथा सति सर्वसमानो यो धर्मो ज्ञेयत्वादिरूपस्तद्वद् ब्रह्म स्यान्न तु समवायिकारणम् । उभयोर्ग्रहणे त्वेकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया दृष्टमेव कार्यैकदेशप्रत्यक्षमेव द्वारं समवायित्वगमकम् । यथा ह्येकस्मिन् मृत्पिण्डे मृद्विकारत्वनिश्चयोत्तरं सर्वस्मिंस्तत्सजातीये तथा ज्ञानान्मृत्तिकायां तत्समवायित्वज्ञानं तादृशैकदेशप्रत्यक्षादेव भवति, नानुमानात्, तथा प्रकृतेऽप्येकत्र सन्मयत्वे निश्चिते सर्वेषु तत्सजातीयेषु सद्विकारत्वज्ञानात् सति सर्वसमवायित्वज्ञानं तादृशप्रत्यक्षादेव भवतीति सति समवायित्वसिद्धिर्न तु स्मृतिसि-

च्छायाः प्रकृतेरित्यर्थः । ननु भवत्वेवमेकविज्ञानात् सर्वविज्ञानं, तथापि सा ब्रह्मोपाधिभूतत्वाद् ब्रह्माविनाभूता वा, ब्रह्माविभक्ता वास्तीति शरीरद्वारकं ब्रह्मण एव समवायित्वं स्वतश्च कर्तृत्वमित्येव युक्तम् । पूर्वोक्तश्रुतिभ्यः । न तु केवलस्यैव प्रकृतित्वम् । उक्तव्याकोपात् । नच सदेव सौम्येदमग्र आसीदू एकमेवाद्वितीयमित्यादिश्रुतिविरोधः । तत्र हि, सदेवेत्येवकारेणान्ययोगं व्यवच्छिद्याग्रे विवृणोत्येकमेवेति । एकशब्दश्च मुख्ये रूढः । एके मुख्यान्यकेवला इति । तथाच मुख्यं ब्रह्मैवास्तीति सिद्ध्यति, न तु तेन तदविनाभूतस्याविभक्तस्य वा शरीरस्यासिद्धिरिति तदविरोधात् । नचैकपदस्य मुख्यार्थत्वमेव, न केवलार्थत्वमित्यत्र किं गमकमिति शङ्क्यम् । सुबालोपनिषदि प्रलयप्रकरणे पृथिवीलयमारभ्याक्षरं तमसि लीयत इत्यन्तेन सर्वस्य तमसि लयमुक्त्वाऽग्रे, तमः परे देवे एकीभवति दिव्यो देव एको नारायण इति तमसो नामरूपविभागानर्हतया ब्रह्माविनाभावेनाविभक्ततया वाऽवस्थितिबोधनस्यैव गमकत्वात् । नच, लीङ् श्लेषण इति धात्वर्थादक्षरान्तानां तमसा अविभागस्तमसस्तु ब्रह्मणा स्वरूपैक्यमिति शब्दान्तरादवगम्यते, न त्वविनाभावोऽविभागो वेति वाच्यम् । अन्तर्यामिब्राह्मणे, यस्य तेजः शरीरं यस्य तमः शरीरमिति शरीरत्वेन श्रावणात्, सुबालोपनिषद्यपि, यो मृत्युमन्तरे संचरन् यस्य मृत्युः शरीरमिति मृत्युपदेन सर्वानर्थमूलतया तस्यैवोल्लेखाच्च तमसः शरीरतयैव सिद्धत्वेन स्वरूपैक्यस्य ग्रहीतुमशक्यत्वात् । तस्मात् सशरीरस्यैव प्रकृतित्वं सच्छब्दवाच्यत्वं च, न केवलस्येति चेन्नैवम् । अद्वितीयपदविरोधापत्तेः । एकमेवेति कथनोत्तरं मुख्यान्यार्थयोर्वारणार्थमेव तत्प्रयोगात् । अन्यथा तद्वैयर्थ्यस्य वज्रलेपायित्वात् । नचाद्वितीयपदेन मुख्यत्वमेव विव्रियत इति वाच्यम् । एकमेवेत्यनेनैव समाभ्यधिकराहित्ये सिद्धे व्याख्यानापेक्षाया एवाभावात् । तेनासिद्धावनेनाप्यसिद्ध्या सुतरां तदभावाच्च । एतेनैव, नान्यत् किञ्चन मिषदित्यन्तरनिषेधपरत्वमपि दत्तोत्तरम् । साक्षी चेता केवलो निर्गुणश्च, यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासन् शिव एव केवल इति सर्वभूतघति काले तद्रहिते तमोऽवशेषाङ्किते च काले ब्रह्मण एव केवलत्वश्रावणेन, यदा तमस्तत् स्वैकीभूतं तदा केवलो न शरीरीत्यर्थव्यक्तेर्द्विसंख्यापूरक

एव निषेधपर्यवसानसिद्धेश्च । नच कालोक्तिविरोधः ।तस्याः सृष्ट्युत्तरव्यवहारे सर्वाधारतया प्रतीयमानकालोपरञ्जनेन पूर्ववृत्तान्तबोधनार्थत्वात् । अन्यथा शिष्यस्य सृष्टिकालसत्वेन कालसत्तामवधारयतः पूर्ववृत्तान्तबोधनाभावप्रसङ्गात् । नच कालसत्ताबोधकत्वे किं बाधकमिति शङ्क्यम् । एतस्य सर्वतः पूर्ववृत्तान्तबोधकत्वेन तत्र च सतोऽन्यस्य व्यवच्छेदे कालावच्छेदकप्रमाणस्यापि व्यवच्छिन्नत्वादत्र कालानुवादस्य वक्तुमशक्यत्वेन स्वतन्त्रतया कालसत्ताबोधने वाक्यभेदप्रसक्तेरेव बाधकत्वात् । नचात्र कालविशिष्टसत्सत्ताबोधकत्वमिति शङ्क्यम् । गौरवप्रसङ्गात् । समानजातीये बृहदारण्यकवाक्ये, सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यदित्यनुवीक्षाश्रावणस्य बाधापत्तेश्च । तस्माच्चिदचिच्छरीरविशिष्टस्य सत्त्वाद्युपाधिकस्य घोपादानत्वाङ्गीकारे केवलाद्वितीयश्रुत्योर्विरोधो दुर्वार एव । एवञ्च, तमः परे देवे एकीभवतीति, तमो वा इदमग्र आसीदेकं तत् परे स्यादित्यादावपि य एकीभावः स परस्वरूपत्वमेव, न तु नामरूपविभागानर्हत्वमात्रमित्येवं मन्तव्यम् । लयस्य स्वेनैव रूपत्वेन विभागाभावात्मकत्वे एकीभावस्य पृथक्त्वाभावात्मकत्व एव पर्यवसानात् । नच शरीरत्वबोधकश्रुतिविरोधः । तस्याः सृष्टिकालीनवृत्तान्तपरत्वात् । अन्तर्यामिब्राह्मणे तथात्वस्य स्फुटत्वात् । सुवालोपनिषद्यपि, अन्तःशरीरे निहितो गुहायामज एको नित्य इत्युपक्रम्य पृथिव्यादिमृत्य्वन्तानां शरीरत्वकथनेन तत्रापि सृष्टिपूर्वकालाऽलाभात् । प्रलयप्रकरणस्य प्रागेव समाप्तत्वाच्च । तस्मान्नोक्तशरीरविशिष्टस्य प्रकृतित्वम् । नापि प्रधानादेर्गर्तपतितमृतसर्पादिवत् स्थितिरिति निश्चयः । एवं सति गौरनाद्यन्तवतीत्यादौ, प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपीत्यादौ च यदनादित्वादिकथनं, तच्चतुर्मुखाऽजत्रिदशाऽमरन्यायेन जगत्साधारणोत्पत्तिनाशनिषेधपरमित्येव मन्तव्यम् । 'तन्मायाफलरूपेण केवलं निर्विकल्पितम् । वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत् । तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका । ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयते'इत्यादिपुराणवाक्येभ्यश्च । तेन, यस्तन्तुनाभ इति वाक्यमपि प्रधानोत्पत्त्यनन्तरकालवृत्तान्तबोधकमेवेत्येव निश्चयः । एवैव परमाण्वादिकारणवादानामपि गतिर्बोध्या । कालः स्वभाव इतिश्रुत्यैव तेषामना-

कार्यकारणयोर्भेदाभेदमतनिराकरणाय पिण्डमणिनखनिकृन्तनग्रहणम् ।

तथा सति यत्र क्वचिद् भगवान् ज्ञातः सर्वत्र ज्ञातो भवति । सर्वं च ज्ञातं भवतीति सामान्यलक्षणप्रत्यासत्तिनिराकरणाय च, वाचारम्भणं विकारो नामधेयमिति ।

दर्शनीयत्वस्योक्तत्वादिति । तस्मात् केवलस्यैव ब्रह्मणः समवायित्वमिति निश्चयः । एवं सत्येकविज्ञानेन यत् सर्वं विज्ञातं तत्र योगजधर्मादिना, न वा अविनाभावमहिम्ना, नाप्यविभागादिमहिम्ना श्रुत्यभिप्रेतं, किन्तु दृष्टेनैव द्वारेणेति सिद्धम् । अतः परं दृष्टान्ते पिण्डादिपदग्रहणस्य प्रयोजनं विचारयन्ति * कार्यकारणयोरित्यादि * । कार्यकारणयोरभेदे त्रैलोक्यव्यवहारः सङ्कीर्येत । अत्यन्तभेदे चैकविज्ञानेन सर्वविज्ञानं बाध्येत । अतस्तयोर्भेदाभेद एवास्थेयः । दृश्यते च तथा । तन्तव एव ह्याततावितताश्च सन्तो लोके पटत्वेन व्यवह्रियन्ते, प्रावियन्ते, पटत्वजातिं च बिभ्रति । एवञ्च प्रतिज्ञादृष्टान्तयोरुभयोरप्युपपत्तिरिति मतनिराकरणाय पिण्डादित्रयग्रहणम् । यदि हि भेदाभेद आद्रियते, तदा येन रूपेण भेदस्तद्रूपं कारणज्ञानेन न ज्ञातं भवेत् । ततो भिन्नत्वात् । अथ ज्ञायते तर्हि न तद्रूपं भिन्नमित्यभेद एवास्थेयः, कृतं भेदेन । नच सर्वथा अभेदे व्यवहारसाङ्कर्यप्रसङ्गः । अवस्थाभेदादेव तन्निवृत्तेः । अतः कयाचिदवस्थयाऽवस्थितं कारणमेव कार्यं, न तु ततो भिन्नाभिन्नमिति बोधनायावस्थारूपाणां पिण्डादीनां ग्रहणमित्यर्थः । एवमङ्गीकारे गुणमाहुः * तथा सतीत्यादि * । कार्यस्यैवमवस्थाविशेषविशिष्टकारणरूपत्वे ज्ञाते सति यत्र क्वचित्कार्ये येन चिदवस्थावैशिष्ट्येन भगवान् ज्ञातः सर्वत्र कार्ये तत्तदवस्थाविशिष्टत्वेन ज्ञातो भवति, सर्वं च कार्यं तदभिन्नत्वेन ज्ञातं भवतीति बोधसौकर्यरूपो गुण इत्यर्थः । नन्वत्र सामान्यप्रत्यासत्तिनाङ्गीकृतेनेत्यत्र किं गमकमित्यत आहुः । * सामान्येत्यादि * चोऽवधारणे । यदि हि सामान्यलक्षणात्र विवक्षिता स्यात् तदा, तत् सामान्यादिति वदेन्न तु वाचारम्भणमित्या-

अलीकत्वनिराकरणाय च मृत्तिकेत्येव सत्यमिति। ब्रह्मत्वेनैव जगतः सत्यत्वं, नान्यथेति।

दि। वदति स्वेवम्। तत्रायमर्थः। यो विकारः पृथुबुध्नोदरादिः स वाचारम्भणं वाचिकक्रियात्मको, न तु कारणाद् व्यक्तिभेदापादकः। यथा सुप्त उत्थित उपविष्टे च पुरुषेऽवयवविन्यासभेदोऽतो नामधेयं नैमित्तिकक्रियायाः पदार्थस्वरूपभेदानापादकत्वान्नामैव। तथाचात्र कारणावस्थात्मनैवैकरूपस्य विवक्षितत्वाद् व्यक्तिभेदानादर एव सामान्यलक्षणानादरगमकः। यथा बहुसुवर्णाकाङ्क्षायां कटककुण्डलकलशभृङ्गारादिव्यक्त्यनादरस्तद्वत्सेत्यर्थः। एतदेवैकादशस्कन्धे भगवताप्युक्तम्। 'यथा सुवर्णं सुकृतं पुरस्तात् पश्चाच्च सर्वस्य हिरण्मयस्य। तदेव मध्ये व्यवहार्यमाणं नानापदेशैरहमस्य तद्वत्। न यत् पुरस्तादुत यन्न पश्चान्मध्येऽपि तन्न व्यपदेशमात्रम्। भूतं प्रसिद्धं च परेण यद्यत् तदेव तत्स्यादिति मे मनीषा' इति। यत् परेण भूतं यच्च परेण प्रसिद्धं तत्तदेव स्यादित्यर्थः। अंशे कार्यत्वाभावात् प्रसिद्धमिति पृथग्व्यपदेशः। एवमष्टमस्कन्धेऽपि। 'यथा हिरण्यं बहुधा समीयते नृभिः क्रियाभिर्व्यवहारवर्त्मसु। एवं वचोभिर्भगवानधोक्षजो व्याख्यायते लौकिकवैदिकैर्जनैरिति'। एतेनाकारादिभेदकृत एव तत्तल्लौकिकवैदिकव्यवहारभेदो, न वस्तुभेदकृतः। यथा कलशरूपेण सुवर्णेन जलाहरणादिकं, कटककुण्डलादिरूपेण तेन हस्तकर्णादिशोभनमिति। एतेनैव फलभेदोऽपि व्याख्यातः। अन्यच्च तत्रैवामृतमन्थने ब्रह्मस्तुतौ। 'त्वय्यग्र आसीत् त्वयि मध्य आसीत् त्वय्यन्त आसीदिदमात्मतन्त्रे। त्वमादिरन्तो जगतोऽस्य मध्यं घटस्य मृत्स्नेव परः परस्माद्' इति। कुत्सितत्वादिभानं तु दोषदृशामेव, न ब्रह्मविदाम्। यथा स्वाङ्गे पुरुषस्य। प्रसिद्धं तद् ऋषभदेवादिषु। तस्माद् भगवतः समवायित्वमप्रत्यूहम्। ननु यदि विकारस्य वाङ्मात्रत्वं तदैतेन वाक्येन ब्रह्मणो विवर्तोपादानत्वमुपगम्य प्रपञ्चस्यालीकत्वमेवाद्रियतां, तावताप्येकविज्ञानेन सर्वविज्ञानसिद्धेरित्यत आहुः। * अलीकत्वेत्यादि *। * नान्यथेति * न प्रतिनियतेन घटादिरूपेण, न वा जातिरूपेण, नाप्यवान्तरोपादानरूपेण।

सामान्यलक्षणप्रसक्तिनिराकरणं च स्पष्टमेवाग्रे त्रीणि रूपाणीत्यत्र करिष्यति । अतो ब्रह्मरूपेण सत्यस्य जगतो ब्रह्मैव समवायिकारणम् । देहात्मबुद्धिस्तु सत्यां विकारबुद्धौ दोषः ।

तेषां रूपाणां व्यवहारमात्रार्थत्वादित्यर्थः । एतेन सिद्धान्ते प्रतिनियतरूपेण जगतः सत्यत्वाभावो, न तु सत्यत्वेन रूपेण जगदभाव इति बोधितम् । ननु यदि ब्रह्मत्वेनैव जगतः सत्यत्वं तदा तेन रूपेण सामान्यलक्षणैवाद्रियतां, को दोष इत्यत आहुः । * सामान्येत्यादि * । स्पष्टमिति * अग्न्यादिविद्युदन्तेषु तेज इत्येव सत्यमित्यकथनात् त्रिवृत्करणस्य च बोधनात् त्रीणि रूपाणीत्येव सत्यमिति सावधारणं कथनाच्च स्पष्टम् । तेन, अपागादग्नेरग्नित्वमित्यादेरयमर्थः । यदग्न्यादौ रोहितादिगुणकं रूपमाकारत्रयं तदनागन्तुकस्वरूपविचारे अत्रिवृत्कृतानां तेजोऽबन्नानामेव, न तु त्रिवृत्कृतस्याग्न्यादेः कार्यस्य । त्रिवृत्करणात् प्रागपि सत्त्वात् । अतस्त्रिवृत्करणोत्तरमागन्तुकमग्नित्वादिकम्, अनागन्तुकरूपविचारे अनागन्तुकानारोपितरूपेणापागाद्, अग्न्यादेः सकाशादपगतम् । यतोऽग्नित्वादिकं वाचारम्भणमवस्थारूपत्वान्नाग्न्यादीनां तेभ्यो भेदकमतस्त्रीणि रूपाणीत्येव सत्यम् अनागन्तुकानारोपितं रूपमिति बोध्यः । इदं च मूलकारणस्यात्यन्तपरोक्षत्वादन्यकार्यापेक्षया शिष्यविश्वासायोक्तम् । तच्च मूलकारणे ब्रह्मण्येव पर्यवसास्यतीत्यभिप्रायेण । तदग्रे च यदुपदिष्टं तत् सर्वं मूलकारणस्य कार्यद्वारा परिचायनार्थम् । अतः सर्वस्य ब्रह्मैव समवायिकारणमिति सर्वं सुस्थम् । ननु जगतो ब्रह्मरूपेण सत्यत्वे तस्मिन् ब्रह्मधर्मविरुद्धधर्माध्यासो न स्याद्, देहादेरप्यात्मत्वेन सत्यता स्यात् । तथा सति देहात्मबुद्धेर्दोषत्वमप्यपेयात् । ततश्चाविद्यानिवर्तकशास्त्रवैयर्थ्यमापद्येतेत्यतो जगन्मिथ्यात्वमेव साधीय इत्यत आहुः । * देहात्मेत्यादि * । वस्तुविचारेण जगतो ब्रह्मरूपत्वेऽपीदानीं बहुजन्माभ्यस्तविकारबुद्धेरनिवृत्तत्वात् तस्यां सत्यां या देहात्मबुद्धिः सा देहाभिन्नत्वेनात्मावगाहिनी, न त्वात्माभिन्नत्वेन देहावगाहिनी । आत्मस्वरूपस्याज्ञातत्वादतो दोषरूपैवेति न कोऽपि जगतो ब्रह्मरूपत्वे पूर्वोक्तो दोष इत्यर्थः । नन्वेवं

*श्रुतिसामर्थ्यं प्रमाणमित्युक्तम् । तस्माद् ब्रह्मैव समवायिकारणं, न प्रकृतिः ॥ २३ ॥

अभिध्योपदेशाच्च ॥ २४ ॥

लिङ्गान्तरमाह । सोऽकामयत बहु स्यां प्रजायेयेतीत्यत्र कामनं तस्याभिध्यानम् । आप्तकामत्वान्न कामना । तदभिध्यानं स्रष्टावुपदिश्यते । बहु स्यामिति स्वस्यैव बहुरूपत्वाभिध्यानेन स्रष्टं स्वयमेव भवति । सुवर्णस्यानेकरूपत्वं सुवर्णप्रकृतिकत्व एव । अध्यासाभावाद् गौणत्वापत्तेश्च । न हि मुख्यं बहुभवनं योगिनां सम्भवति । सर्वभवनसामर्थ्यानुमुख्ये सम्भवति गौणकल्पनाया अन्याय्यत्वात् । चकाराद्, इदं सर्वं यदयमात्मेति कार्यस्य ब्रह्मत्वश्रुतिर्ब्रह्मप्रकृतित्वे सम्भवति, नान्यथा ।

व्यवस्थया देहात्मबुद्धेर्दोषत्वे किं मानमित्याकाङ्क्षायां पूर्वोक्तं स्मारयन्ति । * श्रुतीत्यादि * । * श्रुतिसामर्थ्यमिति * । दृष्टान्ते हि कार्यत्वन्यक्कारेण कारणात्मकत्वमुपदिष्टं, न तु तत्पुरस्कारेण । किञ्च । कारणात्मना कार्यज्ञानमभिसंहितं, न तु कार्यात्मना कारणज्ञानम् । अतस्तत्सामर्थ्यमेव तादृशव्यवस्थायां प्रमाणमित्यर्थः । सिद्धमाहुः । * तस्मादित्यादि * ॥ २३ ॥

अभिध्योपदेशाच्च ॥ सूत्रमवतारयन्ति । * लिङ्गान्तरमाहेति * ननु दृष्टान्ते मृत्तिकेत्येव सत्यमिति कारणे सत्यपदमुक्तम् । अतस्तत्सामर्थ्येन कार्ये मिथ्यात्वमपि प्रमातुं शक्यत इति शङ्कायां प्रपञ्चे विवर्तत्वस्य ब्रह्मणि विवर्तोपादानत्वस्य च निरासाय लिङ्गान्तरमाहेत्यर्थः । * अभिध्यानमिति * एवमेवमिदं करिष्यामीत्यालोचनम् । विचार इति यावत् । * सुवर्णप्रकृतिकत्व इति * अंशकार्ययोस्तथात्वे । नन्वभिध्योपदेशोऽपि न ब्रह्मणः समवायित्वसाधकः । योगिकायव्यूहवदपि बहुभवनाभिध्योपपत्तेरित्याशङ्कयामाहुः । * अध्यासेत्यारभ्य * नान्यथेत्यन्तम् * । ननु योगबलेना-

अथवा सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीतेति तस्य जगद्रूपत्वेनाभिध्यानमुपदिश्यते । तद् ब्रह्मसमवायित्वे घटत इति चकारादेकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखमिति ॥ २४ ॥

साक्षाच्चोभयाम्नात् ॥ २५ ॥

लिङ्गमुक्त्वा श्रुतिमेव प्रमाणमाह । साक्षाच्छ्रुत्यैव समवायित्वमुच्यते । चकारात् स्मृत्यापि । कथं श्रुत्योच्यते तत्राह । उभयाम्नानात् । ब्रह्मणः सकाशाद् ब्रह्मण्येव च सृष्टिप्रलययोराम्नानात् । सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्तीति । अहं सर्वस्य जगतः प्रभवः प्रलयस्तथेति च । न ह्येतस्मिन्निमित्तत्वे सम्भवति । सुवर्णादिषु तथोपलब्धेः । लोकवेदन्यायेन साक्षात्त्वम् । तस्माद् भगवानेव समवायिकारणम् ॥ २५ ॥

आत्मकृतेः परिणामात् ॥ २६ ॥

ध्यासाभावेऽपि भगवान् नानाभावं कर्तुं शक्नोति, गौणत्वं ब्रह्मणोऽविकृतत्वसाधकत्वादनुष्टम् । अतो नेयमभिध्या समवायित्वसाधने लिङ्गं भवितुं शक्नोतीत्याशङ्क्य व्याख्यानान्तरमाहुः । * अथवेत्यादि * । तत्र हि सर्वस्य ब्रह्मत्वे, तज्जलानित्यनेनोत्पत्तिस्थितिलयाधारत्वं हेतुत्वेनोक्त्वा तथाभिध्यानमुपदिश्यते । यदि समवायित्वं नाभिप्रेयात्तर्हि तं न वदेदतस्तथेत्यर्थः ॥ २४ ॥

साक्षाच्चोभयाम्नानात् ॥ सूत्रमवतारयन्ति । * लिङ्गमित्यादि * । मयाध्यक्षेण प्रकृतिः सूयते सचराचरमिति स्मृत्या कश्चित् प्रत्यवतिष्ठेदतस्तन्निरासाय श्रुतिमाहेत्यर्थः । * एतस्मिन्निति * प्रलयबोधक आकाशवाक्ये । * लोकवेदन्यायेनेति * लौकिकेन वैदिकेन च न्यायेनेत्यर्थः ॥ २५ ॥

आत्मकृतेः परिणामात् ॥ परिणामात् प्राप्तस्य विकृतत्वस्य

ननु स एव सर्वं सृजति स एवावति हन्ति चेति कर्तृत्वप्रतीतेराकाशादिवाक्यमप्यौपचारिकं भविष्यतीति तन्निराकरणायाह । आत्मकृतेः । तदात्मानं स्वयमकुरुतेति स्वस्यैव कर्मकर्तृभावात् । सुकृतत्ववचनाच्चालौकिकत्वम् । तथापि ज्ञानार्थमुपपत्तिमाह । परिणामात् । परिणमते कार्याकारेणेति । अविकृतमेव परिणमते सुवर्णम् । सर्वाणि च तैजसानि । वृद्धेश्चालौकिकत्वाद् ब्रह्मकारणत्व एव घटते । पूर्वावस्थान्यथाभावस्तु कार्यश्रुत्यनुरोधादङ्गीकर्तव्यः ।

परिहारार्थं युक्तिमाहुः । * अविकृतमित्यादि * । * सर्वाणि च तैजसानीति * यद्यविकृतपरिणामस्य बाहुल्यं नाभिप्रेयात् पूर्वं सर्वतैजससाधारणस्य लोहपदस्योक्तत्वेऽपि पुनः कृष्णायसं न दृष्टान्तीकुर्यात् । अतो बाहुल्याभिप्रायेणैव तदुक्तिरसमीचीनत्वेन प्रतीयमानस्यापि ब्रह्मसमवायिकत्वबोधनार्थं च । ननु, तदैक्षत बहु स्यां प्रजायेयेति बहुभवनादिवृद्धेस्तेजःप्रभृतिपूक्तत्वात् तेषामपि विकारित्वं चेत् सुवर्णादीनां का वार्तेत्यत आहुः । * वृद्धेरित्यादि * । तेषां वृद्धिर्न लौकिकी । सर्वतः पूर्वभावित्वेन श्रुत्येकसमधिगम्यत्वात् । अतः सा तेजआदिकर्तृकस्यापीक्षणस्य ब्रह्मकारणत्व एव घटते । तासु जीवानुप्रवेशस्य पश्चादुक्तत्वेनेक्षणदशायामचेतनत्वात् । अतस्तासामपि ब्रह्मवदविकृतत्वाच्च सुवर्णादिषु तद्दृष्टान्तेनानुपपत्तिरित्यर्थः । ननु पूर्वावस्थान्यथाभावरूपो विकारस्तु ब्रह्मणोऽप्यायातीति कथं ब्रह्मणोऽप्यविकृतत्वमित्यत आहुः । * पूर्वेत्यादि * । तथाच दधिदुग्धन्यायेन स्वरूपस्य गन्धादिगुणानां चान्यथाभाव एवात्राग्राह्यविकारत्वेनाभिप्रेयते, न तु संख्यान्यथाभावोऽपि तथात्वेनेति कार्यश्रुत्यनुरोधादङ्गीक्रियते । अत एव वेदस्तुतौ, न हि विकृतिं त्यजन्ति कनकस्य तदात्मतया स्वकृतमनुप्रविष्टमिदमात्मतयावसितमिति प्राह्यधिकारस्यादुष्टत्वमुक्तमिति नायं दोष इत्यर्थः । नन्वयमेव सूत्रकाराशय इत्यत्र किं गमकमत आहुः । *

वक्ष्यति च, श्रुतेस्तु शब्दमूलत्वादिति । अन्यानि च युक्तिदूषणानि परिहरिष्यति । तस्माद् ब्रह्मपरिणामलक्षणं कार्यमिति जगत्समवायिकारणत्वं ब्रह्मण एवेति सिद्धम् ॥ २६ ॥

योनिश्च हि गीयते ॥ २७ ॥

चेतनेषु किञ्चिदाशङ्क्य परिहरति । नन्वस्तु जडानां ब्रह्मैककारणत्वम् । चेतनेषु योनिबीजयोः समवायित्वदर्शनात् पुरुषत्वाद् भगवतो योनिरूपा प्रकृतिः समवायिकारणं भवतु । शुक्रशोणितसमवेतत्वाच्छरीरस्येत्याशङ्क्य परिहरति । योनिश्च ब्रह्मैव । शाक्तवादनिराकरणाय चकारः । तत्र युक्तिश्रुती प्रमाणयति । हि गीयत इति । युक्तिस्तावत्—सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति पूर्वमेकमेव प्रतिज्ञातम् । आकाशादेव, आनन्दाद्ध्येवेत्याद्येवकारैश्चानन्यकारणत्वं जगतोऽवगम्यते । इतरापेक्षायां द्वैतापत्तेः । गीयते च । कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।

वक्ष्यतीत्यादि * । स्फुटमन्यत् ॥ २६ ॥

योनिश्च हि गीयते ॥ अत्रापि सर्वं निगदव्याख्यातम् ।

माध्वास्तु—प्रकृतिश्चेति सूत्रे, हन्त तमेव पुरुषं सर्वाणि नामान्यभिवदन्ति, यथा नद्यः स्यन्दमानाः समुद्रायणाः समुद्रमभिसंविशन्त्येवमेवैतानि नामानि पुरुषमभिसंविशन्तीति श्रुतिम्, अभिध्यासूत्रे च, मायां तु प्रकृतिं विद्यादिति, महामायेत्यविद्येति नियतिर्मोहिनीति च, प्रकृतिर्वासनेत्येवं तवेच्छाऽनन्त ! कथ्यत इति वचनम्, सोऽभिध्या स जूतिः स प्रज्ञा स आनन्द इति श्रुतिम्, ध्यायति ध्यानरूपोऽसौ सुखी सुखमतीव च, परस्यैश्वर्ययोगेन विरुद्धार्थतयेष्यत इति ब्रह्माण्डवाक्यम्, साक्षात्सूत्रे चैव स्त्र्येष पुरुष एष प्रकृतिरेष आत्मैष ब्रह्मैष लोक एष आलोको योऽसौ हरिरादिरनादिरनन्तोऽन्तः परमः परात् विश्वरूप इति पैङ्ग्यश्रुतिं चोपन्यस्य भगवतः सर्वविधशब्दवाच्यत्वं च स्थापयित्वा, आत्मकृतिसूत्रे प्रकर्षेण

यद्भूतयोनिं परिपश्यन्ति धीरा इति च । मम योनिर्महद् ब्रह्म तस्मिन् गर्भं दधाम्यहमिति । तासां ब्रह्म महद्योनिरहं बीजप्रदः पितेति च । अक्षरपुरुषोत्तमभावेन तथात्वम् । तस्माद् योनिरपि भगवान् पुरुषोऽपि सर्वं वीर्यं जीवश्च सर्वं भगवानिति । इदं सर्वं, यदयमात्मेति सिद्धम् । तस्मात् केनाप्यंशेन प्रकृतिप्रवेशो नास्तीत्यशब्दत्वं सांख्यमतस्य सिद्धम् ॥ २७ ॥

करोतीति प्रकृतिरिति प्रयोगात् प्रकृतावनुप्रविश्य ता परिणाम्य तत्परिणामनियामकत्वेन तत्र स्थित्वाऽऽत्मनो बहुधाकरणात् प्रकृतिशब्दवाच्यतां स्थापयित्वा, अथ हैष आत्मा प्रकृतिमनुप्रविश्यात्मानं बहुधा चकार तस्मात् प्रकृतिरित्याचक्षत इति भाल्लवेयश्रुतिम्, अविकारोऽपि परमः प्रकृतिं तु विकारिणीम्, अनुप्रविश्य गोविन्दः प्रकृतिश्चाभिधीयते इति नारदीयवाक्यं च तदुपष्टम्भायोदाहरन्ति। तच्चिन्त्यम् । श्रुतेरप्रसिद्धत्वात् । तादृश्या अपि कथञ्चित् प्रामाण्योपगमेऽप्यस्या आत्मनो बहुधाकरणबोधकतयाऽऽत्मप्रकृतिबोधकत्वाभावेन विषयतयोपन्यासायोगाच्च । हन्त तमित्यारभ्य विश्वरूप इत्यन्तासु स्वोपन्यस्तासु श्रुतिषु सर्वशब्दवाच्यत्वस्य सर्वरूपत्वस्य च स्वत एव बोधनेन तासां पूर्वकालीनव्यवस्थाबोधकतया, भाल्लवेयश्रुतौ चाथशब्देन पाश्चात्यबोधकतायाः स्फुटं भानेन कालभेदकृतविषयभेदस्य स्फुटतयैतदनुरोधेन तदर्थनिर्णयस्याप्ययुक्तत्वाच्च । ध्यायतीति ब्रह्माण्डवाक्ये ऐश्वर्ययोगेन विरुद्धार्थतया सर्वरूपत्वादेरिष्टताया उक्ततया सर्वानुपपत्तिपरिहारसम्भवे प्रकृतिशब्दयोगादरणेन रूढ्युपष्टम्भस्य व्यर्थत्वाच्च ।

यत्तु जयतीर्थः—ब्रह्मणो जगदुपादानत्वे एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया मृत्पिण्डादिदृष्टान्तोक्तेश्च न प्रमाणत्वम् । तस्या अन्यार्थत्वस्य सूत्रव्याख्याने सम्यग्व्याख्यातत्वादित्याह । तदपि अव्याजाढ्यमात्रम् । सूत्रव्याख्यानस्यैवासङ्गततायाः प्रदर्शितत्वादिति। यदपि—ब्रह्मणः परिणामोक्तिरसङ्गतैव । एतदध्यायस्याशेषशास्त्रस्य ब्रह्मणि समन्वयप्रतिपादनाय प्रवृत्तत्वादित्याह । तदप्यसङ्गतम् ।

एतेन सर्वे व्याख्याताः व्याख्याताः ॥ २८ ॥

ब्रह्मवादव्यतिरिक्ताः सर्वे वादा अवैदिका वेदविरुद्धार्थेत्याह । एतेन ब्रह्मवादस्थापनपूर्वकसांख्यमतनिराकरणेन सर्वे पातञ्जलादिवादा व्याख्याताः । अवैदिका अनुपयुक्ताश्च । वैदिकानां हि वेदः प्रमाणम् । तस्मिन्नन्याकुले भ्रान्तिप्रतिपन्ना

अशेषशास्त्रमध्ये, स आत्मानं स्वयमकुरुत, सर्वं खल्विदं, ब्रह्म, तज्जलानिति, स आत्मानमेव द्वेधापातयत, ततः पतिश्च पत्नी चाभवताम्, हन्ताहं मदेव मन्मात्रं सर्वं यस्मिन्नाकाश ओतश्च प्रोतश्चेत्यादिश्रुतीनां, विश्वं वै ब्रह्म तन्मात्रं, नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे, ओतप्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः, त्वय्यग्र आसीदित्यादिस्मृतीनां च प्रविष्टत्वात् तासां समन्वयस्यावश्यं प्रतिपाद्यत्वात् परिणामं विना च तदसम्भवादिति । यदप्यानुमानिकपादे, प्रकृतेः शब्दप्रतिपाद्यत्वनिराकरणं चेत् प्रकृतिस्वरूपस्यानिराकृतत्वात् तस्या उपादानतया वर्तमानत्वात् प्रकृतित्वेन ब्रह्मण उपादानत्वस्थापनमसङ्गतमेव । प्रकृतिस्वरूपनिराकरणं चेत् सूत्रेषु तददर्शनात् तदप्यसङ्गतमिति न ब्रह्मण उपादानत्वे क्वापि सङ्गतिरित्युक्तम् । तदप्यबुद्ध्वैव । प्रकृतेर्मूलकारणतायाः शब्दप्रतिपाद्यत्वस्य निराकरणं सूत्रेषु सिद्धमिति तस्या अवान्तरोपादानतया विद्यमानत्वेऽपि ब्रह्मणि मूलोपादानत्वाबाधात् । एकादशस्कन्धे, 'आसीज्ज्ञानमयो ह्यर्थ एकमेवाविकल्पितम् । यदा विवेकनिपुणा आदौ कृतयुगे युगे । तन्मायाफलरूपेण केवलं निर्विकल्पितम् । वाङ्मनोगोचरातीतं द्विधा समभवद् बृहत् । तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका' इत्यादिना भगवतैव तथा निर्णीतत्वात् । अतो ब्रह्मण उपादानत्वानङ्गीकरणमबोधाग्रहयोरन्यतरमूलकमेवेति दिक् ॥२७॥

एतेन सर्वे व्याख्याता व्याख्याताः ॥ सूत्रमवतारयन्ति । * ब्रह्मवादेत्यादि * एतेन सांख्यमतस्याधौतत्वसाधनेन पूर्वपादत्रयो-

एव सर्वे वादा इति । एतद् सौकर्यार्थं विस्तरेणाग्रे वक्ष्यते । आवृत्तिरध्यायसमाप्तिबोधिका ॥ २८ ॥

इति श्रीवेदव्यासमतवर्ति श्रीवल्लभाचार्यविरचिते
ब्रह्मसूत्राणुभाष्ये प्रथमाध्यायस्य
चतुर्थः पादः ॥ १ ॥ ४ ॥

प्रथमोऽध्यायः समाप्तः ॥

क्तौ सर्वं समर्थितं ज्ञेयम् । नन्वेवं मतान्तरनिराससिद्धावग्रिमाध्यायस्य किं प्रयोजनमित्यत आहुः । * एतदित्यादि * । * एतदिति * वादान्तरनिराकरणमग्रिमाध्याये बोधसौकर्यार्थं विस्तरेण वक्ष्यत इत्यर्थः । एतेन सामान्यविशेषभावरूपा सङ्गतिरपि दर्शिता ॥ २८ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रकिरणनिवारितहृदयध्वान्तेन पीताम्बरात्मजेन पुरुषोत्तमेन कृते भाष्यप्रकाशे
प्रथमाध्यायस्य चतुर्थः पादः ॥ १ ॥ ४ ॥
समाप्तश्चायं प्रथमोऽध्यायः ॥

अथ द्वितीयाध्यायस्य प्रथमः पादः ॥

स्मृत्यनवकाशदोषप्रसङ्ग इतिचेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ १ ॥

प्रथमाध्याये वेदान्तवाक्यानां विवादास्पदानां ब्रह्मपरत्वेन समन्वयः प्रतिपादितः। अधुना श्रुतिस्मृत्यविरोधः प्रतिपाद्यते।

भ्रान्तिमूलतया सर्वसमयानामयुक्तितः।
न तद्विरोधाद् वचनं वैदिकं शङ्क्यतां व्रजेत् ॥

स्मृत्यनवकाशदोषप्रसङ्ग इतिचेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥ अथ द्वितीयाध्यायं व्याचिख्यासवोऽध्यायसङ्गतिं प्रदर्शयितुं पूर्वाध्यायार्थमनुवदन्तोऽस्यार्थमाहुः। * प्रथमेत्यादि * अधुना समन्वयप्रतिपादनानन्तरं, श्रुतिस्मृत्यविरोधः श्रुतयश्च स्मृतयश्च तासामविरोधः प्रतिपाद्यते। तथा सति श्रुतीनां परस्परमविरोधः स्मृतीनां च श्रुत्यविरोध इत्यर्थात् सेत्स्यति। सोऽत्र विचार्यते। तथाच पूर्वाध्यायार्थविचार उपोद्घातः सङ्गतिरित्यर्थः। ननु समन्वयानन्तरं श्रुतिविप्रतिषेधे निराकरणीये स्मृतिविरोधाविरोधविचारस्य किं प्रयोजनमित्यतस्तद् गृह्णन्ति। * भ्रान्तीत्यादि *। * प्रतिविधेय इत्यन्तम् * श्रुतिविरुद्धस्मृतीनां, भ्रान्तिमूलतया तदुक्तानां सर्वेषां समयानां युक्तिनियमानाम्, अयुक्तितोऽयुक्ततायाम्। सप्तम्यर्थे तसिः। भावप्रधानो निर्देशः। तद्विरोधाद् वैदिकं वचनं शङ्क्यताम् अस्य वाक्यस्यायमर्थो भवति न वेति शङ्काविषयतां न व्रजेद् न प्राप्नुयादित्येकं प्रयोजनम्। एतच्चाद्यसूत्रत्रयेण सिद्ध्यति। तु पुनः श्रुतिविरोधः श्रुतौ विरोधः श्रुतिविरोधोऽप्ययं सर्वथा प्रतिविधेयः। अन्यथा विवक्षितार्थबोधो न स्यादिति द्वितीयम्। एतदुभयप्रयोजनार्थं विचार्यते। तथाच श्रुतीनां बलिष्ठत्वात् स्मृतीनां च नैर्बल्येन

श्रुतिविप्रतिषेधस्त्ववश्यं प्रतिविधेयः । प्रथमचतुर्थपादे सर्वथानुपयोगे प्रतिपादिते, स्मृतिप्रतिपादिते स्मृतित्ववचनेन प्रामाण्ये च यावत् तदप्रामाण्यं न प्रतिपाद्यते तावत् तद्विरोधः परिहर्तुमशक्य इति तन्निराकरणार्थं प्रथमतः सूत्रत्रयमाह । तुल्यबलानां परस्परविरोधे न प्रकारान्तरस्थितिरिति ततो युक्त्या श्रु-

---

तया निराकार्यत्वाच्छ्रुतिविरोधे कासाञ्चित् स्मृतीनां सङ्कोचेन कासाञ्चिद् दूषणेन लोकमात्रसिद्धानां च युक्तीनां दूषणेन विरोधपरिहारो, न तु तद्विरोधेन श्रुतिसङ्कोचस्तदनुरोधेन वा श्रुत्यर्थविचार इत्यर्थः । एतदेव पादार्थकथनमुखेन विभजन्ते । * प्रथमचतुर्थेत्यादि * । आनुमानिकाद्यधिकरणत्रयेण सांख्यमतस्यावैदिकत्वं समर्थयित्वा, कारणत्वेन चाकाशादिष्वित्याद्यधिकरणद्वयेन श्रौतशब्दविप्रतिषेधं, जगद्वाचित्वाधिकरणेनार्थविरोधं च परिहृत्य, वाक्यान्वयाधिकरणे जीवब्रह्मवादोत्थापितप्रकृतिकारणवादं च परिहृत्य, प्रकृतिश्चेत्यधिकरणेन ब्रह्मण एवोपादानत्वनिमित्तत्वयोः साधनाज्जगत्कारणविचारणायां सांख्यमतस्य सर्वथाऽनुपयोगे प्रतिपादिते, प्रतिपादिते च स्मृतेश्चेत्यादिसूत्रेषु स्मृतिप्रामाण्याङ्गीकाराच्छेषाभ्यनुज्ञया विविक्तात्मज्ञानवैराग्यादिषु तस्याः स्मृतित्ववचनेन प्रामाण्ये, पुनः स्मृतित्वेन प्रकृतिकारणत्वांशेऽपि प्रामाण्यप्रत्यवस्थाने, यावत् तदंशे सर्ववेष्टनस्मृतिवत् स्मृतित्वप्रयुक्तमप्यप्रामाण्यं न प्रतिपाद्यते तावत् तस्याः स्मृतेर्विरोधः परिहर्तुमशक्य इति तदंशे स्मृतित्वप्रयुक्तप्रामाण्यनिराकरणार्थं सूत्रत्रयमाहेत्यर्थः । तत्र हेतुः । * तुल्येत्यादि * । तथाच सांख्ये ईश्वरस्य निराकृतत्वाद्, योगे च वेदप्रवर्तकतया अनुग्राहकतया च तदङ्गीकारात् तुल्यबलानां स्मृतीनां परस्परविरोधे एकतरप्रामाण्यस्य वक्तुमशक्यत्वात् तदुक्तरीत्या प्रकारान्तरस्य सेश्वरत्वानीश्वरत्वादेः स्थितिर्निर्णयः । * इति-अस्माद्धेतोः । तथाचैवमप्रामाण्यबोधनार्थं सूत्रत्रयमित्यर्थः । शिष्टानामर्थमाहुः । * ततो युक्त्येत्यादि * । तत आद्यसूत्रत्रयोत्तरं, शिष्टेषु युक्त्या प्रत्यक्षस्य श्रुतेश्च श्रुत्योश्च परस्परविप्रतिषेधे प्रतिपादिते

तिविप्रतिषेधपरिहारः । ततो द्वितीये पादे वेदबोधकत्वाभावेऽपि तैरपि स्वातन्त्र्येण कश्चन पुरुषार्थः सेत्स्यतीत्याशङ्क्य बाह्याबाह्यमतान्येकीकृत्य निराकरोति । भ्रान्तेस्तुल्यत्वात् । ततः सम्यग् वेदार्थविचारायैव वैदिकपदार्थानां क्रमस्वरूपविचारः पादद्वयेन । अतः सम्पूर्णेनाप्यध्यायेनाविरोधः प्रतिपाद्यते । कपिलादिमहर्षिकृतस्मृतेर्न मन्वादिवदन्यत्रोपयोगः । मोक्षैकोपयोगित्वात् । तत्राप्यनवकाशे वैयर्थ्यापत्तेरितिचेन्न । कपिलव्यतिरिक्तशुद्धब्रह्मकारणवाचकस्मृतेरनवकाशदोषप्रसङ्गः । अहं सर्वस्य जगतः प्रभवः प्रलयस्तथेति ॥ १ ॥

युक्त्या तत्परिहार इति प्रथमपादार्थः । द्वितीयपादार्थमाहुः । * ततो द्वितीय इत्यादि * । * वेदबोधकत्वाभाव इति * सर्ववेदानस्मृतिवद्प्रामाण्यात् तथात्वे । * तैरिति * बाह्याबाह्यस्मृत्युक्तसाधनैः । * कश्चनेति * यत्किंचिन्मुक्तिरूपः । फलेऽनुपयोगात् तन्निराकरणं द्वितीयपादार्थः । अग्रिमयोरर्थमाहुः । * ततः सम्यगित्यादि * । तृतीये वियदादिपादे प्रथमं भूतानामुत्पत्तिः, स्वरूपम, उत्पत्तिक्रमश्च विचार्यते । ततो जीवात्मस्वरूपं तद्धर्माश्च । चतुर्थे चेन्द्रियोत्पत्तिकमस्तत्स्वरूपादिकं च । तथाचैतद्द्वयं पादद्वयार्थः । सिद्धमाहुः । * अत इत्यादि * । * अत इति * पादेपूक्तप्रकारकार्थप्रतिपादनात् । उपन्यस्तं सूत्रं व्याकुर्वन्ति * कपिलेत्यादि * । अयमर्थः । ज्ञानादेव तु कैवल्यमित्यादिश्रुत्युक्तमोक्षफलकज्ञानार्थं जगत्कारणविचारणायां सांख्यस्मृत्यनुपयोगे नित्यानुमेयश्रुतिविरोधो भवति ? नवेति संशयं कापिलास्तावदेवं प्रत्यवतिष्ठन्ते । पूर्वाध्याये यद्यपि श्रुतिविचारेण ब्रह्मणो जगत्कर्तृत्वं जगदुपादानत्वं च प्रतिपादितं, तथापि कपिलप्रणीतसांख्यस्मृतिविरोधात् तदनादरणीयम । नच श्रुतीनां स्वतः प्रामाण्यस्य तद्विरोधे स्मृतीनामप्रामाण्यस्य च पूर्वतन्त्रे, विरोधे त्वनपेक्षं स्यादित्यत्र प्रतिपादितत्वात् स्मृतिविरोधोऽप्रयोजक इति शङ्क्यम । औदुम्बरीं स्पृष्ट्वोद्गायतीति

श्रुत्युक्तस्य तत्स्पर्शरूपस्यार्थस्य प्रत्यक्षतो निश्चेतुं शक्यतया सर्ववेष्टनस्मृतौ तद्विरोधस्यापि प्रत्यक्षत एव मानेन तादृशीनां विरोधस्य तथात्वेऽपि जगत्कारणरूपस्य वेदान्तश्रुतिविषयस्य अप्रत्यक्षत्वेन तादृशविषये पूर्वोक्तश्रुतिकपिलस्मृत्योर्विरोधे यदि प्रत्यक्षश्रुतिमालम्ब्य तस्या अप्रामाण्यमाश्रीयते तदा तन्मूलभूता श्रुतिर्महर्षिप्रत्यक्षं चोपरुद्ध्येत । नचेदं सर्ववेष्टनस्मृत्यनादरेऽपि तुल्यमिति वाच्यम् । तत्र ह्यसति ह्यनुमानमिति सूत्रांशेन स्मृतेर्मन्वर्थगामित्वबोधनात् प्रत्यक्षश्रुतौ स्वीकृतस्य प्रामाण्यस्य परित्याग आपततीति तदपेक्षया स्मृतेरेव प्रामाण्यत्यागो वरम् । स्वप्रत्यक्षापेक्षया परप्रत्यक्षस्य निर्बलत्वेन तुल्यत्वाभावात् । इह तु वेदान्तविषयस्य दुरवबोधत्वेन तादृशमहर्षिगोचरताया एवाश्रयत्वाद्, आनर्थक्ये प्रमाणानां विपरीतं बलाबलमिति न्यायाच्च कपिलस्मृत्यनुरोधेन श्रुतिरेव प्रधानविषये सङ्कोच्या । तदनुग्राहकस्य स्वप्रत्यक्षस्यात्राभावात् । किञ्च । सर्वश्वेतो हयः, सर्वः श्यामः पुरुष इत्यत्र यथा खुरनेत्रनखादिषु तद्वर्णाभावेऽपि श्वेतादिबाहुल्यात् सर्वपदप्रयोगस्तथा वेष्टनस्मृतावपि किञ्चिदंशपरित्यागेन बह्वंशवेष्टनेऽपि सर्वपदस्योपपत्तिरिति तस्याः सङ्कोचसहिष्णुता । तथा नात्र । कैवल्ययथार्थज्ञानभगनावरणमोक्षोपयोगितया कस्मिन्नप्यंशे सङ्कोचसहिष्णुत्वस्य वक्तुमशक्यत्वात् । किञ्च । यथा, मानवी ऋचौ धाय्ये कुर्यादिति विधाय, यद्वै किञ्च मनुरवदत्तद् भेषजमिति श्रुतिर्धर्मे तदुपयोगं नियमितवतीति तस्यास्तत्रत्यावकाशत्वम् । तथास्याः क्वचन न वक्तुं शक्यते । तस्मादेतद्वैयर्थ्यमेवापततीति तन्मूलभूतनित्यानुमेयश्रुतिविरोधो, महर्षिप्रत्यक्षविरोधश्चेति कापिलप्रत्यवस्थानात् प्राप्तं तदेतत्, स्मृत्यनवकाशदोषप्रसङ्ग इति चेदिति सूत्रांशेनानूद्य प्रतिबन्द्या प्रतिविधत्ते । नान्यस्मृत्यनवकाशदोषप्रसङ्गादिति । तथाच, वेदान्तकृद् वेदविदेव चाहमिति सर्ववेदवेद्या वेदान्तकर्त्रा भगवता गीतास्मृतावहं सर्वस्य जगतः प्रभवः प्रलयस्तथेति, अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्तते, इति मत्वा भजन्ते मां बुधा भावसमन्विता इत्यादिकथनादुक्तज्ञानवतां स्वभजनकथनेन बहूनां चेतनकारणत्वास्थितिबोधनाच्च बहूनामनुग्रहो न्याय्य इति ताभिरेव वेदान्तवाक्यनिर्णय उचितः । अन्यथा तासां सर्वासामेवाऽनवका-

शास्त्रसङ्कात् । तथाच वेदान्तोक्तविषयस्याप्रत्यक्षत्वेऽप्येतदनुरोधेन कपिलस्मृतिरेव जघन्याधिकारिविषयत्वेन सङ्कोच्या । ये मुमुक्षवः परमाप्यनर्हास्तेऽनया स्वात्मानं प्रकृतिप्राकृतेभ्यो विविच्य स्वस्वरूपावस्थिता भविष्यन्तीति तादृशामर्थे परब्रह्मकारणतांशं परित्यज्य देवासुरन्यायेन प्रकृतेरनादित्वं बोधयित्वा तथोक्तमित्येवं सङ्कोचसहिष्णुत्वात् । नच तन्मूलमूतश्रुतेर्महर्षिप्रत्यक्षस्य वा विरोधः । महर्षेराशयस्य तन्मूलश्रुतेश्च प्रत्यक्षश्रुत्यविरुद्ध एवार्थे तात्पर्यात् । अन्यथा देवहूतिं स्वमातरं प्रति सर्वतत्त्वयाथात्म्यमुक्त्वाऽन्ते, ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम्, अवभात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणेत्यादि न वदेत् । एतदेवाभिप्रेत्य मोक्षधर्मे, सांख्ययोगः पञ्चरात्रं वेदाः पाशुपतं तथा, ज्ञानान्येतानि राजर्षे विद्धि नाना मतानि वै इति पञ्चसिद्धान्तांस्तद्वक्तृँश्चोक्त्वा, सर्वेषु च नृपश्रेष्ठ ज्ञानेष्वेतेषु दृश्यते, यथागतं तथा ज्ञानं निष्ठा नारायणः प्रभुः, नचैवमेनं जानन्ति तमोभूता विशाम्पते, तमेव शास्त्रकर्तारः प्रवदन्ति मनीषिणः, निष्ठां नारायणमृषिं नान्योऽस्तीति वचो ममेत्युक्तम् । यथागतमिति—श्रुत्यविरुद्धम् । तथाचाज्ञानामर्थे सङ्कोच इत्यर्थः । अथवा पाद्मोत्तरखण्डे भगवच्छिवसंवादे, त्वं च रुद्र महाबाहो मोहनार्थमिति मोहनं प्रक्रम्य, 'मयि भक्ताश्च ये विप्रा भविष्यन्ति महर्षयः । स्वच्छक्त्या तान् समाविश्य कथयस्व च तामसान् । कणादं गौतमं शक्तिमुपमन्युं च जैमिनिम् । कपिलं चैव दुर्वासं मृकण्डं च बृहस्पतिम् । भार्गवं जामदग्न्यं च दशैतांस्तामसान्‌र्षीन् । तव शक्त्या समाविश्य कुर्वतो जगतो हितम् । स्वच्छक्त्या सन्निविष्टास्ते तमसोद्रिक्तया भृशम् । तामसास्ते भविष्यन्ति क्षणादेव न संशयः । कथयन्ति च ते विप्रास्तामसानि जगत्त्रये । पुराणानि च शास्त्राणि त्वं चासत्त्वेन बृंहितः । कपालचर्मभस्मास्थिचिह्नान्यमरपूजित । त्वमेव धृत्वा तॉल्लोकान् मोहयस्व जगत्त्रये । तथा पाशुपतं शास्त्रं त्वमेव कुरु सत्तम । कङ्कालशैवपाषण्डमहाशैवादिभेदत' इति कथनात् कपिलाचार्यस्तामसशक्तिप्रवेशोत्तरं तथा कथितमिति । देवहूत्यादिकं प्रति च तदावेशाभावदशायां कथितमिति विषयभेदाच्च मोक्षधर्मवाक्यानां सूत्राणां च विरोध इति दिक् । अत एव हेमाद्रौ श्राद्धखण्डे स्नानाहप्रकरणे षड्त्रिंशन्मते, शैवान् पाशुपतान्

इतरेषां चानुपलब्धेः ॥ २ ॥

प्रकृतिव्यतिरिक्तानां महदादीनां लोके वेदे चानुपलब्धेः ॥ २ ॥

दृष्ट्वा लोकायतिककापिलान् । विकर्मस्थान् द्विजान् शूद्रान् सवासा जलमाविशेदित्युक्तम् ॥ १ ॥

इतरेषां चानुपलब्धेः ॥ एवं प्रतिबन्द्या कपिलस्मृतेर्निरङ्कुश-प्रधानकारणत्वांशे सङ्कोचसहिष्णुत्वमुक्त्वा महदाद्यंशेऽपि तथात्वमाहेत्याशयेन सूत्रं पठित्वा व्याचक्षते । * इतरेषां चानुपलब्धेरित्यादि * । लोके गीतापुराणादिस्मृतौ प्रश्नोपनिषदादिश्रुतौ *चोपलभ्यमानत्वेऽपि कपिलोक्तप्रकारेणानुपलभ्यमानत्वात् । तथा*हि । प्रवचनसूत्रेषु तावत्, स्थूलात् पञ्चतन्मात्रस्य, बाह्याभ्यन्तराभ्यां तैरहङ्कारस्य, तेनान्तःकरणस्य, ततः प्रकृतेरिति सूत्रयता पञ्चभूतव्यतिरिक्तानां कार्यलिङ्गकानुमानगम्यत्वमाहत्याग्रे, मूले मूलाभावादमूलं मूलमिति कथनात् तस्यामेव मूलकारणता निर्णीता । तदिदमनुमानान्न सिद्ध्यति । स्थूलेषु पृथिव्यादिचतुर्षु गन्धादिगुणाऽविनाभावस्य प्रत्यक्षसिद्धत्वेन शब्दे च द्रव्यजन्यत्वस्य प्रत्यक्षसिद्धत्वेन पूर्ववर्तित्वस्य प्रत्यक्षबाधितत्वाद् गुणनाशेऽपि द्रव्यदर्शनेन व्यतिरेकव्यभिचाराद् गुणातिरिक्तानां मात्राणां लोकाप्रसिद्धत्वाच्च न स्थूलैस्ता अनुमातुं शक्यन्ते । प्रत्युत पृथिव्यादिचतुष्टये तत्परमाण्वानुमानमेव सुकरम् । आकाशो नित्य इत्येव च युक्तम् । एवं मात्राणां स्थूलकारणत्वेन मात्रात्मकस्वरूपेण चासिद्धौ तत्साधितानामहङ्कारमहत्तत्त्वप्रकृतीनामप्यसिद्धिरेव । नापि द्विविधेन्द्रियाभ्यामहङ्कारसिद्धिः । शब्दातिरिक्ताया वाचो, गोलकातिरिक्तानामन्येषामपि कर्मेन्द्रियाणां चाप्रसिद्धत्वात् । गोलकैरपि भूतानामेव सिद्धेश्च । तेषां स्वविलक्षणोपादानासाधकत्वात्। किञ्च । अभिमानोऽहङ्कार इत्यहङ्कारस्य स्वरूपलक्षणम् । स च देहादिष्वहमित्याकारकान्यथाज्ञानरूपो वा, अधिष्ठातृत्वेनात्मज्ञानरूपो वा । उभयथापि गुणरूप इति द्विविधेन्द्रियविलक्षण इति न तदुपादानतायोग्यः । एवम्, अध्यवसायो बुद्धिरिति महतः स्वरूपलक्षणम् । स चेदमेवमेवेति निश्चयात्मा । तस्य चाभिमानजनकत्वं प्रत्यक्षबाधितम् ।

अहमिदं निश्चिनोम्यध्यवस्यामीति विपरीतप्रत्ययात् । आत्मधर्मत्वेन प्रत्ययाच्च । ततो जडप्रकृत्यनुमानमपि दुर्घटमेव । अतो यादृशं स्वरूपं महदादीनां सांख्याभिमतं, न तादृशं लोक उपलभ्यते । नापि गीतादिस्मृतिषु । 'महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च । इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचरा इति चतुर्विंशतीनामुक्तत्वेऽपि तेषां स्वप्रभवत्वस्यैव बोधनेन मूलप्रकृत्युपादेयताया अनुक्तत्वात् । एवमेव पराशरमन्वाद्युक्तावपि द्रष्टव्यम् । तथैव श्रुतावपि बोध्यम् । तथाहि । मैत्रायणीयोपनिषदि सृष्टिकथने तमो वा इदमग्र आसीदेकं तत् परे स्यात् तत् परेणेरितं विषमत्वं प्रयात्येतद्वै रजसो रूपं तद्रजः खल्वीरितं विषमत्वं प्रयात्येतद्वै सत्त्वस्य रूपं तत् सत्त्वमेवेरितं रसः सम्प्रास्रवत् तत् सोंऽशोऽयं यश्चेतामात्रः प्रतिपुरुषः क्षेत्रज्ञः सङ्कल्पाध्यवसायाभिमानलिङ्गः प्रजापतिरित्युक्त्वा तस्यांशा ब्रह्मविष्णुरुद्रा इति स एवापरिमितधा उद्भूत इति चोक्त्वा, उद्भूतत्वाद् भूतेषु चरति प्रविष्टः स भूतानामधिपतिर्बभूव इत्यसावात्मान्तर्बहिश्चेत्युक्तम् । तत्र तमो वा इदमग्र आसीदित्यनेन परिदृश्यमानजगतः पूर्वरूपं तम इत्युक्त्वा एकं तत् परे स्यादित्यनेन तदानीं तस्य परामेदं चोक्त्वा ततः क्रमिकवैषम्येण रजःसत्त्वयोः स्वरूपप्राप्तिं ततः सत्त्वसारस्यमुख्यजीवत्वं तस्यानेकधोद्भूतत्वेन सर्वक्षेत्रस्थत्वं सर्वाधिपतित्वं चोक्त्वा इति हेतोरात्मान्तर्बहिश्चेति निगमनाच्चेतनाचेतनरूपता परस्यैव बोध्यत इति तत्रापि महदादीनां सांख्योक्तरीतिकस्वरूपानुपलम्भात् । तमो वा इदमेकमास तत् परे स्यादिति पाठेऽपि तत्पदेन एकस्य परामर्शात् स एवार्थः । नचात्र सप्तम्या आधाराधेयभावस्फोरणाद्विभाग एव बोध्यत इति शङ्क्यम् । सुबालोपनिषदि प्रलयप्रकरणे, पृथिव्यप्सु प्रलीयते आपस्तेजसि विलीयन्ते तेजो वायौ प्रलीयते वायुराकाशे विलीयते आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादौ विलीयन्ते भूतादिर्महति लीयते महानव्यक्ते लीयते अव्यक्तमक्षरे विलीयते अक्षरं तमसि विलीयते तम एकीभवति परस्मिन् परस्तान्न सन्नासन्न सदसदित्येतन्निर्वाणमनुशासनमिति वेदानुशासनमित्यत्र शब्दान्तरेण लयव्यतिरिक्तैकीभावस्वरूपबोधनादविभागरूपस्यैकीभावस्य वक्तुमशक्यत्वात् । नच स्वरूपैक्यं लय एकीभावस्त्वविभाग इति

वक्तुं शक्यम्।'लीङ् श्लेषण इति धात्वर्थस्य, एके मुख्यान्यकेवला इति कैवल्यरूपस्यैकशब्दार्थस्य च बोधनेनोभयत्र लक्षणाप्रसङ्गात्। एकपदस्य मुख्यार्थग्रहणे तमसोऽप्यविभागेन सत्तायां, परस्तान्न सन्नासन्न सदसदिति परेतरयार्वाक्यद्वैधानर्थक्यप्रसङ्गाच्च। उपक्रमे च, किं तदासीत् तस्मै स होवाच न सन्नासन्न सदसदिति तस्मात् तमः सञ्जायते तमसि भूतादिर्भूतादेराकाशम् आकाशाद् वायुर्वायोरग्निरग्नेराप अद्भ्यः पृथिवी तदण्डं समभवदिति सृष्टिप्राक्कालेऽपि तथा श्रावणात् तमस उत्पत्तिश्रावणाच्चाविभागस्य सांख्यप्रक्रियायाश्च ग्रहीतुमशक्यत्वात्। श्वेताश्वतरेऽपि, यदा तमस्तन्न दिवा न रात्रिर्नसन्न चासन् शिव एव केवल इत्यत्र तमोऽङ्कितकालेऽपि शिवकैवल्यश्रावणेन तमसि शिवाभेदस्यैव बोधनाच्च। तथा स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत नाहास्योद्ग्रहणायेव स्याद् यतो यतस्त्वाददीत लवणमेवेति बृहदारण्यके लवणरसयोर्घनेनाविभागस्यैव लयपदार्थत्वेन निर्द्धाराच्च। एवञ्च गर्भोपनिषद्यपि यदुक्तम्, अष्टौ प्रकृतयः षोडशविकाराः शरीरमिति। तदपि न सांख्यरीतिकतत्त्वसंग्राहकम्। किन्तु श्रौतानां ब्रह्मजन्यानामेव संग्राहकम्। तथा चूलिकोपनिषद्यपि विकारजननीं मायामष्टरूपामजां ध्रुवामित्यादिना प्रकृतिं परमात्मानं च प्रकृत्य यदुक्तं, तद्व्यग्रे, तमेकमेव पश्यन्ति परिशुद्धं विभुं द्विजाः। यस्मिन् सर्वमिदं प्रोतं ब्रह्म स्थावरजङ्गमम्। यस्मिन्नेव लयं याति बुद्बुदाः सागरे यथा इति, अग्रे च, जायन्ते बुद्बुदा इवेति च दृष्टान्तकथनात् स्वरूपैक्य एव पर्यवस्यति, न त्वविभागे। अतः प्रश्नोपनिषद्यपि सुषुप्तावस्थां प्रस्तुत्य, पृथिवी च पृथिवीमात्रा चेत्यादिना, प्राणश्च धारयितव्यं चेत्यन्तेन यानि तत्त्वान्युक्तानि तान्यपि न सांख्यरीतिकानीति बोध्यम्। तदेतदुक्तं लोके वेदे चानुपलब्धेरिति। एवं चेदमधिकरणान्तरत्वेन सिद्ध्यति। पूर्वोक्तज्ञानार्थं महदादिविचारणायां सांख्यस्मृत्यनुपयोगे पूर्वोक्तश्रुतिविरोधो भवति न वेति संशये, महर्षिप्रत्यक्षाच्च भवतीति पूर्वपक्षप्राप्तौ महर्षेस्तेषां तयोपपादने तात्पर्याभावात् तदंशेऽपि सांख्यस्मृतेर्नित्यानुमेयश्रुतिमूलकत्वाभाव इति सिद्धान्तसिद्धेरिति बोध्यम्।

रामानुजाचार्यास्तु, इतरेषाम् अतिप्रामाणिकानां मन्वादी-

एतेन योगः प्रत्युक्तः ॥ ३ ॥

साङ्ख्यस्मृतिनिराकरणेन योगस्मृतिरपि निराकृता द्रष्टव्या। योगस्य वैदिकत्वशङ्कया भेदेन निराकरणम् ॥ ३ ॥

नां कपिलदृष्टप्रकारेण तत्त्वानुपलब्धेः श्रुतिविरुद्धा कपिलोपलब्धिर्भ्रान्तिमूलेति व्याकुर्वन्ति। तन्मयाऽनुपदमेव पाञ्चवचनोपदर्शनेन व्युत्पादितम् ॥ २ ॥

एतेन योगः प्रत्युक्तः ॥ एतेनेति पदोक्तमतिदेशं व्याकुर्वन्ति। * सांख्येत्यादि * । योगस्मृतिः पातञ्जलदर्शनं, हिरण्यगर्भस्मृतिश्च, सापि प्रकृतिस्वातन्त्र्याद्यंशे भेदांशे सोपाधिकेश्वरस्वरूपांशे च निराकृतेत्यर्थः। पृथक्कया निराकरणप्रयोजनमाहुः। * वैदिकत्वशङ्कयेति * । श्वेताश्वतरोपनिषदि, त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा संनिवेश्येति पृथ्व्यप्तेजोऽनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते, न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरमित्यादिमन्त्रार्थसंवादाद् वैदिकत्वशङ्कया। इदं चातिदेशसूत्रम्। अतिदेशश्चात्रासादृश्याशङ्कायां सादृश्यप्रतिपादनरूपः। तेनात्रैव संशयादिकं बोध्यम्। योगस्मृतावीश्वरतत्त्वाभ्युपगमान्मोक्षसाधनतया वेदान्तविहितयोगस्याभिधानाद् वक्तुर्हिरण्यगर्भस्य वेदवेदान्तप्रवर्तनेऽधिकृतत्वात् तद्वाक्यस्य सर्वेषां पूज्यत्वात् पतञ्जलेरपि तथात्वात् तद्दर्शनभाष्यस्य व्यासचरणैः कृतत्वात् सांख्यतौल्याभावे योगेन समन्वयसङ्कोचो भवति न वेति सन्देहे, उक्तहेतूनां सांख्ये अभावात् तया सङ्कोचाभावेऽपि योगं सत्त्वात् श्वेताश्वतरात्मकप्रत्यक्षश्रुतिमूलत्वाच्च तेन सङ्कोचो न्याय्य इति पूर्वः पक्षः।

सिद्धान्तस्तु—अप्रज्ञातमकप्रधानकारणवादादीश्वरस्य निमित्ततामात्राभ्युपगमाद् ध्येयस्येश्वरस्योपादानताविरहेण तदीयनिर्गुणलक्षणाभावेन ध्यानस्याप्यपूर्णविषयत्वाद्धिरण्यगर्भस्य सृष्टिवैयग्र्येण हंसगीतायामिव तदंशे बोधाभावस्यापि शक्यवचनत्वाज्ज्ञानेऽपि जघन्याधिकार्यर्थं तावन्मात्रकथनस्य युक्तत्वेन तस्याः

न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ ४ ॥

बाधकोऽयं तर्कः । अस्य जगतो विलक्षणत्वादचेतनत्वा-

सङ्कोचार्हत्वान्मनोनिग्रहसाधनांशे तस्या अविरुद्धत्वेन तदीयभाष्यकरणेऽपि शेषस्य विरुद्धत्वान्न तया वेदान्तोपबृंहणस्यायुक्तत्वान्न तया समन्वयसङ्कोचः सम्भवतीति ॥ ३ ॥ १ ॥

न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥ एवं तुल्यबलविरोधेऽपि स्वाविवक्षितस्मृतेः समूलत्वशोधनेन तत्स्मृतिप्रामाण्ये निराकृते श्रुतिविप्रतिषेधं युक्त्या प्रदर्श्य प्रत्यवतिष्ठन्तं युक्त्या निराकर्तुमधिकरणान्तरमारभते । तत्र मास्तु सांख्यादिस्मृत्या समन्वयस्य बाधस्तथापि तदीयेन तर्केण बाधो भविष्यतीति पूर्वपक्षमाह सूत्रद्वयेन । तद् व्याकुर्वन्ति । * बाधक इत्यादि * । सांख्यस्मृत्या समन्वयबाधाभावेऽपि तदीयतर्केण बाधो भवति न वेति संशये समन्वयबाधकोऽयं तर्क इत्यर्थः । तर्कस्वरूपं तु, स्वोत्प्रेक्षिता युक्तिस्तर्क इति तर्काप्रतिष्ठानसूत्रे वक्तव्यम् । ननु पूर्वतन्त्रे वेदस्य परानपेक्षं प्रामाण्यं व्यासमतानुसारेण जैमिनिना औत्पत्तिकसूत्रे स्थापितमिति तर्कनिमित्तकस्यान्यापेक्षस्य कोऽत्रावकाश इतिचेदित्थम्–तत्र ह्यव्यतिरेकश्चार्थेऽनुपलब्धे इत्यनेन साध्यविषय एव तथात्वमिति प्रतीतेः सिद्धविषये वेदान्ते, मन्तव्य इति श्रुत्यन्यवाक्यैकदेशादर्शनाद् युक्तिभिरनुचिन्तनस्य च मननपदार्थत्वादत्र तर्कस्यापेक्षितत्वादस्त्यवकाश इति । सूत्रं व्याचक्षते । * अस्येत्यादि * । अचेतनत्वमन्येषामपि विलक्षणधर्माणामुपलक्षकम् । कारणपदं चांशित्वस्य । अत्र च, नेति साध्यनिर्देशः । तथाच पूर्वोक्तं चेतनं निर्दोषं ब्रह्म न जगदुपादानम् । जगद्विलक्षणत्वात् । यद् यद्विलक्षणं, तद् न तदुपादानम् । घटविलक्षणतन्तुवदिति । तथा, ब्रह्म न जीवानामंशिभूतम् । जीवविलक्षणत्वात् । यद् यद्विलक्षणं, तद् न तदंशिभूतम् । रूप्यखण्डविलक्षणसुवर्णवदिति । वैलक्षण्यञ्च, ब्रह्मणश्चेतनस्य ज्ञानात्मकस्य शुद्धस्य शब्दात् प्रमितस्य, जाड्यमोहात्मकत्वतुच्छत्वादिविशिष्टाज्जगतः प्रत्यक्षसिद्धाच्छब्दप्रत्यक्षाभ्यामेव सिद्धम् । एवं दुःखित्वाज्ञत्वादिविशिष्टाज्जीवादपि नित्यनिरव-

चेतनं न कारणम् । विलक्षणत्वञ्च शब्दात् । विज्ञातं चाविज्ञातं चेति । प्रत्यक्षस्य भ्रान्तित्वं मन्यमानस्येदं वचनम् ॥ ४ ॥

ष्यानन्दात्मकस्य तस्य वैलक्षण्यं सिद्धम् । तथाच ब्रह्म यदि जगदुपादानं जीवस्यांशि वा स्यात् तदुभयविलक्षणं न स्यात् । यतो नैवमतो नैवमित्येवं बाधकस्तर्को बोध्यः ।

भास्कराचार्यास्तु, देहेन्द्रियान्तःकरणप्राणात्मवादिमतेन तेषु कादाचित्कं चैतन्यमुपगम्य, जगद् ब्रह्मसलक्षणं ब्रह्मोपादेयत्वाद् यदेवं तदेवमिति सामान्यव्याप्तिमतानुमानेन जगतो ब्रह्मसलक्षणत्वेऽनुमिते पूर्वोक्तहेतोः स्वरूपासिद्धत्वमाशङ्क्य यदि देहेन्द्रियादीनामिवाकाशादीनां पाषाणान्तानां चैतन्यमनुद्भूतं स्यात् तद्वत् कदाचिदुपलभ्येत । नचैवमुपलभ्यते । हिताहितप्रवृत्तिनिवृत्त्यर्थक्रियायाः कदाप्यदर्शनाच्चैतन्यस्य च तदनुमेयत्वादतस्तेषु चैतन्यस्य प्रत्यक्षानुमानाभ्यां बाधितत्वेन स्वरूपासिद्धिं निरस्य, विलक्षणत्वादिति हेतुं साधितवन्तः । तेन शरीरादिष्वपि चैतन्यसाधकहेतूनां साधारणत्वं व्यतिरेकव्यभिचारादिकं चोद्भाव्य तेष्वप्यचेतनत्वमेव साधनीयमिति तदीयपूर्वपक्षाशयः । शेषं विवृण्वन्ति । * विलक्षणत्वमित्यादि * । सूत्रे अस्येतिपदं देहलीदीपवदग्रेऽपि सम्बध्यते । तथात्वं च विलक्षणत्वम् । ननु विलक्षणत्वस्य प्रत्यक्षसिद्धत्वात् तेन हेतुना ब्रह्मणो जगत्कारणत्वे जगतश्च तत्कार्यत्वे दूषिते किमिति शब्देन विलक्षणत्वसाधनमित्याकाङ्क्षायामाहुः । * प्रत्यक्षस्येत्यादि * । प्रत्यक्षस्य भ्रान्तित्वं मन्यमानस्य सांख्यैकदेशिनस्तादृशं वेदान्तिनं प्रति स्वमतोपष्टम्भकमिदं विलक्षणत्वस्य श्रौतत्वबोधकं वचनं चेतनाचेतनविभागस्य श्रुतावपि दर्शितत्वादित्यर्थकम् । तथाचायं तर्कादिरप्रामाणिकः, श्रुतिविरुद्धत्वाद्, बाह्यतर्कादिवदित्यप्रामाण्यसाधने, प्रामाणिकः श्रुतितात्पर्यगोचरत्वात् सत्तर्कादिवदिति प्रतिसाधनेन तस्याभासीकरणार्थमेतत्कथनमिति भावः ।

रामानुजाचार्यास्तु जीवे ब्रह्मवैलक्षण्यबोधनायापि श्रुतिमाहुः । समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । अ-

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥ ५ ॥

मृदब्रवीत्, आपोऽब्रुवन्, तत् तेज ऐक्षत, ते ह वाचमूचुस्त्वं न उद्गायेति । एवमादिश्रुतिभिर्भूतेन्द्रियाणां चेतनत्वं प्रतिपाद्यत इत्याशङ्क्य तुशब्देन निराकरोति तत्तदभिमानिन्य एव

नीशश्चात्मा बद्ध्यते भोक्तृभावादिति । तथाच पादादिघटशतघमपि नं युक्तमिति तदाशयः । तथाचानन्यापेक्षस्यातीन्द्रियार्थगोचरस्यापि शास्त्रस्यावश्यं तर्कसापेक्षता । सर्वेषां प्रमाणानां क्वचिद्विषये तर्कानुगृहीतानामेवार्थनिश्चायकत्वम् । तर्को नाम अर्थस्वभावविषयेण सामान्यविषयेण वा निरूपणेन प्रामाण्यव्यवस्थापकं तद्इतिकर्तव्यतारूपम् ऊहापरपर्यायं ज्ञानम् । शास्त्रस्य त्वाकाङ्क्षायोग्यतासन्निधिज्ञानाधीनप्रामाण्यस्य सुतरां तदपेक्षा । अन्यथा तद्रहितमपि वाक्यं प्रमितिमुत्पादयेत् । अत एव मनुनापि, यस्तर्केणानुसंधत्ते स धर्मं वेद नेतर इत्युक्तम् । आत्मविषये, मन्तव्य इति वेदान्तश्रुत्याप्युक्तम् । किञ्च । वेदान्तैर्जगतो ब्रह्मोपादानताप्रतिपादननिश्चये घटादीनां चैतन्यशक्तेश्चैतन्यस्य च तेष्वनुद्भूतसत्ताया निश्चयस्तन्निश्चये च सति वेदान्तैर्जगतो ब्रह्मोपादानताप्रतिपादननिश्चय इत्यन्योन्याश्रयः । तस्मान्न विलक्षणयोः कार्यकारणभाव इत्याप्याहु ॥४॥

अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥ ननु किं सालक्षण्यं प्रकृतिविकारयोरभिप्रेतं यदभावाज्जगतो ब्रह्मोपादानत्वासम्भवं ब्रूषे । न तावद्धर्मसालक्षण्यम् । मृत्पिण्डघटयोः पिण्डत्वाद्यभावस्य प्रत्यक्षतो निश्चयात् । अथ यत्किञ्चिद्धर्मसालक्षण्यं, तदा तु सत्तया सालक्षण्यं वर्तत एवेति । यदि च येन धर्मेण कारणभूतं वस्तु वस्त्वन्तराद् व्यावृत्तं तेन धर्मेण सालक्षण्यमभिप्रेतम् । तादृशं चात्र चेतनत्वम् । तदभावाच्च जगतः कार्यत्वमिति ब्रूषे, तदा तु, मृदब्रवीत्, आपोऽब्रुवन्, ते ह प्राणा वाचमूचुः, ते ह प्राणा अहंश्रेयसे विवदमाना ब्रह्माणं जग्मुरित्यादिषु मृदादीनां चेतनक्रियाश्रवणात् पुराणेषु नदीसमुद्रादीनामपि चेतनत्वस्मरणाच्च तेष्वपि सालक्षण्यमाश्रयणीयम् । तर्के श्रुत्यनुग्रहस्य त्वयाप्यङ्गीकारादित्याशङ्कायामुत्तरं पठतीत्याशयेन व्याकुर्वन्ति । * मृदित्यादि * । * निराकरोतीति * ।

देवतास्तथा वदन्ति । कुतः ? । वेद एव विज्ञातं चाविज्ञातं चेति चेतनाचेतनविशेषोक्तेः । अनुगतत्वाच्च । अग्निर्वाग् भूत्वा मुखं प्राविशदित्येवमादिविशेषानुगतिभ्यामभिमानित्वमित्यर्थः । देवतापदं च श्रुत्यन्तरे ॥ ५ ॥

दृश्यते तु ॥ ६ ॥

परिहरति । तुशब्दः पक्षं व्यावर्तयति । दृश्यते हि कार्यकारणयोर्वैरूप्यम् ।

पूर्वपक्षी निराकरोति । * कुत इति * । अभिमानिन्यो देवता एवाभिप्रेता इति कुतोऽवगम्यते । विशेषपदं व्याचक्षते । * वेद एवेत्यादि * । तथाच यदि चेतनत्वं सर्वस्याभिप्रेयाद्, यदि चोकवाक्येष्वभिमानिन्यो देवता अभिप्रेता न स्युस्तदोक्तश्रुतौ विभागं विशेषरूपं न ब्रूयात् । अग्निर्वागित्यादिना अनुप्रवेशरूपामनुगतिं च न ब्रूयात् । अतस्तयेत्यर्थं इति । विशेषपदस्यार्थान्तरमाहुः । * देवतापदमित्यादि * । हन्ताहमिमास्तिस्रो देवता इति देवतापदं तेजोऽबन्नानां विशेषणं छान्दोग्ये । एता ह वै देवता अहंश्रेयसे विवदमाना इति कौषीतकिब्राह्मणे च प्राणानां विशेषणमित्यर्थः ॥ ५ ॥

तथाच जगतोऽचेतनत्वेन विलक्षणत्वाद् ब्रह्मोपादेयत्वानुपपत्तेस्तर्कानुगृहीतस्मृत्यनुरोधेन जगतः प्रधानोपादेयत्वं प्रतिपाद्यते । एवं जीवेऽपि भेद एव प्रतिपाद्यते । नित्यत्वादिकथनात् । ततश्च ईक्षत्यादय उपादानत्वप्रतिपादकाः, पादत्वादयोऽंशत्वप्रतिपादकाश्च सत्प्रतिपक्षत्वादाभासाः । तस्मात्, कारणत्वेन चाकाशादिष्विति सूत्रे यद् यथाव्यपदिष्टस्यकारणत्वमुक्तं, तद् प्रत्यक्षविरोधादसङ्गतमित्येवं प्राप्ते सिद्धान्तसूत्रं पठन्ति ।

दृश्यते तु ॥ तद् व्याचक्षते । * तुशब्द इत्यादि * । * वैरूप्यमिति * । वैलक्षण्यम् । अत्रायमर्थः । विलक्षणत्वेन ब्रह्मणो जगत्कारणत्वं दूषयतो भवतः, किं कार्यकारणयोः सर्वधर्मैः सारूप्यं विवक्षितम् ? उत केनचिद् धर्मेण ? । अथवा येन धर्मेण कारणं व-

केशगोमयवृश्चिकादौ चेतनादचेतनोत्पत्तिनिषेधे तदंशस्यैव निषेधः । तुल्यांशसम्पत्तिश्चेत् प्रकृतेऽपि सदंशः ॥ ६ ॥

वस्त्वन्तराद् व्यावर्तते तेन धर्मेण ?। नाद्यः । लोकविरुद्धत्वात्, सर्वांशसारूप्ये कार्यकारणभावहानिप्रसङ्गात्, प्रकृतिगतानां गुणसाम्यत्वसर्वमूलत्वादीनां विकृतिष्वभावेन विलक्षणतया प्रकृतेरपि कारणताभङ्गप्रसङ्गात्, तत एव ब्रह्मणः कारणत्वसिद्ध्या हेतोरर्थान्तरसाधकत्वापत्तेश्च । न द्वितीयः । अतिप्रसङ्गापत्तेः, सच्चिदानन्दरूपाद् ब्रह्मणः सदंशाज्जडानां चिदंशाज्जीवानाम् आनन्दांशादन्तर्यामिणां व्युच्चरणमिति तत्तत्सारूप्यस्य तत्र तत्र विद्यमानत्वाद् भवदुक्तहेतोः स्वरूपासिद्धत्वाच्च । न तृतीयः । देहादीनां येन धर्मेण वस्त्वन्तराद् व्यावृत्तिस्तेषां धर्माणां देहत्वगोमयत्वादीनां केशवृश्चिकादिष्वभावेन तेषामप्यकारणत्वप्रसङ्गात् । चेतनाद्देहादचेतनस्य केशनखदन्तादेरचेतनाद् गोमयाच्चेतनस्य वृश्चिकादेरुत्पत्तिदर्शनेन हेतोः साधारणत्वाच्च । यदि च देहाज्जडात् केशादीनां तादृशां, गोमयाज्जडानां वृश्चिकदेहानामेवोत्पत्तिरित्युच्यते तदा तूक्तमेव स्वरूपासिद्धत्वम् । तस्मादनेन ब्रह्मकारणत्वदूषणं, न वा मृदादीनां ब्रह्मकार्यत्वदूषणमिति । इदं च तदुक्तं हेतुं तस्य श्रुतिसिद्धत्वं चोपगम्य दूषितम् । माध्वव्यतिरिक्तानां सर्वेषामप्येतदेव मतम् । तृतीयसुबोधिन्यां वैलक्षण्यस्य भ्रान्तप्रतीतत्वं, न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं भवातीति श्रुतिबलादङ्गीकृत्य वैलक्षण्यानुपगमेन दूषितम् । वैलक्षण्यमन्यस्मादन्तरा दृश्यते, न तु वैलक्षण्यमस्तीति । तदेतदत्रापि सूचयन्ति । * चेतनादित्यादि * । * तदंशस्येति * । अचेतनांशस्य । तथाच भ्रान्तप्रत्यक्षालम्बनेन श्रुतिप्रत्यवस्थानं न युक्तमित्यर्थः । सलक्षणात् सलक्षणोत्पत्तेर्यद्युभयोर्दर्शनादुक्तदूषणममन्वानं प्रति समाध्यन्तरमाहुः । * तुल्येत्यादि * । * चेदिति * । विवक्षिता चेत् । तथाच, यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् सम्भवतीह विश्वमिति मुण्डकश्रुतौ सतः सदुत्पत्तिश्रावणेन दर्शनानुग्रहेऽपि नास्माकं दोष इत्यर्थः । अस्मिन् पक्षेऽभिमानिव्यपदेशसूत्रमपि सिद्धान्तसूत्रम् । तदर्थस्तु, विज्ञानं चाविज्ञानं चेत्यत्र विज्ञानशब्दोऽभिमानिव्यपदेशोऽभिमन्तव्याद् वैलक्षण्यबो-

धनार्थो, न तु कारणवचनः। कुतः? विशेषानुगतिभ्याम्। सच्च त्यच्चाभवदित्यादिना कार्यस्यैवेतरेतरविशेषात्। सत्यमभवदिति कारणरूपस्यानुगतेश्चेति प्रत्यक्षविरोधपरिहाराय द्वितीयं सूत्रम्। एवमत्र व्याख्यानद्वयेन श्रुतौ युक्तिविरोधः परिहृतः। तेन यथाव्यपदिष्टस्य कारणत्वं निष्प्रत्यूहम्। एतच्च नृसिंहतापनीयादपि सिध्यति। तथाहि। नवमखण्डे आत्मनां परमात्मना शुद्धाभेदं जिज्ञासुभिर्देवैः प्रजापतिर्विज्ञापितस्तान् प्रति ब्रह्मवादमुपदिदेश। तत्रोपद्रष्टाऽनुमन्तैष इत्यनेनाहंप्रत्ययगम्यमात्मानमनूद्य सिंहश्चिद्रूप एवेति तस्य पराभेदं विधाय कथमेवमित्याकाङ्क्षायामेतस्य परभेदेन स्वस्योपद्रष्टृत्वाभिमानो वृथेति बोधनायाऽविकारो ह्युपलब्धा सर्वत्रेति परमात्मन एवोपद्रष्टृत्वमनेन भ्रमात् स्वस्मिन्नभिमन्यते इति बोधयित्वा, न ह्यस्ति द्वैतसिद्धिरात्मैव सिद्धो ह्यद्वितीय इत्यभेदं निगमयामास। तत्र भेदः प्रत्यक्षसिद्ध इति नाद्वैतसिद्धिरित्याशङ्कायां प्रत्यक्षस्य भ्रमत्वाय मायया ह्यन्यदिवेति मायारूपं दोषं तत्र हेतुत्वेनाह। अन्यदिव प्रतीयते, न त्वन्यादित्यर्थः। ततो, नन्वस्तु मायाया दोषत्वं, तथाप्यन्यस्याभावं तया किं प्रत्याय्यमान हि खपुष्पमिवात्यन्तासत् प्रत्याययितुं शक्यते। अतः प्रतीतिबलात् सिद्धेऽन्यस्मिन्नयं जीवो भिन्न एव मन्तव्य इति कथमस्य परमात्माद्वैतसिद्धिरित्याकाङ्क्षायां तत्साधनाय पुनराह। स वा एष आत्मा पर एवैषैव सर्वमिति। ततो, ननु प्रतीतस्य बाधं विना वाक्यमात्रेण मायिकत्वं न प्रतिपत्तुं शक्यत इत्याकाङ्क्षायां तत्साधनाय पुनराह। तथाहि प्राज्ञे इति। यथा तैजसे प्रतीयमानं सर्वं प्राज्ञे बाध्यत इति मायिकं तथा विश्वस्मिन् प्रतीतमपि तुरीये बाध्यत इति मायिकं मन्तव्यम्। तेन भेदोऽपि मायिक इत्यर्थः। तदेतद् व्याकरोति। सैषाऽविद्या जगत्सर्वमात्मा परमात्मैवेति। ततो, ननु तत्र निद्रावशाद्ज्ञानसत्ताऽस्तीति तत्रत्यस्य सर्वस्य भेदस्य चाविद्यकत्वं युक्तम्। जाग्रति सा नास्तीति कथं सर्वस्य मायिकत्वं प्रतिपत्तव्यमित्याकाङ्क्षायां जाग्रत्यपि मायाकृतं पराभवं मायासत्तां चानुभावयति। स्वप्रकाशोऽप्यविषयज्ञानत्वाज्जानन्नेव ह्यत्र न विजानात्यनुभूतेर्माया च तमोरूपानुभूतेरिति। अत्र अविषयज्ञानरूपत्वं जीवस्वरूपस्य स्वप्रकाशत्वे जानत्वे च हेतुः। तथाच अहमज्ञ इति विशिष्टानुभवबलात् तत्कृतः पराभवस्तस्याः स्वरूपं सत्ता

तुच्छत्वं च यद् भासते तत् तेषामेतद्व्यतिरिक्तत्वादेतदीयम् । किञ्च । क्षेत्रप्रदर्शनोत्तरं द्वयोराभासेन करणोक्त्या आभासभूतयोर्जीवेश्वरयोर्न द्रष्टृत्वं किन्तु परमात्मन एवोभयद्रष्टृत्वम् । स्वद्वैधीभावोक्त्या च त्रिविधाभासाधारत्वं बोधितम् । इयं च परमात्मनः सकाशान्नित्यनिवृत्तेति, न तदुपाधिः, किन्तु जले चन्द्रकिरणवदविभक्त एव योऽशोऽस्यां प्रविशति तदुपाधिर्भूत्वा अंशानां परस्परं परमात्मन सकाशाच्च भेदं मौढ्यादिधर्मवैशिष्ट्यं च दर्शयति । तेन भेदरूपोऽपि तस्याः परिणाम इत्यर्थः । ततस्तस्याः कथमेवंरूपतेत्याकाङ्क्षायां तस्याः स्वरूपमाह । सैषा चित्रा सुदृढा बह्वङ्कुरा स्वयं गुणभिन्ना अङ्कुरेष्वपि गुणभिन्ना सर्वत्र ब्रह्मविष्णुशिवरूपिणी चैतन्यदीप्तेति । अत्र चित्रेत्यादिभिश्चतुर्भिः क्रमेण जगतो विचित्राकारे जडत्वे मोहात्मकत्वे संख्याकृते आनन्त्ये तुच्छत्वे च तत्स्वभावो हेतुत्वेनोक्तः । अङ्कुरेष्वपि गुणभिन्नेत्यनेन तदङ्कुरभूतानां गुणानामपि प्रत्येकं सङ्घातत्वं नानाप्रकारकव्यष्टिप्रस्तारप्रयोजकत्वायोक्तम् । एतावदुपादानतानिर्वाहकं सर्वत्र ब्रह्मविष्णुशिवरूपिणीति सृष्ट्यादित्रिविधकर्तृत्वनिर्वाहकम् । तच्च रूपत्रयं नास्याः, किन्त्वेतद्रूपत्रयमस्यां ब्रह्मण इति बोधनाय चैतन्यदीप्तेत्युक्तम् । तदेतन्निगमयति । तस्मादात्मन एव त्रैविध्यं योनित्वमपीति । यस्मादाभासाधारभूता माया चैतन्यदीप्त्यैव ब्रह्मादित्रिरूपवती तस्मादात्मन एव त्रैविध्यम् । आभासाभास्ययोः समानाकारत्वस्यैवानुभवात् । अत्र त्रैरूप्यमिति वक्तव्ये त्रैविध्यमिति यदुक्तं, तेनाविद्यायामपि देवमनुष्यासुरभेदभिन्नत्रिविधजीवप्रयोजकं रूपमप्यात्मन एवेति बोधितम् । यस्माच्च चैतन्यदीप्त्या दर्शयित्र्येव, न तु कर्त्री, तस्माद् योनित्वं निमित्तकारणत्वमप्यात्मन एवेति । तथाचाभासनिमित्तत्वं जगन्निर्मातृत्वं च शुद्धस्यैव साकारस्येति बोधितम् । तदेतद् व्युत्पादयन् पूर्वमाभासयोर्वैलक्षण्यमाह । अभिमन्ता जीवो नियन्तेश्वर इति । तत्रोभयोराभासत्वे तुल्यत्वे कथमेवं वैलक्षण्यमित्याकाङ्क्षायां तत्प्रयोजकं रूपमाह । सर्वाहंमानी हिरण्यगर्भश्चिद्रूप ईश्वरवद् व्यक्तचैतन्यः सर्वगो हीति । हिर्हेतौ । यस्मादयं सर्वाहम्मानी सर्वगः समष्टिस्तस्मादविद्याव्यष्ट्युपाधयो जीवास्तत्स्वदभिमन्तारः । यस्मादीश्वरवद् व्यक्तचैतन्यस्तस्मात् ते नियन्तारो,

यस्मात् त्रिरूपस्ततस्तदङ्कुरोपाधयो प्रज्ञादयोऽपि प्रत्येकं तादृशाः। दृष्टान्तीभूत ईश्वरः को वेत्यत आह। एष ईश्वरः क्रियाज्ञानात्मेति। एष इति प्रक्रान्तपरमात्मा। तथाच तस्य क्रियात्मत्वात् तत्प्रतिरूपोऽयं सर्वाऽहम्मानी, तस्य ज्ञानात्मत्वादयं व्यक्तचैतन्य इत्यर्थः। एवं योनित्वं समर्थयित्वा कार्यकारणयोः सालक्षण्यं वैलक्षण्यं चाह। सर्वं सर्वमयं सर्वे जीवाः सर्वमयाः सर्वावस्थासु तथाप्यल्पा इति। तेन यन्मूले तदेव कार्येषु स्वल्पमिति बोधितम्। एवं कार्यमाभासश्च व्युत्पादितः। तेन कारणत्वमाभासत्वं च दृढीकृतम्। अतः परं जीवात्मानं मुख्यवृत्त्या प्रणवप्रतिपाद्यत्वं निगमयितुं परमात्मन एवावस्थाभेदं क्रियाभेदं चाह। स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्याऽमूढो मूढ इव व्यवहरन्नास्ते माययैव तस्मादद्वय एवात्मेति। तथाच यः स्रष्टा स एवांशेन प्रविश्य द्विधा व्यवहरति मायया, न तु द्विधा भवतीति मूलविचारे स एवार्थः स्वस्वरूपं प्रणवप्रतिपाद्यतां च नानुसन्धत्ते, किन्त्वस्ति तद्भिन्न इत्यर्थः। एतदेवाद्वयत्वं दृढीकर्तुं द्वादशस्वरूपलक्षणान्यप्याह। सन्मात्रो नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वय आनन्दः परः प्रत्यगेकरसः प्रमाणैरेतैरवगत इति। अत्राभासस्यापि प्रसक्त्वात् तद्व्यवच्छेदार्थेकरसपदम्। अयमेव च मुख्यो हेतुः। एतेन परत्वे सिद्धे तत आनन्दत्व इत्येवं द्वादशलक्षणकत्वसिद्धौ निष्प्रत्यूहं परमात्माभेदसिद्धया प्रणवप्रतिपाद्यत्वं निगमितं भवतीति। एवं सजातीयद्वैते निराकृतेऽपि जगतोऽविद्यायाश्च विद्यमानत्वाद् विजातीयद्वैतापत्त्या शुद्धाद्वयासिद्धौ जीवोऽपि नित्यभिन्न एवाङ्गीकार्यः स्यादित्याशङ्कां निवारयितुं जगतोऽविद्यायाश्च सद्रूपत्वेन ब्रह्माभेदमाह। सत्तामात्रं हीदं सर्वं सदेव पुरस्तात् सिद्धं हि ब्रह्म न ह्यत्र किञ्चनानुभूयते नाविद्यानुभवात्मनि स्वप्रकाशे सर्वसाक्षिण्यविक्रियेऽद्वय इति। हि यतो हेतोः सत्तामात्रमिदं सर्वं सृष्टिपूर्वकाले सदेव। यथा पृथुबुध्नोदराद्याकारा वस्तुतो मृद्धर्मा इति घटादयो मृन्मात्रत्वान्मृदेव तथा सति हि निश्चयेन विकारस्य व्यवहारार्थतया वस्तुतः सदात्मकत्वाद् ब्रह्मत्वं सिद्धम्। हि यतो हेतोर्यत् सविक्रियं तदादावन्ते चाविक्रियम्। अत एतस्य सत आद्यन्तावस्थाविचारे यत् किमपि कार्यमविद्या च तत् सत्त्वेनैवानुभूय-

ते, न तु प्रतिनियतेन तेन तेन रूपेणातो विजातीयद्वैतस्याप्यभावाच्छुद्धाद्वैतसिद्धिरित्यर्थः । तदेतत् स्वयमनुभवँस्तानप्युपदिशति । पश्यतेहापि सन्मात्रमसदन्यदिति । इहापि जडमोहात्मके जगत्यपि अन्यत्वेन प्रतीयमानं यज्जडादिरूपत्वं तदसत् । अतस्तदनादृत्य सर्वं सन्मात्रं पश्यतेत्यर्थः । ननु जडादिरूपताप्याकारादिवदस्मिन्नौत्पत्तिकी प्रतीयत इति सन्मात्रत्वमवधारणीयमित्याकाङ्क्षायां तदवधारणप्रकारमाह । सत्यं हीत्थं पुरस्तादयोनि स्वात्मस्थमानन्दचिद्घनं सिद्धं ह्यसिद्धं तदिति । हि यतो हेतोः सत्यं सद्वस्तु पुरस्तात् सृष्टिपूर्वकाले, इत्थं सर्वाकारम्, अयोनि अजन्यं, स्वात्मस्थं स्वप्रतिष्ठम्, आनन्दचिद्घनम् आनन्दचिदाकारमेव सिद्धम् । हि अतो हेतोर्निश्चयेन वा तज्जडमोहात्मकत्वमसिद्धम् । तथाचेदानीं जडादिरूपताया औत्पत्तिकत्वेन प्रतीयमानत्वेऽप्यविद्याभिभवविरहदशायामप्रतीतेरान्तरालिकमेव तदित्यर्थः । एवं तस्यान्तरालिकत्वं निगमयित्वा सर्वस्य ब्रह्मात्मकत्वमुपसंहरति । विष्णुरीशानो ब्रह्माऽन्यदपि सर्वं सर्वगमिति । यत् सर्वगं कारणभूतं ब्रह्म तदेव विष्ण्वादिरूपं घटादिरूपं चेतनाचेतनात्मकमित्यर्थः । एवं परमात्मनः सर्वरूपत्वं निगमयित्वा तदात्मकत्वेनात्मन ओतत्वाय सर्वस्यात्मरूपतामात्मनो ब्रह्मधर्मवत्तां चाह । सर्वमत एव शुद्धोऽस्याद्यस्वरूपी शुद्ध-सुखरूप आत्मेति। अत एव ब्रह्मात्मकत्वादेव सर्वंशुद्ध आत्मा एवंरूपश्चेत्यर्थः । एतदग्रे अनुज्ञात्रनुज्ञाऽविकल्परूपत्वमात्मनो ब्रह्माभेदाय प्रतिपादितम् । अविद्याया अनुज्ञायामन्तर्भावश्च प्रतिपादितः । तत् सर्वं मत्कृतनृसिंहतापनीयदीपिकातोऽवगन्तव्यम् । अत्र प्रयोजनाभावान्नोच्यते । इदमत्र प्रसङ्गादुक्तम् ।

माध्वास्तु, न विलक्षणत्वादितिसूत्रं पठित्वा ततो, दृश्यते त्विति सूत्रं पठन्ति । द्विसूत्रमधिकरणं चाहुः । श्रुतेस्तदनुसारिस्मृतेश्च न पाशुपतादिस्मृतिवदप्रामाण्यम् । कुतः?। विलक्षणत्वात् । नित्यत्वेन पुरुषाजन्यतया तद्वैलक्षण्यात् । अस्य वेदस्य तथात्वं नित्यत्वं च शब्दात् । वाचा विरूपनित्ययेत्यादिरूपात् स्वतः प्रामाण्याच्च । अन्यथाऽनवस्थितेरिति चार्थमाहुः । ततोऽभिमानिव्यपदेशासूत्रं पठित्वा, दृश्यते चेत्यधिकं सूत्रं पठन्ति । तदपि सूत्रद्वयात्मकमधिकरणान्तरमित्याहुः । तत्रापि, वेदः प्रमाणं न, सृष्ट्य-

असदितिचेन्न प्रतिषेधमात्रत्वात् ॥ ७ ॥

श्रुतौ कारणत्वेनासदुक्तमितिचेन्न प्रतिषेधार्थमेव वचनम् ।

वीदित्यादौ प्रत्यक्षविरुद्धमादित्वादिति पूर्वपक्षनिरासं तुना कृत्वा, मृदब्रवीदित्यादिषु तदभिमानिव्यपदेशस्तासां विशेषानुगतिभ्यां सामर्थ्यव्यापकत्वाभ्यामङ्गीक्रियतेऽतो न प्रत्यक्षविरोधः । तासां सामर्थ्यं च महद्भिर्दृश्यतेऽतः प्रत्यक्षविरोधाभावाच्च श्रुतिप्रामाण्यमत्र इत्यर्थश्चाहुः ॥ ६ ॥

असदिति चेन्न प्रतिषेधमात्रत्वात् ॥ पूर्वाधिकरणेन श्रुतौ युक्तिविरोधं परिहृत्य समाकर्षसूत्रोक्तस्यार्थस्योपष्टम्भार्थं श्रुत्यन्तरे पुनर्विप्रतिषेधान्तरमाशङ्क्य समाधत्ते । * असदित्यादि * । तद् व्याकुर्वन्ति । * श्रुतावित्यादि * । असद्वा इदमग्र आसीदिति श्रुतावसतः सकाशात् सृष्टिरुच्यते । असच्च सद्भिन्नम् । अभावो वाऽलीकं वा । अतस्तदेव कारणमितिचेन्न । कुतः ? । प्रतिषेधमात्रत्वात् । प्रतिषेधस्य मात्रमवधारणं येन तत् तादृशं तत्त्वात् । वाक्यान्तरस्य तन्निषेधावधारकत्वात् । छान्दोग्ये, तद्धैक आहुरसदेवेदमग्र आसीदित्यनेन मतान्तरीयमसदनूद्य, कुतस्तु खलु सौम्यैवं स्यादित्यादिना निषिद्ध्यते । एवं नानाविधं जगत् कुतो हेतोरेकस्मादभावात् स्यात् । न ह्येकस्मादभावान्नानाविधं कार्यं क्वापि दृष्टम् । येन तथा कल्प्येत । येऽप्यभावस्य कारणत्वं वदन्ति तेऽपि प्रागभावस्य नानात्वं वदन्तीति । अथालीकं दूषयन्ति । असतोऽलीकात् कथं सज्जायेतेति । न हि खपुष्पात् किञ्चिज्जायते । किञ्च । यद्यसतः सतश्च विकल्पेन कादाचित्कं कारणत्वमभिप्रेयात्तदाऽत्रमितिवद् वदेत् । न तु युक्तिपुरःसरं दूषयेत् । अतस्तत्र नासतः कारणत्वमुच्यत इति न विप्रतिषेधः । अतस्तत्र यदसत्पदं तद् भावविकारात्मकसत्तारहित्यबोधनार्थमित्यर्थः । एवञ्च, नासदासीन्नोसदासीदिति भाववृत्तसूक्तेऽप्यसत्पदेन भावविकारभूतसत्तारहिततया सांख्याद्यभिमतं प्रधानाद्यभिप्रेत्य तन्निषिद्ध्यते । सत्पदेन च भावविकारभूतसत्तायुक्तं कार्यमभिप्रेत्य तन्निषिद्ध्यते ।

कथमसतः सज्जायेतेति । कार्यस्य वा पूर्वविप्रतिपेधो ब्रह्मकारणत्वाय ॥ ७ ॥

न सन्नासन्न सदसदिति सौबालश्रुतावपि सदसत्पदेन व्यक्ताव्यक्तात्मकं शब्दब्रह्म निषिद्ध्यते । शब्दब्रह्मात्मनस्तस्य व्यक्ताव्यक्तात्मनः पर इति तृतीयस्कन्धे शब्दब्रह्मणस्तथात्वोक्तेः । अतोऽसद्ब्रेति वाक्ये असतः कारणत्वं नोच्यते । नापि, नासदासीदित्यादौ मूलसतः कारणत्वं निषिद्ध्यते, येन श्रुतिविप्रतिपेधः स्यात् । अतः शब्दसाम्यादेव ब्रह्म इत्यर्थः । यद्यपि समाकर्षसूत्रेऽयमर्थः सिद्धस्तथापि समाकर्षे हेतुः सूत्रकृता तत्र नोक्तः । अत्र त्वसन्निषेधे हेतुरुक्तः सोऽन्यत्राप्युन्नेयः । तत्तत्प्रतिपेधावधारकाणां वाक्यानां तत्रैवोदाहृतत्वादिति । एवं स्वमतेन व्याख्याय प्रस्थानान्तरीयव्याख्यानसङ्ग्रहायाहुः । * कार्यस्येत्यादि * । वाशब्दोऽनादरबोधनाय । एतस्यार्थस्य असद्व्यपदेशसूत्रे प्रपञ्चनीयत्वादिति । उक्तश्रुतौ, इदं कार्यमुत्पत्तेः पूर्वमसदासीदित्युच्यते । तथाच कार्यस्योत्पत्तेः पूर्वकाले सत्ताप्रतिषेधो ब्रह्मकारणत्वबोधनायेति सत्कार्यवादः श्रुतिविप्रतिषिद्ध इति चेन्न । कुतः ? प्रतिषेधमात्रत्वात् । असद्ब्रेति वाक्यस्य कार्यसत्तानिषेधावधारकत्वात् । न ह्ययं निषेधः प्रागुत्पत्तेः कार्यसत्तां निषेद्धुं शक्नोति । इदानीमपि कार्यस्य कारणात्मनैवात्मलाभात् प्रागप्युत्पत्तेस्तद्भावस्य बाधाभावेन कार्यत्वे परिदृश्यमानं यदागन्तुकं स्थूलं रूपं तन्निषेधावधारकत्वात् । तथाच न सत्कार्यवादः श्रुतिविप्रतिषिद्ध इत्यर्थः । नच कार्यगतस्य व्यवहार्यरूपस्यागन्तुकत्वे तस्य पूर्वमसत्त्वात् तद्दृष्टान्तेनासत्कार्यवादः पुनः प्रसज्यत इति वाच्यम् । कारणे तस्यापि सत्त्वात् । नच तादृशव्यवहारापत्तिस्तर्हीति वाच्यम् । तादृशभगवदिच्छाभावादनुपपत्तेः । नच तादृशेच्छाभावे मानाभावः । इच्छायाः कार्यकोन्नेयत्वेन कार्याभावानुभवस्यैव तत्र मानत्वात् । इदं यथा तथा विद्वन्मण्डनीयाविर्भावतिरोभाववादविवरणे निपुणतरमुपपादितमिति नात्र प्रपञ्च्यते । इदञ्चात्र वैषम्यनैर्घृण्यसूत्रवत् परप्रसिद्ध्या परो बोधनीय इति न्यायेनोक्तम् । वस्तुतस्तु तत्र पूर्वानुवाके सोऽकामयतेत्यादिना या सृष्टिरुक्ता तस्या असाधु-

अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ ८ ॥

पूर्वपक्षमाह । अपीतिर्लयः । कार्यस्य कारणलये तद्वत् प्रसङ्गः । स्थौल्यसावयवत्वपरिच्छिन्नत्वाशुद्धत्वादिधर्मसम्बन्धावश्यकत्वादसमञ्जसं ब्रह्मकारणवचनम् ॥ ८ ॥

त्वमत्र प्रतिपाद्यते । सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते इति गीतावाक्येन सत्पदस्य साधुवाचकत्वे असत्पदस्यासाधुवाचकताया अपि युक्तत्वात् । अत एवात्र सुकृतत्वं ब्रह्मण उच्यते, रसत्वं च । रसस्यानन्दरूपत्वं चेति सर्वं युज्यते । पूर्वोक्तायां तथात्वोक्त्यभावादिति दिक् । इदं च पुष्टिप्रवाहमर्यादायां फलाध्यायचतुर्थपादे च विवृतमिति नात्र मत्कल्पनेति बोध्यम् । तथा सत्यस्मिन् पक्षे प्रतिषेधमात्रत्वादित्यस्य साधुत्वप्रतिषेधमात्रत्वादित्यर्थः संगृहीतो बोध्यः । तथाचासच्छब्दस्य स्वार्थाऽव्यावनं यदि नेष्यते तदापि छान्दोग्ये असत्पदस्य निषेध्यपरत्वम् । तैत्तिरीये तु प्रपञ्चस्थूलावस्थाभावबोधनपरम् । प्रपञ्चविशेषस्यासाधुताबोधनपरत्वं वा । अतः समाकर्षानङ्गीकारेऽपि न ब्रह्मकारणताविरोध इत्यर्थः ।

रामानुजाचार्यास्तु, न विलक्षणेति सूत्रोक्तयुक्त्या जगतो ब्रह्मवैलक्षण्ये ब्रह्मणोऽपि जगद्विलक्षणत्वात् तत उत्पन्नस्य जगतो द्रव्यान्तरत्वादसत एवोत्पत्तिः प्रसज्ज्यत इत्येवमस्मिन् सूत्रे असदिति भागेनाऽऽशङ्क्य, न प्रतिषेधमात्रत्वादिति भागेन परिहरतीति । इदयते त्वित्यस्य पूर्वसूत्रस्य कार्यकारणयोः सालक्षण्यनियमनिषेधमात्रपरत्वान्न कार्यस्य कारणाद् द्रव्यान्तरत्वम् । कृमिमक्षिकयोरिव वैलक्षण्याभावात् कुण्डलहिरण्ययोरिव द्रव्यैक्यसत्त्वादित्यर्थमाहुः ॥ ७ ॥

अपीतौ तद्वत् प्रसङ्गादसमञ्जसम् ॥ पूर्वसूत्रेणासत्कारणवादं परिहृत्य श्रुत्यविरोधस्थापनाद् ब्रह्मकारणवादे स्थिरीकृते पुनस्तत्र युक्त्या प्रत्यवतिष्ठत इत्याशयेन सूत्रमवतारयन्ति * पूर्वपक्षमाहेति * । तथाच नेदमसद्वादनिरासकं सिद्धान्तसूत्रमित्यर्थः ।* व्याकुर्वन्ति * । अपीतिरित्यादि* ।* असमञ्जसमिति *

न तु दृष्टान्तभावात् ॥ ९ ॥

नैवास्मदीये दर्शने किञ्चिदसामञ्जस्यमस्तीति तुशब्देन परिहरति। स्वपक्षस्थापनपरपक्षनिराकरणयोर्विद्यमानत्वान्नतुवचनम् । तत उत्पन्नस्य तत्र लये न कार्यावस्थाधर्मसम्बन्धः शरावरुचकादिषु प्रसिद्धः । भवतां परं न दृष्टान्तोऽस्ति ॥ ९ ॥

स्वपक्षदोषाच्च ॥ १० ॥

सर्वज्ञत्वशुद्धत्वादिविघटत्वेनायुक्तम् ॥ ८ ॥

न तु दृष्टान्तभावात् ॥ परिहारसूत्रमिदम् । व्याकुर्वन्ति । * नैवेत्यादि * । * नतुवचनमिति * नतु इति पदद्वयकथनम् । * लयेनेत्यत्र, लये इति पदच्छेदः । अयमर्थः । महाकारणवादे ये दोषाः कार्यप्रलयावस्थामादाय भवता प्रदर्शितास्ते कस्य कार्यस्य कस्मिन् कारणे लये दृष्टा अत्रापाद्यन्ते । लौकिक इति स्वसङ्गतम् । शरावादीनां मृदि लये परमाणुभावापत्तौ स्थौल्यसावयवत्वाद्यदर्शनात् । महापृथिवीरूपत्वे च परिच्छिन्नत्वाशुद्धत्वाद्यदर्शनात् । रुचककटकादीनां च सुवर्णे लये तद्दर्शनात् । प्रत्युत तैजसानां भाण्डानां मद्यादिसम्बन्धेन दुष्टत्वेऽग्निसम्बन्धात् तस्याकारस्य नाशनेन पुनः पूर्वभावसम्पत्तौ निर्दोषता स्मर्यते । तैजसानां रेतोविण्मूत्राद्यकुणपादिभिश्चाण्डालसूतिकोदक्यापतितादिभिश्चिरमुपहतानामावर्तनमिति । एवं मार्त्तिकानामपि मृद्भावे । वातोद्धूतं रजतः शुचीति । अतो लोकविचारेऽस्माकं दृष्टान्ताः सन्ति, न भवतामिति ॥ ९ ॥

स्वपक्षदोषाच्च ॥ अथ शास्त्रीये कार्ये दृष्टा इत्युच्यते तर्हि स्वगृहमन्वेषयित्वा ततो वक्तव्यम् । तथापि निर्विशेषात् प्रधानात् सविशेषस्य शब्दादिमत उत्पत्तेः कार्यकारणयोर्विलक्षणत्वं, कार्यस्योत्पत्तिर्न कारणस्येत्यपि । एवं विलक्षणकार्योत्पत्तावुत्पत्तेः पूर्वं

स्वपक्षे चैते प्रतिवादिनः साधारणा दोषाः । निर्विशेषात् प्रधानात् सविशेषस्य कार्यता । तस्योत्पत्तिः । लये तद्धर्मसम्बन्धः । असत्कार्यवादप्रसङ्गः । तथैव कार्योत्पत्तौ कारणाभावेन नियमाभावः । भावे वा मुक्तानामपि पुनर्बन्धप्रसङ्गः ॥ १० ॥

तस्य वैलक्षण्यस्याभावादसत्कार्यवादप्रसङ्गः । सद्भावे च लयेऽपि कार्यधर्मसम्बन्ध इति तद्दत्त्वप्रसङ्गः । किञ्च, सर्वेषामन्तिमकार्यपर्यन्तानां कार्याणां कारणे सत्त्वेन, एतदनन्तरमेतदुत्पत्स्यत इति तथैव कार्योत्पत्तौ तत्क्रमनियामककारणाभावेन क्रमनियमाभावः । अथ नियामककारणमन्तरेणैव नियमोऽभ्युपगम्यते तदा आकस्मिकवादप्रसङ्गः । अथ तत्रापि कारणसत्ताऽभ्युपगम्यते तदोत्पादनियामककारणसद्भावे तेनोत्पत्तिः कार्यवेति मुक्तानामपि पुनर्बन्धप्रसङ्गः । कारणस्य साधारणत्वादिति । तदेतदुक्तम् * स्वपक्षे चैत इत्यादिना * । तथाच दोषसाम्याच्च पर्यनुयोग उचित इत्यर्थः । यद्यपि प्रतिबन्देरनुत्तरत्वादिदं नोत्तरं, तथापि पूर्वसूत्रेण निरस्तत्वाद् वादिनो वैरस्यनिवृत्तये उक्तं ज्ञेयम् ।

रामानुजाचार्यास्तु ब्रह्मणश्चिदचिच्छरीरमङ्गीकृत्य भोगायतनत्वादीनि च शरीरलक्षणानि दूषयित्वा यस्य चेतनस्य यद् द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यं, तच्छेषतैकस्वभावं च तत् तस्य शरीरमिति लक्षयित्वा, अपीतिसूत्रोक्तस्य तद्धर्मप्रसङ्गरूपस्य दूषणस्य चिदचिद्रूपे परब्रह्मशरीर एव सम्बन्धात्र ब्रह्मणि दोषसम्बन्धः । ब्रह्मगतगुणानां च न शरीरे सम्बन्धः । यथा देवमनुष्यादीनां सशरीराणां क्षेत्रज्ञानां शरीरगता बालत्वयुवत्वस्थविरत्वादयो नात्मनि सम्बध्यन्ते, आत्मगताश्च ज्ञानसुखादयो न शरीरे तद्वदिति दृष्टान्तसूत्रं व्याकुर्वन्ति स्म । तच्चिन्त्यम् । सदेव सौम्येदमग्र, आत्मा वा इदमेक एवाग्र आसीदित्यादिषु केवलं ब्रह्मैव प्रकृत्य सृष्टिकथनात्, तमः परे देवे एकीभवतीति शब्दान्तरेण प्रलयेऽपि तमसः स्वीयरूपत्यागेन ब्रह्मरूपतया एवोक्तत्वाच्च तेनैव रूपेण परिहारसम्भवेऽस्यानुपयोगादिति । तद्धोरोऽप्येतेनैव प्रत्युक्तो ज्ञेयः ।

तर्काप्रतिष्ठानादप्यन्यथानुमेयमितिचेदेवमप्यविमोक्षप्रसङ्गः ॥ ११ ॥

वेदोक्तेऽर्थे शुष्कतर्केण प्रत्यवस्थानमयुक्तम् । तर्कस्याप्रतिष्ठानात् । तर्को नाम स्वोत्प्रेक्षिता युक्तिः । सा एकोक्ता नान्यैर-

---

शङ्कराचार्यास्तु, विवर्तवादमाश्रित्य कार्यस्यासत्त्वव्यवस्थापनेन दोषपरिहारं सिद्धान्तयन्ति । तदपि तदनन्यत्वाधिकरणे दूष्यम् ।

माध्वास्तु, तद्वत्पदे मतुपमङ्गीकृत्य, अपीतिसूत्रोक्तमप्यसद्वादनिरासकमिच्छन्ति । यद्यसदेव कारणं स्यादपीतिस्तद्वान् स्यात् । असतः सकाशाज्जगदुत्पत्तावुपेतायां प्रलये असन्मात्रावशेषः प्रसज्ज्येत । कार्यनाशे कारणमात्रावशेषनियमात् । अतोऽसमञ्जसमसम्मतमिति । दृष्टान्तसूत्रे च, विप्रतिपन्ना उत्पत्तिः सतो भवितुमर्हति । उत्पत्तित्वात् । घटोत्पत्तिवदिति । विमतो विनाशः सद्वशेषः । विनाशत्वाद् । घटविनाशवदिति लोके दर्शनादसत्कारणवादस्यासमञ्जसत्वमाहुः । तथापि विनाशत्वस्य नानुमानत्वम् । न सदवशेषः । जलविनाशवदिति दृष्टान्तेन हेतोः साधारणत्वादिति ।

भिक्षुस्तु यथा असतः सदुत्पत्तिर्न सम्भवति तथा सतोऽपि सदुत्पत्तिर्न सम्भवति । कुतः ? । अपीतौ कारणवत् कार्यस्यापि विद्यमानत्वप्रसङ्गादिति पूर्वपक्षम्, अपीतिसूत्रे व्याख्याय, न त्विति सूत्रे सतः सदुत्पत्तौ मृद्घटादेर्दृष्टान्तस्य विद्यमानत्वादिति सिद्धान्तं व्याचख्यौ । तदपि शिथिलम् । सतो मृदादेरविद्यमानस्यैव घटादेरुत्पत्तिदर्शनेन सतः सदुत्पत्तेरुपपादनसापेक्षत्वादिति ॥ १० ॥

तर्काप्रतिष्ठानादप्यन्यथानुमेयमितिचेदेवमप्यविमोक्षप्रसङ्गः ॥ सूत्राक्षरैरेव सांख्योक्त्या किञ्चिदाशङ्का परिहरतीत्याशयेन सूत्रं पठित्वा व्याचक्षते * वेदोक्त इत्यादि * वेदोक्तेऽर्थे शुष्कतर्कैः कार्यवैलक्षण्यकार्यधर्मवत्त्वप्रसङ्गादिभिः प्रत्यवस्थानमयुक्तम् । कुतः ? । तर्कस्याप्रतिष्ठानात् । तर्को नाम स्वोत्प्रेक्षिता युक्तिः । सा एकोक्ता

ङ्गीक्रियते । स्वतन्त्राणामृषीणां मतिभेदाद् वस्तुनो द्वैरूप्यासम्भवान्नियामकाभावाच्च । अतो न तर्कस्य प्रतिष्ठा । पूर्वपक्षिणः परिहारः । अप्यन्यथाऽनुमेयमितिचेत् । एवमपि अन्यथा वयमनुमास्यामहे । यथा नाप्रतिष्ठादोषो भविष्यति । न हि कोऽपि तर्कः प्रतिष्ठितो नास्तीति वक्तुं शक्यते । व्यवहारोच्छेदप्रसङ्गात् ।

आर्षं धर्मोपदेशं च धर्मशास्त्राविरोधिना ।

यस्तर्केणानुसंधत्ते स धर्मं वेद नेतर, इति स्मृतेः ।

सावद्यतर्कपरिहारेण निरवद्यस्तर्कः प्रतिपत्तव्यो भवतीतिचेद्, एवमप्यविमोक्षप्रसङ्गः । यद्यपि क्वचिद्विषये तर्कस्य प्रतिष्ठितत्वमुपलक्ष्यते तथाप्यस्मिंस्तावद्विषये प्रसज्यत एवाप्रतिष्ठितत्वदोषाद्विमोक्षस्तर्कस्य — ब्रह्मादिनो निर्दुष्टतर्कसद्भावेऽपि प्रकृति-

---

मान्यैरङ्गीक्रियते । वक्तृभिश्चर्चायां तत्तदुक्तास्तर्काः परस्परमाभासीक्रियन्ते । स्वतन्त्राणामृषीणां मतिभेदात् । विवादविषयस्यैकस्य वस्तुनो युक्तिमात्रेण द्वैरूप्यस्यासम्भवात् । लोकस्य वैचित्र्येणोभयोर्वादिनोर्दृष्टान्तसौलभ्ये एकतरयुक्तिनियामकस्य हेतोरभावाच्च । अतो महर्ष्युक्तत्वाद्धेतोर्न तर्कस्य प्रतिष्ठा । पूर्वपक्षिणः परिहारस्तस्मादित्यस्मात् प्रतिब्रवीति तदा अप्यन्यथानुमेयमितिचेद् एवमपि वयमन्यथानुमास्यामहे, यथा तर्काप्रतिष्ठादोषो न भवति । तत्र हेतुः । * न हीत्यादि * । तत्रापि हेतुद्वयम् । * व्यवहारेत्यादि * * स्मृतेरित्यन्तम् * । तेन सिद्धं तु, * सावद्येत्यादि * चेदित्यन्तम् * । तथाच, प्रधानं जगदुपादानकारणम् । तत्सलक्षणत्वात् । पटसलक्षणतन्तुवदित्यनुमानं निरवद्यम् । प्रधानाज्जगज्जायत इति सांख्यसूत्रोक्तश्रुत्या, यस्तन्तुनाभ इव तन्तुभिः प्रधानजैः स्वभावत इति श्वेताश्वतरश्रुत्या चानुगृहीतत्वादितिचेदेवं सांख्योक्तमनूद्यपरिहरन्ति । * एवमपीत्यादिना * । तथाच त्वया या श्वेताश्वतरश्रुतिस्तर्कानुग्राहकतयोक्ता सा प्रकरणावरुद्धा । तत्र हि प्रथमेऽध्याये, भोक्ता भोग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविध ब्रह्ममेतदिति भोक्तृभोग्ययोरपि ब्रह्मत्वश्रावणेन भोग्यस्य प्रधानस्य ब्रह्मरूपत्वेनैव सिद्धत्वात् । पञ्चमाध्याये च, तद् वेदगुह्यो-

वादिनस्तर्कस्य दोषाविमोक्षप्रसङ्गः । मूलनियमाभावाद् वैषम्यस्य विद्यमानत्वात् ॥ ११ ॥

एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥ १२ ॥

सांख्यमतस्य वैदिकप्रत्यासन्नत्वात् केषाञ्चिच्छिष्टानां परिग्रहोऽप्यस्ति । अणुमायाकारणवादास्तु सर्वथा न शिष्टैः परिगृह्यन्त इति तेषां तर्काः पूर्वोक्तन्यायेन सुतरामेव निरस्ता वेदितव्याः ॥ १२ ॥

पनिषत्सु गूढं तद् ब्रह्मा वेद ते ब्रह्मयोनिमिति ब्रह्मण एव योनित्वश्रावणात् । एवं, प्रधानाज्जगज्जायत इत्यत्रापि प्रधानं ब्रह्मकार्यमेव, सन्दिग्धस्य वाक्यस्यासन्दिग्धेनैव निर्णयस्य युक्तत्वात् । इदं च, योनिश्च हि गीयते इति प्रथमाध्याय एव दत्तोत्तरम् । अत. प्रकृतिवादिनो मूलनियमाद्यभावात् तत्तर्कस्याप्रतिष्ठादोषादविमोक्षस्यैव प्रसङ्ग इत्यर्थः ।

रामानुजाचार्यास्तु, तर्काप्रतिष्ठानादपीति सूत्रं भिन्नं कुर्वन्ति । तदा ज्ञापनसौकर्यं गुणः । हेतो. सिद्धान्तकोटिप्रवेशात् । तथापि पूर्वसूत्रस्थचकारवैयर्थ्यं दोषः । चकारार्थस्यात्रत्यापिशब्देन सङ्ग्रहादिति ॥ ११ ॥

एतेन शिष्टापरिग्रहा अपि व्याख्याता. ॥ तर्काप्रतिष्ठानदोषमन्येष्वपि बोधयंस्तत्रापि परिहारमतिदिशति । * एतेनेत्यादि * । तद् व्याचक्षते । * सांख्येत्यादि * । * पूर्वोक्तन्यायेनेति * । मूलनियमाभावपरस्परवैसम्यत्वप्रयुक्तेन तर्काप्रतिष्ठानरूपेण न्यायेन । यद्यपि, 'अक्षपादप्रणीते च काणादे सांख्ययोगयोः । त्याज्यः श्रुतिविरुद्धोऽशः श्रुत्येकशरणैर्नृभिः । जैमिनीये च वैयासे न विरोधोऽस्ति कश्चन' इति पराशरोपपुराणवाक्याज्जैमिनीयान्तेषु किञ्चिद्देशविरोधस्तुल्यस्तथापि गौतमीये, औलूक्ये, मायिके च दर्शने शिष्टापरिग्रहोऽधिक इत्यनास्थातः पश्चात् तद्दूषणमित्यर्थः । इदं च केवलं सूत्रमेव, नाधिकरणम् । विषयादेरस्फुटत्वादिचाराभावाच ।

भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् ॥ १३ ॥

कारणदोषं परिहृत्य कार्यदोषपरिहारार्थमारम्भः । भोग्यस्य भोक्त्रापत्तिः । ब्रह्मणो निर्विशेषस्य कारणत्वाद् भोक्तुर्भोग्यत्वं, भोग्यस्य न भोक्तृत्वमापद्यते । अतो न विभाग इतिचेन् स्याल्लोकवत् । यथा लोके कटककुण्डलादीनां सुवर्णकारणत्वेन सुवर्णानन्यत्वेऽपि न कटस्य कुण्डलत्वमेवं न भोग्यस्य भोक्तृत्वम् ॥ १३ ॥

एवञ्च पूर्वाधिकरणेनैतत्सूत्रेण च समाकर्षसूत्रोक्तप्रतिकूलानां तर्काणां परावृत्त्या ब्रह्मणः कारणत्वं दृढीकृतम् ॥ १२ ॥

भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् ॥ पूर्वोक्तयुक्तिभिः परिहृते श्रुतिविप्रतिषेधे, अस्य सूत्रस्य किं प्रयोजनमित्याकाङ्क्षायां तत्राहुः । * कारणेत्यादि * । दृश्यते त्वित्यनेन वैलक्षण्यं, प्रतिषेधमात्रत्वादित्यनेनासत्कारणवादापत्तिं, दृष्टान्तसद्भावादसामञ्जस्यं, तर्काप्रतिष्ठानादन्यानप्युत्प्रेक्षिष्यमाणान् कारणदोषान् परिहृत्य उत्प्रेक्ष्यमाणस्य कार्यदोषस्य परिहारार्थं सूत्रारम्भ इत्यर्थः । एवमग्रिमाधिकरणत्रयेऽपि बोध्यम् । सूत्रं व्याकुर्वन्ति । * भोग्यस्येत्यादि * । भोक्त्रापत्तेरिति भावप्रधानो निर्देशः । भोक्तृत्वापत्तेरित्यर्थः । अत्रैवं बोध्यम् । सोऽकामयतेति चेतनं ब्रह्म प्रकृत्य ततः सृष्टिमुक्त्वा तन्तुन्यायेन तदनुप्रवेशाद्, विज्ञानं चाविज्ञानं चेति कार्यविभागो दर्शितः । स युज्यते न वेति सन्देहे, स न युज्यते । यतः अस्थूलमनण्वित्यादिश्रुतिभ्यो लौकिकविशेषरहितस्य ब्रह्मणः कारणत्वात् कार्यस्य लयदशायां भोक्तृभोग्याभावकृतपरस्परविभागस्य निवृत्तिपूर्वकं कारणात्मकतासम्पत्तौ सर्वथा तदात्वे जाते ततः पुनरुत्पत्तौ स्थितिदशायां भोक्तुश्चेतनस्य भोग्यत्वं स्रक्चन्दनादिरूपस्य भोग्यस्य तस्य भोक्तृत्वं चेतनत्वमापद्येत यथा लोके कटककुण्डलादेरुपमर्देन सुवर्णरूपतापत्तौ पुनः कारणदशायां कटकभागस्य कुण्डलत्वं कुण्डलभागस्य कटकत्वं तद्वत् । अतोऽविभागो विज्ञाना-

ऽविज्ञानविभागाभावः । ततश्च, ऋतं पिबन्तौ सुकृतस्येत्यत्र चेतने भोक्तृत्वं सुकृते भोग्यत्वं यदुच्यते, तद् विप्रतिषेध इत्येवं चेदित्यन्तेनाशङ्क्य तत्र समाधत्ते । स्याल्लोकवदिति । तथा चैवमापादनेऽपि उत्पत्तिदशायां चेतनस्य भोक्तृत्वमचेतनस्य भोग्यत्वमेव । यथा लोके कटकभागस्य कुण्डलत्वेनोत्पत्तौ कुण्डलत्वमेव, कुण्डलभागस्य कटकत्वेनोत्पत्तौ कटकत्वमेवं विपर्ययापत्त्यभावाद्, भोक्तृभोगविभागसौकर्यं तद्वदित्यर्थः । अत्र लोकवदिति दृष्टान्तेनेदं बोध्यते । तदुक्तमभ्युपगम्य तदुक्त्या समाधीयते । अस्माकं तु, बहु स्यां प्रजायेयेतीच्छया बहुभवनस्य प्रकर्षस्य च सिद्धत्वात् पूर्वमेव चेतनाचेतनविभागं कृत्वा तेन तेन रूपेण तत्र तत्र प्रवेश इति न दोषलेश इति । एवमत्र युक्त्या, विज्ञानं चाविज्ञानं चेत्यादिश्रुतौ विभागाभावरूपः कार्यदोषः परिहृतः । प्रलये तु विभागाभावेऽप्यदोषः । व्यवहाराभावेन तदङ्गाभावादिति ।

भास्कराचार्यास्तु, युक्त्या ब्रह्मवादः सांख्यैः पुनराक्षिप्यते । तद्दूषणायेदं सूत्रमितीच्छन्ति । यथा फेनतरङ्गादीनां परस्परं विभागः समुद्रादनन्यत्वं चेति दृष्टान्तं चाहुः ।

शङ्कराचार्या अप्येवमेवोक्त्वा यद्यपि भोक्ता न ब्रह्मणो विकारः । तत् सृष्ट्वा तदेवानुप्राविशदिति स्रष्टुरविकृतस्यैव कार्यानुप्रवेशे भोक्तृत्वश्रवणात् । तथापि कार्यमनुप्रविष्टस्योपाधिनिमित्तो विभागः सम्भवति । यथा घटाद्युपाधिनिमित्त माकाशस्येत्येतद्वधिकमाहुः ।

रामानुजाचार्यास्तु तद् दूषयन्ति । अन्तर्भावितशक्तिविशेषोपाधिकाद् ब्रह्मणः सृष्टिमभ्युपगच्छन्नेवमाक्षेपपरिहारयोरसङ्गतत्वात् । तथाहि । कारणान्तर्गतशक्तिविशेषोपहितस्य भोक्तृत्वादुपाधेश्च भोग्यत्वाद्विलक्षणयोस्तयोः परस्परभावापत्त्यदर्शनेनाक्षेपस्यैवानुदये परिहारस्याप्रयोजनत्वेन सूत्रस्यैव वैयर्थ्यात् । स्वरूपपरिणामस्तु न तैरभ्युपेयते । न कर्माविभागादितिचेन्नानादित्वादित्यादिस्थानामिसूत्रं क्षेत्रज्ञानां तत्कर्मणाञ्चानादित्वप्रतिपादनात् । तदनभ्युपगमे च भोक्तृभोग्याविभागशङ्काया एवानुदयात् । स्वरूपपरिणामे च ब्रह्मणो भोक्तृभोग्याविभागशङ्काया एवानुदयात् । स्वरूपपरिणामे च ब्रह्मणो भोक्तृभोग्यभावापत्त्या पुनरसामञ्जस्यादि-

ति । एवमन्ये त्वेवमाहुः । स्थूलसूक्ष्मचिदचिच्छरीरस्य ब्रह्मणः कारणरूपस्याज्ञोत्रब्रह्मणोः स्वभावविभागो य उक्तः सोऽनुपपन्नः । सशरीरत्वे जीववद्भोक्तृत्वस्यावर्जनीयत्वात् । न च, सम्भोगप्राप्तिसूत्रेऽस्य दोषस्य प्रागेव परिहृतत्वान्न शङ्कोदय इति वाच्यम् । तत्रोपास्यतया हृदयान्तःस्थस्य शरीरान्तर्वर्तित्वमात्रेण न भोगसम्बन्ध इत्युक्तत्वात् । इह तु जीववद् ब्रह्मणोऽपि सशरीरत्वे तद्वदेव सुखदुःखभोगापत्तिरित्युच्यते । लोके तथा दर्शनात् । न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति, अशरीरं वा व सन्तं प्रियाप्रिये न स्पृशत इति श्रुतेश्च । अतः सशरीरब्रह्मकारणवादे जीवेश्वरस्वभावविभागाभावात्, केवलब्रह्मकारणवादे मृत्सुवर्णादिवज्जगद्ब्रह्मणोः पुरुषार्थादिसर्वविशेषाश्रयत्वप्रसङ्गाच्च प्रधानकारणवाद एव ज्यायानिति चेत् । स्याल्लोकवत् । स्यादेव सशरीरत्वेऽपि जीवेश्वरस्वभावविभागः । जीवेऽपि सुखदुःखभोगस्य पापपुण्यकृतत्वेन शरीरनिमित्तकत्वाभावात् । ननु, न ह वै सशरीरस्येति श्रुतिविरोधः । तस्य कर्मारब्धदेहविषयत्वेन कर्मण्येव तत्पर्यवसानात् । अन्यथा, स एकधा भवति, स यदि पितृलोककामो भवति स तत्र पर्येति जक्षन् क्रीडन् रममाण इति कर्मसम्बन्धनिर्मुक्तस्य सशरीरस्यैव जीवस्यापुरुषार्थगन्धाभावश्रावणविरोधापत्तेः । अपहतपाप्मनः परमात्मनस्तु तदभावः कैमुतिकादेव सिद्ध्यति । यथा राजाऽऽज्ञानुवर्तिनां तदतिवर्तिनां राजानुग्रहनिग्रहकृतसुखदुःखयोगेऽपि सशरीरत्वमात्रेण तच्छासके राज्ञि न शासनानुवृत्त्यतिवृत्तिनिमित्तकः सुखदुःखभोगस्तद्वदिति लोकेऽपि सिद्धमिति । तन्मतचौरोऽप्येवमाह । ज्ञाज्ञौ द्वावजावीशानीशाविति स्वातन्त्र्यास्वातन्त्र्याभ्यां कृतं स्वभावविभागं वदतीत्येतावान् भेदः । तत्र सशरीरस्य परिणामः प्रागेव निरस्त इति न शङ्का नापि चोत्तरम् । स्वरूपपरिणामवादिनां ब्रह्मणो भोक्तृभोग्यभावस्त्विष्ट एव । प्रमाणबलाच्छुद्धाद्वैतस्यैवाभ्युपगतत्वेनादोषात् । नच स्वभावाविभागापत्तिः । सृष्टिदशायां शक्तिविश्लेषेण स्वभावविभागस्य लोकेऽपि दर्शनात् । एकबीजके तरौ पत्रपुष्पफलमूलवल्कनिर्यासानामन्योन्यस्वभावस्य तेषां च स्वभावानां बीजैक्यस्य पुनर्बीजे तथात्वस्य सर्वजनीनत्वादिति ।

तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ १४ ॥

श्रुतिविरोधं परिहरति । वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमिति । तत्र विकारो वाङ्मात्रेणैवारभ्यते, न वस्तुत इत्यर्थः प्रतिभाति ।

भिक्षुस्तु—ननु परमेश्वरस्य जगत्कारणश्रुत्यर्थत्वे, बहु स्यां प्रजायेय, रूपं रूपं प्रतिरूपो बभूव, स एष इह प्रविष्ट आनखाग्रेभ्य इत्यादिश्रुतिभिर्जगत्कारणस्यैव जीवभावथावणेन सुखदुःखभोक्तृजीवरूपतापत्त्या, तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीत्यादिश्रुत्युक्तो विभागो नोपपद्यत इतिचेल्लोकवदयं विभागः स्यात् । यथा लोके पितृप्रकृतिके पुत्रे पित्रात्मकत्वे सत्यपि गर्भवासादयः पुत्रस्यैव न पितुरिति विभागस्तथैव परमेश्वरजीवयोरपि । एवं समुद्रमत्स्यपृथिव्योषध्यादयो दृष्टान्ता बोध्या इत्याहु ।

मध्वाचार्यास्तु—कर्माणि विज्ञानमयश्च आत्मा परेऽव्यये सर्वे एकीभवन्तीति मुक्तजीवस्य परापत्तिरुच्यते । अतस्तयोरविभागात् स पूर्वमपि तदभिन्न एव । अन्यथा एकीभावायोगादिति चेत्, स्याल्लोकवत् । यथा लोके उदक उदकान्तरस्यैकीभावव्यवहारेऽप्यन्तर्भेदोऽस्त्येव, तथात्रापि स्यादिति । अत एव, यथोदके शुद्धे शुद्धमासिक्तं तादृगेव भवतीत्युक्तम् । नच स्वभावाविभागः । न ते महित्वमन्वश्नुवन्ति, न ते विष्णो जायमानो न जात इत्यादिश्रुतौ तस्य सिद्धत्वादित्याहुः ।

अत्राधिकरणविभागस्त्वव्यवस्थितः । कैश्चित् क्वचिदन्यैरन्यत्र तत्समाप्त्यङ्गीकारात् । आचार्यैस्त्वेषां सूत्रत्रयमेव केवलमङ्गीक्रियते, नाधिकरणत्वम् । क्वचिदप्यधिकरणत्वावचनात् । सूत्रत्रयमाहेति सूत्रत्रयस्यैव कथनाच्च । तथापि बोधसौकर्याय किञ्चिद् विषयैक्यमादाय, अस्मत्पूर्वाचार्यैरेतदयमेकाधिकरणमङ्गीक्रियत इत्यदोषः । तथासत्येतस्यापि तच्छेषत्वम् ॥ १३ ॥

. तदनन्यत्वमारम्भणशब्दादिभ्यः ॥ एवं कार्यबोधकश्रुतौ युक्तिविरोधं परिहृत्य कार्यबोधकवाक्यान्तरे श्रुतिविरोधं परिहरतीत्याशयेन सूत्रमवतारयन्ति * श्रुतीत्यादि * । * प्रतिभातीति * वाचारम्भ-

तथाच सति कस्य ब्रह्म कारणं भवेत्। अतः श्रुतिवाक्यस्यार्थमाह। आरम्भणशब्दादिभ्यस्तदनन्यत्वं प्रतीयते। कार्यस्य कारणानन्यत्वं, न मिथ्यात्वम्।

णमनूद्य तस्य विकारत्वं विधाय ततस्तस्यैव नामधेयत्वनिगमनात् प्रतिभाति। * तथाच सतीति * कार्यस्य खपुष्पवद् वाङ्मात्रत्वेन अवस्तुत्वे सति। उत तमादेशमप्राक्षो येनाश्रुतं श्रुतं भवतीत्यादि, यथा सौम्यैकेनेत्यादिप्रतिज्ञादृष्टान्तश्रुतिबलेन प्रपञ्चसमवायित्वं ब्रह्मणः प्रतिपादितं दृष्टान्तवाक्यशेषे च वाचारम्भणमित्यादि श्रूयते। तस्य चैवमर्थः प्रतिभातीति। येनैव कारणत्वं प्रतिपाद्यते तच्छेषेणैव तद् विघटितं भवतीति विप्रतिषेधाद् ब्रह्मवादे पुनरसामञ्जस्यमिति शङ्कायां तस्यार्थमाहेत्यर्थः। तेन विप्रतिषेधो विषयः। अस्ति वा न वेति संशयः। पूर्वपक्षसिद्धान्तौ तु स्फुटावेवेतीदमधिकरणम्। तच्च सतसूत्रम्। यदि च विषयस्य पूर्वं विचारितत्वात् संशयानुदयेऽपि प्रतिवादिना स्वाग्रहमात्रेण इदमाक्षिप्यत इत्यङ्गीक्रियते, तदा तु सूत्रमात्रत्वमेव। एवमेव पूर्वत्रापि बोध्यम्। अर्थमाहुः। * आरम्भणेत्यादि * अत्रादिपदेन, इतिशब्दो, नामधेयपदं, सदेव सौम्येत्यादीनि वाक्यानि च संगृह्यन्ते। तथाच यदि विकारे वाङ्मात्रतामभिप्रेयाद् वाचारम्भणं विकारो मृत्तिकैव सत्यमित्येव वदेत्। तावतैव कार्यस्य मिथ्यात्वसिद्धेः। वदति त्वेवम्। तथाच यो विकारस्तद् वाचारम्भणम्। यद् आरभ्यते तद् आरम्भणम्। कृत्यल्युटो बहुलमिति कर्मणि ल्युट्। वागारब्धं कारणस्यैव नामधेयम्। कारणमेवहि तत्तदर्थक्रियासिद्ध्यर्थं तेन तेन नाम्ना व्यवह्रियत इति कारणादाभिन्नमेव कार्यं, न तु स्वेन रूपेण कारणाद् भिन्नम्। तदाह। मृत्तिकेत्येव सत्यमिति। कारणरूपेणैव सत्यम्। अतः कारणरूपेणैव सत्यं, न तु मिथ्या। तथा सति कार्याभावेन ब्रह्म कस्य कारणं भवेत्। तदभावे सति पूर्वोपन्यस्ता, यतो वा इमानीत्यादयः सर्वा एव श्रुतयः कुप्येरन्। न च शुक्त्यादीनां रजतादीन् प्रतीव ब्रह्मणोऽपि जगत् प्रति कारणत्वस्य शक्यवचनत्वात् तत्कोप इति वाच्यम्। पुरुषबुद्धिदोषवशेन शुक्त्यादिषु रजतादिबुद्धिमात्रजनकतया

रजतादिकारणत्वस्याभिमानमात्रत्वेनापौरुषेय्यामीश्वरनिःश्वासरूपायां श्रुतौ तादृशाभिमानिवाक्यत्वस्याशक्यवचनतया तदभिमतकारणताया वक्तुमशक्यत्वात् । शक्यत्वाभ्युपगमे तर्कवदप्रतिष्ठया सर्वसन्मार्गविप्लवप्रसङ्गात् । किञ्चात्रेदं वाक्यमुपक्रम्य उक्तमग्रे कथमसतः सज्जायेतेति, सदेव सोम्येदमग्र आसीदिति सत्पदेन इदमा च सतः कार्यत्वं श्राव्यते । यदि शुक्तिरजतवत् कार्यं स्यात्, सज्जायेतेति सत्पदमिङ्गारश्च कुप्येताम् । किञ्चाग्रे, तदैक्षत, बहु स्यां प्रजायेयेतीक्षणपूर्विका स्वस्यैव बहुभवनरूपा नानाविधजननहेतुका च सृष्टिः श्राव्यते । यदि चोक्तविधं कार्यं स्यात् तदा तस्य मिथ्यात्वेन स्वप्रतियोगित्वबोधक उत्तमपुरुषप्रयोगश्च कुप्येत । किञ्चाग्रे, सेयं देवतैक्षतेत्यादिनोक्ते त्रिवृत्करणेक्षणे, इमास्तिस्रो देवता इति बोधिना देवतानां या ब्रह्मप्रत्यक्षगोचरता सापि ब्रह्मणो भ्रमराहित्यात् कुप्येत । न चापागादग्नेरग्नित्वमिति निगमनवाक्यविरोधः । शिष्यस्यार्वाचीनतया अग्नित्वादीन् स्वाभाविकत्वेनावधारयतस्तादृशावधारणनिवृत्त्यर्थं तस्य वाक्यस्य तत्राभिमन्यमानस्वाभाविकताऽसङ्गतिबोधकतया विरोधाभावात् । अत एतैः शब्दैरिदं सर्वं, यदयमात्मा सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेदेत्यादिभिश्च कार्यस्य कारणाभिन्नत्वमेव वाक्यार्थो, न मिथ्यात्वमित्यर्थः ।

अत्र शङ्कराचार्या मायावादमवतारयन्ति । मृत्तिकेत्येव सत्यमित्यवधारणात् कारणमेव सत्यं, कार्यं त्वनृतं, नामधेयमात्रत्वात् । दार्ष्टान्तिकवाक्येऽप्यपागादग्नेरग्नित्वं, वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यमिति ब्रह्मव्यतिरेकेणाभावकथनाच्च । न च सूत्रेऽनन्यत्वपदव्याख्यायामयमर्थः । किन्तु, यथैको वृक्षो नानाशाख एवं ब्रह्मापि स्वात्मनैकं कार्यात्मना नानेति मृदादिदृष्टान्तमालोच्यार्थो वाच्य इति वाच्यम् । पूर्वोक्तावधारणादिविरोधेन दार्ष्टान्तिकवाक्येऽप्यैतदात्म्यमिदं सर्वं तत् सत्यमिति परमकारणस्यैवैकस्य सत्यत्वावधारणेन च तथा वक्तुमशक्यत्वात् । किञ्च समाप्तौ, पुरुषं सोम्योत हस्तगृहीतमिति नवमे पर्याये तस्करदृष्टान्तेनानृताभिसन्धस्य बन्धनं, सत्याभिसन्धस्य मोक्षं च दर्शयता एकत्वस्यैव पारमार्थिकत्वं, नानात्वस्य च मिथ्यात्वमेव स्फुटीक्रियते । यदि ह्येकत्वनानात्वयोरुभयोरपि सत्यत्वं स्यात् तदा व्य-

येपुनर्मिथ्यात्वं तामसबुद्धयः प्रतिपादयन्ति तैर्ब्रह्मवादाः सूत्र-

---

वहारगोचरत्वसामान्येऽप्येकस्यैवानृताभिसन्धत्वं नोच्येत । किञ्च ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति भेददृष्टचपवादेनैत-
देव प्रदर्श्यते । यद्युभयसत्यता स्यात्तदा नानात्वं नापोद्येत । अतोऽनादि-
कालप्रवृत्ताऽविद्यावशादयं भेदः प्रतिभासते, न तु परमार्थतोऽस्ति ।
नचैवं सति प्रत्यक्षादिप्रमाणानर्थक्यं, विधिनिषेधशास्त्राणां चानर्थ-
क्यं, मोक्षशास्त्रेणानृतेन ब्रह्मज्ञानानुत्पत्तिप्रसङ्गो वा शङ्कनीयः । मि-
थ्याभूतस्याप्यस्य व्यवहारस्य बाधकप्रत्ययाभावेन प्रवृत्तेः सम्भ-
वात् । प्रत्यक्षादीनां प्रमाणानां विधिनिषेधशास्त्राणां चाप्यविद्याव-
द्विषयत्वेन बाधकप्रत्ययाभावादेव प्रवृत्तिसम्भवेनानर्थक्याभावात् ।
मोक्षशास्त्रस्यापि ब्रह्मज्ञानात् प्रागसत्यत्वाप्रतिपत्त्या तस्याप्यप्रतिघा-
तात् । अनृतादपि तस्मात् सत्यज्ञानावाप्तिस्तु यथा स्वप्नात् शु-
भाशुभसूचनं, लिप्यक्षरेभ्यश्च पारमार्थिकवर्णप्रतिपत्तिस्तथा भवि-
ष्यतीति मायामात्रमेवेदं सर्वमिति । तन्मतं सङ्क्षेपेणानूद्य दूषयन्ति ।
* ये पुनरित्यादि * । * तामसबुद्धय इति * । माया च तमोरूपेति
श्रुतेर्मायाकृतबुद्धयः । अयमर्थः । कारणत्वबोधकश्रुतीनां सर्वस्यात्म-
त्वब्रह्मत्वबोधकश्रुतीनां चानुरोधेन कार्यस्य कारणानन्यत्वे सिद्धेऽग्नि-
त्वाद्यपगमबोधकवाक्यस्य व्याख्यातरीत्यार्थे बुद्धे, ऐतदात्म्यमिदं सर्वं
तत् सत्यमित्यत्राप्यणिमपरिचायनार्थस्य सर्वस्यैव सन्निहिततया त-
त्पदेन परामर्शात् तस्यैव सत्यत्वं विधीयते, सर्वगतमेव चैकत्वमनू-
द्यत इति मन्तव्यम् । अन्यथा, स आत्मा स सत्यमित्येवं पठेत् । नच
तस्करदृष्टान्तस्यानृताभिसन्धत्वोक्त्या नानात्वस्य मिथ्यात्वसिद्धिः ।
अत्र तत्तत्कार्यार्थे विलक्षणतत्तत्सृष्टिकथनात् । बहु स्यामितीच्छयै-
कत्वविरुद्धनानात्ववत्, प्रजायेयेतीच्छया सूनृतवाणीरूपत्वविरुद्धा-
ऽनृतव्ययवाणीरूपानृतात्मकत्वेनाप्यधर्मार्थं भवनाद् व्यवहारगोचरता-
यां विशेषेणानृताभिसन्धयन्धनस्याप्यधर्ममूलकतया नानात्वमि-
थ्यात्वासाधकत्वात् । अन्यथानृतस्य मिथ्यात्वे तेनात्मान्तर्धानं
नोच्येत । तस्य वस्तुकार्यत्वात् । नच तस्य मिथ्यात्वेनानन्तर्धाना-
देव दाह इति वाच्यम् । श्रुतावनृतकृतान्तर्धानस्यैव दाहहेतुत्वक-
थनेन तद्विरोधापत्तेः । नच नानात्वदर्शननिन्दया तस्य मिथ्यात्व-

श्रुतिनाशनेन तिलापः कृता वेदितव्याः। अन्तःप्रतिष्ठचोरवधार्थमेवैष आरम्भः। अलौकिकप्रमेये सूत्रानुसारेणैव निर्णय उचितः। न स्वतन्त्रतया किञ्चित् परिकल्पनम्। तर्काप्रतिष्ठानादिति निरा-

---

सिद्धिः। तस्याश्चक्षुपश्चक्षुरित्यादिना ब्रह्मस्वरूपमुपक्रम्य पठितत्वेन ब्रह्मस्वरूप इन्द्रियादिमत्तया जीवदेहवन्नानात्वस्यैव मिथ्यात्वं सिद्ध्यति, न कार्यनानात्वस्येति तस्यात्र वाक्याभासत्वात्। नचानादिकालप्रवृत्ताविद्यावशाद् भेदप्रतिभास इत्यपि युक्तम्। अस्य भेदस्य ब्रह्मेच्छयोक्तत्वात् तस्य च ब्रह्मणः प्रतिभास इति त्रिवृत्करणेक्षण एव प्रसाधितत्वेनास्याविद्याकृतत्वाभावात्। तत्कृतत्वे ब्रह्मणोऽपि जीवतौल्यापत्तेः। अत एवं प्रतिपादनं सूत्रश्रुत्योर्नाशनायैवेति स्वस्याहलिकतुल्यतया ब्रह्मवादा अप्येवं स्वार्थत्वेन तिलापः कृता वेद्या इति।

रामानुजाचार्या, भास्कराचार्योश्चेदं सूत्रं भेदवादनिराकरणाय, मायावादनिराकरणं तु प्रासङ्गिकमिति तं स्वयं दूषयन्ति। तत्राहुः। * अन्तरित्यादि *। तत्र प्रकारमाहुः। * अलौकिकेत्यादि * तथाच मायावादिभिः स्वस्य वेदान्तित्वाभिमानाद् वाक्याभासान्युपन्यस्य श्रुतिसूत्रन्यकारेण या कल्पनैतैः शब्दैः क्रियते सैवात्रानन्यत्वसूत्रेण मुख्यतया निवार्यते। अतो भेदवादनिराकृतिरेव प्रासङ्गिकीत्यर्थः। नन्वत्र किं मानमत आहुः। * तर्केत्यादि * काणादैर्हि भेदवादोज्जीवनं, विलक्षणबुद्धिबोध्यत्व-शब्दभेद-कार्यभेद—कालभेदा—ऽऽकारभेदो—त्पत्तिनाशप्रतीति-संख्याभेदैः कारकव्यापारवैयर्थ्यापादनेन च केवलैस्तर्कैः क्रियते। तत्र विलक्षणबुद्धिबोध्यत्वादीनां पञ्चानामेकस्मिन्नपि पुरुषे बालयुवस्थविरादिदशादर्शनेनाभेदसाधकतया साधारणीकरणादुत्पत्तिविनाशयोश्च स्थूलत्वादिवदवस्थान्तरत्वाभ्युपगमेन घटवत्तन्तव, पटः पट इति संख्याभेदस्यापि समुदायस्य कारणत्वाङ्गीकारात् तदभावेन तदनङ्गीकारे च कारणगुणानां कार्यगुणारम्भकत्वात् कार्यं बहुत्वापत्त्या द्रव्यगतावस्थानां कारकव्यापारजन्यतया कारकव्यापारवैयर्थ्यनिरासेन च तर्केरेव तद् दूष्यते। अतस्तत्र केवलतर्कमूलत्वम्। तत्र

कृतमेव। न वास्मिन्नपि सूत्रे मिथ्यात्वार्थः सम्भवति। एकवि-
ज्ञानेन सर्वविज्ञानोपक्रमबाधात् प्रकरणविरोधश्च। त्रयाविरोधः

सूत्रकृता तर्काप्रतिष्ठानकथनादेव निराकृतमिति तदेव मानमतो न
तन्निरासे तदाशयः। किन्तु मिथ्यावादनिरास एवाशय इत्यर्थः।
ननु सूत्रे तदनन्यत्वमुक्तं, तच्चाभेदपर्यन्तत्वाभावेऽपि भेदव्यासेध-
मात्रादुपपद्यते। स च कार्यस्य मिथ्यात्वादतः कथं मिथ्यावादनि-
रासार्थमस्यारम्भ इत्युच्यते इत्याशङ्कायामाहुः। * न वेत्यादि *
इदं हि सूत्रं, प्रकृतिश्च प्रतिज्ञेति सूत्रोक्तार्थदृढीकरणाय प्रणीतम्।
श्रुतिविप्रतिषेधपरिहारार्थत्वाद् भेदवादपरिहारार्थत्वाद्वा। उभय-
थापि प्रतिज्ञादृष्टान्तश्रुती एवास्योपजीव्ये। तथाहि सर्वमेव न स्यात्,
किमेकविज्ञानेन विज्ञायेत। किञ्च। विज्ञानं हि भगवतैकादशस्कन्ध
एवं लक्षितम्। 'एतदेव हि विज्ञानं न तथैकेन येन यत्। स्थित्युत्पत्त्यप्य-
यान् पश्येद् भावानां त्रिगुणात्मनाम्। आदावन्ते च मध्ये च सृज्या-
त् सृज्यं यदन्वियात्। पुनस्तत्प्रतिसंक्रामे यच्छिष्येत तदेव सद्' इति।
तत्र पूर्वलक्षणं सांख्यानुसारि, द्वितीयं ब्रह्मवादानुसारि। उभयथा-
पि विशिष्टज्ञानात्मकं विज्ञानमिति सिद्ध्यति। तच्च विशेषणसत्ता-
यामेव घटते। अतो विज्ञानश्रुतिबाधेन तादृशोपक्रमबाधात् सूत्रे त-
थार्थो न सम्भवति। किञ्च। प्रकरणमिदं ब्रह्मणः। तत्र सृष्टिद्वारा
तत्कारणीभूतं ब्रह्म ज्ञाप्यते बीजाङ्कुरभावेन, यत्रैतच्छुङ्गमुत्पतितं
नेदममूलं भविष्यतीति क तस्य मूलं स्यादन्यत्राद्भ्यदेवमेव खलु
सोम्यान्नेन शुङ्गेनापो मूलमन्विच्छाद्भिः सोम्य शुङ्गेन तेजोमूलमन्वि-
च्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः
प्रजाः सदायतनाः सत्प्रतिष्ठा इत्यादिना। तद् यदि सर्वं मिथ्या स्या-
च्छुङ्गमूलभावो विरुध्येत। रजतशुक्त्योः शुङ्गमूलभावस्याप्रसिद्ध-
त्वात्। प्रजानां सदायतनत्वसत्प्रतिष्ठत्वे च विरुध्येताम्। शुक्तिर-
जते तथात्वाभावात्। एकस्य भ्रमकालेऽन्येन शुक्तिमात्रस्यैव तत्र
दर्शनात्। अतः प्रकरणविरोधाच्च सूत्रस्थोऽनन्यशब्दो न मिथ्यात्व-
फलक इत्यर्थः। सिद्धमाहुः। * त्रयेत्यादि *। तथाचैवं वेदान्ति-
त्वाभिमानिनो दूषणाय श्रुतिसूत्रविरोध एव प्रदर्शनीयो, नाधिकः

भयपरित्यागेनैकमिदं सूत्रमन्यथा योजयन्नतिधृष्ट इत्यलं विस्तरेण ॥ १४ ॥

प्रयासः कर्तव्य इत्यस्माभिरुपेक्षित इत्यर्थः ।

भास्कराचार्यास्तु पूर्वमस्माभिरनूदिता एव मायावादावतरणयुक्तीरुपन्यस्यैवं दूषयन्ति । तथाहि । यन्मृत्तिकेत्येव सत्यमित्यवधारणात् कारणमेव सत्यं, कार्यमसत्यमिति व्याख्यातं, तत्राऽयं सत्यासत्यविभागः कथमवगतः । न तावत् प्रत्यक्षानुमानाभ्याम् । ताभ्यां हीदं सत्यत्वेनैव परिच्छिन्नम् । नच कारणदोषबाधकप्रत्ययौ स्तः । पृथिव्यादिज्ञानस्यासंसारं सर्वेषां प्राणिनामनुवृत्तिदर्शनात् । यदत्राविद्या कारणदोषत्वेनोच्यते, तत्तु तव सिद्धान्तमपि बाधते । यो हि श्रोता मन्ता स प्रागवस्थायामविद्यावानेवेति यथा अविद्यावतां प्रमातॄणामुत्पन्नं भेददर्शनं मिथ्या तथा अद्वैतब्रह्मज्ञानमपीत्यापत्तेः । अतोऽसत्यपि बाधकज्ञाने यदविद्याख्यकारणदोषजन्यत्वाच्छुक्तिरजतज्ञानवदनुमानेन भेदज्ञानस्य मिथ्यात्वं साध्यते । तद् ब्रह्मज्ञानेऽपि तुल्यम् । ब्रह्मज्ञानं मिथ्या। अविद्याख्यकारणदोषजन्यत्वाद्, अविद्यावच्छिष्टत्वाज्जन्यज्ञानत्वाच्च । प्रपञ्चज्ञानवदित्यनुमानस्य तत्रापि सम्भवात् । किञ्चासत्यात् सत्यप्रतिपत्तौ, स्वप्नो, लिप्यक्षराणि च दृष्टान्तत्वेन यदुक्तानि तदप्ययुक्तम् । अदृष्टस्य स्वप्नस्य शुभाशुभासूचकत्वात् । दृष्टस्य तु ज्ञानविषयत्वेन तद्विषयकात् सत्याज्ज्ञानादेव सूचनसिद्धेः सत्यादेव सत्यप्रतिपत्तिर्नासत्यात् । अत एव, 'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । सिद्धिं तत्र विजानीयात् तस्मिन् स्वप्ननिदर्शने' इति श्रुतिरपि दर्शनस्यैव सिद्धिहेतुत्वमाह । एवं लिप्यक्षराण्यपि वस्तुभूतानि सत्यानि । विन्यासविशेषावच्छिन्नस्य चक्षुर्ग्राह्यस्य मद्यादिद्रव्यस्यैव लिप्यक्षरत्वात् । सङ्केतवशेन तस्यैव श्रोत्रग्राह्यवर्णगमकत्वादिति । यदपि शङ्कायां विषमरणहेतुत्वं दृष्टान्तितम् । तदप्यसत् । शङ्काया अपि ज्ञानविशेषत्वेन वस्तुत्वाच्छङ्कया तद्विषयस्मरणस्यापि वस्तुत्वात् तेनैव मरणसिद्धेरिति । अथागमात् प्रपञ्चस्य मिथ्यात्वावगतिरिष्यते, तदप्ययुक्तम् । श्रोत्रप्रमयस्य ज्ञानस्य मिथ्यात्वेन वर्णात्मकस्य तत्त्वमस्यादिवाक्यस्याभावात् तेन मिथ्यात्वप्रतिपत्तेरशक्यवचनत्वात् । स्या-

वहारिकसत्यत्वेऽपि तत्र मिथ्यात्वाऽनुक्तेः। नच, नेह नानाऽस्तीत्यनेन । तत्र इहपदेन तस्य स्वरूपनानात्वनिषेधपरत्वात्.। नापि, स एव नेति नेतीत्यनेन । तस्याप्यात्मनि शरीराद्यनात्मपर्युदासेनात्मस्वरूपोपदेशपरत्वात् । नापि, यत्र हि द्वैतमिव भवतीत्यनेन । तत्र हीवेति शब्दोऽनर्थको वा ? यथा विनतमिवेत्यवधारणार्थो वा? यथा अण्व एवेमा धाना इति सादृश्यार्थो वा? । यथार्द्रैधाग्नेरित्यत्र धूमविस्फुलिङ्गा इवेति । एवं त्रिष्वप्यर्थेषु यस्यामवस्थायां विविधं विकारजातं भवति तत्रेतर इतरं पश्यति यत्रत्वस्य सर्वमात्मैवाऽभूत् तदा केवलेन कं विषयं पश्येदिति कारणप्राप्तौ विशेषज्ञानस्यैव निषेधादिति । किञ्च । का चेयमविद्या? । तत्त्वातत्त्वाभ्यामनिर्वाच्येतिचेन्न ।

यस्याः कार्यमिदं कृत्स्नं व्यवहाराय कल्पते ।
निर्वक्तुं सा न शक्येति वचनं वञ्चनार्थकम् ॥

यदि ह्यनिर्वचनीया, कथमाचार्यः शिष्येभ्यः प्रतिपादयेत् । अप्रतिपन्नया च तया कथं व्यवहारः सिद्ध्येदित्यादि । यच्चोक्तं, कथं परिणामो निरवयवस्याकाशकल्पस्य ब्रह्मण इति ? । तत्र ब्रूमः । स्वाभाव्यात् क्षीरवदिति । सर्वज्ञत्वात् सर्वशक्तित्वात् स्वेच्छयैव परिणामयेदात्मानम् । ननु विरुद्धो दृष्टान्तः । क्षीरस्य सावयवत्वादितिचेन्न । सावयवत्वस्य तदप्रयोजकत्वात् । अन्यथाऽम्बुनोऽपि दधिभावेन परिणामापत्तेः । एवमन्यान्यपि बहूनि दूषणान्याहुः । सूत्रे तु, तयोरनन्यत्वं तदनन्यत्वमिति व्याख्याय हेतुबोधिकां वाचारम्भणश्रुतिं त्वेवं व्याकुर्वन्ति । वाचो वागिन्द्रियस्योभयमारम्भणमालम्बनं विकारो नामधेयं च । विकारोऽभिधेयोत्पत्तिस्तदभिधानं नामधेयम्, उभयमालम्ब्य वाग्व्यवहारः प्रवर्तते । घटेन जलमाहरेति, मृण्मयमित्येतस्येदं व्याख्यानम् । ननु यदि कार्यं व्यवहारहेतुर्न, तर्हि कार्यकारणयोरनन्यत्वमित्याशङ्क्याह । मृत्तिकेत्येव सत्यमिति । कारणमेव हि कार्यात्मना नटवदवतिष्ठते । मृत्समन्वितं हि त्रिष्वपि कालेषु कार्यं, नाभ्यमहिषवद्देशतः कालतो वा व्यतिरिक्तमुपलभ्यते । कारणस्यावस्थामात्रं व्यतिरिक्ताव्यतिरिक्तं शुक्तिरजतवदागमापायधर्मत्वादनृतमनित्यमिति च व्यपदिश्यते । तदर्थमेव मृत्तिकेत्येव सत्यमित्युक्तम् । प्रत्यक्षमेव हि सत्यत्वमत्रानूद्यते, न तु वि-

धीयते । दृष्टान्तत्वेनोपादानात् । तथाच न्यायसूत्रम् । लौकिकपरीक्षकाणां यत्र बुद्धिसाम्यं स दृष्टान्त इति । अपागादग्नेरग्नित्वमिति तु कारणात्मना निरीक्ष्यमाणं कार्यमतिरिक्तं नोपलभ्यते, कारणात्मन्येव च तिरोहितं भवतीत्यभिप्रायेणोक्तम् । आदिपदेनैतदात्म्यं सर्वमित्येवञ्जातीयकं वचनं गृह्यते । तथाच श्रुत्यन्तरमात्मव्यतिरिक्तस्य प्रपञ्चस्य सत्यतां दर्शयति । अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमिति । यदि चानृतत्वमभिप्रेयात् प्राणा असत्यमिति ब्रूयादिति ।

रामानुजाचार्यास्तु— तस्मात् परमकारणादनन्यत्वं जगतस्तदनन्यत्वम्, आरम्भणशब्दादिभ्यः पूर्वोक्ताभ्यः श्रुतिभ्योऽवगम्यत इत्येवं सूत्रं व्याख्याय वाचारम्भणवाक्यमेवं व्याकुर्वन्ति–आरभ्यते आलभ्यते स्पृश्यत इत्यारम्भणम् । कृत्यल्युटो बहुलमिति कर्मणि ल्युट् । वाचा वाक्पूर्वकेण व्यवहारेण हेतुनेत्यर्थः । घटेनोदकमाहरेत्यादिवाक्पूर्वकोह्युदकाहरणादिव्यवहारस्तत्सिद्धये तेनैव मृद्द्रव्येण पृथुबुध्नोदराकारत्वादिलक्षणो विकारः संस्थानविशेषस्तत्प्रयुक्तं च घट इत्यादिनामधेयं च स्पृश्यते । उदकाऽऽहरणादिव्यवहारसिद्ध्यर्थं द्रव्यमेव संस्थानान्तरनामान्तरभाग् भवति । अतो घटादपि मृत्तिकेत्येव सत्यं मृत्तिकाद्रव्यमित्येव सत्यं प्रमाणेनोपलभ्यते, न तु द्रव्यान्तरत्वेनेत्यर्थ इति । ये पुनः कार्यकारणयोरनन्यत्वं कार्यस्य मिथ्यात्वाश्रयणेन वर्णयन्ति तेषां कार्यकारणयोरनन्यत्वं न सिद्ध्यति । सत्यमिथ्यार्थयोरैक्यानुपपत्तेः । तथा सति ब्रह्मणो मिथ्यात्वं जगतः सत्यत्वमिति वैपरीत्यापत्तेश्चेत्याहुः । काणादमतदूषणं तु प्रागेवोक्तम् । मायावादिमतोपरिदूषणान्तराणि बहूनि वदन्ति । तानि विस्तरभयान्नानूद्यन्ते ।

तन्मतवीरस्तु–विकारो नामधेयं च वाचाया अभिलापार्थव्यवहारस्य आरम्भणं निष्पादकं भवति । मृद्द्रव्यस्यैव घटाद्यवस्था घटादिनामधेयं चार्थक्रियाया अभिलापस्य च निष्पत्तये भवतीति यावत् । वस्तुतो घटाद्यपि मृत्तिकेत्येव सत्यं प्रामाणिकं, मृद्व्यतिरेकेण घटाद्यदर्शनात् । अथवा । विकारो घटो वाचारम्भणं घटोऽयमिति वाचारम्भविषयमात्रम् मृद्द्रव्यमेव व्यवहारसिद्ध्यर्थमवस्थान्तरमापन्नं, न तु मृदो द्रव्यान्तरम् । मृत्तिकेत्येव ना-

मधेयं स यम्। घटादिकं मृत्तिकेति कृत्वैव तत्र सर्वं मृत्पिण्डादिनामधेयं सत्यं, सति प्रामाणिकेऽर्थे साधु, न तु द्रव्यान्तरमिति कृत्वा यतो घटो मृदेवातः कारणादनन्यदेव कार्यम्। अर्थक्रियादिव्यवहारभेदस्त्ववस्थाभेदात्। एवमेव ब्रह्मप्रपञ्चयोरपि व्याप्यव्यापकभावादनन्यत्वं द्रष्टव्यम्। तथाच पुराणवाणी। 'शक्त्यादि च पृथिव्यान्तं शिवतत्त्वसमुद्भवम्। तेनैकेन तु तद्व्याप्तं मृदा कुम्भादिकं यथा' इति। ननु मृदयं घट इत्यत्र यथा मृद्व्याप्तिर्दृश्यते तथा ब्रह्मेदं जगदिति व्याप्तिर्न दृश्यते इति चेन्न। सन् घटः सन् पट इति सर्वत्र सद्रूपस्य ब्रह्मणो व्याप्तिदर्शनात्। यदि हि सद्रूपेण व्याप्तं जगन्न स्यात् सत्तास्फूर्तिभ्यां विना कृतम्, अस्तीति स्फुरतीति न भासेत। तथा सत्यवस्त्वेव भवेत्। अतो मृदा घटादिकमिव कारणेन शिवेन सर्वं जगद् व्याप्तं तदनन्यभूतं चेत्याह।

विज्ञानभिक्षुस्तु, लोकवदिति पूर्वसूत्रादनुकृष्येदं सूत्रमेवं व्याचख्यौ। तस्य भोक्तुः सोपकरणस्य प्रकृतब्रह्मानन्यत्वं, नदीनां समुद्र इव कारणे ब्रह्मण्यविभागो मन्तव्यो, न तु भोक्तुरत्यन्तं ब्रह्मत्वं, न वा प्रलयादावभावः। कुतः? आरम्भणशब्दादिभ्यः। आरम्भणश्रुत्यादिभ्य। सा श्रुतिस्तु, तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेति। अस्यां श्रुतौ पूर्वसर्गीयविद्याकर्मप्रज्ञानां जीवारम्भकत्वश्रावणात् प्रलयेऽपि ब्रह्माभेदेन जीवस्य सत्त्वं सिद्ध्यति। ब्रह्मणः कर्माद्यसम्भवात्। प्रलये जीवविनाशे च, तं पूर्वप्रज्ञा समन्वारभत इत्यस्यानुपपत्तेः। तच्च प्रलये जीवावस्थानं ब्रह्माविभागेनैव सम्भवति। अन्यथा, सदेव सोम्येदमग्र आसीदित्यादिनामादिशब्दगृहीतानामद्वैतश्रुतीनामनुपपत्तेरिति। अतः पूर्वसूत्रीयदृष्टान्तस्यात्रत्यदार्ष्टान्तिकस्य च नेतरेतरवैषम्यमिति भाव इति। तदसङ्गतम्। उक्तश्रुतेरुपसर्गद्वयघटितत्वेन तस्या विषयवाक्यत्वस्यायुक्ततया सर्वप्रसिद्धस्यारम्भणवाक्यस्य त्यागायोगात्। शुद्धाद्वैतानङ्गीकारोऽप्ययुक्तः। अविभागाद्वैतस्यावान्तरप्रलये सत्त्वेऽपि प्राकृतिके केवलाद्वैतस्यैव वक्तव्यत्वात्। अन्यथा, यत्र सुकाणि यत्रैकं भवन्ति सर्वे वेदा यत्रैकं भवन्ति सर्वे होतारो यत्रैकं भवन्तीति, यदा तमस्तन्न दिवा न रात्रिर्न सन्न चासन् शिव एव केवल इत्यादिश्रुतीनां विरोधापत्तेः। ब्रह्मणः कर्माद्यभावोऽपि तथा। सृष्टिकरणस्य श्रुत्यै-

बोधकत्वात्। पूर्वप्रज्ञाया जीवाविनाशसाधकत्वमप्यसङ्गतम्। प्रज्ञा च तस्मात् प्रसृता पुराणीति श्रुत्युक्ताया ब्रह्मप्रज्ञाया अपि तत्र ग्रहीतुं शक्यत्वेन जीवप्रज्ञाया एव ग्रहणे नियामकाभावात्। न जायते न म्रियते इति श्रुतेस्तद्विनाशशङ्काया एवानुदयाच्च। नच नास्तिकनिरासाय तत्साधनमिति वाच्यम्। तदर्थं श्रुतेरवक्तव्यत्वात्। सदेवेति श्रुतेरविभागाद्वैतसाधकत्वमपि। तथा सत्यद्वितीयपदकोपस्य प्रागेव दर्शितत्वात्। नच, न तु द्वितीयमस्ति ततोऽन्यद्विभक्तमिति, पृथग्विभक्ता प्रलये च गोप्तेति, अविभक्तं च भूतेषु विभक्तमिव च स्थितमित्यादिश्रुतिस्मृतिभिः समन्वयसूत्र एवाद्वितीयपदस्याऽविभागपरतया विचारितत्वान्न तत्कोप इति वाच्यम्। आद्यश्रुतेः सृष्टिदशायां विभागे सत्यपि मूलविचारेण दर्शनादर्शनयोरुपपादकत्वोपन्यासस्य प्रकरणादेवावगमेन सृष्टिप्राक्कालवृत्तान्तबोधकतायाः स्फुटत्वेन तदानीन्तनाविभागासाधकत्वात्। द्वितीयस्यास्त्ववान्तरप्रलयवृत्तान्तबोधकत्वम्। स्मृतेस्तु सृष्टिकालविषयत्वमिति तदसाधकत्वात्। अन्यथा, सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत्, विश्वं वै ब्रह्म तन्मात्रमित्यादिश्रुतिस्मृतिविरोधस्य दुर्वारत्वादिति। यत् पुनः समन्वयसूत्रे वाचारम्भणश्रुतिरेवं व्याख्याता—विकारो वाचारम्भणं नाम कार्यः पश्चाच्च नाममात्रावशेषो भवति। वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे। नामैवैनं न जहातीति स्मृतिश्रुतिभ्याम्। अतो विकारो मृत्तिकेत्येव कारणरूपेणैव सत्यं, न तु विकारत्वेनेति। तथाचानेनानित्यत्वमात्रबोधनाच्च विवर्तवादः सिध्यति, किन्तु परिणामवाद एवेति। तत्र फलं त्वनुमन्यामहे। व्याख्याने तु नाममात्रावशेषत्वमवान्तरप्रलयविषयम्। सर्वप्रलये तेनापि प्रकृतिपुरुषमात्रावशेषताङ्गीकारान्नामशेषतायास्तन्मतेऽपि वक्तुमशक्यत्वात्। यत् पुनः प्रस्तुतसूत्रे विवर्तवाददूषणायोक्तम्—उक्तवाक्यैः प्रपञ्चस्यात्यन्तासत्त्वं यदुच्यते तद् वाक्यं सन्न वा?। आद्ये बाधः। प्रपञ्चात्मकस्य तस्यैव सत्त्वात्। अन्त्ये हेत्वसिद्धिः। अत्यन्तासत्त्वसाधकप्रमाणाभावात्। अतः सदसत्त्वविकल्पपराहतैरारम्भणशब्दादिभिः प्रमाणैरनुन्मत्तेन सूत्रकारेण प्रपञ्चात्यन्तासत्त्वं साधयितुं न युज्यते इति। अन्यदपि बहूक्तम्। तत्रोदासीना वयम्।

माध्वास्तु—भगवतः कर्तृत्वं साधनान्तरसापेक्षं न वेति वा-

भावे चोपलब्धेः ॥ १५ ॥

भाव एव विद्यमान एव घटे घटोपलब्धिः। नाभावे। चकारान्मृत्तिकेत्येव श्रुतिः परिगृहीता। वाङ्मात्रेण चोपलम्भे मिथ्यैवात्र घटोऽप्यस्तीत्युक्ते उपलभ्येत।

ङ्कायां तदनपेक्षत्वमत्र साध्यते। तथाच तस्य हरेर्जगत्सृष्टावनन्यत्वं साधनान्तरानपेक्षत्वम्। तत्र हेतुरारम्भणशब्दादिभ्यः। किंस्विदासीदधिष्ठानमारम्भणं, कतमत् स्वित् कथासीदिति। नचायं प्रश्नः। अधिष्ठानाद्युत्तरस्यानुक्तत्वात्। तदभावे केवलप्रश्नस्यार्द्धपद्यस्यैवानावबोधकताप्रसङ्गात्। किं तर्हि?। अयमाक्षेपः। स चाधिष्ठानाद्याक्षिपन् भगवतस्तन्निरपेक्षत्वे पर्यवस्यति। आदिशब्दाद् युक्तयः।

परतन्त्रो ह्यपेक्षेत स्वतन्त्रः किमपेक्षते।

साधनानां साधनत्वं यतः किं तस्य साधनैरित्याद्यास्ताभ्य इत्यर्थः। सोऽयं न सूत्रकाराभिप्रायगोचरहेतुरिति प्रतिभाति। यदि स्यात्तदाधिष्ठानशब्दादिभ्य इति वदेत्। तत्त्यागे बीजाभावात्। अथ युक्तस्तथा सत्यधिष्ठानानपेक्षत्वात् साध्यासिद्धिः। किञ्चैवमनन्यत्वसाधनं भेदसिद्धान्तभञ्जकम्। अधिष्ठानानपेक्षावदुपादानानपेक्षाया अप्यस्मादेव वाक्यात् सिद्धेः। आरम्भणशब्दस्य कर्मार्थकल्युटापि सिद्धेः। व्युत्पत्त्यन्तराङ्गीकारेऽनपेक्षत्वहानेश्च। अतस्तन्मतं चिन्त्यमेव। वाचारम्भणवाक्यन्तु न विचारितम्। तत्र बीजं च न पश्यामः ॥ १४ ॥

भावे चोपलब्धेः ॥ एवमेकेन श्रुतिविप्रतिषेधं परिहृत्य कार्यस्य कारणादनन्यत्वे सत्त्वे च युक्तिमाह—भावे चेति सूत्रेण। तद् व्याकुर्वन्ति। * भाव एवेत्यादि *। तथाच श्रुत्यनुगृहीतस्य प्रत्यक्षस्य प्रमाणत्वात् ततोऽपि मिथ्यात्वबाध इत्यनन्यत्वं कारणादभिन्नत्वमेवेत्यर्थः। साधकयुक्तिं व्याख्याय परमतबाधिकां तामाहुः। * वागित्यादि *। तथाच युक्तिद्वयबाधितो वाङ्मात्रत्ववाद इत्यर्थः।

इदं सूत्रं मिथ्यावादिना न ज्ञातमेव । अत एव पाठान्तरकल्पनमिति ॥ १५ ॥

सत्त्वाच्चावरस्य ॥ १६ ॥

अवरस्य प्रपञ्चस्य सत्त्वात् त्रैकालिकत्वाद् ब्रह्मत्वम् । सदेव सोम्येदमग्र आसीत् । यदिदं किञ्च तत् सत्यमित्याचक्षत इति श्रुतेः ॥ १६ ॥

सूत्रविरोधमप्याहुः । * इदमित्यादि * । * न ज्ञातमिति * । एवमर्थकतया न ज्ञातम् । नन्वस्मिन् सूत्रे कार्यस्य कारणादनन्यत्वाय कारणसद्भावे कार्योपलम्भः प्रतिपाद्यत इति व्याख्यायत एवेति कथं न ज्ञातमित्युच्यत इत्याशङ्कायां तदज्ञाने हेतुं स्फुटीकुर्वन्ति । * अत एवेत्यादि । * पाठान्तरकल्पनमिति * । भावाच्चोपलब्धेरिति पाठकल्पनम् । तथाच पाठान्तरं कल्पयित्वा, न केवलं शब्दादेव कार्यकारणयोरनन्यत्वं प्रत्यक्षोपलब्धिभावाच्च तयोरनन्यत्वमिति व्याख्याय तन्त्वव्यतिरिक्तपटोपलब्ध्या कार्यस्य परंपरया ब्रह्मानन्यत्वबोधनेन अस्मदुक्तरीत्यैव तदनन्यत्वसिद्धेरित्यतो न ज्ञातमित्युच्यते । तथाच घट्टकुटीप्रभातन्यायादुक्तसूत्रेऽभेदरूपानन्यत्वस्य स्वयमपि साधनाच्च तत्कृत पूर्वसूत्रव्याख्यानमयुक्तमित्यर्थः ॥ १५ ॥

सत्त्वाच्चावरस्य ॥ भाष्यमत्र स्फुटार्थम् । प्रत्यक्षविरोधमाशङ्क्य तत्र मानमाहु । * सदेवेत्यादि * । श्रुतौ प्रपञ्चसत्त्वबोधकमिदं पदम् । सूत्रे चकारस्तु, 'विश्वं वै ब्रह्म तन्मात्रं संस्थितं विष्णुमायया । यथेदानीं तथाचाग्रे पश्चादप्येतदीदृशमिति । तदेतदक्षयं नित्य जगन्मुनिवराखिलम् । आविर्भावतिरोभावजन्मनाशविकल्पवद्. इत्यादि श्रीभागवतविष्णुपुराणादिवाक्यसङ्ग्राहक । एवञ्चास्मिन्नधिकरणे छान्दोग्यस्थप्रतिज्ञावाक्यस्य दृष्टान्तवाक्येन सह यो विरोध, स परिहृत । कार्योपलब्ध्या कार्यसत्तासाधनेन तत्सत्तया कार्यस्य ब्रह्मत्वसाधनेन कार्यस्य कारणाभिन्नत्व दृढीकृतम् ॥ १६ ॥

असद्व्यपदेशान्नेतिचेन्न धर्मान्तरेण वाक्यशेषात् ॥ १७ ॥

असद्वा इदमग्र आसीदिति श्रुत्या प्रागुत्पत्तेः कार्यस्यासत्त्वं बोध्यत इतिचेन्न । अव्याकृतत्वेन धर्मान्तरेण तथा व्यपदेशः ।

एवमनेनाधिकरणेन कार्यमिथ्यात्ववादं निराकृत्य असत्कार्यं निराकर्तुम्, असद्वेति श्रुतिविप्रतिषेधपरिहारायाधिकरणमारभत इत्याशयेन सूत्रं पठन्ति ।

असद्व्यपदेशान्नेतिचेन्न धर्मान्तरेण वाक्यशेषात्॥ व्याकुर्वन्ति । * असद्वा इत्यादि * । अयमर्थः । पूर्वपादे समाकर्षसूत्रे, असद्वा इदमग्र आसीदितिश्रुतिस्थस्यासच्छब्दस्य ब्रह्मवाचकत्वं समाकर्षादुक्तम् । परन्तु समाकर्षहेतुर्नोक्त इति तस्य ब्रह्मवाचकत्वं न युक्तिसहम् । अथासदितिचेन्नेति पूर्वसूत्रे तद्विषयश्रुतौ चासतः कारणता निवारितेति सैव ब्रह्मकारणत्वे युक्तिरिति तया समाकर्षणमुच्यते । तदापि मुख्ये सम्भवति गौण्या अयुक्तत्वादस्यासत्परत्वस्यासत्कार्यवादसाधकत्वम् । इदं परिदृश्यमानं जगद् वै निश्चयेन, अग्रे प्रागुत्पत्तेरसदासीत्, ततो ब्रह्मणः सकाशात्, सज्जायतेति प्रागुत्पत्तेः कार्यस्यासत्त्वं बोध्यते । तथाचासद्व्यपदेशाद्धेतोराद्यन्तयोर्यदसत्तोऽस्ति तदेव मध्य इतीदानीमपि सन्नेति पूर्वसूत्रोक्तः सत्त्वादिति हेतुराश्रयासिद्धः। तदसिद्धौ चोपलब्धिरप्यन्यथा सिद्धा। तस्यास्तथात्वे चानन्यत्वमपि दूरापास्तमिति तदाक्षेपं सूत्रांशेनाऽऽशङ्क्य दूषयति । नेति*।एवञ्च प्रागुत्पत्तेः कार्यं सन्न वेति सन्देहः । असदिति पूर्वः पक्षः । सिद्धान्तं व्याकुर्वन्ति । सन्नेति यदुक्तं तन्न । कुतः ? । धर्मान्तरेण तथा व्यपदेशात् । येन धर्मेणेदानीं वर्तते व्याकृतनामरूपत्वेन, तेन धर्मेण तदानीं नास्तीति तथा व्यपदेशो, न त्वत्यन्तासत्त्वेन । कुतः ? । वाक्यशेषात् । वाक्यशेषोऽवशिष्टो भागस्तस्मात् । तमेव स्फुटीकुर्वन्ति । तदात्मानमित्यादि । तथाचासद्वेति वाक्यशेषे आत्मपदात् तेनैव रूपेण सत्त्वं, न तु व्याकृतेनेति बोध्यते । अतो नास्यासत्कार्यवादसाधकत्वम् । इदं चासदिति सूत्रस्य प्रस्थानान्त

कुतः ? । वाक्यशेषात् । तदात्मानं स्वयमकुरुतेति स्वस्यैव क्रियमाणत्वात् । इदमासीत्पदप्रयोगाच्च ॥ १७ ॥

युक्तेः शब्दान्तराच्च ॥ १८ ॥

रीय व्याख्यानशेषत्वेन प्रागेव मया व्युत्पादितमिति नात्रोच्यते । एवं निवृत्ते तस्मिन् श्रुत्यभिप्रेतत्वाद्गौण्यपि न दोषाय । तथा सति समाकर्षेऽपीदमेव बीजमतः पूर्वोक्तं सर्वं सुस्थम् । वस्तुतस्तु नात्र गौणी । सर्वेषां शब्दानां भगवद्वाचकतायाः स्वारसिकत्वस्य प्रागेव साधितत्वात् । समाकर्षसूत्रस्य वादिबुद्ध्यनुसारित्वादिति । एवञ्चाभेदंशब्दोऽपि न परिदृश्यमानत्वमात्रपरः । बोध्यस्य शिष्यस्यात्राभावात् । किन्तु स्वबुद्धिस्थपरः । केवलश्रुतिवाक्यत्वात् । अत इदं पदमासीदिति पदञ्च सत्कार्यवादस्यैवोपोद्बलकमित्यर्थः ॥ १७ ॥

युक्तेः शब्दान्तराच्च ॥ पूर्वसूत्रस्यैव शेषोऽयमौलूकादिनिमहार्थः । शुष्कतर्काणामप्रतिष्ठानस्य पूर्वमुक्तत्वात् तादृशीभिर्युक्तिभिः सत्कार्यवादप्रत्यवस्थानमयुक्तम् । श्रुत्यविरुद्धयुक्तीनां सत्कार्यवादेऽपि विद्यमानत्वात् । ताश्च सांख्य एवमुच्यन्ते—'असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात्।शक्तस्य शक्यकरणात् कारणभावाच्च सत् कार्यम्' इति । अर्थस्तु—यदसत् तन्न क्रियागोचरः । शशविषाणादिवत् । यदि प्रागुत्पत्तेः कार्यमसत् स्यात् शशविषाणवत् स्यात् तदपि न क्रियागोचरः स्यात् । अस्ति तु तद्विपरीतमतः प्रागप्युत्पत्तेः सदेव । अथ यदा असत् तदेदमपि न क्रियागोचरः, उत्पत्स्यमानावस्थायामेव तु तत् तथेति विभाव्यते तदप्यसङ्गतम् । उपादानग्रहणात् । यदि प्रागुत्पत्तेः कार्यमसत् स्याद् दध्यर्थिभिः क्षीरं, घटार्थिभिर्मृत्, पटार्थिभिस्तन्तवश्च नोपादीयेरन् । असत्त्वस्य सर्वत्र तुल्यत्वात् । अतोऽवधिनियमार्थं कार्यस्य कारणे सत्त्वमभ्युपगन्तव्यम् । अथ यत्र कारणे यस्य कार्यस्य प्रागभावस्तदेव तदर्थं तदर्थिभिरुपादीयत इति विभाव्यते, तदप्यसङ्गतम् । सर्वसम्भवाभावात् । यद्येवं तदा प्रागभावस्वरूपं वक्तव्यम् । स किं प्रतियोगिस्वरूपनिरूप्यो ? न वा ? । अन्ते सर्वत्र तुल्यत्वात् सर्वतः सम्भवे-

युक्तिस्तावत्–समवेतमेव कार्यं सदुत्पाद्यत इति सम्बन्धस्य

त् । भेदस्य निर्वक्तुमशक्यत्वात् । आद्ये तु तदानीमपि प्रतियोगि-सत्तासापेक्षत्वात् तदानीमपि कार्यसिद्ध्या असत्कार्यवादस्यैव भङ्ग इति तदापि सदेव कार्यस्वरूपमास्थेयम् । अथ यदि मीमांसकप्रतिपन्नया शक्त्या निर्वाहो विचार्यते तदाप्यसङ्गतम् । शक्तस्य शक्यकरणात् । यद्धि यत्र शक्तं तत् तदेव करोति, न सर्वम् । यदि केवलया शक्त्याऽसदपि कार्यं स्यात् सर्वतः सर्वं स्यात् । शक्तेर्विषयमानत्वात् । अतस्तदभावाय शक्तेरपि कार्यवैशिष्ट्येन नानात्वमवश्यमङ्गीकर्तव्यम् । ततश्च सिद्धं सत्कार्यवादेनेति । ननु कारणेऽवयविनि किं व्यासज्ज्य कार्यं तिष्ठत्युत तदवयवेषु प्रत्येकम् ? । आद्ये कारणप्रतीतिरेव न स्यात् । कार्येण व्यवहितत्वात् । उत्पत्त्यनन्तरं च कारणं नश्येत् । दध्ना दुग्धवत् । उत्पत्तिरपि न स्यात् । सर्वस्यापरिणामात् । द्वितीये तु दध्यवस्थायामपि दुग्धं प्रतीयेत । तत्तु न प्रतीयते । अत उभयथापि वक्तुमशक्यत्वादसदेव कार्यमास्थेयमत आह । कारणभावादिति । इदं तदा शङ्क्येत यदि कारणातिरिक्तं तस्य रूपं स्यात् । कारणमेव तु कार्याकारेण परिणमत्यतः पूर्वावस्थायां कारणरूपमेव तदिति सुस्थिरः सत्कार्यवाद इति । नच सांख्यसिद्धत्वादस्या अप्रतिष्ठानं शङ्क्यम् । प्रधानस्य कारणतात्यागे एतासामपि, सत्त्वेव सज्जायत इति श्रुतिमूलत्वात् । अतः साप्यादरणीयैव । सांख्यप्रसिद्धत्वादेता भाष्ये पुनर्नोक्ताः । अथोत्पत्तेः पूर्वं कार्यस्यासत्वेऽपि समवायस्य विद्यमानत्वात् ततस्ततस्तदुत्पत्तिरितिचेत् तत्राहुः । * युक्तिस्तावत् समवेतमेवेत्यादि * अयमर्थः । समवायो यदि साधारणस्तदाऽवधिनियमभङ्गापत्तिरतोऽसाधारणो वक्तव्यः । असाधारणश्च कार्यवैशिष्ट्यनियतमतः सदेवोत्पाद्यत इत्येव सिद्ध्यति । किञ्च सम्बन्धत्वेन स उपगम्यते । सम्बन्धस्तु सम्बन्धिद्वयनिर्वर्त्यः । स कार्यरूपस्य सम्बन्धिनोऽभावे कथं सिद्ध्येत् । असिद्धश्च कथमुत्पत्तिं ततस्ततो नियमयेत् । किञ्च । स्वकारणे केनचित् सम्बन्धेन तस्य वृत्तिर्वक्तव्या । तथा सति तस्यापि सम्बन्धान्तरापेक्षेत्यनवस्था । अथ यथान्येषां सत्तासम्बन्धात् सत्त्वम् । सत्ता

द्विनिष्ठत्वान्निसत्त्वाच्च कारणान्तरेणापि परम्परया सम्बन्धः । असम्बद्धोत्पत्तौ तु मिथ्यात्वमेव । प्रवृत्तिस्त्वभिव्यक्त्यर्थमिति ।

तु स्वत एव सती । तथाऽन्येषां कार्याणां समवायेन सम्बन्धित्वम् । समवायस्य तु स्वत एव सम्बन्धित्वमिति विभाव्यते, तदा स नित्य इति तस्यापि साधारण्यापत्त्या सर्वतः सर्वोत्पत्तिप्रसङ्गः । किञ्च । निमित्तासमवायिनोरपि तस्य सत्त्वात् तत्समवेतत्वेनापि पटाद्युत्पत्तिप्रसङ्गः । अथ विद्यमानेऽपि निमित्तासमवायिनोः समवाये तदसम्बद्ध एवोत्पद्यत इत्युच्यते, तर्हि समवायिनामप्यसम्बद्ध एवोत्पद्यताम् । नियामकाभावात् । ततश्च मिथ्यात्वमेव कार्यस्यापद्येत । शुक्तिकारजतवत् । नियामकाङ्गीकारे तु कार्यातिरिक्तस्य नियामकत्वाभावादसत्कार्यवादस्य भङ्ग एवेति । ननु सत्यमेवं, तथापि कार्यस्य सत्त्वे कर्तृप्रवृत्तिवैयर्थ्यप्रसङ्गो नित्यानित्यविभागानुपपत्तिश्चेति तदभावाय तथाङ्गियत इति चेत् तत्राहुः । * प्रवृत्तिरित्यादि * तथाच सदेव कार्यं पूर्वमनभिव्यक्तं कर्त्रा कारकव्यापारेणाभिव्यज्यतेऽतो न प्रवृत्तिवैयर्थ्यम् । नापि नित्यानित्यविभागानुपपत्तिरित्यर्थः ।

रामानुजाचार्यास्तु—अभिव्यक्तिर्नित्या ? अनित्या वा ? । अन्त्ये तस्या अभिव्यक्त्यन्तरसापेक्षत्वादनवस्था । आद्ये तु कार्यस्य सदैवोपलम्भापत्तिः । किञ्चैवं कारकव्यापारस्याभिव्यञ्जकत्वं वक्तव्यम् । तथाभिव्यञ्जकेषु दीपादिषु प्रकाशकत्वरूपं साधारणमेव दृष्टमिति घटार्थेन कारकव्यापारेण कारकादेरप्यभिव्यक्तिप्रसङ्ग इत्यसत्कार्यवादिन आक्षेपे, उत्पत्तेरपि नित्यत्वे सदैवोत्पद्यमानतया सत्कार्यवादप्रसङ्गादसत्कार्यसिद्धान्तहानिरनित्यत्वे चानवस्थेति तं प्रति दोषं प्रदर्श्योत्पत्तिविनाशादीनां कारणावस्थाविशेषत्वमुपगम्य तत्तदवस्थस्यैव द्रव्यस्य ते ते शब्दास्तानि तानि कार्याणीति द्रव्यस्य तत्तदवस्थापादनेन कारकव्यापारस्य सार्थक्यमाहुः । परमेता युक्तयः प्रतिबन्दिरूपादनुत्तरभूता एव । अवस्थास्वपि नित्यानित्यविकल्पस्य शक्यत्वात् । अतः श्रुतिरेव शरणीकरणीया । अत

शब्दान्तरं सच्छब्दादात्मशब्दः । आत्मानᳫ स्वयमकुरुतेति ॥ १८ ॥

पटवच्च ॥ १९ ॥

एव व्यासचरणैरपि, शब्दान्तरादिति हेतुरेतत्समभिव्याहारेणोक्तः । एतावान् परं विशेषः । असत्कार्यवादिनां कार्यस्य नियतावधिकत्वाय प्रागभावसमायवादिकल्पनमधिकम् । श्रुतिविरोधादप्रामाणिकं च । अस्माकं तु न ते दोषाः । श्रुतौ पुरुष एवेदᳫ सर्वं यद् भूतं यच्चभाव्यमिति, स वै सर्वमिदं जगत् स भूतᳫ स भव्यमिति भूतभव्यव्यवहारविशिष्टस्यैव जगतो ब्रह्मत्वमुच्यते इति वर्तमानत्वाविरोधेनैव भूतत्वादिस्थितिः । सा चैवं बोध्या । यथा सर्वस्य ब्रह्मात्मकत्वाविशेषेऽपि पृथिव्यामेव गन्धसत्ता, न जलादौ । पृथिव्यां सर्वविधगन्धसत्त्वेऽपि तत्तद्देशकालावच्छेदेन तद्गन्धोद्भवनिवृत्त्युद्भवनियम इच्छाहेतुकस्तथा भूतादित्रयस्य वर्तमानत्वेऽपीच्छयेदानीमिह भाविरवमेवमुद्भवत्वेवं निवर्ततामेवं वर्तमानत्वमुद्भवत्वेवं निवर्ततामेवं भूतत्वमुद्भवत्वेवं निवर्ततामत्र सर्वदा वर्तमानत्वमेवोद्भूतं तिष्ठत्विति नियमात् । यत्र च नायं नियमो, यथा गीतायां, केचिद् विलग्ना दशनान्तरेषु संदृश्यन्ते चूर्णितैरुत्तमाङ्गैरिति, श्रीभागवते च, मयेमा रंस्यथ क्षपा इति, तस्य तस्य तेषु तेषु तत्तद्धर्मानुभवादप्यविरोधेनेति न कोऽपि कापि दोषोऽप्रामाणिकत्वं वा । इदं यथा तथा विद्वन्मण्डने प्रभुचरणैर्निपुणतयोपपादितं मया च तद्विवृतमिति ततोऽवगन्तव्यम् । एवञ्च सर्वस्य ब्रह्मकार्यत्वेऽपि इदं नित्यत्वेन लोके व्यवह्रियतामिदमनित्यत्वेनेति तदिच्छयैव विभागोऽपि बोध्यः । तथा साधुत्वासाधुत्वादिव्यवहारोऽपि प्रजायेयेतीच्छाशरीरे प्रविष्टस्य प्रकटस्यातिपिचण्डिलत्वेन सर्वसमाधानसमर्थत्वात् । एवमन्याअप्यनुपपत्तयो भगवदिच्छास्वरूपविचारेणैव परिहरणीया इति दिक् ।

एवं युक्तिर्व्याख्याता । शब्दान्तरं व्याकुर्वन्ति । * शब्दान्तरमित्यादि * । तथाच तेनाविकृतत्वं युक्त्यगोचरत्वं च श्रुत्यैव बोध्यत इति न कोऽप्यसत्कार्यवादशङ्कावकाश इत्यर्थः ॥ १८ ॥

पटवच्च ॥ ननु कारणे कार्यसत्ता तदा वक्तुं शक्या, यदि का-

यथा संवेष्टितः पटो न व्यक्तं गृह्यते, विस्तृतस्तु गृह्यते, तथाऽविर्भावानाविर्भावेन जगतोऽपि ॥ १९ ॥

यथा च प्राणादिः ॥ २० ॥

यथा प्राणापानानां नियमने जीवनमात्रम्, अनियमने आकुञ्चनादि । नैतावता प्राणभेदः । पूर्वमसत्त्वं वा । तथा जगतोऽपि । ज्ञानक्रियाभेदात् सूत्रद्वयम् ॥ २० ॥

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ २१ ॥

ब्रह्मणो जगत्कारणत्वे इतरस्य जीवस्यापि ब्रह्मत्वात् तद्धितं

यञ्चिदपि कार्यं प्रतीयेत । अन्यथा तु कारणमेव स्यान्न कार्यमित्यत आह । * पटवदिति * तद् व्याकुर्वन्ति । * यथेत्यादि * । आविर्भावानाविर्भावेनेति * सर्वोऽपि द्वन्द्वो विभाप्यैकवद्भवतीत्येकवद्भावः । तथाचाग्रहणेऽपि यथा पटसत्ता तथा कार्यसत्तापीत्यदर्शनं न कार्याऽसत्तासाधकमित्यर्थः ॥ १९ ॥

यथा च प्राणादिः ॥ ननु कार्यसत्त्वे तेनार्थक्रिया तु काचित् क्रियेत । यथा अदृश्येनापि भूतेन परदुःखोत्पादनम् । अत्र तु तदभावात् कथं तत्सत्तेत्यत इदं सूत्रं प्रवृत्तम् । तद् व्याकुर्वन्ति । * यथा प्राणेत्यादि * । अवतारणिकाया अनुक्तत्वात् सूत्रप्रयोजनं स्फुटीकुर्वन्ति । ज्ञानेत्यादि * । तन्मयैतत्सूत्रद्वयावतारणिकायां विवृतमेव । एवमनेनाधिकरणेन सत्कार्यवादे श्रुतेर्युक्तेश्च विरोधः परिहृतः । युक्त्या कार्यस्य कारणाद् भेदश्च निराकृतः ॥ २० ॥

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥ चेतनकारणत्वे प्राप्तदोषान्तरपरिहारायाधिकरणान्तरमारभते । संशयस्तद्बीजञ्च पूर्वपक्षादेव स्फुटति । इदं पूर्वपक्षसूत्रम् । तत्र पूर्वाधिकरणे सर्वस्य जगतो ब्रह्मानन्यत्वे जीवस्यापि तदनन्यत्वं जगद्विलक्षणत्वं च सिद्धम् । तत्र किञ्चिदाशङ्कन्त इत्याहुः । * ब्रह्मण इत्यादि * । इतरव्यपदेशात् । तत् सृष्ट्वेति श्रुतौ सृष्टावनुप्रवेशः श्राव्यते । स च, अनेनेति

कर्तव्यम् । तत्र करोतीति तदकरणादिदोषप्रसक्तिः । तत् सृष्ट्वा तदेवानुप्राविशत् । अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तस्यैव जीवव्यपदेशात् ॥ २१ ॥

अधिकं तु भेदनिर्देशात् ॥ २२ ॥

तुशब्दः पक्षं व्यावर्तयति । यदि ब्रह्म तावन्मात्रं भवेत् तदायं दोषः । तत् पुनर्जीवाज्जगतश्चाधिकम् । कुतः ? । भेदनिर्देशात् । द्रष्टव्यादिवाक्येषु कर्मकर्तृव्यपदेशाद् विज्ञानानन्दव्यपदेशाद्वा । न हि सम्पूर्णोऽंशस्य हितं नियमेन करोति । सर्वेन्द्रियव्यापाराभावप्रसङ्गात् । स्वलीलयैकं तु करोत्येव ॥ २२ ॥

श्रुत्या जीवे निश्चाय्यते । तस्यात्मत्वेन कार्यविलक्षणतया ब्रह्मत्वं च बोध्यते । अत इतरस्यात्मत्वेन व्यपदेशात् सिद्धे तस्य शुद्धब्रह्मत्वे तद्धितं कर्तव्यम् । सर्वोऽपि स्वहितं करोतीति । तच्च सर्वानर्थदुःखनिकरहेतुभूतायां सृष्टौ तस्यानुप्रवेशनाच्च करोतीति हिताकरणस्याहितकरणस्य च प्रसक्तिः । सा च प्रत्यक्षसिद्धा न निह्नोतुं शक्यते । अतः सर्वज्ञस्य सर्वशक्तेः स्वाहितादिकरणादसङ्गता ब्रह्मणः कारणतेति जीवानां नित्यभिन्नत्वमेवाङ्गीकार्यं, न तु ब्रह्मत्वम् । अथ ब्रह्मत्वमङ्गीकार्यं तदोक्तदोषप्रसक्तिः । तस्माज्जगद्वाचित्वाधिकरणे यद् ब्रह्मणो जडजीवकर्तृत्वमङ्गीकृतं तदसङ्गतमित्यर्थः ॥ २१ ॥

अधिकं तु भेदनिर्देशात् ॥ परिहरतीत्याहुः । * तुशब्द इत्यादि * । स्वयमेवात्मनात्मानं चेतसीत्यादावेकस्यापि कर्मकर्तृव्यपदेशादर्शनाद्धेतोः साधारणत्वमित्यरुच्या व्याख्यानान्तरमाहुः । * विज्ञानेत्यादि * तथाच यथैक्यं बोध्यते तथा ज्ञेयत्वेनानन्दरूपत्वेन च भेदोऽपि बोध्यतेऽतोऽयं भेदो ब्रह्मण आधिक्ये पर्यवस्यति । आधिक्यं चांशित्वाद् भूमविद्यायां निरवध्यानन्दे ज्ञेयत्वस्य पर्यवसानाच्च पूर्णत्वं । पूर्णश्चांशस्य हितं न नियमेन करोति । स्वदेहेऽपि नखनिकृन्तनकेशप्रसाधनादेर्दर्शनात् । अन्यथा सर्वेन्द्रियव्यापारा-

अश्मादिवच्च तदनुपपत्तिः ॥ २३ ॥

पार्थिवत्वाविशेषेऽपि हीरमाणिक्यपाषाणानां पलाशचम्पकचन्दनानामुच्चनीचत्वमेवं जीवस्यांशत्वाविशेषेऽपि ब्रह्मादिस्थावरान्तानामुच्चनीचत्वम्। कार्यवैलक्षण्यं तदननुरोधश्च दर्शितः ॥ २३ ॥

उपसंहारदर्शनान्नेतिचेन्न क्षीरवद्धि ॥ २४ ॥

ब्रह्मैव केवलं जगत्कारणमित्युक्तम्। तन्नोपपद्यते। कुला-

भावप्रसङ्गात्। किन्तु स्वलीलया हिताहितयोरेकं तु करोत्येवेति लोके दृश्यते। तथाचात्रांशिभावेनोक्तश्रुतिविरोधाभावादात्मत्वेऽपि हिताकरणादिदोषत्वादसङ्गतेयमाशङ्केत्यर्थः ॥ २२ ॥

अश्मादिवच्च तदनुपपत्तिः ॥ दृष्टान्तं व्याकुर्वन्ति। * पार्थिवेत्यादि *। आदिपदस्यार्थः—* पलाशेत्यादि *। त्रयाणां दृष्टान्तानामुक्तिस्त्रयाः प्राजापत्या उत्पन्नास्त्रिविधा जीवा इति श्रुतिस्मृत्युक्तत्रैविध्यस्मारणाय। तथाचैकजातीयेष्वपि स्वभावभेदेनैवमुच्चनीचभावस्य लोके दृष्टत्वाज्जीवेष्वपि स्वभावभेदस्य विद्यमानतया तत एव समाधिः सम्भवतीति लोकन्यायेन प्रत्यवस्थाता यो दोष उद्भाव्यते तस्य तन्न्यायेनैवानुपपत्तिरित्यर्थः। ननु पूर्वसूत्रेणैव सिद्धे समाधावस्य सूत्रस्य किं प्रयोजनमत आहुः। * कार्येत्यादि *। ब्रह्मणश्चेतनाचेतनरूपात् कार्यात् प्रपञ्चाद् वैलक्षण्यं, कार्याननुरोधश्चानेन सूत्रेण दर्शितः। अनुरोधस्तदधीनत्वम्। तथाच ब्रह्मणो न कार्यानुरोध इतीदमप्याधिक्यबोधनायोक्तमित्यर्थः। अनुरोध इति पाठे तु अनुरोधः कार्यस्वभावानुसारित्वम्। तथा सति तस्मादेव ब्रह्मणि न दोषगन्ध इति जगद्वाचित्वाधिकरणोक्तं कर्तृत्वं सूपपन्नमित्यर्थः ॥ २३ ॥

उपसंहारदर्शनान्नेतिचेन्न क्षीरवद्धि ॥ एवमधिकरणत्रयेण कार्यस्यांशस्य च कारणानन्यत्वेऽप्यनन्यत्वे च ये दोषास्ते परिहृताः। अतः परं ब्रह्मण एकस्यैवान्यनिरपेक्षस्य कारणत्वे पुनरन्यदाशङ्क्य समाधत्ते। तदाहुः * ब्रह्मेत्यादि * एकस्यान्यानपेक्षस्य ब्रह्मणो जग-

लादेश्चक्रादिसाधनान्तरस्योपसंहारदर्शनाद सम्पादनदर्शनादितिचेन्न । क्षीरवद्धि । यथा क्षीरं कर्तारमनपेक्ष्य दधिभवनसमये दधि भवति । एवमेव ब्रह्मापि कार्यसमये स्वयमेव सर्वं भवति ॥ २४ ॥

देवादिवदपि लोके ॥ २५ ॥

स्वतोऽभिन्नकरणे दृष्टान्तः । यथा देवर्षिपितरो बाह्यनिरपेक्षा

दुपादानकारणत्वं यत् पूर्वं साधितं तन्नोपपद्यते । लोके हि मृदादीनामुपादानानां कुलालादे कर्तुश्चक्रचीवरादेर्निमित्तान्तरस्य सम्पादनदर्शनात् । न हि बाधितमर्थं वेदोऽपि ब्रूते । सर्वत्र वेदे युक्तीनामादरदर्शनात्। यथा, न्यग्रोधफलमाहरेत्यादाविवेयं सूत्रांदोनाशङ्का समाधत्ते । न क्षीरवद्धीति * । इयमाशङ्का न कर्तव्या । हि यतो हेतोर्ब्रह्म न मृत्सूत्रादिवत् परिणमते, येनोक्तरीत्या शङ्क्येत । किन्तु क्षीरवत् । तदेतद् विवृतम् * यथा क्षीरमित्यादिना * । तथाच लोकेऽपि कर्तृसापेक्षत्वस्य काचित्कत्वदर्शनान्न बाधितोपदेश इत्यर्थः । एतेन वाक्यान्वयाधिकरणविषयवाक्ये ब्रह्मज्ञानेन सर्वज्ञानार्थं दुन्दुभिदुन्दुभ्याघातादीनामुभयेषां कथनेन, आर्द्रैधाग्नेरित्यत्रैधोऽग्न्योर्द्वयोः कथनेन च यदन्यसंसृष्टस्य कार्यजनकत्वं प्रतीयते, तद्, विज्ञानं चाविज्ञानं चेत्येकस्य सत्यस्य ब्रह्मणः सृष्ट्युभयरूपताश्रावणात् सृष्ट्यनन्तरभावीति सूच्यते । तस्मात् क्षीरवत् परिणामान्न स दोष इति बोधितम् ॥ २४ ॥

देवादिवदपि लोके ॥ ननु भवत्वेवं परिणामे कर्तुरनपेक्षा, तथापि क्षीरस्य दधिभावेऽधिश्रयणाऽऽतञ्चनाद्यपेक्षा तु दृश्यत इति निमित्तानपेक्षा कथं समाधेया । किञ्च, लोकेऽपि दधिसमवायस्य क्षीरे विद्यमानत्वात् क्षीरं दधिरूपेण परिणमति । समवायस्तु न भवदभिमत इति व्यधिकरणो दृष्टान्तः । किञ्च क्षीरस्यैकविध एव परिणामो, ब्रह्मणस्तु विज्ञानाविज्ञानभेदेन कथमुभयविध इति द्वयं समाधातुमाह सूत्रकारः । देवादीत्यादि * । ननु किमनेन दृष्टान्तेनेत्यत आहुः । * स्वत इत्यादि * तथाच यथा कर्दमो, विमानं कामगं

एव स्वयोगबलेन सर्वं कुर्वन्ति । एवं ब्रह्माप्यनपेक्ष्य तत्समवायं स्वत एव सर्वं करोति ॥ २५ ॥

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ २६ ॥

यद्येकमेव ब्रह्म स्वात्मानमेव जगत् कुर्यात् कृत्स्नं ब्रह्मैकमेव कार्यं भवेत् । अथांशभेदेन व्यवस्था तथा सति निरवयवत्वश्रुतिविरोधः । निष्कलं निष्क्रियं शान्तमिति ॥ २६ ॥

श्रुतेस्तु शब्दमूलत्वात् ॥ २७ ॥

तुशब्दः पक्षं व्यावर्तयति । श्रुतेः श्रूयत एव द्वयमपि । न च श्रुतं युक्त्या बाधनीयम् । शब्दमूलत्वात् । शब्दैकसमधिगम्यत्वात् । अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् अर्वाचीनविकल्पविचारकुतर्कप्रमाणाभासशास्त्रकलिलान्तःकरणदुरवग्रहवादिनां वादानवसरे सर्वभवनसमर्थे ब्रह्मणि विरोधाभावाच्च ।

क्षत्तस्तद्व्याचिरत्वीकरादिति निमित्तानि समवायादि चानपेक्ष्य विमानं च कृतवानेवं ब्रह्मापि सर्वानपेक्षं स्वसामर्थ्येनैव सर्वं करोत्युभयरूपं च भवतीत्यत्रापि न लोकविरोध इत्यर्थः । इदञ्च सूत्रद्वयं यथासम्भवं यथासंख्यं वा सांख्यान् प्रत्यौलूकान् प्रति चोत्तरमित्यपि ज्ञेयम् ॥ २५ ॥

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥ एवं लोकविरोधे परिहृतेऽत्रैव श्रुतिविरोधमाशङ्कते । कृत्स्नेत्यादि * ॥ २६ ॥

परिहरति । श्रुतेस्तु शब्दमूलत्वात् ॥ अत्र प्रथमसूत्रे प्रतिवादिनोः सम्भूय समुत्थानेनाक्षेपः । द्वितीये तूभयोः प्रतिसाधारण्येन समाधानम् । दुष्कतर्काप्रतिष्ठानस्य प्रागेवोपपादितत्वात् ताभ्यामप्यनुकूलतर्कविधया स्वतन्त्रप्रमाणत्वेन च श्रुतेराश्रयणादिति । तथाच श्रुतिमालम्ब्यापि तदर्थमजानन्तौ द्वावपि भ्रान्ताविल्यर्थः । भाष्यन्तु निगदव्याख्यातम् । 'अचिन्त्याः खलु ये भावा न तांस्तर्केण

एवं परिहृतेऽपि दोषे स्वमत्याऽनुपपत्तिमुद्भाव्य सर्वसंप्लवं वदन् मन्दमतिः सद्भिरुपेक्ष्यः ॥ २७ ॥

योजयेत् । प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणम्' इति सम्पूर्णवाक्यम् । अत्र मात्स्ये क्वचित्, ताँस्तर्केण प्रसाधयेदिति पाठः । तथा सति मात्स्ये तर्काभ्यनुज्ञानाद् भ्रमः स्यादिति तन्निवारणाय श्रीभागवतवाक्योपन्यासः । तेन मात्स्यवाक्ये प्रकृतिभ्य इति बहुत्वनिर्देशात् पुरुषपर्यन्त एव तद्विषयो, न तु ब्रह्मपर्यन्तो विषय इत्यदोषः ।

अत्र शङ्कराचार्याः पूर्वमेवमेव श्रुतिबलाद् विरुद्धधर्माश्रयत्वेन परिहारं व्याख्याय पुनरपि, ननु शब्देनापि विरुद्धोऽर्थो न प्रत्याययितुं शक्यते, निरवयवं ब्रह्म परिणमति, कृत्स्नं च न परिणमतीति । निरवयवत्वे सर्वं परिणमेत् परिणमेद्वा । यदि केनचिद् रूपेण परिणमेत् केनचिन्न ततः सावयवं स्यात् । नच षोडशिग्रहणाग्रहणवद् विकल्पोऽत्राश्रयितुं शक्यते । अक्रियारूपत्वेनापुरुषतन्त्रत्वादतो दुर्घटमेतदित्याशङ्क्य, अविद्याकल्पितरूपभेदाभ्युपगमात् सुघटः परिहारः । न ह्यविद्याकल्पितरूपभेदेन वस्तुनः सावयवत्वं भवति । न हि तिमिरोपहतनयनेन अनेक इव चन्द्रमा दृश्यमानोऽनेक एव भवतीति रूपभेदस्याविद्यकत्वान्न निरवयत्वशब्दकोपः । नच परिणामश्रुतिः परिणामप्रतिपादनार्था । तत्प्रतिपत्तौ फलानवगमात् । सर्वव्यवहारहीनब्रह्मात्मभावप्रतिपादनार्था त्वेषा । तत्प्रतिपत्तौ, स एष नेति नेत्यात्मेत्युपक्रम्याभयं वै जनक प्राप्तोऽसीति फलावगमादित्येवं व्याख्यानान्तरमाहुः । तद् दूषयन्त उपहसन्ति । * एवं परिहृतेऽपीत्यादि * । यदिदमविद्याश्रितरूपभेदाभ्युपगमेनेदानीं व्याख्यातं, तत् किं पूर्वप्रासामञ्जस्यदर्शनाद्वा, स्वबुद्धिकौशलख्यापनाय वा, श्रुतिस्वारस्याद्वा, सूत्रस्वारस्याद्वा । नान्त्यः । आचार्येण लौकिकयुक्तिनिरासपूर्वकं केवलायाः श्रुतेरेवाश्रयणात् । न तृतीयः । वदद्व्याघातात् । फलानवगमं प्रदर्श्य ब्रह्मात्मभावप्रतिपादनरूपस्य फलस्य स्वयमेव कथनात् । नच मुख्यफलानवगम इति युक्तम् । परिणामबोधकश्रुतावपि, तदात्मानᳪस्वयमकुरुतेत्युपक्रम्य,

आत्मनि चैवं विचित्राश्च हि ॥ २८ ॥

सृष्टौ देशकालापेक्षापि नास्ति । आत्मन्येव सृष्टत्वात् । देश-

रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति, यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवतीति फलवाक्ये, एतस्मिन्निति पदेन तस्यैव परामृष्टत्वात् । अनिरुक्तपदेन तस्यैव विरुद्धधर्माधारत्वबोधनाच्च । उपनिषदुपक्रमेऽपि परप्राप्तिरूपफलबोधनाद् ऋचि तद्विवरणाच्च । तदभिमताविद्यायाः सदसदादिविकल्पेन साधनादिविकल्पेन च सर्वैरेव दूषितत्वाच्च । अत एव न द्वितीयः । बुद्धिकौशलस्याविद्यायामेव पर्यवसानात् । नाद्यः । लौकिकानामपि मणिमन्त्रौषधिप्रभृतीनां देशकालनिमित्तवैचित्र्यवशाच्छक्तयो विरुद्धानेककार्यविषया दृश्यन्ते इत्यादिना, तस्माच्छब्दमूल एवातीन्द्रिययाथात्म्यावगम इत्यन्तेन स्वयमेवासामञ्जस्यादर्शनस्य व्याख्यातत्वात् । अतो द्वितीयव्याख्यानस्य सर्वप्रमाणसर्वसन्मार्गसंप्लव एव फलमतस्तथेत्यर्थः ॥ २७ ॥

आत्मनि चैवं विचित्राश्च हि ॥ ननु श्रुतौ केवलस्य ब्रह्मणः कारणता निरूपिता तथापि देशकालौ स्वाधिकरणतया आवश्यकावित्याशङ्कामपि श्रुतिमेवालम्ब्य परिहरति । आत्मनीति * । तद् व्याकुर्वन्ति । * सृष्टावित्यादि * । सूत्रे प्रथमश्चकारोऽवधारणार्थो द्वितीयोऽप्यर्थः । एवम्पदार्थस्तु—सृष्टत्वादिति * । आत्मनि सृष्टत्वं च, आत्मन्येवात्मनात्मानं सृजे हन्म्यनुपालय इति दशमस्कन्धे व्रजभक्तान् प्रति भगवतः सन्देशवाक्ये स्फुटम् । द्वितीयस्कन्धे च, 'स एष आद्यः पुरुषः कल्पे कल्पे सृजत्यजः । आत्मन्येवात्मनाऽऽत्मानं संयच्छति च पाति चेति' ब्रह्मवाक्ये । श्रुतौ च, नासदासीन्नो सदासीदित्यादिषु ब्रह्मेतरनिषेधाच्च । तदानीमिति कालोक्तिस्तु बोधनार्थेति प्रागेवोक्तम् । अतो न जगत्सृष्टौ ब्रह्मणो देशकालापेक्षेत्यपि शब्दादेव सिद्ध्यतीत्यर्थः । भाष्ये तु सृष्टाविति फक्किकाया एव विवरणम् । देशकालेत्यादि * । प्रथमं चकारमप्यर्थमङ्गीकृत्य पक्षा-

कालसृष्टावप्यात्मन्येव साधिकरणस्य सृष्टत्वाच्च। बहिरन्तश्च जगत्सृष्टिं वा आह विशेषाभावेन, अनन्तरोऽबाह्य इति। विरोधाभावो विचित्रशक्तियुक्तत्वात् सर्वभवनसमर्थत्वाच्च ॥ २८ ॥

स्वपक्षदोषाच्च । ॥ २९ ॥

प्रधानवादिनोऽपि सर्वपरिणामसावयवत्वाऽनित्यत्वादिदोषो दुष्परिहरः। युक्तिमूलत्वाच्च तस्य। अचिन्त्यकल्पनायां प्रमाणाभावाच्च ॥ २९ ॥

न्तरमाहुः। * बहिरित्यादि *। * विशेषाभावेनेति *। तौल्येन। तथाच यथात्मनि सृष्टौ, न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजत इत्यत्र न देशकालाद्यपेक्षा। एवं बहिःसृष्टावपि, अनन्तरोऽबाह्य इति श्रुत्या सर्वत्र ब्रह्मण एकरूपताबोधनेनान्तर्बहिस्तुल्यत्वात्। अतो बहिरपि सृजन्नात्मन्येव सृजतीत्यर्थः। ननु सा सृष्टिर्मायिकी, तत्र तथा युक्तम्। इयं तु सत्येति कथमस्यां देशाद्यनपेक्षेत्यत आह। विचित्राश्च हीति *। हि यतो हेतोः, परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति श्रुतेस्तस्य शक्तयो विचित्रा एव। तदेतद् व्याकुर्वन्ति। * विरोधाभाव इत्यादि * एतेनेदमपि सूत्रं पूर्वपक्षिणः शङ्कानवमानित्वात् प्रणीतमिति बोधितम् ॥ २८ ॥

स्वपक्षदोषाच्च ॥ भाष्यं तत्र निगदव्याख्यातम्। एवमनेनाधिकरणेन वाक्यान्वयाधिकरणविषयवाक्योक्तं स्वत एव ब्रह्मणः सर्वोपादानत्वं समर्थितं ज्ञेयम्।

अन्ये तु परमाणुवादनिरासमप्यत्राङ्गीकुर्वन्ति। अणुवादिनोऽप्यणुरण्वन्तरेण संयुज्यमानो निरवयवो यदि कार्त्स्न्येन संयुज्येत तदा प्रथिमानुपपत्तेरणुत्वप्रसङ्गः। अथैकदेशेन संयुज्येत तदा निरवयवत्वकोप इति। इदञ्च दूषणं शिथिलम्। निरवयवेऽप्याकाशे प्रादेशिकस्याण्वादिसंयोगस्य तैरङ्गीकारात्। अत आचार्यैस्तदुपेक्षितम् ॥ २९ ॥

सर्वोपेता च तद्दर्शनात् ॥ ३० ॥

सर्वशक्तिभिरुपेता उपगतः । चकारात् सत्यादिगुणयुक्तश्च । कुतः ? । तद्दर्शनात् । तथा वेदे दृश्यते । यः सर्वज्ञः सर्वशक्तिः, सर्वकर्ता सर्वकाम इत्यादि ॥ ३० ॥

विकरणत्वान्नेतिचेत् तदुक्तम् ॥ ३१ ॥

कर्ता इन्द्रियवान् लोके । ब्रह्मणो निरिन्द्रियत्वात् कथं कर्तृत्वमितिचेन्न । अस्य परिहारः पूर्वमेवोक्तः, श्रुतेस्तु शब्दमूलत्वा-

---

सर्वोपेता च तद्दर्शनात् ॥ ब्रह्मण उपादानत्वस्य श्रुतिमात्रगोचरत्वाद् बहुवादसमतत्वेन पूर्वमुपादानत्वे आशङ्कितान्, अभिन्ननिमित्तोपादानत्वे चाशङ्कितान् दोषान् परिहृत्य कर्तृत्वे शङ्क्यमानान् परिहर्तुमधिकरणान्तरमारभमाणस्तन्निर्वाहकं सर्वशक्तिसाहित्यं प्रथमत आह । तद् व्याकुर्वन्ति । * सर्वशक्तिभिरित्यादि * । * उपेता उपगत इति * एतेन कृदन्तोऽयं शब्दः, सुपां सुलुगितिसूत्रोक्तडादेशान्तो वेति ज्ञापितम् । * सत्यादिगुणयुक्त इति * ते च गुणाः प्रथमस्कन्धे धरित्र्या धर्मं प्रत्युक्ताः । 'सत्यं शौचं दया क्षान्तिस्त्यागः सन्तोष आर्जवम् । शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् । ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः । स्वातन्त्र्यं कौशलं कान्तिर्धैर्यं मार्दवमेव च । प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः । गाम्भीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहङ्कृतिः । एते चान्ये च भगवन्नित्या यत्र महागुणाः । प्रार्थ्या महत्त्वमिच्छद्भिर्न वियन्ति स्म कर्हिचिद्' इति । शेषं स्फुटम् ॥ ३० ॥

विकरणत्वान्नेति चेत् तदुक्तम् ॥ सर्वशक्तित्वोपगमे श्रुत्यन्तरविरोधमाशङ्क्य परिहरतीत्याशयेन सूत्रं पठित्वा व्याकुर्वन्ति । * कर्तेत्यादि * । ननु यथा, स विश्वकृद् विश्वविदात्मयोनिः सर्वकर्मा सर्वकाम इत्यादौ कर्तृत्वं श्रूयते तथा, अचक्षुष्कमश्रोत्रमवागमनः, न तस्य कार्यं करणं च विद्यत इत्या-

दित्यत्र । अनवगाह्यमाहात्म्ये श्रुतिरेव शरणं, नान्या वाचोयुक्तिरिति ॥ ३१ ॥

न प्रयोजनवत्त्वात् ॥ ३२ ॥

न ब्रह्म जगत्कारणम् । कुतः ? प्रयोजनवत्त्वात् । कार्यं हि प्रयोजनवद् दृष्टं लोके । ब्रह्मणि पुनः प्रयोजनवत्त्वं सम्भावयितुमपि न शक्यते । आप्तकामश्रुतिविरोधात् । व्यधिकरणो हेतुर्नसमासो वा ॥ ३२ ॥

लोकवत्तु लीलाकैवल्यम् ॥ ३३ ॥

तुशब्दः पक्षं व्यावर्तयति । लोकवल्लीला । न हि लीलायां किञ्चित् प्रयोजनमस्ति । लीलाया एव प्रयोजनत्वात् । ईश्वरत्वा-

---

दौ विकरणत्वमपि श्रूयते । अतो विप्रतिषेधात् कथं कर्तृत्वमितिचेद्, न । परिहारग्रन्थस्तु—अस्य परिहार * इत्यादिनोक्तः स्फुटः । श्रुतिस्तु, अपाणिपादो जवनो ग्रहीता, अन्धो मणिमविन्दत् तमनङ्गुलिरावयत्, विश्वतश्चक्षुरुत विश्वतोमुखः, सर्वतः पाणिपादं तदित्यादिरूपा विरुद्धधर्माधारत्वादिबोधिकात्र ज्ञेया ॥ ३१ ॥

न प्रयोजनवत्त्वात् ॥ एवं साधितेऽपि कर्तृत्वे किञ्चिदाशङ्कते । तद् व्याकुर्वन्ति । * न ब्रह्मेत्यादि * अस्मिन् पक्षे निषेधार्थकनञः पूर्वसूत्रादेवानुवृत्तिसम्भवाद् वैयर्थ्यमायातीति पक्षान्तरमाहुः । * नसमास इति * । नैकधेत्यादिवन्नशब्देन सह सुप्सुपेति समासः । तथाच प्रयोजनरहितत्वान्न कर्तृ ब्रह्मेत्यर्थः । तथा सतीदं पूर्वपक्षसूत्रम् ॥ ३२ ॥

लोकवत्तु लीलाकैवल्यम् ॥ समाधिं व्याकुर्वन्ति । * तुशब्द इत्यादि * तथाच यथा लोके राजभिर्मृगयादि क्रियते, तत्र न मांसाद्याहरणमन्यद् वा प्रयोजनम् । भृत्यादिभिरपि तत्सम्भवात् । किन्तु लीलैव प्रयोजनम् । अतो लोकेऽपि प्रयोजनं विना ईश्वरकार्यस्य दर्शनेन तत एव समाधानान्नात्र पर्यनुयोगावकाश इत्यर्थः ।

देव न लीला पर्यनुयोक्तुं शक्या । सा लीला कैवल्यं मोक्षः । तस्य लीलालेऽप्यन्यस्य तत्कीर्तने मोक्ष इत्यर्थः । लीलैव केवलेति वा ॥ ३३ ॥

वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति ॥ ३४ ॥

कांश्चित् सुखिनः कांश्चिद् दुःखिनश्च प्रलयं च कुर्वन् विषमो निर्घृणश्चेतिचेन्न । सापेक्षत्वात् । जीवानां कर्मानुरोधेन सुखदुःखे प्रयच्छतीति । वादियोधनायैतदुक्तम् । वस्तुतस्त्वात्मसृष्टेर्वैषम्यनैर्घृण्यसम्भावनैव नास्ति । वृष्टिवद् भगवान् बीजवत् कर्म । श्रुतिरेव तथा दर्शयति । एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य

लीलापदादेवोक्तरसिद्धौ कैवल्यपदस्य किं प्रयोजनमत आहुः । * सा लीलेत्यादि * । लक्षणादोषादरुच्या पक्षान्तरमाहुः * लीलैवेत्यादि * सैव प्रयोजनं सैव वा मोक्षः । तथाच तत्सामर्थ्यस्य स्वरूपस्य च बोधनाय कैवल्यपदोक्तिरित्यर्थः ॥ ३३ ॥

वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति ॥ कर्तृत्व एव पुनः किञ्चिदाशङ्क्य परिहरति । तद् व्याकुर्वन्ति । * कांश्चिदित्यादि * ननु कर्मानुरोधेन सुखदुःखदाने स्वातन्त्र्यहानिस्तदनुरोधानादरे वैषम्यादिदोषापत्तिरित्युभयथापि दोषाम्नायं वादः साधीयानिति मीमांसकादिशङ्कायामाहुः । * वादीत्यादि * पूर्वं तदनन्यत्वादिसूत्रैः सर्वस्य ब्रह्मात्मकत्वं, जीवस्यापि ब्रह्मात्मकत्वं च प्रतिपादयन् यदत्र सापेक्षत्वं हेतूकरोति तेन ज्ञायते वादियोधनायेदमिति । यतो वादिभिर्बहुशो लोकानुसारेणैव चोद्यते । अतो नात्र कोऽपि शङ्कालेश इत्यर्थः । यद्वा स्यामिति श्रुत्यर्थमनुरुद्ध्य सिद्धान्तरीत्या समाधिमाहुः । * वस्तुत इत्यादि * । किञ्च । जीवसुखदुःखयोर्ब्रह्मणः साधारणकारणतैव श्रुत्यभिप्रेता. न त्वसाधारणा।अतोऽपि न दोषगन्ध इत्याहुः । * वृष्टीत्यादि * । ननु श्रुत्यैव समाधानसम्भवे पुनरह-

ऽभिनीषति । एष उ एवासाधु कर्म कारयति तं यमधो निनीषति। पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन कर्मणेति च । सापेक्षमपि कुर्वन्नीश्वर इति माहात्म्यम् ॥ ३४ ॥

न कर्माविभागादितिचेन्नानादित्वात् ॥ ३५ ॥

न, कर्मविभागात् कार्योद्भमात् पूर्वं सम्भवति, पश्चात्त्वन्योन्याश्रय इतिचेन्न । अनादित्वात् । बीजाङ्कुरवत् प्रवाहस्यानादित्वात् ॥ ३५ ॥

उपपद्यते चाप्युपलभ्यते च ॥ ३६ ॥

स्मर्दनेन शूलोत्थापनवदाशङ्कोत्थापनस्य किं प्रयोजनम् । प्रक्षालनपङ्कन्यायेनैतदनुल्लेखस्यैव युक्तत्वादित्यत आहुः * सापेक्षमित्यादि * । तथाच माहात्म्यशोधनमेव प्रयोजनमित्यर्थः ॥ ३४ ॥

न कर्माविभागादितिचेन्नानादित्वात् ॥ कर्मसापेक्षत्वमनाश्रित्य साध्यते । तद् व्याकुर्वन्ति । * न, कर्मेत्यादि * । यदुक्तमीश्वरो जीवकर्मसापेक्ष इति न वैषम्यादिदोषसम्बन्धस्तत्रेति । तदयुक्तम् । सृष्ट्यादौ, सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयमिति प्रश्नोत्तरनिषेधेन तदानीं, यथाग्नेः क्षुद्रा विस्फुलिङ्गा इति श्रुत्युक्तस्य कार्योद्गमरूपस्य विभागस्याभावात् ततः पूर्वं जीवाभावेन तच्छरीरसाध्यं कर्म पूर्वं न सम्भवति । येन वैषम्यादि समाधीयेत । अथ विभागोत्तरभाविना कर्मणा समाधानम् । तदप्ययुक्तम् । कर्मणः शरीरसाध्यत्वेन शरीरसम्बन्धस्य च कर्मसाध्यत्वेनान्योन्याश्रयादित्येव सूत्रांशेनाशङ्क्य तत् समाधत्ते । नानात्वादिति * । स्यादन्योन्याश्रयो यदि शरीरकर्मव्यक्ती द्वे एव स्याताम् । तत्तु नास्ति । बीजाङ्कुरवच्छरीरकर्मप्रवाहस्यानादित्वात् । अतो विभागोत्तरं सापेक्षत्वात् सुघटः समाधिरित्यर्थः ॥ ३५ ॥

उपपद्यते चाप्युपलभ्यते च ॥ नन्वयं समाधिरसमाधिरेव । सृष्टेः पूर्वं विभागाभावेन प्रवाहानादित्वस्य वक्तुमशक्यत्वादित्या-

कथमनादित्वमितिचेद्, उपपद्यते। अन्यथा कस्य संसारः। कृतहान्यकृताभ्यागमप्रसङ्गश्च। उपलभ्यते च श्रुतिस्मृत्योः। अनेन जीवेनात्मनेति सर्गादौ जीवप्रयोगादनादित्वम्। तपसैव यथा पूर्वं स्रष्टा विश्वमिदं भवानिति च ॥ ३६ ॥

सर्वधर्मोपपत्तेश्च ॥ ३७ ॥

शङ्कायामिदं सूत्रं प्रवृत्त इति स्फुटीकुर्वन्तो व्याचक्षते * कथमित्यादि *। सूत्रे अपिः पूर्वपक्षिगर्हायाम्। स्वयं यौक्तिकः सन् युक्तिं विस्मरतीति। युक्तिमाहुः * अन्यथेत्यादि *। * अन्यथेति * यदि जीवोऽनादिर्न स्यात्। प्रथमश्चोऽवधारणार्थो, द्वितीय उक्तसमुच्चयार्थः। स्मृतिस्तु तृतीयस्कन्धनवमाध्यायस्था। तथाच प्रलयनैकट्यदशायां सदसत्कर्मकरणोत्तरं प्रलये जाते जीवानां ब्रह्मरूपत्वात् तदानीं कर्मफलभोगाभावात् कृतहानिः। पुनः सृष्ट्यारम्भदशायां विस्फुलिङ्गवद्विभागेऽपि ब्रह्मरूपताया अनपेतत्वेन तदानीमपि भोगायोगाच्च कृतहानिः। सृष्ट्यारम्भे ब्रह्मरूपतयातिशुद्धानां पुनः सकलदुःखनिदानसाधनीभूतशरीरसम्बन्धादकृताभ्यागमप्रसङ्गश्च स्यादत एतयोपपत्त्या जीवस्यानादित्वम्। नचास्याः शुष्कतर्कत्वं, येनास्या अप्रतिष्ठानं स्यात्। यतोऽनेनेति श्रुतौ सर्गादावेव जीवपदस्य सिद्धवत् प्रयोगात्। नच सा भाविनी संज्ञेति युक्तम्। उक्तस्मृतौ यथापूर्वमिति पदेन नामरूपसम्बन्धानादित्वस्य बोधनात्। अतोऽविभागदशायामपि नामरूपसम्बन्धसत्त्वात्। श्रुतौ च व्याकरवाणीति कथनेन तत्प्रख्यातिमात्रस्य सृष्टावभिमतत्वात् सर्वानादित्वे तत्कर्मानादित्वमपि श्रुतिसिद्धम्। तथा सति तत्सापेक्षतापि तथेति पूर्वोक्तः समाधिरव्याहत एवेत्यर्थः ॥ ३६ ॥

सर्वधर्मोपपत्तेश्च ॥ नन्वेवं सति प्रलये नामरूपविभागानर्हरूपेणैव सर्वावस्थानं सिद्ध्यतीत्यविभागलक्षणस्यैवाद्वैतस्य सिद्धिर्न शुद्धाद्वैतस्येत्यद्वितीयश्रुतिविरोधो दुष्परिहर इत्याशङ्कायां तं विरोधं

उपसंहरति । वेदोक्ता धर्माः सर्वे ब्रह्मण्युपपद्यन्ते । सर्वसमर्थत्वादिति ॥ ३७ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते
ब्रह्मसूत्राणुभाष्ये द्वितीयाध्यायस्य
प्रथमः पादः ॥ २ ॥ १ ॥

परिहरन् स्वोक्तमुपसंहरतीत्याहुः । * उपसंहरतीत्यादि * । तथाच यथा नारदपरीक्षायां, 'चित्रं बत यदेकेन वपुषा युगपत् पृथक् । गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहद्' इत्युपक्रमे कथनात्, तमेव सर्वगेहेषु सन्तमेकं ददर्शाहेत्युपसंहारे कथनाच्च नानागृहेषु तत्तत्कार्याणि कुर्वतः पृथग्विद्यमानत्वेऽपि न रूपभेदस्तथात्राविभागेन सर्वेषां रूपाणां विद्यमानत्वेऽपि नाद्वितीयत्वभङ्गः। विचित्राश्च हीत्यनेनैतत्समाधेः पूर्वमेव कृतत्वादित्यर्थः । एतेन, न कर्मेति सूत्रद्वयमादायाविभागाद्वैतमविनाभावाद्वैतं वा ये रोचयन्ते, ये चाद्वितीयादिश्रुतिमादाय प्रपञ्चमायिकत्वं रोचयन्ते ते उभयेऽपि निरस्ता वेदितव्याः । तेन विरुद्धधर्माश्रयं सर्ववादानवसरं नानावादानुरोधि समाभ्यधिकरहितं ब्रह्मेति सिद्धम् ।

एवमस्मिन् पादे युक्त्या नानाविधः श्रुतिषु यो विप्रतिषेधः स परिहृतः ॥ ३७ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य
पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे द्वितीयाध्यायस्य
प्रथमः पादः ॥ २ ॥ १ ॥

द्वितीयाध्यायस्य द्वितीयः पादः ।

रचनानुपपत्तेश्च नानुमानम् ॥ १ ॥

स्वतन्त्रतया सर्वे वादा निराक्रियन्तेऽस्मिन् पादे ।

रचनानुपपत्तेश्च नानुमानम् ॥ प्रथमे पादे सांख्यं निराकृत्य तन्निराकरणप्रसङ्गे, एतेन शिष्टापरिग्रहा अपि व्याख्याता इति सूत्रेण शिष्टापरिग्रहरूपं दोषं प्रदर्श्य अन्ये च वादा निराकृताः । तथापि केषाञ्चन मन्दमतीनां तदुक्तयुक्तिष्वाभासत्वाभानाभावे श्रद्धोत्पत्तौ स्वार्थविभ्रंशः स्यात् स मा भूदिति करुणया तदुक्तयुक्तीराभासीकर्तुं द्वितीयः पाद आरभ्यते इति पूर्वं पादार्थनिरूपणे सूचितम् । तदत्र स्मारयन्ति * स्वतन्त्रतयेत्यादि * । तत्र प्रथमे पाद उपपादितः सत्कार्यवादः परिणामवादश्च सांख्यवादे सिद्धान्ते च तुल्य इति सांख्ये श्रद्धा शीघ्रमास्तिकस्योत्पद्येतेति तन्निरासाय प्रथमं तदेव निराक्रियते दशभिः सूत्रैः । तेषां चैवं मतम्—'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः' इति । तत्र साम्यावस्थोपलक्षिता वा अकार्या वा गुणाः प्रकृतिः । प्रकृतित्वं च प्रकर्षेण करोतीति व्युत्पत्त्या तत्त्वान्तरारम्भकत्वम् । गुणास्तु, सत्त्वं लघु प्रकाशकं, रज उपष्टम्भकं चलं, तमो गुर्वावरकमिति कार्यलक्षणलक्षिता यथायथं प्रीत्यप्रीतिविषादात्मकद्रव्यस्वरूपा अतीन्द्रियाः कार्यकोन्नेयाः । गुणक्षोभस्य पाश्चात्यत्वात् साम्यावस्था सर्वेषां कारणभूतेति मूलप्रकृतिरित्युच्यते । सा एका अचेतना अनेकचेतनभोगापवर्गार्था नित्या सर्वगता सततविक्रिया न कस्यचिद् विकृतिः । महदहङ्कारपञ्चतन्मात्राः सप्त प्रकृतिविकृतयः । तत्र महानहङ्कारस्य प्रकृतिर्मूलप्रकृतेर्विकृतिः । अहङ्कारस्त्रिविधो, वैकारिकस्तैजसस्तामसश्च । तत्र वैकारिको मनसः प्रकृतिः । तैजस इन्द्रियाणाम् । तामसः शब्दस्पर्शरूपरसगन्धाख्यानां पञ्चतन्मात्राणाम् । महतस्तु विकृतिस्त्रिविधोऽपि । पञ्च ज्ञानेन्द्रियाणि । श्रोत्रत्वग्-

घ्राणरसनाख्यानि। पञ्च कर्मेन्द्रियाणि वाक्पाणिपादपायूपस्थानि। मन उभयनायकम्। पृथिव्यप्तेजोवाय्वाकाशाः पञ्च महाभूतानि एत इन्द्रियादय: षोडश विकाराः। पुरुषस्तु परिणामशून्यत्वान्न कस्यापि प्रकृतिः। नित्यत्वेनाजन्यत्वान्न कस्यापि विकृतिः। अत एव निर्धर्मकश्चैतन्यमात्रस्वरूपो निष्क्रियः सर्वगतः प्रतिशरीरं भिन्नश्च। तत्र निर्विकारत्वान्निष्क्रियत्वाच्च न पुरुषस्य कर्तृत्वम्। प्रकृतेस्तु तदुभयवत्वात् कर्तृत्वं परिणामित्वं चेति। तच्च प्रकृतेः कारणत्वमेवमनुमिमते, 'भेदानां परिमाणात् समन्वयाच्छक्तितः प्रवृत्तेश्च। कारणकार्यविभागादविभागाद् वैश्वरूप्यस्य। कारणमस्त्यव्यक्तम्' इति। अर्थस्तु विश्वं रूपं यस्मिन्निति विश्वरूपं जगत्। विश्वरूपमेव वैश्वरूप्यम्। स्वार्थे ष्यञ्। तस्याऽव्यक्तं कारणमस्ति। तत्र पञ्च हेतवः। भेदानां परिमाणात्। भेदा महदादिभूतान्तास्तेषां परिमाणात्। अव्यापित्वाद्, व्याप्यत्वादिति यावत्। कारणे सत्कार्यमिति स्थितम्। तथाच विवादाध्यासिता भेदाः स्वसजातीयाव्यक्तकारणकाः। तद्व्याप्यत्वात्। ये यज्जातीयव्याप्यास्ते तज्जातीयाव्यक्तकारणकाः। यथा घटादय इति। एवं, समन्वयाद्, भिन्नानां स्वरूपता समन्वयः, अविनाभावो वा। तथाच, विमता भेदास्तथा। तद्भिन्नत्वे सति तत्स्वरूपत्वात्। तदविनाभूतत्वाद्वा। यदेवं तदेवं घटादिवदिति। किञ्च। शक्तितः प्रवृत्तेः। शक्तिः स्वान्तःस्थाविर्भावकत्वम्। तथाच यद् यच्छक्तितः प्रवृत्तं तत् तत्कारणकम्। यथा घटादिकं मृत्कारणकम्। तथैतेऽव्यक्तशक्तितः प्रवृत्तास्तत्कारणका इति। यद्वाऽत्र हेतुद्वयम्। तथा सति यद् यच्छक्यं, तत् तत्कारणकम्। यथा घटादयो मृदः। तथैते परम्परया परमाव्यक्तस्येति। एवं, यद् यत्प्रवृत्तिसम्पाद्यं तत् तत्कारणकम्। यथा घटादिः कुलालादेः। एवमेव महदादयोऽव्यक्तस्येति। अयं च हेतुः सामान्यतः कारणत्वं वा कर्तृत्वं वा साधयति। किञ्च। कारणकार्यविभागादविभागात् ताभ्यामित्यर्थः। तथाच ये उत्पत्तौ यतो विभक्ताः प्रलये च यदविभक्तास्ते तत्कारणकाः। यथा घटादयो मृदः। एवमेतेऽपि परम्परया साक्षाच्च परमाव्यक्तादुत्पत्तौ विभक्ता प्रलये च तदविभक्ता इत्येतैरपि तत्कारणकैर्भवितव्यमिति।

रामानुजाचार्यास्तु—यद् विचित्रसन्निवेशं तत् कार्यम्।

लोकानां भूर्भुवादीनामचेतनेन केवलेन प्रधानेन रचना नो-

यथा तनुभवनादि। जगदपि विचित्रसन्निवेशमिति तेनापि कार्येण भवितव्यमिति सामान्यतो दृष्टेन जगतः कार्यत्वमनुमाय तेन सिद्धे कारणपूर्वकत्वे ततः किं कारणमित्यपेक्षायां तत्साधनाय समन्वयादयो हेतव इत्येवं सांख्यतत्त्वकौमुद्युक्तप्रकारेण सरूपत्वं समन्वयं देशकालपरिच्छिन्नत्वं परिमाणमङ्गीकृत्य व्याकुर्वन्ति।

भास्कराचार्यास्तु—अविनाभावरूपमन्वयमङ्गीकृत्य सुखदुःखमोहान्विता बाह्या आध्यात्मिकाश्च भेदा दृश्यन्ते। ये च यदन्वितास्ते तदेककारणपूर्वकाः। यथा घटशरावादयो मृदन्विता मृदेककारणपूर्वका एवं सुखदुःखमोहान्वितं जगत् त्रिगुणकारणकमित्येवं व्याकुर्वते। परिणामं च द्विविधम्। रूपतः संख्यातश्चेत्याहुः।

तत्र भिन्नानां सरूपत्वरूपो यः समन्वयस्तस्य न स्वसजातीयव्यक्तकारणकतासाधकत्वम्। सदृशे भिन्नादौ तस्य सत्त्वेन हेतोर्व्यभिचारात्। द्विविधपरिमाणेऽपि संख्यापरिमाणं न साधकम्। एकत्वसंख्यासंख्यातत्वस्य कारणेऽपि सत्त्वाज्जातिसंख्यासंख्यातत्वस्य व्यक्तौ सत्त्वेन व्यभिचाराच्च। अतः पूर्वव्याख्यातरीत्यैव प्रधानस्य कारणत्वानुमानम्। तदत्र रचनानुपपत्तिसूत्रेण दूष्यते। तद् व्याकुर्वन्ति। * लोकानामित्यादि * यत् पूर्वैः परिमाणादिभिर्हेतुभिर्जगत्कारणत्वेन प्रधानमनुमीयते तदनुमानं न कर्तव्यम्। कुतः ?। रचनानुपपत्तेः। रचना हि बुद्धिपूर्विका वा, प्रतिनियतदेशकालव्यवस्थापिका वा, चेतनस्पार्शना वा क्रिया। सात्र लोकानां भूर्भुवादीनामचेतनेन केवलेन प्रधानेन नोपपद्यते। तथाच भूरादिलोकरचना न केवलाऽचेतनकारणिका। रचनात्वात्। गृहादिरचनावत्। भूरादिलोका नाचेतनकर्तृकाः। चेतनस्पार्शनक्रियात्मकरचनाविषयत्वात्। घटकुड्यादिवत्। प्रधानं स्वतोऽकर्तृ। अचेतनत्वात्। स्तम्भादिवदित्यादिभिः प्रयोगैः सत्प्रतिपक्षत्वाद्दर्थान्तरापादकत्वाच्च न तैरनुमानैः कारणत्वेन प्रधानमनुमातुं शक्यमित्यर्थः। नन्वेवमेतैः प्रयोगैः कर्तृत्वस्यैवासिद्धिर्न तु कारणत्वस्येति बाधकाभावात् पूर्वोक्तैरन्वयादिभिः प्रधानस्य परिणाम एव तादृशोऽस्तु। तथा सति

पपद्यते। रचितत्वादेव न परिणामः। सर्वस्य संश्लेषमसद्भाव।
अतश्चेतनकर्तृका रचना नाचेतनेन प्रधानेन कर्तुं शक्या। तस्मात् कारणत्वेन प्रधानं नानुमातव्यम्। अन्यथोपपत्त्या बाधितमेवानुमानमिति चकारार्थः॥ १॥

तस्य कारणत्वानपायात्र कश्चिद्दोष इत्यत आहुः। * रचितत्वादित्यादि * भवतां मते पुरुषो निष्क्रिय इति क्रिया शक्तिप्राधानिकी। तथाच सति रचनापि तस्यैव धर्मो, न पुरुषस्य। तद्विषयाश्च लोकास्तत्कर्तृका, अतो न तत्परिणामः। यथा घटादिः कुलालादेः। किञ्च। भूतादयो लोका यदि प्रकृतिपरिणामभूताः स्युः, सर्वे श्लिष्टाः स्युः। लोके परिणतत्वसंश्लिष्टत्वयोर्नियमस्य दध्यादिषु दर्शनात्। यदेवं तदेवम। यथा घटकुड्यमन्यानादि। किञ्च। कार्यं द्विविधम्—आरब्धं, परिणामभूतञ्च। तत्र निमित्तव्यापारजन्यं यत् तदारब्धम्। तदेव च रचितम्। यथा गृहादिकम। यत् पुनरुपादानव्यापारप्राधान्येन वा, तन्मात्र व्यापारेण वा जन्यते, तत् परिणामभूतम्। यथा हरिद्राचूर्णसंयोगजन्यं कुङ्कुमादि। यथाच दध्यादि। रचितत्वपरिणामयोश्चेतरेतरविरुद्धत्वं लोके दृष्टम। अतोऽत्र परिणामाङ्गीकारे रचितहानिस्तदङ्गीकारे च परिणामहानिरिति तुन्दिलसुरतन्यायादेकस्मिन् कार्येमुभयरूपत्वाङ्गीकार, एकस्मिंश्च कारणे उपादानत्वनिमित्तत्वयोरङ्गीकारो लोकविरुद्धः, प्रत्यनुमानबाधितत्वान्न्यायविरुद्धश्चेत्यर्थः। सिद्धं वदन्तः सौत्रानुमानपदस्यार्थमाहुः। * अत इत्यादि *। तथाचानुमीयत इत्यनुमानम्। भावे ल्युडित्यर्थः।

रामानुजाचार्यास्तु—कृत्यल्युटो बहुलमिति बाहुलकात् कर्मणि ल्युट्। यदनुमीयते तदनुमानमिति सौत्रानुमानपदस्यार्थमाहुः।

चकारप्रयोजनमाहुः। * अन्यथेत्यादि *। अन्यथोपपत्तिः प्रतिपक्षानुमानं तया कृत्वा सांख्योक्तं पूर्वमनुमानं पक्षे साध्यशून्यमेव क्रियत इति बोधनं चकारेण क्रियते इत्यर्थः। एवं सत्प्रतिपक्षोऽर्थान्तरं बाधश्चेति दोषत्रयं दर्शितम्॥ १॥

प्रवृत्तेश्च ॥ २ ॥

भुवनानि विचार्य जनान् विचारयति । सर्वस्य तत्परिणामे

प्रवृत्तेश्च ॥ ननु पूर्वहेतुनैव निरस्ते सांख्यमते हेत्वन्तरस्य किं प्रयोजनमत आहुः । * भुवनानीत्यादि * । रचना द्विविधा । भुवनरचना जनरचना चातत्र जनरचना शुक्रशोणितपरिणामभूता । अतो रचनात्वहेतुकेऽनुमाने जनशरीररचनाया रचनाविषयत्वहेतुके च जनशरीरस्याचेतनत्वहेतुके च शुक्रशोणितयोर्दृष्टान्तीकरणे तेषां साधारणत्वापत्त्या न तन्मतदूषणं, न वा पूर्वोक्तन्यायावतार इति तत्समर्थनार्थं हेत्वन्तरेण तान् विचारयतीत्यर्थः । तदू व्युत्पादयन्ति * सर्वस्येत्यादि * प्रवृत्तिर्हि प्रयत्नस्तत्पूर्विका क्रिया वा । तथाच सर्वस्य प्रकृतिपरिणामत्वे शरीरोत्पादनाय मातापित्रोः प्रवृत्तिर्नोपपद्यते । अयमर्थः । अचेतनस्य स्वत एव प्रवृत्तौ शुक्रशोणिते अपि चेतनप्रवृत्तिमन्तरेण स्वत एव जनशरीराणि जनयेतां, न तु मातापित्रोः प्रवृत्तिमपेक्षेताम् । अपेक्षा त्वस्ति । बहिः पतितयोः संसृष्टयोरपि तयोः शरीरसम्भवादर्शनात् । पोषणादिनैव तत्समग्रत्वदर्शनाच्च । अत एव गर्भस्रावादौ शरीरस्यासमग्रता दृश्यते । तेन चेतनाधिष्ठितयोरेव तयोः प्रवृत्तिर्न त्वनधिष्ठितयोः । अतो जनरचनादिदृष्टान्ते रचनात्वादीन् हेतून् साधारणीकृत्य पूर्वोक्तैरन्वयादिभिः प्रधानं न कारणत्वेनानुमातुं शक्यम् । अस्मदुक्तेषु हेतुषु रचनात्वे प्रवृत्तिपूर्वकत्वेन विशेषिते मातापितृप्रवृत्तिपूर्वकशुक्रशोणितपरिणामात्मकशरीररचनया दृष्टान्तिते रचनाविषयत्वे च तथा विशेषिते पुरुषशरीरेण च दृष्टान्तिते अचेतनत्वे च प्रवृत्तिमत्त्वेन विशेषिते जीवच्छरीरेण च दृष्टान्तिते साधारण्यनिवृत्तौ दोषाभावादित्यर्थः । ननु केवलचेतनस्यापि प्रवृत्त्यदर्शनात् प्रवृत्तिरपि विशिष्टधर्म एव । तथा सति तत्र कस्य प्राधान्यमित्यपेक्षायां चेतनस्य निष्कलत्वनिष्क्रियत्वाभ्यां न प्राधान्यम्, अपि त्वचेतनस्यैवेति प्रवृत्तेरपि नैमित्तिकाचेतनधर्मत्वात्प्रान्वयादिषु प्रतिपक्षादिदोषः,

प्रवृत्तिर्नोपपद्यते प्रधानस्य वा प्रथमप्रवृत्तिः । यद्यपि प्रधानकारणवादे फलपर्यन्तमङ्गीक्रियमाणे न किञ्चिद् दूषणम् । कृतिमात्रस्य प्रधानविषयत्वात् । तथापि वादिनं प्रति लोकन्यायेन वक्तव्य-

---

किन्तु रचनादिष्वेव दोष इत्यत आहुः । * प्रधानस्येत्यादि * निमित्तसंसर्ग एव नैमित्तिकधर्मसम्भवान्निमित्तभूतचेतनसंसर्गस्य सार्वदिकत्वे सृष्टिस्थितिप्रलयादिकालविभागानुपपत्तेः कादाचित्कत्वे च हेतोर्वक्तुमशक्यत्वात् प्रधानस्य या प्राथमिकी प्रवृत्तिः सृष्ट्यर्था, सैव नोपपद्यते । तथाच तव मते चेतनाधिष्ठानस्यापि वक्तुमशक्यत्वेन हेतोः सविशेषणस्याप्युपादाने त्वन्मतासिद्धिरित्यर्थः । ननु तस्याः स्वभाव एव तादृशोऽतो न किञ्चिद् दूषणमित्याकाङ्क्षायां तदनूद्य दूषयन्ति । * यद्यपीत्यादि * धेनुवद् वत्साय पुरुषार्थं स्वभावत एव तस्याः प्रवृत्तिः । नर्तकीवत् सर्वप्रदर्शनोत्तरं स्वत एव कार्यान्निवृत्तिरित्येवं कृतिमात्रस्य प्रधानविषयत्वमङ्गीकृत्य फलपर्यन्ते प्रधानकारणवादेऽङ्गीक्रियमाणे स्वभाववादाश्रयणान्न किञ्चिद् दूषणम् । रचनाप्रवृत्त्योः कालनियमस्य च स्वभावादेव सम्भवात् । तथापीदं शास्त्रं तर्कमाश्रित्य प्रवृत्तं, न तु श्रुत्युपष्टम्भम् । तदीयव्याख्यानस्य श्रुत्यन्तरविरोधेन लक्षणाप्रासंगं च व्याख्यानाभासत्वात् । अतस्तत्कालस्थ्ने वादिनं प्रत्यपि लोकन्यायेन वक्तव्यम् । तत्र लोके चेतनाचेतनव्यवहारोऽस्ति । चेतना जरायुजाण्डजोद्भिज्जस्वेदजभेदेन चतुर्विधाः । सशरीरा जीवा अलौकिका मुक्ता अशरीराश्चेतनास्तेभ्योऽन्ये घटादयो ग्यादयश्च ते अचेतना इति । तन्न्यायेनात्र सूत्रेषु विचारस्तथा सति प्रकृतेः पञ्चविंशेषु चेतनेष्वप्रवेशाद्चेतनत्वमिति । तत्र धेनुनर्तकीदृष्टान्ताभ्यां प्रवृत्तिनिवृत्ती प्रतिवादिनं प्रति न वक्तुं शक्ये । लोके तयोश्चेतनत्वेनैव व्यवहारात् । अभ्युपगमस्य स्वमात्रसन्तोषकत्वेनानुत्तरत्वात् । अत एतावन्मात्रेणैव तन्निग्रहे सिद्धे न किञ्चिद्विचारणीयम् । प्रवृत्तिः कस्य धर्मः ? । यत्र दृष्टा तस्य वा ? यस्सयुक्ते दृष्टा तस्य वेति शङ्कायां यस्मिन् दृष्टा तस्यैव सेति युक्तम् । प्रवृत्तितदधिष्ठानयोः प्रत्यक्षत्वात् केवले चेतने क्वचिदपि प्रवृत्त्यदर्शनात् । अत एव वान्वयव्यतिरेकसिद्धत्वाच्चैतन्यमपि देहधर्म

म । तत्र लोके चेतनाचेतनव्यवहारोऽस्ति । चेतनाश्चतुर्विधा जीवाः सशरीरा अलौकिकाश्च । अन्ये अचेतनाः । तन्न्यायेन विचारोऽत्रेति न किञ्चिद् विचारणीयम् ॥ २ ॥

पयोऽम्बुवच्चेत् तत्रापि ॥ ३ ॥

यथा पयो विचित्रफेनरचनां करोति, यथा वा नद्यादिजलं स्वत एव स्पन्दत इतिचेत् । न । तत्रापि दोहनाधिश्रयणे मेघानां चेतनानामेव सत्त्वात् ।

यथेति लोकायतिकदर्शनम् । तस्माद्चेतनस्यैव धर्मः प्रवृत्तिरिति पूर्वपक्षमुद्भाव्य, न ब्रूमो यस्मिन्नचेतने प्रवृत्तिर्दृश्यते न तस्य सेति । किन्तु सा चेतनाद् भवतीति ब्रूमः । तद्भावे भावात् तदभावे चाभावात् । यथा काष्ठादिनिष्ठापि दाहप्रकाशलक्षणा क्रिया केवलेऽनलेऽनुपलभ्यमानापि ज्वलनान्वयव्यतिरेकानुविधानात् तन्निमित्तैवेत्यादिकमेकदेशिभिर्विचारितं तल्लोकन्याये देहस्यैव चेतनत्वेन समाधानाच्च विचारणीयमित्यर्थः ॥ २ ॥

पयोऽम्बुवच्चेत् तत्रापि ॥ ननु मास्तु धेनुनर्तकीदृष्टान्तेन प्रवृत्तेरचेतनधर्मत्वं तथापि क्षीरजलदृष्टान्तेनाचेतनधर्मत्वं तस्याः साधयिष्याम इत्याशङ्कायां समाधत्ते । पय इत्यादि * । तद् व्याकुर्वन्ति । * यथा पय इत्यादि * यथा दुह्यमानेऽधिश्रीयमाणे च पयसि दृश्यमानां विचित्रां फेनरचनां केवलं पय एव करोति । यथा वा नद्यादिजलं स्वत एव प्रस्रवति । न तत्र चेतनसंसर्गलेशोऽपि । तथा प्रधानमपि प्रवर्तते । विचित्रलोकरचना केवलाचेतनकर्तृका, रचनात्वात् । दुह्यमानपयःफेनरचनावत् । यद्वा यथा प्रधानप्रवृत्तिः केवलाचेतनधर्मः, प्रवृत्तित्वात् । नद्यादिस्पन्दनप्रवृत्तिवदित्यनुमास्यामहे इत्युच्यते चेत् । न । कुतः ? । तत्रापि तस्मिन् दृष्टान्तद्वयेऽपि दोहनाधिश्रयणयोश्चेतनकर्तृकयोरेव प्रयोजकतया सत्त्वात् । नदीप्रस्रवणेऽपि चेतनानां मेघानां प्रयोजकानां सत्त्वात् । तथाच दृष्टान्तद्वयेऽपि चेतनप्रयुक्तत्वस्य विद्यमानत्वेन हेतोः सपक्षराहित्येन व्याप्तिग्रहाभावान्नानुमानमित्यर्थः । ननु यथा क्षीरम-

व्याख्यानान्तरे त्वक्षाम्बुवदित्युच्येत । द्वितीयस्य समाधानं नोभयवादिसंमतम् ॥ ३ ॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ ४ ॥

चेतनं स्वत एव वत्सविवृद्धये प्रवर्तते । यथा वा नद्यादिजलं स्वभावत एव लोकोपकाराय स्पन्दत एवं प्रधानमपि स्वभावत एव पुरुषार्थसिद्धये प्रवर्तत इत्याशङ्कायामुभयवादिप्रसिद्धे रथादावचेतने केवलस्य प्रवृत्त्यदर्शनाच्छास्त्रे च, योऽप्सु तिष्ठन् योऽपोन्तरो यमयति, एतस्यैवाक्षरस्य प्रशासने गार्गि प्राच्यो नद्यः स्पन्दन्त इति चेतनकर्तृकत्वश्रावणात् साध्यपक्षनिक्षिप्त एवायमुपन्यास इत्येकदेशिकृतव्याख्यानेऽपि प्रकृतार्थसिद्धेस्तत् कुतोऽनादृत्यान्यथा व्याख्यायत इत्यत आहुः । * व्याख्यानान्तर इत्यादि * । पूर्वत्र रचनाप्रवृत्त्योरनुपपत्त्या पूर्वपक्षिणोऽसङ्गतवादित्वमुक्तमिति तेन तदेव दृष्टान्तेन निधारणीयम् । अत एव दृष्टान्तद्वयमत्र सूत्र उक्तम् । यदि लोकोपकाराय प्रवृत्तिमात्रमेव दूष्यत्वेनाभिप्रेतं स्यात् तदा प्रवचनसूत्रेषु अचेतनत्वेऽपि क्षीरवच्चेष्टितं प्रधानस्येति कथनात् तन्मात्रमेवास्मिन् सूत्रे क्षीरपदेनानूदितं स्यात् । यदि च तदभिप्रेता पुरुषोपकारकता दूष्यत्वेनाथाभिप्रेता स्यादपाम्बुनोस्तथात्वस्य लोकप्रसिद्धत्वादप्याम्बुवदित्युच्येत । अतो भिन्नैवेयं युक्तिरिति तथा व्याख्यानमयुक्तम् । नचैवं सति प्रवचनसूत्रस्य युक्तेरदूषणात् तया स पुनः प्रत्यवस्थास्यतीति शङ्क्यम् । क्षीरस्य जीववद्धेतुत एव प्रस्रवणेन तस्य दृष्टान्तस्य शिथिलतया तेन प्रत्यवस्थानाभावस्यार्थत एव सिद्धत्वात् । तस्माद्युक्तमेव तद्व्याख्यानम् । यत् पुनर्नचाम्बुनोऽत्यन्तमनपेक्षा निम्नभूम्याद्यपेक्षितत्वात् स्पन्दनस्येति समाधानं, तत्तु सिद्धान्तिनश्चेतनसापेक्षताभिप्रायवतो निम्नभूमिसापेक्षताया अनभिप्रेतत्वात् पूर्वपक्षिणोऽपि निरपेक्षतां प्रतिपादयतोऽनभिप्रेतत्वान्नोभयवादिसम्मतमतस्तदुभयमनादृत्यैवं व्याख्यातमित्यर्थः ॥ ३ ॥

व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ प्रकृतेः कर्तृत्वं दूषयित्वा तस्याः स्वतः परिणामं दूषयति । * व्यतिरेकेत्यादि * । अत्रापि ना-

प्रधानस्यान्यापेक्षाभावात् सर्वदा कार्यकरणमेव, न व्यतिरेकेण तूष्णीमवस्थानमुचितम् । पुरुषाधिष्ठानस्य तुल्यत्वात् । सेश्वरसांख्यमतेऽप्यैश्वर्यं तदधीनमिति यथास्थितमेव दूषणम् ॥ ४ ॥

अन्यत्राभावाच्च न तृणादिवत् ॥ ५ ॥

तृणपल्लवजलानि स्वभावादेव परिणमन्त एवमेव प्रधानमि-

नुमानमित्यस्यानुषङ्गः । तद् व्याकुर्वन्ति । * प्रधानेत्यादि * । व्यतिरेकेण अनवस्थितिर्व्यतिरेकानवस्थितिः । गुणत्रयसाम्यात्मकस्य प्रधानस्य परिणामार्थं गुणक्षोभायान्यापेक्षाभावात् सर्वदा कार्यकरणमेवोचितं, न तु कार्यव्यतिरेकेण तूष्णीमवस्थानमुचितम् । तथाच प्रलयानुपपत्तिः । चकारेण त्रयाणां गुणानामेकव्यतिरेकेणान्यानवस्थितेर्युगपत् क्षोभात् कार्यत्रयस्यापि यौगपद्यसम्भवात् क्रमानुपपत्तिः, कार्यानिवृत्तिश्च समुच्चीयते । नच पुरुषाधिष्ठानेन क्रमानुपपत्तिपरिहारः पुरुषाणामानन्त्येन नित्यविभुत्वेन च तदधिष्ठानस्य तुल्यत्वात् । तेषामुदासीनत्वेन च तुल्यत्वात्तानच तर्हि सेश्वरसांख्यमादरणीयम् । तथा सति तस्य यदा यथाऽधिष्ठानं तथा परिणामादिरिति न दूषणावकाश इति वाच्यम् । यतः सेश्वरसांख्यमतेऽप्यैश्वर्यं प्रधानाधीनं, न त्वौपनिषदानामिवेश्वरमतस्तस्या अन्यानपेक्षत्वात् प्रलयानुपपत्त्यादिरूपं दूषणं यथाऽनीश्वरसांख्यमते तथात्रापीति मतद्वयमप्यसङ्गतमित्यर्थः ॥ ४ ॥

अन्यत्राभावाच्च न तृणादिवत् ॥ ननु यथा तृणपल्लवजलानि पशुभक्षितानि स्वभावादेव क्षीरभावेन परिणमन्त एवं प्रधानमपि महदादिभावेन परिणंस्यते । एवञ्चानपेक्षाहेतुको व्यतिरेकानवस्थितिदोषोऽपि परिहृतो भवति । दृष्टान्तस्य तुल्यत्वादित्याशङ्कायामाह । अन्यत्रेत्यादि * । अत्रापि पूर्ववदनुषङ्गः । तद् व्याकुर्वते । *तृणेत्यादि * । प्रधानमन्यानपेक्षपरिणामम् । अचेतनत्वात् । तृणादिवदित्येवं कारणतया प्रधानानुमानं न कर्तव्यम् । कुतः? । अन्यत्र श्रृङ्गादौ दुग्धस्याभावात् । यदि हि तृणादिकं स्वभावादेव परिणमेत् सर्वत्रैव दुग्धं भवेत् । तत्तु न भवति । अतः प्रधानमन्यापेक्षपरिणामम् । अचेतनत्वात् । तृणादिवदिति हेतूदाहरणयोः साधारणत्वेन नानुमानं

ति न मन्तव्यम् । अन्यत्र शृङ्गादौ दुग्धस्याभावात् । चकाराच्चेतनक्रियाऽप्यस्ति । ततश्च लोकदृष्टान्ताभावादचेतनं प्रधानं न कारणम् ॥ ५ ॥

अभ्युपगमेऽप्यर्थाभावात् ॥ ६ ॥

प्रधानकारणवादाङ्गीकारेऽपि प्रेक्ष्यकारित्वाभावान्न पुरुषार्थः सिद्ध्यति ॥ ६ ॥

पुरुषाश्मवदितिचेत् तथापि ॥ ७ ॥

प्रधानस्य केवलस्य कारणवादो निराकृतः । पुरुषप्रेरितस्य कारणत्वमाशङ्क्य परिहरति । पुरुषः पङ्गुरन्धमारुह्यान्योन्योपका-

---

शक्यं कर्तुमित्यर्थः । * चेतनक्रियेति * घासभक्षणादिरूपा धेन्वादिक्रिया ॥ ५ ॥

अभ्युपगमेऽप्यर्थाभावात् ॥ अन्यानपेक्षस्य प्रधानस्य स्वभावत एव महदादिरूपः परिणामो न युक्तिसह इत्युक्तम् । इदानीं तदुपगम्य यथा धेनुर्वत्सार्थं स्वत एव प्रवर्तते तथा प्रधानमपि पुरुषभोगाद्यर्थं स्वत एव प्रवर्तत इति यत्तेऽङ्गीकुर्वन्ति तद् दूषयतीत्याहुः । * प्रधानकारणेत्यादि * । अभ्युपगमे प्रधानकारणवादाङ्गीकारे प्रधानस्य पुरुषार्थं स्वतः प्रवृत्तिर्नोपपद्यते । कुतः ? । 'अर्थाभावात् । अर्थः प्रयोजनं, तदभावात् । तद्धि प्रेक्षावतां भासते । यतः प्रेक्षापूर्वकारित्वं चेतनधर्मः सोऽचेतने प्रधाने न वक्तुं शक्यते । लोके तथा अदर्शनात् । तदभावे च पुरुषार्थो न सिद्ध्यति । घुणाक्षरवत्तु कादाचित्कः स्यात् । तथापि तादर्थ्यप्रवृत्तिप्रतिज्ञा तु भज्येतैवेत्यसङ्गतस्तथाऽभ्युपगम इत्यर्थः ॥ ६ ॥ २ ॥

पुरुषाश्मवदितिचेत् तथापि ॥ एवं प्रधानकारणवादे निरस्ते पुनः प्रत्यवस्थानानवकाशात् किमस्य सूत्रस्य प्रयोजनमित्यत आहुः । * प्रधानस्येत्यादि * । तथाच प्रतिज्ञान्तरपरिहारः प्रयोजनमित्यर्थः । पुरुषप्रेरितप्रधानकारणवादस्य स्वरूपमाहुः * पुरुष इत्यादि * तथोक्तं सां-

राय गच्छति, यथा वा अयःकान्तं सन्निधिमात्रेण लोहे क्रियामुत्पादयति। एवमेव पुरुषाधिष्ठितं पुरुषसन्निहितं वा प्रधानं प्रवर्तिष्यत इतिचेत् तथापि दोषस्तदवस्थः। प्रधानप्रेरकत्वं पुरुषस्य स्वाभाविकं ? प्रधानकृतं वा ? । आद्ये प्रधानस्याप्रयोजकत्वम्। द्वितीये प्रधानदोषस्तदवस्थः । नित्यसम्बन्धस्य विशिष्टकारणत्वे अनिर्मोक्षः। अशक्तस्य तु मोक्षाङ्गीकारः सर्वथानुपपन्नः ॥ ७ ॥

व्यसनत्याम्-'पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः' इति। उभयोः प्रधानपुरुषयोः संयोगः संश्लेषस्तत्कृतो महदादिसर्गः। तस्य प्रयोजनद्वयम् । पुरुषस्य भोग्यतया प्रधानविषयकं दर्शनं, पुरुषस्य कैवल्यं चेति। तथाच यथा पङ्गुरन्धमारुह्याऽन्योन्योपकाराय गच्छत्येवं पुरुषः प्रधानमधिष्ठाय उक्तकार्यद्वयार्थं प्रवर्तयतीत्येकं मतम् । यथा वा अय कान्त इति द्वितीयं मतम्। तदनूद्य दूषयन्ति। * तथापीत्यादि * । एवमङ्गीकारेऽपि दोषस्तदवस्थ इत्यतो नानुमानमित्यर्थः। तदुपपादयन्ति। * प्रधानेत्यादि *। * अप्रयोजकत्वमिति * । पुरुषोपकारजननासमर्थत्वम्। तथाच स्वाभाविकत्वपक्षे पुरुषस्य स्वत एव प्रवृत्तेः प्रधानकृतो न कश्चिदुपकारः। यथा स्वस्तेन वीजने व्यजनस्य नोपकारकत्वेन प्रसिद्धिस्तथेति। प्रधानकृतत्वपक्षे तु प्रेरकत्वस्य तत्र वक्तुमशक्यत्वादुपकारकत्वात् सिद्धिव्यतिरेकानवस्थितेश्चानपायात् पुरुषार्थसिद्धिः प्रलयासिद्धिश्च तदवस्था। किञ्च । प्रकृतिपुरुषयोर्यः कश्चित् सम्बन्धो निर्वक्तव्यः स तयोर्नित्यत्वान्नित्य एव। सोऽप्युदासीनत्वेनाभ्युपगतस्य पुरुषस्य यागादिव्यापारासम्भवात् प्रकृतिप्रेरणयोग्यतारूपो वक्तव्यः। तस्यैव चेद् भोगादिके विशिष्टकारणत्व तदा तस्य नित्यत्वात् पुरुषस्यानिर्मोक्ष एव प्रसज्येत। यदि चात्मनामानन्त्यात् तेषां मध्ये कस्यचन शक्तस्य अधिष्ठातृत्वं तदितरस्याशक्तस्य मोक्ष इति न दोष इति विभाव्यते तदापि प्रधानस्य स्वातन्त्र्यात् बन्धकस्याभाव्याच्चानिच्छतोऽपि तेनैव भोगसम्भवादशक्तत्वेन तन्निवारणासम्भवाच्चाशक्तस्य मो-

अङ्गित्वानुपपत्तेश्च ॥ ८ ॥

प्रकृतिपुरुषयोरङ्गाङ्गित्वे भवेदप्येवम् । तच्च नोपपद्यते । पुरुषस्याङ्गित्वे ब्रह्मवादप्रवेशो मतहानिश्च । प्रकृतेरङ्गित्वे त्वनिर्मोक्षः ।

क्षाङ्गीकारः सर्वथाऽनुपपन्न इत्यर्थः । सूत्रयोजना तु पुरुषश्चाश्मा च पुरुषाश्मानौ ताभ्यां तुल्यः सम्बन्धस्तथा । द्वन्द्वान्ते श्रूयमाणो वतिः प्रत्येकं सम्बध्यत इति ॥ ७ ॥

अङ्गित्वानुपपत्तेश्च ॥ पुरुषविशिष्टप्रधानकारणवाद एव दूषणान्तरमाह । अङ्गित्वेत्यादि * । तद् व्याकुर्वन्ति * प्रकृतीत्यादि * । यत् तयोरन्योन्योपकारकत्वमङ्गीकृतं तत् तदा स्याद् यदि तयोर्गुणप्रधानभावेनाङ्गत्वमेकस्यान्यस्याङ्गित्वं च स्यात् । तदेव तु न जाघटीति । कुतः ? । अङ्गित्वानुपपत्तेः । पुरुषस्याङ्गित्वे स पुरुष इतरविलक्षणो वक्तव्यः । अन्यथा प्रकृतिनियामकत्वं तस्य न स्यात् । तथा सति तत् तस्य वैलक्षण्यं श्रौतधर्मवत्तयैवेति ब्रह्मवादप्रवेशः । यदि न श्रौतधर्मवत्तयेत्युच्यते तदापि कालकर्मविपाकाशयैरपरामृष्टस्तु वक्तव्यः । तथा सतीतरपुरुषविलक्षणेश्वरसिद्ध्या ईश्वरासिद्धेरीश्वरसिद्धिः सिद्धेति प्रवचनसूत्रोक्तमतहानिः । यदि च तद्भिया प्रकृतेरङ्गित्वमाद्रियते तदा तस्याः स्वातन्त्र्यात् तया पुरुषाय स्वदोषा न दर्शयितव्याः । ततश्च दुःखाभावेन विरागाभावात् कैवल्यार्थप्रवृत्त्यभावेनानिर्मोक्ष इत्यर्थः ।

शङ्कराचार्यादयस्तु–सत्त्वरजस्तमसां साम्यावस्था हि प्रधानाऽवस्था । तस्यामवस्थायामनपेक्षस्वरूपाणां परस्परं प्रत्यङ्गाङ्गिभावानुपपत्तेर्बाह्यस्य कस्यचित् क्षोभयितुरभावाद् गुणवैषम्यनिमित्तो महदाद्युत्पादो न स्यादित्येवं प्रधानप्रवृत्त्यनुपपन्नताबोधकत्वेनेदं सूत्रं व्याकुर्वते । तन्न युक्तम् । पुरुषाश्मसूत्रस्य सांख्योक्तविशिष्टकारणतापक्षदूषकताया व्याख्यानादत्र केवलकारणतापक्षदूषणस्यासङ्गतत्वादिति ।

यत्त पुनः पूर्वसूत्रव्याख्याने परमात्मनः स्वरूपव्यपाश्रयमौदासीन्यं, मायाव्यपाश्रयं प्रवर्तकत्वमिति शङ्कराचार्यैरुक्तं, तदुपह-

अनेन परिहृतोऽपि मायावादो निर्लज्जानां हृदये भासते ॥ ८ ॥

अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ ९ ॥

अन्यथा वयं सर्वमनुमिमीमहे । यया सर्वे दोषाः परिहृता

सन्ति । * अनेनेत्यादि * । माया हि गुणमयी गुणानाञ्चाङ्गाङ्गिभावोऽनुपपन्न इति स्वयमेव व्याख्यानात् साम्यावस्थावस्थितगुणकृतमुदासीनस्वरूपस्य परमात्मनः प्रवर्तकत्वमित्यसङ्गतम् । अथ शुद्धसत्त्वप्रधाना साऽङ्गीक्रियते, तदा तु तया ज्ञानमात्रमेवोत्पादयितव्यं, न प्रवर्तयितव्यम् । सत्त्वस्य तादृशस्वभावे मानाभावात् । अप्राधान्येन गुणान्तरेऽपि तथात्वस्य वक्तुमशक्यत्वात् । अतः स्वोक्तमप्यननुसन्धानानां निर्लज्जत्वात् तादृशामेव हृदये भासत इति तथा समर्थनमसङ्गतमित्यर्थः ॥ ८ ॥

अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥ 'प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः । अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणा' इति हि सांख्यानामपरा प्रतिज्ञा । अर्थस्तु—प्रीतिः सुखम्, अप्रीतिर्दुःखं, विषादो मोहः, सत्त्वरजस्तमांसि गुणाः क्रमेणैते त्रयात्मका एतत्त्रयस्वरूपाः । प्रकाशः प्रवृत्तिर्नियमो निग्रह इति तेषां क्रमेणासाधारणं कार्यं, तेन तेऽनुमीयन्ते । अन्योन्याभिभवोऽन्योन्याश्रयोऽन्योन्यजननमन्योन्यमिथुनीभावश्च तेषां साधारणी क्रियेति । एवं साधारणक्रियया गुणवृत्तं चलमङ्गीकृत्य तमसा रजोनियमनेन प्रवृत्तावपोदितायां प्रलयसिद्धिः । तत्पूर्वकं सत्त्वजनने तेन प्रकाशादात्मविवेके निर्मोक्ष इत्येवं समर्थनमाशङ्क्य परिहरति । तद् व्याकुर्वन्ति * अन्यथेत्यादि * । गुणा एवं विभागशः प्रवृत्तिमन्तः । चलस्वभावत्वात् । चलदलदलवदित्येवमन्यथानुमाने रचनाऽनुपपत्त्यादयः सर्वे दोषाः परिहृता भवेयुरितिचेदत्र दूषणमाह । ज्ञशक्तिवियोगादिति * । सौत्रश्चोऽप्यर्थे । एवं प्रकारान्तरेणानुमितावपि तत्तत्काले तत्तत्कार्यं वाच्यं, न सर्वदा । क्रमानुपपत्त्यादिदूषणप्रासात् । तच्च तथा तदा भवति यदि तमसा कालो ज्ञायेत । स।

भवेयुरितिचेत् तथापि पूर्वं ज्ञानशक्तिर्नास्तीति मन्तव्यम्। तथा सति बीजस्यैवाभावान्निसत्वाद्यानिर्मोक्ष इति ॥ ९ ॥

विप्रतिषेधाच्चासमञ्जसम् ॥ १० ॥

परस्परविरुद्धत्वान्मतवर्तिनां पञ्चविंशादिपक्षाङ्गीकारात्। वस्तुतस्त्वलौकिकार्थे वेद एव प्रमाणं नान्यदिति ॥ १० ॥

तु ज्ञानशक्तिर्भवतां मते पुम्प्रकृतिसंयोगात् पूर्वं नास्तीति स्वमतानुरोधान्मन्तव्यम्। तथा सति प्रवृत्तिबीजस्य ज्ञानशक्तिसंयोगस्याभावात् प्रवृत्त्यसिद्धिः। अथ, दिक्कालावाकाशादिभ्य इति सूत्रात् सृष्टिदशायां कालस्योत्पन्नत्वात् पुंयोगेन ज्ञानशक्तिसद्भावाच्च प्रवृत्तिः साध्यते, तथापि संयोगस्य नित्यत्वात् प्रलयदशायां कालस्यापि नाशाद् वियोजकान्तरस्य वक्तुमशक्यत्वात् पुरुषस्य गुणसाम्यादनिर्मोक्षस्तदवस्थ इति नानुमानान्तरेणापि तथा सिद्धिरित्यर्थः ॥ ९ ॥

विप्रतिषेधाच्चासमञ्जसम् ॥ सर्वपक्षसाधारणं दूषणान्तरं वदति तन्मतस्यार्वाचीनत्वख्यापनायेत्याशयेनाहुः। * परस्परेत्यादि *। तानि च मतान्येकादशस्कन्ध उद्धवप्रश्न उक्तानि। 'केचित् षड्विंशतिं प्राहुरितरे पञ्चविंशतिम्। सप्तैके नव षट् केचिच्चत्वार्येकादशापरे। केचित् सप्तदश प्राहुः षोडशैके त्रयोदश' इति। एतेषां स्वरूपं च तत्रैव भगवता प्रोक्तम्। तच्च सर्वं यौक्तिकत्वादनादरणीयम्। भगवता तथोक्तत्वात्। 'युक्तयः सन्ति सर्वत्र भासन्ते ब्राह्मणा यथा। मायां मदीयामुद्गृह्य वदतां किन्तु दुर्घटम्। नैतदेवं यथात्थ त्वं यदहं वच्मि तत् तथा। एवं विवदतां हेतुं शक्तयो मे दुरत्ययाः। यासां व्यतिकरादासीद् विकल्पो वदतां पदम्। प्राप्ते शमदमेऽप्येति वादस्तमनुशाम्यतीति'। तर्हि, तमो वा इदमेकमेवाग्र आसीदित्यादिश्रुत्युक्तस्य का गतिरित्यत आहुः। * वस्तुत इत्यादि *। तद्रीत्या तदङ्गीकारे तु भगवत्परत्वान्न दोष इत्यर्थः। एवं दशभिः सूत्रैः सांख्यसमयो निराकृतः ॥ १० ॥ २ ॥

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ ११ ॥

इदानीं परमाणुकारणवादो निराक्रियते । तत्र स्थूलकार्यार्थ

महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥ अतः परं सप्तसूत्र्या नैयायिकादिसमयो निराक्रियते । केचिदिदं सूत्रं ब्रह्मकारणवाददूषणपरिहारार्थत्वेन व्याकुर्वन्ति । तदयुक्तम् । ब्रह्मकारणवादे प्रसक्तानां विलक्षणत्वादीनां दोषाणां पूर्वस्मिन् पाद एव, न विलक्षणत्वाद्यधिकरणैर्निवारितत्वेन प्रसङ्गाभावात् पुनरुक्त्यापादकत्वाच्चेत्यभिप्रेत्याहुः । * इदानीमित्यादि * । अत्रासमञ्जसमिति पूर्वसूत्रादनुवर्तत इति केचिदाहुः । वस्तुतस्त्वग्रिमसूत्रेणैतस्यान्वयः । वाशब्दो विकल्पार्थः । तथाच ह्रस्वपरिमण्डलाभ्यां परमाणुभ्यां जायमानं द्व्यणुकं महत् स्याद् दीर्घवद् वा स्यान्न त्वणु ह्रस्वमिति । तदिदं व्याकुर्वन्ति*तत्रेत्यादि * । अयमर्थः । तेषां मते सर्वं जगद् उपादानभूतेभ्यो नित्येभ्यः परमाणुभ्यो द्व्यणुकादिक्रमेणोत्पद्यते । तत्रैषा युक्तिः । सूक्ष्मादेव स्थूलस्योत्पत्तिर्लोके दृश्यते । तन्तुभ्यः पटस्यांशुभ्यस्तन्तूनां चोत्पत्तिदर्शनात्तास चापकर्षः परमकारणद्रव्यमतिसूक्ष्ममवस्थापयति परमाणुरूपम् । तस्य सावयवत्वाङ्गीकारे स्वनन्तावयवत्वेन मेरुसर्षपयोः समानपरिमाणत्वप्रसङ्गः । एवं सिद्धाः परमाणवः पार्थिवाप्यतैजसवायवीयभेदाच्चतुर्विधा नित्याः प्रलयकालेऽवतिष्ठन्ते । किञ्च । कार्यमात्रं लोके समवाय्यसमवायिनिमित्ताख्यकारणत्रयजन्यं दृश्यते । यथा पटे तन्तवः समवायिकारणम् । तेषां परस्परसंयोगोऽसमवायिकारणम् । तुरीवेमकुविन्दादयश्च निमित्तकारणम् । एवमाद्यकार्येऽपि परमाणवः समवायिनस्तत्संयोगोऽसमवायी । अदृष्टेश्वरेच्छादिकं च निमित्तम् । तत्र जीवादृष्टसहकृतेश्वरेच्छावशाद् वा, ईश्वरेच्छावशागाद्दृष्टवदात्मसंयोगाद् वा परमाणुषु कर्मोत्पद्यते । ततस्ते परमाणवः परमाण्वन्तरेण संयुज्यमानाः प्रत्येकं द्व्यणुकरूपं कार्यमारभन्ते । बहवस्तु परमाणवः संयुक्ता न सहसा स्थूलं कार्यमारभन्ते । परमाणुत्वे सति बहुत्वात् । घटोपगृहीतपरमाणुवत् । नचात्र मानाभावः । नष्टे घटे कपालादिदर्शनस्यैव

प्रथमं परमाणुद्वयेन द्व्यणुकमारभ्यते । परमाणुद्वयसंयोगे द्व्यणुकं भवतीत्यर्थः । तत्रोपर्यधोभावमिलने द्व्यणुकं महत् स्याद् द्विगुणपरिमाणवत्त्वात् ।

मानत्वात् । तैरेव घटारम्भे तु मुद्गरादिना घटनाशे तदवयवानां परमाणूनामतीन्द्रियत्वान्न किञ्चिदुपलभ्यते । तस्मान्न बहूनां परमाणूनां सहसा स्थूलकार्यारम्भकत्वं, किन्तु द्व्यणुकादिक्रमेणैव महाकार्यारम्भ इति द्व्यणुकमेवाद्यं कार्यं द्वाभ्यां परमह्रस्वपरिमण्डलपरिमाणाभ्यां परमाणुभ्यामारभ्यते । किञ्च । द्रव्येण द्रव्यान्तरारम्भवद् गुणेन गुणान्तरारम्भ इति परमाणुद्वयगतया द्वित्वसंख्यया द्व्यणुकेऽणुत्वं ह्रस्वत्वं च परिमाणान्तरमारभ्यते । अणु च पारिमाण्डल्यादन्यत् । पारिमाण्डल्यं च परमाणुत्वस्यैव नामान्तरम् । परमाणुत्वं त्वनारम्भकम् । द्वित्वसंख्या तु महेश्वरीयया अपेक्षाबुद्ध्या जन्यते । तथा त्रिभिर्द्व्यणुकैस्त्र्यणुकमारभ्यते । द्व्यणुकगतया बहुत्वसंख्यया त्र्यणुके महत्त्वं दीर्घत्वं च परिमाणान्तरमारभ्यते द्व्यणुकगते अणुत्वह्रस्वत्वे त्वनारम्भके । तथा द्वाभ्यां तु द्व्यणुकाभ्यामपि न द्रव्यमारभ्यते । द्व्यणुके बहुत्वमहत्त्वप्रचयविशेषाभावेन द्व्यणुकजनितकार्ये महत्त्वानारम्भे तस्य कार्यस्य द्व्यणुकतुल्यतायां तद्वैयर्थ्यप्रसङ्गात् । किञ्च । विश्वनिर्माणस्य जीवादृष्टजन्यतया तद्भोगार्थत्वाद् द्व्यणुकभोगस्य कारणद्व्यणुकेनैव सिद्धेः कृतं तत्कार्येण द्व्यणुकान्तरेणेति । अत आरम्भसार्थक्याय बहुभिरेव द्व्यणुकैस्त्र्यणुकचतुरणुकादीनि भोगभेदायारभ्यन्ते । एवं क्रमेण वायवीयपरमाणुसंयोगेभ्य उत्पन्नो महान् वायुर्नभसि दोधूयमानस्तिष्ठति । तदनन्तरं तस्मिन्नेवाप्येभ्यस्तेभ्यस्तथैवोत्पन्नः सलिलनिधिः पोप्लूयमानस्तिष्ठति । तदनन्तरं तथैवोत्पन्ना पृथिवी तथैव संहतावतिष्ठते । तदनन्तरं तस्मिन्नेव महोदधौ तथैवोत्पन्नस्तेजोराशिर्देदीप्यमानस्तिष्ठतीत्यादिः प्रक्रिया काणभुजेभ्यः समाध्यायादिसूत्रेभ्यः सिद्धा तद्भाष्यादिभ्योऽवगम्यते । तामेतां प्रक्रियां दूषयन् प्रथमं द्व्यणुकपरिमाणं दूषयति । * महदित्यादि * अयमर्थः । यदुक्तं परमाणुगतया द्वित्वसंख्यया द्व्यणुकेऽवान्तर-

प्राक्पश्चान्मिलने दीर्घवद् वा स्यात् । परमाणुपरिमाणं ह्रस्वं परितो मण्डलञ्च । उपहासार्थं तस्य मतस्यानुवादः ॥ ११ ॥

ऽणुत्वमवान्तरह्रस्वत्वं चारभ्यत इति । तदसङ्गतम् । दूरस्थयोरसंयुक्तयोरपि परमाण्वोरीश्वरापेक्षाबुद्धिजन्यद्वित्वस्य विद्यमानतया तदानीं तदभावेन द्व्यणुकोत्पत्त्यनन्तरं च भावेन द्व्यणुकद्रव्यासमवायिकारणीभूतः संयोग एव परिमाणेऽपि कारणत्वेनाभ्युपेयः । नच तस्यान्यथासिद्धत्वम् । एकेन संयोगेन द्रव्यगुणात्मककार्यद्वयजननेऽपि बाधकाभावात् । एकस्मिन् गुणे द्रव्यगुणजनकत्वस्य सर्वोत्पत्तिमन्निमित्तकारणे अदृष्टे सिद्धत्वात् । वस्तुतस्तु संख्याया अपि द्व्यणुकादिकं प्रति कारणता । अन्यथा तद्वाचके पदे संख्योल्लेखो न स्यात् । अतः संख्यया परिमाणमेव जन्यते इति न नियमः । किञ्च । तया द्व्यणुकगतमेकत्वमेव जन्यते । साजात्यात् । न त्वेकत्वेन । विनिगमनाविरहात् । नच तन्नित्यम् । अनित्यगतगुणस्यानित्यत्वाभ्युपगमात् । एवं द्व्यणुकपरिमाणमपि परमाणुपरिमाणेनैव जन्यत इति मन्तव्यम् । अन्यथाऽतिप्रसङ्गापत्तेः । नच परिमाणस्य प्रकृष्टपरिमाणजनकत्वदर्शनात् सूक्ष्मे चातिसूक्ष्मत्वस्यैव प्रकर्षत्वात् परमाणौ विश्रान्त्यनङ्गीकारेऽनवस्थापत्त्या मेरुसर्षपयोस्तौल्यापत्तेस्तस्यानारम्भकत्वमिति वाच्यम् । विभागजन्य एव कार्ये सूक्ष्मत्वस्य प्रकर्षतायाः, सर्षपभङ्गादौ निर्णीतत्वेन संयोगजे कार्ये तथाङ्गीकारस्य भ्रान्तिमूलकत्वात् । अस्तु वा संख्यायाः परिमाणमात्रजनकत्वम् । तथापि तयाऽणुत्वह्रस्वत्वे एव जननीये, न महत्त्वदीर्घत्वे इत्यत्र किं नियामकम् । नच प्रत्यक्षतापत्तिः । स्पर्शरूपयोरनुद्भूतत्वाङ्गीकारेणापि तत्परिहारसम्भवात् । अथवा, तयाऽणुत्वादिकमेव जन्यताम् । तथापि द्व्यणुकस्य परमाणुपरिमाणापेक्षया द्विगुणपरिमाणवत्त्वाद् द्व्यणुकं स्वजनकसंयोगद्वैविध्येनोक्तरीत्या महद्वद्दीर्घवद् वा स्यान्न तु वर्तुलं ह्रस्वं चेत्यर्थः। भाष्ये, संज्ञापूर्वकस्य विधेरनित्यत्वमभिप्रेत्य, मिलनम् * इत्यत्र गुणाभावः । * प्राक्पश्चादिति * तिर्यग्भावेन । नन्वस्याकाण्डताण्डवस्य किं प्रयोजनमत आहुः । * उपहासार्थमिति * य एवं लोकतत्त्वेऽप्यकुशलास्ते कथमात्मतत्त्वं ज्ञास्यन्तीत्युप-

किमतो यद्येवमत आह ॥

उभयथापि न कर्मातस्तदभावः ॥ १२ ॥

उभयथापि न । कुतः ? । न कर्म । नकारो देहलीप्रदीपन्यायेनोभयत्र सम्बद्धयते । अतो द्व्यणुकाभावः । उभयथापि न

ह्रासार्थम् । वक्ष्यमाणरीत्या वा ॥ ११ ॥

उभयथापि न कर्मातस्तदभावः ॥ एवं परिमाणदूषणमुखेन दूषयित्वा तदसमवायिकारणसंयोगदूषणमुखेनापि दूषयतीत्याहुः । * उभयथेत्यादि * गृहीत्वा पुनर्व्याकुर्वन्ति । * उभयथापि नेत्यादि * । अयमर्थः । अपकर्षकाष्ठां प्राप्तेन परमाणुना सह यः परमाण्वन्तरस्य संयोगः स स र्वदेशिको वा ? एकदेशिको वा ? । नोभयथापि युज्यते । प्रदेशाङ्गीकारे सावयवत्वापातात् । प्रदेशवत्त्वस्य सावयवत्वव्याप्यत्वात् । अतस्तस्य परमाणुत्वनिर्वाहाय निष्प्रदेशत्वमङ्गीकर्तव्यम् । तथा सति सुतरामयुक्तम् । संयोगस्याव्याप्यवृत्तित्वनियमात् । अतः परमाणूनां यदि प्रदेशवत्त्वं, यदि वा न, उभयथापि न संयोगः । अथ संयोगार्थं कल्पिताः प्रदेशा अङ्गीक्रियन्ते तदा प्रमाणशून्यत्वात् सा कल्पना मनोरथमात्रमिति मनोराज्यतुल्यत्वान्न वाह्यस्य नियमस्य साधिका । अथाप्रदेशयोरपि संयोग इत्यङ्गीक्रियते, तथा सति तयोः सर्वात्मना संयोगेनासंयुक्तांशस्याभावात् तदेव तत् स्यात् । ततश्च यथा द्व्यणुकजन्ये कार्ये महत्त्वानारम्भेण द्व्यणुकतुल्यतया द्व्यणुकजन्यद्व्यणुकान्तरवैयर्थ्यमेवं परमाणुजन्यद्व्यणुके परिमाणान्तराभावेन भोगानुपयोगात् तद्वैयर्थ्यमिति न तयोः संयोगः सुवचः । किञ्च । कर्मजोऽन्ययजश्चेति द्विविधः संयोगो भवतां मते । तृतीयश्च संयोगजः संयोगः । तत्र द्वितीयस्तु निरवयवत्वाद् भवतामपि नात्र संमतः । अतः प्रथमो विचारणीयः । तत्र प्रथमं वायुपरमाणुषु कर्मोत्पद्यते ततस्ते संयुज्यन्ते । तेभ्यः संयुक्तेभ्यो द्व्यणुकादिक्रमेण समुत्पन्नो महान् वायुर्नभसि दोधूयमानस्तिष्ठति । तत एवमापः पृथिवी तेजश्च क्रमेण जाता नभसि तिष्ठन्ति । एवं समुत्पन्नेषु चतुर्षु भूतेषु महेश्वराभि-

परमाणुसंघट्टनम् । प्रदेशाभावात् । कल्पना मनोरथमात्रम् । असंयुक्तांशाभावात् तदेव तत् स्यात् । संयोगजनकं कर्मापि न सम्भवति । कारणान्तराभावात् । प्रयत्नवदात्मसंयोगे अदृष्टवदा-

---

ध्यानमात्रात् तैजसेभ्योऽणुभ्यः पार्थिवपरमाणुसहितेभ्यो महदण्डमारभ्यत इत्यादिर्हि काणभुजानां प्रक्रिया । तत्र संयोगजनकं कर्मापि न सम्भवति । कारणान्तराभावात् । न हि तत्र स्वभावः कारणं, महेश्वरसिसृक्षा वा । तस्य तस्याश्च नित्यत्वेन सर्वदा तत्प्रसङ्गादिदूषणमासात् । अतस्तत्त्वभावायानित्यमेव कारणमभ्युपगन्तव्यम् । तद्यदि प्रयत्नवदात्मसंयोगस्तदा सृष्ट्यारम्भे निःशरीरस्यात्मनो मनःसंयोगस्याशक्यवचनत्वेन प्रयत्नस्यैवासम्भवः । शरीरसम्बन्धोत्तरमेव तदुत्पत्तिदर्शनात् । अन्यथात्ममनसोर्नित्यत्वेन संयोगनित्यतया प्रयत्नस्यापि सार्वदिकत्वप्रसङ्गात् । अथादृष्टवदात्मसंयोगस्तदा तस्य सार्वदिकत्वात् कर्मणोऽपि तथात्वप्रसङ्गः । लोके तथैव दर्शनात् । किञ्चैवमभ्युपगम्यमानेऽपि कारणान्तरे परमाण्वोर्निरवयवत्वादसंयुक्तांशस्याभावेन तदपि कार्यं परमाणु स्यान्न द्व्यणुकम् । विशेषाभावात् । नच प्रविभज्यमानत्वमेव विशेष इति युक्तम् । लोके मुद्गराभिघातादिना घटभङ्गे कपालानां तेषामपि तथा भङ्गे कपालिकानां दर्शनेन विभागस्य प्रतिलोमक्रमेणैवोत्पत्तिनिश्चयात् प्रलयेऽपि शरीराणां प्रागेव नाशेन तदानीं परमाणुविभागजनककर्मजनकस्य जीवप्रयत्नाभिघातादेर्वक्तुमशक्यतया, अदृष्टपक्षेऽपि तस्य भोगनाश्यत्वेन द्व्यणुकपर्यन्तभोगोत्तरं तन्नाशे तदानीं शरीराभावेन कर्मकरणाभावादन्यदृष्टान्तरस्याप्यनुत्पत्तावणुद्वयविभागजनकस्य कस्यापि वक्तुमशक्यतया विभागस्याशक्यत्वादपि विशेषाभावात् । चोऽप्यर्थे । किञ्च । पार्थिवद्व्यणुकाङ्गीकारः सुतरामसङ्गतः । पृथिवीपरमाणुषु स्नेहाभावेनेतरेतरासङ्ग्रहादवयव्युत्पत्तेरशक्यवचनत्वात् । संग्राहकत्वेनाप्यणुप्रवेशाङ्गीकारे तु त्र्यणुकचतुरणुकतापत्तिरिति । एवञ्च ह्रस्वपरिमण्डलाभ्यां परमाणुभ्यां जायमानं द्व्यणुकं महद् दीर्घवद् वा स्यात् । उभयथापि न, तज्जनकं कर्मापि न । अतः स्वरूपविरोधादेतयभावाच्च तदभावो द्व्यणुकस्या-

त्संयोगे चाभ्युपगम्यमाने निरवयवत्वात् तदेव तत् स्यात् । विशेषाभावाद् विभागस्याशक्यत्वाच्च । अतो द्व्यणुकस्याभावः ॥ १२ ॥

भाव इति सूत्रयोरन्वयः । तथाच द्व्यणुकाभावात् परमाणुकारणवादोऽसङ्गत इत्यर्थः । ननु भवत्वेवं, तथापि, अणुर्द्वौ परमाणू स्यात् त्रसरेणुस्त्रयस्तत इति श्रीभागवते संज्ञाभेदेन द्व्यणुकस्याङ्गीकृतत्वात् कथं तदविरोधः साधनीय इतिचेद् उच्यते । तत्र हि, चरमः सद्विशेषाणामनेकोऽसंयुतः सदा । परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यत इति परमाणुलक्षणे सदा असंयुत इत्यनेन तत्संयोगानङ्गीकारात् संयोगजन्यद्व्यणुकाभावेऽपि ततः स्थूलभूतत्र्यणुकत्रसरेण्वादिविभागजन्यद्व्यणुकप्रतिषेधाभावेनाविरोधात् । श्रौते पौराणे च दर्शने स्थूलादेव कारणात् सूक्ष्मस्य कार्यस्य विभागेनादावुत्पत्तेः । ब्रह्मवनं ब्रह्मसवृक्ष आसीद् यतो द्यावापृथिवी निष्टतक्षुरिति, यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्तीति तक्षणादिश्रुतेः । नचानुगतकार्यकारणभावविरोधः । जन्यद्रव्यत्वेन स्वयोग्यावयवस्थूलांशत्वेन कारणतानुगमात् । नच लोके सूक्ष्मेभ्य एव तन्तुप्रभृतिभ्यः पटादेः स्थूलस्य कार्यसांरपत्तिदर्शनाद् व्यभिचारः शङ्क्यः । तत्रापि तन्तुसमुदायस्यैव कारणत्वेन त्वच्छित्त्वैव यन्त्रादिभ्यः पटाद्युद्धारात् स्थूलादेव सूक्ष्मोत्पत्तेः । एवं तन्त्वादेरप्यंशुसमुदायरूपात् कार्पासादिरूपस्थूलांशादेवोत्पत्तिः । ते चावयवाः स्थूलादेव तूलाद् विभज्य पश्चाद्दीर्घावस्थाप्राप्त्यर्थं संयुज्यन्त इति विभाग एव मुख्यो व्यापारः । संयोगस्त्ववान्तरः । यत्र पुनर्मञ्जूषादौ लोहदन्तदारुनिर्यासादिभिः पर्यायेणावयवशो योजनं, गृहादौ चेष्टकादिभिस्तत्रापि तत्तदवयवसमुदायादवान्तरावयव्युत्पत्तिस्तत्समुदायाच्च महावयव्युत्पत्तिरिति पटन्याय एव । एवञ्च गर्भादावपि बीजरजःसमुदायस्यैवोपादानता । स च स्थूलांश एव । अत एकस्यैकमेवोत्पाद्यम् । अन्यथा मनेकं कार्यं स्यात् । कारणगुणानामेव कार्यगुणजनकत्वेन कारणगतैकत्वैः प्रत्येकमेकत्वारम्भे बाधकाभावात् । नच तेषामनारम्भकत्वम् । द्वित्वबहुत्वादीनां तत एवारम्भात् । अत एकस्यैकमे-

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ १३ ॥

परमाणुद्व्यणुकयोः समवायोऽङ्गीक्रियते । स सम्बन्धिनोरवस्थानमपेक्षते । सम्बन्धस्योभयनिष्ठत्वात् । स च नित्यः सदा सम्बन्धिसत्त्वमपेक्षते । अतोऽपि न द्व्यणुक उत्पद्यते । किञ्च ।

घोपादानमिति निश्चयः । तेनादिसृष्टिगतमन्तिमञ्च कार्यं विभागात् । अन्यत्तु यथासम्भवं विभागात् संयोगाद्वेति दृष्टादिबलादवगन्तव्यम् । इदं यथा तथा सृष्टिभेदवादे व्युत्पादितमस्माभिः । अतोऽणुद्वयसंयोगजन्यद्व्यणुकस्यैवात्राभावबोधनान्न कोऽपि दोष इति दिक् ॥ १२ ॥

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ असमवायिनिमित्तयोर्दूषणमुखेन दूषयित्वा समवायदूषणमुखेन दूषयतीत्याशयेनाऽऽहुः * परमाण्वित्यादि * । सूत्रे तु समवायाभ्युपगमाच्च तदभाव इति पूर्वेण सम्बन्धः । परमाणुद्व्यणुकयोः कारणकार्ययोः समवायोऽङ्गीक्रियते काणादैः । समवायो नामायुतसिद्धानामाधाराधेयभूतानामिह प्रत्ययहेतुः सम्बन्धः । यथा इह तन्तुषु पटः, इह पटे शुक्लत्वम्, इह गवि गोत्वमिति । स च, कार्यकारणयोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्विशेषनित्यद्रव्ययोश्च । अयुतसिद्धौ च तौ ययोर्द्वयोरन्यतरदेकमपराश्रितमेवावतिष्ठते । स च सर्वेषामेको नित्यो व्यापकश्चेति । एवमभ्युपगम्यमानो यः समवायः स सम्बन्धिनोः परमाणुद्व्यणुकयोरवस्थानमपेक्ष्य वक्तव्यः । सम्बन्धस्योभयस्वरूपनिरूप्यत्वेनोभयनिष्ठत्वात् । स च नित्यत्वात् सदा सम्बन्धिसत्त्वमपेक्षते । सम्बन्धि च द्व्यणुकं न सदातनम् । असत्कार्यवादाभ्युपगमेन पूर्वकाले तदभावात् । अतस्तस्य नित्यत्वाय द्व्यणुकं नोत्पद्यत इत्यङ्गीकार्यम् । तथा सत्यसत्कार्यवादहानिरन्यथा च समवायनित्यत्वहानिरित्युभयतस्पाशा रज्जुः । अथ स नित्यत्वात् परमाणुष्वेव तिष्ठन् पश्चाद् द्व्यणुकेन सम्बद्ध्यत इत्युच्यते तर्हि तस्य तदानीं सत्तायां प्रमाणं वक्तव्यम् । न तावल्लौकिकं प्रत्यक्षम् ।

समवायो नाङ्गीकर्तुं शक्यः । संयोगेन तुल्यत्वात् । सम्बन्धत्वात्तस्य । यथा सम्बन्धिनि सम्बन्धान्तरापेक्षा एवं समवायस्यापि । तथा सत्यनवस्थितिः ॥ १३ ॥

नित्यमेव च भावात् ॥ १४ ॥

परमाणूनामेवाप्रत्यक्षत्वेन तद्धर्मस्यास्य सुतरां तथात्वात् । नापि योगिनाम् । कणादादिव्यतिरिक्तैर्मुनिभिरनङ्गीकारात् । कणादप्रत्यक्षस्य वाक्यकवलितत्वात् । नाप्यनुमानम् । तत्साधकस्य लिङ्गस्याभावात् । नापि शब्दः । सर्ववेदादिवेत्तृणामपि मुनीनां तादृशश्रुतिपुराणवाक्यानुपलम्भात् । नाप्यनुमानम् । तत्सदृशस्य सम्बन्धान्तरस्याभावात् । किञ्च । सदृशान्वेषणे संयोगस्तथा वक्तव्यः । तदापि समवायो नाङ्गीकर्तुं शक्यः । तेन तुल्यत्वात् । सम्बन्धत्वेनापि तिष्ठतस्तस्य यथा सम्बन्धिनि स्थित्यर्थं सम्बन्धान्तरस्य समवायस्यापेक्षा एवं समवायस्यापि स्यात् । सम्बन्धत्वेनात्यन्तभिन्नत्वेन च तत्तौल्यात् । ततस्तस्यापि तस्यापीत्यनवस्थितिश्च । अन्यान्यपि दूषणानि श्रीहर्षमिश्राद्युक्तानि मया प्रस्थानरत्नाकरे व्युत्पादितानीति नात्रानूद्यन्ते । अतः समवायाभ्युपगमादपि द्व्यणुकाभाव इत्यर्थः । ननु दूषिते समवाये अयुतसिद्धयोः कः सम्बन्धोऽङ्गीकर्तव्य इति चेत्, तादात्म्यमेवेति वदामः । कथमिति चेद्, इत्थम् । प्रत्यक्षात् यद् द्रव्यं यद्द्रव्यसमवेतं तत् तदात्मकमिति व्याप्तेर्यथा सुवर्णं सुकृतमित्यादिभगवद्वाक्याच्च कारणकार्यद्रव्ययोस्तादात्म्यं निर्विवादम् । गुणादिष्वपि विचारे शब्दादीनामाकाशादितन्मात्रात्वेन संख्यापरिमाणपृथक्त्वपरत्वापरत्वविभागानां सापेक्षवृत्तिकतया स्वरूपानतिरेकेण संयोगगुरुत्वद्रवत्वस्नेहानां स्पर्शेऽन्तर्भावेन बुद्ध्यादिप्रयत्नान्तानां मनोवृत्तितया वेगस्थितिस्थापकक्रियाणां सामर्थ्यरूपत्वेन जातेरपि व्यवहारसाधकतया स्वरूप एव निवेशेन तत्रापि तादात्म्यस्यैव स्फुटत्वात् । भावना संस्कारो विशेषाश्च प्रमाणविरहादेयादरणीया इति न कोऽपि शङ्कालेश इति दिक् ॥ १३ ॥

नित्यमेव च भावात् ॥ तदभाव इतीहाप्यनुषज्जते । व्याकुर्व-

परमाणोः कारणान्तरस्य च नियमेन भावात् सदा कार्यं स्यात् ॥ १४ ॥

रूपादिमत्त्वाच्च विपर्ययोऽदर्शनात् ॥ १५ ॥

यद् रूपादिमत् तदनित्यम् । परमाणोरपि रूपादिमत्त्वाद्

न्ति । * परमाणोरित्यादि * । सामग्रीसमवधाने हि कार्यावश्यम्भावनियमो लोके दृष्टः । प्रकृतेऽपि परमाणोः समवायिन ईश्वरेच्छादृष्टयोर्निमित्तयोश्च सृष्टिप्राक्काले सत्त्वाज्जन्यस्य परमाणुद्वयकर्मणस्तज्जन्यस्य संयोगस्य चाभावो वक्तुमशक्य इति कारणान्तरस्य सर्वस्य विद्यमानत्वाद् द्व्यणुकं सदा स्यात्ततोऽपि जन्यद्व्यणुकाभावात् परमाणुकारणवादो न सङ्गत इत्यर्थः ।

अन्ये तु परमाणवः प्रवृत्तिस्वभावा वा ? । निवृत्तिस्वभावा वा ? उभयस्वभावा वा ? अनुभयस्वभावा वा ? आद्येऽविरतं सर्गोत्पत्तिः । द्वितीये तु सर्वदा तदभावापत्तिः । तृतीये तु विरोधः । चतुर्थे पूर्वोक्तरीत्या निमित्तस्य नित्यसन्निधानान्नित्यप्रवृत्तिप्रसङ्गः । तदनन्यत्वे नित्यानिवृत्तिप्रसङ्ग इत्याहुः । सोऽयं स्वभावविकल्पो वैशेषिकानभ्युपगतत्वादाचार्यैरुपेक्षितः ॥ १४ ॥

रूपादिमत्त्वाच्च विपर्ययोऽदर्शनात् ॥ एवं संयोगजन्यद्व्यणुकदूषणेन कार्यद्वारा परमाणुकारणवादे दूषितेऽपि यावत् तेषां नित्यत्वं न दूष्येत तावदनन्यथासिद्धनियतपूर्ववर्तित्वरूपस्य तदीयस्य कारणलक्षणस्य परमाणुष्वभिमाने पुनः स वाद उत्तिष्ठेदिति तदभावाय परमाणुनित्यत्वदूषणेन दूषयतीत्याशयेन तद् व्याकुर्वन्ति । * यदित्यादि * । सदकारणवन्नित्यमिति हि काणभुजं चतुर्थाध्यायारम्भे लक्षणम् । तदत्र विपरीतव्याप्तिदर्शनेन सत्प्रतिपक्षोत्थापनाद् दूष्यते । परमाणवो नित्याः, सत्त्वे सत्यकारणवत्त्वादाकाशादिवदिति साधने, अनित्या रूपादिमत्त्वाद् घटादिवदिति प्रतिसाधनस्य सत्त्वादिति । एतेनैव सौख्यस्यापि सिद्धा परमाणुतापि दूषितैव । तेषां मते रूपादिकस्यैव गुणानामुपक्रान्तत्वात्

विपर्ययः । अनित्यत्वमपरमाणुत्वञ्च । नच प्रमाणबलेन तदतिरिक्ते व्याप्तिरिति वाच्यम् । अदर्शनात् । कार्यानुपपत्तिः श्रुत्यैव परिहृता ॥ १५ ॥

सूत्रे रूपादीत्युक्तम् । तेन वायुपरमाणुष्वपि न व्याप्त्यभावः । नन्ववयवावयविसम्बन्धस्तावदनुभूयते । स यदि निरवधिः स्यान्मेरुसर्षपयोः परिमाणभेदो न स्यात् । अनन्तावयवारब्धत्वाविशेषात् । नच परिमाणप्रचयविशेषाऽधीनो विशेषः स्यादिति शङ्क्यम् । संख्याविशेषाभावे परिमाणप्रचययोरप्यशक्यवचनत्वात् । नचैवं विशेषाभ्युपगमेऽप्यवयवप्रलयस्य शक्यवचनत्वात् सावधित्वं शङ्क्यम् । अन्त्यस्यावयवस्य निरवयवत्वाभ्युपगमे तदवयवविभागस्याभावेन तज्जनकस्यान्यस्य सजातीयस्य वक्तुमशक्यतया अजन्यत्वे, अजन्यभावत्वेन चानश्वरत्वेन व्याप्त्या प्रलयस्यैवासम्भवात् । अतो निरवयवमेव द्रव्यमवधिरिति मन्तव्यम् । एवं प्रमाणबलेनावगते सति तदतिरिक्त एव नीरूपादिमत्त्वानित्यत्वयोर्व्याप्तिरिति न प्रतिसाधनदोष इत्याशङ्कायामाहुः * नचेत्यादि * । स्यात् तदतिरिक्ते व्याप्तिर्यदि प्रमाणं बलवत् स्यात् । तदेव तु नास्ति । कुतः ? । अदर्शनात् । न हि परमाणुर्दृश्यते, येन भवदुक्तस्याकारणवत्त्वस्य हेतोः पक्षधर्मतावसीयेत । नच तस्य पक्षधर्मतायां परमाणुषु नित्यत्वानुमितिः सम्भवति । व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वादनुमितेः । ननु कार्यद्रव्यत्वसावयवत्वयोः समव्याप्त्या क्वचिन्मूलकारणरूपस्यावधेरवश्यं परामर्शणीयत्वादुक्तरीत्याऽवधित्वेन परमाणुसिद्धौ तस्याजन्यतायाश्च सिद्धौ कार्यलिङ्गकानुमानमेव तत्र प्रमाणमित्यदर्शनेऽप्यदोष इतिचेत्, तत्राहुः । * कार्येत्यादि * । यदि हि कार्यानुपपत्तिः स्यादेवं कल्पनाप्यनुमन्येत । सा तु नास्ति । तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, इदं सर्वं यदयमात्मा, तज्जलानित्यादिश्रुत्यैव तत्परिहारात् । कार्यवैजात्यादीनां बाधकानां न विलक्षणत्वाद्यधिकरणैः प्रागेव परिहाराच्च । अतः सत्प्रतिपक्षत्वान्न तदनुमानेन परमाणोस्तन्नित्यत्वस्य वा सिद्धिरित्यसङ्गतः परमाणुकारण-

उभयथापि च दोषात् ॥ १६ ॥

वाद इत्यर्थः । किञ्च । यदिदं नित्यस्य सामान्यलक्षणे सत्पदं तदप्यनर्थकम् । कारणावस्थातिरिक्तस्य प्रागभावस्य निरूपयितुमशक्यत्वेनाभ्युपगमैकशरणतया तद्व्यावृत्त्यर्थस्य तस्य व्यर्थत्वात् । किञ्च । सत्त्वमपि न सत्तायोगित्वम् । सामान्यादित्रयस्यासत्त्वप्रसङ्गात् । नच तेषां सत्तासामानाधिकरण्यमेव सत्त्वमिति युक्तम् । सत्तायां तदुभयाभावेन तस्या असत्त्वे पूर्वोक्तानां सर्वेषामेवासत्त्वप्रसङ्गात् । नच सदितिव्यवहारविषयत्वं सत्त्वमिति न कोऽपि दोष इत्यपि युक्तम् । घटाभावोऽस्तीत्यभिलापस्याभावेऽपि दर्शनेन प्रागभावव्यावर्तकस्य सत्पदस्यानर्थक्यप्रसङ्गात् । यत पुनर्नित्यत्वसाधकं सूत्रान्तरम्, अनित्य इति विशेषतः प्रतिषेधभाव इति । अर्थस्तु–विशेषस्य नित्यस्य प्रतिषेधस्तदा स्याद् यद्यनित्य इति प्रत्ययः शब्दप्रयोगश्च न स्यात् । नञ उत्तरपदार्थनिषेधकत्वात् । अतः प्रतिषेधसत्त्वात् कस्यचिन्नित्यस्यास्ति सिद्धिरिति । तदपि नित्यस्य कस्यापि साधनेनैव चरितार्थत्वान्न परमाणुनित्यतां साधयितुमलम् । यदपि, अविद्येति सूत्रान्तरं, तदर्थस्त्वेवं तैर्व्याख्यायते । परमाणुरनित्यो, मूर्तत्वाद्, रूपादिमत्त्वाद्, एवं 'षट्केन युगपद् योगात् परमाणोः षडंशतेति' दिङ्नागोक्तरीत्या षट्पार्श्ववत्त्वात् । किञ्च । परमाणोर्मध्ये यद्याकाशोऽस्ति तदा सच्छिद्रत्वेनैव सावयवत्वाद्, अव्याप्यवृत्तिसंयोगाश्रयत्वाद् घटादिवदिति । किञ्च । यत् सत् तत् क्षणिकं यथा घन इति नानानुमानसाध्या परमाण्वनित्यत्वसाधिका अनुमितिरविद्या भ्रमरूपा हेत्वाभासजन्यत्वात् । एतेषामाभासत्वं च क्वचिद् व्याप्यत्वासिद्ध्या, क्वचित् स्वरूपासिद्ध्येति समानतन्त्रेऽन्वेष्टव्यमिति । तन्न । मूर्तत्वस्य सत्त्वस्य च कथञ्चिद् व्याप्यत्वासिद्धत्वेऽपि षट्पार्श्ववत्त्वादीनां कथञ्चित् स्वरूपासिद्धत्वाभिमानेऽपि रूपादिमत्त्वस्य सद्धेतुताया उपपादितत्वात् तेनैव षट्पार्श्ववत्त्वादीनामपि दोषनिरासात् तज्जन्यानुमितेरविद्यात्वाभिमानस्यैवाविद्यात्वादिति ॥ १५ ॥

उभयथापि च दोषात् ॥ प्रकारान्तरेणापि परमाणुकारणवा-

परमाणूनां रूपादिमत्त्वेन तदभावे च दोषः । एकत्रानित्यत्वमन्यत्र कार्यरूपस्य निर्मूलत्वञ्च । हरिद्राचूर्णसम्बन्धे रूपान्तरस्य जननाद् विरोधोऽपिचकारार्थः ॥ १६ ॥

अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १७ ॥

सर्ववैदिकानामपरिग्रहाच्चात्यन्तं सर्वथा नापेक्ष्यते ॥ १७ ॥

समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ १८ ॥

दस्यासङ्गतिं व्युत्पादयतीत्याशयं स्फुटीकुर्वन्ति । * परमाणूनामित्यादि * । परमाणूनां हि न स्वरूपतो भेदः । सर्वेषामेव ह्रस्वपरिमण्डलाकारत्वोपगमात् । नापि, भौतिकत्वे सति नित्यो गतिमान् परमाणुरिति लक्षणात् तत्तद्भौतिकत्वाद् भेदः । भूतानां पाश्चात्त्यत्वेन भौतिकत्वस्य पूर्वमशक्यवचनत्वात् । सामुद्रो हि तरङ्ग इति न्यायात् । अतः परं गुणभेदाद् वक्तव्यः । तत्र क्रमेण चतुस्त्रिद्व्येकगुणत्वविचारे आप्यतैजसपरमाण्वोर्गन्धापत्तिः । प्रतिलोमक्रमे च वायवीयादिषु चतुस्त्रिद्व्येकगुणत्वापत्तिरित्युपदेशक्रममनादृत्य यथायोग्यं गुणा आदर्तव्याः । तथापि पूर्वोक्तव्याप्तेरनपायादनित्यत्वमनिवार्यम् । यदि च त्रसरेणुमारभ्यैव भूतानां रूपादिमत्त्वदर्शनात् तेषां रूपादिराहित्यमुच्यते, तदा, कारणगुणाः कार्यगुणानारभन्त इति नियमात् कार्यरूपादेर्निर्मूलत्वमित्युभयथापि दुष्टः परमाणुकारणवाद इत्यर्थः । चकारोऽनुक्तसमुच्चयार्थ इत्याहुः । * हरिद्रेत्यादि * । * विरोध इति * । रूपादीनां सजातीयारम्भकत्वानियमविरोधः । तथाचात्यन्तासङ्गतमिदं दर्शनमित्यर्थः ॥ १६ ॥

अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ व्याकुर्वन्ति । * सर्वेत्यादि * तथाचाचार्यस्य न तन्मतदूषणार्थमभिनिवेशः, किन्तु वैदिका मा भ्रश्यन्तामित्येतदर्थमेतदुक्तमित्यर्थः । एवं सप्तभिः सूत्रैर्वैशेषिकप्रतिपन्नः परमाणुकारणवादो निराकृतः ॥ १७ ॥ ३ ॥

अतः परमूनविंशतिभिः सूत्रैर्बाह्यसमयो निराक्रियते ॥

समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥ ननु तदग्रे कया सङ्ग-

अतः परं बाह्यमतनिराकरणम् ।

ते समुदायद्वयं जीवभोगार्थं संहन्यत इति मन्यन्ते । परमाणुसमूहः पृथिव्यादिभूतसमुदाय एकः । रूपादिस्कन्धसमुदायश्चापरः । रूपविज्ञानवेदनासंज्ञासंस्कारसंज्ञकाः पञ्चस्कन्धाः । त-

---

स्यैतन्मतनिराकरणमित्याकाङ्क्षायामाहुः । * अतः परमित्यादि * । वैशेषिको ह्यर्द्धवैनाशिकः । परमाण्वाकाशादिद्रव्याणामन्येषाञ्च पदार्थानां नित्यत्वाङ्गीकारेऽपि कार्यद्रव्याणां केषाञ्चिद् गुणानां च निरन्वयविनाशाङ्गीकारात् । निरन्वयध्वंसो नाम तप्तायःपतिताम्बुबिन्दोरिव निःशेषनाशः । सर्ववैनाशिकास्तु बाह्याः सर्वानित्यत्ववादिनः । तन्मते सर्वस्यैव निरन्वयध्वंसात् । तत्र निराकृतेऽर्द्धवैनाशिकेऽतियौक्तिकसर्ववैनाशिकनिराकरणाकाङ्क्षाऽवश्यं शुश्रूषूणामुदेतीत्यवसरसङ्गत्या तन्निराकरणमित्यर्थः । सूत्रं व्याकर्तुं पूर्वं तन्मतमनुवदन्ति । * त इत्यादि * । ते सौगताश्चतुर्विधाः । वैभाषिकः, सौत्रान्तिको, विज्ञानवादी, माध्यमिकश्चेति बुद्धशिष्याः । तत्राद्यः सर्वार्थान् प्रत्यक्षानुमानसिद्धान् सतः क्षणिकान् वदति । द्वितीयस्तु बाह्यान् सर्वान् अर्थान् क्षणिकान् सतो विज्ञानानुमेयानाह । तृतीयस्तु अर्थजन्यं विज्ञानमेव परमार्थम् । अर्थास्त्वसन्तः स्वाप्नकल्पा इत्याह । इतरस्तु सर्वशून्यत्वमेवाह । मतचतुष्टयेऽपि, भोक्ता वा प्रकाशिता वा कश्चिच्चेतनः स्थिर संहन्ता नाभ्युपेयते । यद्यपि प्रस्थानचतुष्टयप्रणेता बुद्ध एकस्तथापि शिष्यमतिभेदाच्चतुर्द्धा प्रणयनम् । तत्र ये हीनमतयस्ते सर्वास्तित्ववादिनस्ते तदाशयमनुरुद्ध्य शून्यतायामवतार्यन्ते । ये मध्यमास्ते तु विज्ञानमात्रास्तित्वमनुरुध्य शून्यतायामवतार्यन्ते । ये पुनः प्रकृष्टमतयस्तेभ्यस्तु साक्षादेव शून्यतात्त्वमुपदिश्यते । तदुक्तं बोधिचित्तविवरणे । 'देशना लोकनाथानां सत्त्वाशयवशानुगाः । भिद्यन्ते बहुधा लोके उपायैर्बहुभिः पुनः । गम्भीरोत्तानभेदेन क्वचिच्चोभयलक्षणा । भिन्नापि देशनाऽभिन्ना शून्यताद्वयलक्षणेति' वाचस्पतिमिश्रा ऊचुः । तत्र ये बाह्यार्थास्तित्ववादिनस्ते समुदायद्वयं जीवभोगार्थं संहन्यते सङ्घातभावं प्राप्नो-

द्वयसम्बन्धे जीवस्य संसारः। तदपगमे मोक्ष इति। तत्र उभयहेतुकेऽपि समुदाये जीवस्य तदभाप्तिः।

तीति मन्यन्ते। किं तत् समुदायद्वयमित्याकाङ्क्षायां परमाणुसमूहः पृथिव्यादिभूतसमुदाय एकः। तत्र रूपरसगन्धस्पर्शाश्चतुर्विधाः पार्थिवाः परमाणवः कठिनस्वभावाः पृथिवीरूपेण संहन्यन्ते। रूपरसस्पर्शा आप्याः परमाणवः स्नेहस्वभावाः सलिलात्मना। तथा रूपस्पर्शपरमाणव उष्णस्वभावास्तेजोरूपेण। तथा स्पर्शपरमाणवः प्रेरणस्वभावा वायुरूपेण। एवमेते चतुर्विधाः परमाणवः क्षणिका भूतरूपेण संहत्य पुनर्भौतिकसङ्घातहेतुत्वं प्रतिपद्यन्ते। एतदतिरिक्तन्तु कालाकाशात्मादि सर्वमवस्तु।

केचित्तु रूपादिचतुष्टयसङ्घातः पृथिवी। त्रितयसङ्घात आपः। उभयसङ्घातस्तेजः। शब्दस्पर्शसङ्घातो वायुः। न तु तदतिरिक्तं द्रव्यमस्तीत्याहुः।

क्षणिकत्वं तु बुद्धवचनात्। क्षणिकाः सर्वसंस्काराः संक्षिप्यन्त इति। उत्पत्तिमन्त इत्यर्थः। एवमयं भूतसमुदायो बाह्य एकः। द्वितीयश्चित्तचैत्तिकरूप आभ्यन्तरः समुदायः। स च रूपविज्ञानवेदनासंज्ञासंस्काराख्यस्कन्धपञ्चकसमुदायात्मकः। तत्र रूप्यन्त एभिरिति वा, रूप्यन्त इति वा व्युत्पत्त्या सविषयाणीन्द्रियाणि रूपस्कन्धः। केचित्तु शरीरं तमाहुः। तदा आभ्यन्तरपदस्याध्यात्ममित्यर्थः। अहमित्याकारं रूपादिविषयमिन्द्रियादिजन्यं ज्ञानं विज्ञानस्कन्धः। स एव क्षणिकविज्ञानसन्तानः, कर्ता भोक्ताहमित्यभिमानादात्मेत्युच्यते, न त्वेतदतिरिक्तः कश्चिन्नित्य आत्मास्तीति। केचित्तु यस्मिन् कर्मानुभववासनाः शेरते तद् आशयापरनामकमालयविज्ञानमेवात्मेत्याहुः। प्रियाप्रियानुभवविषयसंस्पर्शे सुखदुःखतद्रहितविशेषावस्था या चित्तस्य जायते सा वेदनास्कन्धः। कश्चित्तु यथा स्वस्तिमती गौरिति स्वस्तिमत्तया गौरुपलक्ष्यते, ध्वजेन गृहं दण्डेन पुरुष इत्युपलक्षणप्रत्ययो वेदनास्कन्ध इति व्याख्यायते। सविकल्पः प्रत्ययः संज्ञासंसर्गयोग्यः प्रतिभासो यथा डित्थः कुण्ड-

क्षणिकत्वात्सर्वक्षणिकत्वे जीवमात्रक्षणिकत्वे वा तदप्राप्तिः॥१८॥

ऽसौ गौरो ब्राह्मणो गच्छतीत्यादि, स संज्ञास्कन्धः । रागादयः क्लेशा, मदमानमात्सर्यादय उपक्लेशा, धर्माधर्मौ चेति संस्कारस्कन्धः । स्कन्धशब्दः समूहवाची । अयं स्कन्धपञ्चकरूप आध्यात्मिकत्वादाभ्यन्तरः समुदायः । एवं पुञ्जद्वयस्वीकारेण सकललोकयात्रानिर्वाहे सति नास्त्यवयवी, नाप्यात्मा नित्यः । किन्तु पुञ्जात्मके समुदाये बाह्याभ्यन्तरभेदेनात्मानात्मविभागोऽवयविस्थैकत्वादिभ्रमश्च भवति । अयं च समुदायो नेश्वरहेतुकः । तदनङ्गीकारात् । किन्तु पृथिव्यादिकं स्कन्धपञ्चकञ्चेत्युभयहेतुक इति । तदुभयसम्बन्धे निर्वातस्थदीपवत् पूर्वोक्तक्षणिकविज्ञानसन्तानात्मकस्य जीवस्य रूपवेदनासंज्ञासंस्कारस्कन्धात्मकः संस्कार आसंस्कारक्षयात् क्षणपरम्परयाऽवतिष्ठते । क्षीणे तु संस्कारस्कन्धे तैलादिक्षये प्रदीपवदेव निर्वाणमृच्छति । सेयमभावप्राप्तिरेव मोक्ष इति । तदिदं दूष्यते । तत्रैवमुभयहेतुकेऽपि समुदायेऽङ्गीक्रियमाणे जीवस्य तदप्राप्तिस्तद्वत्संसारस्यासिद्धिः । कुत इत्याकाङ्क्षायां पुञ्जात् पुञ्जोत्पत्तिसूचितं हेतुमाहुः । * क्षणिकत्वादिति * । बुद्धवचसा क्षणिकत्वाभ्युपगमात् । उक्तं विभजन्ते । * सर्वेत्यादि * । सर्वक्षणिकत्वे तेषां निर्व्यापारतया नश्वरतया च समुदायघटनानुपपत्त्या कथञ्चित् स्वभावादिना समुदायघटनाङ्गीकारे वा तत्तद्विधशरीराणां पर्यायेण घटनायाः परिमाणभेदादिभ्यानुपपत्त्या रूपस्कन्धसम्बन्धस्यासम्भवात् तन्मूलकस्य वेदनादिस्कन्धात्मकस्य संसारस्याप्राप्तिः । विज्ञानस्कन्धात्मकजीवमात्रक्षणिकत्वे तु तस्य नष्टत्वादेव संसाराद्यप्राप्तिः । तथाच कारणभूतस्य पुञ्जस्य क्षणिकत्वेन कार्योत्पत्तेरशक्यवचनत्वादसङ्गतं पुञ्जस्य कारणत्वमित्यर्थः ।

रामानुजाचार्यास्तु—परमाणुहेतुके भूतसमुदाये, भूतहेतुके शरीरेन्द्रियविषयसमुदाये चाऽभ्युपगम्यमानेऽपि जगदात्मकसमुदायानुपपत्तिः । परमाणूनां भूतानाञ्च क्षणिकत्वाभ्युपगमादिति व्याख्यायैतदेव व्युत्पादयामासुः ।

भास्कराचार्यास्तु—परमाण्वादीनामचेतनत्वात् क्षणिकत्वा-

उत्तरोत्पादे च पूर्वनिरोधात् ॥ २० ॥

उत्तरोत्पत्तिरपि न सम्भवति । उत्पन्नस्य खलूत्पादकत्वम् । अत उत्तरोत्पत्तिसमये पूर्वस्य नष्टत्वादुत्पत्तिक्षण एव स्थितिप्रलयकार्यकरणसर्वाङ्गीकारे विरोधादेकमपि न स्यात् ॥ २० ॥

रितिचेत् । न । कुतः ? । उत्पत्तिमात्रनिमित्तत्वात् । ये हि प्रत्ययास्त उत्पत्तिमात्रं प्रति निमित्तभूताः सदृशीं सन्ततिमुत्पाद्य नश्यन्ति। तथा सति विज्ञानसन्ततिरूपस्य जीवस्य पूर्वकालीनप्रियाप्रियसंस्पर्शाननुसन्धानात् कथं वेदनादिस्कन्धात्मकसंसारसिद्धिः । अनुसन्धानाभ्युपगमे च सन्तानिनः स्थिरत्वापत्तिः । सन्ततिरूपस्य जीवस्य क्षणिकत्वेन स्थैर्याभावाद्रूपादिस्कन्धसम्बन्धवियोगार्थं को वा यतेत । परमाणूनां बाह्यानामाभ्यन्तराणां च यः समूहस्तस्यापि स्थैर्याभावात् स्कन्धसमुदायानुपपत्तिश्च । अतः क्षणिकानामर्थानामुत्पत्तिमात्रनिमित्तत्वात् सन्तत्यङ्गीकारेऽपि संसारापवर्गाव्यवस्थानादसङ्गतं पुञ्जस्य कारणत्वमित्यर्थः ॥ १९ ॥

उत्तरोत्पादे च पूर्वनिरोधात् ॥ ननु यथा दीपज्वाला उत्पद्यमानैव संहन्यते विपर्यासं भवति च तथा पदार्थान्तरमपि संहन्यते विपर्यासं भविष्यति चेति शङ्कायामुत्पत्तिमपि दूषयति- । * उत्तरेत्यादि * । अत्रापि तदनुवृत्तिः । सूत्रस्यार्थं व्युत्पादयन्ति । * उत्तरेत्यादि * उत्पद्यमानस्य संहन्यमानस्य उत्तरोत्पत्तिः।कथमिति विचार्यम् । सा तु न सम्भवति । * खलुहेतौ यतो हेतोर्लोके उत्पन्नस्य जनकोत्तरं स्थितस्योत्पादकत्वम् । स्थितिक्षणस्तु न त्वन्मते । नाशक्षणे तूत्पादकत्वं, न क्वापि दृष्टम् । नाशश्च त्वन्मते अजन्माऽन्यं प्रसरत्येव । अत उत्तरोत्पत्तिसमये पूर्वस्य नष्टत्वादुत्तरानुत्पत्त्या, उत्पत्तिक्षण एव स्वोत्पत्तिस्थितिस्वकारणप्रलयस्वकार्यकरणादिसर्वाङ्गीकारे परस्परविरोधात् कार्यकारणभावविरोधाच्च एकमपि न स्यादित्येवमप्यनुपपत्त्या च समुदायस्य संसारादेश्चाप्राप्तिरित्यसङ्गतं पुञ्जस्य कारणत्वमित्यर्थः । शङ्कराचार्यास्तु । यद्यपि भोक्ता प्रशासिता वा कश्चिच्चेतनः स्थिरः संहन्ता क्षणिकवादिमते

मास्ति, तथाप्यविद्यासंस्कारविज्ञाननामरूपषडायतनस्पर्शवेदनातृष्णोपादानभवजातिजरामरणशोकपरिदेवनादुःखदुर्मनस्त्वानामितरेतरकारणत्वेन चक्रवत् परिवृत्तेरुपपद्यते लोकयात्रा । तस्यां चोपपद्यमानायां न किञ्चिदपरमपेक्ष्यते । एते चाविद्यादयो भामत्यामेवं विवृताः । तथाहि । बुद्धेन सङ्क्षेपतः, प्रतीत्यसमुत्पादलक्षणमुक्तम् । इदं प्रत्ययफलमिति । इदं परिदृश्यमानं प्रत्ययस्य वक्ष्यमाणलक्षणहेतुसमवायस्य फलं कार्यमित्यर्थः । उत्पादाद्वा तथागतानामनुत्पादाद्वा स्थितैवैषां धर्माणां धर्मता, धर्मस्थितिता धर्मनियामकता । प्रतीत्यसमुत्पादानुलोमतेति । अथ पुनरयं प्रतीत्यसमुत्पादो द्वाभ्यां भवति, हेतूपनिबन्धतः, प्रत्ययोपनिबन्धतश्च । स पुनर्द्विधा । बाह्य आभ्यन्तरश्च । तत्र बाह्यस्य, प्रतीत्यसमुत्पादस्यायं हेतूपनिबन्धः । यदिदं बीजादङ्कुरोऽङ्कुरात् पत्रं पत्रात् काण्डं काण्डान्नालो नालाद् गर्भो गर्भाच्छूकं शूकात् पुष्पं पुष्पात् फलमिति । असति बीजेऽङ्कुरो न भवति । एवमग्रेऽपि फलपर्यन्तं द्रष्टव्यम् । सति तु बीजेऽङ्कुरो भवति । एवमग्रेऽपि फलपर्यन्तम् । तत्र बीजस्य नैवं ज्ञानं भवति यदहमङ्कुरं निर्वर्तयामीति । तथा अङ्कुरस्याप्येवं ज्ञानं न भवति यदहं बीजेन निर्वर्तित इति । एवं सर्वत्र । तस्मादसत्यपि चैतन्ये असत्यपि चान्यस्मिन्नधिष्ठातरि बीजादीनां कार्यकारणभावनियमो दृश्यते इत्युक्तहेतूपनिबन्धः । अथ प्रत्ययोपनिबन्धः । प्रतीत्यसमुत्पादस्योच्यते । तत्र प्रत्ययो नाम हेतूनां समवायः । हेतुं हेतुं प्रत्ययन्ते हेत्वन्तराणीति तेषामयनानां भावः प्रत्ययः समवाय इति यावत् । ते च हेतवः पृथिव्यादयः षड्धातवः । षण्णां धातूनां समवायात् बीजहेतुरङ्कुरो जायते । तत्र पृथिवीधातुर्बीजस्य संग्रहकृत्यं करोति येनाङ्कुरः कठिनो भवति । अब्धातुर्बीजं स्नेहयति । तेजोधातुर्बीजं परिपाचयति । वायुधातुर्बीजमभिनिर्हरति यतोऽङ्कुरो बीजान्निर्गच्छति । आकाशधातुर्बीजस्यानावरणकृत्यं करोति । ऋतुधातुरपि बीजस्य परिणामतां करोति । तदेतेषामविकलानां धातूनां समवाये बीजे रोहत्यङ्कुरो जायते, नान्यथा । तत्र पृथिवीधातोर्नैवं ज्ञानं भवत्यहं बीजस्य संग्रहकृत्यं करोमीति । एवं धात्वन्तरस्यापि । तथाङ्कुरस्यापि नैवं ज्ञानं भवत्यहमेभिः प्रत्ययैर्निर्वर्तित इति । यथायं बाह्यप्रतीत्यसमुत्पादो द्वाभ्यां कारणाभ्यां भवति तथैवाध्या-

पुनर्ममेत्यध्यावसानं तृष्णा। तत उपादानं वाक्कायचेष्टा भवति। ततो भवो, धर्माधर्मौ। भवत्यस्माज्जन्मेति व्युत्पत्तेः। तद्धेतुकः स्कन्धप्रादुर्भावो जातिः। जन्महेतुका उत्तरे जरामरणादयः। तेषु जरा नामजातानां स्कन्धानां परिपाकः। स्कन्धानां नाशो मरणम्। म्रियमाणस्य मूढस्य साभिलाषस्य पुत्रकलत्रादावन्तर्दाहः शोकः। तदुत्थं, हा मातर्हा पुत्रेत्यादिप्रलपनं परिदेवना। पञ्चविज्ञानकायसंयुक्तमसाध्वनुभवनं दुःखं मानसं च दुःखं दुर्मनस्त्वमिति। एवञ्जातीयकाश्चोपायास्ते उपक्लेशा गृह्यन्ते। तेऽमी परस्परहेतुकाश्चाविद्यादयोऽविद्याहेतुकाश्च जन्मादयो घटीयन्त्रवदनिशं वावर्त्यमानाः सन्तीति भामत्युक्तं विवरणम्। तथाचायं सूत्रार्थः। एतेषामविद्यादीनाम् इतरेतरप्रत्ययत्वात् परस्परहेतुसमवायरूपत्वादेतैरविद्यादिभिराक्षिप्तः सङ्घात इति सङ्घातामासिरूपदूषणस्य न संसर्ग इतिचेत्। न। कुतः। उत्पत्तिमात्रनिमित्तत्वात्। यत् खलु हेतूपनिबद्धं कार्यं तदन्यानपेक्षं हेतुमात्राधीनोत्पादत्वात् तदुपपद्यतां नाम। यः पुनः पञ्चस्कन्धसमुदायः स तु प्रत्ययोपनिबद्धो न हेतुमात्राधीनोत्पत्तिरपि तु नानाहेतुसमवधानजन्मा। न च चेतनमन्तरेणान्यैः कारणानां सन्निधापयिताऽस्तीति पूर्वसूत्र एवोक्तम्। बीजादङ्कुरोत्पत्तेरपि प्रत्ययोपनिबद्धाया विवादाध्यासितत्वेन पक्षकुक्षिनिक्षिप्तत्वात्। पक्षेण च व्यभिचारोद्भावनायामतिप्रसङ्गेन सर्वानुमानोच्छेदप्रसङ्गात्। विवादाध्यासितत्वं तु कुसूलस्थबीजादङ्कुरानुत्पत्तेर्ज्ञेयम्। वस्तुतस्तु तत्रापि चेतनप्रयुक्तिर्मृग्यैव। मेघाभावे चाप्यभावे च केवलतुधातोरप्रयोजकत्वात्। नदीमातृकस्थले तु स्फुटैव चेतनप्रयुक्तिरित्यादि द्रष्टव्यम्। अतः स्थिरस्य चेतनस्य संहन्तुरनुपगमे सर्वथा सङ्घाताप्राप्तिः। किञ्चाविद्यादिभिराक्षिप्तः सङ्घात इति यदुच्यते, तत्र कोऽर्थः? किं सङ्घातमन्तरेणात्मानमलभमाना अविद्यादयः सङ्घातमपेक्षन्त इति वा? अविद्यादय एव सङ्घातस्य निमित्तमिति वा? अनादौ संसारे सङ्घात एव सन्तत्यानुवर्त्तत इति वा?। तत्र नाद्यः। एवं सङ्घातापेक्षकत्वेऽपि संघातनिमित्ताकाङ्क्षानुपशमेन तत्र निमित्तान्तरस्यान्वेषणे सन्निधारयितुर्वक्तुमशक्यत्वेन सङ्घातानुपपत्तितादवस्थ्यात्। न द्वितीयः। तमेवाश्रित्यात्मानं लभमानानां तन्निमित्त अन्योन्याश्रयापत्तेः। तृतीये तु सङ्घातः सङ्घाता-

न्तरं किं स्वसदृशमेव नियमेनोत्पादयत्युतानियमेन सदृशं विसदृशं वेति विचार्यम् । तत्र नाद्यः । मनुष्यपुद्गलस्य देवतिर्यग्योनिनारकप्राप्त्यभावापत्तेः । न द्वितीयः । मनुष्यपुद्गलस्य कदाचित् क्षणेन हस्तिमनुष्यदेवमर्कटादिभावापत्तेः । तस्मादुभयमप्यभ्युपगमविरुद्धम् । किञ्च । यद्भोगार्थः सङ्घातः स तु क्षणिकवादिमते स्थिरो नास्ति । तथा सति भोगो भोगार्थ एव मोक्षो मोक्षार्थ एवेति नान्येन भोगार्थिना मुमुक्षुणा वा भवितव्यम् । अथान्येन चेत् प्रार्थ्यते तदा तेन भोगमोक्षकालावस्थायिना भवितव्यमिति क्षणिकत्वाभ्युपगमविरोध इत्यविद्यादीनामितरेतरोत्पत्तिनिमित्तत्वेऽपि न सङ्घातसिद्धिरिति ।

भास्कराचार्या रामानुजाचार्याश्चास्य सूत्रस्य पाठान्तरमाहुः । इतरेतरप्रत्ययत्वादुपपन्नमितिचेन्न सङ्घातभावानिमित्तत्वादिति । अर्थः तूक्तरीत्यैवाविद्यादीन् प्रत्ययत्वेनोक्त्वा तेषां चक्रवत् परिवृत्त्या सङ्घातभावादिकमुपपन्नमितिचेन्नैतदुपपद्यते । एषां पृथिव्यादीनां सङ्घातभावं प्रत्यनिमित्तत्वात् । न खलु क्षणिकेषु स्थिरत्वादिबुद्धिरूपाया अविद्यायास्तदुत्पन्नानां रागादीनां वा क्षणिकार्थान्तरभूतपृथिव्यादिभूतभौतिकसङ्घातहेतुतोपपद्यते । न हि शुक्तिकारजतबुद्धिः शुक्त्याद्यर्थसंहतिहेतुरिति क्वचिद् दृश्यते । किञ्च । यस्य क्षणिके स्थिरबुद्धिः स तदैव नष्ट इति कस्य रागादयः कस्य वा संस्कारादयः कल्पयितुं शक्यन्ते । प्रमाणाभावादित्येवमाहुः ।

उत्तरोत्पादसूत्रस्य तु भामत्यामिदमवतारणमुक्तम् । हेतूपनिबन्धनं प्रतीत्यसमुत्पादमुपगम्य प्रत्ययोपनिबन्धनः प्रतीत्यसमुत्पादः पूर्वसूत्रे दूषितः । सम्प्रति तु हेतूपनिबन्धनमपि तं दूषयतीति । व्याख्यानं तु क्षणभङ्गवादिनोऽयमभ्युपगमः—उत्तरक्षण उत्पद्यमाने पूर्वः क्षणो निरुध्यत इति । अत्र क्षणशब्देन तत्तत्क्षणोत्पन्नं वस्तूच्यते । तथा सति पूर्वोत्तरयोर्हेतुफलभावो विरुध्यते । निरुध्यमानस्य निरुद्धस्य वा पूर्वक्षणस्योत्तरक्षणहेतुत्वानुपपत्तेः । अकारणं विनाशमभ्युपगच्छतां वैनाशिकानां मते विनाशकारणसामग्रीसान्निध्यरूपस्य निरुध्यमानत्वस्यानङ्गीकारेणाभावग्रस्तत्वरूपस्यैव निरुध्यमानत्वस्य सिद्धेः । अथ भावभूतः परिनिष्पन्नावस्थः पूर्वक्षण उत्तरक्षणस्य हेतुरित्युच्यते । तदसङ्गतम् । तस्य पुनर्व्यापारकल्पनायां क्षणान्तर-

सम्बन्धेन क्षणिकत्वप्रतिज्ञाभङ्गप्रसङ्गात् । अथाभाव एव व्यापारः १ तदसत् । हेतुस्वभावानुपरक्तस्य फलोत्पादकत्वासम्भवात् । स्वभावोपरागाभ्युपगमे च हेतुस्वभावस्य फलकालावस्थायित्वप्राप्तेः क्षणभङ्गत्यागप्रसङ्गात् । स्वभावोपरागं विनैव हेतुफलभावाभ्युपगमे च सर्वतः सर्वत्र सर्वदा सर्वोत्पत्तिप्रसङ्गात् । किञ्चोत्पादनिरोधौ किं वस्तुनः स्वरूपमुतावस्थान्तरं वस्त्वन्तरमेव वा । आद्ये वस्तुशब्द उत्पादनिरोधशब्दौ च पर्यायाः स्युः । तथा सति व्यवहाराद्यप्रसङ्गः। न द्वितीयः । तथा सति वस्तुन आद्यन्तमध्यक्षणत्रयसम्बन्धप्राप्त्या क्षणिकत्वत्यागप्रसङ्गात् । न तृतीयः । तथा सत्यश्वमहिषवत् परस्परसंसर्गराहित्याद् वस्तुनः शाश्वतिकत्वप्रसङ्गात् । यदि च वस्तुनो दर्शनादर्शने उत्पादनिरोधौ तदापि द्रष्टृधर्मत्वात् तौ न वस्तुधर्माविति वस्तुनः शाश्वतिकत्वप्रसङ्गं इत्यसङ्गतं सौगतं दर्शनमित्याहुः ।

भास्कराचार्यास्तु—अनुत्पन्नस्य शशविषाणतुल्यत्वादुत्पन्नविनष्टस्य चाभावग्रस्तत्वान्न हेतुत्वम् । अथ पूर्वक्षणविनाश उत्तरक्षणोत्पत्तिश्च युगपद्भवेतां तुलान्तयोर्नामोन्नामवदिति । तदसत् । तुलाया मध्ये सूत्रधारणादन्तयोश्च युगपदुपस्थितयोरेकस्य गुरुत्वान्नामस्तद्धेतुश्चोन्नाम इति युक्तम् । अत्र तूत्तरोत्पत्तिकाले पूर्वस्थित्यनुपगमान्न हेतुत्वसम्भवः । स्थित्युपगमे च क्षणिकत्वहानिः । किञ्च कारणधर्माननुविधाने कार्यकारणभावकल्पनायामतिप्रसङ्गः । यतो मृदन्विताः शरावादयः सुवर्णान्विताश्च कुण्डलादयो दृश्यन्ते । किञ्च आकारसमर्पणेऽपि न सामर्थ्यं त्वन्मते, वस्तुनः क्षणिकत्वात् । तस्मात्स्थिरपक्ष एव कार्यकारणव्यवस्था युज्यते, न क्षणिकपक्षे । प्रत्यक्षप्रत्यभिज्ञानाच्च कुम्भादीनां नित्यत्वमिति । ननु नित्यपक्षेऽपि कार्यकारणभावानुपपत्तिः । क्रमयौगपद्याभ्यामर्थक्रियाविरोधात् । किं कुसूलस्थो व्रीहिरङ्कुरजननस्वभावोऽथातत्स्वभावः। यद्यन्त्यस्तदा न कदाचिदपि जनयेत्। यद्याद्यस्तदा तदानीमेवोत्पादयन् यानि कर्माणि व्रीहिणा कर्त्तव्यानि तानि युगपदेव कुर्यात्, न तु सामग्रीयदेवाङ्कुरं जनयेत् । अतत्स्वभावत्वे तत्स्वभावत्वे वा सामग्र्या अकिञ्चित्करत्वात् । न च प्रत्यभिज्ञानादपि नित्यत्वम् । दीपज्वालादिषु व्यभिचारात् । यदि स नित्यो भावः स्याद् विनाशं न प्राप्नुयात् । अथ मुद्र-

दादिना विनाशः क्रियत इति चेत्। तदयुक्तम्। विनाशो यः क्रियते स द्रव्यव्यतिरिक्तो वा तदव्यतिरिक्तो वा। आद्ये घटस्य न किमपि स्यात्। यथा पटे कृते। द्वितीये घटस्वरूपमेव विनाशः। स्वरूपं तु कुलालेन कृतमेवेति मुद्गरः किमपरं कुर्यात्। अथ घटसम्बन्धी विनाशः क्रियत इति कः सम्बन्धः। किं तादात्म्यलक्षण उत तदुत्पत्तिलक्षणः। द्वितीयश्चेद्, घटस्य न किञ्चित्। यथा पावकेन्धनाभ्यां धूमे उत्पादिते वह्नेर्न किञ्चित्। तथा घटमुद्गराभ्यां विनाशे उत्पादिते घटस्यापि। तादात्म्यपक्षेऽपि तादात्म्यस्य तात्स्वभाव्यत्वात् तस्य च कुलालेन कृतत्वाद् व्यर्थो मुद्गरः स्यात्। अतः स्वाभाविको विनाश एषव्य इति। अत्रोच्यते। योऽयं विकल्पः कृतः स तव सिद्धान्तं बाधते। सदृशसन्तानोत्पत्तिप्रतिनिरोधात्। योऽयमन्त्यो घटक्षणोऽभिमतो यतः कपालोत्पत्तिरिष्यते, स सदृशसन्तानजननस्वभावो घटक्षणत्वादतीतानन्तरघटक्षणवदित्यनुमानात्। यदि चासौ विसदृशसन्तानजननस्वभाव एवाभ्युपेयेत, तदा पूर्वक्षणाः विसदृशसन्तानजननस्वभावाः। घटक्षणत्वादन्त्यक्षणवदित्यनुमानात् कुम्भकारादारभ्य कपालपङ्क्तिरेव स्यात्। एवं सति मुद्गरेण घटस्य सदृशसन्तानजननस्वभावता नाश्यते विसदृशसन्तानजननस्वभावता चोत्पाद्यत इत्यवश्यमभ्युपेतव्यम्। अन्यथा कपालोत्पत्त्यसम्भवात्। ततश्च भवता सहेतुकं विनाशमभ्युपगच्छता विनाशस्य स्वाभाविकत्वविकल्पः परित्यक्तः।

यदि विकल्पोऽङ्गीक्रियते विसदृशसन्तानस्यकव्य इति सिद्धान्तिर्दृष्टविरोधश्च। तत्र यथा तव सदृशसन्तानजननस्वभावविनाशो मुद्गरेण क्रियते तथा ममापि घटविनाश एव क्रियते इति स्थितः सहेतुको विनाश इति। प्रत्यभिज्ञानाच्च कालान्तरस्थायित्वम्। ज्वालादिष्वपि सामान्यं समाश्रित्य प्रत्यभिज्ञा। वृद्धिह्रासदर्शनाद् व्यक्तीनामनित्यतैव। तथापि न क्षणिकत्वं, बाधाभावात्। क्षणिकत्वं च न प्रत्यक्षम्। प्रथमोत्पत्तौ निर्विकल्पकज्ञाने विशेषाऽपरामर्षात्। यच्चोक्तं क्रमयौगपद्याभ्यामर्थक्रियाविरोध इति। स तु तवापि समानः। योऽसावन्त्यक्षणो यस्मादङ्कुरोत्पत्तिरिष्यते, सोऽप्यङ्कुरजननस्वभावो न भवति, बीजक्षणत्वादनन्तरातीतबीजक्षणवत्। असमानसन्तानजननस्वभावत्वे पूर्वक्षणानामपि तथात्वप्रसङ्गः। अथ सह-

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ २१ ॥

एका क्षणिकत्वप्रतिज्ञा । अपरा चतुर्विधान् हेतून् प्रतीत्य चित्तचैत्ता उत्पद्यन्त इति वस्तुतः क्षणान्तरसम्बन्धे प्रथमप्रतिज्ञा नश्यति ।

कारिवशादेवं भावः, स त्वस्माकमप्यविशिष्ट इति । किञ्च । विनाशोत्पादौ भावाव्यतिरिक्तौ न वा । अन्त्ये भावस्योत्पत्तिस्थितिनाशक्षणत्रयसंसर्गप्रसङ्गः । आद्ये उत्पत्तिनाशयोरभावो नित्यः स्यात् । किञ्च । विनाशो नामाभावः । स किं भावस्य पूर्वभावी वा ? सहभावी वा ? पश्चाद्भावी वा ? । आद्ये भावोत्पत्तिरेव न स्यात् । द्वितीयेऽप्यविरोधाद्भावस्य शाश्वतिकत्वप्रसङ्गः । तृतीये तु तस्यापि सहेतुकत्वापत्तेः प्राप्नोतीति निरयत्वप्रतिज्ञाभङ्ग इत्याहुः ।

रामानुजाचार्यास्तु—क्षणिकत्वपक्षे जगदुत्पत्तिर्न सङ्गच्छते । पूर्वक्षणस्य विनष्टत्वेन तस्योत्तरक्षणं प्रति हेतुत्वानुपपत्तेः । अभावस्य हेतुत्वे सर्वत्र सर्वदा सर्वोत्पत्तिप्रसङ्गात् । अथ पूर्वक्षणवर्तित्वमेव हेतुत्वं, तर्हि कश्चिदेव घटक्षणस्तदुत्तरभाविनां सर्वेषां गोमहिषादीनामन्यदेशवर्तिनामपि हेतुः स्यात् । अथैकजातीयस्यैव पूर्वक्षणवर्तिनो हेतुत्वं, तदापि सर्वदेशवर्तिनामुत्तरक्षणभाविनां घटानां स एवैको हेतुः स्यात् । अथैकस्यैक एव हेतुस्तदापि कः कस्येति न ज्ञायते । अथ यो यस्मिन् देशे घटक्षणे स्थितः स तद्देशीयस्यैवोत्तरक्षणस्य हेतुः । तर्हि देशस्य स्थिरत्वापत्त्या सर्वक्षणिकत्वप्रतिज्ञाहानिः । किञ्च । चक्षुरादिसंप्रयुक्तस्यार्थस्य ज्ञानोत्पत्तिकाले अनवस्थितत्वान्न कस्यचिदर्थस्य ज्ञानविषयत्वं स्यादित्याहुः । भाष्यान्तरे तु न किञ्चिदितोऽधिकम् । एतानि तु दूषणानि सूत्रेष्वेवाग्रे प्रसिध्यन्तीत्याचार्यैर्भाष्य उपेक्षितानि ॥ २० ॥

असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥

पूर्वसूत्रैः क्षणभङ्गवादाभिमता पुञ्जस्य कारणता निरस्ता । अतः परम् असत्येव हेतौ फलोत्पत्तिरिति तदभ्युपगतमाकस्मिकपक्षं दूषयति । असतीत्यादि * । तत्र कस्याः प्रतिज्ञाया उपरोध इत्याकाङ्क्षायां तां स्फुटीकर्तुमाहुः । * एकेत्यादि * एका स्फुटा ।

असति द्वितीया । द्वितीया चेन्नाङ्गीक्रियते तदा प्रतिबन्धाभावात् सर्वं सर्वत्र एकदैवोत्पद्येत ॥ २१ ॥

प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥ २२ ॥

अपिच । वैनाशिकाः कल्पयन्ति । बुद्धिबोध्यत्रयादन्यत् संस्कृतं क्षणिकं चेति । त्रयं पुनर्निरोधद्वयमाकाशञ्च । तत्रेदानीं निरोधद्वयाङ्गीकारं दूषयति ।

एतस्यामेवाभावस्य कारणताऽभ्युपगमः । अपरा त्वेवम् । आलम्बनप्रत्ययः, समनन्तरप्रत्ययोऽधिपतिप्रत्ययः, सहकारिप्रत्ययश्चेति चतुर्विधान् हेतून् प्राप्य चित्तं विज्ञानस्कन्धात्मकं, चैत्ता वेदनास्कन्धात्मका उत्पद्यन्ते । तत्रालम्बनप्रत्ययो नाम विषयः । तेन चित्तस्य नीलाद्याकारता । समनन्तरप्रत्ययः पूर्वविज्ञानं, तेन बोधरूपता । अधिपतिप्रत्यय इन्द्रियं तेन रूपादिग्रहणप्रतिनियमः । सहकारिप्रत्यय आलोकादिः । तेन स्पष्टार्थता । एवं चतुर्विधैर्हेतुभिर्नीलाद्याकारकविज्ञानात्मकं चित्तमुत्पद्यते । एवं चित्ताभिन्नहेतुजानां सुखादीनां चैत्तानामेत एव चत्वारो हेतव इति द्वितीया प्रतिज्ञा । एतस्या अङ्गीकारे हेतुभूतस्य वस्तुनो द्वितीयक्षणस्थित्या क्षणान्तरसम्बन्धे क्षणिकत्वप्रतिज्ञा नश्यति । इदमत्र प्रसङ्गादुक्तम् । प्रस्तुतमाहुः * असतीत्यादि * । यदि चासत्येव हेतावभावादेव फलोत्पत्तिरिष्यते तदा द्वितीया चतुर्विधान् हेतून् प्रतीत्येति प्रतिज्ञा नश्यति।तदिदमुक्तम् असति प्रतिज्ञोपरोध * इति।यदि च क्षणिकत्वं स्थिरमेवेति द्वितीया नाङ्गीक्रियते, तदा हेत्वभावस्य सर्वत्र सुलभत्वेन प्रतिबन्धाभावात् सर्वं सर्वत्र उत्पद्येत, एकदैव चोत्पद्येतेति । तदिदमुक्तं, यौगपद्यमन्यथेति * । तथाचोभयथाप्यसङ्गतं सौगतं मतमित्यर्थः ॥ २१ ॥

प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥

एवं चतु सूत्र्या तदुक्तमुत्पत्तिप्रकारं दूषयित्वा तदुक्तं नाशप्रकारं दूषयति । प्रतीत्यादि * । तद् व्याकर्तुं पूर्वं तेषां मतमनुवदन्ति । * अपिचेत्यादि * । वैनाशिकाः सर्वानित्यत्ववादिनः सौगताः कल्पयन्ति बुद्धिबोध्यत्रयादन्यद् भिन्नं यत् तत् संस्कृतं पूर्वपू-

प्रतिसंख्यानिरोधो नाम भावानां बुद्धिपूर्वको विनाशः । विपरीतोऽप्रतिसंख्यानिरोधः । त्रयमपि निरुपाख्यम् । निरोधद्वयमपि न प्राप्नोति । सन्ततेरविच्छेदात् । पदार्थानां च नाशकसम्बन्धाभावात् प्रतिबन्धसम्बन्धाभावः । आद्यो निरोधः पदार्थविषयको व्यर्थः । द्वितीयः क्षणिकाङ्गीकारेणैव सिद्धत्वान्नाङ्गीकर्तव्यः ॥ २२ ॥

वैविज्ञानजैः संस्कारैरालयत्वेन व्यवहारयोग्यम् । यच्च क्षणिकं तदपि । एवं पञ्चपदार्थाः । त्रयं त्वत्र स्फुटम् । आकाशस्वरूपं तद्दूषणसूत्रे वाच्यम् । तत्र क्षणिकं संस्कृतं च पूर्वसूत्रेषु दूषितम् । आकाशं चाग्रे दूषणीयमितीदानीं निरोधद्वयाङ्गीकारं दूषयति । तयोः स्वरूपमाहुः । * प्रतिसंख्यानिरोध इत्यादि * । प्रतिकूला संख्या प्रतिसंख्या सन्तमिममसन्तं करोमीत्याकारकतया भावप्रतीपा या बुद्धिः सा प्रतिसंख्या । तत्पूर्वको विनाशः प्रतिसंख्यानिरोधः । विपरीतस्तादृशबुद्धिं विनापि जायमानोऽप्रतिसंख्यानिरोध इति वाचस्पतिमिश्राः । तदप्याप्युक्तम् ।

सहेतुकः स्थूलो विनाशः पूर्वः, सूक्ष्मः स्वाभाविको द्वितीय इति भास्कराचार्याः ।

मुद्गराभिघाताद्यनन्तरभावितयोपलब्धियोगी सदृशसन्तानावसानरूपः स्थूलो यो विसदृशसन्तानः स आद्यः । प्रतिक्षणभावी चोपलब्ध्यनर्हः सूक्ष्मश्च यो निरन्वयविनाशः स द्वितीय इति रामानुजाचार्याः । * निरुपाख्यमिति * अनिर्वाच्यम्, अवस्त्वित्ति यावत् । दूषणं व्युत्पादयन्ति * निरोधेत्यादि * । कथं सन्तत्यविच्छेद इत्याकाङ्क्षायां विभजन्ते । * पदार्थानामित्यादि * तन्मते पदार्थाः सर्वे क्षणिकाः सदृशसन्तानजननस्वभावाः । क्षणिकानां च नाशकसम्बन्धो न पूर्वं दृष्ट इत्यन्तानामपि पदार्थानां नाशकसम्बन्धाभावात् पूर्ववदेव सन्ततिप्रतिबन्धाभाव इत्यविच्छेद इत्यर्थः । नच यदा प्रतिसंख्यासम्बन्धस्तदा प्रतिभङ्गस्स्यात इति युक्तम् । तन्मते विज्ञानमात्रात्मकस्य जीवस्य क्षीणे संस्कारे तैलक्षये प्रदीपस्येव निर्वाणना-

उभयथा च दोषात् ॥ २३ ॥

प्रतिसंख्यानिरोधान्तर्गताविद्याविनाशे मोक्ष इति क्षणिकवादिनो मिथ्यावादिनश्च मन्यन्ते । अविद्यायाः सपरिकराया निर्हेतुकविनाशे शास्त्रवैफल्यम् । अविद्यातत्कार्यातिरिक्तस्याभावान्न

ऽभावमात्रिमोक्षः । संस्कारक्षयश्चार्यचतुष्टयाभ्यासजन्यया प्रतिसंख्यया वाच्यः । तत्राभ्यासस्य पौनःपुन्यरूपत्वेन स्थिरधर्मतया क्षणिके जीवे वक्तुमशक्यत्वेन तज्जन्यप्रतिसंख्यायाः सुतरां तथात्वात् । अतः सन्ततेरविच्छेद एवेत्याद्यनिरोधो विज्ञानपदार्थविषयको व्यर्थः । तथा सति पदार्थान्तरविषयकोऽपि तथा । नच द्वितीयो युक्त इति शङ्क्यम् । यतो द्वितीयः क्षणिकाङ्गीकारेणैव साधनयोगशून्यतायां सन्तत्यविच्छेदस्य सिद्धत्वादाङ्गीकर्त्तव्यः * । अर्हे कृत्यतृचश्चेत्यर्हे तव्य. । नाङ्गीकर्त्तुं योग्यः । तथाच निरोधद्वयस्याप्ययुक्तत्वान्नाशविचारोऽप्यसङ्गतमेव सौगतं दर्शनमित्यर्थः ।

भास्कराचार्यास्तु-तौ सन्तानगोचरौ ? सन्तानिगोचरौ वा? । नाद्यगोचरौ । निरोधस्यावस्तुत्वाभ्युपगमान्नित्यत्वापत्त्युगमाच्च । नापि सन्तानिगोचरौ । सन्तानिनां घटादीनां प्रत्यभिज्ञानात् । त्वत्पक्षे विनाशस्याभावाव्यतिरेकान्न हेतुनापि नाशः सम्भवति । यन्मते भावव्यतिरिक्तो विनाशस्तन्मते सहेतुकः । अर्य्यसत्यचतुष्टयाभ्यासान्मुक्तिः । अर्य्यसत्यचतुष्टयं तु समुदायसत्यं, निरोधसत्यं, दुःखसत्यं, मार्गसत्यं चेति । सर्वमुत्पत्तिमदस्तीति यन्निर्णयज्ञानं तत् समुदायसत्यम् । सर्वं क्षणिकमिति निरोधसत्यम् । सर्वं तु खात्मकमिति दुःखसत्यम् । सर्वं शून्यं सर्वं निरात्मकमिति मार्गसत्यमित्येवं भावयतो रागादिवृत्त्यनुपगम्यमानायां निर्हेतुको विनाश इति प्रतिज्ञा हीयेत । तस्मादसङ्गतं सौगतं मतमित्याहुः ॥ २२ ॥

उभयथा च दोषात् ॥ एवं पूर्वसूत्रे कार्यविचारेण निरोधद्वयं दूषयित्वात्र स्वरूपविचारेण दूषयतीत्याशयेन सूत्रमुपन्यस्य व्याकुर्वन्ति * प्रतिसंख्येत्यादि * । उक्तनिरोधैकदेशभूतेऽविद्याविनाशे मोक्षस्तद्दर्शनोक्तरीतिको भवतीति, क्षणिकवादिनो, वैभाषिकाः, सौत्रान्तिका, मिथ्या-

सहेतुकोऽपि । न हि वन्ध्यापुत्रेण रज्जुसर्पो नाश्यते । अत उभयथापि दोषः ॥ २३ ॥

आकाशे चाविशेषात् ॥ २४ ॥

यच्चोक्तमाकाशमप्यावरणाभावो निरुपाख्यमिति । तन्न आकाशेऽपि सर्वपदार्थवद् वस्तुत्वव्यवहारस्याविशेषात् ॥ २४ ॥

वादिनो योगाचाराश्च मन्यन्ते । तदसङ्गतम् । यतोऽविद्याया सकार्याया निर्हेतुके विनाशेऽङ्गीक्रियमाणे अर्च्यसत्यचतुष्टयाभ्यासादिसाधनविधायकशास्त्रवैफल्यम् । तेन सहेतुकत्वोपगमे निर्हेतुकत्वमतिज्ञाहानिरपि क्षणिकवादिनं प्रति स्मारिता । मिथ्यावादिनो निर्हेतुकत्वाङ्गीकारे शास्त्रवैफल्यं तुल्यम् । सहेतुकत्वपक्षेऽप्यविद्यातत्कार्यातिरिक्तस्य नाशकस्य मिथ्यावादिमतेऽप्यभावान्नाशकस्यापि मिथ्यात्वात् तत्र दूषणमविद्येत्यादिनोक्त्या व्युत्पादयन्ति * न हीत्यदि । * अत उपगमद्वयस्याप्यसङ्गतत्वान्मतद्वयेऽपि दोष इत्यर्थः ।

रामानुजाचार्यास्तु—क्षणिकवाद्यभ्युपेतात्तुच्छादुत्पत्तिरुत्पन्नस्य तुच्छत्वापत्तिश्च न सम्भवतीत्युक्तम् । तदुभयप्रकाराभ्युपगतौ दोषश्च भवति । तुच्छादुत्पत्तौ तुच्छमेव कार्यं स्यात् । यद् यस्मादुत्पद्यते तत् तदात्मकमेव दृष्टम् । यथा मृत्सुवर्णाद्युत्पन्नं मणिकमुकुटादिकं मृत्सुवर्णाद्यात्मकम् । नच तुच्छात्मकं जगद् भवद्भिरिष्यते, नच प्रतीयते । सतो निरन्वयविनाशे सत्येकक्षणादूर्ध्वं कृत्स्नजगतस्तुच्छतापत्तिरेव स्यात् पश्चात्तुच्छाज्जगदुत्पत्तावनन्तरोक्तं तुच्छात्मकत्वमेव स्यात् । अत उभयथा दोषान्न भवदुक्तावुत्पत्तिनिरोधावित्येवमाहुः ॥ २३ ॥

आकाशेचाविशेषात्॥अतः परमाकाशं दूपयतीत्याह.* यच्चेत्यादि*।आवरणाभावमात्रमाकाश इति यदुच्यते तदसङ्गतम् । आकाशेऽपि भूतान्तरवद् वस्तुत्वव्यवहारस्य समानत्वात् । यथा हि पृथिव्यां घटो, जले नौरित्यादि व्यवह्रियते तथाऽऽकाशेऽप्यत्र गृध्रोऽत्र श्येन

अनुस्मृतेश्च ॥ २५ ॥

सर्वोऽपि क्षणिकवादो बाधितः। स एवायं पदार्थ इत्यनुस्मर-

इत्याधारता व्यवह्रियते। तथा बहिरन्तरमिति चानचासौ भूप्रदेशे दिशि वा वक्तुं शक्यते। बाह्यो देशो, बाह्यादिगान्तरो देश, आन्तरो दिगिति बहिरन्तरव्यवहारविषयपरिच्छेदफलत्वेनैव तयोरभिलप्यमानत्वात्। अतो, बहिरेव धूमो, नान्तरितिव्यवहारसाक्षिकोऽवकाश एवायं व्यवहारः। अवकाशश्च प्रत्यक्षः। भूयानवकाशः स्वल्पोऽवकाश इति प्रत्यक्षानुभवात्। नच रूपाभावो बाधक इति वाच्यम्। गन्धर्वनगरादिवद् वस्तुसामर्थ्येनैव तत्प्रतीत्यङ्गीकारे बाधकाभावात्। तस्मादावरणाभावमात्रमाकाशो, नापि निरुपाख्य इत्यर्थः।

रामानुजाचार्यास्तु त्रिवृत्करणेन पञ्चीकरणस्याप्युपलक्षितत्वादाकाशेऽपि रूपसत्त्वात् तद्धेतुकेऽपि तत्प्रत्यक्षे न विरोध इत्याहुः। तच्चिन्त्यम्। तथा सति वायावपि तदापत्तेः।

वैशेषिकादयः पुनः शब्दाख्यगुणानुमेयमाकाशमिच्छन्ति। शाङ्कराश्च।

भास्कराचार्यास्तु–शब्दस्याकाशेन सह सम्बन्धाग्रहणादसत्यपि शब्दे नभोविषयकबुद्ध्युत्पत्तेः, श्रूयमाणेऽपि शब्दे तद्द्वारेण तत्र तदनुत्पत्तेर्न तस्य शब्दानुमेयत्वं, किन्तु रूपिद्रव्यसमवायित्वात् त्रिवृत्करणेन रूपसम्बन्धाच्च प्रत्यक्षमित्याहुः। तत्राप्यनुमेयत्वखण्डनमात्रं युक्तम्।

शङ्कराचार्या भास्कराचार्याश्चाकाशसत्त्वे बुद्धवाक्यसम्मतिमप्याहुः। पृथिवी भगवन् किं निःसंश्रया इत्येवं प्रश्नप्रतिवचनप्रवाहे पृथिव्यादीनामन्तवायुः किं निःसंश्रय इत्यस्य प्रश्नस्य प्रतिवचनं वायुराकाशसंश्रय इति बुद्धेनोक्तम्। तथा, 'आकाशस्य स्थितिर्यावद् यावच्च जगतः स्थितिः। तावन्मतस्थितिर्भूयाज्जगद्दुःखानि निघ्नत' इति च बुद्धेनोक्तमिति। तथाचाकाशस्यावस्तुत्वे तदसमञ्जसं स्यादिति॥ २४॥

अनुस्मृतेश्च ॥एवं क्षणिकवादं विशेषतो निराकृत्येदानीं सङ्क्षेपेण निराकरोतीत्याशयेनाहुः * सर्वं इत्यादि *। अयमर्थः। क्षणिकवादी हि

णात्। अनुभवस्मरणयोरेकाश्रयत्वमेकविषयत्वं च ॥ २५ ॥

सर्वस्य क्षणिकत्वं मन्यमानोऽनुभवितुरनुभूतिविषयस्य च सदृशसन्तानेन प्रत्यभिज्ञानमुपपादयति । तदसङ्गतम्। प्रत्यभिज्ञाने हि यः पूर्वं दृष्टः स एवायं पदार्थ इति, योऽहं पूर्वमद्राक्षं स एवाहमिदानीं पश्यामीत्याकारः। तत्र च, स इत्यनेन पूर्वकालवर्त्तिनोऽयमहमित्यनेनोत्तरकालवर्त्तिनोऽनुभूतिविषयस्यानुभवितुश्चैक्यस्य परामृष्यमाणतया पूर्वापरकालवर्त्तिन एकस्य सिद्धत्वेन क्षणिकसन्तानस्य वक्तुमशक्यत्वात्। नच तत्र सन्ताने स इति पूर्वकालवर्त्तित्वाभिमानात् सर्वमुपपद्यत इति वाच्यम्। अनुभवस्मरणयोरेकाश्रयत्वैकविषयत्वनैयत्यात् सन्तानेन च पूर्वकालस्याननुभूततया तस्य तत्स्मरणायोगेन तत्र तथाभिमानस्य वक्तुमशक्यत्वात्। सन्तानिनोऽपि तदानीं तस्मिन् काले पूर्वकालत्वबुद्ध्यभावेन तत्सन्ताने तादृग्बुद्धिवैशिष्ट्यस्यापि वक्तुमशक्यत्वाच्च । नचाकस्मिकमेव स इति ज्ञानमितिं युक्तम्। तथा सति सर्वदा तदापत्तेः। नच सादृश्येन तथा ज्ञानम्भवतीति वाच्यम् । अज्ञातस्य सादृश्यस्य तादृशज्ञानानुत्पादकतया सादृश्यज्ञानार्थं यतमानस्य पूर्वापरकालवर्त्तिवस्तुद्वयानुसन्धानं पूर्वकालानुसन्धानं चावश्यकमिति तदनुसन्धातुः स्थिरत्वापत्त्या सादृश्यस्यापि पूर्वापरकालवृत्तिवस्तुद्वयनिष्ठतया स्थिरत्वापत्त्या क्षणिकत्वहानिप्रसङ्गात् । नच सादृश्यसन्तानात् सर्वं सेत्स्यतीति वाच्यम्। सादृश्यस्य सदृशबुद्धिवोध्यत्वेन सदृशबुद्धेश्च पूर्वापरकालवृत्तिवस्तुद्वयविषयीकरणं विना असम्भवेन तत्सन्तानाङ्गीकारेऽपि बुद्धेस्तद्विषयस्य च स्थिरत्वापत्तेरनिवार्यत्वेन क्षणिकवादबाधस्य दुर्वारत्वात्। अतस्तत्तेदंतातत्ताहंतासामानाधिकरण्यावगाहिप्रत्यभिज्ञानात्मकानुस्मृत्यन्यथानुपपत्त्या सिद्धे बाह्यार्थानामात्मनश्च स्थैर्ये सर्वोऽपि क्षणिकवादः सर्वत्र बाधित इत्यर्थः । एवञ्च, 'नित्यदा ह्यङ्ग भूतानि भवन्ति न भवन्ति च । कालेनालक्ष्यवेगेन सूक्ष्मत्वात् तन्नदृश्यते। यथार्चिषां स्रोतसां वा फलानां वा वनस्पतेः । तथैव सर्वभूतानां वयोऽवस्थादयः कृता'इति द्वाभ्यां कालिकं नित्यप्रलयमादाय, विमतं प्रतिक्षणोत्पत्तिविनाशम्, अवस्थाभेदवत्त्वाद्, दी-

नासतोऽदृष्टत्वात् ॥ २६ ॥

अपिच । नानुपमृद्य प्रादुर्भावं वैनाशिका मन्यन्ते । ततश्चाऽसतोऽलीकात् कार्यं स्यात् । तन्न । अदृष्टत्वात् । न हि शशशृङ्गादिभिः किञ्चित् कार्यं दृश्यते ।

पज्वालादिवत्यनुमानेन यत् क्षणिकत्वमुक्तं तद् विशेषणाभावप्रयुक्ताभावादेव, न तूभयाभावात्। तथा सति यद्भ्रमे, सोऽयं दीपोऽर्चिषां यद्वच्छ्रोतसां तदिदं जलम् । सोऽयं पुमानिति नृणां मृषाधीर्गीर्मृषायुषामिति प्रत्यभिज्ञायाः मिथ्यात्वम्। तदपि व्यर्थायुषाणामविवेकिनामेव तस्या, न तूक्तरीतिकविवेकवतां प्रत्यभिज्ञाया इति न कोऽपि विरोध इति दिक् ॥ २५ ॥

नासतोऽदृष्टत्वात् ॥ एवमष्टभिर्वैनाशिकाभिमतं क्षणिकवादं निराकृत्य तदभिमतामभावाद्भावोत्पत्तिं निराकरोतीत्याशयेन सूत्रमुपन्यस्य व्याकुर्वन्ति * अपिचेत्यादि * । अयमर्थः । नानुपमृद्य प्रादुर्भावादिति बुद्धसूत्रे बीजोपमर्दं विनाङ्कुरोत्पत्तेर्दुग्धोपमर्दं विना दध्युत्पत्तेर्मृत्पिण्डोपमर्दं विना घटोत्पत्तेरदर्शनात्तेभ्य एव तेभ्य स्तत्तदुत्पत्तिदर्शनाच्च केवलोऽभाव एवावशिष्यत इत्यभावादेव भावोत्पत्तिरिति मन्यन्ते । तथा सत्यसतोऽलीकादेव कार्यं स्यात्। यदि हि बीजादिप्रतियोगिकादभावादङ्कुराद्युत्पत्तिरिष्यते तदा तस्याभावस्य बीजादिध्वंसरूपत्वेन तदवस्थाविशेषरूपतयाऽवस्थाविशेषविशिष्टाद् बीजादेरेवोत्पत्तिरिति स्यादतस्तदभावाय वैनाशिकेन निःस्वभावादेवाभावाद्भावकार्योत्पत्तिरङ्गीकार्या । तथा सति तस्याभावस्य निःस्वभावतया शशशृङ्गतुल्यत्वादलीकादेव कार्योत्पत्तिरिति सिद्ध्यति। तच्चासङ्गतम् । दृष्टविरोधात् । न हि तादृशात् कार्योत्पत्तिः क्वापि दृष्टा। न वा तादृशोऽभावः क्वापि दृष्टः। नाप्यनुमातुं शक्या। यदुच्यते तदभावजन्यं यथा बीजाद्युपमर्दादङ्कुरादीति प्रयोगे दृष्टान्तस्यावस्थाविशेष एव पर्यवसानेन त्वदभिताभावासाधकत्वात् । तादृशादभावाद्भावोत्पत्त्यङ्गीकारश्च सर्वत्र सर्वतः सर्वोत्पत्तिप्रसङ्गादपि

एवं सतः कारणत्वं पूर्वपाद उपपाद्यासतः कारणत्वं निराकृत्य व्यासचरणैर्वेदानामव्याकुलत्वे सम्पादितेऽपि पुनर्वेदव्यामोहनार्थं प्रवृत्तस्य भगवतो बुद्धस्याऽऽज्ञया, त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय । अतथ्यानि वितथ्यानि दर्शयस्व महाभुज । स्वागमैः कल्पितैस्त्वञ्च जनान् मद्विमुखान् कुरु' इत्येवंरूपया महादेवादयः स्वांशेनावतीर्य वैदिकेषु प्रविश्य विश्वासार्थं वेदभागान् यथार्थानपि व्याख्याय सदसद्विलक्षणामसदपरपर्यायामविद्यां

बाधितः । किञ्च । अभावाद्भावोत्पत्तौ कार्यमभावान्वितं दृश्येत । सर्वस्य कार्यस्य कारणान्वितत्वदर्शनात् । किञ्च । उपमृद्य प्रादुर्भावोऽपि न सार्वत्रिकः । सुवर्णजन्यकटकादौ तन्तुजन्यपटादौ च तददर्शनात् । एवञ्चाङ्कुरादावपि बीजस्थूलांशस्यैवोपमर्दो, न तु सूक्ष्मांशस्य । तदन्तस्त एव सूक्ष्मांशानामङ्कुरीभावात् । अतः संस्थानमात्रस्यैव निवृत्तिर्न तु द्रव्यस्येति तत्र बीजद्रव्यं कूटस्थमेवावयवद्वारा कारणम् । एवं दध्यादावप्यवस्थाभेद एवेत्यभावाद्भावोत्पत्तिः सर्वथानुपपन्नैवेति सिद्धम् । एवमसत्कारणवादनिराकरणेन मायावादिप्रतिपन्नाविद्याकारणवादनिराकरणमप्यर्थादेव सिद्धमित्याहुः । * एवं सत इत्यादि * । अत्र बुद्धाज्ञायां प्रमाणं वक्तुं, त्वं च रुद्रेत्यादिवाक्योपन्यासः । इदं वाक्यं वाराहपुराणे रुद्रगीतासु रुद्ररूपेणागस्त्यं प्रति सर्वदेवादीनप्युद्दिश्य भगवदाज्ञारूपमनूदितम् । द्वितीयं, स्वागमैरिति तु पद्मपुराणोत्तरखण्डे सहस्रनामारम्भे महादेवेन पार्वतीं प्रत्युक्तम् । * इत्येवंरूपयेत्यादिनोत्तरखण्डीयानां शङ्करेण पार्वतीं प्रत्येवोक्तानां, 'शृणु देवि प्रवक्ष्यामि तामसानि यथाक्रमम् । येषां श्रवणमात्रेण पातित्यं ज्ञानिनामपि । प्रथमं हि मयैवोक्तं शैवं पाशुपतादिकम् । मच्छक्त्यावेशितैर्विप्रैः सम्प्रोक्तानि ततः परम् । कणादेन तु सम्प्रोक्तं शास्त्रं वैशेषिकं महत् । गौतमेन तथा न्यायं सांख्यं तु कपिलेन वै । धिषणेन तथा प्रोक्तं चार्वाकमतिगर्हितम् । दैत्यानां नाशनार्थाय विष्णुना बुद्धरूपिणा ।

सर्वकारणत्वेन स्वीकृत्य तन्निरुत्त्यर्थं जातिभ्रंशरूपं सन्न्यासपापण्डं प्रसार्य सर्वमेव लोकं व्यामोहितवन्तः । व्यासोऽपि कलहं कृत्वा शङ्करं शप्त्वा तूष्णीमास । अतोऽग्निना मया सर्वतः सदुद्धारार्थं यथाश्रुतानि श्रुतिसूत्राणि योजयता सर्वो मोहो निराकृतो वेदितव्यः । प्रथमाध्याय एव तन्मतमनूद्य विस्तरेण निराकृतमिति नात्रोच्यते ॥ २६ ॥

बौद्धशास्त्रमसत् प्रोक्तं नग्ननीलपटादिकम् । मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते । मयैव कथितं देवि कलौ ब्राह्मणरूपिणा । अपार्थं श्रुतिवाक्यानां दर्शयल्लोकगर्हितम् । कर्मस्वरूपत्याज्यत्वमत्रैव प्रतिपाद्यते । सर्वकर्मपरिभ्रष्टं वैकर्मत्वं तदुच्यते । परेशजीवयोरैक्यं मयाऽत्र प्रतिपाद्यते । ब्रह्मणश्च परं रूपं निर्गुणं वक्ष्यते मया । सर्वस्य जगतोऽप्यत्र मोहनार्थं कलौ युगे । वेदार्थवन्महाशास्त्रं मायावादमवैदिकम् । मयैव वक्ष्यते देवि जगतां नाशकारणादि' त्यादीनां वाक्यानामर्थः संगृहीतः । असदपरपर्यायामित्यनेनैतत्सूत्रोक्तदूषणदूष्यता स्फुटीकृता । व्यासकलहादिकं तु, 'व्यासो नारायणः साक्षाच्छङ्करः शङ्करः स्वयम् । तयोर्विवादे सम्प्राप्ते किङ्करः किं करोम्यहमि'ति तत्सम्प्रदाये प्रसिद्धाद् गणेशोक्तात् । 'वासना यदि भवेत् फलदात्री किं करिष्यति तदा मम काशी । व्यापको यदि भवेत् परमात्मा तारकं किमिति नोपदिशेन्मामि'ति कीकटे मरणावसर उक्ताच्छङ्कराचार्यश्लोकाच्चावगन्तव्यम् । शेषं स्फुटम् । एवञ्च पञ्चमस्कन्धीयेषु जडभरतवाक्येषु, अयं जनो नाम चलन् पृथिव्यामित्यनेनावयवित्वमभिमानमात्रादेवेत्युक्त्वा, 'एवं निरुक्तं क्षितिशब्दवृत्तमसन्निधानात् परमाणवो ये । अविद्यया मनसा कल्पितास्ते येषां समूहेन कृतो विशेष' इत्यनेन परमाणुपुञ्जाद्विशेषाख्यदेहोत्पत्तिः, परमाणूनामविद्याकल्पितत्वं च यदुक्तं तदपि रहूगणस्य बाहिर्मुख्यं दूरीकर्त्तुम् । बहिर्मुखप्रतिपन्नाविद्याकल्पितपरमाणुकारणवादस्यानुपपन्नत्वात्तमादाय बहिर्मुखव्यवहारविषयस्य प्रपञ्चस्य हेयत्वे बोधिते बाहिर्मुख्यं गमिष्यतीत्येतदर्थं, न तु कारणतत्त्वबोधनार्थम् ।

उदासीनानामपि चैवं सिद्धिः ॥ २७ ॥

यद्यभावाद् भावोत्पत्तिरङ्गीक्रियते तथा सत्युदासीनानामपि साधनरहितानां सर्वोऽपि धान्यादिः सिद्ध्येत । अभावस्य सुलभत्वात् ॥ २७ ॥

नाभाव उपलब्धेः ॥ २८ ॥

एवं कारणासत्त्वं निराकृत्य विज्ञानवाद्यभिमतं प्रपञ्चासत्त्वं निराकरोति ।

तदर्थमप्रवृत्तत्वात् ॥ अत एवाग्रे निगमनावसरे, ज्ञानं विशुद्धं परमार्थमेकमित्यादिभिर्ब्रह्मस्वरूपतद्दुष्प्रापत्वभगवद्विषयकमतिप्राप्त्युपायस्वजन्मप्रवृत्तान्तान्युक्त्वा तस्मान्नरोऽसङ्गसुसङ्गजातज्ञानासिनैवेह विवृक्णमोहः । हरिं तदीहाकथनश्रुताभ्यां लब्धस्मृतिर्यात्यतिपारमध्वनं इत्यनेन पूर्वोक्तज्ञानस्य मोहनिवारकत्वमुक्त्वा श्रुत्यादिसिद्धभगवच्चेष्टाकथनश्रवणाभ्यां मुख्यज्ञानलाभं भगवत्प्राप्तिरूपां मुक्तिं चाह, न तु पूर्वोक्तरीतिकज्ञानेनेति न कोऽपि विरोध इति बोध्यम् ॥ २६ ॥

उदासीनानामपि चैवं सिद्धिः ॥ *उदासीनानामपि साधनरहितानामिति * कृष्यादिकर्मतत्साधनीभूलहलादिसाधनशून्यानाम् । निगदव्याख्यातमिदम् ॥ २७ ॥ ४ ॥

नाभाव उपलब्धेः ॥ दशभिर्वैभाषिकसौत्रान्तिकयोर्मते निराकृते विज्ञानवाद्यपि कारणांशे निराकृत एव । तथापि कार्यांशे तन्मतं पूर्वस्माद् विलक्षणमिति तन्निराकरणमातनोतीत्याशयेनाहुः । * एवं कारणेत्यादि * । विज्ञानवाद्येव योगाचार इत्युच्यते । तत्स्वरूपं भास्कराचार्यैरुक्तम् । शमथविपश्यनायुगनद्धवाही मार्गो योग इति तेषां योगलक्षणम् । शमथः समाधिरुच्यते । विपश्यना सम्यग्दर्शनम् । यथा युगनद्धौ बलीवर्दौ वहतस्तथा यो मार्गः सम्यग्दर्शनवाही स योगस्तेनाचरतीति योगाचार इति । तेषां सम्यग्दर्शनं च सर्वं बाह्यार्थशून्यं विज्ञानमेव सर्वं क्षणिकं सर्वं निरात्मक-

स च ज्ञानातिरिक्तः प्रपञ्चो नास्तीत्याह । तन्न । अस्य प्रपञ्चस्य नाभावः । उपलब्धेः । उपलभ्यते हि प्रपञ्चः । यस्तूपलभमान एव, नाहमुपलभे इति वदति स कथमुपादेयवचनः स्यात् ॥ २८ ॥

मिति । तत्र सर्वक्षणिकत्वं विज्ञानस्कन्धस्य क्षणिकत्वात् । निरात्मकत्वमालयविज्ञानातिरिक्तात्माभावात् । बाह्यार्थशून्यत्वं तु ज्ञानस्यैव साकारत्वात् । तत्साकारत्वं तु ग्राह्यग्राहकसंवित्तिभेदेनैकस्यैव प्रत्यक्षतया प्रकाशमानत्वात् । नचैवं त्रिधा प्रकाशनेऽपि नानात्वम् । प्रमदातनुवदुपपत्तेः । तदुक्तम् । 'बुद्धिस्वरूपमेकं हि वस्त्वस्ति परमार्थतः । प्रतिभासस्य नानात्वान्नचैकत्वं विहन्यते । परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ । कुणपः कामिनी भक्ष्यमिति तिस्रो विकल्पनाः । तथाप्येकैव सा बाला बुद्धितत्त्वं परं हि न' इति । एवञ्च नीलं पीतं स्तम्भः कुड्यमित्यादौ तेन तेन रूपेण ज्ञानमेव प्रकाशत इति सर्वे तस्यैवाकारा अनादिवासनयैव विचित्रा भासन्ते । तस्मादाकारसमर्पणाय न बाह्यार्थाङ्गीकारो युक्तः । किञ्च । यदैव नीलज्ञानं तदैव नीलमुपलभ्यत इति सहोपलम्भादपि ज्ञानार्थयोरभेदः । तदुक्तं, सहोपलम्भनियमादभेदो नीलतद्धियोरिति' । नच नीलादीनां बाह्यत्वेन ज्ञानस्य चान्तरत्वेन भिन्नदेशत्वात् कथं ज्ञानाकारत्वमिति शङ्क्यम् । स्वप्नादिवदभिमानमात्रेणोपपत्तेः । तथाचानुमानम् । स्तम्भादिप्रत्ययाः स्वात्मांशमेव बाह्यतयाऽध्यवस्यन्तो मिथ्याभूताः । प्रत्ययत्वात् । स्वप्नप्रत्ययवत् । शुक्तिरजतप्रत्ययवच्चेति । स्वप्नादिप्रत्यया हि बाह्यार्थाभावाद्देशान्तरकालान्तरवर्तिनां च सन्निहितदेशकालतया प्रतिभासासम्भवात् क्वचित् कदाचिदप्यदृष्टानां स्वशिरश्छेदादीनां प्रतिभासाच्चावश्यं स्वात्मानमेव बहिर्गृह्णन्तीत्यभ्युपगन्तव्यम् । अतस्तत्सामान्याज्जाग्रज्ज्ञानानामपि स्वात्मांशग्राहित्वं मिथ्यात्वं चेति । तस्मान्नास्ति बाह्यः पदार्थ इति तदेतदभिसन्धायाहुः * स चेत्यादि * । एवमनूद्य दूषणं व्याकुर्वन्ति । * तन्नेत्यादि * प्रथमम् । यत् त्वया ज्ञानं साकारमिष्यते तत् किं सर्वाकारं यत्कि-

वैधर्म्याच्च न स्वप्नादिवत् ॥ २९ ॥

श्चिदाकारं वा। आद्ये ग्राह्यग्राहकसंवित्तिवत् सर्वानेव ग्राह्याकारान् युगपदेव प्रकाशयेत्। बाह्यार्थानपेक्षत्वात्। द्वितीये त्वेकमेवाकारं सर्वदा प्रकाशयेन्न कदापीतरम्। नच समनन्तरप्रत्ययाकारात् कादाचित्कत्वसिद्धिः। उक्तदूषणस्य तत्रवाहेऽपि तौल्यात्। अतस्तदाकारप्रतीतेः कादाचित्कत्वोपपत्तये बाह्यार्थापेक्षा तस्यावश्यमभ्युपेया। तथा सति सिद्ध एव बाह्योऽर्थः प्रपञ्चरूपः। सहोपलम्भनियमादभेदस्तु सहपदार्थविचारादेवासङ्गतः। सहत्वं हि द्वयोर्भिन्नयोः पदार्थयोरेकदेशवर्त्तित्वमेककालवर्त्तित्वं वा। उभयथाऽपि हेतुतावच्छेदकतया प्रविष्टे पदार्थान्तरे भिन्नोपलम्भनियमादित्येव हेत्वर्थो भवति। तदेवं प्रतिज्ञाहेत्वोर्विरोधे यदि हेतुरादरणीयस्तदा प्रतिज्ञाबाधः। यदि प्रतिज्ञादरणीया तदा साधकं विना तदसिद्धिः। किञ्चाभेदोऽपि किमेकत्वमुत भेदाभावः। आद्येऽपि संख्या वा धर्मान्तरम्। आद्ये नीलतद्धियोरेकत्वसंख्याविशिष्टत्वमित्यर्थो भवति। तेन न बाह्यार्थबाधः। यथा घटपटयोरेकत्ववैशिष्ट्येऽपि नान्यतरबाधस्तद्वत्। एवं द्वितीयेऽपि। यदि भेदाभावपक्षस्तदा अभावस्य प्रतियोगी भेदस्त्वयाऽवगतो, न वेति वक्तव्यम्। यदि नावगतस्तर्हि भेदस्य सर्वथा बुद्ध्यनारूढत्वेन नीलमःन्नस्य भानाच्च भेदस्य निषेधार्हत्वमित्यभेदासिद्धिः। अथावगतस्तथा सति संवित्तिवत् प्रत्यक्षत्वाद्धेत्वन्तरस्य तत्प्रतिक्षेपकस्याभावात् सिद्ध एव भेद इत्यभेदप्रतिज्ञा असङ्गतैव। तदेतदुक्तम्। यस्तूपलभमान एव नाहमुपलभे इति वदति स कथमुपादेयवचनः स्यादिति। उपलभ्मनेवेति पाठे तु औणादिकोऽतिप्रत्ययः। उणादीनां सर्वधातुभ्यो भवनात्। वर्त्तमाने पृषद्बृहन्महज्जगच्छतृवच्चेति शतृवद्भावान्नुम्। 'संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परं। कार्याद् विद्यादनूबन्धमेतच्छास्त्रमुणादिष्वि'ति भाष्यानुशासनात् ॥ २८ ॥

वैधर्म्याच्च न स्वप्नादिवत् ॥ पूर्वसूत्रोक्तस्य हेतोरनैकान्तिकत्वं वारयितुं तद्दृष्टान्तासङ्गतिं वदतीत्याशयेन सूत्रमुपन्यस्य व्याकर्त्तुम-

मपि दृश्यमानः स्तम्भः स्तम्भ एव । स्वस्य मोक्षे प्रवृत्तिव्याघातश्चकारार्थः ॥ २९ ॥

न भावोऽनुपलब्धेः ॥ ३० ॥

यदप्युच्यते, बाह्यार्थव्यतिरेकेणापि वासनया ज्ञानवैचित्र्यं भविष्यतीति । तन्न वासनानां न भाव उपपद्यते । त्वन्मते बाह्यार्थस्यानुपलब्धेः । उपलब्धस्य हि वासनाजनकत्वम् । अनादित्वे त्वन्धपरम्परान्यायेनाप्रतिष्ठैव । अर्थव्यतिरेकेण वासनाया अभावाद् वासनाव्यतिरेकेणाऽप्यर्थोपलब्धेरन्वयव्यतिरेकाभ्यामर्थसिद्धिः ॥ ३० ॥

क्षणिकत्वाच्च ॥ ३१ ॥

वासनाया आधारोऽपि नास्ति । आलयविज्ञानस्य क्षणिकत्वात् । वृत्तिविज्ञानवत् ।

एवं सौत्रान्तिको विज्ञानवादी च प्रत्युक्तः । माध्यमिकस्तु मायावादिवदसम्बद्धभाषित्वादुपेक्ष्य इति न निराक्रियत आचार्येण ॥ ३१ ॥

क्षणिकत्वाच्च ॥ प्रकारान्तरेणापि वासनां निराकरोतीत्याशयेनाहुः *वासनाया इत्यादि* । अयमर्थः । वृत्तिविज्ञानं वासनाजनकं पूर्वक्षणवृत्ति । तदाधारश्चालयविज्ञानं तत्समानकालम् । एवं सति वृत्तिविज्ञानेन यदा वासनोत्पादनीया तदानीं वृत्तिविज्ञानाधारस्यालयविज्ञानस्य नष्टत्वादाधाराभावेनापि वासनानुपपत्तिः । तदानीमालयविज्ञानसत्त्वाङ्गीकारे क्षणिकवादहानिः । यदि च सन्तानिन आलयविज्ञानस्य वृत्तिज्ञानाधारत्वं तत्सन्तानस्य वासनाधारत्वमित्युच्यते, तदाऽपि वृत्तिविज्ञानवैसादृश्यहेत्वभावादसङ्गतिः । यदि च सन्तानप्रवाह एव वासनेत्युच्यते, तदाऽपि, उत्तरोत्पादे च पूर्वनिरोधादित्यादीनां दूषणानामापत्तिः । तस्मादसङ्गतमेवेदं मतमिति । उपसंहरन्ति *एवमित्यादि* । तर्हि माध्यमिकः कुतो न दूष्यत इत्यत आहुः * माध्यमिकेत्यादि * । यथा हि मायावादिनः श्रुतिच्छायामादाय सर्वं विप्लावयन्ति तथा सोऽपि युक्तिच्छायामादाय सर्वं नाशयतीत्यसम्बद्धभाषित्वात् स्वयुक्तिभिरेव दूषितप्रायः । स हि सर्वशून्यवादी येन प्रमाणेन शून्यतां साधयति तत् प्रमाणं वर्त्तते, न वा ? । यदि वर्त्तते तदा सर्वशून्यत्वप्रतिज्ञाहानिः । यदि नास्ति तदा तदभावे कथं सर्वशून्यतां साधयेत् । किञ्च, स ह्येवं वदति । यद सत् तन्न कारकैर्जायते । यथा शशविषाणम् । यत् सत् तदपि भावादभावाच्च नोत्पद्यते । तथाहि । न तावद्भावात् । पिण्डबीजाद्युपमर्देनैव घटाङ्कुराद्युत्पत्तिदर्शनात् । नाप्यभावात् । अभावात्मकत्वस्याभावान्वयस्य च कार्येष्वदर्शनात् । न स्वतः । आत्माश्रयप्र-

सर्वथानुपपत्तेश्च ॥ ३२ ॥

किं बहुना। बाह्यवादो यथा यथा विचार्यते तथा तथा असम्बद्ध एवेत्यलं विस्तरेण। चकाराद् वेदविरोधो मुख्यः ॥ ३२ ॥

सङ्गात्, प्रयोजनाभावाच्च। न वा परतः। परोत्पत्तौ परत्वाविशेषात् सर्वतः सर्वोत्पत्तिप्रसङ्गात्। एवं जन्मनि निरस्ते जन्माभावादेव विनाशस्याप्यभावः। नापि सदसत्। सदसतोरितरेतरविलक्षणत्वादेकस्य सदसद्भावानुपपत्तेः। नापि सदसद्विलक्षणम्। एकस्य तथात्वानुपपत्तेः। अदर्शनाच्च। अतः कोटिचतुष्टयनिर्मुक्तं शून्यमेव तत्त्वम्, अभावापत्तिरेव मोक्ष इति। तदिदमसङ्गतम्। तथाहि। यत्त्वया चतुष्कोटिनिर्मुक्तं शून्यं तत्त्वं व्यवस्थाप्यते, तत् केनचित् प्रमाणेनावगतमुत प्रमाणं विना वस्तुसामर्थ्यात्। नान्त्यः। तथा सत्याकाशवत् सार्वजनीनं स्याद् न वादिनो विप्रतिपद्येरन्। किञ्च, तत् सामर्थ्यं तत्रास्ति न वा। यद्यस्ति तर्हि तदाधारं शून्यमप्यस्त्येवेति न चतुष्कोटिनिर्मुक्तता। अथ नास्ति, तदापि तथा। नाद्यः। प्रमाणेऽस्तिनास्तिभ्यां विकल्पिते चतुष्कोटिविधुरतासिद्धेः। किञ्च येनावगतं तत् किं प्रमाणं, प्रत्यक्षमनुमानं वा। नाद्यः। सार्वजनीनत्वाभावेन तव प्रत्यक्षस्य प्रतिपादनादरणीयत्वात्। अथ यद्विचारासहं तच्छून्यमित्यनुमातव्यं, तदा तवोदाहरणाभावः। सर्वस्यैव पक्षीकरणात्। तथाच नानुमानस्य सिद्धिः। अथ, घटः शून्यः। उक्तरीत्या विचारासहत्वात्, पटवदिति परोक्तरीतिकप्रयोगेणानुमातव्यम्। तदा तु सुवर्णजन्यकटकादौ तन्तुजन्यपटादौ च व्यभिचारेणोपमृद्य प्रादुर्भावस्य निरस्तत्वादभावादेव भावोत्पत्तिः सिद्धैवेति न विचारासहत्वस्य सिद्धिरिति स्वयुक्तिभिरेव दूषितत्वाच्च निराक्रियत इत्यर्थः॥३१॥

सर्वथानुपपत्तेश्च ॥ भाष्यमत्र निगदव्याख्यातम्। एतेनैवासम्बद्धत्वबोधनेन केवलदृष्टमात्रानुसारी चार्वाकोऽपि प्रत्युक्तो ज्ञेयः। ननु यद्यप्यत्र विज्ञानातिरिक्तप्रपञ्चसत्त्वं साधितं, तथापि तृतीयस्कन्धे कापिलेये, 'ज्ञानमेकं पराचीनैरिन्द्रियैर्ब्रह्म निर्गुणम्।

नैकस्मिन्नसम्भवात् ॥ ३३ ॥

विवसनसमयो निराक्रियते । ते ह्यन्तर्निष्ठाः प्रपञ्चे उदासीनाः सप्त विभक्तीः परेच्छया वदन्ति । स्याच्छब्दोऽमीष्टवचनः। अस्तिनास्त्यवक्तव्यानां प्रत्येकसमुदायाभ्यां स्यात्पूर्वकः सप्तप्रकारो भवति । तदेकस्मिन् योजयन्ति ।

प्रथमात्यर्थरूपेण भ्रान्त्या शब्दादिधर्मिणे'त्यत्र, तथा दशमस्कन्धे 'सत्त्वं रजस्तम इति गुणास्तद्वृत्तयश्च याः। त्वय्यद्धा ब्रह्मणि परे कल्पिता योगमायया। तस्मान्न सन्त्यमी भावा यर्हि त्वयि विकल्पिता' इत्यत्रैवमन्यत्र च प्रपञ्चस्य ज्ञानमात्रत्वं कल्पितत्वं चोच्यत इति कथं तद्विरोधः परिहर्त्तव्य इति चेत्। उच्यते। कपिलेन हि प्रपञ्चं ब्रह्मात्मकत्वेनाजानतां बहिर्मुखतया ब्रह्मभिन्नगुणजन्यपृथगर्थत्वेन जानतां प्रतीतिमादाय तस्या एकदेशास्वस्वभावग्राहित्वेन तादृशप्रतीतिविषयमर्थत्वमपोद्य ज्ञानात्मकब्रह्मरूपता बोध्यते वैराग्यार्थं, न तु ब्रह्मोपादेयार्थरूपताऽप्यपोद्यत इति ब्रह्मनिर्गुणपदाभ्यामवसीयते। तथा सति कस्तत्र विरोधः। एवमेव दशमस्कन्धीये वाक्येऽपि ज्ञेयम्। तत्रापि सांख्यसिद्धानामेव योगमायाकल्पिततया अभावविधानात्। एवं सर्वत्रावान्तरप्रकरणवशेन वैराग्यार्थं महेन्द्रजालपक्षमिन्द्रियायनसृष्टिपक्षं चादाय मतान्तरसिद्धस्यैव बोधकं ज्ञेयम्। अतो न कोऽपि क्वापि विरोध इति सर्वं सुस्थम् ॥ ३२ ॥ ५ ॥

नैकस्मिन्नसम्भवात् ॥ अधिकरणमवतारयन्ति । * विवसनेत्यादि *। एत एव क्षपणका आर्हता जैनाश्चोच्यन्ते । मुक्तकच्छाः पूर्वं दूषिता, इदानीं विवसना दूष्यन्त इति वाचस्पतिमिश्राः।

सौगतवज्जैना अपि परमाणुकारणत्वादिकं जगतो वदन्तीत्यनन्तरं जैनपक्षो दूष्यत इति रामानुजाचार्याः।

वस्तुतस्तु विरुद्धधर्मान्तरत्वं ब्रह्मण्येव प्रमाणसिद्धं, नान्यत्रेति स्थापयितुं तद्दूषणम् । सूत्रेषु तथैव प्रतीतेरिति प्रतिभाति। 'दूष्यांशमनुवदन्ति * ते हीत्यादि *। एतस्त ईदृशा अतो भङ्गीरूपान्

सप्त विभागान् परेषां विवक्षावशेन वदन्ति। तत्रायं प्रकारः। स्याच्छब्दोऽभीष्टवचनः। इव-वा-एवप्रभृतीनामुपमादिवाचकत्वस्य सुप्रसिद्धत्वात्। तथाऽयमप्यभीष्टवाचकोऽनेकान्तं द्योतयति। अतोऽस्त्यादिभेदैः समयस्तेषां सप्तप्रकारो भवति। तत्प्रकारसप्तकमेकैकस्मिन् योजयन्तीत्यर्थः। परेच्छा त्वग्रे वाच्या। साम्प्रतं तु दूषयां प्रपञ्चयितुं ग्रन्थान्तरोक्तं तन्मतमन्यदप्यनूद्यते। ते ह्येवं मन्यन्ते। जीवाजीवात्मकं जगदेतत्त्रिरीश्वरम्। तेन सङ्क्षेपतो द्वावेव जीवजडौ बोधाबोधात्मकौ पदार्थौ। विस्तरतस्तु जगत् षड्द्रव्यात्मकम्। तानि च द्रव्याणि जीवधर्माधर्मपुद्गलकालाकाशाख्यानि। अत्र जीवास्त्रिविधाः। बद्धा योगसिद्धा मुक्ताश्च। धर्मो नाम गतिमतां गतिहेतुभूतो द्रव्यविशेषो जगद्व्यापी। अधर्मश्च स्थितिहेतुभूतो व्यापी। पुद्गलो नाम वर्णगन्धरसस्पर्शवद् द्रव्यम्। तच्च द्विविधं, परमाणुरूपं तत्सङ्घातात्मकपवनज्वलनसलिलधरणीतनुभवनादिकं च। कालस्तु अभूदस्ति भविष्यतीतिव्यवहारहेतुरणुरूपो द्रव्यविशेषः। आकाशोऽप्येकोऽनन्तप्रदेशश्च। तेषु परमाणुव्यतिरिक्ताः पञ्चास्तिकाया इति संगृह्यन्ते। जीवास्तिकायो, धर्मास्तिकायोऽधर्मास्तिकायः, पुद्गलास्तिकाय, आकाशास्तिकायश्चेति। अनेकदेशवर्त्तिनि द्रव्ये अस्तिकायशब्दः। तत्र जीवास्तिकायस्त्रिविधजीवात्मको व्याख्यातः। धर्मास्तिकायः प्रवृत्त्यनुमेयः। अधर्मास्तिकायः स्थित्यनुमेयः। पुद्गलास्तिकायस्तु परमाणुव्यतिरिक्तानि चत्वारि भूतानि, स्थावरं जङ्गमं चेति। परमाणवस्तु नाऽस्तिकाय इत्युच्यन्ते। परमाणवश्चैतेषां मते एकविधा, न तु चतुर्विधाः। पृथिव्यादिभेदस्तु परिणामभेदकृतः। आकाशास्तिकायो द्वेधा। लोकाकाशोऽलोकाकाशश्चेति। तत्रोपर्युपरिस्थितानां लोकानामन्तर्वर्त्ती लोकाकाशः। तेषामुपरि मोक्षस्थानमलोकाकाशस्तत्र हि न लोकाः सन्तीति। तदेवं जीवाजीवपदार्थौ पञ्चधा प्रपञ्चितौ। जीवानां मोक्षोपयोगिनमपरमपि सङ्ग्रहं कुर्वन्ति। जीवाजीवास्रवसंवरनिर्जरबन्धमोक्षा इति जीवाजीवौ प्रपञ्चितौ। तत्र जीवस्तु ज्ञानदर्शनवीर्यसुखगुणः सावयवो देहपरिमाणः। अजीवस्तु जीवभोग्यं वस्तुजातम्। आस्रवसंवरनिर्जराख्याः पदार्थाः प्रवृत्तिलक्षणाः प्रपञ्च्यन्ते। द्वेधा प्रवृत्तिः। सम्यग् मिथ्या च। तत्र मिथ्या प्रवृत्तिरास्रवः। आस्रावयति पुरुषं विषयेष्वि-

तानिन्द्रियप्रवृत्तिरास्रवः। इन्द्रियद्वारा हि पौरुषं ज्योतिर्विषयान् स्पृशद् रूपादिरूपेण परिणमत इति। अन्ये त्वार्हताः कर्माण्यास्रवमाहुः। तानि हि कर्त्तारमभिव्याप्यास्रवन्ति, कर्त्तारमनुगच्छन्तीत्यास्रवः। सेयं मिथ्याप्रवृत्तिरनर्थहेतुत्वात्। संवरनिर्जरौ तु सम्यक्प्रवृत्ती। तत्र शमदमादिरूपा प्रवृत्तिः संवरः। सा ह्यास्रवस्रोतसो द्वारं संवृणोतीति संवर इत्युच्यते। निर्जरस्त्वनादिकालप्रवृत्तकषायकलुषपुण्यापुण्यप्रहाणहेतुस्तप्तशिलारोहणास्नातमौनवीरासननिष्ठनिर्माजनकेशोल्लुञ्चनादिलक्षणमर्हदुपदेशावगतं तपः। तद्धि सुखदुःखोपयोगेन पुण्यापुण्यं निःशेषं जरयतीति निर्जर इत्युच्यते। बन्धस्त्वष्टविधं कर्म। तत्र ज्ञानावरणीय दर्शनावरणीयं मोहनीयमन्तरायमिति चतुर्विधं घातिकर्म। तत्र सम्यग् ज्ञानं न मोक्षसाधनम्। न हि ज्ञानाद्वस्तुसिद्धिरतिप्रसङ्गादिति विपर्ययो ज्ञानावरणीयं कर्मोच्यते। आर्हतदर्शनाभ्यासान्न मोक्ष इति ज्ञानं दर्शनावरणीयं कर्म। बहुषु विप्रतिपन्नेषु मोक्षमार्गेषु तीर्थकरैरुपदिष्टेषु विशेषानवधारणं मोहनीयं कर्म। सन्मोक्षमार्गप्रवृत्तानां तद्विघ्नकरं विज्ञानमन्तरायं कर्म। तद्धि जीवगुणानां ज्ञानदर्शनवीर्यसुखानां घातकमिति घातिकर्मेत्युच्यते। वेदनीयं नामिकं गोत्रिकमायुष्कमिति चतुर्विधमघातिकर्म। तद्धि शरीरसंस्थानतदभिमानतत्स्थितितत्सुखदुःखोपेक्षाहेतुभूतम्। तत्र वेदनीयं नाम शुक्लपुद्गलविपाकहेतुः। तत्स्वियन्योऽपि न मोक्षपरिपन्थी। तत्त्वज्ञानाविघातकत्वात्। शुक्लपुद्गलारम्भकं वेदनीयकर्मानुगुणं नामिकं कर्म। तद्धि शुक्लपुद्गलस्याद्यावस्थां कललबुद्बुदादिमारभते। गोत्रिकं त्वव्याकृतं ततोऽप्याद्यं शक्तिरूपेणावस्थितम्। आयुष्कं तूत्पादद्वारेणायुष्कायतीति कायपतीति। तान्येतानि शुक्लपुद्गलाश्रयत्वादघातीनि कर्माणि। तदेतत्कर्माष्टकं पुरुषबन्धहेतुत्वाद् बन्ध इत्युच्यते। मोक्षस्तु विगलितसमस्तक्लेशतद्वासनस्य अनावरणज्ञानस्य सुखैकतानस्य स्वरूपाविर्भावः। तादृशस्य उपरिदेशावस्थानं वा। स च बन्धनिवृत्तौ नित्यसिद्धार्हदनुग्रहाद् भवतीति। एवं जीवादयः पदार्था व्याख्याताः। एतत् सर्वं वस्तुजातं सत्त्वासत्त्वनित्यत्वानित्यत्वभिन्नत्वाभिन्नत्वादिभिरनैकान्तिकमिच्छन्तः सप्तभङ्गीनयं नाम न्यायमवतारयन्ति। स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यः, स्यान्नास्ति

तद् विरोधेनासम्भवादयुक्तम् ॥ ३३ ॥

चावक्तव्यः, स्यादस्ति च स्यान्नास्ति चावक्तव्यश्चेति। स्याच्छब्दो निपा
तः। यथाहुः। वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषणं स्यान्निपातोऽर्थ-
योगित्वात्तिङन्तप्रतिरूपक इति। तदिदं दूषयन्ति * तद् विरोधेनासं-
भवादयुक्तमिति *। अयमर्थः। योऽयं सप्तभङ्गीनयो नाम न्यायः सर्वत्रा-
वतारितः स त्वयाभ्युपगतेषु जीवधर्माधर्मपुद्गलकालाकाशेषु तदवा-
न्तरविधासु अस्तिकायादिषु तद्धर्मेषु आस्रवसंवरनिर्जरेषु बन्धमोक्ष-
साधनेषु तत्फले बन्धमोक्षे चावतरन् सर्वानेव त्वदुक्तान् पदार्थान्
सत्त्वासत्त्वादिभिः स्वरूपतो नित्यत्वानित्यत्वादिभिर्धर्मतोऽव्यवस्थात-
श्च सन्दिग्धान् कुर्वंस्तद्दर्शनस्यातिपेलवत्वं तीर्थकरस्यार्हतश्च भ्रान्ति-
मेव द्योतयन् प्रेक्षावत्प्रवृत्तिमेव निरुणद्धीत्ययुक्तम् । नच यथा
घटो घटरूपेणास्ति, पटरूपेण नास्त्येवं सर्वं स्वरूपेणास्ति रूपान्तरेण
नास्तीति कथमसम्भव इति वाच्यम्। एवं सति येन रूपेणास्ति तेन
रूपेणास्त्येव, येन नास्ति तेन नास्त्येवेति तत्तद्रूपे तत्तद्भङ्गे तद्विरुद्धभ-
ङ्गासम्भवाद्, वस्तुतस्तु विषयभेदेनास्तिनास्त्योस्तत्रैकान्त्यामङ्गीकृत-
या भङ्गत्वस्यैवाभावाच्च सप्तभङ्गीनयस्यासार्वत्रिकप्रसङ्गः। यदि च
तत्राप्यस्ति सप्तभङ्गी, तदा तत्पदार्थस्वरूपमस्तीत्यपि स्यान्नास्तीत्य-
पीति स्वरूपानध्यवसानप्रसङ्गः। किञ्च। ये भङ्गरूपाः सप्तार्थास्त-
त्रापि सप्तभङ्गीसद्भावादेकोनपञ्चाशद्भङ्गीप्रसङ्गः । तेऽपि यथा
त्वयोच्यन्ते तथाऽन्यथा वेत्यनध्यवसानप्रसङ्गश्च । नच सर्वमने-
कान्तिकमित्यवधारणं निश्चितमेवेति वाच्यम् । अवधारणस्य सर्व-
मध्यपातेन तत्रापि सप्तभङ्ग्युपनिपातात् तस्याप्यनिश्चयप्रसङ्गात् ।
अतो भङ्गानां परस्परविरोधेनैकस्मिन् धर्मिण्यसम्भवादयुक्तमेवेदं
दर्शनमिति। किञ्च । या एषा सप्तभङ्गी एकैकस्मिन् योज्यते सा
केन प्रमाणेन, कुत्र वाऽवधृता इति वक्तव्यम्। प्रत्यक्षेणैव सर्वत्रेति-
चेन्न। सर्वत्रावध्रियमाणस्य सर्वजनीनत्वदर्शनान्न तत्र वादिनां वि-
प्रतिपत्तिः स्यात्। प्रत्यक्षस्य निश्चयाङ्गीकारे च तत्र नास्तीत्यादि-

भङ्गनिवृत्त्या त्वन्न्यायस्य सार्वत्रिकत्वं च भज्येत । कथनादवक्तव्यत्वं भज्येत । एवं प्रमाणान्तरेणावधारणेऽपि ज्ञेयम् । यदि च सर्वं वस्तुजातं द्रव्यपर्यायात्मकमिति द्रव्यात्मना सत्त्वैकत्वनित्यत्वादिकं व्युत्पाद्यते पर्यायात्मना च तद्विपरीतं व्युत्पाद्यते । पर्यायाश्च द्रव्यस्यावस्थाविशेषास्तेषां भावाभावरूपत्वादिकं सर्वमुपपन्नमित्युच्यते । तदाप्येकस्य वस्तुन एकस्मिन् कालेऽस्तित्वनास्तित्वयोरसम्भव एव । उत्पादविनाशशालित्वतद्वैपरीत्यरूपानित्यत्वयोश्चासम्भव एव । इदं च कालभेदेऽपि न सम्भवतीत्ययुक्त एवायमभ्युपगमः ।

> यत्तु कश्चिदनन्तवीर्यनामा स्याद्वादी ।
> तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत् ।
> स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते ॥
> क्रमेणोभयवाञ्छायां प्रयोगः समुदायवान् ।
> युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः ॥
> आद्यावाच्यविवक्षायां पञ्चमो भङ्ग इष्यते ।
> अन्त्यावाच्यविवक्षायां षष्ठभङ्गसमुद्भवः ॥

समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यते इति परेच्छाकृतव्यवस्थया सप्तभङ्गान् प्रतिपादयामास । युगपदस्तित्वनास्तित्वयोर्विवक्षायां क्रमवर्त्तित्वादुभयं युगपदवाच्यम् । आद्यास्तित्वभङ्गोऽन्त्येनासत्त्वेन सह युगपदवाच्यः । अन्त्यश्चाद्येन भङ्गेन सह युगपदवाच्यः । समुच्चितरूपश्चान्य एकैकेन सह युगपदवाच्य इति तदर्थं चाह ।

अत्रोच्यते । ये एते सप्तभङ्गा विवक्षाभेदेनोपपादितास्ते किं वस्तुनो नैसर्गिका धर्मा आगन्तुका वा, आरोपिता वा, तद्विषया वा । नाद्यः । नैसर्गिकस्य धर्मस्य स्वभावत एव वस्तुषु सत्ताया नियततया सप्तानामपि भङ्गानां विवक्षां विनापि सत्त्वप्राप्तेर्विवक्षानिवेशनस्य तत्राप्रयोजकत्वात् । न द्वितीयः । एकान्तस्य कस्यापि नैसर्गिकस्याभावे आगन्तुकस्यापि दृष्टविरोधेनाशक्यवचनत्वात् । अत एव न तृतीयोऽपि । आरोपितैर्भङ्गैर्वास्तवधर्मानैकान्त्यस्य कर्त्तुमशक्यत्वेन तस्य वैयर्थ्याच्च । न तुरीयः । अनया भङ्गकल्पनया नैसर्गिकस्यानैकान्तिकत्वायोगात् । नाप्येषां नैसर्गिकत्वम् । परस्परविरोधप्रदर्शनेन प्राचीनैरेव दूषितत्वात् । अतः सप्तानां भङ्गानामितरेतरविरोधेनासम्भवादयुक्तमेवैकत्र निवेशनम् ॥ ३३ ॥

एवञ्चात्माऽकार्त्स्न्यम् ॥ ३४ ॥

ननु कथं वहिरुदासीनस्य तद्दूषणमत आह । एवमपि सति स्वात्मनो वस्तुपरिच्छेदादकार्त्स्न्यं न सर्वत्वम् ।

अथवा शरीरपरिमाण आत्मा चेत् तदा सर्वशरीराणामतुल्यत्वादात्मनो न कार्त्स्न्यं न कृत्स्नशरीरतुल्यत्वम् ॥ ३४ ॥

नच पर्यायादप्यविरोधो विकारादिभ्यः ॥ ३५ ॥

शरीराणामवयवोपचयापचयानुसारेणात्मनोऽपि देवतिर्यङ्मनुष्येषु अवयवोपचयापचयाभ्यां तत्तुल्यता स्यात् । तथा सति

एवञ्चात्माकार्त्स्न्यम ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * व्याकुर्वन्ति । * एवमित्यादि * । एवमात्मनिष्ठतया तद्दूषणेऽनङ्गीकृतेऽपि सति परमाणुभ्य एव सुष्ठ्वङ्गीकारेणात्मनो वस्तुपरिच्छेदाङ्गीकाराद् अकार्त्स्न्यं, सर्वत्वं न भवति। तथाच मोक्षदशायामलोकाकाशवर्त्तित्वेन तत्कृतावरणसम्भवान्निरावरणप्रतिज्ञाहानिः । किञ्च । सर्ववस्तुष्वात्माभावादात्मनामस्तिकायत्वप्रतिज्ञाहानिश्चेत्यर्थः । अथाकाशावरणं नावरणम् । दिगम्बरेष्वनावृतत्वव्यवहारात्। आत्मनामसर्वत्वेऽपि जातिवत् तत्र तत्र व्याप्तेः सुवचनत्वेन जीवास्तिकायस्य न हानिरित्याशङ्क्य पक्षान्तरमाहुः * अथवेत्यादि * । यथा वहिर्विरोधेन सप्तभङ्गायोगो दूषणम्, एवमेव देहपरिमाणात्मवादाङ्गीकारेण देहानां सर्वेषां व्यक्तिभेदेनावस्थाभेदेन चातुल्यत्वान्मनुष्यजीवस्य केनचित् कर्मणा गजशरीरे प्रवेशे शरीरैकदेश एव स जीवः स्यादेकदेशान्तरं च जीवशून्यं स्यात् । नच सिद्धान्तवद् गुणव्याप्त्या दोषः परिहर्त्तव्य इत्यपि युक्तम् । तथा सत्यणुत्वत्यागायोगात् । चकारात् पिपीलिकादिदेहे प्रविशंस्तत्र न सम्मीयेतेत्यपि सूच्यते ॥ ३४ ॥

नच पर्यायादप्यविरोधो विकारादिभ्यः ॥ किञ्चिदाशङ्क्य परिहरतीत्याशयेन व्याकुर्वन्ति * शरीराणामित्यादि * । अयमर्थः ।

पर्यायेणाविरोध इति न वक्तव्यम् । तथा सति विकारापत्तेः । सङ्कोचविकासेऽपि विकारस्य दुष्परिहरत्वात् ॥ ३५ ॥

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ ३६ ॥

अन्त्यावस्थितिर्मुक्तिसमयावस्थितिस्तस्माद्धेतोः । पूर्वदोषपरिहाराय च उभयनित्यत्वं भवेदणुत्वं वा, महत्त्वं वा । उभयथापि शरीरपरिमाणो न भवतीति न तवार्थसिद्धिः ॥ ३६ ॥

जीवो हि नानाविधेन कर्माष्टकेन ज्ञानावरणीयादिना तत्तच्छरीरेषु प्रविशति । ततो निर्गच्छति च । तानि च शरीराणि नानापरिमाणानीति तेषां शरीराणामवयवोपचयापचयानुसारेण देवादिशरीरप्रविष्टजीवस्याप्यवयवोपचयापचयाभ्यां तत्तच्छरीरपरिमाणता वक्तुं शक्यते । तथा सति पर्यायाख्येनावस्थाविशेषेण क्रमिकेण प्रवेशेन वा परिमाणस्याविरोध इति सूत्रांशेनाशङ्क्य, नचेति परिहरति । एवं न वक्तव्यम् । कुतः ? । विकारादिभ्यः । विकारस्यावयवत्वानित्यत्वानां प्रसक्तेर्लौकायतमतादविशेषः । किञ्च । तेऽवयवाः कुत्र गच्छन्ति, तिष्ठन्ति च महान्तं कालं, कुतश्चायान्तीत्यपि निर्द्धारयितुमशक्यम् । अथ न ततोऽपगच्छन्ति, किन्तु स्वल्पशरीरप्राप्तौ घटे दीपावयववद् मुष्ट्यादिस्थितपटवद् वा सङ्कुच्य तिष्ठन्ति, पुनर्बृहच्छरीरप्राप्तौ विकाशं प्राप्नुवन्तीति विभाव्यते, तदापि विकारवत्त्वं तु दुष्परिहरम् । तथा सत्यनित्यत्वापाताद् बन्धमोक्षाङ्गीकारो बाध्येतेति ॥ ३५ ॥

अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ दूषणान्तरं वदतीत्याशयेनाहुः । * अन्त्येत्यादि * । दिगम्बरैर्हि मोक्षावस्थागतो यो जीवस्तत्परिमाणमवस्थितमिष्यते । मुक्तस्य जीवस्य देहान्तराभावात् तन्नियतं परिमाणम् । एवं सति त्वदङ्गीकृता या अन्त्यपरिमाणनित्यता तस्माद्धेतोः । चकाराच्चार्वाकमतं वारयितुं विकारादिप्राप्तं यज्जीवानित्यत्वं तत्परिहाराय उभयनित्यत्वाद् उभयोः संसार

पत्युरसामञ्जस्यात् ॥ ३७ ॥

पराभिमेताजडजीवान्निराकुर्वेश्वरं निराकरोति ।
वेदोक्तादणुमात्रेऽपि विपरीतं तु यद् भवेत् ।
तादृशं वा स्वतन्त्रं चेदुभयं मूलतो मृषा ॥
तार्किकादिमतं निराकरोति ।

मोक्षावस्थयोर्जीवपरिमाणस्य नित्यत्वं भवेत् । अणुत्वं वा महत्वं वा संसारिजीवपरिमाणं नित्यम् । नित्यद्रव्यपरिमाणत्वात् । आकाशादिपरिमाणवत् । जैवान्त्यपरिमाणवद्वेत्यनुमानात् । अन्यथा विपरीतानुमानादन्त्यपरिमाणस्याप्यनित्यत्वं स्यात् । अतोऽविशेषः । उभयथापि जीवः शरीरपरिमाणो न सेत्स्यतीति न तवाभिमतार्थसिद्धिरित्यर्थः । एवमार्हतान् यौक्तिकानवगत्य कश्चित्तद्दर्शने श्रद्धालुर्मैवेदिति तस्यापि निवारणं कृतम् ॥

एतेषु षट्स्वप्यधिकरणेषु ब्रह्म जगदुपादानं न वेति सन्देहस्तत्तन्मतविरोधः सन्देहबीजं, नेति पूर्वः पक्षः, सर्वसमयानामयुक्तत्वाद् ब्रह्मैवोपादानमिति सिद्धान्तो ज्ञेयः । षष्ठे तु ब्रह्मैव विरुद्धधर्माधारं, नेतरदिति नियमो युक्तो, न वेति सन्देहः, स्याद्वादिभिः सर्वत्र तथाभ्युपगमात्नेति पूर्वः पक्षः । स्याद्वादस्यासङ्गतत्वाद् ब्रह्मैव तथेति नियमो युक्तः पर श्रुत्या सत्तप्रत्यक्षेण च प्रामतत्वादिति सिद्धान्त इति प्रकारान्तरमधिकं ज्ञेयम् ॥ ३६ ॥ ६ ॥

पत्युरसामञ्जस्यात् ॥ अधिकरणमवतारयन्ति । *.परेत्यादि * । तथा च पत्युरिति षष्ठमेवाधिकरणमष्टकम् । पूर्वमते पत्युरभावात् । तेन स्मृतिसिद्धस्य पत्युरिदानीं निराकरणं प्रस्तूयत इत्यर्थः । नन्वीश्वरवादस्य वेदानुसारित्वात् कुतस्तन्निराकरणमित्यत आहुः । * वेदोक्तेत्यादि * । * तादृशमिति * । वेदोक्तात् सर्वप्रकारैर्विपरीतम् । तथाचेतो हेतोर्बाह्याबाह्यनिराकरणमित्यर्थः । पराभिप्रेतेश्वरनिकरणेऽपि विशेषमाहुः । * तार्किकादीति * । तार्किका नैयायिका, वैशेषिकाश्च । आदिपदेन हैरण्यगर्भाः, पातञ्जलाः, काप्र-

लिकाः, कालामुखाः, पाशुपताः, शैवाश्च । तत्र तार्किकमते नित्यज्ञानेच्छाप्रयत्नाख्यविशेषधर्मवान् स्वाभाविकशरीररहितो जीवादृष्टसम्पादितं शरीरं भूतावेशन्यायेनाविश्य कार्यं जगत् करोति । हैरण्यगर्भादीनां मते क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः प्रधानपुरुषाभ्यामन्यस्तदधिष्ठाता शुद्धसत्त्वशरीरो जगन्निर्मिमीते । कापालिकादीनां चतुर्णां मते तु निमित्तकारणं पशुपतिरीश्वरः । सर्वेऽप्येत ईश्वरे जगदुपादानत्वं नेच्छन्ति । निमित्तकारणत्वमात्रमाहुः । तथा तार्किकाः प्रमाणादिषोडशपदार्थतत्त्वज्ञानाद् द्रव्यादिसप्तपदार्थानां साधर्म्यवैधर्म्यज्ञानाच्च यथायथं मोक्षमाहुः । योगिनश्च नित्यानित्यवस्तुविवेकमात्रात् । कापालिकास्तु 'तोकमं च कारुकं चैव कुण्डलं च शिखामणिः । भस्म यज्ञोपवीती च मुद्राषट्कं प्रचक्षते । आभिर्मुद्रितदेहस्तु न भूय इह जायते । मुद्रिकाषट्कतत्त्वज्ञः परमुद्राविशारदः । भगासनस्थमात्मानं ध्यात्वा निर्वाणमृच्छती'त्यादिकमाहुः । तथा कालामुखा अपि कपालपात्रभोजनशवभस्मस्नानतत्प्राशनलगुडधारणसुराकुम्भस्थापनतदाधारदेवपूजादिकम् ऐहिकामुष्मिकसकलफलसाधनमभिदधति । तथा शैवा अपि'रुद्राक्षकङ्कणं हस्ते जटा चैका च मस्तके । कपालं भस्मना स्नानमि'त्याद्याहुः । तथा केनचित् क्रियाविशेषेण विजातीयानामपि ब्राह्मण्यप्राप्तिमुत्तमाश्रमप्राप्तिं चाहुः । 'दीक्षाप्रवेशमात्रेण ब्राह्मणो भवति क्षणात् । कापालं मतमास्थाय यतिर्भवति मानव' इति । पाशुपतशास्त्रमपि पशुपतिनेश्वरेण प्रणीतं पञ्चाध्यायि । तत्र पञ्च पदार्थाः । व्याख्यान्ते । कारणं, कार्यं, योगो, विधिर्दुःखान्त, इति । कारणमीश्वरः । कार्यं प्रधानं महदादि च । योगोऽप्योङ्कारादिध्यानधारणादि । विधिस्त्रिषवणस्नानादि, गूढचर्यावसानो दुःखान्तो मोक्षः।पशवः संसारिण आत्मानस्तेषां पाशो बन्धनम् । तद्विमोक्षो दुःखान्तः । पाशुपतशैवेशेषिकनैयायिककापालिकानां मुक्त्यवस्थायामशेषविशेषगुणोच्छित्त्या पाषाणकल्पा आत्मानो भवन्ति । सांख्यशैवयोश्चैतन्यस्वभावास्तिष्ठन्तीति भेदः । ईश्वरं निमित्तकारणं मन्वानानामयमाशयः । चेतनस्य खल्वधिष्ठातुः कुलालादेः स्वस्वकार्ये कुम्भादिरूपे निमित्तत्वमात्रं दृष्टं, न तू पादानत्वमपि । अत ईश्वरोऽप्यधिष्ठाता जगतो निमित्तमेव, न तूपादानम् । एकस्यैकस्मिन्नेव निमित्तत्वोपादान-

पतिश्चेदीश्वरस्तस्माद् भिन्नस्तदा विषमकरणाद् वैषम्यनैर्घृण्ये स्याताम् । कर्मापेक्षायां त्वनीश्वरत्वं युक्तिमूलत्वाद्दोषः । असामञ्जस्याद्धेतोर्न पतित्वेनेश्वरसिद्धिः ॥ ३७ ॥

सम्बन्धानुपपत्तेश्च ॥ ३८ ॥

जीवब्रह्मणोर्विभुत्वादजसंयोगस्यानिष्टत्वात् पतित्वानुपपत्तिः । तुल्यत्वादप्यनुपपत्तिरिति चकारार्थः ॥ ३८ ॥

त्वयोर्विरुद्धत्वादिति प्राप्तम् । तत्रेदमुच्यते ॥ पत्युरसामञ्जस्यादि-ति॥किमसामञ्जस्यमित्याकाङ्क्षायां विवृण्वते । * पतिश्चेदित्यादि * । ननु वैषम्यनैर्घृण्यसूत्रे कर्मसापेक्षत्वेन स्वयमेव दोषः परिहृत इति कथं तत्कृतमसामञ्जस्यमिहोच्यत इत्यत आहुः । * कर्मेत्यादि * । तत्र हि, पुण्यः पुण्येन कर्मणा भवतीति, एष उ एव साधु कर्म कारयतीत्यादिश्रुतिसिद्धं विरुद्धधर्माश्रयत्वं स्थापयितुं तथोक्तम् । एते तु न तथा वदन्ति, किन्तु दृष्टानुसारेण कल्पनया । श्रुतिसिद्धस्य त्रिगुणातीतसाकारेश्वरस्वरूपस्यानङ्गीकारात् । योगिभिः शुद्धसत्त्वोपाधिकस्य नैयायिकैर्ज्ञानेच्छाप्रयत्नातिरिक्तविशेषधर्मरहितस्याशरीरस्याङ्गीकारेण तद्दर्शनेषु तद्विरोधस्य स्फुटत्वात् । माहेश्वरमतेऽपि त्रिलोचननीलकण्ठादिविशिष्टरूपाङ्गीकारेण, तादृशस्य च नारायणोपनिषदादौ नारायणादुत्पत्तेरुक्तत्वात् तदनङ्गीकारेण विरोधस्य स्फुटत्वात् । तत् सर्वं मया प्रहस्ते प्रपञ्चितमिति नात्रोक्तम् । अतो यत् तैरङ्गीक्रियते तद् युक्तिमूलमेवाङ्गीक्रियते, न तु श्रुतिसिद्धम् । अतो वेदविरुद्धयुक्तिमूलत्वाद्दोष इत्यर्थः । सूत्रे साध्यनिर्देशस्याभावात् पूर्वाधिकारणस्थब्रह्मशब्दस्यानुवृत्त्या साध्याकाङ्क्षापूर्तिरित्याशयेनाहुः । * असामञ्जस्यादित्यादि * । सूत्रयोजना तु तार्किकाद्यभिमतः पतिर्नोपपद्यते । कुतः ? । असामञ्जस्यात् । तथाच वैषम्यादिरूपात् तस्मात् तथेत्यर्थः ॥ ३७ ॥

सम्बन्धानुपपत्तेश्च ॥ दृष्टानुसारेण दूषणान्तरं वदन्तीत्याहुः । * जीवेत्यादि * । निमित्तमात्रत्वाङ्गीकारेण जीवपरमाण्वा-

अधिष्ठानानुपपत्तेश्च ॥ ३९ ॥

स चेश्वरो जगत्कर्तृत्वेन कल्प्यमानो लौकिकन्यायेन कल्पनीयः । स चाधिष्ठित एव किञ्चित् करोतीतीश्वरेऽप्यधिष्ठानमङ्गीकर्तव्यम् । तस्मिन् कल्प्यमाने मतविरोधोऽनवस्था असम्भवश्च ॥ ३९ ॥

दीनां प्रधानस्य च नित्यत्वाङ्गीकारेण तन्निरूपितसमवायस्य तदभिमतेश्वरे अभावात् समवायसम्बन्धस्यानुपपत्तेः । जीवब्रह्मणोर्विभुत्वादनवयवत्वाच्च कर्मजस्यावयवजस्य च संयोगस्य वक्तुमशक्यतया अन्यस्य तस्याभावादजसंयोगस्य चानित्यत्वाद् वैषम्याद्यापत्त्या प्रयत्नेनादेरशक्यवचनत्वेन ईशनप्रयोजकतया स्वरूपसम्बन्धस्यायुक्तत्वात् पतित्वानुपपत्तिः । नच स्वरूपसम्बन्धान्तराभावेऽपि स्वस्वामिभाव एव सम्बन्धोऽस्त्विति वाच्यम् । यतः सर्वगतत्वचिद्रूपत्वादिना तुल्यत्वाददृष्टेनैव तत्तद्भोगोपपत्तेश्चेशानस्याप्रयोजकत्वादपि पतित्वानुपपत्तिरिति चकारसूचितोऽर्थः । एतेनैव प्रधानेशनमप्यनुपपन्नमिति व्याख्यातम् । तस्यापि व्यापकत्वमहदादिजननस्वभावतयाङ्गीकारेण तदीशानस्याप्यप्रयोजकत्वादिति । तथाचानुपपन्नं तार्किकादिमतमित्यर्थः । भाष्येऽनुल्लेखस्तूपलक्षणविधया अनुक्तसिद्धत्वाज्ज्ञातव्यः ।

इदं सूत्रं रामानुजभट्टभास्करशैवभिक्षुभिर्न लिखितम् । मध्वशङ्कराभ्यां तु लिखितम् ॥ ३८ ॥ ७ ॥

अधिष्ठानानुपपत्तेश्च ॥ तार्किकमते दूषणान्तरमन्यदप्याहेत्याहुः । * स चेत्यादि * । अधिष्ठानं शरीरम् । अयमर्थः । कार्यत्वादिलिङ्गकानुमानैर्जगत्कर्तृत्वेन कल्प्यमान ईश्वरो लौकिकन्यायेनोपादानगोचरापरोक्षज्ञानचिकीर्षायत्नवत्तया कल्पनीयः । लौकिकश्च कर्ता शरीरमधिष्ठायैव करोतीतीश्वरेऽपि शरीराधिष्ठानमङ्गीकर्त्तव्यम् । नचाशरीरस्यैव कर्तृत्वम् । मनसो नित्यत्वेऽप्यशरीरेषु मुक्तेषु मानसकार्यादर्शनात् तत्र दृष्टान्ताभावेन व्याप्यानवता-

करणवच्चेन्न भोगादिभ्यः ॥ ४० ॥

करणवदङ्गीकारे असम्बन्धदोषः परिहृतो भवति । तच्च न युक्तम् । भोगादिप्रसक्तेः ॥ ४० ॥

यात् । अतः शरीराधिष्ठानमवश्यमङ्गीकर्तव्यम् । अन्यथा दृष्टविरोधेन प्रतिवादिनं पर्यनुयुञ्जानस्य तवैव निग्रहात् । तस्मिंश्च कल्प्यमाने नित्यानित्यविकल्पेन मतविरोधः । सावयवस्य शरीरस्य नित्यत्वे जगतोऽपि नित्यत्वाविरोधादीश्वरासिद्धेः । नच तन्निरवयवम् । अदर्शनादसिद्धेः । अथानित्यम् । तर्हि तस्य कः कर्ता । न तावज्जीवः । तस्याशरीरस्य तत्रासामर्थ्यात् । सोऽपि सशरीरश्चेत् तस्यापि कर्त्रन्तरविचारेऽनवस्थाप्रसङ्गः । अथ स्वयमेव स्वशरीरं भूतावेशन्यायेनाविश्य करोतीतिचेत् तदाप्युक्तैवानवस्था । अतो चक्रलेपायितैवाधिष्ठानानुपपत्तिः । चकारोऽनुक्तानां दोषाणां समुच्चायकः । ते च जन्माद्यधिकरणे प्रपञ्चितास्ततोऽवगन्तव्याः ।

माध्वास्तु—अधिष्ठानपदे आधारं व्याकुर्वन्ति, निराधारस्य कर्तृत्वं न दृष्टमिति ॥ ३९ ॥

करणवच्चेन्न भोगादिभ्यः ॥ परोक्तं परिहारमाशङ्क्य दूषयतीत्याहुः । * करणवदित्यादि * । करणवदिति द्वितीयार्थे वतिः । तथाच यथा शरीररहितोऽपि जीवः करणग्रामं मनश्चक्षुरादिकमधितिष्ठति स्वस्वकार्ये प्रेरयति, तथा ईश्वरोऽप्यशरीरः सर्वाञ्जीवानधिष्ठास्यति । प्रधानपुरुषौ चाधिष्ठास्यति । अधिष्ठानं चात्र स्वस्वकार्ये नियोजनम् । एवञ्चासम्बन्धदोषोऽपि परिहृतो भवति । श्रेणीमुख्यवत् स्वस्वामिभावेनैव निर्वाहादितिचेन्नेदं युक्तम् । कुतः? । भोगादिभ्यः*भोगादिदोषप्रसक्तेः । यथा हि करणान्यधितिष्ठञ्जीवः पुण्यपापाभ्यां सुखदुःखभोगभाग् भवति, तत्र रागद्वेषादिवांश्च । तथैवेश्वरोऽपि भवेत् । तत्र तदसत्त्वे नियामकाभावात् । नचैश्वर्यस्य नियामकत्वम् । लौकिकैश्वर्यवत्स्वपि तेषां दर्शनात् । नापि निरतिशयितरूपाया ऐश्वर्यकाष्ठायाः । केवलाभियुक्तिभिस्तस्या एवासिद्धेः । अतो नानेनापि दृष्टान्तेनाधिष्ठानसम्भव इत्यर्थः ॥ ४० ॥

उत्पत्तिपक्षे जीवस्योत्पत्तिर्न सम्भवति । तथा सति पूर्ववत् सर्वनाशः स्यात् ॥ ४२ ॥

न च कर्तुः करणम् ॥ ४३ ॥

कर्तुः सङ्कर्षणसंज्ञकाज्जीवात् प्रद्युम्नसंज्ञकं मन उत्पद्यते इति । तल्लोके न सिद्धम् । न हि कुलालाद्दण्ड उत्पद्यत इति । चकारादग्रिमस्य निराकरणम् ॥ ४३ ॥

विज्ञानादिभावे वा तदप्रतिषेधः ॥ ४४ ॥

यद्यस्य ब्रह्मणि सिद्धत्वाद्, अजायमानो बहुधा विजायत इति श्रुत्याने-कव्यूहतायामप्युत्पत्तेः श्रावणाच्च नात्रापि श्रुतिविरोध इत्यत आ-हुः । * उत्पत्तीत्यादि * । न जायते न म्रियते वा विपश्चिदिति श्रु-त्या जीवस्य तदुभयनिषेधादुत्पत्त्यङ्गीकारे च तस्यानित्यतायां मो-क्षाभावः । कार्यस्य कारणे लयप्रसङ्गात् । ततो मोक्षशास्त्रवैफल्यं च स्यात् । ब्रह्मवद् विरुद्धधर्माधारत्वस्य जीवे श्रुत्या अनुक्तत्वात् । व्यु-च्चरणं तु नोत्पत्तिः, किन्तु विभागमात्रमतो न दोषः । ननु तस्य त-न्त्रस्य भगवत्प्रणीतत्वादस्मिन्नप्यंशे कथं विरोध इति शङ्क्यम् । कौ-र्मे चतुर्दशाध्याये गौतमशप्तानां मुनीनामर्थे 'तस्माद्धि वेदबाह्यानां रक्षणार्थाय पापिनाम् । विमोहनाय शास्त्राणि करिष्यावो वृषध्वज । एवं सम्बोधितो रुद्रो माधवेन मुरारिणा । चकार मोहशास्त्राणि केशवोऽपि शिवेरितः । कापालं लागुडं वामं भैरवं पूर्वपश्चिमम् । पा-ञ्चरात्रं पाशुपतं तथाऽन्यानि सहस्रशः' इति । साम्बपुराणे च । 'पा-ञ्चरात्रं भागवतं तन्त्रं वैखानसाभिधम् । वेदभ्रष्टान् समुद्दिश्य कम-लापतिरुक्तवानि'ति वाक्यात्तावतोऽशस्य बुद्धिपूर्वकमेव तत्र स्थाप-नात् । अतो न कश्चिद्दोषः ॥ ४२ ॥

न च कर्तुः करणम् ॥ * अग्रिमस्येति * अहङ्कारस्य । अत्रापि लोकश्रुत्योर्विरोध एव दोषः । स्फुटमन्यत् ॥ ४३ ॥

विज्ञानादिभावे वा तदप्रतिषेधः ॥ पक्षान्तरं प्रतिक्षिपतीत्या-

अथ सर्वे परमेश्वरा विज्ञानादिमन्त इति तथा सति तदप्रतिषेधः। ईश्वराणामप्रतिषेधः। अनेकेश्वरत्वं च न युक्तमित्यर्थः। वस्तुतस्तु स्वातन्त्र्यमेव दोषः ॥ ४४ ॥

विप्रतिषेधाच्च ॥ ४५ ॥

बहुकल्पनया वेदनिन्दया च विप्रतिषेधः।
चकाराद् वेदप्रक्रियाविरोधः ॥ ४५ ॥

इति श्रीवेदव्यासविष्णुस्वामिमतवर्तिश्रीवल्लभाचार्यविरचिते ब्रह्मसूत्राणुभाष्ये द्वितीयाध्यायस्य
द्वितीयः पादः ॥ २ ॥ २ ॥

दुः। * अथेत्यादि *। * विज्ञानादिमन्त इति * विज्ञानैश्वर्यशक्तिबलवीर्यतेजःप्रभृतिपारमेश्वरधर्मान्विताः। अप्रतिषेधः * अनियमनम्। शेषं स्फुटम् ॥ ४४ ॥

विप्रतिषेधाच्च ॥ * बहुकल्पनयेत्यादि * प्रद्युम्नाख्यं मनोऽनिरुद्धोऽहङ्कार इति करणत्वमहङ्कारत्वं चाभिधाय सर्वे एते वासुदेवा आत्मान एवेति परमेश्वरत्वादिकल्पनया, शाण्डिल्यश्चतुर्षु वेदेषु परं श्रेयोऽलब्ध्वा इदं शास्त्रमधीतवानित्यादिरूपया वेदनिन्दया च लोकविरोधो वेदविरोधश्चेत्यर्थः। * वेदप्रक्रियाविरोध इति * तप्तचक्रादिधारणरूपसाधनप्रकारविरोधः।

एवञ्च मोक्षधर्मे नरनारायणीये 'सांख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा। ज्ञानान्येतानि राजर्षे विद्धि नानामतानि वै। सांख्यस्य वक्ता कपिलः परमर्षिः स उच्यते। हिरण्यगर्भो योगस्य वक्ता नान्यः पुरातनः। अपान्तरतमश्चैव वेदाचार्यः स उच्यते। प्राचीनगर्भं तमृषिं प्रवदन्तीह केचन। उमापतिर्भूतपतिः श्रीकण्ठो ब्रह्मणः सुत.। उक्तवानिदमव्यग्रो ज्ञानं पाशुपतं शिवम्। पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्। सर्वेष्वपि नृपश्रेष्ठ ज्ञानेष्वेतेषु द-

अथ द्वितीयाध्यायस्य तृतीयः पादः ।

न वियदश्रुतेः ॥ १ ॥

श्रुतिवाक्येषु परस्परविरोधः परिह्रियते विप्रतिषेधपरिहाराय । मीमांसायास्तदर्थं प्रवृत्तत्वात् । शक्त्यविरोधाभ्याम् । तथाच ब्रह्मवादे जडजीवयोर्विरुद्धांशनिराकरणाय तृतीयपादारम्भः ।

द्विविधा हि वेदान्ते सृष्टिः । भूतभौतिकं सर्वं ब्रह्मण एव

न वियदश्रुतेः ॥ तृतीयपादं व्याचिख्यासवस्तत्प्रयोजनं सङ्गतिं चाहुः । * श्रुतीत्यादि * । द्वितीयपादे श्रुतिविरुद्धस्मृतिनिराकरणेन तद्विरोधस्याकिञ्चित्करत्वख्यापनात् तासामेव प्रमेयविरोधो, न श्रुतेः स इत्येवं प्रमेयाविरोधः स्थापितः । तृतीये पादे श्रुतिवाक्येषु परस्परविरोधः परिह्रियत विप्रतिषेधपरिहाराय । विरोधकृतो यः प्रामाण्यप्रतिषेधस्तन्निवृत्तये । नचानावश्यकत्वं शङ्क्यम् । मीमांसायास्तदर्थे प्रवृत्तत्वात् । शक्त्यविरोधाभ्याम् । यदा हि लोकानां मौढ्यकृतसन्देहशावद् वेदार्थावगमसामर्थ्याभाव आचार्येण दृष्टस्तदा वेदार्थभूतस्य ब्रह्मणः सामर्थ्यं वेदवाक्यानां परस्परविरोधाभावं च स्वयमाकलय्य ताभ्यां कृत्वा प्रमेयाविरोधार्थमीमांसां प्रवर्त्तितवानिति । नच प्रथमपाद एवाविरोधस्य विचारितत्वादस्य गतार्थत्वं शङ्क्यम् । यथा तत्र शक्त्यविरोधाभ्यां ब्रह्मणि विरुद्धांशं परिहृतवांस्तथा च * तेन प्रकारेणैव । चोवधारणे । ब्रह्मवादे * सर्वं ब्रह्मेति वादे जडानां जीवानां च ब्रह्मत्वाज्जडजीवयोः सम्बन्धी यो विरुद्धांशस्तन्निराकरणाय तृतीयपादारम्भ इत्येवं सार्थक्यात् । तथाचेदं पादस्य प्रयोजनम् । प्रासङ्गिकं पूर्वपादे परिहृत्य पुनः प्रस्तुतस्य श्रुत्यविरोधस्यैव विचारादवसरः सङ्गतिरित्यर्थः । ननु यद्यपि ब्रह्मवादे जडजीवयोर्ब्रह्मत्वं तथापि गौणमुख्यभावस्त्वसन्दिग्धः, पूर्वं तथा निर्णीतत्वात् । अतो मुख्यविचारमतिहाय किमित्येष आरभ्यत इत्याकाङ्क्षायामाहुः । * द्विविधेत्यादि * । तथाच जन्माद्यधिकरण-

विस्फुलिङ्गन्यायेनैका। अपरा वियदादिक्रमेण। सा चानामरूपात्मना नामरूपत्ववत्त्वेनाभिव्यक्तिः। सजडस्यैव कार्यत्वात् तस्य जीवस्य त्वंशत्वेनैव न नामरूपसम्बन्धः।

अनित्ये जननं नित्ये परिच्छिन्ने समागमः।
नित्यापरिच्छिन्नतनौ प्राकट्यं चेति सा त्रिधा॥

तत्र क्रमसृष्टौ सन्देहः। छान्दोग्ये हि, सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युपक्रम्य तदैक्षत तत् तेजोऽसृजतेति तेजो-

---

विषयपरिशोधार्थे एवायं प्रपञ्च इति नास्य गौणत्वमित्यर्थः। एकः, अपर इति पुंलिङ्गपाठे तु प्रकारो विशेष्यत्वेन व्याख्येयः। प्रातिपदिकसंज्ञायाः सुपो लुगुच्यत इति महाभाष्यादौ विभक्तिपदाध्याहारेण योजनया प्राचीनशैल्यास्तथात्वावगमात्। ननु सर्वस्य ब्रह्मरूपत्वे सृष्टिरेवासङ्गता। तस्या उत्पत्तिरूपत्वात्। ब्रह्मणश्चाजत्वादित्याकाङ्क्षायामाहुः। * सा चेत्यादि *। * न नामरूपसम्बन्ध इति * न प्रतिनियतनामरूपसम्बन्धः। तथाच प्रलयदशायां कार्यस्य कारणे लयानन्तरं तस्य परमकारणेन ब्रह्मणैकीभावात् प्रतिनियतनामरूपशून्यत्वेनानामरूपत्वं तादृशस्य या प्रतिनियतनामरूपत्वेनाभिव्यक्तिः प्रकाशः सैव सृष्टिर्न तु नैयायिकादीनामिवासतः सत्तारूपा। अतस्तस्या अजत्वाविरोधित्वान्नासङ्गतत्वमित्यर्थः। एतेन कालविशेषे प्रतिनियतनामरूपशालित्वं कार्यत्वमित्यपि व्याख्यातम्। अत एव कटककुण्डलादौ सुवर्णकार्यत्वव्यवहारो न सुवर्णशकले, तथात्रापि जडजीवयोर्बोध्यम्। नन्वेवं सति ब्रह्मणो जीवकारणता न स्यात् तथा सति तत्र जीवनियामकतापि भज्येतेत्यत आहुः। * अनित्य इत्यादि *। * सेति * अभिव्यक्तिः। तथाच त्रिविधाया अप्यभिव्यक्तेर्ब्रह्माधीनत्वात् तिसृष्वपि ब्रह्मणः कारणत्वमक्षुण्णमिति नियामकताप्यक्षुण्णेत्यर्थः। एवं प्रासङ्गिकं परिहृत्य प्रस्तुतं व्याकर्तुं तदावश्यकताबीजमाहुः। * तत्र क्रमेत्यादि * तथाचैवं सत्यामेकवाक्यतायामेकश्रोक्तत्वादन्यत्रानुक्तत्वाच्च सन्देह

इयते । यथागमं यथान्यायं निष्ठा नारायणः प्रभुः । नचैनमेवं जानन्ति तमोभूता विशांपते । तमेव शास्त्रकर्त्तारः प्रवदन्ति मनीषिणः । निष्ठां नारायणमृषिं नान्योऽस्तीति वचो मम । निःसंशयेषु धर्मेषु नित्यं संवसते हरिः । ससंशये तु भगवाञ्चाऽध्याऽऽवसति माधवः । पञ्चरात्रविदो ये तु यथाक्रमपरा नृप । एकान्तभावोपगतास्ते हरिं प्रविशन्ति वै । सांख्यं च योगश्च सनातनं वै वेदाश्च सर्वे निखिलेन राजन् । सर्वैः समस्तैर्ऋषिभिर्निरुक्तो नारायणो विश्वमिदं पुराणमि'ति सर्वेषां भगवत्परत्वं वदतां पञ्चरात्रविदां भगवत्प्राप्तिं च वदताम् । 'सांख्यं योगः पञ्चरात्रं वेदाः पाशुपतं तथा । आत्मप्रमाणान्येतानि न हन्तव्यानि हेतुभिरि'ति च वदतामपि वाक्यानां न विरोधः ।

'अक्षपादप्रणीते च काणादे सांख्ययोगयोः । त्याज्यः श्रुतिविरुद्धोंऽशः श्रुत्येकशरणैर्नृभिः । जैमिनीये चे'ति पराशरोपपुराणीयवाक्योक्तस्य श्रुतिविरुद्धांशस्य कौर्मादिवाक्योक्तस्य विमोहनांशस्य च दूषणमुखेनात्र स्फुटीकरणात् । बहुषु भाष्येष्वेवं व्याख्यानदर्शनेन प्राचीनवृत्तिष्वप्येतादृशव्याख्यानानुमानात् । तेनात्रेदं निष्पन्नम् । सांख्ये हि प्रकृतिपुरुषपर्यन्तता निरीश्वरता च श्रुतिविरुद्धा । सेश्वरसांख्ये च तदैश्वर्यस्य प्रधानाधीनता केवलनिमित्तता । तथैव योगेऽपि । तदननुसन्धाय तत्र प्रवृत्तानां जीवन्मुक्ताभवनोत्तरमपि पातः । तयोर्भगवन्निष्ठताया अज्ञानात् । तदत्रैवोक्तं, नचैनमित्यर्धेन । दशमस्कन्धे च 'येऽन्येऽरविन्दाक्ष विमुक्तमानिनस्त्वय्यस्तभावादविशुद्धबुद्धयः । आरुह्य कृच्छ्रेण परं पदं ततः पतन्त्यधोऽनादृतयुष्मदङ्घ्रय'इति । तयोर्भगवत्परत्वज्ञाने तु देवहूतिवत्कृतार्थता । तदप्युक्तं द्वितीयस्कन्धे । जज्ञे च कर्दमगृहे द्विजदेवहूत्यां स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे । ऊचे ययाऽऽत्मशमलं गुणसङ्गपङ्कमस्मिन् विधूय कपिलस्य गतिं प्रपेद'इति । एवं पाशुपतेऽपि साधनादिकं पशुपतेः परत्वं च श्रुतिविरुद्धम् । तन्मयाऽत्र प्रागेवान्तस्तद्धर्माद्यधिकरणेषु व्युत्पादितं, प्रहस्ते च प्रपञ्चितम् । अतस्तावन्मात्रपरतायां पूर्ववत् पातः । भगवदङ्घ्र्यनादरणात् । 'त्वामेवाऽन्ये शिवोक्तेन मार्गेण शिवरूपिणम् । बह्वाचार्यविभेदेन भगवन् समुपासते'इत्यक्रूरोक्तरीत्या भगवत्परत्वज्ञाने तु क्रमान्मुक्तिः ।

तदप्युक्तं पद्मपुराणे समाविंशत्यां विष्णुमायानुकीर्त्तनाध्याये व्यासेन 'अन्यदेवेषु या भक्तिः पुरुषस्येह जायते । कर्मणा मनसा वाचा तद्गतेनान्तरात्मना । तेन तस्य भवेद्भक्तिर्यजने मुनिसत्तमाः । स करोति ततो विप्रा भक्तिं चाग्नेःसमाहितः। तुष्टे हुताशने तद्भक्तिर्भवति भास्करे। पूजां करोति सततमादित्यस्य ततो द्विजाः । प्रसन्ने भास्करे तस्य भक्तिर्भवति तत्त्वतः । सेवां करोति विधिवत् स तु शम्भोः प्रयत्नतः । तुष्टे त्रिलोचने तस्य भक्तिर्भवति केशवे । सम्पूज्य तं जगन्नाथं वासुदेवाख्यमव्ययम् । ततो भुक्तिं च मुक्तिं च स प्राप्नोति द्विजोत्तमाः' इति । एवं पञ्चरात्रेऽपि यो विरुद्धांशस्तदननुसन्धाने विमोहकत्वान्न मुक्तिः। तदनुसन्धाय तदंशत्यागे तु तदुक्तसाधनपाकेन साक्षादेव मुक्तिः। पञ्चरात्रविद् इति मोक्षधर्मीयवाक्यात् । अतो न कस्यापि वाक्यस्यास्मिन् प्रकारे विरोध इति सर्वं सुस्थम् ।

रामानुजाचार्यास्तु—आद्यं सूत्रद्वयं पूर्वपक्षसूत्रत्वेनाभिधाय, विज्ञानादीति सूत्रद्वयं सिद्धान्तीयत्वेनाभिधायैवं व्याचक्रुः । वाशब्दः पक्षविपरिवर्त्तनार्थः । विज्ञानं चादि चेति विज्ञानादि परं ब्रह्म । सङ्कर्षणप्रद्युम्नानिरुद्धानां परब्रह्मभावे परब्रह्मरूपत्वाङ्गीकारे तदप्रतिषेधः। पञ्चरात्रप्रामाण्याप्रतिषेधः। विप्रतिषेधात् । अस्मिन्नपि तन्त्रे जीवोत्पत्तेर्विशेषेण प्रतिषेधाच्च नास्याप्रामाण्यमिति । एवं व्याख्याने प्रमाणत्वेन पञ्चरात्रस्थवाक्यान्यप्युदाजहरुः । शाण्डिल्यावचनसम्बन्धिनीं निन्दां च, न हि निन्दान्यायेनानुदितहोमनिन्दावत् पञ्चरात्रप्रशंसातात्पर्यकामुचुः ।

मध्वाचार्यास्त्वेतत्सूत्रचतुष्टयं शाक्तमतनिराकरणार्थत्वेनाङ्गीचक्रुः । तथा चात्र वेदविरुद्धानां स्मृतीनामप्रामाण्यात्र ताभिः स्वतः किञ्चित् फलं सिद्धम् ॥ ४५ ॥ ८ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे द्वितीयाध्यायस्य द्वितीयः पादः ॥ २ ॥ २ ॥

ऽवम्नसृष्टिरुक्ता, न वाय्वाकाशयोः। तैत्तिरीयके पुनर्ब्रह्मविदा-प्नोति परमित्युपक्रम्य, तस्माद् वा एतस्मादात्मन आकाशः सम्भूत इति आकाशादिसृष्टिरुक्ता। उभयमपि क्रमसृष्टिवाचकमित्येक-वाक्यता युक्ता। छान्दोग्ये मुख्यतया सृष्टिस्तैत्तिरीये गौणी, मु-ख्या त्वग्रे वक्ष्यते, सोऽकामयतेत्यादिना।

तत्र संशयः। किमाकाशम्। उत्पद्यते, न वेति। किं तावद् प्राप्तम्। नोत्पद्यत इति। कुतः ?। अश्रुतेः। श्रुतिवादिनां श्रुत्यैव निर्णयः। श्रुतौ पुनर्मुख्ये क्रमसृष्टौ न श्रूयते ॥ १ ॥

इत्यर्थः। यदि च छान्दोग्ये तेजसः सृष्टिकर्मत्वेन कथनादसृजतेत्या-दिसृष्टिवाचकपदोपादानादीक्षापूर्वकत्वाच्च मुख्यतया सृष्टिस्तैत्तिरी-य आकाशादीनां सम्भवं प्रति कर्तृत्वकथनात् सृष्टिवाचकपदाभा-वादीक्षाभावाच्च गौणीति नैकवाक्यतेति शङ्क्यते, तदापि मुख्या त्वग्रे वक्ष्यते, सोकामयतेत्यादिना। तत्र च इदंसर्वमसृजतेतीदमा स-र्वपदेन च कर्मतया सर्वेषां परामर्शादसृजतेति पदाच्छान्दोग्यतुल्य-तेति सन्देह एव। यदि तस्याः साक्षात् सृष्टित्वं तदा श्रुत्यन्तरे, खं वायुर्ज्योतिराप इति वाय्वाकाशोत्पत्तिकथनादत्र च तदकथनात् साक्षात् सृष्टावेव सन्देहोऽस्तु। तथाच यद्याकाशाद्युत्पत्तिर्ब्रह्मणः सकाशात् सिद्ध्यति तदा जन्माद्यधिकरणप्रभृतिषु यन्निर्णीतं तत् सर्वमुपपन्नं भवति, नोचेन्नेति तद्विषयपरिशोधार्थं एवायं यत्न इत्य-र्थः। एवं प्रस्तुतस्यावश्यकत्वं समर्थयित्वा अधिकरणमवतारयन्ति। * तत्रेत्यादि * आद्याधिकरणारम्भस्थे पूर्वपक्षसूत्रे उक्तरीतिकः सं-शय इत्यर्थः। पूर्वपक्षं विवृण्वन्ति। * किमित्यादि * । नन्वश्रवणे-पि स्मृत्या तदुत्पत्तिरादरणीयेत्याकाङ्क्षायामौलूक्यादिश्चोदक उपाल-भते। * श्रुतीत्यादि * । * मुख्ये क्रमसृष्टाविति * क्रमसृष्टिविषये ईक्षाप्रतिपादकतया मुख्यं यद्वाक्यं तत्र। तथाच तत्रेक्षाविषय-त्वादिना अश्रवणान्नोत्पत्तिरादरणीयेत्यर्थः ॥ १ ॥

अस्ति तु ॥ २ ॥

तुशब्दः पक्षं व्यावर्तयति । तैत्तिरीयके वियदुत्पत्तिरस्ति । यद्यपि मुख्ये नास्ति तथापि विरोधाभावादन्यत्रोक्तमप्यङ्गीकर्तव्य-मेकवाक्यत्वाय । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानुरोधाच्च ॥ २ ॥

गौण्यसम्भवात् ॥ ३ ॥

वियदुत्पत्तिर्गौणी भविष्यति । कुतः ? । असम्भवात् । न ह्याकाशस्योत्पत्तिः सम्भवति । निरवयवत्वात् । व्यापकत्वाच्च । मुख्ये चाभावात् । एकविज्ञाने सर्वविज्ञानप्रतिज्ञा तु तदधिष्ठानत्वेन जीववत् तदंशत्वेनवा तच्छरीरत्वेन वा एकविज्ञानकोटिनिवेशात् । लोकेऽप्यवकाशं कुर्वित्यादौ गौणप्रयोगदर्शनात् ॥ ३ ॥

अस्ति तु ॥ सिद्धान्तं वदतीत्याहुः । * तुशब्द इत्यादि * । * विरोधाभावादिति * वियदुत्पत्त्यादेरपि मुख्यवाक्येऽनुपपत्त्यभावात् । एकवाक्यतायां को वा आग्रह इत्यत आहुः । * एकेत्यादि * तथाचैतत्प्रतिज्ञानुरोधात् तैत्तिरीयवाक्यं सृष्ट्यर्थमीक्षासाकाङ्क्षं, छान्दोग्यवाक्यं च सृष्ट्यर्थमाकाशादिसाकाङ्क्षम् । क्रमश्रुतिस्तूभयप्राप्त्यर्थं इत्येकवाक्यतेत्यर्थः ॥ २ ॥

गौण्यसम्भवात् ॥ सूत्रत्रयेण पूर्वपक्षं पुनराह । तद् व्याकुर्वन्ति * वियदित्यादि * । यदुक्तं तैत्तिरीये वियदुत्पत्तिः श्रूयत इति । सत्यं श्रूयते । परं सा आवरणनिवारणरूपतया गौणी भविष्यति । कुतः । असम्भवात् । लोके हि सावयवस्यैवोत्पत्तिर्दृश्यते । सजातीयैर्विजातीयैश्च द्रव्यैरवयवभूतैरेकं द्रव्यमुत्पाद्यत इति । आकाशस्य तु निरवयवत्वेन समवाय्यभावात् तदभावेनासमवायिनः संयोगस्याप्यभावात् तयोरभावे केवलस्य निमित्तस्येश्वरस्य जीवादृष्टस्य चाकिञ्चित्करत्वात् । अतो निरवयवत्वादसम्भवः । किञ्च । व्यापकस्योत्पत्तिः प्रत्यक्षविरुद्धा । अन्यथा ब्रह्मणोऽपि स्यात् । किञ्च

शब्दाच्च ॥ ४ ॥

वायुश्चान्तरिक्षं च एतदमृतमिति । आकाशवत् सर्वगतश्च नित्य इति । न ह्यमृतस्य ब्रह्मदृष्टान्तभूतस्योत्पत्तिः सम्भवति ॥४॥

स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ५ ॥

ननु कथं वियदुत्पत्तिर्गौणी भविष्यति । तत्र हि सम्भूत इत्येकमेव पदमुत्तरत्रानुवर्त्यते । तथा सत्युत्तरत्र मुख्या आकाशे

ब्रह्मणोऽमूर्त्तत्वात् तेनाकाशावरणासम्भवादुत्पत्तेः पूर्वकाल आकाशाभावोऽप्यशक्यवचन इति व्यापकत्वादप्यसम्भवः । यदि च ब्रह्मैव समवायि ततो विभज्योत्पद्यत इति विभाग एव चासमवायीति विभाव्यते । तच्चायुक्तम् । मुख्ये सृष्टिवाक्ये अभावात् यदि हि मुख्ये उत्पत्तिरुक्ता भवेत् तर्ह्येवमपि कल्प्येत । अतस्तदभावादप्यसम्भव. । नचैकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया अनुरोधात् साङ्गीकार्येति वाच्यम् । सा त्वधिष्ठेयस्याकाशस्य तदधिष्ठानत्वेन, जीववत्तदंशत्वेन वा, पृथिव्यादिवत्तच्छरीरत्वेन वा, विशेषणत्वाभावागृहीतविशेषणन्यायेन एकविज्ञानकोटिनिवेशादुपपत्स्यते । अतो,-गोअश्वा एव पशवोऽन्ये त्वपश्व इत्यत्र यथा गोअश्वप्रशंसार्थमपशुपदे गौणी, छागादिष्वपशुत्वासम्भवादाद्रियते, तथात्राकाश उत्पत्त्यसम्भवात् सम्भूतपदे गौणी आदर्त्तव्या ब्रह्मप्रशंसार्थम् । लोकेऽप्यवकाशं कुर्वित्यादौ गौणप्रयोगदर्शनादित्यर्थः ॥ ३ ॥

शब्दाच्च ॥ ननु श्रुत्यपेक्षया लोकोऽकिञ्चित्करः । पूर्वकाण्डमपि स्वर्गादिफलकत्वाल्लोकमनुरुध्य इति न तदनुरोधेनोत्तरकाण्डे व्याकुलीकरणमुचितमित्यत आह ॥ शब्दाच्चेति ॥ भाष्यमत्र निगदव्याख्यातम् । तथाचोत्तरकाण्डानुमतेरपि गौण्येवोचितेत्यर्थ. ॥ ४ ॥

स्याच्चैकस्य ब्रह्मशब्दवत् ॥ पुनरपि गौण्यनुपपत्तिमाशङ्क्य परिहरति ॥ स्यादित्यादि ॥ तद् व्याकुर्वन्ति * नन्वित्यादि * ।

गौणीति युगपद् वृत्तिद्वयविरोध इतिचेन्न । एकस्यापि स्यात् क्वचिन्मुख्या क्वचिद् गौणीति । ब्रह्मशब्दो यथा, तपसा ब्रह्म विजिज्ञासस्व, तपो ब्रह्मेति । प्रथमवाक्ये मुख्या, द्वितीये गौणी । नचात्र प्रयोगभेदोऽस्तीति वाच्यम् । सम्भूतशब्दोऽप्यावर्तते । न तु तादृशार्थयुक्तोऽपि । आत्मसत्त्वेनैव तत्सत्त्वमिति सत्त्वगुणो वचनहेतुः ।

तत्तद्भावापन्नं ब्रह्मैव सर्वत्र कारणमिति नानेकलक्षणा ।

एकस्येति शब्दस्य । ननु ब्रह्मशब्दस्य दृष्टान्तता न युक्ता । तयोर्वाक्ये तस्य प्रयोगभेदेन वृत्तिद्वययौगपद्याभावात् । तस्माद्वेति वाक्ये तु सम्भूतशब्दस्य सकृत्प्रयोगेण यौगपद्यस्य दुर्वारत्वादित्याशङ्कां, नचेत्यादिनानूद्य परिहरति *सम्भूतेत्यादि* । तथाचात्राप्यावृत्त्या शब्दव्यक्तिभेदान्न यौगपद्यमिति दृष्टान्तत्वायोग इत्यर्थः । नन्वस्त्वेवं वृत्तिद्वयोपपत्तिस्तथापि गोअश्वसाध्यफलासाधकत्वरूपपशुसादृश्यं छागादिषु यथा गौणीवचनहेतुस्तथाऽऽकाशे किं वा सम्भूतसादृश्यं गौणीवचनहेतुर्येनात्र साऽऽद्रियत इत्यत आह *आत्मेत्यादि* । सत्कार्यवादे उत्पत्तिपूर्वदशायां कारणभावेनैव कार्यं तिष्ठति । आत्मा चात्र कारणम् । अत उत्पत्तिपूर्वदशायां यथा कार्यमात्मभावेन तिष्ठत्येवमाकाशोऽप्यात्मावृतत्वादात्मभावेनैव तिष्ठतीत्यात्मसत्त्वेनैव तत्सत्त्वम् *आकाशसत्त्वं, न तु पृथक्त्वेन । अतः सृष्टिदशायां कार्यवद् ब्रह्मणः सकाशादाकाशस्य पृथक् सत्त्वरूपो य आकाशनिष्ठः सत्त्वगुणः स एव कार्यसादृश्यरूप आकाशे सम्भूतपदगौणीवचनहेतुरतः साऽऽद्रियत इत्यर्थः । ननु भवत्त्वेवं तथाप्याकाशं प्रति ब्रह्मणः कारणतानङ्गीकारे वाय्वादिवाक्येष्वात्मनः कारणत्वाकथनादाकाशादीनामेव तत्कथनाद् वायुकारणता आकाशासाधारणा । अग्निकारणता च वाय्वसाधारणेत्येवं कारणता अनेकेषां स्यात् । ततश्च ब्रह्मणः कारणताभङ्गे ब्रह्मणः प्रशंसा न कापि स्यात् । तदभावे च तन्निबन्धना गौण्यपि दूरमपेयादतः सर्वापि कल्पना असङ्गतेत्याशङ्कायामाह । *तत्तदित्यादि* । वायुसम्भूतिवाक्य आ-

तद्भावापत्तिविशेषणव्यावृत्त्यर्थमपि न लक्षणा । स्वभावतोऽपि ब्रह्मणः सर्वरूपत्वात् । तस्माद् गौणी आकाशसम्भूतिश्रुतिरित्येवं प्राप्ते इदमाह ॥ ५ ॥

प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ ६ ॥

भवेदेतदेवं यदि छान्दोग्यश्रुतिर्न विरुद्ध्येत । कथम् ? । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा बाध्यते । अव्यतिरेकात् । अनुद्गमात् । यदि सम्बद्धमेव ब्रह्मणा आकाशं तिष्ठेत् तदा ब्रह्मविज्ञानेनाकाशविपर्यीकरणे तन्नैकविज्ञानम् । आकाशस्य चालौकिकत्वात् तज्ज्ञानं सर्वज्ञतायामपेक्षितमेव । नच जीववत् । लौकिकत्वात् । व्यवहारमात्रविषयत्वान्नातीन्द्रियत्वादिचिन्ता ।

काशभावापन्नम्, अग्निसम्भूतिवाक्ये वायुभावापन्नमित्येवं ब्रह्मैव सर्वत्र कारणमिति सा कारणता नानेकलक्षणा । युजन्तः प्रयोगः । तथाचैवं ब्रह्मप्रशंसासत्त्वान्न गौण्यनुपपत्तिरित्यर्थः । ननु तथाप्याकाशादिपदेषु तद्भावापत्तेरनुक्ताया एव विशेषणीयत्वात् तेषु लक्षणा तु स्यादेवेत्यत आह । * तदित्यादि * । घटे छिद्रेतरत्ववत् तत्तद्भावापन्नत्वमर्थबलादेव प्राप्यत इति तद्व्यावृत्त्यर्थमपि नास्मन्मते लक्षणेत्यर्थः । सिद्धमाह । * तस्मादित्यादि * । * इदमिति * वक्ष्यमाणं दूषणम् ॥ ५ ॥

प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ पृच्छति * कथमिति * कथं विरुध्यते तत्रोत्तरमाहुः । * एकेत्यादि * । * अनुद्गमादिति * कार्यत्वेन रूपेणाव्युच्चरणात् । एतदेव विभजन्ते * यदीत्यादि * । यदि स्वरूपसम्बन्धेनाविभक्तमेव ब्रह्मणा आकाशं तिष्ठेत् तदा विभुत्वादिसाधर्म्याद् ब्रह्मविज्ञानेनाकाशविपर्यीकरणे तदेकविज्ञानं, विषयद्वयमहिम्ना जायमानत्वात् । नच का आवश्यकतेति शङ्क्यम् । यत आकाशस्यापि लौकिकत्वाल्लौकिकसर्वविषय-

अनुद्गमेऽपि वस्तुसामर्थ्यात् कथं प्रतिज्ञा हीयते इत्यत आह ॥ शब्देभ्यः ॥ येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवतीति शब्दात् प्रकृतिविकारभावेनैव व्युत्पादयति ज्ञानम्। शब्देभ्यो हेतुभ्यः प्रतिज्ञाहानिरिति योजना ॥ ६ ॥

यावद्विकारन्तु विभागो लोकवत् ॥ ७ ॥

तुशब्द आकाशोत्पत्त्यसम्भावनशङ्कां वारयति । यद्यद् विकृ-

कज्ञानस्यैव प्रतिज्ञायां विवक्षितत्वात् तज्ज्ञानं सर्वज्ञतायामपेक्षितमेव । नचांशत्वेन यथा जीवज्ञानं ब्रह्मज्ञानाज्जायते तद्वदाकाशज्ञानमपि भविष्यतीति शङ्क्यम् । आकाशस्य लौकिकत्वात् । नच लौकिकप्रत्यासत्त्यविषयत्वनातीन्द्रियत्वादाकाशोऽप्यलौकिक एवेति शङ्क्यम् । यदि ह्यतीन्द्रियः स्याल्लौकिकव्यवहारविषयो न स्यात् । यथा विविक्तात्मा । वर्त्तते च लौकिकव्यवहारविषय आकाशः । अतो व्यवहारमात्रविषयत्वाश्चातीन्द्रियत्वादिचिन्ता तस्य युज्यते । तथाच तस्य लौकिकत्वात् तज्ज्ञाने सर्वथापेक्षितम् । तच्चेन्न स्यात् प्रतिज्ञा हीयेतैवेत्यर्थः । अत्र चोदयति । * अनुद्गमे इत्यादि * । * वस्तुसामर्थ्यादिति * ज्ञानं भविष्यतीति शेषः । अत्रोत्तरं व्युत्पादयन्ति * येनेत्यादि * । * शब्दादिति * । वाक्यात् । तथाच यद्यविभक्तस्याकाशस्य वस्तुसामर्थ्येन ज्ञानं विवक्षितं स्याद्, अश्रुतं श्रुतमित्यादि न वदेत् । शाब्दस्य मननात्मकस्य च ज्ञानस्य वस्तुसामर्थ्यजन्यत्वाभावात् । अग्रे च, यथा सौम्यैकेन मृत्पिण्डेनेत्यादिना प्रकृतिविकारभावेन न ज्ञानं व्युत्पादयेत् । वदति त्वेवं, व्युत्पादयति चैवमतः कार्यरूपेण व्यतिरेकानङ्गीकारशब्देभ्यो हेतुभ्यः सिद्धायाः प्रतिज्ञाया हानिरित्यर्थः ॥ ६ ॥

यावद्विकारं तु विभागो लोकवत् ॥ अस्मिन् सूत्रे व्याप्तिदृष्टान्तयोरुपन्यासेनाकाशोत्पत्तावनुमानमेवोपन्यस्तमित्याशयेनाहुः । * यद्यदित्यादि * तथाचाकाश उत्पादविनाशशाली । विकृतत्वा-

तं तस्य सर्वस्य विभाग उत्पत्तिः । आकाशमपि विकृतम् । लौकिकव्यवहारविषयत्वात् । यथा लोके विकृतमात्रमुत्पद्यते ।

त् । विकृतो, लौकिकव्यवहारविषयत्वात् । लोकवदिति । तस्मादाकाश उत्पद्यत इति सिद्धम् । नन्वाकाशोत्पत्तिर्विभागशब्दमहिम्ना विभागद्वारा वक्तव्या । स तु ब्रह्मणो व्यापकत्वादशक्यवचन इति कथमुत्पत्तिरितिचेत् । न । बृहदारण्यके मैत्रेयीब्राह्मणे ब्रह्मणः प्रज्ञानघनत्वश्रावणाद् ब्रह्म तादृशं यदा सृजति तदा घनत्वं तिरोभावयतीत्याकाशो विभज्यत इत्यनुपपत्त्यभावात् । एवमन्यदपि बुद्धिदोषोद्भवं परिहर्त्तव्यमिति दिक् ।

वाचस्पतिमिश्रास्तु-आकाशकालदिङ्मनःपरमाणवो विकाराः । आत्माऽन्यत्वे सति विभक्तत्वात् । घटादिवद् इत्यनुमानमाहुः ।

भास्कराचार्यास्तु-अचेतनत्वे सति विभक्तत्वात् । पृथिव्यादिवदित्येवमनुमानमाहुः ।

रामानुजाचार्यास्तु-ऐतदात्म्यमिदं सर्वमित्यादिभिराकाशस्य विकारत्ववचनेन तस्याकाशस्य ब्रह्मणः सकाशाद् विभाग उत्पत्तिरप्युक्तैव । लोकवत् । लोके यथा, एते देवदत्तपुत्रा इत्यभिधाय तेषु केषाञ्चित् तत उत्पत्तिवचनेन सर्वेषामुत्पत्तिरुक्ता स्यात् तद्वदित्येवं व्याकुर्वन्ति । तत् क्लिष्टम् । आकाशस्य तत्र विकारताया अश्रावितत्वात् । ऐतदात्म्यवाक्यस्य तेजआद्युत्पत्तिवाक्यात् पूर्वमसत्त्वात् । तथापीदं सर्वमित्यनेनाकाशस्य संग्राह्यत्वाच्चेति । एवमेव तच्चौरमतेऽपि बोध्यम् ।

शङ्कराचार्यास्तु-आकाशमनित्यम् । अनित्यगुणाश्रयत्वात् । घटादिवदित्यनुमानं प्रयुञ्जते ।

माध्वास्तु-अथ हैतान्युत्पत्तिमन्ति चानुत्पत्तिमन्ति च प्राणः श्रद्धाऽऽकाश इति भागशो ह्युत्पद्यन्त इति भाल्लवेयश्रुतिमुपन्यस्य बहुभिर्भागैरुत्पद्यन्ते केचिन्नोत्पद्यन्त इत्याहुः । सा तु श्रुतिरिदानीं न प्रसिद्ध्यति ।

आकाशोत्पत्तौ श्रुत्या सिद्धायाम्, आकाशवत् सर्वगतश्च नित्यः, आकाशशरीरं ब्रह्म, स यथाऽनन्तोऽयमाकाश एवमनन्त आत्मा वेदितव्यः, आकाश आत्मा इत्यादिश्रुतयः, समोऽनेन सर्वेण, य आकाशे तिष्ठन् सर्वमात्मेत्येवमादिभिरेकवाक्यतां लभन्ते।

भिक्षुस्तु, यथा मधु मधुकृतो निस्तिष्ठन्तीति, अथास्य पुरुषस्य प्रयतो वाङ् मनसि सम्पद्यत इति छान्दोग्यश्रुती लिखित्वा अविभागलक्षणमेवाद्वैतमङ्गीकुर्वन् प्रकृतिगुणभूतस्य सूक्ष्माकाशस्य ब्रह्माविभक्तत्वादनुत्पत्तिं भूताकाशस्य विकृतत्वादुत्पत्तिं च व्याकुर्वन्नहङ्कारस्य तदनुगतसूक्ष्माकाशस्य च भूताकाशावयवत्वमङ्गीकृत्य पृथिव्यादिवदाकाशोऽपि नित्यानित्योभयरूप इत्याह। तन्न । उक्तश्रुत्योर्जीवविषयत्वेन ताभ्यां जडाविभागस्यापादयितुमशक्यत्वात्। उपक्रमे सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति प्रतिज्ञायाम् तेजःप्रभृतिसृष्टिकथनेनाग्रे च सन्मूलाः सोम्येमाः प्रजा इत्यादिना सति ब्रह्मणि सर्वमूलत्वस्यैव निगमनेन च जडस्य सर्वस्य ब्रह्मैवोपादानमिति सिद्ध्यति। तथा सति प्रलयेऽपि न कार्यस्याविभागमात्रता, किन्त्वैकीभावपर्यन्ततेति। लोके सुवर्णादिविकारेषु तथैव दर्शनात्। सांख्यैरपि कार्यस्य संक्रमे कारणभावस्यैवादरणाच्च। एवं सति भूताकाशावयवविचारेऽपि यथाश्रुत्यावादिद्वारा ब्रह्मैक्यपर्यन्तता, तथात्रापि त्वदभिमतावयवद्वारा ब्रह्मैक्यपर्यन्ततैव । प्रकृतेरपि जन्यत्वस्य समन्वयाध्याय एवोपपादितत्वात्। एवं जीवस्यापि नाविभागमात्रम्। ऐतदात्म्यमध्ये तस्यापि प्रवेशात् । एतावान् परं विशेषो यज्जीवस्य न विकृतौ प्रवेशः । अंशत्वादेवैतदात्म्यात् प्रतिज्ञापूर्त्तेः। अतोऽपार्थोयमाडम्बर इति।

प्रकृतमनुसरामः। नन्वाकाशस्योत्पत्तिमत्त्वे आकाशवत् सर्वगतश्च नित्य इत्यादिश्रुतीनां विरोधः कथं परिहार्य इत्यत आहुः। * आकाशोत्पत्ताविति * । * सिद्धायामिति * छान्दोग्यस्य प्रतिज्ञायलात् सिद्धायाम् । तथाचाकाशवदिति श्रुतौ या आकाशस्य ब्रह्मोपमानता, सा, समोऽनेन सर्वेणेत्यत्र यथा सर्वस्य भगवदुपमान-

व्यवहारे त्वज्ञबोधनं वाक्यानामुपयोगः ॥ ७ ॥

एतेन मातरिश्वा व्याख्यातः ॥ ८ ॥

सा भगवतस्तत्परिमाणतायां पर्यवस्यति, न तु सर्वस्य ब्रह्मतुल्यपरिमाणत्वे। तथात्राप्युपमानता ब्रह्मणो व्यापकत्वनित्यत्वयोः पर्यवस्यति, न त्वाकाशस्य भगवत्तुल्यत्वे। सर्वगतनित्यशब्दयोर्ब्रह्मविशेषणत्वात्। न तत्समश्चाप्यधिकश्च दृश्यते इति साम्यनिषेधश्रुतेर्ज्यायानाकाशादिति नभोज्यायस्त्वश्रुतेश्च। तथा सत्याकाशस्य यन्नित्यविभुत्वं तदन्यापेक्षयैव, न तु ब्रह्मवदिति फलतीति सर्वसाम्यश्रुत्यैकवाक्यतां लभते। एवमाकाशशरीरत्वश्रुतिर्य आकाशे तिष्ठन्नित्यन्तर्यामिब्राह्मणश्रुत्या, बहुव्रीहिविग्रहेण तस्यैवार्थस्य लाभात्। एवं सति यथा पृथिव्यादीनामाधारतामात्रं, न तु नित्यत्वादिकमपि, तथैवाकाशस्येति फलति। एवमनन्तरत्वोपमानश्रुतावप्यापेक्षिकमेवानन्तत्वमाकाशस्येति पूर्ववत् सर्वसाम्यश्रुत्यैकवाक्यतां लभते। उत्पत्तिमत्त्वेनैवान्तवत्त्वस्य प्राप्तत्वात्। नभस्तमनुलीयत इत्यादिस्मृतेश्च। एवम्, आकाश आत्मेति प्राणमयवाक्यस्थश्रुतिरपि, इदं सर्वं यदयमात्मेति मैत्रेयीब्राह्मणश्रुत्या तत्र सर्वमुद्दिश्यैवात्राकाशमुद्दिश्यात्मत्वविधानात्। अतस्तत्र सर्वस्यैवात्राकाशस्यापि न नित्यत्वादौ तात्पर्यमपि तु ब्रह्मात्मकत्वे। वस्तुतस्तु प्राणसञ्चारायाकाशस्यात्मत्वमुच्यते इति तत्रायमर्थं एव, न भवतीति, नचाशङ्कानवोत्तरमिति। ननु मयत्वेवमेतासां श्रुतीनां गतिस्तथाप्येवं कथनस्य प्रयोजनं तु किञ्चिद् वक्तव्यम्। अन्यथा, एवं तात्पर्यकत्वमपि सन्दिग्धमेव तिष्ठेदित्यत आहुः। * व्यवहारे त्वित्यादि *। आकाशशरीरमिति श्रुतिर्हि उपासनार्था। इति प्राचीनयोग्योपास्वेत्युपसंहारात्। यदि ह्याकाशं तथा न जानीयात् कथं ब्रह्मशरीरत्वेनोपासीत। अतोऽज्ञानां बोधनमेव वाक्यप्रयोजनम्। एवमन्यत्रापि द्रष्टव्यम्। अतो न तात्पर्ये सन्देह इत्यर्थः। तस्मादाकाशोऽप्युत्पद्यत इति सिद्धम् ॥ ७ ॥ १ ॥

एतेन मातरिश्वा व्याख्यातः ॥ ननु वायूत्पत्तिः श्रुता प्रत्यक्षसंवादिनी चेति सन्देहाभावात् किमस्याधिकरणस्य प्रयोजन-

आकाशोत्पत्तिसमर्थनेन मातरिश्वोत्पत्तिः समर्थिता । सैषाऽनस्तमिता देवतेति भौतिकवायुव्यावृत्त्यर्थमलौकिकपदम् ॥८॥

असम्भवस्तु सतोऽनुपपत्तेः ॥ ९ ॥

ननु ब्रह्मणोऽप्युत्पत्तिः स्यात् । आकाशवत् सर्वगतश्च नित्य इति श्रुतेराकाशन्यायेन सर्वगतत्वनित्यत्वयोरभावे इतीमामाशङ्कां तुशब्दः परिहरति ।

मत आहुः । * सैषेत्यादि * । श्रुतिस्तु बृहदारण्यके सप्तान्नब्राह्मणे व्रतमीमांसाख्या । म्लोचन्ति ह्यन्या देवता न वायुः सैषाऽनस्तमिता देवता यद् वायुरिति । तथाचाऽनस्तमितत्वादेवोत्पत्त्यभावः सिद्ध्यतीति श्रुतिप्रतिषेधादेव सन्देहः । श्रुतिविरोधनिराकरणमेव चाधिकरणप्रयोजनम् । ननु तथापि प्रत्यक्षविरोधस्य का गतिरित्यत आहुः । * भौतिकेत्यादि * । तथा च प्रत्यक्षं भौतिकविषयं, न भूतविषयमित्यदोष इत्यर्थः । शब्दनिर्वचनं तु – मातरीति सप्तम्यन्तप्रतिरूपकमव्ययमन्तरिक्षवाचकम् । तत्र श्वयति गच्छतीति मातरिश्वा । टु ओ श्वि गतिवृद्ध्योः । तथाच भूतात्मा वायुर्नोत्पद्यते । छान्दोग्ये अश्रवणादिति पूर्वः पक्षः । तैत्तिरीये श्रावणादुत्पद्यत इति सिद्धान्तः । अन्येऽपि गौण्यादिसूत्रोक्ताः पक्षा अत्र योजनीयाः । सूत्रे, एतेनेत्यतिदेशात् । अमृतत्वश्रुतिस्त्वापेक्षिकी । म्लोचन्तीति श्रुत्यनुसारेण तथा निर्णयस्य सिद्धत्वात् । तस्माद् वायुरुत्पद्यत इति सिद्धम् ॥ ८ ॥

असम्भवस्तु सतोऽनुपपत्तेः ॥ व्याकुर्वन्ति * नन्वित्यादि * । अयमर्थः । यद्यपि ब्रह्मण उत्पत्तिर्न श्रूयत इति तदुत्पत्त्याशङ्कैव नोदेति, तथापि पूर्वस्मिन् पादे बाह्याबाह्यमतानां निराकृतत्वात् तदसहमानः कश्चिद् अस्तेरुत्पत्तिवाचकत्वस्य, हरितो रोहितादासीत्सुन्धुस्तस्याभवत् सुत इत्यादिपुराणवाक्येषु दर्शनात्, सदेव सोम्येदमग्र आसीदित्यत्रापि तमर्थं कल्पयेत् तदा श्रुतौ ब्रह्मणोऽप्युत्पत्तिः स्यात् । नच नित्यत्वविभुत्वयोर्बाधकत्वं शङ्क्यम् । आकाशवत् स-

सतः सन्मात्रस्योत्पत्तिर्न सम्भवति । न हि कुण्डलोत्पत्तौ कनकोत्पत्तिरुच्यते । नामरूपविशेषाभावात् । उत्पत्तिश्च स्वीक्रियमाणा नोपपद्यते । स्वतो न सम्भवति । अन्यतस्त्वनवस्था । यदेव च मूलं तदेव ब्रह्मेति ॥ ९ ॥

र्वगतश्च नित्य इति श्रुतेराकाशस्य यथा आपेक्षिके एव नित्यत्वविभुत्वे, तन्न्यायेन निरङ्कुशसर्वगतत्वनित्यत्वयोरभावे इमां वैतण्डिकाशङ्कां तुशब्दः परिहरतीत्यर्थः । * सन्मात्रस्येति * अविकृतस्य । * स्वतो न सम्भवतीति * आत्माश्रयापत्त्या न सम्भवति । शेषमतिरोहितार्थम् ।

यत्तु भास्कराचार्यैरुक्तम्—आशङ्काहेत्वभावाद् ब्रह्मण उत्पत्तिसम्भावनाभावेन तन्निराकरणार्थमिदं सूत्रं वदतां सूत्रवैयर्थ्यमिति । तदप्यनेनैवापास्तं ज्ञेयम् । अतो यद् दिक्कालसंख्यापरिमाणादिनित्यत्वनिराकरणार्थत्वं तैरङ्गीकृतं, तस्मिन्नेव पक्षे वैयर्थ्यम् । व्यवहारे दिशां सूर्योदयास्तमयमेरुप्रभृतिविभजनीयत्वेन पारिभाषिकतया देश एव पर्यवसितत्वेनातिरिक्तपदार्थत्वाभावात् । शास्त्रे च दिशः श्रोत्राद्दित्युत्पत्तिश्रावणेन नित्यत्वशङ्कानुदयात् । एवं कालस्यापि, सर्वे निमेषा जज्ञिरे इत्यादिश्रुत्यैव नित्यत्वशङ्कानिरासाच्च शङ्कोदयः । दिक्कालावाकाशादिभ्य इति सांख्यप्रवचनसूत्राच्च । अतो वैशेषिकादिमतेनैव शङ्कोत्थापनीया । सा तु तेषां वैतण्डिकत्वे ब्रह्मपक्षेऽप्युत्पत्तिमर्हतीति वृथा तद्दूषणम् ।

एतेनैव भिक्षुरपि दत्तोत्तरः । यत्पुनस्तेनोक्तमिदं सूत्रं प्रधानोत्पत्तिनिराकरणार्थम् । तथाहि । सदेव सौम्येदमग्र आसीदित्यादौ तत्राय.पिण्डवदीक्षितृब्रह्माभेदेनोपन्यस्तं सूक्ष्मं जगत् सत् । तस्य सतोऽव्यक्तस्य प्रधानस्य तु सम्भव उत्पत्तिर्नास्ति । कुतः । अनुपपत्तेः । तस्य कारणाभावेन विकाररूपत्वासम्भवात् । कारणकल्पने चानवस्थानादिति । तन्न । सच्छब्दस्य प्रधानवाचकत्वे मानाभावात् । सांख्यसमाससूत्रीयपञ्चशिखवृत्तावप्यव्यक्तपर्यायेषु, अव्यक्तम्, ब्रह्म, गुण, बहु, धातु, क्षम, अक्षरं, क्षेत्रं, तमः, प्रधानमिति

तेजोऽतस्तथा ह्याह ॥ १० ॥

तेजोऽतो वायुतः। तथा ह्याह। वायोरग्निरिति श्रुतेः। हिशब्देनैवमाह। छान्दोग्यश्रुतेः प्रतिज्ञाहानिनिराकरणार्थं तैत्तिरीयकमपेक्षते वाय्वाकाशयोरुत्पत्त्यर्थम्। तथाचोपजीव्यस्य प्राधान्याद् वायुभावापन्नमेव सत् तेजम् उत्पादकमिति स्वीकरोति।

दशानामेव गणनात्। कोशादिष्वपि तथानुपलम्भात्। ब्रह्मवाचकत्वं तु गीतायामेव सिद्धम्। ॐ तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति वाक्यात्। अतः सद्भावेन ब्रह्मैवात्रोच्यत इत्यपार्थ एवाडम्बरः॥ ९॥ ३॥

तेजोऽतस्तथा ह्याह॥ आकाशवाय्वोरुत्पत्तिं विचार्य तेजसो विचारयति। तेजः किं साक्षाद् ब्रह्मजमुत परम्परयेति विचारयति। श्रुतिविरोधपरिहारार्थत्वादध्यायस्य। तत्र छान्दोग्यांकस्य मुख्यत्वात् साक्षात्पक्ष एव ध्येयानिति प्राप्त आह * तेजोऽत इति *। तद् व्याकुर्वन्ति * तेज इत्यादि *। नन्वेवं सति छान्दोग्यविरोधस्य कथं परिहार इत्यत आहुः। * हिशब्देनेत्यादि *। अयमर्थः। तेजसः साक्षाद् ब्रह्मजत्वाङ्गीकारे, सदेवसोम्येमसग्र आसीदिति प्रतिज्ञा, येनाश्रुतं श्रुतं भवतीति प्रतिज्ञा च हीयते। अतस्तन्निराकरणार्थं तेजःसृष्टिवाक्यं तैत्तिरीयकमपेक्षत इति तैत्तिरीयकं तस्योपजीव्यम्। तथा सति तत्र या वायोरिति पञ्चमी सा किं हेत्वाद्युतानन्तर्य इति जिज्ञासायां यद्यप्युभयथापि प्रतिज्ञासिद्धिः, प्रायपाठश्चोभयथाऽपि शक्यवचनस्तथापि प्राथमिक्या आत्मन इति पञ्चम्या अनुरोधात् पृथिव्या ओषधय इत्यग्निमाया अपि पर्जन्येनोषधिवनस्पतयः प्रजायन्त ओषधिवनस्पतिभिरन्नं भवत्यन्नेन प्राणा इति श्रुत्यन्तरे ओषधीनामन्नकारणतायाः स्फुटत्वात् प्रत्यक्षसंवादाच्च कारकविभक्तिरेव युक्ता। बलिष्ठत्वाच्च। एवमुपजीव्यवाक्यगतपञ्चम्या हेत्वर्थकत्वे निश्चिते उपजीव्यस्य प्राधान्याद् वायुभावापन्नमेव सत् तेजस उत्पादकमित्येवमश्रुतमपि क्रमं स्वीकरोतीति विरोधपरिहार इत्यर्थः। तस्माद् वायु-

ब्रह्मण एव सर्वोत्पत्तिपक्षस्त्वविरुद्धः ॥ १० ॥

आपः ॥ ११ ॥

तथा ह्याहेत्येव । इदमेकमनुवादसूत्रमविरोधख्यापकम् । न श्रुत्योः । सर्वत्र विरोधे इति ॥ ११ ॥

पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥ १२ ॥

ता आप ऐक्षन्त बह्वयः स्याम प्रजायेमहीति । ता अन्नमसृजन्तेति । तत्रान्नशब्देन व्रीह्यादय ? आहोस्वित् पृथिवीति ? सं-

---

द्वारैव तेजःसृष्टिरिति सिद्धम् । नन्वाथर्वणे यथा साक्षात्सृष्टिरुक्ता, एतस्माज्जायते प्राण इति, तथा, तैत्तिरीये, इद॰ सर्वमसृजतेत्युक्ता । तत्र किं विस्फुलिङ्गवद् यौगपद्यमुत वाय्वनन्तरभाव इत्याशङ्का तेजसो वाय्वानन्तर्ये समर्थनीये, न तु पूर्वोक्तः क्रमसृष्टिविचारोऽत्र युज्यते । असम्भवसूत्रव्यवधानेन पूर्वोक्तविचारसमाप्तेः शक्यवचनत्वादित्यत आहुः । * ब्रह्मण इत्यादि * । आथर्वणोक्तः पक्षस्तु तैत्तिरीये यौगपद्याङ्गीकारेऽपि ब्रह्मणः कारणताया असन्दिग्धत्वात् सामर्थ्यविचारेणैव सर्वपदवृत्त्यसङ्कोचादेवाविरुद्ध इति पूर्वोक्तविचार एवात्र युक्त इत्यर्थः ॥ १० ॥

आपः ॥ *तथा ह्याहेत्येवेति * । पूर्वसूत्रादनुवर्त्तते । तथाचाप्तेजस उत्पद्यन्ते । हि यतो हेतोः, श्रुतिद्वयमपि तथाऽऽह तदपोऽसृजतेति, अग्नेराप इति । अतो नात्र किमपि विचार्यमित्यर्थः।

अन्ये तु अतःशब्दस्याप्यनुवृत्तिमिच्छन्ति । तदयुक्तम् । अत्र कारणतया तेजसो विवक्षितत्वेन पाञ्चम्यर्थकस्य ग्रहीतुमशक्यत्वाच्छ्रुत्युक्तहेत्वर्थकत्वग्रहणे, तथा ह्याहेत्येतावतैव चारितार्थ्यादित्येवकारेणात्र बोधितं ज्ञेयम् । नन्वेवं सति अस्य सूत्रस्य किं प्रयोजनमत आहुः । * इदमित्यादि * । तथाचेदं प्रयोजनमित्यर्थः ॥ ११ ॥

देहः। ननु कथं सन्देहः। पूर्वन्यायेनोपजीव्यश्रुतेर्बलीयस्त्वादितिचेत्। उच्यते। अद्भ्यः पृथिवी पृथिव्या ओषधय ओषधीभ्योऽन्नमित्यग्रे वर्तते। तथा सति पृथिवीमोषधीश्च सृष्ट्वा आपोऽन्नं सृजन्ति? आहोस्विदन्नशब्देनैव पृथिवीति?

नन्वेवमस्तु पृथिव्योषधिसृष्ट्यनन्तरमन्नसृष्टिरितिचेत्। न। छन्दोग्यश्रुतेरपेक्षाभावान्महाभूतमात्रस्यैवाभिलषितत्वात्। एकपदलक्षणापेक्षया तत्स्वीकारस्य गुरुत्वात् पूर्वोक्त एव संशयः।

त्यादि *। तथाच रूढिप्रायपाठयोर्विरोधात् संशय इत्यर्थः। अत्र चोदयति * ननु कथमित्यादि *। तथाच पृथिव्येव प्राप्स्यत इति व्यर्थोऽधिकरणारम्भ इत्यर्थः। एतेन पूर्वाधिकरणवदत्र पृथिवीति भिन्नं सूत्रमङ्गीकृत्याधिकरणान्तरमिदं वाच्यम्। ततोऽन्नशब्देन कथं पृथिवी ग्रहीतुं शक्येत्याकाङ्क्षायामधिकारेत्यादिसूत्रान्तरेण तन्निर्णय इति रामानुजाचार्यमतं पूर्वाधिकरणन्यायतः सन्देहनिवृत्तिप्रदर्शनाच्छिथिलमित्यपि बोधितम्। अत्र समादधते। * उच्यत इत्यादि *। तथाचोपजीव्यानुरोधाद् यथा आकाशावायुव्यवधानेन तेजःसृष्टिरङ्गीक्रियते, तथाऽन्न पृथिव्योषधिव्यवधानेनान्नसृष्टिरप्यङ्गीकर्त्तुं शक्या। उपजीव्ये वाक्ये त्रयाणामुक्तत्वात्। आहोस्वित् प्रायपाठबलात् पृथिवीति पूर्वकोटौ विशेषगर्भसन्देह उपजीव्यवाक्यविचारेऽपि नापैतीति नारम्भवैयर्थ्यमित्यर्थः। पुनश्चोदयति। * नन्वेवमित्यादि *। तथाचोपजीव्यवाक्यापेक्षया प्रायपाठस्य नैर्बल्यादेव सन्देहनिवृत्तेरारम्भवैयर्थ्यं दुर्वारमित्यर्थः। तत्र समादधते। * नेत्यादि *। ब्रह्मणः कारणत्वसमर्थनायोपक्रमे महाभूतयोरेवोत्पत्तिदर्शनेन महाभूतमात्रस्यैव विवक्षितत्वाच्छान्दोग्यश्रुतेरन्नापेक्षाभावात्। नच लक्षणाप्रसक्तिदोषः। तस्या एकपदनिष्ठत्वेन तदपेक्षया वाक्यदोषभूतानधिकारत्यागाधिकपदार्थद्वयतरकमानाहत्य रूढिस्वीकारस्य गुरुत्वात्। अतः पूर्वोक्तोऽत्रपद एव संशयो, न पृथिव्युत्पत्तावितिि नाधिकरणारम्भवैयर्थ्यमित्यर्थः। एवं

तत्रान्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागिति त्रयाणां सहचारः सर्वत्रोपलभ्यते । लोकप्रसिद्धिर्वर्षणभूयिष्ठलिङ्गञ्च । तस्मात् पृथिव्योपध्यन्नानां मध्ये अभेदविवक्षया यत्किञ्चिद्वक्तव्ये अन्नमुक्तमित्येवं प्राप्ते । उच्यते । अन्नशब्दे पृथिवी । कुतः ? अधिकाररूपशब्दान्तरेभ्यः । अधिकारो भूतानामेव, न भौतिकानाम् । नीलं च रूपं पृथिव्या एव । भूतसहपाठात् । शब्दान्तरम् अद्भ्यः पृथिवीति । तस्मादन्नशब्देन पृथिव्येव ॥ १२॥

सिद्धे संशये पूर्वपक्षं सोपपत्तिकमाहुः । * तत्रान्नेत्यादि * । उपलभ्यत इति पदमग्रेऽप्यन्वेति । तथाच त्रितयसहचारो लोकप्रसिद्धिस्तस्माद्यत्र क्वचन वर्षति तदेव भूयिष्ठमन्नं भवतीति वाक्यशेषोक्तं वर्षणभूयिष्ठलिङ्गं चेति त्रयं क्रमेणात्रोपलभ्यते । अथवात्र उपपादनग्रन्थे यथा तु खलु सोम्येमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत् त्रिवृदेकैका भवतीति प्रतिज्ञोत्तरमन्नतेजः सहचारः कार्यलिङ्गितोऽन्नस्य यो दृश्यते सोऽपि यं फलपत्राद्याहारास्तेषामपि पुरीषमांसमनांसि भवन्तीति त्रयाणां धातूनां सहचारो मृद्भक्षकेषु कीटादिष्वोषधिभक्षकेषु पश्वादिष्वन्नभक्षकेषु पुरुषादिष्वेवं सर्वत्र पृथिव्योपध्यन्नेषूपलभ्यते । अन्नशब्दस्य च लोकेऽदनीयत्वमादाय पृथिव्यादिषु त्रिष्वपि प्रसिद्धिः । यथा नैषधे 'नास्ति जन्यजनकव्यतिभेदः सत्यमन्नजनितो जनदेहः।वीक्ष्य वः खलु तनूममृतादामि'ति।चतुर्थस्कन्धे च। एवं पृथ्व्यादय पृथ्वीमन्नादाः स्वमात्मन इति वर्षणभूयिष्ठलिङ्गमपि त्रिषु तुल्यम् । वर्षणे पृथिव्या आर्द्रतया भूयस्त्वात् । ओषधिवीरुधां व्रीह्यादीनामुत्पत्तेश्च । तस्माद् वाक्यशेषलोकप्रसिद्धिलिङ्गानां त्रिष्वपि तुल्यत्वात् पृथिव्याद्यन्यतमे वक्तव्ये अन्नमुक्तम् । एवञ्चोपजीव्यवाक्यरूढिप्रायपाठानां त्रयाणामविरोधोऽतस्तत्त्रयेऽपि ग्राह्यत्वेन प्राप्ते इत्यर्थः । सिद्धान्ते तु लक्षणा नास्त्येव । योगनैर्बल्यं त्वधिकारादिभिर्हेतुभिः परिक्रियत इति न कोपि दोषः । स ग्रन्थस्तु निगदव्याख्यातेनैव भाष्येण व्याख्यातः ।

तदभिध्यानादेव तु तल्लिङ्गात् सः ॥ १३ ॥

आकाशादेव कार्याद् वाय्वादिकार्योत्पत्तिं तुशब्दो वारयति । स एव परमात्मा वाय्वादीन् सृजति । कथं तच्छब्दवाच्यतेति चेत् तदभिध्यानात् । तस्य तस्य कार्यस्योत्पादनार्थं तदभिध्यानं, ततस्तदात्मकत्वं, तेन तद्वाच्यत्वमिति । ननु यथाश्रुतमेव कुतो न गृह्यत इत्यत आह । तल्लिङ्गात् । सर्वकर्तृत्वं लिङ्गं तस्यैव सर्वत्र वेदान्तेष्ववगतम् । जडतो देवताया वा यत्किञ्चिज्जायमानं तत् सर्वं ब्रह्मण एवेति सिद्धम् ॥ १३ ॥

भास्कराचार्यास्तु—तद्यदपां रस आसीत् तत् समहन्यत सा पृथिव्यभवदिति श्रुतिमपि शब्दान्तरत्वेनोदाजह्रुः । तेन योगरूढत्वादत्र पृथिव्येवान्नपदेनोच्यते इति सिद्धम् ॥ १२ ॥ ६ ॥

तदभिध्यानादेव तु तल्लिङ्गात् सः ॥ एवं तैत्तिरीयश्रुत्येकवाक्यतया छान्दोग्येऽपि क्रमेण ब्रह्मणः सकाशात् पञ्चमहाभूतसृष्टिरवधारितम् । तत्रायं संशयः । क्रमसृष्टावाकाशादयः किं स्वतन्त्राः स्वस्वकार्यं सृजन्त्युत परमेश्वरतन्त्रा इति । तत्र तावत् प्राप्तम् आकाशाद् वायुः वायोरग्निरित्यादि, तत्तेज ऐक्षत बहु स्यामित्यादिश्रुत्या भूतानां देवतायाश्च हेतुत्वस्य कर्तृत्वस्य कथनात् स्वतन्त्रा एव सृजन्तीति । एवं पूर्वपक्षे सूत्रमुपन्यस्य सिद्धान्तं व्याकुर्वन्ति । * आकाशादेवेत्यादि * । * कथमिति * । तर्हीति शेषः । * तदभिध्यानमिति * । आकाशरूपः स्यां वायुरूपः स्यामित्येवं स्वस्य तद्रूपाभिध्यानम् । तच्च, बहु स्यां प्रजायेयेति श्रुत्यैव संग्रहेणोक्तम् । नच तस्य तेजःप्रभृतिसाधारण्यं शङ्क्यम् । तेजःप्रभृतिष्वपि तत्पदोपनिबन्धेन प्रकरणेन च तस्यापि ब्रह्मधर्मत्वनिश्चयात् । * सर्वत्र वेदान्तेष्विति * स विश्वकृद्विश्वविदात्मयोनिः । यतः प्रसूता जगतःप्रसूती । यः पृथिव्यां तिष्ठन् यः पृथिवीमन्तर इत्यादिषु । फलितमाहुः । * जडत इत्यादि * । * ब्रह्मण इति * तत्तद्रूपेण तत्तदन्तः स्यात् तस्मात् । एवमेव

विपर्ययेण तु क्रमोऽत उपपद्यते ॥ १४ ॥

यथोत्पत्तिर्न तथा प्रलयः, किन्तु विपर्ययेण क्रमः । अत उत्प-

पौराणिकीषु महदादिसृष्टिष्वपि ज्ञेयम् ।

भिक्षुस्तु—अत्र क्षितिकर्तृत्वं विचार्यत इत्याह । तन्मन्दम् । पूर्वेषु पादेषु ब्रह्मण एव कारणत्वेऽवधारिते क्षितिप्रलयौ मत्यपि सामान्यतः कारणता सिद्धैवेति तदंशे सन्देहाभावेनाधिकरणवैयर्थ्यप्रसङ्गात् । अतः पूर्वोक्त एवार्थ इति निश्चयः ॥ १३ ॥ ७ ॥

विपर्ययेण तु क्रमोऽत उपपद्यते ॥ ननु तैत्तिरीये छान्दोग्ये च सृष्टेः क्रमो निरूप्यते, न तु प्रलयस्य । नैयायिकादयस्तु समवाय्यसमवायिकारणनाशात् कार्यनाशमङ्गीकुर्वन्ति । मुण्डके तु विस्फुलिङ्गन्यायेन युगपदेव सर्वोत्पत्तिर्युगपदेव सर्वेषां प्रलयश्च श्राव्यते । यथा सुदीप्तात् पावकाद् विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः । तथाऽक्षराद् विविधाः सौम्य भावाः प्रजायन्ते तत्र चैवापियन्तीति । तथा सति क्रमिकाणां प्रलये कः प्रकारो ग्राह्य इति संशये मुण्डके ब्रह्मण्येव सर्वप्रलयस्योक्तत्वेन श्रौतत्वाल्लौकिकं मतं विहाय यौगपद्यपक्षो ग्राह्य इति पूर्वपक्षे प्रवृत्तं सूत्रमुपन्यस्य व्याचक्षते । * यथोत्पत्तिरित्यादि * । सत्यमेवमेव साक्षात्सृष्टौ, तथापि सुबालोपनिषदि, किं तदासीत् तस्मै स होवाच न सन्नासन्न सदसदिति सदसद्विलक्षणं ब्रह्माभिसन्धायोच्यते । तस्मात् तमः सञ्जायते तमसि भूतादिर्भूतादेराकाशम् आकाशाद् वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवीत्यादि । एवं सृष्टिमुक्त्वा अग्रे उच्यते, सोऽन्ते वैश्वानरो भूत्वा सन्दग्ध्वा सर्वाणि भूतानि पृथिव्यप्सु प्रलीयते आपस्तेजसि विलीयन्ते तेजो वायौ प्रलीयते वायुराकाशेऽपि विलीयते आकाशमिन्द्रियेष्वित्यादि । पुराणेषु च 'वायुना हृतगन्धा भूः सलिलत्वाय कल्पते । सलिलं तद्धृतरसं ज्योतिष्ट्वायोपकल्पते । हृतरूपं तु तमसा वायौ ज्योतिः प्रलीयते । हृतस्पर्शोऽवकाशेन वायुर्नभसि लीयते । कालात्मना हृतगुणं नभ आत्मनि लीयत' इत्यादि । पुराणं च श्रुत्युपबृंहणम् । अतो ब्रह्मणः सकाशादुत्पत्त्यनन्तरं तत्रैव प्रलय इति येन

स्त्वनन्तरं प्रलयः। कुतः ? ॥ उपपद्यते ॥ प्रवेशाविपर्ययेण हि निर्गमनम्। क्रमस्तूपपद्यतेऽवैतत् ॥ १४ ॥

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गा-दितिचेन्नाविशेषात् ॥ १५ ॥

तैत्तिरीयके आकाशादि अन्नपर्यन्तमुत्पत्तिमुक्त्वा अन्नमयादयो निरूपिता। तत्रान्नमयस्य प्राणमयस्य च सामग्री पूर्वमुत्पत्तोक्ता। आनन्दमयस्तु परमात्मा मध्ये विज्ञानमनसी विद्यमाने कचिदुत्पन्ने इति वक्तव्ये।

क्रमेणोत्पत्तिस्तेन क्रमेण न प्रलयः, किन्तु विपर्ययेण क्रमः प्रलयस्य। अत्र पृच्छति। * कुत इति *। सत्यं श्रुतिपुराणेषूच्यते, परं तत्रापि हेतुर्वक्तव्यो येन बुद्धावारोहेत्। तत्राह ॥ उपपद्यत इत्यादि ॥ तथाच वैशेपिकादिवद्ध्वंसरूपो नात्र प्रलयः, किन्तु 'कारणे प्रवेशरूपः'। अतो लौकिकप्रवेशनिर्गमन्याय एव बुद्धिगोचरीकरणायानुसन्धेय इत्यर्थः। तेनेदं सिद्धम्। युगपत्प्रलयोत्तरं युगपत्सृष्टिः। क्रमेण प्रलये तद्विपरीतक्रमेण सृष्टिरिति। तदेतदुक्तं *क्रमस्तूपपद्यतेऽवैतदिति *

अन्ये तु प्रलयस्य ब्रह्मकर्तृकत्वावधारणार्थमित्याहुः। तन्मन्दम्। यतो वेत्यादिश्रुत्यैव तस्यावधारितत्वेन तत्र सन्देहस्यैवानुदयात्। अत उक्तमेव प्रयोजनमिति दिक् ॥ १४ ॥ ८ ॥

अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादितिचेन्नाविशेषात् ॥ क्रमविचार एव प्रसङ्गादन्यद् विचारयतीत्याहुः * तैत्तिरीयक इत्यादि *। अत्र हि तैत्तिरीयवाक्यैकवाक्यतया छान्दोग्यवाक्यं विचारितम्। छान्दोग्ये च, अनेन जीवेनात्मनानुप्रविश्येति जीव उच्यते। षोडशानां कलानामेका कलातिशिष्टासीदिति मन उच्यते। अतस्तत्क्रमोऽपि विचारणीयः। नच मनसोऽन्नविकारत्वस्य मयटा प्राप्तत्वादश्नोत्तरभावः शङ्क्यः। अन्नमशितं त्रेधा भवतीति तत्पूर्ववाक्ये तस्याशनोत्तरभावित्वकथनादन्नस्य च मनःप्राणसम्बन्धोत्तरभावि-

तत्र क्रमेणोत्पन्ने इति वक्तव्यम् । क्रमस्तु प्रातिलोम्येन । सूत्रे विपर्ययानन्तरकथनात् । अन्तरेति च वचनात् । तेजोऽबन्नानामन्नमये गतत्वात् । वाय्वाकाशयोः प्राण एव गतत्वात् । आकाशात् पूर्वं विज्ञानमनसी उत्पन्ने इति वक्तव्यम् । तयोरग्रे वचनमेव लिङ्गमिति । अतस्तयोरुत्पत्तिर्वक्तव्येतिचेन्न । अविशेषात् ।नामरूपविशेषवतामेवोत्पत्तिरुच्यते, न त्वनयोः । विज्ञानमयस्य जीवत्वात् । मनोमयस्य च वेदत्वात् । अतो भूतभौतिकमवेशाभावान्न तयोरुत्पत्तिर्वक्तव्या ॥ १५ ॥

तायाः प्रत्यक्षसिद्धत्वेनान्नमयत्वादिश्रुतेः पोषणाभिप्रायकत्वनिश्चयेन अन्नोत्तरभावित्वस्य तत्र वक्तुमशक्यत्वात् । अतस्तयोः क्रमः सर्वथा विचार्यः । सोऽपि तैत्तिरीयकानुरोधेन । उपजीव्यत्वात् । तैत्तिरीयके ह्याकाशाद्यन्नपर्यन्तमुत्पत्तिमुक्त्वा तदुत्तरमन्नमयादयो निरूपिताः । तत्रान्नमयसामग्र्योषध्यन्नरूपाः । तस्यान्नरसमयत्वात् । इदमा तन्निर्देशाच्च । प्राणमयस्तत आन्तर इति तस्य सामग्री वा व्याकाशपृथिवीरूपा । न तु प्राणाख्यवाह्यवाह्येन्द्रियरूपा । तच्छिरःप्रभृतिकथने प्राणव्यानापानाकाशपृथिवीनामेव कथनात् । एवमेतद्द्वयसामग्री, ओषधीभ्योऽन्नमित्यन्तेन पूर्वमुत्पन्नोक्ता । आनन्दमयस्तु परमात्मा । स तु मूलकारणम । तस्माद्वा एतस्मादात्मन इत्यात्मपदेनैवोक्तः । अतः परं मनोमयविज्ञानमयावशिष्येते । तदाह ॥ अन्तरा विज्ञानमनसी इति ॥ मध्ये विज्ञानमनसी विद्यमाने कचिदुत्पन्ने इति वक्तव्ये । तत्र पूर्वपक्षी आह * क्रमेणेति * । तैत्तिरीये आनन्दमयस्य निकटे विज्ञानमयो, दूरे मनोमय इति तत्क्रमेणोत्पन्ने इति वक्तव्यम् ।नच यद्ययं व्यासाशयः स्यात्तदा मनोविज्ञाने इति वदेन्न तु विज्ञानमनसी इति, अतो नैवमिति शङ्क्यम् । क्रमस्तु प्रातिलोम्येनैव व्यासस्य विवक्षितः । अभ्यर्हितत्वेन छान्दोग्यानुसारेण च प्रथममात्मनस्ततो मनसः स्मरणात् । नचात्र मानाभावः शङ्क्यः । सूत्रे विपर्ययानन्तरं कथनात् । अन्तरेति वचनाच्च । यद्येतन्नाभिप्रेया-

दिदं विपर्ययसूत्रात् पूर्वं पठेत् । अन्तरेति च न वदेत् । वायुतेजःप्रभृतिष्वन्तरेति पदं विनापि प्रणयनात् । अत एतद्वाक्यविचार एव व्यासाशयः । एवं सति छान्दोग्योक्तानां तेजोऽबन्नानामन्नमये गतत्वाद् वाय्वाकाशयोरङ्गीक्रियमाणयोः प्राणमये गतत्वाद् आकाशात् पूर्वं विज्ञानमनसी, विज्ञानं जीवो, मनोऽन्तःकरणमुभयविधबाह्येन्द्रियनायकमिति तदुपलक्षितं करणकदम्बकं चेति द्वे उत्पन्ने इति वक्तव्यम् । अन्यथा सर्व एवात्मानो व्युच्चरन्तीति श्रुत्युक्तानां जीवानाम्, एतस्माज्जायते प्राण इति श्रुतौ स्मृतिपुराणादिषु च जगत्कारणकोटिनिविष्टानां प्राणादीनां महदहङ्कारादीनां च ब्रह्मकार्य्यानिवेशे क्रमसृष्टौ न्यूनताऽऽपद्येत । नचाकाशादिग्रहणे यथामहाभूताधिकारो नियामकस्तथात्र विज्ञानमनसोर्ग्रहणे नियामकं छान्दोग्ये नास्तीति वाच्यम् । तयोरग्रे, अनेन जीवेनात्मनाऽनुप्रविश्येति, षोडशानां कलानामेका कलातिशिष्टाऽऽसीदिति वचनमेव लिङ्गम् । तैत्तिरीये चानन्दमयनिकटे विज्ञानमयस्य, दूरे मनोमयस्य कथनं लिङ्गम् । आकाशादिभूतघटितस्य प्राणमयस्य दूरत्वात् । भौतिकघटितस्यान्नमयस्य ततो दूरत्वाच्च । इदमपि लिङ्गमिति च । अतस्तयोर्जीवान्तःकरणयोरुत्पत्तिर्वक्तुं युक्तेतिचेत् । न । कुतः । अविशेषात् । नामरूपात्मकविशेषवन्तो ये वर्त्तन्ते तेषामेवोत्पत्तिरुच्यते । छान्दोग्ये तैत्तिरीये च, न त्वनयोर्भवदुक्तयोर्जीवान्तःकरणयोः । छान्दोग्ये जीवस्यात्मपदेन विशेषितत्वात् । भूतविकारात्मकमनःप्राणवाचामुक्तत्वभावादुक्तेन्द्रियाणां चाभावात् । तैत्तिरीये च विज्ञानमयस्य जीवत्वात् । मनोमयस्य वर्णात्मकवेदत्वात् । अतः श्रुतिद्वयेऽपि जीववेदयोरेवाभिप्रेतत्वात् तयोश्च मूलभौतिकप्रवेशाभावाच्च तयोरुत्पत्तिर्वक्तव्येति सिद्धम् । नच छान्दोग्ये वेदोऽभिप्रेत इति कथं ज्ञेयमिति शङ्कयम् । नामरूपव्याकरणरूपकार्येण तदवगमात् । वेदेन नामरूपाणि विषमाणि समेष्वपि । धातुषूद्धव ,कल्प्यन्ते एतेषां स्वार्थसिद्धय' इत्येकादशस्कन्धीयभगवद्वाक्येन तस्य तत्कार्यत्वानिश्चयात् । एवं जीवस्य करणत्वं वेदस्य च द्वारत्वम् । तेनोभयोः कार्यं नामव्याकरणमिति निश्चयः। इदं च, शब्द इति चेन्नातःप्रभवादिति सूत्रे सर्वैरङ्गीक्रियत इति नात्र विवादलेशः। एवञ्चास्मिन्नधिकरणे तैत्तिरीयोक्तौ विज्ञानमयमनोमयौ विषयः । कोत्पद्येते इति सन्देहः ।

उत्पत्तिसामग्र्यनुक्तिरुत्पन्नेषु पाठश्च सन्देहबीजम् । तयोर्जीवान्तःकरणरूपत्वाच्छ्रुत्यन्तरे तयोः साक्षादुत्पत्तिकथनादाकाशात् पूर्वं च कथनात् क्रमसृष्टावपि आकाशात् पूर्वं परमात्मनः सकाशात् ते अप्युत्पद्यते इति पूर्वः पक्षः । ते अत्र न जीवान्तःकरणरूपे, किन्तु जीववेदरूपे, तद्गमकस्य लाभात् । अतो न तयोरुत्पत्तिरत्राभिप्रेतेति सिद्धान्तः । ननु भवत्वेवं तथापि न्यूनांशपूरणाय क्रमसृष्टावपि प्राणेन्द्रियमनसां क्वचिदुत्पत्तिस्तु वक्तव्येतिचेत् । पुराणानां श्रुत्युपबृंहणत्वात् तदनुसारेणाकाशात् पूर्वमेव तत्तत्कारणभावापन्नाद् ब्रह्मण एवेति ज्ञातव्यम् ।

रामानुजाचार्या विज्ञानभिक्षुश्चैवमेवाहुः ।

यत्तु शङ्कराचार्यभास्कराचार्याभ्यां बुद्धिं तु सारथिं विद्धीति, एतस्माज्जायते प्राण इति वाक्यद्वयं विषयत्वेन धृत्वा सूत्रस्थं विज्ञानपदं च करणव्युत्पत्त्या बुद्धीन्द्रियसंग्राहकं विधाय विज्ञानमनसी इति द्विवचनमुपपादितम् । ततोऽग्रे करणानां भौतिकत्वपक्षे तेनैव निर्वाहान्न क्रमान्तरापेक्षा । अभौतिकत्वपक्षे तु तेभ्यः पूर्वमित्युक्तम् । तत् तदनुसारिणामेव रोचिष्णु । आद्यस्य काठकवाक्यस्योत्पत्तिप्रकरणीयत्वाभावेन विषयवाक्यत्वायोगात् । बुद्ध्यादीनां त्रयाणां तत्र पृथगुक्त्या सौत्रद्विवचनविरुद्धत्वाच्च । द्वितीयस्य मुण्डकवाक्यस्य च बुद्धिरहितत्वेनैव तथात्वाच्च । करणव्युत्पत्तेर्बुद्ध्यादित्रयसाधारण्येन सूत्रे मनःप्रयोगवैयर्थ्यापत्तेश्च । भौतिकेन्द्रियपक्षानादरणीयतया अस्माभिः प्रागुपपादितत्वेन तद्रीत्या छान्दोग्ये तन्निवेशस्याशक्यवचनतया, अभौतिकपक्षे चात्माकाशयोरन्तराले वा पश्चाद्वा तेषां प्राप्त्या सूत्रीयसिद्धान्तस्योपपत्तिशून्यतया शैथिल्यप्रसङ्गाच्च । नच प्रजापतिर्वा इदमग्र आसीत् स आत्मानमैक्षत स मनोऽसृजत तन्मन एवासीत्तदात्मानमैक्षत तद्वाचमसृजतेतिश्रुत्यन्तरे पृथक्क्रमाम्नानात् । स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीमिन्द्रियं मनोऽन्नमिति प्रश्नोपनिषच्छ्रुतेश्च न शैथिल्यमिति वाच्यम् । तथा सति व्यासपादैः श्रुत्यन्तरेणाविशेषादित्येवमुच्यते । किञ्चैकस्यां सृष्टाविन्द्रियादीनां नानाविधाभिरुत्पत्त्यैवक्तुमयुक्तत्वात् तत्तत्सृष्टौ तत्र तत्रोत्पत्तिरित्यङ्गीकार्यम् । तथा सति यथा साक्षात्सृष्टिक्रमसृष्ट्योः शब्दादेव सन्देहाभाव-

चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ १६ ॥

ननु विज्ञानमयस्य जीवस्यानुत्पत्तौ सर्वव्यवहारोच्छेदः । उत्पत्तिस्तु त्रिविधा निरूपिता । अनित्ये जननं नित्ये परिच्छिन्ने समागम इति । तथाच जीवस्य समागमलक्षणाऽप्युत्पत्तिर्न स्यादितीमामाशङ्कां निराकरोति तुशब्दः । चराचरे स्थावरजङ्गमे शरीरे तयोर्विशेषेणापाश्रय आश्रयः शरीरसम्बन्ध इति यावत् । स तु स्यात् । न तु स्वतः । ननु शरीरस्योत्पत्तौ जीवोऽप्युत्पद्यते ।

ऽस्मापीति सूत्रमनावश्यकं च स्यात् । अतस्तदविचारेऽपि शास्त्रे न्यूनत्वस्याभावात् प्रागुक्तमेव निरवद्यमिति दिक् ॥ १५ ॥

चराचरव्यपाश्रयस्तु स्यात् तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ जीवाद्यनुत्पत्तावेव किञ्चिदाशङ्का परिहरतीत्याशयेन सूत्रमुपन्यस्य व्याकुर्वन्ति । * नन्वित्यादि * । जीवस्येत्युपलक्षणम् । पूर्वसूत्रे वेदस्यापि विचार्यत्वेनोपक्षिप्तत्वात् । अतो विज्ञानमयस्य मनोमयस्यचानुत्पत्तौ सर्वव्यवहारोच्छेदः । न हि जीवानुत्पादे कश्चित् संसारासक्तो वा मुमुक्षुर्वा प्रवृत्तिनिवृत्तिलक्षणकर्मज्ञानभक्त्यधिकारी भवेत् । तदभावे च लोकयात्रा तत्तत्पुरुषार्थोपायबोधकानि शास्त्राणि चोच्छिद्येरन् । न वा वेदस्यानुत्पत्तौ धर्माधर्मादिकमसङ्कीर्णमवगन्तुं शक्येत । तदभावे लोकमर्यादाऽप्युपच्छिद्येत । एवं सर्वव्यवहारोच्छेद उभयत्रापि समान इति पृथक् तदनुक्तिः । नच नामरूपसम्बन्धात्मिका या उत्पत्तिः सैवात्र निषिध्यते, नेतरेत्यतो न दोष इति वाच्यम् । उत्पत्तिस्तु पूर्वं त्रिविधा निरूपिता । अनित्ये जननं नित्ये परिच्छिन्ने समागम इत्यादि । सन्नियोगशिष्टासु तिसृष्वेकतरैव निषिध्यते, नेतरेत्यत्र विनिगमकाभावात् । तथाच जीवस्य समागमलक्षणाऽप्युत्पत्तिर्न स्यादितीमामाशङ्कामित्यर्थः । * शरीरे इति प्रथमायाः, * तयोरिति सप्तम्या द्विवचनम् । * स तु स्यादि-

अन्यथा जातकर्मादीनामभावप्रसङ्गादितिचेन्न । तद्व्यपदेशस्तस्य शरीरस्य जन्ममरणधर्मवत्त्वेन जीवव्यपदेशो भाक्तो लाक्षणिकः । कुतः ? । तद्भावभावित्वात् । शरीरस्यान्वयव्यतिरेकाभ्यामेव जीवस्य तद्भावित्वम् । देहधर्मो जीवस्य भाक्तः । तत्सम्बन्धेनैवोत्पत्तिव्यपदेश इति सिद्धम् ॥ १६ ॥

ति * । जायमानः शरीरमभिसम्पद्यमान उत्क्रामन्म्रियमाण इति श्रुत्या देहसम्बन्धेनैव तयोरुक्तत्वाद्देहसम्बन्धस्तु स्यादित्यर्थः । नच वेदस्य न शरीरसम्बन्ध इति शङ्क्यम् । नादात्मना सर्वशरीरेषु तस्यैव विद्यमानत्वात् । तदुक्तमेकादशस्कन्धे भगवता, स एष जीवो विवरप्रसूतिरित्यादिद्वयेन । * तस्य शरीरस्येत्यादि * । शरीरस्य जन्ममरणवत्त्वेन जीवे तस्य जन्ममरणवत्त्वस्य व्यपदेशो भाक्तो लाक्षणिक इति योजना । पृच्छति * कुत इति * लक्षणारूपात् कस्मात् सम्बन्धात् । * तद्भावभावित्वादिति * । तद्भावेन शरीरभावेन शरीराभिमानेनेति यावत् । तेन भवति व्याप्तस्तिष्ठति तच्छीलस्तद्भावभावी तत्त्वात् । तथाच शरीराभिमानरूपात् सम्बन्धादित्यर्थः । तदाहुः । * शरीरस्येत्यादि * । * तद्भावित्वमिति * तदभिमानित्वम् । सिद्धमाहुः । * देहेत्यादि * । * तत्सम्बन्धेनेति * देहसम्बन्धेन । एवमेव वेदेऽपि समानन्यायाद् बोध्यम् । एवञ्च चराचरव्यपाश्रयस्तु स्यादिति भिन्न वाक्यं, शिष्टं वाक्यान्तरम् ।

भास्कराचार्यास्तु–चरे अचर उद्गत इति गौणत्वसिद्धिरित्यर्थं वदन्तश्चरे अचरस्य व्यपाश्रय इत्येवं समासं कृत्वा, अन्ये तु चराचरं व्यपाश्रयो यस्येति बहुव्रीहिं कृत्वा चराचरव्यपाश्रयपदम् उत्पत्तिनाशव्यपदेशस्य भाक्तत्वे हेतुत्वेन व्याकुर्वन्ति । तद्भावभावित्वादिति तु शरीरसद्भावे जन्ममरणयोर्भावित्वादित्येवं ताच्छील्ये णिनिमङ्गीकृत्य व्याकुर्वन्ति । तथा सति तद्भावभावित्वाच्चराचरव्यपाश्रयस्तद्व्यपदेशो भाक्त- स्यादित्येकमेव वाक्यं भवति । तत्र सूत्रकृतोऽभिमेतमिति प्रतिभाति । स्यात्पदस्य मध्ये पाठात् । अभिमानेन

नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ १७ ॥

ननु जीवोऽप्युत्पद्यतां, किमिति भाक्तत्वं कल्प्यत इतिचेद।

वा समागमेन वा जीवशरीरयोः सम्बन्धस्य सर्वेषामावश्यकत्वाच्च वाक्यद्वयपक्ष एव साधीयानिति।

भिक्षुस्तु-अन्तःकरणस्य रूपभेदेनाकाशवन्नित्यानित्यत्वं स्वीकृत्याच नित्यान्तःकरणस्याभिप्रेतत्वात् तदुत्पत्तिव्यपदेशो भाक्त इत्येवमर्थमाह। तदस्माकमप्यभिमतम्। परं यन्नित्यत्वेन तस्याभिमतं तदस्माकं वेदसूक्ष्मरूपत्वेन भगवदीयत्वेन, न तु तत्त्वान्तरत्वेनेति विशेषः।

रामानुजाचार्यास्तु-इदं सूत्रं प्रासङ्गिकत्वेनेच्छन्ति। तथाहि। पूर्वं, तेज ऐक्षतेत्यादौ तेजःप्रभृतयः शब्दाः ब्रह्मैवाभिदधतीत्युक्तम्। तथा सति तैस्तैः शब्दैस्तत्तद्व्यपदेश उपरुध्यत इति शङ्कायां, चराचरसूत्रं प्रवृत्ते। अर्थस्तु-चराचरव्यपाश्रयस्तत्तद्व्यपदेशो भाक्तः, लोके वाक्यैकदेशे भङ्क्त्वोक्त इत्यर्थः। समस्तप्रकारिणो ब्रह्मणः प्रकारभूतवस्तुग्राहिप्रत्यक्षादिप्रमाणाविषयत्वाद् वेदान्तश्रवणात् प्रकारप्रकारिप्रतीतेः प्रकारिप्रतीतिभावभावित्वाच्च तत्पर्यवसानस्येति। यद्वा तेजआदयः शब्दास्तत्तद्वाचका इति तेषां ब्रह्मवाचकत्वं भाक्तमित्यत आह। चराचरेति। चराचरव्यपाश्रयस्तद्व्यपदेशश्चराचरवाचिशब्दप्रयोगो ब्रह्मण्यभाक्तः। कुतः? । तद्भावभावित्वात्। सर्वशब्दानां वाचकभावस्य नामरूपव्याकरणश्रुत्या ब्रह्मभावभावित्वादिति द्विधा व्याख्यानात्। अत्रोदासीना वयम्।

माध्वास्तूक्तसूत्रद्वयात्मकमधिकरणं लयक्रमविचारपरमिच्छन्ति। तत्रापि वयं तथैव ॥ १६ ॥ ९ ॥

नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ पूर्वाधिकरणे जीवस्य नामरूपविशेषसम्बन्धाभावाज्जीवस्य नोत्पत्तिरित्युक्तम्। तदुक्तं न वेति सन्देहे, देवदत्तादिनाम जीवस्यैव, न शरीरमात्रस्य। मृते देवदत्ते तदीयगयाश्राद्धादिकरणानुपपत्तेः। एवं नामसम्बन्धे तत्र सिद्धे सोऽप्युत्पद्यतां तदेतदाहुः। * ननु जीवोऽपीत्यादि *। समाधिं व्याकुर्वन्ति * नेत्यादि *। तथाच, अङ्गादङ्गात् सम्भवसि हृदयाद-

न । आत्मा नोत्पद्यते । कुतः ? । अश्रुतेः । न हि आत्मन उत्पत्तिः श्रूयते । देवदत्तो जातो, विष्णुमित्रो जात इति देहोत्पत्तिरेव । न तु तद्व्यतिरेकेण पृथग् जीवोत्पत्तिः श्रूयते । विस्फुलिङ्गवदुच्चरणं नोत्पत्तिः । नामरूपसम्बन्धाभावात् । एतस्य गुणाः स्वरूपं चाग्रे वक्ष्यते ।

धिजायसे आत्मा वै पुत्रनामासि त्वं जीव शरदः शतमित्यादिश्रुतिविचारे लोकविचारे च देहस्यैवोत्पत्तिः । श्राद्धादिशास्त्रे तु देवदत्तादिदेहोपलक्षितो जीवोऽभिप्रेयते । तत्रापि पूर्वोक्तश्रुतिप्रभृतय एव बीजम् । अत एव, 'अहस्तानि सहस्तानामपदानि चतुष्पदाम् । फल्गूनि तत्र महतां जीवो जीवस्य जीवनमि'त्यादौ देहेऽपि गौण्या जीवपदप्रयोगः । यद्वा 'एतत्पञ्चविधं लिङ्गं त्रिवृत् षोडशविस्तृतम् । एष चेतनया युक्तो जीव इत्यभिधीयत' इति चतुर्थस्कन्धस्मृतेर्विशिष्टे पारिभाषिको वा । न तु देहव्यतिरेकेण पृथग् जीवोत्पत्तिः श्रूयते । नापि युक्तिगोचरीभवति । तस्योत्पत्तिनाशशालित्वे श्राद्धादिशास्त्रोक्तामुष्मिकफलसम्बन्धानुपपत्त्या सर्वशास्त्रविप्लवप्रसङ्गात् । प्रेतादिपूर्वजन्मकथनाद्यनुपपत्तेश्च ।

अतो देहस्यैव जन्मादिधर्मवत्त्वात् तत्सम्बन्धेनैव जीवे जन्मादिव्यपदेश इति निश्चयः । ननु बृहदारण्यके, यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः, सर्वे देवाः सर्वाणि भूतानि सर्व एवात्मानो व्युच्चरन्तीति श्रुत्या प्राणादिजडसाधारण्येन व्युच्चरणश्रावणान्मुण्डके च, एतस्माज्जायते प्राण इत्यनेनोत्पत्तिमत्तया श्रावितानां प्राणादीनामस्य साहचर्यात् कथं नोत्पत्तिरित्यत आहुः । * विस्फुलिङ्गवदित्यादि * । यतो विस्फुलिङ्गवदुच्चरणं नोत्पत्तिः । नामरूपसम्बन्धाभावात् । अन्यथा व्युच्चरणश्रुतावात्मशब्दप्रयोगस्य, बालाग्रश्रुतिव्याकरणश्रुत्योर्जीवशब्दप्रयोगस्य च विरोधापत्तेः ।

न चास्यापि सृष्ट्यनन्तरभावित्वात् कृत्रिमत्वं शङ्क्यम् । तथा सति सृष्टेः पूर्वं ब्रह्मण एव केवलस्य सत्त्वात् सृष्ट्यनन्तरं प्रयुज्यमानानां शब्दानां सर्वत्र परिभाषिकत्वापत्त्या रूढ्युच्छेदप्रसङ्गात् । अतस्तद्भा-

किञ्च। नित्यत्वाच्च ताभ्यः श्रुतिभ्यः। अयमात्माऽजरोऽमरः, न जायते म्रियत इत्येवमादिभ्यः॥ १७॥

चाय सर्वाणि रूपाणि विचिन्त्य धीरो नामानि कृत्वाऽभिवदन् यदास्त इति श्रुत्युक्तस्य नामरूपनियमस्य साहाजिकत्वमाश्रेयम्। तथा सति तदतिरिक्तस्यैव कृत्रिमत्वं, न तु नैसर्गिकस्येति निश्चयः। तदेतदुक्तं * नामरूपसम्बन्धाभावादिति। न च नामरूपान्तरसम्बन्धस्यैवोत्पत्तित्वं, न केवलव्युच्चरणस्येत्यत्र किं गमकमिति शङ्क्यम्। यथोर्णनाभिस्तन्तुनोच्चरेदित्यव्यवहितपूर्वमुदितस्य दृष्टान्तस्यैव गमकत्वात्। अन्यथैकेनैव निर्वाहे इतरवैयर्थ्यप्रसङ्गात्। अतस्तन्तूनां नामरूपसम्बन्धात् पूर्वो दृष्टान्तः प्राणादीनां भूतानां नामरूपसम्बन्धवतामुत्पत्तिबोधकः। नच तेषामुत्पत्तिमत्त्वे किं मानमिति वाच्यम्। ऐतरीये, स ऐक्षत लोकान्नु सृजा इति प्रश्ने, स प्राणमसृजतेत्यादिसृष्टिश्रुतीनामेव मानत्वात्। नच तदात्मानं स्वयमकुरुतेत्यात्मकरणश्रुतिविरोधः। तत्र यथास्थितप्राकट्यस्यैव करणत्वेन विवक्षितत्वात्। अन्यथा तस्य सुकृतत्वविरोधापत्तेः। नचात्मकृतेः परिणामादिति सूत्रे तस्य परिणामत्वस्याङ्गीकारविरोधः शङ्क्यः। तत्र यथास्थितप्राकट्यस्यैव परिणामत्वेन विवक्षितत्वात्। अन्यथा विपरिणामादित्येवं वदेत्। अतः प्राणादीनामेवोत्पत्तिर्न जीवस्येति निश्चयः। द्वितीयस्तु जीवानामुच्चरणमात्रबोधक इत्यास्थेयम्। नच यथोर्णनाभिः सृजते गृह्णते चेति मुण्डकवाक्यस्वारस्यात् पूर्वो दृष्टान्तः कर्तृत्वमात्रबोधक इति वाच्यम्। एवमपि क्रियाविषयाणामुत्पत्तिमत्त्वस्य सिद्धेः। नचैवमपि प्राणादिसाम्यानपाय इति शङ्क्यम्। यत एतस्य गुणाः स्वरूपं चाग्रे, ज्ञोऽत एवेत्यादिसूत्रेषु वक्ष्यते। अतस्तदवगतौ प्राणादिसाम्यसन्देहस्य सुखेन निवृत्तेः। नन्वेवमपि, प्रमेयबलेन निवृत्तिर्न तु प्रमाणेन। शास्त्रं तु भवतां प्रमाणप्रधानमतो नेदं युक्तमत आहुः * किञ्चेत्यादि *। इत्येवमादिभ्य इत्यादिपदेन, नित्यो नित्यानां चेतनश्चेतनानाम्, अजो नित्यः शाश्वतोऽयमित्यादीनां सङ्ग्रहः। तथाच नात्र प्रमाणाभाव इत्यर्थः॥ १७॥ १०॥

गुणान्निरूपयन् प्रथमतश्चैतन्यगुणमाह ॥

ज्ञोऽत एव ॥ १८ ॥

ज्ञश्चैतन्यस्वरूपः। अत एव श्रुतिभ्यो विज्ञानमय इत्यादिभ्यः। सर्वविप्लववादी ब्रह्मवाक्यान्युदाहृत्य सूत्रोक्तसिद्धान्तमन्यथाकृत्य श्रुतिसूत्रोल्लङ्घनेन प्रगल्भते।

ज्ञोऽत एव ॥ सूत्रमवतारयन्ति। * गुणानित्यादि *। गुणाँस्तद्गुणान् धर्मान्निरूपयन् प्रथमतो मुख्यतया चैतन्यगुणं चैतन्यं गुणो यस्य तादृशं, यो यज्जनकः स तद्गुणको, यो यद्गुणकः स तदविनाभूतो, यो यदविनाभूतः स तदात्मक इति व्याप्तीनां समन्वयसूत्रे सिद्धत्वादत्र चैतन्यगुणकत्वेन चैतन्यात्मकमात्मानमाहेत्यर्थः। व्याकुर्वन्ति। * ज्ञ इत्यादि *। ज्ञानधर्मकत्वेऽपि ज्ञानस्वरूप इत्यर्थः। ननु कप्रत्ययस्य कर्त्तर्यनुशासनाज्ज्ञानकर्त्तेति भवति। तच्च कर्त्तृत्वं समवायसम्बन्धेनेति ज्ञानधर्मकत्वे पर्यवस्यतीति काणभुजवदङ्गीकर्त्तव्यं, न तु सांख्यवज्ज्ञानस्वरूप इत्येतामाशङ्कां हेतुबोधितश्रुत्युपन्यासेन परिहरन्ति * विज्ञानेत्यादि *। तथाच छान्दोग्यश्रुतिषु, न पश्यो मृत्युं पश्यति, एष हि द्रष्टा श्रोता मन्ता रसयितेत्यादिभिर्विज्ञातृत्वादिबोधनाज्ज्ञानधर्मकत्वेऽपि तैत्तिरीयादौ मयट्प्रत्ययेन ज्ञानप्राचुर्यबोधनात्। एतन्निगमनश्लोके च विज्ञानं यज्ञं तनुत इत्यादिना ज्ञानस्वरूपत्वकथनाज्ज्ञानधर्मा ज्ञानस्वरूपश्च। न तु काणभुजवच्च वा कापिलवदित्यर्थः। अत्रान्येषां मतानामेकदेशितया भगवन्माहात्म्याविरोधितया च संग्राह्यत्वं बोधयितुं शाङ्करं मतं दूषणायोपक्षिपन्ति * सर्वविप्लवेत्यादि *। सर्वविप्लववादित्वं तु पाद्मवचनोपन्यासेन, नासतोऽदृष्टत्वादित्यत्र मया प्रदर्शितम्। तादृशो, ब्रह्मवाक्यानि विज्ञानमानन्दं ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्म अयमात्मानन्तरो बाह्यः कृत्स्नः प्रज्ञानघन इत्यादीन्युदाहृत्य, सूत्रोक्तसिद्धान्तमन्यथाकृत्य सुषुप्त्युत्क्रान्त्योर्भेदेनेत्यादिसूत्रेषु सिद्धं जीवब्रह्मणोर्भेदरूपं सिद्धान्तं भेदस्य काल्पनिकत्वकथनेन संसारिस्वरूपमात्राख्यानपरतया व्याख्याय, अयं शारीर आत्मा प्राज्ञेनात्मना

स वक्तव्यः । किं जीवस्य, ब्रह्मत्वं प्रतिपाद्यते जीवत्वं वा निराक्रियते इति । आद्ये इष्टापत्तिः । न हि विस्फुलिङ्गोऽग्न्यंशो भूत्वा नाग्निः । द्वितीये स्वरूपनाशः ।

जीवत्वं कल्पितमितिचेन्न । अनेन जीवेनात्मनेति श्रुतिविरोधात् । नचानादिरयं जीवब्रह्मविभागो बुद्धिकृतः । प्रमाणाभावात् । सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुतिविरोधश्च । नच जीवातिरिक्तं ब्रह्म नास्ति । सर्वश्रुतिसूत्रनाशप्रसङ्गात् । यः सर्वज्ञः सर्वशक्तिः । अयमात्मा अपहतपाप्मा । अधिकं तु भेदनि-

---

स्मपरिष्वक्तः प्राज्ञेनाऽऽत्मनान्वारूढ इत्यादिश्रुतीनाम् उक्तसूत्राणां चार्थत्यागेन धाष्टर्यं करोतीत्यर्थः । तद्दूषयन्ति । * स वक्तव्य इत्यादि * । द्वितीये स्वरूपनाश इति * । जीवत्वनिराकरणपक्षे जीवस्वरूपस्याविद्यकत्वान्मुक्तावविद्यानाशे जीवस्वरूपनाश एव स्यात्, तथाचात्महानमपुरुषार्थ इति मोक्षस्यापुरुषार्थता च स्यात् । ननु वस्तुत आत्मनो ब्रह्मत्वाज्जीवत्वं तस्य कल्पितमतो न तन्नाशे स्वरूपनाश इत्यत आहुः * जीवत्वमित्यादि * । अत्र हि जीवशब्दोदितस्यात्मनो जीवस्यात्मनश्चेत्युभयोर्षा नामरूपकरणत्वं श्राव्यते । तत्र यदि जीवत्वं कल्पितं स्यात् तदा ततः पूर्वं कल्पकः कश्चिद्वक्तव्यः । तत्र न तावद् ब्रह्मणस्तथात्वम् । अविद्यासम्बन्धराहित्यात् । न तावज्जीवस्य, कल्पनाविषयत्वात् । सृष्ट्यादौ जीवान्तरस्याभावात् । जडस्य तु न तथात्वं, प्रत्यक्षविरोधात् । यदि तु तेजआदिदेवतायाः कल्पकत्वं शङ्क्यते तदा तस्यापि जीवत्वात् तस्य कः कल्पकः । तस्मात् कल्पकनिर्वचनाशक्त्या जीवस्याकल्पितत्वमेवास्थेयम् । अन्यथा, अनेन जीवेनेति, द्वा सुपर्णा इति च श्रुतिविरोधः । नच बहुत्ववज्जीवत्वमपि पाश्चात्यमिति शङ्क्यम् । तथा श्रुत्यभावात् । सूत्रकारादायनेन जीवेनेति सिद्धवन्निर्देशाच्च । अतः सृष्टेः पूर्वमपि भगवदङ्गवज्जीवरूपोऽशोऽपि भगवदविभक्तस्तादृशनामादिविशिष्टो नित्य एवाऽऽस्थेयः । नन्वनादिजीवब्रह्मविभागो बुद्धिकृत इति तथेत्यत आहुः * । न चेत्यादि * । न ह्यनादित्वे बुद्धिकृतत्वे वा प्रत्यक्षं प्रमाणीभवितुमर्ह-

दैशादिसादिबाधः ।

तस्मात् सदंशस्य तद्व्यपदेशवाक्यमात्रं स्वीकृत्य शिष्टपरि-

ति । जीवभावस्य कल्पितत्वेन तत्प्रत्यक्षस्य स्वाप्निकमायिकपुरुषप्रत्यक्षवत् प्रामाण्यायोगात् । अत एव नानुमानादिरपि । श्रुतयस्तु तत्र विस्फुलिङ्गवद्व्युच्चरणं ब्रह्मण्यप्ययं चाभिदधत्यो जीवब्रह्मविभागस्य सादित्वमेव बोधयन्ति ।

नच, न कर्माविभागादिति चेन्नानादित्वादिति सूत्रे कर्मानादित्वबोधनेन विभागानादित्वं, पुण्यः पुण्येनेति तद्विषयश्रुत्या बोधितप्रायमेवेति वाच्यम् । श्रुतौ सदसत्कर्मणा सदसद्देहभवनमात्रबोधनेन विभागानादित्वस्याबोधनात् सूत्रेऽनादित्वकथनस्य कर्मसापेक्षतया करणेऽपीश्वरस्यानीश्वरत्वाभावबोधनार्थत्वावसायात् । अन्यथा, एष ह्येव साधु कारयतीत्यादिश्रुतिविरोधस्यापरिहाराद् वैषम्याद्यभावस्य तदनन्यत्वादेव सिद्धेश्च । नच तत्र संसारानादित्वव्याख्यानं युज्यते । तथा सतीश्वरस्यानीशत्वं, सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुतिविरोधश्च । संसारहेतुभूताया अविद्याया जीवानां च सत्त्वात् । एतदेवोक्तं *सदेवेत्यादिना । नच सा असतीति युक्तम् । तथा सति तया संसारासम्भवापत्तेः । नापि सदसद्विलक्षणेति । तथा सति ब्रह्मानतिरेकापत्तेः । अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यत इति गीतावाक्यात् । कल्पितजीवानादित्वमप्यनेनैव निरस्तम् । अतो विभागानादित्वमप्रमाणकमेव । किञ्च । बुद्धिकृत इति कस्य बुद्धिकृतः । जीवस्य ब्रह्मणो वा स्वस्यैव वा । तत्र न तावदाद्यः । जीवस्यैवाभावात् । द्वितीये तु बुद्धिकृतत्वाद् गतमनादित्वम् । तदानीं बुद्धिसत्त्वादद्वितीयश्रुतिविरोधश्च । तृतीये त्वसम्भव एव । तस्या जडत्वात् । अबुद्धिकृतपक्षे विभागस्य कृतत्वेऽपि जीवस्य सत्त्वादद्वितीयश्रुविरोध एव । नचैवं विभागस्य सादित्वे विस्मृतकण्ठमणिन्यायेन विस्मृतस्वस्वरूपं ब्रह्मैव इति जीवातिरिक्तं ब्रह्म नास्तीति युक्तम् । सर्वश्रुतिसूत्रनाशप्रसङ्गात् । केषां नाशप्रसङ्ग इति चेत् । यः सर्वज्ञ इत्यादीनां बाधः । *स्वीकृत्येति* अंशत्वत्यागेन

ग्रहार्थमाध्यमिकस्यैवायमपरावतारो नितरां सद्भिरुपेक्ष्यः ॥१८॥

उत्क्रान्तिगत्यागतीनाम् ॥ १९ ॥

अत एवेति वर्तते । स यदास्माच्छरीरादुत्क्रामति सहैवैतैः सर्वैरुत्क्रामति । ये के चास्माल्लोकात् प्रयान्ति चन्द्रमसमेव ते सर्वे गच्छन्तीति । तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे। श्रुत्युक्तानामुत्क्रान्तिगत्यागतीनां श्रवणात् यथायोग्यं तस्य परिमाणमङ्गीकर्तव्यम् ।

तथात्वं स्वीकृत्य। *माध्यमिकस्यापरावतार इति * भगवदाशुतशिवावतारत्वेन प्रसिद्धे शङ्कराचार्ये माध्यमिकोऽप्याविष्ट इति तथा। एवं च सर्वावस्थासाधारण्येन ज्ञानधर्मा ज्ञानस्वरूपश्च जीव इति सिद्धम् ।अत्रापि जीवो वैशेषिकवदङ्गीकार्यः, सांख्यवद् वेति सन्देहः। उभयथा श्रुतिः सन्देहबीजम् । यथाकथञ्चिदस्तु अभ्यर्हितत्वात् सांख्यमतमेवेति पूर्वः पक्षः। सिद्धान्तस्तूक्त एव । विचारस्तु गुणमुख एव, न तु स्वरूपमुखः। सूत्रे ज्ञशब्दप्रयोगादिति ॥ १८॥ ११ ॥

उत्क्रान्तिगत्यागतीनाम् ॥ अतः परं जीवस्य शारीरकब्राह्मणे; स वा एष महानज आत्मेति, कौशीतकिब्राह्मणे च, योऽयं विज्ञानमयः पुरुषः प्राणेष्विति व्यापकत्वमध्यमपरिमाणयोः श्रावणात्, श्वेताश्वतरे च, आराग्रमात्रो ह्यवरोऽपि दृष्ट इति, वालाग्रशतभागस्य शतधा कल्पितस्य च, भागो जीवः स विज्ञेय इत्यणुत्वश्रावणात्,सन्देहे जीवस्य परिमाणं विचार्यते। तत्र सूत्रे एकं षष्ठ्यन्तं पदं,तस्य सम्बन्धः क्वापि न प्रतीयत इति तं बोधयन्ति । * अत इत्यादि * । कर्तव्यमित्यन्तेन * । अत्र प्रथमं वाक्यं कौशीतकिब्राह्मणे प्रतर्दनाख्यायिकायाम् । द्वितीयमपि तत्रैव गाङ्ग्यायनिश्वेतकेतुसंवादे । तृतीयं बृहदारण्यके शारीरब्राह्मणे।* श्रवणादिति * जीवे श्रवणात् । तथाच श्रुतित एवोत्क्रान्तिगत्यागतीनां जीवे श्रवणाद् यथायोग्यम् उत्क्रान्त्यादिक्रियायोग्यं जीवस्य परिमाणमङ्गीकर्तव्यमित्यर्थः। सूत्रयोजना तु जीवात्मा उत्क्रान्तिगत्यागतिसम्बन्धी। अत एव तद्यो-

यद्यपि, आराग्रमात्रो ह्यपरोऽपि दृष्ट इति श्रुत्यैव परिमाणमुक्तं, तथापि वह्वाद्विविप्रतिपन्नत्वाद् युक्तिभिः साधयति । ब्रह्मवैलक्षण्यार्थमुत्क्रान्तिपूर्वकत्वमुक्तम् ॥ १९ ॥

स्वात्मना चोत्तरयोः ॥ २० ॥

उत्क्रान्तिगत्यागतीनां सम्बन्धे इन्द्रियादिभिः परिष्वक्तोऽप्यस्ति । ततः सन्देहोऽपि भवेत् । किमुपाधित एतेषां सम्बन्धो भवेत् स्वतो वेति ।

धकश्रुतिश्च एवेति बोध्या । अधिकरणप्रयोजनमाहुः । * यद्यपीत्यादि * । उत्क्रान्तिशब्दः प्रथमतः किमर्थं प्रयुक्त इत्यत आहुः । * ब्रह्मेत्यादि * । आसीनो दूरं व्रजतीति ब्रह्मणोऽपि गतेरुक्तत्वात् तद्वैलक्षण्यं गतौ ज्ञापयितुं प्रयुक्त इत्यर्थः ।

ननु प्रश्नोपनिषदि, स ईक्षाञ्चक्रे कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् प्रतिष्ठिते प्रतिष्ठास्यामीति । स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीमिन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्राः कर्म लोकेषु नाम चेति सृष्टिलिङ्गात् षोडशकलस्यापि ब्रह्मत्वप्रतीतेरुत्क्रान्तेः कथं ब्रह्मवैलक्षण्यार्थत्वमिति चेत् । उच्यते । नात्रोत्क्रान्तेर्ब्रह्मधर्मत्वं प्रतीयते । प्राणधर्मत्वेनैवेक्षणे प्रतीयमानत्वात् । तदुत्क्रान्त्यैव स्वोत्क्रान्तिकथनेन स्वोत्क्रान्तेरौपचारिकत्वबोधनाच्च तादृशज्ञापन एव पर्यवसानात् । नच, क्वासौ पुरुष इति भारद्वाजप्रश्ने इहैवान्तःशरीरे सौम्य स पुरुष इति पिप्पलादेनोत्तरितत्वात् तत्र चान्तःशरीरस्थत्वलिङ्गेन जीवाभिन्न एव स पुरुष इति शङ्क्यम् । लिङ्गस्य ब्रह्मसाधारणत्वात् । गुहां प्रविष्टावात्मानौ हि तद्दर्शनादित्यधिकरणे जीवब्रह्मणोरुभयोरपि गुहाप्रवेशस्य निर्णीतत्वादिति ॥ १९ ॥

स्वात्मना चोत्तरयोः ॥ ननु पूर्वसूत्रेणैवाणुत्वे सिद्धे अस्य सूत्रस्य किं प्रयोजनमत आहुः । * उत्क्रान्तीत्यादि * । * एतेषामिति * गत्यन्तानामर्थानाम् * । * स्वतो वेति * पर्यंप्रकारिकायां शाङ्कर्यां सूत्र-

उत्तरयोर्गत्यागत्योः स्वात्मना केवलस्वरूपेण ।
ऊर्णनाभिर्यथा तन्तून् सृजते सञ्चरत्यपि ।
जाग्रत्स्वप्ने तथा जीवो गच्छत्यागच्छते पुनः ॥

ब्रह्मोपनिषद् । अनेन जीवेनात्मनानुप्रविश्य ब्रह्माऽप्योते । कामरूप्यनुसञ्चरन्निति वा ।

अथवा, उत्क्रान्तिगत्यागतीनां जीवसम्बन्ध एव बोध्यते, नाऽणुत्वम् । स्वात्मना चोत्तरयोरित्यणुत्वम् । अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति उत्क्रमे गत्यतिरिक्ते स्वातन्त्र्याभावात् ।

माहेति शेषः । व्याकुर्वन्ति । * उत्तरयोरित्यादि * । अत्राप्यत एवेत्यनुवर्तते । तथाच श्रुतित एव स्वरूपेण गत्यागतिसम्बन्धी प्रतीयतेऽतोऽणुरेवेत्यर्थः । ता एव श्रुतीः प्रदर्शयन्ति । * ऊर्णनाभिरित्यादि * । आद्याया अन्यैरनुदाहृतत्वादाथर्वणप्रसिद्ध आकार उक्तः । द्वितीया छान्दोग्ये । तृतीया बृहदारण्यके । चतुर्थी तैत्तिरीयाणां भृगूदनिषदि मुक्तिप्रकरणस्था । एवं श्रुतिचतुष्टयेन जीवस्य षडवस्थाः प्रदर्शिताः । तासु जाग्रत्युपाधिपरिष्वङ्गेऽपि स्वप्न इन्द्रियाणां लयेन साक्षिण एव केवलस्य सत्वादुपाधिशून्यत्वं सृष्टावप्येवमनुप्रवेशस्योपाधिसम्बन्धघटकत्वादनुप्रवेशदशायां पूर्वं तदभावः । अप्ययः सुषुप्तेरप्युपलक्षकः । तत्राप्युपाधिलयात् कैवल्यम् । मुक्तौ तु प्राणोऽपि नास्ति बुद्धिरपि । तथाचैतच्छ्रुत्युक्तयोर्गत्यागत्योः केवलस्वरूपसाध्यत्वात् स्वतोऽणुरेवेत्यर्थः । अस्मिन् पक्षे सूत्रस्यचकारवैयर्थ्यमित्यरुच्या प्रकारान्तरेण सूत्रद्वयव्याख्यानमाहुः । * अथवेत्यादि * । तथाच पूर्वसूत्रे षष्ठ्यन्तपदमात्रप्रयोगात् उक्तश्रुतिभ्यो ह्य उत्क्रान्तिगत्यागतिसम्बन्धीति तत्सम्बन्धरूप एव धर्मो बोध्यते । द्वितीये तु ह्यः श्रुतिभ्य एव स्वात्मनापि उत्तरयोर्गत्यागत्योः सम्बन्धीत्यणुत्वं बोध्यते । तदुपपादयन्ति । * अङ्गुष्ठेत्यादि * । तथाचोक्तस्मृत्या मध्यमपरिमाणत्वेन बोधितस्य अङ्गुष्ठ-

स्वात्मना जीवरूपेण चकारादिन्द्रियैश्च गत्यागत्योः सम्बन्धी जीव इत्यर्थः । अतो मध्यमपरिमाणमयुक्तमित्यणुरेव भवति ॥ २० ॥

नाणुतच्छ्रुतेरितिचेन्नेतराधिकारात् ॥ २१ ॥

जीवो नाणुर्भवितुमर्हति । कुतः ? । अतच्छ्रुतेः । अणुत्वविपरीतव्यापकत्वश्रुतेः।स वा एष महानज आत्मा योऽयं विज्ञानमय इतिचेन्न । इतराधिकारात् । इतरः परं ब्रह्म तस्याधिकारे महानज इति वाक्यम् । प्रकरणेन शब्दाश्च नियम्यन्ते । अन्यपरा अपि योगेन ब्रह्मपरा भविष्यन्ति ॥ २१ ॥

मात्रो रवितुल्यरूपः सङ्कल्पाहङ्कारसमन्वितो यः, बुद्धेर्गुणेनेति श्रुत्युक्तबुद्धिगुणवैशिष्ट्यप्रतीतेर्गत्यतिरिक्ते उत्क्रमे स्वतो गतिसम्बन्धित्वाभावात् तद्व्यतिरिक्ते प्रश्नोपनिषदाद्युक्तस्थले स्वात्मना जीवरूपेण चकारादिन्द्रियैश्च यथासम्भवं गत्यागत्योः सम्बन्धी जीव इत्यर्थो भवतीत्यत, आत्मगुणेन चैव, आराग्रमात्रो ह्यवरोऽपि दृष्ट इति पूर्वोक्तशेषात् तथेत्यर्थः ॥ २० ॥

नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात् ॥ अत्र भाष्यमतिरोहितार्थम् । विषयवाक्यं त्वाद्यं बृहदारण्यके शारीरकब्राह्मणे । तत्र च प्रकरणं ब्रह्मण इति सुषुप्त्युत्क्रान्त्योर्भेदेनेत्यत्र व्युत्पादितमतो ब्रह्माधिकारस्थम्।द्वितीयं कौषीतकिब्राह्मणे समाप्तौ तस्मादेवं विच्छान्तो दान्त इत्यादिना, आत्मन्येवात्मानं पश्येदित्युपक्रम्य पठितम् । तदग्रे च इदं ब्रह्मेदं क्षत्रमित्याद्युक्त्वा, इदं सर्वं यदयमात्मेति पठ्यते। अतस्तथेति । तथाचान्यत्र जीवपरोऽपि विज्ञानमयशब्दोऽत्र विज्ञानप्राचुर्यं बोधयन् ब्रह्मपरः । प्राणेषु स्थितिस्तु ब्रह्मधर्म एव । यः प्राणेषु तिष्ठन्नित्यन्तर्यामिब्राह्मणात् ।

भिक्षुस्तु—ना पुरुषो जीव इति यावत् । सोऽणुः । कुतः ? । उत्क्रान्तिगत्यागतीनां ताऽऽपः स्वात्मना विशिष्टयोर्गत्यागत्योस्ताभ्य इत्येवं पूर्वसूत्रापेक्षितसाध्यनिर्देशमप्राङ्गीचकार । तन्न । पक्षबोधक-

स्वशब्दोन्मानाभ्यां च ॥ २२ ॥

स्वयं विहृत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीति, स्वशब्दोऽणुपरिमाणं जीवं बोधयति । न हि स्वप्ने व्यापकस्य वा शरीरपरिमाणस्य वा विहरणं सम्भवति । 'वालाग्रशतभागस्य शतधा कल्पितस्य तु । भागो जीवः स विज्ञेय' इति। आराग्रमात्रो ह्यपरोऽपि दृष्ट इति चोन्मानम् । चकारात् स्वप्नप्रबोधयोः सन्धावागतिदर्शनम् ॥ २२ ॥

पदवैयर्थ्यप्रसङ्गात् । ताभ्य इविवद् आत्मपदस्याप्यनुवृत्तिसौकर्यात् । अतः पूर्वोक्तमेव व्याख्यानं युक्तम् ॥ २१ ॥

स्वशब्दोन्मानाभ्यां च ॥ उद्धृत्य वस्त्वन्तरं पृथक्कृत्य मानम् । भाष्यमत्रापि निगदव्याख्यातम् । स्वशब्दविषयवाक्यं बृहदारण्यके ज्योतिर्ब्राह्मणे । उन्मानवाक्यद्वयं तु श्वेताश्वतरोपनिषदि पञ्चमाध्याये । सन्धावागमनं दर्शनमपि ज्योतिर्ब्राह्मणे । तस्य वा एतस्य पुरुषस्येत्युपक्रम्य, सन्ध्यं तृतीयस्थानं तस्मिन् सन्ध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यतीदं च परलोकस्थानं चेति । अत्र जीवस्याणुत्वस्थापनेन श्रुतिगीतोक्ता जीवानां शाश्वतापि सूचिता । तत्र हि । 'अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा । अजनि च यन्मयं तदविमुच्य नियन्तृ भवेत् सममनुजानतां यदमतं मतदुष्टतया' इति श्लोके यदि सर्वगतास्तर्हि न शास्यतेति नियम इति तर्कायनादणुत्वस्य 'भगवच्छास्यतावदकत्वबोधनेन ध्रुव नेतरथेति भगवतोऽणुत्वे जीवस्य व्यापकत्वे चोक्तनियमभङ्गव्युत्पादनार्थम् । अजनि च यन्मयं तदविमुच्य नियन्तृ भवेदिति कथनाज्जीवतत्त्वं यन्मयमजनि तत् स्वकारणं ब्रह्मस्वरूपमविमुच्य किं नियन्तृ भवेदिति काका नियन्तृत्वाभावबोधनेन, कारणात्मकत्वाङ्गीकारपक्षेऽपि कारणमविमुच्य नियन्तृ भवेदिति कारणात्मकत्वेन नियन्तृत्वाङ्गीकारे, सममनुजानतां यदमतं मतदुष्टतयेत्यनेन ब्रह्म सर्वत्र समम् ऐकात्म्यवादेन सर्वत्र सममित्येवं ब्रह्म लक्ष्यां हस

९०

अविरोधश्चन्दनवत् ॥ २३ ॥

अणुत्वे सर्वशरीरव्यापि चैतन्यं न घटत इति विरोधो न भवति चन्दनवत् । यथा चन्दनमेकदेशस्थितं सर्वदेहसुखं करोति । महातप्ततैलस्थितं वा तापनिवृत्तिम् ॥ २३ ॥

अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदि हि ॥२४॥

चन्दने अवस्थितिवैशेष्यम् अनुपहतत्वचि सम्यक्तया अव-

जानतां यन्नियन्तृत्वं मतत्वुप्ततया अमतम् असम्मतमिति बोधनेन चाणुत्वनियमत्वे दृढीकृते इतिं साऽपि सूचिता । एतेन ब्रह्मस्वरूपमादायैकात्मवादो जीवस्वरूपमादाय नानात्मवाद इति सिद्ध्यति । एतदेव, अंशो नानाव्यपदेशादित्यत्र स्फुटीभविष्यति ॥ २२ ॥

अविरोधश्चन्दनवत् ॥ ननु जीवस्याऽणुत्वे जलावगाहादौ सकलशरीरव्यापिशैत्याद्यनुपलब्धिप्रसङ्ग इति शङ्कायामिदं सूत्रमित्याशयेन व्याकुर्वन्ति । * अणुत्व इत्यादि * । तथाचैतद्दृष्टान्तेन एकदेशस्थत्वेऽपि सकलशरीरव्यापिशैत्याद्युपलब्धिः सामर्थ्यव्याप्त्या घटिष्यत इत्यर्थः । अयं च दृष्टान्तः सामर्थ्येन व्याप्तिं बोधयति । चन्दनावयवानां सूक्ष्मत्वेन सर्वत्र प्रसर्पणाङ्गीकृतौ शरीरं तैले च तत्र तत्र स्थित्याऽन्यत्र मध्ये मध्ये तापोपलम्भस्य दुर्वारत्वात् । उन्मानश्रुतिशेषे वाक्ये, स चानन्त्याय कल्पते इति सामर्थ्यस्यैव, कल्पृ सामर्थ्ये इति धातुना बोधनाच्चेति बोध्यम् । अतो, ज्वरं हन्ति शिरोधृता सहदेवीजटा यथेत्यादौ यथा प्रभावाख्येन सामर्थ्येन ज्वरं हन्तीति वैद्यकेऽङ्गीक्रियते तथा चन्दनमपीति हृदयम् ॥ २३ ॥

अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदि हि ॥ ननु चन्दनदृष्टान्तेन सामर्थ्यव्याप्तिसाधनमयुक्तम् । चन्दन एकदेशस्थायित्वस्य प्रत्यक्षतो निश्चितत्वेन तत्र व्यापनसामर्थ्यकल्पनायाः सर्वदेहव्यापित्वस्यप्रत्यक्षबलेन युक्तत्वात् । जीवे तु शरीरैकदेशस्थायित्वस्य प्रत्यक्षेणानिश्चयाद् दृष्टान्तवैषम्येण तादृशसामर्थ्यसिद्ध्यभावादित्याशङ्कायामिदं सूत्रमित्याशयेन व्याकुर्वन्ति । * चन्दन इत्यादि * । *

स्थानं तस्मात् । त्वच एकत्वात् तत्र भवतु नाम, न तु प्रकृते तथा सम्भवतीतिचेन्न । अभ्युपगमात् । अभ्युपगम्यते जीवस्यापि स्थानविशेषः । हृदि हि । हृदि जीवस्य स्थितिः । गुहां प्रविष्टाविति हि युक्तिः ॥ २४ ॥

गुणाद्वाऽऽलोकवत् ॥ २५ ॥

भवतु नामेति * कल्प्यमानं सामर्थ्यं भवतु नाम । * न सम्भवतीति * प्रत्यक्षेणैकदेशावस्थानस्यानिश्चयादनुमानेन साधने तु चैतन्योपलम्भरूपस्य कार्यस्य त्वग्वत्प्रभावद्वा जीवस्वरूपव्याप्त्यापि सम्भवात् तस्य व्यभिचारितया हेतुत्वानुपपत्त्या न सम्भवति । * हृदीति * कतम आत्मा योऽयं विज्ञानमयः प्राणेषु, हृद्यन्तर्ज्योतिः पुरुषः स वा एष आत्मा हृदि हृदीय आत्मेत्यादिश्रुतेरित्यर्थः । * युक्तिरिति * ब्रह्मभिन्नत्वेन हृदयप्रवेशो युक्तिः । तथाच चन्दनवज्जीवस्याप्येकदेशावस्थितेः शब्दान्निश्चये तस्य त्वगादिवत् स्वरूपव्याप्तेर्वक्तुमशक्यत्वेन चैतन्योपलम्भे तत्सामर्थ्यस्य हेतुत्वोपपत्तौ दृष्टान्तवैषम्याभावात् सामर्थ्येन व्याप्तिसाधनं युक्तमेवेत्यर्थः । अत्र पूर्वसूत्रादविरोधपदस्यानुवृत्तौ इत्यभ्युपगमादविरोध इति सूत्रान्वयो बोध्यः ॥ २४ ॥

गुणाद्वाऽऽलोकवत् ॥ ननु भवत्वेवंसामर्थ्ये न विरोधस्तथापि वैशेषिकः कथं मंस्यते । स हि चैतन्यगुणकमात्मानं मन्यते । तत्र सकलशरीरे सुखाद्यनुभवात् तद्व्याप्त्यैवेति निश्चीयते, गुणश्च गुणिमात्रवृत्तीति रूपरसादिष्वनुभूतः । अतश्चैतन्यस्य तावद्व्याप्त्या सर्वशरीरव्यापी जीवात्मा मन्तव्यः । यदि हि चन्दनवत् सहदेवीजटावद् वा सामर्थ्येन व्याप्नुयात् तदा तस्य चैतन्यगुणो न सर्वत्रानुभूयेत । नच श्रुतिबलात् तथा पक्षपातो युक्तः । तस्या हृदयं विशेषतो जीवस्य वृत्तिलाभस्थानमित्येतत्परत्वेन नेतुं शक्यत्वात् । प्रत्यक्षस्य तु वस्तुमात्रग्राहकत्वेनान्यथा नयनमशक्यम् । अतस्तस्य प्रावल्यात् सामर्थ्येनाविरोधः शक्यश्चेन्न इत्याशङ्कायां प्रवृत्तमिदं

जीवस्य हि चैतन्यं गुणः । स सर्वशरीरव्यापी । यथा मणिप्रवेकस्य कान्तिर्बहुदेशं व्याप्नोति तद्वत् । प्रभाया गुणत्वमेव स्पर्शानुपलम्भात् । उदकगतौष्ण्यवत् । नच विजातीयस्यारम्भकत्वम् । प्रमाणाभावात् ।

सूत्रमित्याशयेनोपन्यस्य व्याकुर्वन्ति * जीवस्य हीत्यादि * । अत्राप्यविरोध इत्यनुवर्त्तते । तथाच बहुप्रदेशव्यापिमणिप्रवेककान्तिवत् सर्वशरीरव्यापिचैतन्यगुणादविरोध इत्यर्थः । एवं व्याख्यानेन आलोकवदिति पदच्छेदो बोधितः । ननु प्रभादृष्टान्तोऽनुपपन्नस्तस्या मणिजनितविरलसजातीयद्रव्यान्तरत्वात् सूर्यादिप्रभावदित्याकाङ्क्षायामाहुः । * प्रभाया इत्यादि * । तथाच सूर्यादिप्रभायां स्पर्शोपलम्भाद् द्रव्यान्तरत्वमपि सन्देग्धुं शक्यम् । मणेस्तु पार्थिवत्वेन तत्र किरणरूपद्रव्यजनकत्वस्य तत्प्रसारकत्वस्य वाङ्गीकारे बहुकल्पनापत्तेः । यदि जननं तदा पूर्वं मणितो बहिरागतानामवयवानां बहिःस्थत्वान्मणिपिधानदशायामपि तदनुभवापत्तिर्मणिनाशेऽपि तत्स्थित्यापत्तिस्तद्समवायिनिमित्तयोरत्यन्तापरिदृष्टयोः कल्पनापत्तिस्तन्निर्वचनाशक्तिश्च । यदि प्रसारणं तदा मणेश्चेतनत्वापत्तिः स्वत आकुञ्चनप्रसारणक्रिययोश्चेतन एव दृष्टत्वात् । नच लज्जावत्याख्य औषधविशेषे पुरुषच्छायापातमात्रेण स्वाकुञ्चनस्य तदपसरणस्य च दर्शनान्नैवमिति वाच्यम् । तस्यापि जीवत एव तादृशक्रियावत्त्वात् । अन्यथा उत्खाय गृहानीतेऽपि तत्र तादृशक्रियापत्तेः । अतः पक्षद्वयस्याप्यसङ्गतत्वान्मणिप्रभाया द्रव्यत्वं न शक्यवचनम् । उदकगतौष्ण्यवत् । यथोष्णोदके तेजोरूपानुपलब्ध्या केवलगुणनिश्चयस्तथात्र स्पर्शानुपलब्ध्येति । ननु माऽस्तु मणेः प्रभाख्यद्रव्यजनकत्वादिकम् । तत्र मणिविजातीयमेव द्रव्यमारम्भकमङ्गीकार्यम् । यथा चिन्तामण्यादेर्निमित्तादज्ञानाद्यस्तूनामाकाङ्क्षितानामुत्पत्तिस्तथेतिचेत् तत्राहुः । * नचेत्यादि * । यदि तया स्यात् तदा मणिसमवधाननिवृत्तौ प्रभा न निवर्त्तेत । यथा चिन्तामण्यादिनिष्पन्नाः पदार्थाः । अतो मणिविजातीयद्रव्यस्यात्र प्रभारम्भकत्वं प्रमाणाभावग्रस्तमेव । ननु यद्यप्येवमस्ति तथापि गुणारम्भस्य गुणि-

लोकप्रतीतिस्तु सर्वैर्वादिभिरुपपाद्या। तत्र गुणिकल्पनापेक्षया गुण एव स्थलान्तर आरभ्यत इति कल्प्यताम् । तथैव लोकप्रतीतेः। पुष्परागादेरपि प्रभारूपमेव तावद्देशं व्याप्नोतीति महिस्वभावादेवाङ्गीकर्तव्यम्। आरम्भकस्य तेजसस्तत्राभावात्। कान्तिः प्रभा रूपमिति हि लोके पर्यायः। वाशब्दो यथालोकं युक्तिः कल्पनीयेति सूचयति।

मात्रवृत्तित्वमिति नियमो भज्येत । तथा सति रसादीनामप्यन्यआरम्भापत्त्या लोकप्रतीतिरपि विरुद्ध्येतेत्याकाङ्क्षायां लोकप्रतीतिमुपपादयन्ति। * लोकेत्यादि * । * तत्रेति * लोकप्रतीत्युपपादने। * तत्राभावादिति * । प्रणावप्रभावात्। तथाचाप्रकृष्टगुणारम्भस्य गुणिमात्रवृत्तित्वमित्येवं लोकप्रतीतिनिर्वाहाय कल्पनीयम्। तेन सर्वं सामञ्जस्यमित्यर्थः । अत्र कोशस्यापि सम्मतिरित्याहुः। * कान्तिरित्यादि * । शोभा कान्तिर्द्युतिश्छविरिति, स्युः प्रभा रुग्रुचिस्त्विड्भेत्यादि। वाशब्दप्रयोजनमाहुः। * वाशब्द इत्यादि * । तथाच वाशब्द एवकारार्थो वाक्यालङ्कारे। तथाच लोकवदेव गुणादविरोध इति सूत्राक्षरयोजनेत्यर्थः । ननु यद्यत्र लोकानुसारिण्येव कल्पनाऽऽद्रियते तदा पृथिव्यादीनामप्यर्थानां सजातीयादेव कारणादुत्पत्तिरङ्गीकार्या। लोके तथैव दर्शनात्। न तु विजातीयाद् ब्रह्मणः । लोकविरुद्धत्वादित्यत आहुः । * ब्रह्मेत्यादि * । ब्रह्मण एव सर्वमुत्पद्यत इति सिद्धान्ते तु यस्मात् कारणाद् येन प्रकारेण लोके यस्योत्पत्तिर्दृश्यते तत् तेनैव प्रकारेण तत्कारणभावापन्नाद् ब्रह्मणो जातमित्युच्यते। तेजोऽतस्तथा ह्याहेत्यधिकरणे तथैव व्युत्पादनात्। सजातीयस्यैवारम्भकत्वमिति स्वप्रयोजकम्। द्रव्याद् गुणोत्पत्तेस्त्वयाप्यङ्गीकारात् । द्रव्यमेव सजातीयं सजातीयेनारभ्यत इत्यपि तथा । खद्योतमात्रादप्यग्निकणान्महाघनघासराश्यादिदाहे वायोरेवाग्न्युत्पत्तिदर्शनात् । यत्र क्व च शोचति स्वेदते वा पुरुषस्तेन स एव तद्व्यापो जायन्त इति, यत्र क्वचन वर्षति तदेव भूयिष्ठमन्नं भवतीति श्रुत्या निदर्शितत्वाच्च। अतोऽप्यधिना भूयिष्ठपदेन च

ब्रह्मसिद्धान्ते तु यथैव लोके दृश्यते तथैव ब्रह्मणो जातमिति न कल्पनालेशोऽपि ॥ २५ ॥

व्यतिरेको गन्धवत् ॥ २६ ॥

सिद्धं दृष्टान्तमाह । यथा चम्पकादिगन्धश्चम्पकव्यवहिते-स्थलेऽप्युपलभ्यते । वेदोक्तत्वादस्य दृष्टान्तत्वम् । यथा वृक्षस्य सम्पुष्पितस्य दूराद् गन्धो वातीवं पुण्यस्य कर्मणो दूराद् गन्धो वातीति ।

बीजापेक्षया आधिक्यं बोध्यते । एवमतीन्द्रियस्थलेऽप्यवगन्तव्यम् । अतो नात्र कल्पनालेशोऽपि । अतो ब्रह्मसिद्धान्ते दोषासंसर्गात् सु-पूक्तं, गुणाद्वालोकवदिति ॥ २५ ॥

व्यतिरेको गन्धवत् ॥ ननु गुणस्य स्वाश्रयाधिकदेशवृत्तित्वं क्वाप्यदृष्टं कथमत्र कल्पयितुं शक्यमिति शङ्कायामिदं सूत्रं प्रवृत्त-मित्याशयेन तदवतारयन्ति । * सिद्धमित्यादि । * सिद्धमिति * । लोकवेदसिद्धम् । तथाच व्यतिरेकश्चैतन्यप्रभयोः; स्वाश्रयाधिकदे-शवृत्तित्वं गन्धस्येव लोकवेदानुसारेणाऽवगन्तव्यमिति सूत्रार्थः । लोकानुसारं विवृण्वन्ति । * यथेत्यादि * । नचात्रापि चम्पकाद्य-वयवनिर्गमादेवोपपत्तौ न गन्धस्य स्वाश्रयाधिकदेशवृत्तित्वसिद्धि-रिति वाच्यम् । विद्वन्मण्डनोक्तदिशा तद्दूषणस्यावगन्तव्यत्वात् । तथाहि दृश्यते विविधचर्मपुटवेष्टितस्यापि मृगमदस्य गन्धोपलम्भो वणिक्सार्थेषु । नहि तत्र तदवयवनिर्गमापूर्वतत्प्रवेशौ सम्भवतः । नचापूर्वतत्प्रवेशस्यासम्भवेऽप्यवयवनिर्गमस्त्वनिवार्यः । ततो भारा-पगमस्यानुभवसाक्षिकत्वादिति वाच्यम् ।

तथा सति गन्धोपलम्भसमये प्रसारितमुखस्य तद्रसोपलम्भापत्तेः । तेषामवयवानां योग्यत्वात् । अन्यथा गन्धोऽपि नोपलभ्येत । गन्ध-स्यैवोपलम्भे नियामकाभावाच्च । नन्वदृष्टमेव तथेति चेत् । अहो गोऽयमीतिर्यांधदूषकस्य, यदवयवनिर्गमं, पुनरन्यावयवपूरण, तद्रसो-ऽदृष्टस्य च कल्पनं, रसाद्यनुभवप्रतिबन्धकादृष्टान्तरस्य च कल्पनं य-

दतोऽप्यसङ्कोचस्तुण्डस्य, गन्धातिरिक्तेतिमूत्रकथने च सङ्कोचः । ननु मास्त्वदृष्टकल्पनं, तथापि त्रुटौ रूपस्येव तेषु गन्धस्यैवोद्भूतत्वं कल्प्यत इतिचेन्न । यत्रोग्रगन्धस्य कस्यचित् कुसुमस्य लशुनादेर्वा स्पर्शमात्रेऽपि ततो मुहुर्मृत्स्नया क्षालनेऽपि करस्य न तद्गन्धापगमोऽनुभूयते । तत्र तेषामशक्यवचनत्वात् । स्पर्शमात्रलग्नतदवयवानां सकृत्प्रोञ्छनेऽप्यसहिष्णुत्वात् सकृत् क्षालनेऽपि न स्थितिसम्भवः, कुतस्तरां मुहुस्तथा करणे। अतो द्रव्याधिकदेशे वृत्तित्वं गन्धस्य मन्तव्यम् । अतो विनश्यद्द्रव्यस्थगुणानामनाश्रितत्वेनाङ्गीकारो यथा तथा द्रव्याधिकदेशवृत्तित्वेनानुभवेऽपि कुरुष्वेत्यादि । यत्तु 'उपलभ्याप्सु चेद्गन्धं केचिद् ब्रूयुरनैपुणाः । पृथिव्यामेव तं विद्यादपो वायुं च संश्रितमि'तिव्यासवाक्यात् तत्र पृथिव्यवयवसत्तामङ्गीकृत्य गुणस्य साश्रयस्यैव सञ्चारमाहुः । तन्न । पृथिवीगुणं विद्यादित्यर्थात् । केवलगुणसञ्चारानङ्गीकारे भेर्यादिशब्दो नान्यत्र श्रूयेत । पौराणादिमते शब्दस्य भूतपञ्चकगुणत्वात् । केवलवायूपनीतस्यान्यत्र श्रवणात् । नैयायिकीयश्रवणप्रक्रियाया अनेकशब्दतद्ध्वंसादिकल्पनया गुरुत्वात् । सिद्धे एकत्र गुणसञ्चारेऽन्यत्रापि तथा वक्तुं शक्यत्वात् । अतस्तस्य पृथिवीगुणत्वं विद्यादित्येवार्थः । श्रुतिरपि, यथा वृक्षस्य संपुष्पितस्य दूराद् गन्धो वातीति । अत्र तदवयवासत्त्वनिरूपणार्थमेव दूरपदम् । यत्तु प्रसारितमुखस्य रसानुपलम्भे गन्धोपलम्भसामग्र्या एव प्रतिबन्धकत्वमिति कश्चिदाह । तत् फल्गु । विजातीयगुणोपलम्भकत्वेन रूपेण प्रतिबन्धकत्वस्याशक्यवचनत्वात् । एककालावच्छेदेन नेत्रगोलकान्तस्त्वचा चक्षुषा च बहुव्रीण्यरूपयोर्ग्रहणस्य सर्वजनीनत्वात् । गन्धोपलम्भकत्वेनेतिचेन्न असिद्धत्वाद् वैपरीत्यस्यापि सुवचनत्वाच्च । नच फलबलेन तस्याः प्राबल्यं कल्प्यत इति वाच्यम् । फलस्यास्मदुक्तरीत्यापि सिद्धेस्तस्या एव बलवत्त्वे नियामकाभावात् । क्षणान्तरे रसोपलम्भप्रसङ्गाच्च । नच तत्रतरसादीनामनुद्भूतत्वमिति वाच्यम् । अनारम्भकेषु तेष्वनुद्भूतरसाद्यङ्गीकारस्य प्रमाणरहितत्वादिति दिक् ।

नच मुहुः क्षालनादिना गन्धापगमतारतम्ये गन्धस्य सावयवत्वापत्तिरिति वाच्यम् । इष्टापत्तेः । नच स्पर्शादेस्त्वापत्तिः । सावयवद्रव्यत्वेनैव स्पर्शवत्त्वेन व्याप्तेर्दर्शनात् । भूतसूक्ष्मरूपत्वेनेष्टाप-

अन्यथा कल्पना त्वयुक्तेत्यवोचाम ॥ २६ ॥

तथाच दर्शयति ॥ २७ ॥

हृदयायतनत्वमणुपरिमाणत्वञ्चात्मनोऽभिधाय तस्यैवालोमभ्य आनखाग्रेभ्य इति चैतन्येन गुणेन समस्तशरीरव्यापित्वं दर्शयति ॥ २७ ॥

पृथगुपदेशात् ॥ २८ ॥

त्येव। एतेनारम्भकत्वमपि दृष्टोत्तरं ज्ञेयम्। गन्धेनैव चन्दनस्पृष्टवायुसम्पर्कशालिशालान्तरशैत्यं निम्बतरुविशेषसम्पर्कशालिवातसंसर्गजमुखतिक्तत्वमपि व्याख्यातं ज्ञेयम्। नचैवं सर्वत्रातिप्रसङ्गः शङ्क्यः। उत्कटत्वानुत्कटत्वयोरेव तद्धर्मयोर्निर्गमानिर्गमनियामकत्वादिति सङ्क्षेपः। तदेतद् हृदि कृत्वाऽऽहुः। * अन्यथेत्यादि *। * अवोचामेति * पूर्वसूत्र एवोक्तमित्यर्थः ॥ २६ ॥

तथाच दर्शयति ॥ चैतन्यस्य गुणत्वं प्रमाणं दर्शयितुमिदं सूत्रमित्याशयेनोपन्यस्य विवृण्वन्ति * हृदयायतनेत्यादि *। एतद्विषयवाक्यं कौषीतकिब्राह्मणे। तत्र हि, तं होवाचाजातशत्रुर्यत्रैष एतद् बालाके पुरुषोऽशयिष्ट यत्रैतदभूयत एतदागादिति प्रतिज्ञाय, हिता नाम पुरुषस्य नाड्यो हृदयात् पुरीततमभिप्रतन्वन्ति तद्यथा सहस्रधा केशो विपाटितस्तावदण्व्यः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य कृष्णस्य पीतस्य लोहितस्य च तासु तदा भवन्तीति हृदयायतनत्वं तादृशनाडीषु स्थानेनाणुपरिमाणत्वं चाभिधाय तस्यैव हृदयायतनस्याणोरात्मनः, स एष प्राण एव प्रज्ञात्मेदं शरीरमात्मानमनुप्रविष्ट आलोमभ्य आनखाग्रेभ्य इति प्रज्ञात्मत्वोक्तिपूर्वकं प्रविष्टत्वकथनाच्चैतन्येन गुणेन समस्तशरीरव्यापित्वं दर्शयति। अन्यथा अणोर्व्याप्तिर्नोपपद्येत। अतोऽणुत्वबोधनपूर्वकं व्याप्तिबोधनाच्चैतन्यं गुण एवेत्यर्थः। एवमेव बृहदारण्यके दृप्तबालाकिब्राह्मणेऽपि, एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेत इति कथनाज्ज्ञेयम् ॥ २७ ॥

पृथगुपदेशात् ॥ उक्तश्रुतौ विरुद्धधर्मत्वबोधनात् सामर्थ्य-

प्रज्ञया शरीरं समारुह्येति करणत्वेन पृथगुपदेशाच्चैतन्यं गुणः ॥ २८ ॥

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ २९ ॥

ननु तत्त्वमस्यादिवाक्यैः परमेव ब्रह्म जीव इति कथमणुत्वमितीमामाशङ्कां निराकरोति तुशब्दः। तस्य ब्रह्मणो गुणा प्रज्ञाद्रष्टृत्वादयस्त एवात्र जीवे सारा इति जडवैलक्षण्यकारिण इति अमात्ये राजपदप्रयोगवज्जीवे भगवद्व्यपदेशः। मैत्रेयीति सम्पूर्णे ब्राह्मणे भगवत्त्वेन जीव उक्तः।

मेवास्तु, न गुण इत्याशङ्कायामिदं सूत्रमित्याशयेन निवृण्वन्ति। * प्रज्ञयेत्यादि *। इदमपि वाक्यं तत्रैवेतः पूर्वस्मिन्निन्द्रप्रतर्दनसंवादेऽस्ति। भाष्यं तु स्फुटार्थम् ॥

एतेन जीवस्याऽणुत्वं सर्वावस्थासु। सर्वशरीरगतचैतन्योपलम्भस्तु सामर्थ्याद्वा गुणाद्वेति साधितम् ॥ १८ ॥

तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥ ननु सकलशरीरव्यापिचैतन्योपलम्भादन्यत्रानुपलम्भाच्च प्राप्ते जीवस्य मध्यमपरिमाणतयाऽनित्यत्वे तत्परिहाराय पूर्वसूत्रोक्तमणुत्वं चाऽऽद्रणीयम्, अथवा, तत्त्वमस्यादिवाक्येषु ब्रह्मत्वेन व्यपदेशाद् ब्रह्मतया व्यापकत्वं चेति सन्देहे नित्यत्वस्य व्यापकत्वेऽपि सम्भवाद्, ऋष्यन्तरैरपि ओगव्यवस्थया व्यापकत्वाङ्गीकारात् सकलशरीरगतचैतन्योपलम्भस्यान्यत्रानुपलम्भस्य च जातिवदुपपत्तेरुत्क्रान्त्यादीनामुपाधिवशादपि सम्भवादणुत्वाङ्गीकारे जीवमेवाभिसन्धायोक्तानां, तत्त्वमस्यादिवाक्यानामसामञ्जस्याच्च व्यापकत्वमेव ज्याय इति। ननु कथमसामञ्जस्यमितिचेन्मैवम्। छान्दोग्ये, ऐतदात्म्यमिदं सर्वं, तत् सत्यमिति सर्वस्य ब्रह्मात्मकत्वमुक्त्वा अग्रे, स आत्मा तत्त्वमसीति सर्वस्मादभिन्नतया त्वम्पदार्थस्य जीवस्य तत्पदसामानाधिकरण्यश्रावणेन कौषीतकिब्राह्मणसमाप्तौ च इदं सर्वं यदयमात्मेत्यभिधाय, स एष तत्त्वमसीत्यात्मायमाह। अहंब्रह्मास्मीत्यहंग्रहश्रावणेन जीवस्य ब्रह्माभिन्नतया व्यापकत्वस्यैव सिद्धत्वादिति प्राप्तम्। तत्र निरूपय-

के शारीरकब्राह्मणेऽस्ति । तत्र हि जीवस्य जाग्रत्स्वप्नावस्थे पूर्वमुक्त्वा, अथ यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यतीति सुषुप्तिं यदैवस्तत्सामयिकं जीवस्वरूपं निरूप्य, तद्यथा प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमिति जीवब्रह्मणोर्भेददृष्टान्तनिरूपणावसरे, एवमेवायं शारीर आत्मा प्राज्ञेनात्मना सम्परिष्वक्त इति जीवप्राज्ञयोर्भेदमभिधाय, कः प्राज्ञ आत्मेत्याकाङ्क्षायां प्राज्ञस्वरूपमाह, तद्वा अस्यैतदतिच्छन्दोऽपहतपाप्मेत्यादिना । अत्रास्य रूपमित्यनेन परमेश्वरस्य रूपान्तरमित्युच्यते, न तु परमपुरुषस्यैवेति । नचापहतपाप्मत्वरूपाद् ब्रह्मलिङ्गाद् ब्रह्मैवेति शङ्क्यम् । प्राज्ञश्च सुषुप्तिसाक्षी । न हि तस्य स्वतोऽपहतपाप्मत्वमस्ति । अपहतपाप्मत्वस्य ब्रह्मलिङ्गत्वात् ।* ब्रह्मलिङ्गादिति भावप्रधानः । अत्रायमर्थः । माण्डूक्ये, ॐमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव सर्वं ह्येतद् ब्रह्म अयमात्मा ब्रह्मेत्योङ्कारस्य वाच्यामेदविवक्षया अक्षरत्वमुक्त्वा सर्वस्य वाङ्मयस्य तद्व्याख्यानत्वं तज्ज्ञापनाय वाच्यस्य सर्वस्योङ्कारविषयत्वं चोक्त्वा तदुपपादनाय, सर्वस्य वस्तुजातस्यैतस्य जीवात्मनश्च ब्रह्मत्वं बोधयित्वा जडवैलक्षण्यार्थं सोऽयमात्मा चतुष्पादित्यादिना वैश्वानरतैजसप्राज्ञतुरीयभेदेन चतुरः पादान् विवृणोति स्म । तत्र यद्यपि सोऽयमात्मेति तच्छब्दबलेन ब्रह्मणो जीवस्य चैते पादा इति वक्तुं शक्यते । उभयोः प्रकृतत्वात् । तथापि नृसिंहोत्तरतापनीयारम्भे अणोरणीयांसमिममात्मानमोङ्कारं नो व्याचक्ष्वेति देवैः पृष्टः प्रजापतिः, ॐ तथेति कथनं प्रतिज्ञाय माण्डूक्यवदेव, अयमात्मा ब्रह्मेत्यन्तमुक्त्वा ततोऽद्वंब्रह्मोपासनार्थं चतूरूपमेतं चतूरूपेण ब्रह्मणैकीकर्तुं ब्रह्मणः पादानाह, विश्वो वैश्वानरः प्रथमः पादस्तैजसो हिरण्यगर्भो द्वितीयः प्राज्ञ ईश्वरस्तृतीय ईश्वरप्राज्ञस्तुरीय इति । ततस्तुरीयस्य न स्थूलप्रज्ञमित्यादिना प्रपञ्चोपशमत्वेनोक्तत्वात् स निर्धर्मको भविष्यतीत्याशङ्कानिरासाय, अथ तुरीय ईश्वरप्राज्ञः स्वराट् स्वयमीश्वरः स्वप्रकाशश्चतुरात्मा ओतानुज्ञात्रनुज्ञाऽविकल्पैरित्युक्त्वा ओतादीन् विवृणोति स्म । तादृशं च विवरणं न माण्डूक्ये । अतो जीवपादेभ्यो भिन्ना एते ब्रह्मपादा एतेषु ये पूर्वे त्रयस्तान् पूर्वेषु त्रिषु जीव-

इदमत्र वक्तव्यम् । सर्वोपनिषत्सु ब्रह्मज्ञानं परमपुरुषार्थसाधनमिति तन्निर्णयार्थं भगवान् व्यासः सूत्राणि चकार । तत्र ब्रह्मसूत्रे विचारं प्रतिज्ञाय जगत्कर्तृत्वाद्यसाधारणलक्षणं ब्रह्मणः प्रतिज्ञाय समन्वयनिरूपणे जीववाक्यानि दूरीकृत्य अविरोधे, ऐक्येऽप्यहिताकरणादिदोषमाशङ्क्य, अधिकन्तु भेदनिर्देशादिति परिहृत्य, जीवस्याणुत्वमुपचाराद् ब्रह्मत्वमंशत्वं पराधीनकर्तृत्वादिकं प्रतिपाद्य तस्यैव दक्षिणमार्गेण पुनरावृत्तिमुक्त्वा ससाधनेन ब्रह्मज्ञानेन

पादेष्वारोप्य तुरीयं च जीवस्य केवलं रूपमीश्वरन्यासेन तुरीयेण ब्रह्मरूपेणैकीकृत्याहंब्रह्मोपासनं कुर्यादिति सिद्ध्यति । एवं सति जीवाद्भिन्नस्येश्वरस्य सर्वसुषुप्तिसाक्षिणोऽपि ब्रह्मशरीरत्वमेव, न ब्रह्मत्वमतस्तत्र यथा ब्रह्मधर्मा बोध्यन्ते, एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानामित्यनेन । एवं शारीरस्यापि जीवस्य ब्रह्मधर्मबोधिकाः श्रुतयो जीवे गौण्या ब्रह्मत्वं वदन्तीति । नन्वस्मिन् सूत्रे गौण्या व्यपदेशः सूत्रकाराभिमतः सूत्रे च तच्छब्दद्वयम् । तत्र पूर्वस्मिंस्तच्छब्दे उपाधिः परामृश्यते, द्वितीये चाणुत्वमिति जीवे उपाधिगुणसारत्वादणुत्वव्यपदेश इति वा युक्तम्? उत तच्छब्दद्वयेऽपि ब्रह्मैव परामृश्यत इति ब्रह्मगुणसारत्वाज्जीवे ब्रह्मत्वव्यपदेश इति वा युक्तम्? इत्येतत् कथं निश्चेतुं शक्यमित्यत आहुः । * इदमित्यादि * । अस्मिन् सूत्रे यदस्माभिर्व्याख्यातं तदेवाभिप्रेतम् । कुत इत्याकाङ्क्षायां हेतुं व्याकुर्वन्ति । सर्वोपनिषत्स्वित्यादि * * योजितवानित्यन्तम् * । चतुर्वेदाश्रितासूपनिषत्सु, ब्रह्मविदाप्नोति परं, तमेवं विद्वानमृत इह भवति नान्यः पन्था विद्यतेऽयनाय, तमेव विदित्वा अतिमृत्युमेतीत्यादिजातीयवाक्यदर्शनाद् ब्रह्मज्ञानं परमपुरुषार्थसाधनम् । * जीववाक्यानि दूरीकृत्येति * जीवबोधकवाक्यानि जीववाक्यानि तानि निराकृत्य, तेषु जीवबोधकवाक्यत्वं निराकृत्य । * अविरोध इति * द्वितीयाध्याये अविरोधेनेति तृतीयान्तपाठस्तु तस्य, प्रतिपाद्येत्यनेनान्वयः । * ऐक्येऽपीति * अंशांशिभावेनैक्येऽपि । शेषं स्फुटम् । तथाच यस्मादेवं

आर्चिरादिद्वारा ब्रह्मप्राप्तिमुक्त्वा, न स पुनरावर्तत इत्यनावृत्तिं वदञ्छास्त्रपर्यवसानेन सर्वान् वेदान्तानव्याकुलतया योजितवान् ।

तत्र कश्चित् तद्व्यपदेशेन प्रोक्तानि तत्त्वमस्यादिवाक्यानि स्वीकृत्य जीवमात्रं च ब्रह्म स्वीकृत्य तदतिरिक्तस्य सर्वस्य कारणांशकार्यरूपस्य मिथ्यात्वं परिकल्प्य तद्बोधकश्रुतीनामर्थवादत्वेन मिथ्यात्वं स्वीकृत्य सुषुप्तिसम्पत्त्योर्भगवता प्रकटीकृतमानन्दरूपत्वं तत्प्रतिपादकवाक्यानां सद्योमुक्तिरूपफलवाचकत्वमुक्त्वा क्रममुक्तिमुपासनापरत्वेन योजयित्वा वेदसूत्राणि व्याकुलीचकार।

तद् वेदान्तानां ब्रह्मपरत्वं जीवपरत्वं वेति यदत्र युक्तं तत् सद्भिरनुसन्धेयम् ॥ २९ ॥

शास्त्रार्थस्तस्मादित्यर्थः । पूर्वरीत्या व्याख्यातुः शङ्कराचार्यस्य तात्पर्यमाहुः * तत्र कश्चिदित्यादि * । * स्वीकृत्येति * महावाक्यत्वेनादृत्य । पूर्वस्येतिपदस्यैव विवरणं,* कारणांशकार्यरूपस्येति * कारणरूपस्यांशरूपस्य कार्यरूपस्य चेत्यर्थः । * अर्थवादत्वेनेति * गौण्या बोधकतया असदर्थवादत्वेन । * प्रकटीकृतमानन्दरूपत्वं तत्प्रतिपादकवाक्यानामिति * प्रकटीकृतं यदानन्दरूपत्वं तत्प्रतिपादकानि यानि वाक्यानि, न कञ्चन कामं कामयते सलिल एको द्रष्टा द्वितीयो भवतीत्यादीनि तेषाम । * वेदसूत्राणीति * वेदसहितानि सूत्राणि ।* व्याकुलीचकारेति * इन्द्रप्रजापतिसंवादं मुक्तिवाक्यत्वेनोपन्यस्य तदर्थमन्यथा वदन् व्याकुलीकृतवान् । तथाचैवं व्याकुलीकरणमेव तथा व्याख्यानस्य तात्पर्यमित्यर्थः । नन्वेवं विप्रतिपत्तौ कथमेकतरनिश्चय इत्याकाङ्क्षायां निश्चयोपायमाहुः । * तद्वेदान्तानामित्यादि * । अत्रायमर्थः । सर्वे वेदा यत्पदमामनन्ति, तं त्वौपनिषदं पुरुषं पृच्छामि, वेदैश्च सर्वैरहमेव वेद्य इत्यादिश्रुतिस्मृतिभिर्वेदमहातात्पर्यविषयं ब्रह्मैवेति वेदान्तानां ब्रह्मपरत्वमवधियादम । ब्रह्म च जगत्कर्तृत्वाद्यसाधारणधर्मैर्जीवविलक्षणमित्यपि पूर्वं सिद्धम् । अतः परं जीवस्वरूपे वि-

चारः । तद्यदि उत्पत्त्यश्रवणात् परस्यैव ब्रह्मणः प्रवेशश्रवणात् तादात्म्योपदेशाच्च परमेव ब्रह्म जीव इति मतं, तत्तु न युक्तम् । उत्पत्त्यश्रवणस्य जीवनित्यतायामप्युपपत्तेस्तस्य ब्रह्मत्वागमकत्वात् । अविद्याऽनादित्ववादित्वनस्तत्साधारण्याच्च । नच भेदे अद्वैतप्रतिज्ञाविरोधान्नित्यत्वमेवाभेदे पर्यवस्यति । अनादित्वं च मिथ्यात्वे । अतो न हेतौ दोष इति वाच्यम् । प्रतिज्ञाया वक्ष्यमाणेनांशांशिभावेन, पराऽस्य शक्तिर्विविधैवेत्यादिश्रुतेः शक्तिशक्तिमद्भावेन चाविरोधे नित्यत्वानादित्वयोरेकपर्यवसानस्यैव दुर्घटत्वात् । नचांशांशिभावे निष्कलश्रुतिविरोधः । श्रुतेस्तु शब्दमूलत्वादित्यत्र विरुद्धधर्माश्रयत्वाङ्गीकारेणैव परिहृतत्वात् । नापि निर्गुणश्रुतिविरोधः । तस्याः प्राकृतगुणनिषेधपरत्वात् । तस्मान्नोत्पत्त्यश्रवणस्य जीवब्रह्मतागमकत्वम् । नापि परस्यैव ब्रह्मणः प्रवेशश्रवणस्य । तथाहि । प्रवेशो नाम संयोगो वा, तज्जनिका क्रिया वा । नाद्यः । कार्यसृष्टिमात्रादेवान्तर्बहिश्च तत्सम्भवेन पृथक् तदुक्तिवैयर्थ्यप्रसङ्गात् । तत एव नामरूपव्याकरणसिद्धौ त्यवन्तप्रयोगानावश्यकत्वप्रसङ्गाच्च । न द्वितीयः । व्यापकत्वस्य क्रियाविरुद्धत्वात् । वस्तुतस्तु न तत्र जीवरूपेण स्वप्रवेश उच्यते, किन्तु जीवसाहित्येन स उच्यते । द्वा सुपर्णेत्यादिश्रुत्यनुसारेण जीवपदगततृतीयायाः सहार्थे वक्तुं शक्यत्वात् । अन्यथा आत्मनेत्यस्य वैयर्थ्यप्रसङ्गात् । नचेतरव्यपदेशाधिकरणभाष्ये, जीवेनात्मनेत्यात्मपदस्य जीवविशेषणत्वाङ्गीकारान्नैवमिति शङ्क्यम् । तस्य पूर्वपक्षसूत्रत्वात् । तदनुरोधेन तत्र तथा व्याख्यानस्य सिद्धान्तीयत्वेन वक्तुमशक्यत्वात् । तस्मात् प्रवेशश्रवणस्यापि न जीवब्रह्मतागमकत्वम् । नापि तादात्म्योपदेशस्य । तस्यांशांशिभावादप्युपपत्तेः । किञ्च । यदि परमेव ब्रह्म जीवः स्यात् तदा, यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति, एवं मुनेर्विजानत आत्मा भवति गौतमेति काठकश्रुतिरपि विरुद्ध्येत । वास्तवयत्किञ्चिद्भावे, अस्य दृष्टान्तस्य सर्वथानुपपत्तेः । सत्सम्पस्यादिश्रुतिविरोधश्च । किञ्च । औपाधिकभेदाभ्युपगमपक्षे तत्त्वमसीत्यत्र, तत् त्वमिति पदद्वये भागत्यागलक्षणा । कारणे अंशकार्यबोधकश्रुतीनाम् । असदर्थवादत्वकल्पनं कारणस्यांशत्वकार्याणां मिथ्यात्वकल्पनम् । उपासनाविषयाणां रूपाणामब्रह्मत्वकल्पनमित्येत-

पादयो दोषाः । जीवांशस्तत्र ब्रह्मत्वं गौण्या व्यपदिश्यत इति पक्षे त्वेकस्मिंस्तत्पदे गौणी । सापि राज्यज्येष्ठपुत्रवदिति नासदर्थवादत्वापादिका । पूर्वकल्पोक्ताश्च न दोषाः केऽपि । एवं सति कः पक्षोऽत्र ज्यायान् को वा कनीयान् । नेतरोऽनुपपत्तेरित्यारभ्य जीवब्रह्मणोर्भेदं बोधयतोऽणुत्वमंशत्वादिकं च जीवस्य साधयतः सूत्रकृतश्च किं वाभिप्रेतम् इत्यादिकं विभावनीयम् । किञ्च । तद्गुणसारसूत्रे प्राथमिकतत्पदेन य उपाधिः परामृश्यते, स किमन्यथानुपपत्तिबलादध्याहृत उत कश्चित् पूर्वमुक्तः । नाद्यः । अनुपपत्त्यभावस्योपपादितत्वात् । नेतरः । अदर्शनात् । नचान्तरा विज्ञानमनसी इत्यत्रोक्तं विज्ञानं बुद्धितत्त्वात्मकं दृश्यत एवेति वाच्यम् । विज्ञानपदस्यानेकार्थत्वेनात्र बुद्धेरेव ग्रहणे नियामकाभावात् । व्याख्यात्रा विज्ञानमनसी इति द्विवचनोपपत्त्यर्थं विज्ञानपदे करणव्युत्पत्त्यङ्गीकारेण बुद्धीन्द्रिययोः सङ्ग्रहात् । कस्य वोपाधित्वं कथं वा इन्द्रियाण्यपाकृत्य बुद्धेरेव ग्रहणमित्यत्र हेत्वनुलम्भाच्च । एतेन भास्कराचार्यव्याख्यानमपि दत्तोत्तरम् । ब्रह्मपरामर्शे तु कोऽप्ययं दोषो न भवति । नाणुरतच्छ्रुतेरिति सूत्रे इतरपदेन ब्रह्मण एवोक्तत्वेन तस्य च सन्निहितत्वेन कल्पनालेशस्याप्यभावादिति ।

यत्तु भिक्षुः—अणुत्वसाधकानि नव सूत्राणि पूर्वपक्षीकृत्य, पृथगुपदेशादितिसूत्रं सिद्धान्तत्वेनाह । तदर्थं च जीवादणुरुपाधिभूतः पृथक् । कुतः । उपदेशात् । स चानन्त्याय कल्पते, स वा एष महानज आत्मा, योऽयं विज्ञानमयः प्राणेष्वित्यादिश्रुतिभिर्जीवस्यानणुत्वोपदेशादित्याह । तन्न । अन्त्ययोर्ब्रह्मप्रकरणस्थत्वस्य प्रागेव दर्शितत्वेन जीवाविषयत्वात् । आद्याया अपि सामर्थ्यबाधकत्वस्योपपादितत्वेन इतः पूर्वस्मिन्नङ्गुष्ठमात्र इति श्लोके बुद्धेर्गुणेनाङ्गुष्ठमात्रत्वमुक्त्वा किं तस्य स्वीयं परिमाणमित्याकाङ्क्षापूरणार्थं आत्मगुणेन चैव आराग्रमात्र इत्यनेनाराग्रमात्रत्वं स्वगुणेनैव च पुनरित्युक्ते किमाराग्रमात्रत्वमित्याकाङ्क्षान्तरे, वालाग्रेतिश्लोकान्तरस्य पादत्रयेण तद्विव्याययित्वा तस्य परिमाणस्याणुत्वेऽपि परमत्वाभावाज्जीवस्यानित्यत्वं स्यादिति शङ्कायां कालत आनन्त्यबोधनपरत्वस्यापि वक्तुं शक्यत्वेनानणुत्वबोधकत्वाभावादिति । तेन यदग्रिमे तद्गुणसारसूत्रे बुद्धेर्गुणेनेति श्रुतिद्वयं व्याख्यातम्, अत्राद्यार्धेन बुद्धिसम्पर्काज्जीवस्य

परिच्छिन्नव्यवहारमुक्त्वा पश्चाद् द्वितीयश्लोकचतुर्थपादेन तस्य स्वत आनन्त्यं प्रोक्तमिति । तदपि श्रुत्यक्षरविरुद्धत्वादसङ्गतमेव । यदपि तद्गुणसारसूत्रव्याख्यानं, जीवोपाधिर्बुद्धिरणुः कार्यावस्थया परिच्छिन्नपरिमाणः । तस्य चोपाधेर्ये गुणा उत्क्रान्त्यादयस्तत्सारत्वन्मात्रगुणक एव जीवो लोकैर्दृश्यते व्यवह्रियते च । स्वतो निर्गुणत्वात् । अतो लोकानुसारेण श्रुतावपि जीवस्योत्क्रान्त्यादिव्यपदेशो, न पुनर्जीवस्य स्वत उत्क्रान्त्यादिः श्रुत्या व्यपादिश्यते । विभुत्वश्रुतिविरोधात् । 'पुमान् सर्वगतो व्यापी ह्याकाशवदयं स्थितः । कुतः क्वासि क्व गन्तासीत्येतदप्यर्थवत्कथमिति स्मृतिविरोधाच्च । अयं च विभागः श्रुत्यैव स्पष्टीकृतः । यथा, कस्मिन्नहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजतेति । ब्राह्मवत् । यथा ब्राह्म ईश्वरे मायापरमाण्वाद्युपाधिगुणसारत्वेन मायादिगुणव्यपदेशः सोऽकामयत, अणोरणीयान्, तत् सृष्ट्वा तदेवानुप्राविशत, प्राशेनात्मनान्वारूढ, उत्सर्जैर्यातीत्यादि, तद्वदित्यर्थः । तदेव जीवस्य गमनादेरौपाधिकत्वं 'घटसंवृतमाकाशं नीयमाने घटे यथा। घटो नीयेत नाकाशं तद्वज्जीवो नभोपम'इति श्रुत्या, गतिश्रुतिरप्युपाधियोगादाकाशवदिति सांख्यसूत्रेण च स्पष्टमुक्तमिति । तदपि तथा। माध्यन्दिनानां बृहदारण्यके शारीरब्राह्मणे, तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यस्तमुत्क्रामन्तं प्राणोनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति संज्ञानमेवान्ववक्रामति स एष ज्ञः स विज्ञानो भवति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चेत्यत्रैव इत्यनेन सलिङ्गस्यात्मानमुपक्रम्य चक्षुरादीनि निष्क्रमणद्वाराण्युक्त्वा सलिङ्गस्याङ्गुष्ठमात्रताया अङ्गुष्ठमात्र इति पूर्वोक्तश्रुतौ, अङ्गुष्ठमात्रं पुरुषं निश्चकर्ष यमो बलादिति स्मृतौ च सिद्धत्वात् कथं चक्षुष्टो निष्क्रमणमिति शङ्कानिवृत्त्यर्थं, तमुत्क्रामन्तमित्यादिना केवलस्यात्मनो निष्क्रामणानन्तरं लिङ्गभूतानां मुख्यप्राणादीनाम् अनूक्रमणं मुक्तामुक्तसाधारण्येनोक्त्वा तदनन्तरं संज्ञानमेवेत्यादिना पश्चाद्बुद्धिसम्बन्धे, ज्ञ इति ज्ञानगुणकत्वं, तेन जन्यज्ञानवत्त्वं स्थूलदेहान्तरप्राप्तिसामग्रीं चक्तीति तदनाकलनात् । अङ्गुष्ठमात्रताया गुणेनोक्तत्वाद् गुणस्य चोत्कर्षे स्वाश्रयाधिकदेशवृत्तित्वस्य पूर्वं साधितत्वान्मुष्टिपिहित-

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ ३० ॥

ननु कथमन्यस्य जीवस्य सर्वोत्कृष्टव्यपदेशोऽपि । न हि प्रामाणिकैः सर्वथा अयुक्ते व्यपदेशः क्रियते । नचोक्ततद्गुणसा-

---

मणिप्रभावत् पिपीलिकादिदेहेषु बुद्धिगुणसङ्कोचेन गौणपरिमाणसङ्कोचेऽपि दोषाभावात् । एवमेव परिवर्त्तनादावपि बोध्यम् । यत्तु ऋतुशब्दो विज्ञानमयादेः प्राधान्यद्योतको, न त्वनुक्रमद्योतक इति व्याख्यानम् । तदसङ्गतम् ।

अणोरप्राधान्येऽनभिधानाल्लिङ्गवियोगस्य प्राणादिपदैरेव प्राप्तेर्विज्ञानमयप्राधान्यस्योत्क्रान्तिक्रियायामेव पर्यवसानाच्च । व्यापकत्वस्थुस्यादितात्पर्ये त्वनुपदमेवाग्रिमसूत्रे वक्ष्यामः । यदुक्तमयं विभागः कस्मिन्नहमिति श्रुत्यैव स्पष्टीकृत इति । तदपि न । इयं श्रुतिस्तु ब्रह्मपरा षष्ठिकर्तृत्वलिङ्गात् । तया ब्रह्मणि उत्क्रान्तिरोपाधिकीति बोध्यते । उत्क्रान्ते प्राणे देहजीवनरूपं कार्यं भगवान्न करोतीति । जीवनं च भगवत्कार्यमेवेति, न प्राणेन नापानेन मर्त्यो जीवति कश्चन इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रिताविति श्रुत्याऽवगम्यते । अतो नानया जीवोत्क्रान्तिविभागस्य स्फुटीभावः । दृष्टान्तव्याख्याने सोऽकामयतेत्यादिश्रुतितयोपन्यासोऽप्यसङ्गतः । तासां ब्रह्मप्रकरणस्थत्वात् । प्राकृतस्य परमेश्वराङ्गभिन्नतायाः सूत्रव्याख्यान एव दर्शितत्वादिति । सांख्यसूत्रेण गतिश्रुतेरुपाधिप्रयुक्तत्वकथनं तु व्यासविरोधमेव बोधयति । श्रौतसन्देहनिराकरणाय प्रवृत्तः कथमेवं सूत्रं न प्रणीतवानतः किमाधिक्यं भ्रम इति दिक् ।

रामानुजा माध्वाः शैवश्चाणुजीववादिनः । परं तु प्राज्ञप्राणोर्भेदं न कोऽपि विचारितवन्त इति दृष्टान्तव्याख्याने सर्वेषामेवानादेयम् ॥ २९ ॥

यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥ व्यपदेशाधिकरणे एव कश्चिद्दोषमाशङ्क्य परिहरतीत्याशयेन तं दोषं प्रकाशयन्ति । * ननिवत्यादि * । * अन्यस्येति * ब्रह्मभिन्नस्य । * सर्वोत्कृष्टव्यपदेश

रत्वाद् ब्रह्मण आनन्दांशस्य प्राकट्यादिति वाच्यम् । तथा सति प्राज्ञवत् पुनस्तिरोहितं स्यादिति तस्य तद्व्यपदेशो व्यर्थोऽयुक्तश्चेतिचेत् । नायं दोषः । कुतः ? । यावदात्मभावित्वात् । पश्चाद् यावत्पर्यन्तमात्मा । नित्यत्वात् । सर्वदा आनन्दांशस्य प्राकट्यात् । तस्य तथैव दर्शनमस्ति । अनावृतैश्वर्यादीनामुक्तत्वात् । प्राज्ञात् सम्पन्नत्वं विशेषः ।

इति * उत्कृष्टत्वेन व्यपदेशः । * तिरोहितं स्यादिति * ब्रह्मगुणसारत्वं तिरोहितं स्यात् । सूत्रोक्तं परिहारं व्याकुर्वन्ति । * नायमित्यादि * । हेतुं व्याकुर्वन्ति * पश्चादित्यादि * । * पश्चादिति * संसारदशोत्तरम् । * आनन्दांशस्य प्राकट्यादिति * जीवो हि भगवदंश इति तस्य यावानानन्दांशस्तत्प्राकट्यात् । * तस्येति * जीवस्य । * तथैव दर्शनमिति * ब्रह्मभावपूर्वकांशत्वेन दर्शनमस्ति । तत्र हेतुः । * अनावृतेत्यादि * । तथाच छान्दोग्ये, स तत्र पर्येतीत्यादिनाऽनावृतैश्वर्यादीनामुक्तत्वात् तद्गुणसारत्वकृतो ब्रह्मव्यपदेशो नाऽयुक्त इत्यर्थः । तथाचायं सूत्रार्थः । यावदिति पदार्थानतिवृत्तौ । भावित्वं वर्त्तनशीलत्वम् । तथाचात्मानमनतिक्रम्यानन्दांशस्य वर्त्तनशीलत्वान्न दोषः । न तिरोधानम् । ब्रह्म वेद ब्रह्मैव भवति, तस्य तावदेव चिरमित्यादिश्रुतौ तथा दर्शनादिति सूत्रार्थो बोध्यः । नन्विदमप्रयोजकम् । प्राज्ञ ईश्वरस्तृतीयः पाद एव सर्वेश्वर एषोऽन्तर्यामेष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानामित्येवं प्राज्ञं प्रशस्याग्रे तुरीयव्याख्याने ईश्वरप्रासस्तुरीय इति कथनेन प्राज्ञलयस्योक्तत्वात् तस्येवास्याप्यानन्दप्राकट्यैश्वर्यादीनामसार्वदिकत्वासिद्धेर्यावदात्मभावित्वस्य दूरनिरस्तत्वादित्यत आहुः * प्राज्ञात् सम्पन्नत्वं विशेष इति * पद् गतौ । ये गत्यर्थास्ते प्राप्त्यर्थाः । तथाच समीचीनतया प्राप्तत्वं सम्पन्नत्वं, प्राज्ञस्तु ईश्वरेण ग्रस्यते, अयं तु सम्यक्तया स्वस्वरूपेण तिष्ठतीति प्राज्ञात् सम्पन्नत्वं विशेषोऽतो नाप्रयोजकत्वम् । तथाच प्राज्ञस्य ब्रह्मसम्पन्नत्वाभावाल्लयेन ब्रह्मधर्माणां तिरोभावः । अस्य तु सम्पन्नत्वेन लयाभावादैश्वर्याद्यतिरोभावोऽतः सदा तद्व्

चकारात् तस्य चानन्दः प्रकटित इति न दूषणगन्धोऽपि ।

व्यपदेशो वा नासन्तमयुक्तस्य । यावदात्मा ब्रह्म भवत्यानन्दांशमाकट्येन तावदेव तद्व्यपदेशः । राजज्येष्ठपुत्रवदं । एतदेवोक्तम् ।

व्यापकत्वश्रुतिस्तस्य भगवत्त्वेन युज्यते ।
आनन्दांशाभिव्यक्तौ तु तत्र ब्रह्माण्डकोटयः ॥
प्रतीयेरन् परिच्छेदो व्यापकत्वञ्च तस्य तदिति ॥ ३० ॥

र्शनमित्यर्थः । चकारप्रयोजनमाहुः । * चकारादित्यादि* । तथाच यावन्तो दोषास्त आनन्दतिरोभावकृता इति तदभावे कोऽपि दोषो नेति नानर्थको व्यपदेश इत्यर्थः । नित्यत्वादित्यनुक्त्वा यावदात्मभावित्वादिति यदुक्तं तेनार्थान्तरमपि सूच्यत इत्याशयेनाहुः । * व्यपदेशो वेत्यादि * । वाशब्दो वाक्यालङ्कारे । युक्ततां व्युत्पादयन्ति* यावदित्यादि * । तथाच ब्रह्मभावोत्तरं तु ब्रह्मैवेति ततः पूर्वमेव व्यपदेशः । स च मुक्तौ ब्रह्मत्वसूचकः, यथा राजज्येष्ठपुत्रस्य राजत्वव्यपदेशोऽग्रे राजत्वसूचकस्तद्वत् । एतेनात्यन्तायुक्तत्वं परिहृतं बोध्यम् । एवं जीवस्य ब्रह्मभावं व्याख्याय तेन व्यापकत्वबोधकानि वाक्यानि समर्थयन्ति । * एतदेवोक्तमित्यादिना * । * उक्तमिति * निबन्धेऽस्माभिरुक्तम् । अर्थस्तु-तस्य ब्रह्मभावं प्राप्तस्य जीवस्य भगवत्त्वेन व्यापकत्वश्रुतिर्युज्यते, न तु जीवत्वेन रूपेण । तत्र प्रकारमाहुः । आनन्दांशाभिव्यक्तौ ब्रह्मभावे सति तस्य तद् विरुद्धधर्माधारत्वं भवत्यतस्तत्र ब्रह्मकोटयः परिच्छेदो व्यापकत्वं च प्रतीयेरन्निति । तथाच यथा कृष्णो भगवान् यशोदोत्सङ्गे स्थितोऽपि जृम्भणमृत्साभक्षणादौ सकलजगदाधारो दृष्टस्तथा जीवोऽणुरपि ब्रह्मभावेऽणुत्वाविरोधेनैव व्यापकः सकलजगदाधारो भवति । अत एव, मय्येव सकलं जातम्, तद्धैतदृषिः पश्यन् वामदेवः प्रतिपेदे मनुरभवमहं सूर्यश्चेति, श्रुतेति तन्मयतया सर्पोऽभिनेद्धुरित्यादीनि

वाक्यानि ब्रह्मभूतमेव लक्ष्यीकृत्योच्यन्ते । तेन, नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः, व्यापकोऽसङ्ग्यनावृतः, पुमान् सर्वगतो व्यापी इत्यादीन्यपि भाविनीमवस्थामादायैव योज्यानि । अन्यथा, अपरिमितास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुव नेतरथेति वेदस्तुतिवाक्यं विरुध्येत । एवञ्च बिन्दुस्तोकोपनिषदि घटसंवृतमाकाशमित्यत्र जीवगमनस्यौपाधिकत्वमुक्तम्, तदपि मुक्तजीवस्य ब्रह्मभूतस्यैव बोध्यम् । एक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु, स्थानत्रयाद्यतीतस्य पुनर्जन्म न विद्यत इत्युक्तमुक्तावास्थानावुपक्रम्य, एक एव हि भूतात्मा भूते भूते व्यवस्थितः, एकधा बहुधा चैव दृश्यते जलचन्द्रवदित्युक्तस्योपाधिवशाद् बहुधा जाग्रदादिदेवमनुष्यादिरूपेण दर्शनमुक्त्वा, घटसंवृतमाकाशमित्यनेन मुक्तस्य नभोपमस्य जीवस्य गमनादेरौपाधिकत्वं वक्ति । तेन शुकसनकादिगमनस्यैव तथात्वं, नेतरेषामिति मन्तव्यम् । अत एवैतदग्रे 'घटवद् विविधाकारं भिद्यमानं पुनः पुनःस्तद्भग्नं च न जानाति स जानाति च नित्यश' इति दधीच इव विद्वद्दयस्यैवोच्यत इति युज्यते । अन्यथा तस्यैवैकस्य प्रतिबिम्बमवच्छेदत्वं च विरुध्येत ।, वस्तुतस्तु, एक एव हि भूतात्मेत्यत्र जलचन्द्रदृष्टान्तेन यथा चन्द्रस्यांशुद्वारा, जलप्रवेशे नानात्वं तथा ब्रह्मणोऽप्यंशद्वारा तत्तद्देहप्रवेशे नानात्वमिति योग्यत्वाय ब्रह्मरूपतोच्यते अहङ्ग्रहोपासनायाः प्रकृतत्वात् तत्र दोषाभावायाऽतो न कोऽपि शङ्कालेशः । यत्तु परैर्बुद्धिसंयोगाज्जीवभाव उच्यते । तन्न । ब्रह्मभूतानामीश्वरस्य च व्यापकत्वेन तदापि तदापत्तेः । अपि तु प्राणधारणाभिमानात् । जीव प्राणधारण इति धात्वर्थेन तथा निश्चयात् । अन्योन्तर आत्मा विज्ञानमयो योऽयं विज्ञानमयः प्राणेष्वित्यादौ तस्य विज्ञानमयत्वं तु ज्ञानांशत्वाज्ज्ञानप्रचुरत्वं, न तु बुद्धिमयत्वं, तदनभिमानेऽपि ज्ञानप्राचुर्यस्य मुक्तेषु सिद्धत्वात् । विज्ञानमयो मनोमयो वाङ्मनःप्राणमयश्चक्षुर्मयः श्रोत्रमय इत्यत्र प्रायपाठबलेन विज्ञानपदस्य बुद्ध्याख्यकरणवाचकत्वेऽपि न सर्वत्र तथात्वं, गमकाभावे तथा वक्तुमशक्यत्वात् । अत्रापि बुद्धिमयत्वं, बुद्धिप्रचुरत्वं, तदपि बुद्ध्यधीनव्यवहारत्वमेव । प्रायपाठेन तथा निश्चयात् । न तु बुद्धिगुणसारत्वम् । तस्य दूषितत्वात् । नापि बुद्ध्यधीनाखिलव्यवहारत्वम् । यावत्संसारमेव बु-

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ३१ ॥

व्यपदेशदशायामपि आनन्दांशस्य नात्यन्तमसत्त्वम् । पुंस्त्वादिवत् । यथा पुंस्त्वं सेकादिसामर्थ्यं बाल्ये विद्यमानमेव यौवने प्रकाशते तथा आनन्दांशस्यापि सत एव व्यक्तियोगः ॥ ३१ ॥

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो

वाऽन्यथा ॥ ३२ ॥

ननु कथमेवं स्वीक्रियते । इदानीं संसारावस्थायां सच्चित्मात्रमेव । मोक्षे त्वानन्दांशोऽपि प्रकट इति तन्निवारयति । तथा सति नित्यमुपलब्धिः स्यादानन्दांशस्य । तथा सति न संसारावस्थोपपद्येत । अथानुपलब्धिः सर्वदा तथा सति मोक्षदशा विरु-

---

द्धिसंसर्गेण बुद्धेर्यावदात्मभावित्वाभावात् । यदपि उपाधिकल्पितस्वरूपव्यतिरेकेण न परमार्थतो जीवो नाम कश्चिदस्तीति तदप्यसङ्गतम् । अंशत्वस्याग्रे वक्ष्यमाणत्वादिति । तस्मात् पूर्वोक्तरीतिरेव युक्तेति दिक् ॥ ३० ॥

पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥ ननु पूर्वमसतश्चेदानन्दांशस्य प्राकट्यं तदा जन्यत्वेन नश्वरत्वेन व्याप्तेरानन्दांशस्य तिरोधानं भविष्यतीति न तस्य यावदात्मभावित्वं वक्तुं शक्यमिति शङ्कायामिदं सूत्रं प्रवृत्त इत्याशयेन व्याकुर्वन्ति । * व्यपदेशेत्यादि * । निगदव्याख्यातमेतत् ॥ ३१ ॥

नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वान्यथा ॥ सूत्रप्रयोजनमाहुः । * ननु कथमित्यादि । * तन्निवारयतीति * । तमेतमाशङ्कोत्पादकं प्रश्नमुत्तरयति । तथाचेदं सूत्रप्रयोजनमित्यर्थः । व्याकुर्वन्ति । * तथा सतीत्यादि * । सूत्रयोजना तु, अन्यथा यदुक्तसूत्ररीत्या व्यवस्था नाङ्गीक्रियते तदा जीवे त्रयाणां नित्यं प्राकट्यं वा नित्यमप्राकट्यं वा, जीवः सच्चिद्रूप एव, ब्रह्मानन्दमेवेति

ढ्येत । अथान्यतरानियमः । जीवो निरानन्द एव, ब्रह्म त्वानन्दरूपम् । तथा सति, ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतिविरोधः । तस्माद् पूर्वोक्त एव प्रकारः स्वीकर्तव्य इति सिद्धम् ॥ ३२ ॥

थाङ्गीक्रियेत ततः पक्षत्रयेऽपि क्रमेण त्रयो दोषा इति निर्दुष्टः पूर्वोक्तप्रकार एव युक्त इति सिद्धमित्यर्थः ।

माध्वा अप्यर्द्धजरतीयेनैवमाहुः ।

एतेन संसारदशायां ब्रह्मत्वव्यपदेशो गौण्या, मुक्तिदशायां तु-मुख्यवृत्त्या । व्यापकत्व विरुद्धधर्माश्रयत्वंचानन्दांऽशप्राकट्यादिति साधितम् ।

शङ्कराचार्यभास्कराचार्यभिक्षवस्तु—एतत् सूत्रमन्तःकरणसत्तासाधनार्थमित्याहुः । यदि ह्यन्तःकरणं न स्यात् तदा ह्यात्मनो व्यापकत्वादिन्द्रियविषयरूपाणामुपलब्धिसाधनानां समवधानं तस्य सार्वदिकमिति नित्यमुपलब्धिः प्रसज्ज्येत । अथ सत्यपि साधनसमवधाने फलाभावस्ततो नित्यमेवानुपलब्धिः प्रसज्ज्येत । अथाऽऽत्मनो वेन्द्रियस्य वा विषयस्य वा उपलब्धिजनकशक्तिप्रतिबन्धोऽङ्गीकार्यः । तदपि न । आत्मनोऽविक्रियत्वेन शक्तिप्रतिबन्धासम्भवात् । नापीन्द्रियस्य । पूर्वोत्तरक्षणयोरप्रतिबद्धशक्तिकस्याकस्माच्छक्तिप्रतिबन्धकल्पने प्रमाणाभावात् । अन्यथाऽनुपपत्त्या कल्पनेऽपि प्रतिबन्धकल्पनापेक्षया करणकल्पनाया लघीयस्त्वात् । अतो यत्समवधानासमवधानाभ्यामुपलब्ध्यनुपलब्धी तन्मनः । तथाच श्रुतिः । अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोतीति । कामादयश्च तद्वृत्तय इति दर्शयति, कामः सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धाधृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एवेति । आहुश्च नैयायिकाः । युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति । बौद्धानां मनोऽवस्थितं नास्तीति तन्निराकरणार्थं सूत्रमिदमिति चाहुः ।

रामानुजाचार्यास्तु—ज्ञानमात्रः सर्वगतश्चेदयमात्मा उपलब्ध्यनुपलब्ध्योरुभयोरपि हेतुः स्यात् । तदा सर्वत्रोभयं सदा प्रसज्ज्येत । अथान्यतरानियमस्तदाऽऽत्माऽनुपलब्धिरेव सर्वत्र सर्वदा

कर्ता शास्त्रार्थवत्त्वात् ॥ ३३ ॥

सांख्यानां प्रकृतिगतमेव कर्तृत्वमिति तन्निवारणार्थमधिकरणारम्भः ।

कर्ता जीव एव । कुतः ? । शास्त्रार्थवत्त्वात् । जीवमेवाधिकृत्य

स्यादुपलब्धिरेव वा । तस्माच्च सर्वगत आत्मा, किन्तु शरीरान्तरवस्थितत्वादात्मनस्तत्रैव सर्वेषां स्वात्मन उपलब्धिर्न सर्वत्रेति व्यवस्थासिद्धिः । नचोपलब्धेः करणायत्तत्वाद्दोषसमाधानम् । सर्वेषामात्मनां सर्वगतत्वेन सर्वशरीरगैः सर्वैः करणैः सर्वदा संयुक्तत्वाददृष्टानियमाद्युक्तदोषस्य समानत्वात् । अतो विभुत्ववादिनां दूषणमेवं युक्तमित्याहुः । एवमेव शैवोऽपि ।

यत्तु भास्कराचार्यैरुक्तं, सर्वगतत्वेऽपि भोगस्य कर्मनिमित्तत्वाच्छरीरदेशे भोगोत्पत्तेर्न सर्वगतत्वव्याहतिरिति । तदप्यदृष्टानियमेनैव दूषितत्वान्न युक्तिसहम् । इदं सर्वं मया जीवाणुवादे सम्यक् प्रपञ्चितमतो नात्रोच्यते । नचैवं सति मनःसिद्ध्यभावः । उक्तश्रुत्या तत्तद्वृत्तिप्रत्यक्षेण च सिद्धत्वादिति ॥ ३२ ॥

कर्ता शास्त्रार्थवत्त्वात् ॥ अधिकरणप्रयोजनमाहुः । * सांख्यानामित्यादि * । तथाच पूर्वं ज्ञानस्वरूपत्वे ज्ञानगुणकत्वे च सिद्धान्तिते सांख्यवदकर्तृत्वं नैयायिकवत् कर्तृत्वं च सम्भाव्यते, अतः संशयः । तत्र कठवल्ल्यां, 'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् । उभौ तौ न विजानीतो नायं हन्ति न हन्यत' इत्यत्र हन्तृत्वं ज्ञानतोऽकर्तृत्वश्रावणात् । गीतायामपि, 'प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते । नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति । कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते' इति भगवता कथनात् पुराणेष्वप्येवंविधवाक्यदर्शनाज्जीवो न कर्ता, प्रकृतिरेव कर्त्रीति निराकरणायाधिकरणारम्भ इत्यर्थः । एवं पूर्वपक्षे सूत्रोक्तं सिद्धान्तं व्याकुर्वन्ति । * कर्तेत्यादि * । * शास्त्रार्थवत्त्वादिति * । शास्त्रस्य अर्थवत्त्वं शास्त्रार्थवत्त्वं तस्मात् ।

वेदे अभ्युदयनिःश्रेयसफलार्थं सर्वाणि कर्माणि विहितानि ब्रह्मणोऽनुपयोगात् । जडस्याशक्यत्वात् । सन्दिग्धेऽपि तथैवाङ्गीकर्तव्यम् ॥ ३३ ॥

शास्त्रस्य फलवत्त्वादिति यावत् । कारीर्या वृष्टिकामो यजेत, ज्योतिष्टोमेन स्वर्गकामो यजेत, तज्जलानिति शान्त उपासीत अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिल्लोके पुरुषो भवति तथेतः प्रेत्य भवति, स क्रतुं कुर्वीतेत्यादिभिर्वेदेऽभ्युदयनिःश्रेयसफलार्थं सर्वाणि यज्ञादिरूपाण्युपासनारूपाणि च कर्माणि विहितानि । यदि जीवः कर्ता नेष्येत तदा स्वर्गकामादिपदानि तादृशफलेप्स्वधिकारिशून्यानि कुप्यन्ति तत्तच्छास्त्रवैयर्थ्यमेवापादयेयुः । न हि तादृशकामवत्त्वं ब्रह्मणः सम्भवति । आत्मकामत्वेन तत्फलानुपयोगात् । न वा जडस्य बोधाभावेन तादृशकामाभावेन चाशक्यत्वात् । अतः पूर्वोक्तवाक्यैः सन्दिग्धेऽपि कर्तृत्वे बहूनामनुग्रहस्य न्याय्यत्वात् तत्तत्फलकामिनां जीवानामेव कर्तृत्वमङ्गीकार्यम् । नच, हन्ता चेदित्यस्य कोपः । आत्मनो नित्यत्वेन वध्यत्वाभावात् । तादृशज्ञानस्य मिथ्यात्वबोधनेनोपपद्यमानत्वात् । प्रकृतेः क्रियमाणानीत्यादिगीतावाक्येषु पौराणिकेषु च यद् गुणानामेव कर्तृत्वं स्वस्मिन्नध्यस्यतीत्युच्यते तदपि लौकिककर्तृत्वाध्यासपरम् । 'न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् । कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणै'रिति वाक्ये लोकप्रवाहपतितस्य कर्मणः प्राकृतगुणप्रयुक्तत्वबोधनात् । न तावता सर्वविधकर्तृत्वलोपः । 'अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् । विविधाश्च पृथक् चेष्टा दैवं चैवात्र पञ्चमम् । शरीरवाङ्मनोभिर्यत् कर्म प्रारभते नरः । न्याय्यं वा विपरीतं वा पञ्चैते तत्र हेतवः । तत्रैवं सति कर्तारमात्मानं केवलं तु यः । पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मति'रिति गीतायामेव जीवस्य कर्तृत्वं कर्तेति पदेनोक्त्वा तस्याधिष्ठानादिपञ्चहेतुसापेक्षत्वं निरूप्य केवलस्य स्वस्य कर्तृत्वाभिमाने दुर्मतित्वबोधनेन घृतद्रवत्ववत् तस्य लौकिकस्यापि नैमित्तिकात्मधर्मत्वबोधनादिति ॥ ३३ ॥

विहारोपदेशात् ॥ ३४ ॥

तस्यैव गान्धर्वादिलोकेषु, यद् यद् कामयते तद् तद् भवतीति विहार उपदिष्टः । ततश्च कर्तृत्वभोक्तृत्वयोः साधुकारी साधुर्भवतीति सामानाधिकरण्यश्रवणाज्जीव एव कर्ता ॥ ३४ ॥

उपादानात् ॥ ३५ ॥

तदेषां प्राणानां विज्ञानेन विज्ञानमादायेति जीवेन सर्वेषां विज्ञानमुपादीयते । तस्मादिन्द्रियादीनां करणत्वमेव । स्वातन्त्र्यादस्यैव कर्तृत्वम् ।

विहारोपदेशात् ॥ जीवस्य स्वतः कर्तृभावेऽपि प्रकृतिसंबद्धत्वेन विवेकाग्रहात् तादृशकर्तृग्रहणेऽपि शास्त्रसार्थक्यमिति शङ्कायां सूत्रोक्तं हेत्वन्तरं व्याकुर्वन्ति । * तस्यैवेत्यादि * । छान्दोग्ये दहरविद्यायां, स यदि पितृलोककामो भवतीत्यादिना, यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति तेन सम्पन्नो महीयते इत्यन्तेन तत्तत्समुत्थानादिकथनाद् विहारः स्वेच्छाक्रियात्मकभोगरूप उपदिष्टः । स चोक्तरीत्या दहरविदः कर्तृत्वमाक्षिपति । नच तादृशस्य विवेकाग्रहः सम्भवत्यतस्तथेत्यर्थः । अत्र पित्रादीति वक्तव्ये गान्धर्वादीति पदं विहारस्वाच्छन्द्यादिद्योतनार्थम् । यत्तु कैश्चित्, स ईयते पुरुषो यत्र काममिति श्रुत्युपन्यासेन स्वाप्नी क्रिया विहारत्वेनादृता । तन्न रुच्यम् । लभ्यमाने ईदृशे ज्ञानिनो विहारे तादृशाज्ञानिविहारग्रहणस्यायुक्तत्वादिति ॥ ३४ ॥

उपादानात् ॥ सङ्कल्पस्य मनोधर्मत्वाद् दहरविदोऽपि मनःसंपृक्तत्वमेवेति न केवले जीवे कर्तृत्वसिद्धिरिति शङ्कानिरासाय हेत्वन्तरं विषयवाक्योपन्यासेन व्याकुर्वन्ति । * तदेषामित्यादि * । श्रुतिस्तु बृहदारण्यके दृप्तबालाकिब्राह्मणस्था । यत्रैष एतत्सुप्तोऽभूद्य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेत इति । अत्र अभूदित्यन्तं

यस्तु मन्यते बुद्धिसम्बन्धाज्जीवस्य कर्तृत्वमिति । स प्रष्टव्यः । किं बुद्धिकर्तृत्वं जीवे समायाति ? अथवा जीवगतमेव कर्तृत्वं बुद्धिसम्बन्धादुद्गच्छति ? अथवा शशविषाणायितमेव कर्तृत्वं सम्बन्धे समायाति । नाद्यः । जडत्वात् । अनङ्गीकारात् पूर्वं निराकृतत्वाच्च । द्वितीये त्विष्टापत्तिः । उपादानविरोधश्च ।

मिश्रं वाक्यम् । अस्मिन्मे तु विज्ञानेन स्वीयेन गुणेन एषां प्राणानामन्तर्बहिरिन्द्रियाणां विज्ञाने ज्ञानजनिकां शक्तिमादायेत्यर्थो बोध्यः । शेषं स्फुटम् । तत्रैव श्रुत्यन्तरं च, तद्गृहीत एव प्राणो भवति गृहीता वाग् गृहीतं चक्षुर्गृहीतं श्रोत्रं गृहीतं मनः स यत्रैतत् स्वप्नया चरति स यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्तेतैवमेवैष एतत्प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तेत इति । तथाच स्वप्नावस्थायामज्ञानबहुलायामपि प्राणानामन्तर्बहिरिन्द्रियाणां पृथग्ग्रहणकथनात् तदानीं प्राणाख्येभ्य इन्द्रियेभ्यो विविक्तस्यैव ग्रहीतृत्वमुच्यते । अतो दहरविदः सङ्कल्पोऽप्यात्मधर्म एव ज्ञेयः । कामः सङ्कल्प इति श्रुतिस्तु लौकिकतत्परा । अतः स्वातन्त्र्याज्जीवस्यैव कर्तृत्वमित्यर्थः । अत्र मतान्तरमनुवदन्ति दूषयितुं विकल्पयन्ति च । * यस्त्वित्यादि * । स प्रष्टव्य इत्यादि च * । दूषयन्ति * नाद्य इत्यादि * । बुद्धिर्हि जडा । जडगतं कर्तृत्वं चेतने समयातीति न क्वापि दृष्टम् । विपरीतं तथाऽऽदौ दृष्टम् । अतो नाद्यः । किञ्च । सूत्रकृता कुत्र वा जडे कर्तृत्वमङ्गीकृतं येनात्र तदाद्रियते । यदि तथा स्यात् पूर्वं न प्रकृतेः कर्तृत्वं च रचनानुपपत्त्यादिसूत्रेषु निराकुर्यात् । अतोऽनङ्गीकारात्, पूर्वं निराकृतत्वाच्च नाद्य इत्यर्थः । द्वितीयं दूषयन्ति । * द्वितीय इत्यादि * । कर्तृत्वस्य यद्यपि श्रुतद्रष्टृत्ववज्जीवधर्मत्वसिद्धा इष्टापत्तिस्तथापि प्राणानामुपादेयतया श्रुतौ सिद्धत्वाद् बुद्धेरपि प्राणेष्वेव प्रवेशात्तत्सम्बन्धेनोद्गमाङ्गीकारे प्राणोपादानविरोधश्च । अतः सोऽपि नेत्यर्थः । नच जीवानां करणगोचरसाक्षात्काराभावात् तद्ग्रहणं कथमुपपद्यत इति वाच्यम् । जाग्रति, स्वयञ्ज्योतिष्ट्वाभावेन तत्साक्षात्काराभावे-

तृतीये शास्त्रविरोधः । ब्रह्मणि सिद्धत्वाच्च । असत्कार्यस्य निराकृतत्वात् । सर्वविप्लवस्तु माध्यमिकवदुपेक्ष्यः ॥ ३९ ॥

पि, अत्रात्मा स्वयञ्ज्योतिर्भवतीति श्रुत्या तदानीं स्वयञ्ज्योतिष्ट्वेन करणनाडीप्रभृतिसाक्षात्कारसम्भवे सुखेन तद्ग्रहणोपपत्तेः। नचैवं सति जाग्रति कदाचित् तत्स्मरणापत्तिः। निद्रया स्वयञ्ज्योष्ट्वस्येव ग्रहणादिविषयकसंस्कारस्यापि तिरस्कारात्। नच तिरस्कारे माना-ऽभावः। कार्याभावेनैवं तथानुमानात्। अथवा, उपेक्षाज्ञानादिव तादृशाज्ञानादपि संस्कारानुत्पत्तिरुपेक्षाज्ञानवत्तदपि त्रिक्षणावस्थाय्येवेति वा श्रुतार्थापत्त्या कल्पनीयमतो न दोषः।

नच द्वितीयस्कन्धे, आत्मा यथा स्वप्नजनेक्षितैक इत्यत्र स्वप्नादौ भगवत एव द्रष्टृत्वप्रतिपादनात्तत्र जीवस्य द्रष्टृत्वमिति शङ्क्यम्। तत्र, स सर्वधीवृत्त्यनुभूतसर्व इत्यत्रोक्तायाः भगवतो द्रष्टृत्वप्रतिज्ञायाः पूर्तये भगवतो द्रष्टृत्वव्युत्पादनेऽपि जीवद्रष्टृत्वस्यानिषेधात्। अन्यथा स्वप्नानुस्मरणाभावप्रसङ्गात्। इदञ्च मया तत्रैव व्युत्पादितमिति ततोऽवसेयम्।

भिक्षुस्तु—यद्यपि जीवानां करणगोचरसाक्षात्कारो नास्तीति तद्गोचरशक्तिर्न सम्भवति, तथापि निद्रानिमित्तकारणचक्षुर्निमीलनादिद्वारैव निद्रायां कर्तृत्वं बोध्यमित्याह। तन्नास्माकं रोचते। उक्तरीत्या कर्तृत्वे साक्षात्सम्भवति तथा कल्पनस्यायुक्तत्वादिति। तृतीयं दूषयन्ति। * तृतीय इत्यादि *। शास्त्रे हि कर्तृत्वं प्रतिज्ञातं सूत्रकृता। यदि तच्छशविषाणायितमेव भवेत् तदा तस्य समागमनासम्भवात् कथं तत्प्रतिजानीयादतस्तद्विरोधः। किञ्च। यदि तत् तथा स्याद् ब्रह्मण्यपि न स्यात्। तथा सतीक्षत्यादिसूत्रेषु न तत्प्रतिपादयेत्। अतो ब्रह्मणि सिद्धत्वादपि न कर्तृत्वस्य तथात्वम्। नच ब्रह्मणि सिद्धत्वेऽपि जीवे शुक्तिरजतवदसदेवोत्पद्यत इति युक्तम्। असत्कार्यवादस्य निराकृतत्वात्। यत्तु ब्रह्मणो निर्गुणत्वात् कार्यस्याविद्यकत्वेन कर्तृत्वमपि तथैवेति। तदयुक्तम्। सर्वविप्लावकत्वात्। सर्वविप्लवस्तु माध्यमिकवच्छून्यवाद एव पर्यवस्य-

व्यपदेशाच्च क्रियायां नचेन्निर्देशविपर्ययः ॥३६॥

व्यपदेशो, विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि चेति । अत्र सांख्ये बुद्ध्यादीनामेव कर्तृत्वं न जीवस्येति क्रियायां यागादिकर्मसु, न तु भोगे । जीवस्य कर्तृत्वं न चेत् । न । तथा सति निर्देशस्य विपर्ययो भवेत् । विज्ञानेन विज्ञानमादायेति श्रुत्यनुरोधात् । प्रकृतेऽपि तृतीयान्तता आपद्येत ।

अथ स्वव्यापारे कर्तृत्वं, तथापि पूर्वनिर्देशस्य विज्ञानमयस्य विपर्ययः स्यात् । विकारित्वं स्यात् । तच्चासङ्गतम् । श्रपच्चात् । विज्ञानमादायेत्यत्र विपर्यय एव एकस्य प्रदेशभेदेनार्थभेदोऽपि ।

तीति सर्वप्रमाणविरुद्धत्वात् तद्वदेवोपेक्ष्यः । तस्मात् तृतीयाऽपि नेत्यर्थः ॥ ३५ ॥

व्यपदेशाच्च क्रियायां नचेन्निर्देशविपर्ययः ॥ एवं श्रुतार्थापत्त्या जीवस्य कर्तृत्वं साधयित्वा साक्षाच्छ्रुत्या साधयतीत्याशयेन व्याकुर्वन्ति । * व्यपदेश इत्यादि * । व्यपदेशः प्रथमाविभक्त्या कर्तृत्वेन निर्देशः, सोऽस्यां श्रुतौ जीवे वर्तते । अतः कल्पनां विना साक्षाच्छ्रुत्यैव स कर्तेत्यर्थः । सूत्रशेषं व्याकुर्वन्ति * अत्र सांख्य इत्यादि * । अत्र अस्यामपि श्रुतौ विज्ञानपदेन बुद्धिरेवोच्यते । सांख्ये बुद्ध्यादीनां प्राकृतानामेव कर्तृत्वं व्यवस्थापितं, न जीवस्य इति हेतोः क्रियायां यागादिषु वैदिकेषु लौकिकेषु च कर्मसु जीवस्य न कर्तृत्वम् । क्रियापदाद् भोगे कर्तृत्वं न पूर्वपक्षिणा प्रतिषिध्यते । तथाच क्रियायामेव जीवस्य कर्तृत्वं नेति चेन्न । इदं वक्ष्यमाणहेतुना सेत्स्यमानकथनम् । तथा सति विज्ञानपदेन बुद्धेरेव व्यपदेशोऽङ्गीकृते सति तथेत्यर्थः । ननु कारकमात्रस्य स्वस्वव्यापारे स्वातन्त्र्यात् स्थाली पचति काष्ठानि पचन्तीत्यादिवद् अत्रापि कर्तृत्वं शक्यवचनमतो निर्देशविपर्ययो न भविष्यतीत्याशङ्कामनूद्य तत्रापि दूषणं योजयन्ति । * अथेत्यादि * । यद्येवं निर्देशः समर्थ्यते तथापि अयं श्लोको विज्ञानमयमुपक्रम्य पठित इत्येतदैकार्थ्यात् तत्रापि विज्ञान-

भगवति सर्वे शब्दाः स्वभावत एव प्रवर्तन्ते । औपचारिकत्वज्ञापकाभावात् ।

यज्ञो जायमान इति श्रद्धादीनां शिरस्त्वादिः ।

पदस्य बुद्धिवाचकत्वे विज्ञानमयपदस्य बुद्धिविकारवाचकत्वं स्यात् । तच्चासङ्गतम् । द्व्यच्त्वात् । द्व्यचश्छन्दसीति विधेर्बह्वज्व्यावृत्त्यर्थत्वात् । अतस्तत्रेवात्रापि तदनुरोधाज्जीववाचकत्वमेवाङ्गीकार्यम् । यद्यपि विज्ञानमादायेत्यत्र विपर्यय एव वर्त्तत इति तस्य न दोषत्वमिति वक्तुं शक्यते, तथापि एकस्य विज्ञानस्य जीवधर्मतया प्राणधर्मतया च प्रदेशभेदेनार्थभेदोऽपि तत्राभिप्रेत इति तत्र न विपर्ययस्य दोषत्वम् । अत्र तूभयत्राप्येक एव विज्ञानपदार्थः परामृश्यत इत्यत्र तु विपर्ययो दोष एवेत्यर्थः । ननु विज्ञानपदस्य जीववाचकत्वे विज्ञानमानन्दं ब्रह्मेत्यत्र विज्ञानपदस्य ब्रह्मण्यौपचारिकत्वं स्यादतो नेदं साधीय इत्यत आहुः । * भगवतीत्यादि * । सर्वे शब्दाः प्रणवविकृतित्वात्प्रणववाच्ये ब्रह्मणि स्वभावत एव वर्त्तन्ते । सर्वे वेदा यत्पदमामनन्तीति श्रुतेश्च । अतस्तत्रौपचारिकत्वज्ञापकाभावाच्च तथेत्यदोष इत्यर्थः । नन्विदं विज्ञानमयपदस्य विकारार्थत्वानुपपत्त्यनुरोधेनोक्तम् । सा तु नास्ति । छन्दसि सर्वेषां विधीनां वैकल्पिकत्वाभ्युपगमात् । नचात्र विकारप्रत्ययत्वे मानाभावः । तत्र श्रद्धादीनां मनोयागादिधर्माणां शिरआदित्वकल्पनाया एव मानत्वादित्यत आहुः । * यज्ञ इत्यादि * । सत्यमस्ति कल्पना, परन्तु न तस्या विकारप्रत्यये मानत्वम् । लौकिके तस्य यज्ञकर्तृताया वक्तव्यत्वात् । श्रुत्यन्तरे च यजमानभागप्राशनप्रशंसायाम्, एतावान् वै यज्ञो यावान् यजमानभागो यज्ञो यजमानो यद्यजमानभागं प्राश्नाति यज्ञ एव यज्ञं प्रतिष्ठापयतीति यज्ञस्वामित्वेन यजमानस्य यज्ञतायाः कल्पनाया उपदिष्टत्वाद्यजमानधर्माणां श्रद्धादीनां शिरस्त्वादियज्ञशिरःप्रभृतिरूपत्वं कल्पनयोच्यते । यज्ञाभिप्रियायां श्रद्धादीमकथनात् तस्या यज्ञाङ्गतया तद्धर्मत्वम् । अतस्तस्ये प्रमीयमाणानुष्ठीयमानो धर्मो । योगात्मचिन्तनसाधनतया योगविद्यायामुपनिषत्सु विहितत्वाच्च धर्म एव ।

तस्माद् विज्ञानमयो जीव एव । जडस्य स्वातन्त्र्याभावान्न कर्तृत्वम् ॥ ३६ ॥

उपलब्धिवदनियमः ॥ ३७ ॥

ननु जीवस्य कर्तृत्वे हिताकरणादिदोषप्रसक्तिरितिचेत् । न । उपलब्धिवदनियमः । यथा चक्षुषेष्टमनिष्टं चोपलभते, एवमिन्द्रियैः कर्म कुर्वन्निष्टमनिष्टं वा माप्नोति ॥ ३७ ॥

महर्लोकोऽप्याधारतया योगयज्ञाङ्गम् । इदं च तृतीयाध्यायेन सङ्गतम् । अत इयं कल्पना यज्ञन्यायेति नास्या विकारप्रत्ययसाधकत्वमित्यर्थः । सिद्धमाहुः । * तस्मादित्यादि * । ननु भवत्वेवं तथापि यज्ञादिकर्तृत्वं शरीरविशिष्टस्यैवेति बुद्धावेव कर्तृतायाः पर्यवसानमित्यत आहुः । * जडस्येत्यादि * । तथाच कर्तृलक्षणस्य बुद्धावघटमानत्वान्न बुद्धेः कर्तृत्वं, किन्तु जीवस्यैवेत्यर्थः ॥ ३६ ॥

उपलब्धिवदनियमः ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * । जीवस्य कर्तृत्वे स्वातन्त्र्यं प्राप्तम् । स्वतन्त्रत्वे च हितमेव स्वस्य कुर्यान्न त्वहितादि । दृश्यते तु तदपि । अतो हिताकरणादिदोषप्रसक्तिर्जीवकर्तृत्वबाधिकेति बुद्धेरेव कर्तृत्वमित्यर्थः । समाधिं व्याकुर्वन्ति । * नेत्यादि * । सांख्यमते भोक्तृत्वस्याङ्गीकाराद् भोगस्य च सुखदुःखसाक्षात्कारात्मकत्वात् तत्र स्वातन्त्र्यं त्वस्य वक्तव्यम् । तथा सति उपलब्धिरूपे कार्ये तत्करणभूतानि चक्षुरादीनि व्यापारयन् यथा चक्षुषा इष्टमनिष्टं चोपलभते, एवं क्रियारूपेऽपि कार्ये तत्करणानामिन्द्रियाणां व्यापारणादिन्द्रियैः कर्म कुर्वन्निष्टमनिष्टं वाऽऽप्नोतीति समः समाधिरित्यर्थः ।

रामानुजाचार्यास्तु — यथा, नित्योपलब्धिसूत्रे आत्मनो विभुत्व उपलब्ध्यनियमो दोष उक्तस्तथात्र आत्मनोऽकर्तृत्वे प्रकृतेश्च कर्तृत्वे दोष उच्यते । यदि प्रकृतिरेव कर्त्री स्यान्नात्मा, तदा तस्याः सर्वपुरुषसाधारणत्वात् सर्वाणि कर्माणि सर्वेषां भोगाय

शक्तिविपर्ययात् ॥ ३८ ॥

नन्वीश्वरवत् स्वार्थमन्यथा न कुर्यादितिचेत् ॥ शक्तिविपर्ययात् ॥ तथा सामर्थ्याभावात् । इत एव दैवादहितमपि करोति ॥ ३८ ॥

समाध्यभावाच्च ॥ ३९ ॥

जीवस्य क्रियाज्ञानशक्ती योगेन सिद्ध्यतः । समाध्यभावाच्छक्त्यभाव इत्यर्थः । चकारात् तादृशमन्त्राभावोऽपि ।

स्युर्भेव वा, न तु कस्यचित्। यच्च य आत्मा यत्सन्निहितस्तस्य तद्भोग इति सन्निधानाद् व्यवस्था । आत्मनां विभुत्वाभ्युपगमेन सर्वेषां सन्निधानस्याविशिष्टत्वात् । अत एव नान्तःकरणादिनापि व्यवस्थासिद्धिरित्याहुः । तदपि युक्तम् ॥ ३७ ॥

शक्तिविपर्ययात् ॥ सूत्रमवतारयन्ति । * नन्वित्यादि * । अयमर्थः । चक्षुषा अनिष्टोपलब्धिर्या जायते सा न स्वप्रयत्नसम्पाद्या। प्रमाणवस्तुपरतन्त्रत्वेन दैवाज्जायमानत्वात् । अतः कर्मजनितेष्टानिष्टोपलब्धिदृष्टान्तो न युक्तः । अतो यदि जीवः स्वतः कर्त्ता स्यात् तदा स्वार्थमनिष्टं न कुर्यात् । यथा ईश्वरः स्वार्थमनिष्टं न करोति तद्वत् । दृश्यते च तत् । अतो न जीवः कर्त्तेति । अत्र समाधिं व्याकुर्वन्ति * तथेत्यादि * विपर्ययोऽभावः ।तथाच शक्त्यभावादनिष्टकरणम् । ईश्वरं तु शक्तिरस्तीति न दृष्टान्तः । अतोऽनिष्टकरणं न साहजिककर्त्तृत्वबाधकमित्यर्थः ॥ ३८ ॥

समाध्यभावाच्च ॥ शक्त्यभाव एव कुत इत्याकाङ्क्षायामेतत्सूत्रं प्रवृत्त इत्याशयेन विवृण्वन्ति । * जीवस्येत्यादि * । स्पष्टम् । तादृशमन्त्राभाव इति सामर्थ्यसाधकमन्त्राभावः । यथा भूमिर्भूम्ना द्यौर्वरिणेत्याहादिपमेथैतामावास्ते सर्पा ये जीर्यन्तोऽमन्यन्त स एतं कसर्णीरः काद्रवेयो मन्त्रमपश्यत्ततो वै ते जीर्णास्तनूरपाघ्नतेति । अत्र सांख्यास्तदनुसारिणो मायावादिप्रभृतयश्च जीवस्य बुद्धिसम्बन्धादौपाधिकं कर्त्तृत्वमङ्गीकुर्वन्तः स्वाभाविकं जीवस्य कर्त्तृ-

नच सहजकर्तृत्वे अनिर्मोक्षः । पराधीनकर्तृत्व एवैतदिति ।

सांख्यस्य तन्मतानुसारिणो वान्यस्य भ्रम एव । कर्तृत्वे न मुक्तिरिति । नपुंसक एवमुच्यतेति वाह्यवत् ।

निरिन्द्रियस्यैव समाधिरित्यपि । करणत्वेन बुद्धिवश केनापि

त्वे यथा वह्नेरौष्ण्यान्न निवृत्तिस्तथा जीवस्य कर्तृत्वान्न निवृत्तिः स्यात् । तदनिवृत्तौ च मोक्षोऽपि न स्यात् कर्तृत्वस्य दुःखरूपत्वादित्याहुः । तद् दूषयन्ति * नचेत्यादि * । * पराधीनकर्तृत्व एवैतदिति * । आध्यासिक एव कर्तृत्वे अनिर्मोक्षस्तस्यैव दुःखरूपत्वात् । * ब्रह्मवदिति * । वैधर्म्ये दृष्टान्तः । तथाच पराधीनकर्तृत्ववादिनस्तवैवायं दोषो, नास्माकमित्यर्थः । ननु शुद्धबुद्धमुक्तात्मनः प्रतिपादनात् तादृशे आत्मनि मोक्षसिद्धिरभिमता । तादृगात्मप्रतिपादनं च न स्वाभाविके कर्तृत्वे अवकल्पते । अत उपाधिधर्माध्यासेनैवात्मनः कर्तृत्वं न स्वाभाविकमिति वदतः प्रत्याहुः । * सांख्यस्येत्यादि * । * कर्तृत्वे नेति * । अत्र नेति भिन्नं पदम् । भ्रमत्वे हेतुः । * नपुंसक इत्यादि * । * नपुंसक इति * स्वातन्त्र्यादिसर्वपुरुषधर्मशून्यः । * इति वाह्यवदिति * अयमभ्युपगमो वाह्यानामिव प्रमाणरहितः । तथाच प्रमाणराहित्यादस्य भ्रमत्वमित्यर्थः । अत्र हेतुस्तु मुक्तानामपि शुकसनत्कुमारादीनामुपदेशकर्तृत्वदर्शनम् । भूमविद्यायां, तस्य ह वा एतस्यैवं पश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राणा इत्यारभ्य, आत्मतः कर्माण्यात्मत एवेदं सर्वमित्यन्तेन पश्यस्य सङ्कल्पादीनामात्महेतुकत्वश्रावणं च बोध्यम् । यदुक्तं, साध्यभावश्च शास्त्रार्थवत्त्वेनैव परिहृतो यथाप्राप्तमेव कर्तृत्वमादाय समाधिविधानादिति तद् दूषयन्ति । * निरिन्द्रियस्यैव समाधिरित्यपीति * अध्यासशून्यतया इन्द्रियाद्यभिमानरहितस्यैव समाधिर्मुख्य इत्यपि बोध्यमित्यर्थः । अत्रापि भूमविद्यास्थं वाक्यमेव हेतुः । ननु कैवल्यात् पूर्वं जीवन्मुक्तस्यापि लिङ्गसद्भावाद् बुद्धिसम्बन्धोऽस्त्येवेति कथं निरिन्द्रियत्वमत आहुः । * करणत्वेनेत्यादि * । तथाच बुद्धिसम्बन्धस्तु केवलस्य ब्रह्माभेदेऽप्यनिवार्यः । बुद्धेः पारमार्थिके

दृष्यते । तस्माज्जीवस्य स्वाभाविकं कर्तृत्वम् । ध्यायतीव लेला-यतीवेत्यपि परधर्मानुकरणम् । अयमप्येको धर्मः ।

स्वाप्ययसम्पत्त्योर्ब्रह्मण्यपदेशं पुरस्कृत्य सर्वविप्लवं वदन्नुपेक्ष्यः ॥ ३९ ॥

व्यावहारिके च सत्यत्वे विभुन आकाशस्येव सर्वसम्बन्धत्वात् । अध्यासस्तु नास्ति, येन सम्बध्येत । तस्माज्जीवस्य स्वाभाविकमेव कर्तृत्वमित्यर्थः । एवं मुक्तस्य स्वाभाविकं कर्तृत्वं प्रतिपाद्य संसारिणोऽप्याहुः । * ध्यायतीवेत्यादि * । तदुक्तमेकादशस्कन्धे द्वाविंशे, 'नृत्यतो गायतः पश्यन् यथैवानुकरोति तान् । एवं बुद्धिगुणान् पश्यन्ननीहोऽप्यनुकार्यत'इति । गुणैर्भगवता चेति बोध्यम् । अत एवैकादशे द्वितीयाध्यायेऽपि योगीश्वरवाक्ये 'कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वाऽनुसृतस्वभावात् । करोति यद् यत् सकलं परस्मै नारायणायेति समर्पयेत् तदि'त्यत्र कायाद्युपाधितोऽन्य आत्माऽपि कर्तृत्वेनोक्तः । तस्मान्न शङ्कालेश इति दिक् । यत्तु, नान्योऽतोऽस्ति, द्रष्टेत्यादिश्रुतेः परस्मादन्यो जीवो नाम कर्ता भोक्ता न विद्यते । आविद्यकत्वात् कर्तृत्वभोक्तृत्वयोरिति तत्राहुः । * स्वाप्ययेत्यादि * । उक्तं पुरस्कृत्य स्वाग्रहेण तथा कुर्वन्नुपेक्ष्यः । अयमर्थः । उक्तश्रुतेर्जीवान्तर्यामिणोः शरीरशरीरिभावकथनोत्तरमेव पाठेन तद्भेदानिषेधकतया तादृशद्रष्ट्रन्तरनिषेधपरत्वम् । यत्र हि द्वैतमिवेत्यस्या अपि समानप्रकरणे पश्यत्यादिकं प्रतिपाद्य विभक्तत्वनिषेधेनाविभागानुसन्धानदशायां द्वितीयस्य विभक्तत्वेन निषिध्य सर्वस्यात्ममात्रबोधनपूर्वकमन्यदर्शननिषेधात् सजातीयदर्शननिषेधपरत्वं वा, न तु द्रष्टृत्वादिनिषेधनपरत्वम् । पश्यत्यादीनां विनाशेनाविनाशित्वबोधनपीडाप्रसङ्गात् । अतः स्वाग्रहेण तत् सर्वं विप्लावयन्नुपेक्ष्य इत्यर्थः । एवञ्च यच्चेदुच्यते—विधिशास्त्रं तु यथाप्राप्तं कर्तृत्वमादाय कर्तव्यविशेषमुपदिशति, न कर्तृत्वमात्मनः प्रतिपादयति । कर्ता विज्ञानात्मपुरुष इत्याद्यपि शास्त्रमनुवादरूपत्वाद् यथाप्राप्तमाविद्यकं कर्तृत्वमनुवदिष्यति । एतेन विहारोपादाने परिहृते । तयोरप्यनुवादरूपत्वात् । यत् पुनः सन्ध्ये स्थाने परिवर्तन-

विहारः प्राणानामुपादानं चोक्तम् । तत्राप्यन्येषां प्राणानां विरमणं, न तु धियोऽपि । सधीः स्वप्नो भूत्वेमं लोकमतिक्रामतीति धीसम्बन्धश्रावणात् । उपादाने यद्यपि करणे कर्मकरणविभक्तिनिर्देशस्तथापि तत्संपृक्तस्यैवात्मनः कर्तृत्वं द्रष्टव्यम् । केवले कर्तृत्वासम्भवस्य दर्शितत्वात् । यथा लोके योधा युध्यन्ते, योधै राजा युध्यत इति तथात्रापि । किञ्चास्मिन्नुपादाने करणव्यापारोपरममात्रं विवक्षितं, न स्वातन्त्र्यम् । कस्य चिद्बुद्धिपूर्वकस्यापि स्वापे करणव्यापारोपरमदर्शनात् । तस्मादात्मनः कर्तृत्वमुपाधिनियन्त्रणमेवेति । तदपि फल्गु । सनत्कुमारादीनां चङ्क्रमणादिदर्शनेन भूमविद्यावाक्येन च निरध्यासानामात्मत एव सर्वकार्यकर्तृत्वे सिद्धे तदनुसारेणान्यद्रष्टृत्वान्यदर्शननिषेधकश्रुत्यर्थे उक्तरीत्योक्तयुक्तिभिश्च प्राञ्जले स्वाभाविककर्तृत्वनिषेधकप्रमाणाभावाद् विधिशास्त्रमनुवादकशास्त्रं विहारोपादानशास्त्रं च प्रतिपादयिष्यत्यनुवदिष्यति च । एवञ्च सन्ध्ये स्थाने, धियो विरमणाभावेऽपि न कश्चिद्दोषः । धीसाहित्येऽपि तदानीं तस्या उपाधितागमकस्याभावात् । करणत्वेन सम्बन्धस्येष्टत्वात् करणगतविभक्तिकोपाभावात् तदानुकूल्याच्च । योधदृष्टान्तेन धियः कर्तृत्वसाधनमात्मनस्तन्निराकरणं चाप्यसङ्गतमेव । योधानां चेतनत्वेन करणानां चाचेतनत्वेन राज्ञश्च प्रयोजककर्तृत्वेनात्मनश्च प्रयोजककर्तृताया अप्यनुपगमेन दृष्टान्तदार्ष्टान्तिकवैषम्यात् । अतोऽस्मिन्नुपादाने जीवस्य स्वातन्त्र्यं ब्रह्मणाप्यभेद्यमिति दिक् । यदपि विज्ञानपदस्य बुद्धौ प्रसिद्धत्वान्मनोनन्तरपाठाच्च, विज्ञानं यज्ञं तनुत इत्यत्रापि बुद्धेरेव कर्तृत्वमुच्यते । विज्ञानं देवाः सर्वे ब्रह्मज्येष्ठमुपासत इति वाक्यशेषोऽपि बुद्धेरेव प्रथमजत्वं विषयीकरोति । ज्यैष्ठ्यस्य प्रथमजत्वरूपस्य बुद्धौ प्रसिद्धत्वात् । स एव वाचश्चित्तस्योत्तरोत्तरक्रमो यद् यज्ञ इति श्रुत्यन्तरे यज्ञस्य वाग्बुद्धिसाध्यत्वावधारणादित्युक्तम् । तदपि मन्दम् । प्रकरणापेक्षया प्रसिद्धेर्दुर्बलत्वात् । विज्ञानमानन्दं ब्रह्मेति ब्रह्मण्यपि प्रसिद्धेस्तुल्यत्वात् । योगरूढ्यपेक्षया केवलयोगस्यापि निर्बलत्वात् । श्रद्धादीनां शिरस्त्वादिकल्पनतात्पर्यस्य प्रागेवोक्तत्वात् । ज्येष्ठशब्दोऽपि ब्रह्मपदसमभिव्याहाराद् ब्रह्मण इव ज्यैष्ठ्यं वक्ति । ब्रह्मज्येष्ठा वीर्याणीत्यादिवत् । वाग्बुद्ध्योरुत्तरोत्तरक्रमस्तु बुद्धेः करणत्वेऽपि तुल्यः ।

यथा च तक्षोभयथा ॥ ४० ॥

ननु कर्मकारिणां कर्तृत्वभोक्तृत्वभेदो दृश्यते तत् कर्तृत्वभोक्तृत्वयोर्भेदो भविष्यतीतिचेत्। न। यथा तक्षा रथं निर्माय तत्रारूढो विहरति, पीठं वा। स्वतो वा न व्याप्रियते वाश्यादिद्वारेण वा। चकारादन्येऽपि स्वार्थकर्तारः। अन्यार्थमपि करोतीतिचेत् तथा प्रकृतेऽपि। सर्वहितार्थं प्रयतमानत्वात्। नच कर्तृत्वमात्रं दुःखरूपम्। पयःपानादे: सुखरूपत्वात्। तथाच स्वार्थपरार्थकर्तृत्वं कारयितृत्वं च सिद्धम् ॥ ४० ॥

परात्तु तच्छ्रुतेः ॥ ४१ ॥

कर्तृत्वं ब्रह्मगतमेव। तत्सम्बन्धादेव जीवे कर्तृत्वं, तदंशत्वा-

---

तस्माच्च किञ्चिदेतत् ॥ ३९ ॥

यथा च तक्षोभयथा ॥ सूत्रमवतारयन्ति। * नन्वित्यादि *। भेद इति * भिन्ननिष्ठत्वम्। सूत्रोक्तं समाधिं व्याकुर्वन्ति। * नेत्यादि *। तथाच उक्तोऽभेदः प्रायिको, न तु नियत इति न कर्मकरदृष्टान्तेन तयोर्भिन्ननिष्ठत्वसिद्धिरित्यर्थः। उभयथेति पदं व्याकर्त्तुमाहुः। * अन्यार्थमित्यादि *। पूर्वपक्षिणोक्तमङ्गीकुर्वन्ति। * तथेत्यादि *। * प्रकृत इति * शास्त्रप्रणयने। तथाच व्याख्यातान् सर्वान् प्रकारान् क्रोडीकर्त्तुमेवं दृष्टान्तो, न तु स्वतोऽकर्त्ता, करणद्वारैव कर्त्तेत्येतावन्मात्रांशे। प्रमाणाभावादित्यर्थः। शेषमुत्तानार्थम् ॥ ४० ॥ १४ ॥

परात्तु तच्छ्रुतेः॥ जीवे कर्त्तृत्वं स्वाभाविकमित्यवधारितम्। तत् किं जीवस्य स्वातन्त्र्येण, उत ब्रह्माधीनतयेति विचारणीयम्। पुण्यः पुण्येनेति, एष उ एवेति विरुद्धश्रुतिद्वयदर्शनेन सन्देहात्। तत्र ईश्वराधीनत्वे जीवस्य दुःखभोगासम्भवात् कर्मणादिरयस्य च कर्त्तृपाधीनत्वात् तदन्यथानुपपत्त्येति स्वातन्त्र्येणैव कर्त्तृत्वमिति शङ्कायामिदं सूत्रमित्याशयेन सूत्रमुपन्यस्य व्याकुर्वन्ति। * कर्त्तृत्वमित्यादि *

दैश्वर्यादिवत् । न तु जडगतमिति । अतो, नान्योऽतोऽस्तीति सर्वकर्तृत्वं घटते । कुत एतत् ? । तच्छ्रुतेः । तस्यैव कर्तृत्वकारयितृत्वश्रवणात् । यमधो निनीषति तमसाधु कारयतीति । सर्वकर्ता सर्वभोक्ता सर्वनियन्तेति । सर्वरूपत्वान्न भगवति दोषः ॥ ४१ ॥

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ ४२ ॥

ब्रह्मगतमेव कर्तृत्वं ब्रह्मतादात्म्यादेव जीवे भासते। तादात्म्यं चांशत्वान्नतु कार्यत्वात्। अत ऐश्वर्यादिकं यथा भगवत्कृपया पार्षदादिषु पुंस्त्वादिवत् प्रकटीभवद्भासते तथा कर्तृत्वमित्यपि । अत एव मुक्तानां तत्तत्कार्यकर्तृत्वं श्रूयते, इमांल्लोकान् कामान्नीकामरूप्यनुसञ्चरन्नित्यादि । यद्यपि ब्रह्मवादे जडेऽप्यैश्वर्यांशत्वमविशिष्टं, तथापि जडजीवयोः परस्परवैलक्षण्यार्थं तत् तत्र न भगवता प्रकटीक्रियते । यथा पृथिव्यामेव गन्धो, न जलादिष्विति । अतो ब्रह्मधर्मस्यैव जीवे संक्रान्तत्वेन जीवस्य दर्शनादिकर्तृत्वान्नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुत्युक्तमन्यनिषेधेन ब्रह्मण एव दर्शनादिसर्वकार्यकर्तृत्वं घटते । सर्वकर्मेति श्रुतिरप्यसङ्कोचेन ब्रह्मणि सङ्गच्छते । एवञ्च, न कर्माविभागादिति सूत्रे यत् कर्मानादित्वमभ्युपगतं तदपि ब्रह्मधर्मत्वादेवोपपन्नमित्यर्थः।हेतुं व्याकुर्वन्ति * तस्यैवेत्यादि * स विश्वकृत् स हि सर्वस्य कर्तेति । ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुगिति, सर्वमिदं प्रशास्ति, अन्तःप्रविष्टः शास्ता जनानामित्यादिश्रुतिभिः सर्वभोक्ता सर्वनियन्तेति । कारयितृत्वश्रुतिस्तूक्तैव । नन्वेवं सर्वकर्तृत्वाद्यङ्गीकारे असमीचीनं प्रत्यपि ब्रह्मण एव कर्तृत्वात् क्लिष्टकर्मत्वाद्यापत्तिरित्यत आहुः । * सर्वेत्यादि * । तथाच,'किं वर्णितेन बहुना लक्षणं गुणदोषयोः । गुणदोषदृशिर्दोषो गुणस्तूभयवर्जित' इत्येकादशस्कन्धे भगवदुक्तान्न्यायान्न दोष इत्यर्थः ॥ ४१ ॥

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ तुशब्द-

ननु वैषम्यनैर्घृण्ययोर्न परिहारः । अनादित्वेन स्वस्यैव कारयितृत्वादितिपक्षं तुशब्दो निवारयति । प्रयत्नपर्यन्तं जीवकृत्यम् । अग्रे तस्याशक्यत्वात् स्वयमेव कारयति । यथा बालं पुत्रं यतमानं पदार्थगुणदोषौ वर्णयन्नपि तत्प्रयत्नाभिनिवेशं दृष्ट्वा तथैव कारयति । सर्वत्र तत्कारणत्वाय तदानीं फलदातृत्वे या इच्छा तामेवा-

---

व्याख्यानमुखेन सूत्रमवतारयन्ति । * नन्वित्यादि * । पूर्वं कर्मादित्वमीश्वरस्य तत्सापेक्षत्वं चाङ्गीकृत्य वैषम्यनैर्घृण्ययोः परिहारः कृतः । स तु न युज्यते । कर्मानादित्ववत् स्वस्य यत्कारयितृत्वं तस्याप्यनादित्वादित्यर्थः । समाधिं व्याकुर्वन्ति । * प्रयत्नेत्यादि * । अयमर्थः । तैत्तिरीय' आनन्दमयप्रशंसाप्रसङ्गे, अथातोऽनुप्रश्ना इत्यादिना अविद्वद्विदुषोः समानैव ब्रह्मप्राप्तिरुत कश्चिदेव, इति प्रश्ने उत्तरत्वेन, सोऽकामयतेत्यादिना स्वस्यैव बहुभवनेनोच्चनीचरूपेण सर्वसृष्टिमुक्त्वा तत्रानुप्रवेशेन स्वस्यैव, सच्च त्यच्चाभवदित्यादिना अनेकविधं द्वैधीभावं चोक्त्वा, सत्यमभवदिति समाप्तौ ब्रह्मरूपत्वं निगमयामास । तथा सति सर्वस्य ब्रह्मरूपत्वे अविशिष्टेऽपि मध्ये, स तपोऽतप्यतेत्यादिना तपोरूपस्यालोचनस्यापि सृष्टौ कारणत्वेन कथनाद् यथाधिकारं तत्तत्फलं, तत्तदधिकारश्च नानाविधस्तत्र कारणं, तस्यापि कारणं नानाविधः स्वभाव इति तत्र फलति । एवं सत्यालोचनानुसारेण वक्ष्यमाणप्रनाड्या प्रयत्नपर्यन्तं जीवकृत्यं, तदपेक्षः सन्, अग्रे बाह्यकृत्याद्युपकरणबाहुल्यमपेक्षितं, तच्च जीवेन केवलेन सम्पादयितुमशक्यमतस्तत्सम्पादनद्वारा स्वयमेव कारयति । तत्र दृष्टान्तो *यथा बालमित्यादि* । एवं सति कार्यमात्रं प्रति भगवानेव कारणमिति सर्वत्र तत्कारणत्वाय तदानीं प्रयत्नोत्तरकाले फलदातृत्वाभिव्यापिका या इच्छा आलोचनाकारान्तःपातिनी तामेव श्रुतिरनुवदति, उन्निनीषत्यधोनिनीषतीति । अतो गुणदोषकथनपूर्वकं बालेच्छानुसारिसामग्रीसम्पादके पितरि यथा न दोषः, किन्तु बालस्वभावे, तथा ब्रह्मण्यपि न दोषः, किन्तु जीव एवेत्यर्थः । ननूक्तदृष्टान्तन्यायेनैव कारयतीत्यत्र किं गमकमित्या-

नुवदति । उन्निनीषति, अधो निनीषतीति । अन्यथा विहितप्रतिषिद्धयोर्वैयर्थ्यापत्तेः । अप्रामाणिकत्वं च । फलदाने कर्मापेक्षः । कर्मकारणे प्रयत्नापेक्षः । प्रयत्ने कामापेक्षः । कामे प्रवाहापेक्ष इति मर्यादारक्षार्थं वेदं चकार । ततो न ब्रह्मणि दोषगन्धोऽपि । नचानीश्वरत्वम् । मर्यादामार्गस्य तथैव निर्माणात् । यत्रान्यथा स पुष्टिमार्ग इति ॥ ४२ ॥

काङ्क्षायां सूत्रोक्तं, विहितप्रतिषिद्धावैयर्थ्यादिभ्य इति हेतुं विवृण्वन्ति । * अन्यथेत्यादि * । यद्युक्तन्यायं विहाय केवलं जीवकृतकर्मापेक्षः कारयतीत्येवाङ्गीक्रियते तदा विहितप्रतिषिद्धयोर्यागादिब्राह्मणहननादिरूपयोः कर्मणोर्वैयर्थ्यं स्यात् । पूर्वपूर्वस्यैव कर्मानुसरणे ईश्वरस्य तदधीनतया तेषामेव प्राधान्यात्तत एव दुःखवदप्रार्थितस्य सुखस्यापि सिद्धेः । आदिपदादप्रामाणिकत्वं च । इदं विहितमिदं निषिद्धमिति बोधकस्य प्रमाणव्यापारस्य वैयर्थ्यात् । अतो विहितप्रतिषिद्धावैयर्थ्यप्रमाणव्यापारावैयर्थ्यप्रामाणिकापेक्षावत्कृतप्रमाणानुसरणेभ्यो हेतुभ्य इदं ज्ञायते, यत् फलदाने कर्मापेक्ष इत्यादिमर्यादारक्षार्थं तज्ज्ञापकं स्वनिश्वासरूपं वेदं प्रकटीचकार । यथा लोके राज्यमर्यादारक्षकं नीतिशास्त्रम् । ततो, लोकवत्तु लीलाकैवल्यमिति न्यायेन जीवकृतप्रयत्नानुसरणान्न ब्रह्मणि वैषम्यादिदोषगन्धः । नाप्यनीश्वरत्वम् । मर्यादामार्गस्य तादृशापेक्षावैशिष्ट्यपूर्वकत्वेन स्वयमेव निर्माणादिति । अन्वयमपि न नियमः । अहुत्वाभृतमिति, ते नाधीतश्रुतिगणा इत्यादिवाक्येषु तदनपेक्ष्यैव गोकुलस्थेभ्यः फलदानकथनाच्छ्रुतावपि, सुहृदः पुण्यकृत्यां द्विषन्तः पापकृत्यामिति कथनादित्यत आहुः । * यत्रेत्यादि * । तथाचेदमपि लोकवत्तु लीलेतिन्यायादेव समाहितम् । लोके राज्ञामपि कृपापात्रेषु तथा दर्शनादिति ।

विद्वन्मण्डने तु, स वै नैव रेम इति श्रुत्यनुसारेण, यती प्रयतन इति धात्वर्थमादाय भगवत्कृतो यः क्रीडार्थमुद्यमः सोऽत्र प्रयत्नशब्दे गृहीतः । सिद्धान्तस्तूभयथाप्येक एव । तेनात्रेदं सिद्धम् । फलदाने

अंशो नानाव्यपदेशादन्यथाचापि दाशकितवा-
दित्वमधीयत एके ॥ ४३ ॥

जीवस्य ब्रह्मसम्बन्धिरूपमुच्यते । जीवो नाम ब्रह्मणोऽशः । कुतः ? । नानाव्यपदेशात् । सर्व एवात्मानो व्युच्चरन्ति कपूयचरणा रमणीयचरणा इति च ।

भगवान् जीवकृतप्रयत्नापेक्षोऽपि न स्वातन्त्र्याद्धीयते । तथैवालोचितत्वात् । आलोचनानुसारेण विविधं फलं जीवेभ्यो ददपि, न वैषम्यादिदोषभाग् भवति । सर्वरूपत्वात् । कर्मणामप्यनादित्वं भगवद्धर्मत्वात् । क्वचिन्मर्यादां भिनत्त्यपि । स्वतन्त्रत्वात् । तथोक्तं द्वितीयस्कन्धसुबोधिन्याम् ।

यत्किञ्चिद् दूषणं त्वत्र दूष्यश्चापि हरिः स्वयम् ।
विरुद्धपक्षाः सर्वेऽपि सर्वमत्रैव शोभत इति ॥ ॥ ४२ ॥ १५ ॥

अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ अधिकरणमवतारयन्ति * जीवस्येत्यादि * । स्वसम्बन्धि तु, सोऽस्त एवेति सूत्रे ज्ञानरूपत्वबोधनायुक्तम् । इदानीं यो यदंशः स तं भजेदिति भजनयोग्यत्वं वक्तुं मतान्तरवद् अन्यत्वं परिहर्तुं मुक्तिदशायां ब्रह्मत्वव्यपदेशस्य मुख्यवृत्तत्वे हेतुं बोधयितुं ब्रह्मानेकत्वं च परिहर्तुं ब्रह्मसम्बन्धिरूपकथनार्थमिदमारभ्यत इत्यर्थः । सूत्रं विवृण्वन्ति । * जीवो नामेत्यादि * । * नानाव्यपदेशादिति * नानात्वेन व्यपदेशो नानाव्यपदेशस्तस्मात् । श्रुतौ बहुत्वसंख्याविशिष्टत्वेन कथनाद् ब्रह्मणः सकाशाद् विस्फुलिङ्गवद् विभागकथनाच्चेत्यर्थः ।

विद्वन्मण्डने तु—नानाविधो व्यपदेशो नानाव्यपदेशः, क्वचिद् ब्रह्मत्वेन, क्वचिद्विभक्तत्वेन, क्वचिदज्ञत्वेन, क्वचिच्चिद्रूपत्वेन, क्वचिद्दीशितव्यत्वेन, क्वचिदणुत्वेन, क्वचिद् व्यापकत्वेनेत्येवंरूपः । अयमात्मा ब्रह्म सर्वानुभूः, सर्व एवात्मानो व्युच्चरन्ति, ज्ञाज्ञौ द्वावजावीशानीशौ, विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय. क्षरात्मानावीशते देव एकः, एषोऽणुरात्मा चेतसा वेदितव्यः, तद्वज्जीवो नभोपम इत्या-

नतु ब्रह्मणो निरवयवत्वात् कथं जीवस्यांशत्वमिति वाच्यम् । न हि ब्रह्म निरंशं सांशमिति वा कश्चिल्लोके सिद्धम् । वेदैकसमधिगम्यत्वात् । सा च श्रुतिर्यथोपपद्यते तथा तदनुल्लङ्घनेन वेदार्थज्ञानार्थं युक्तिर्वक्तव्या । सा चेत् स्वयं नावगता, तपो विधेयम् । अभिज्ञा वा प्रष्टव्या इति । न तु सर्वविप्लवः कर्तव्य इति ।

तत्रैषा युक्तिः—

विस्फुलिङ्गा इवाग्नेर्हि जडजीवा विनिर्गताः ।
सर्वतःपाणिपादान्तात् सर्वतोऽक्षिशिरोमुखात् ॥

द्रिषु । तस्माद् ब्रह्मणोंऽश एव जीवः । न ह्येवं विरुद्धधर्माश्रयत्वं कार्यस्य सम्भवतीत्यादि व्याख्यातम् ।

अथैकदेशिभिर्दर्शनान्तराभिमानिभिश्च कृतामाशङ्कामनूद्य निषेधन्ति * ननु ब्रह्मण इत्यादि * । निषेधे हेतुं व्युत्पादयन्ति । * न हि ब्रह्मेत्यादि * । * युक्तिर्वक्तव्येति * । यथा न्यग्रोधफलमाहरेत्यादिः । * तपो विधेयमिति * तपसा ब्रह्म विजिज्ञासस्वेति श्रुतेः । * अभिज्ञा वा प्रष्टव्या इतीति * । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतेः । इतिः * प्रकारे । एवं श्रौतेन प्रकारेण ब्रह्म ज्ञातव्यं, न त्वेकदेशमादाय सर्वश्रुतिविप्लवः कर्त्तव्यः । योऽन्यथा सन्तमात्मानमिति श्रुत्युक्तदोषप्रसङ्गादित्यर्थः । एवं हेतुकथनावश्यकत्वं व्युत्पाद्य श्रुतिसिद्धयुक्तिरूपमंशपक्षाङ्गीकारे हेतुमाहुः । * तत्रेत्यादि * । * जडजीवा विनिर्गता इति * । व्युच्चरणश्रुतौ एतस्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानीत्युक्त्वा, सर्व एवात्मानो व्युच्चरन्तीति कथनात् ते परस्परविलक्षणतया निर्गताः । * सर्वत इत्यादि * । श्वेताश्वतरे, विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात्, सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एक इति, सर्वतःपाणिपादं तत् सर्वतोऽक्षिशिरोमुखं, सर्वतः श्रुतिमल्लोके सर्वमावृत्य

निरिन्द्रियात्व स्वरूपेण तादृशादिति निश्चयः ।
सदंशेन जडाः पूर्वे चिदंशेनेतरे अपि ॥
अन्यधर्मतिरोभावा मूलेच्छातोऽस्वतन्त्रिण इति ॥
ब्रह्मवादे अंशपक्ष एव ।

ननु अंशत्वे सजातीयत्वमायाति । श्रुत्यन्तरे पुनर्ब्रह्मदाशा ब्रह्मेमे कितवा उत । अत्र सर्वस्यापि ब्रह्मविज्ञानेन विज्ञानप्रतिज्ञानाद् दाशादीनामपि ब्रह्मत्वं प्रतीयते । तत्कार्यत्व एव स्यादिति-

---

तिष्ठति, सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितमिति श्रावणात् तथा । एवं सृष्टिं कारणस्वरूपं चोक्त्वा जडजीववैलक्षण्ये हेतुमाहुः । * सदंशेनेत्यादि * । वैलक्षण्यं क्रमे च विस्फुलिङ्गश्रुतिरेव प्रमाणमिति वैलक्षण्यरूपात् कार्यादेवं कार्यविभागोऽनुमीयते । स इममेवात्मानं द्वेधाऽपातयत् ततः पतिश्च पत्नी चाभवतामिति श्रुत्यन्तरे तथा दर्शनात् । जडजीवयोर्विरुद्धधर्माधारत्वाभावे युक्तिमाहुः । * अन्येत्यादि * । अन्य आनन्दांशस्तस्य धर्मो विरुद्धधर्माश्रयत्वं तस्य तिरोभावो येषु तादृशाः । तत्र हेतुर्मूलेच्छा, प्रजायेयं-तीच्छा ततः । * अस्वतन्त्रिण इति * । स्वतन्त्रो ब्रह्मभावस्तद्वन्तः स्वतन्त्रिणस्तद्भिन्ना ब्राह्मेभ्यो देहादिभ्यो मुक्तेभ्यो जीवेभ्यश्च भिन्ना इत्यर्थः । तथाचैवंश्रुतौ लोकविरुद्धस्य सर्वतःपाणिपादत्वादेः श्रावणेन ब्रह्मणि निरंशेऽपि लोकविरुद्धस्य सांशत्वस्य व्युच्चरणादिश्रुतिवलेनाङ्गीकर्त्तुं शक्यत्वाद् विरुद्धधर्माश्रयत्वं युक्तिरिति तथा श्रुतिमूलकयुक्त्या ब्रह्मवादे अंशपक्ष एवाद्रियते । तं विहाय केवलं निष्कलश्रुतिं पुरस्कृत्यौपचारिकांशत्वकल्पनया सर्वश्रुतिविप्लवो न कर्त्तव्यः । ब्रह्मणो लोकविलक्षणत्वादित्यर्थः । अंशत्व एव किञ्चिदाशङ्क्य सूत्रांशेन परिहरतीत्याशयेनाहुः । * नन्वित्यादि * । * अत्रेति * । अस्यां श्रुतौ । तत्कार्यत्व एव स्यादिति । तेषां ब्रह्मत्वं ब्रह्मकार्यत्व एव युज्येत, घटमृदोरिव दाशादिब्रह्मणोर्वैजात्यस्य स्फुटत्वात् । तथाच व्युच्चरणश्रुत्युक्तानां प्राणलोकादीनामिवात्मनामपि कार्यत्वमे-

चेव । अन्यथापि मकारान्तरेणापि एके शाखिनो दाशकितवादित्वमधीयते शरीरत्वेन, अंशत्वेन च । स्वरूपतः कार्याभावेऽपि प्रकारभेदेन कार्यत्वात् । तथाच न साजात्यम् । आनन्दांशस्य तिरोहितत्वात् । धर्मान्तरेण तु साजात्यमिष्टमेव ॥ ४३ ॥

मन्त्रवर्णात् ॥ ४४ ॥

पुरुष एवेदᳪ सर्वमित्युक्त्वा, पादोऽस्य विश्वा भूतानीति भूतानां जीवानां पादत्वं, पादेषु स्थितत्वेन वा अंशत्वमिति ॥४४॥

चाङ्गीकार्यं, न त्वंशत्वमिति शङ्कार्थः । प्रकारान्तरं विवृण्वन्ति । * एक इत्यादि * । स्यात् कार्यत्वं, यदि दाशादीननूद्य ब्रह्मत्वं विधीयेत । विधीयते तु विपरीतम् । अतो ब्रह्मण एव शरीरत्वं तन्निविष्टत्वं च । इम इत्यनेन सजीवानामेव देहानां परामर्शात् । तन्निविष्टत्वं चांशद्वारैव सम्भवति यथा चन्द्रमसो जलादिषु घटेष्वयःपिण्डादिषु । अत एके शाखिनो ब्रह्मणो दाशकितवादित्वे शरीरत्वेन अंशत्वेन चाधीयते । अतस्तद्दशानूद्यविधेयभावान्यथानुपपत्त्या अंश एव जीवः । नच साजात्याभावो बाधक इति वाच्यम् । जीवस्य स्वरूपतो जन्माभावेन कार्यत्वाभावेऽपि ब्रह्मणः सकाशाद् विभागे शरीरप्रवेशतः प्रकारभेदेन कार्यत्वात् । तथाच स्थूलसूक्ष्मशरीराभिमानान्न साजात्यम् । अभिमानश्चानन्दांशस्य तिरोहितत्वात् । तत्तिरोधानस्य च तदर्थप्रयत्नानुमेयत्वात् । अतोऽपि न साजात्यम् । धर्मान्तरेण चित्स्वरूपनित्यत्वादिना तु साजात्यमिष्टमेव । सहस्रशः प्रभवन्ते सरूपा इति मुण्डके श्रावणात् । अतः साजात्याभावस्यान्यहेतुकत्वाद् वस्तुतः साजात्यस्य सत्त्वादेवच्छ्रुतिविचारेऽप्यंश एव जीव इति परिहारभन्याशयः ॥ ४३ ॥

मन्त्रवर्णात् ॥ श्रुत्यन्तरसम्मतिं दर्शयितुं हेत्वन्तरं वदतीत्याशयं स्फुटीकुर्वन्ति । * पुरुष एवेत्यादि * । पुरुषसूक्तव्याख्यानाऽध्याये, पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुरिति व्याख्यानात्, पक्षान्तरमाहुः । * पादेष्वित्यादि * ॥ ४४ ॥

अपि स्मर्यते ॥ ४५ ॥

वेदे स्वतन्त्रतया उपपाद्य वेदान्तरेऽपि तस्यार्थस्यानुस्मरणम्। ममैवांशो जीवलोके जीवभूतः सनातन इति ॥ ४५ ॥

प्रकाशादिवन्नैवं परः ॥ ४६ ॥

जीवस्यांशत्वे हस्तादिवत् तद्दुःखेन परस्यापि दुःखित्वं स्यादितिचेन्न। एवं परो न भवति। एवमिति प्रकारभेदः। द्विष्टत्वेनाऽनुभव इति यावत्। अन्यथा सर्वरूपत्वात् कुत एवं तत्राह ॥ प्रकाशादिवत् ॥ नाग्नेर्हि तापो न हिमस्य तत् स्यादिति।

अपि स्मर्यते ॥ अर्थस्तुस्फुटः ॥ ४५ ॥

प्रकाशादिवन्नैवं परः ॥ एवं श्रुतिभिर्जीवस्यांशत्वं निर्द्धार्यांशत्वे प्राप्तान् दोषान् परिहरतीत्याशयेन सूत्रं व्याकुर्वन्ति * जीवस्यांशत्वे * । * अंशत्वे हस्तादिवदिति * । हस्तादिवदंशत्वे इत्यन्वयः। परिहारं व्याकुर्वन्ति। * एवं पर इत्यादि * । अत्र, नैवं पर इति निषेधेन प्रकारभेदो बोध्यतेऽतेन तद्धेतुभूतः प्रकारोऽपि भेदकत्वेन सूच्यते। तथाच यस्मात् परो जीववन्न तस्माज्जीववद् दुःखी नेति। तथा सत्येवमिति जीवनिष्ठः प्रकारभेद उच्यते। स च दुःखे द्विष्टत्वेनानुभवरूपः। स तु परस्य नास्ति, किन्तु प्रियत्वेनानुभवरूपः। अतः परोऽन्यथा। तत्र हेतुः * सर्वरूपत्वादिति। तथाच पूर्वसूत्रे यथा दाशकितवादिरूपस्त्यात्र दुःखरूपोऽपि। अतो दुःखे दुःखत्वेन भानरहितत्वात् परो नैवमित्यर्थः। न हि स्वस्य स्वस्मिन्नप्रियत्वं भासते। ननु कुत एवमवगम्यते, तत्राह * प्रकाशादिवदिति * । यथा प्रकाशशैत्यादयो धर्मा नाग्निहिमादीनां दुःखद्विष्टत्वबुद्धिजनकास्तथा दुःखमपि परस्य न दुःखजनकं, न वा द्विष्टत्वानुभवजनकमित्यर्थः। वाक्यं तु एकादशस्कन्धे भिक्षुगीतास्वम्। 'कालस्तु हेतुः सुखदुःखयोश्चेत् किमात्मनस्तत्र तदात्मकोऽसौ। नाग्नेर्हि तापो न हिमस्य तत् स्यात् क्रुध्येत कस्मै न परस्य द्वन्द्वमिति। तत्र परस्येति पदस्यांशिन इत्यर्थो

चेन्न । अन्यथापि प्रकारान्तरेणापि एके शाखिनो दाशकितवादित्वमधीयते शरीरत्वेन, अंशत्वेन च । स्वरूपतः कार्याभावेऽपि प्रकारभेदेन कार्यत्वात् । तथाच न साजात्यम् । आनन्दांशस्य तिरोहितत्वात् । धर्मान्तरेण तु साजात्यमिष्टमेव ॥ ४३ ॥

मन्त्रवर्णात् ॥ ४४ ॥

पुरुष एवेदꣳ सर्वमित्युक्त्वा, पादोऽस्य विश्वा भूतानीति भूतानां जीवानां पादत्वं, पादेषु स्थितत्वेन वा अंशत्वमिति ॥४४॥

चाङ्गीकार्यं, न त्वंशत्वमिति शङ्कार्थः । प्रकारान्तरं विवृण्वन्ति । * एक इत्यादि * । स्यात् कार्यत्वं, यदि दाशादीननूद्य ब्रह्मत्वं विधीयेत । विधीयते तु विपरीतम् । अतो ब्रह्मण एव शरीरत्वं तन्निविष्टत्वं च । इम इत्यनेन सजीवानामेव देहानां परामर्शात् । तन्निविष्टत्वं चांशशैरेव सम्भवति यथा चन्द्रमसो जलादिषु वह्नेरयःपिण्डादिषु । अत एके शाखिनो ब्रह्मणो दाशकितवादित्वं शरीरत्वेन अंशत्वेन चाधीयते । अतस्तद्दशानूद्यविधेयभावान्यथानुपपत्त्या अंश एव जीवः । नच साजात्याभावो बाधक इति वाच्यम् । जीवस्य स्वरूपतो जन्माभावेन कार्यत्वाभावेऽपि ब्रह्मणः सकाशाद् विभागे शरीरप्रवेशतः प्रकारभेदेन कार्यत्वात् । तथाच स्थूलसूक्ष्मशरीराऽभिमानान्न साजात्यम् । अभिमानश्चानन्दांशस्य तिरोहितत्वात् । तत्तिरोधानस्य च तदर्थप्रयत्नानुमेयत्वात् । अतोऽपि न साजात्यम् । धर्मान्तरेण चित्स्वरूपनित्यत्वादिना तु साजात्यमिष्टमेव । सहस्रशः प्रभवन्ते सरूपा इति मुण्डके श्रावणात् । अतः साजात्याभावस्यान्यहेतुकत्वाद् वस्तुतः साजात्यस्य सत्त्वादेतच्छ्रुतिविचारेऽप्यंश एव जीव इति परिहारग्रन्थाशयः ॥ ४३ ॥

मन्त्रवर्णात् ॥ श्रुत्यन्तरसम्मतिं दर्शयितुं हेत्वन्तरं वदतीत्याशयं स्फुटीकुर्वन्ति । * पुरुष एवेत्यादि * । पुरुषसूक्तव्याख्यानाऽध्यायं, पादेषु सर्वभूतानि पुंसः स्थितिपदो विदुरिति व्याख्यानात् पक्षान्तरमाहुः । * पादेष्वित्यादि * ॥ ४४ ॥

अपि स्मर्यते ॥ ४५ ॥

वेदे स्वतन्त्रतया उपपाद्य वेदान्तरेऽपि तस्यार्थस्यानुस्मरणम्। ममैवांशो जीवलोके जीवभूतः सनातन इति ॥ ४५ ॥

प्रकाशादिवन्नैवं परः ॥ ४६ ॥

जीवस्यांशत्वे हस्तादिवत् तद्दुःखेन परस्यापि दुःखित्वं स्यादितिचेन्न। एवं परो न भवति। एवमिति प्रकारभेदः। छिद्रत्वेनाऽनुभव इति यावत्। अन्यथा सर्वरूपत्वात् कुत एवं तत्राह ॥ प्रकाशादिवत् ॥ नाग्नेर्हि तापो न हिमस्य तत् स्यादिति।

अपि स्मर्यते ॥ अर्थस्तुस्फुटः ॥ ४५ ॥

प्रकाशादिवन्नैवं परः ॥ एवं त्रिभिर्जीवस्यांशत्वं निर्द्धार्यांशत्वे प्राप्तान् दोषान् परिहरतीत्याशयेन सूत्रं व्याकुर्वन्ति * जीवस्येत्यादि * । * अंशत्वे हस्तादिवदिति * । हस्तादिवदंशत्व इत्यन्वयः। परिहारं व्याकुर्वन्ति । * एवं पर इत्यादि * । अत्र, नैवं पर इति निषेधेन प्रकारभेदो बोध्यते।तेन तद्धेतुभूतः प्रकारोऽपि भेदकत्वेन सूच्यते।तथाच यस्मात् परो जीववन्न तस्माज्जीववद् दुःखी नेति।तथा सत्येवमिति जीवनिष्ठःप्रकारभेद उच्यते।स च दुःखे छिद्रत्वेनानुभवरूपः।स तु परस्यनास्ति, किन्तु प्रियत्वेनानुभवरूपः।अतः परोऽन्यथा।तत्र हेतुः * सर्वरूपत्वादिति । तथाच पूर्वसूत्रे यथा दाशकितवादिरूपस्तथात्र दुःखरूपोऽपि। अतो दुःखे दुःखत्वेन भानरहितत्वात् परो नैवमित्यर्थः। न हि स्वस्य स्वस्मिन्नप्रियत्वं भासते। ननु कुत एवमवगम्यते, तत्राह * प्रकाशादिवदिति * । यथा प्रकाशोष्णादयो धर्मा नाग्निहिमादीनां दुःखछिद्रत्वबुद्धिजनकास्तथा दुःखमपि परस्य न दुःखजनकं, न वा छिद्रत्वानुभवजनकमित्यर्थः । वाक्यं तु एकादशस्कन्धे भिक्षुगीतास्थम । 'कालस्तु हेतुः सुखदुःखयोश्चेत् किमात्मनस्तत्र तदात्मकोऽसौ । नाग्नेर्हि तापो न हिमस्य तत स्यात् क्रुध्येत कस्मै न परस्य द्वन्द्वमि'ति । तत्र परस्येतिपदस्यांशिन इत्यर्थो

प्रकाशग्रहणं धर्मत्वद्योतनाय । दुःखादयोऽपि ब्रह्मधर्मा इति। अतो द्वैतबुद्ध्या अंशस्यैव दुःखित्वं, न परस्य ।

अथवा प्रकाशः प्रकाश्यदोषेण यथा न दुष्टः । पापस्यापि तदंशत्वादिति ॥ ४६ ॥

स्मरन्ति च ॥ ४७ ॥

स्मरन्ति च ऋषयः । सर्वेऽपि ऋषयोंऽशिनो दुःखासम्बन्धमंशस्य दुःखसम्बन्धं स्मरन्ति । 'तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः । न लिप्यते फलैश्चापि पद्मपत्रमिवाम्भसे'ति । कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैः स युज्यते । एकस्तथा सर्वभूतान्तरात्मा

पोध्यः । दुःखादीनां ब्रह्मधर्मत्वमानन्दतिरोभावरूपत्वात् । आविर्भावतिरोभावौ शक्ती वै मुरवैरिण इति वाक्येन तिरोभावस्य भगवद्धर्मत्वादिति । ननु तर्ह्यग्न्यादिवदिति कुतो नोक्तं तत्राहुः । * प्रकाशेत्यादि * तथाचाग्न्यादिवदित्युक्ते सामर्थ्यविशेषादेव प्रकारभेदो बुध्येत, न तु धर्मधर्मिभावात्। अतस्तद्बोधनार्थं तथा नोक्तमित्यर्थः। एतस्य दुरूहत्वेन क्लिष्टत्वात् पक्षान्तरमाहुः । * अथवेत्यादि * रूपस्य प्रकाशांशत्वं तु, सूर्यश्चक्षुस्तथा रूपं ज्योतिषो न पृथग् भवेदिति द्वादशस्कन्धे उक्तम् । तथाच सौरः प्रकाशो रूपप्रकाशकः प्रकाश्यं रूपमपि तदंशस्तथापि तद्दोषेण यथा प्रकाशस्य न दुष्टत्वं तथा जीवस्याभिमानादिदोषप्राप्तेऽपि न परस्य तद्दोषवत्त्वमित्यर्थः । क्वचित्तु पापस्यापि तदंशत्वादिति पाठः । तदा त्वादिपदेन सूत्रे पापं ग्राह्यम् । तथाच धर्मः स्तनोऽधर्मपथश्च पृष्ठ इति वाक्यात् पापं विराजोंऽशः । तस्माद् यथा विराजो न दुःखं तद्वदित्यर्थो वाच्यः ॥ ४६ ॥

स्मरन्ति च ॥ स्मरन्ति च ऋषय इति ग्रहणकम् । अग्रे व्याख्यानम् । * निर्गुण इति * प्राकृतसंसर्गशून्यः । एकस्तथेति श्रुतिस्तु कठवल्लीस्था । एतत्पूर्वार्द्धं तु, सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैरिति । द्वितीया श्वेताश्वतरस्था । एतत्पूर्वार्द्धं द्वा सुपर्णेत्यादि । तथा विरुद्धधर्मवत्त्वं भेदश्च जीवपरमात्मनोः सिद्ध-

न लिप्यते लोकदुःखेन बाह्यः। चकारात्, तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीतीति ॥ ४७ ॥

अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॥ ४८ ॥

ननु जीवस्य भगवदंशत्वे विधिविषयत्वाभावात् कर्मसम्बन्धाभावेन कथं फलसम्बन्धः। जीवस्य च पुनरनेकदेहसम्बन्धात् कः शूद्रः, का भार्येति ज्ञानमप्यशक्यम्। अतः कर्ममार्गस्य व्याकुलत्वात् कथं जीवस्यापि दुःखित्वमित्याशङ्क्य परिहरति।

अनुज्ञापरिहारौ विधिनिषेधौ जीवस्य देहसम्बन्धाद् यो देहो यदा गृहीतस्तत्कृतौ। यथा शवाग्निश्चाण्डालभाण्डस्थमुदकं, तद्वद्यादिश्च परिह्रियते। एवमुत्कृष्टं परिगृह्यते। तथा जीवेऽपि देह-

---

ति। एवं सूत्रद्वयेन एको दोषः परिहृतः। पूर्वश्रुतौ चाक्षुषैरित्यस्य तत्तच्चक्षुःसम्बन्धिभिस्तिमिरादिभिरित्यर्थः ॥ ४७ ॥

अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॥ पुनर्दोषान्तरमाशङ्क्य परिहरतीत्याहुः * नन्वित्यादि *। अयमर्थः। कर्त्ता शास्त्रार्थवत्त्वादित्यत्र ब्रह्मण आप्तकामत्वेन फलानुपयोगाज्जडस्य च ज्ञानाद्यभावेन कर्मकरणस्याशक्यत्वाद् विधिनिषेधशास्त्रमनर्थकं स्यादिति, तत्परिहारार्थं जीवस्य विधिनिषेधविषयतया कर्त्तृत्वमङ्गीकृतम्। अंशत्वे तद्विरुध्यते। भगवत इव जीवस्यापि तथात्वस्यावश्यवक्तव्यत्वेन कथं फलसम्बन्धः। तथाच विधिनिषेधवैयर्थ्यतादवस्थ्यात् तत्सूत्रव्याघातः। किञ्च। शास्त्रस्य जीवाधिकारकत्वाज्जीवस्य चानेकदेहसम्बन्धात् को जीवः शूद्रः, का भार्येति ज्ञानमप्यशक्यम्। तदज्ञाने, ऋतौ भार्यामुपेयात्, न शूद्राय मतिं दद्यादित्याद्यनुज्ञापरिहारविषयज्ञानाभावः। अतः कर्ममार्गस्य व्याकुलत्वाद् विहितनिषिद्धाव्यवस्थितौ कथं जीवस्यापि निषिद्धफलभूतं दुःखित्वमिति द्वयमाशङ्क्य परिहरतीति। परिहारं व्याकुर्वन्ति * अनुज्ञेत्यादि * सत्यं जीवस्य यद्यपि भगवदंशत्वात्र स्वरूपतो विधिनिषेधविषयत्वं,

सम्बन्धकृतः । सम्बन्धश्चाध्यासिको भगवत्कृतश्च । आध्यासिको हि ज्ञानान्निवर्तते । द्वितीयो भगवतैव । जीवन्मुक्तानामपि व्यवहारदर्शनात् । श्रुतिस्तु भगवत्कृतसम्बन्धमेवाश्रित्याग्निहोत्रादिकं विधत्ते । अन्यथा त्रिवर्णं स्वज्ञानं च बोधयन्ती कर्माणि न विदध्यात् । शब्दज्ञानस्य पूर्वमेव सिद्धत्वात् । कथं सिद्धवद् यावज्जीवं विदध्यात् । न्यासोऽपि देहसम्बन्ध एव ॥ ४८ ॥

तथापि तत्तद्देहसम्बन्धकृतमागन्तुकं तद् भवत्येव । यथाग्न्युदकपृथिवीनां स्वतो विध्याद्यविषयत्वेऽपि शवादिसम्बन्धान्निषेधविषयत्वं, श्रोत्रियादिसम्बन्धाच्च विधिविषयत्वं, तद्वदस्यापि देहसम्बन्धाज्जाते तस्मिंस्तत एव तत्फलसम्बन्धस्यापि सौकर्येण तयोरपि सार्थकत्वे सति न शास्त्रार्थवत्त्वसूत्रव्याहतिर्न वा कर्ममार्गव्याकुलता । येन दुःखित्वाद्यनुपपत्तिरित्यर्थः । ननु देहसम्बन्धेन विधिविषयत्वे देहसम्बन्धस्याज्ञानकृतत्वाच्छास्त्रस्याप्यज्ञाधिकारकत्वं सिद्ध्यति । अज्ञानं च बुद्ध्युपाधिकस्यैव, न तु स्वत इति शास्त्रार्थवत्त्वसूत्रव्याहतिर्न परिहृता भवतीत्याशङ्कायामाहुः । * सम्बन्धश्चेत्यादि * । * स्वज्ञानमिति * । साङ्गो वेदोऽध्येयो ज्ञेयश्चेत्यादिभिः स्वार्थज्ञानम् । * पूर्वमेव सिद्धत्वादिति * अध्यापनाध्ययनविधिभ्यां कृतेऽध्ययने तत्काल एव सिद्धत्वात् । तथाच कामाधिकारको विधिर्विश्वासोपजननार्थोऽज्ञाधिकारको भवतु नाम, यावज्जीवादिरूपो नित्यविधिस्तु नाज्ञाधिकारकः । अतो, न शास्त्रार्थवत्त्वव्याघात इत्यर्थः । ननु यावज्जीवविधिश्चेज्ज्ञानिपरस्तदा, यदहरेव विरजेत्तदहरेव प्रव्रजेदित्यादिसन्न्यासविधिवैयर्थ्यम् । अतो नेयं व्यवस्था युक्तेत्यत आहुः । * न्यासोऽपीत्यादि * । तथाच जरामर्याग्निहोत्रस्य तत्रापि सम्भवान्न वैयर्थ्यम् । ये पुनर्ब्रह्मभूता आदितः साधनसम्पत्त्या वा देहसम्बन्धं नानुसन्दधते, दैवादुपेतमुत दैववशादुपेतमिति न्यायेन देहं धारयन्ति पूर्णा एव ज्ञानिनस्तेषां तु शुकादिवत् स्वत एव तत्र तत्र प्रवृत्तेर्न विधिनियतत्वम् । अत एव, यं प्रव्रजन्त-

नानात्मानो व्यवस्थात इति भोगव्यवस्थया जीवनानात्वमङ्गीकृतम् । तत्राऽदृष्टस्य नियामकत्वं तन्मते सिद्धम् । देशान्तरवस्तूत्पत्त्यन्यथानुपपत्त्या व्यापकत्वं चाङ्गीकृतम् ।

एवञ्च क्रियमाणे मूल एव कुठारः स्यात् । सर्वेषामेव जीवानामेकशरीरसम्बन्धात् कस्यादृष्टं तद् भवेत् । नच मिथ्याज्ञानेन व्यवस्था । तत्रापि तथा । नचानुपपत्त्या परिकल्पनम् । श्रुत्यैवोपपत्तेः । एतेन विरोधाद् ऋषिप्रामाण्यमपि निराकृतम् ॥ ५१ ॥

ईश्वरनियम्यत्वं नैयायिकादिभिरप्यङ्गीक्रियत एवेति कुतस्तदर्थं तन्मतनिराकरणमित्याकाङ्क्षायां तत्र तदनुपपत्तिबोधनाय तन्मतमनुवदन्ति * नानेत्यादि * । * तत्रेति * भोगव्यवस्थायाम् । * सिद्धमिति * । कार्यमात्रं प्रति जीवादृष्टस्य कारणत्वाङ्गीकारात् सिद्धम् । * देशान्तरेत्यादि * । सामग्रीसमवधाने हि कार्यमुत्पद्यते । तत्र सामग्रीमध्ये अदृष्टमपि प्रविष्टमिति देशान्तरे यद्भोगार्थं यद्वस्तूत्पद्यते तत्र तददृष्टमवश्यं वक्तव्यम् । अदृष्टं चात्मसमवेतं गुणत्वात् । अतस्तत्रात्माभावे तद्वस्तूत्पत्त्यभाव इति तदन्यथानुपपत्त्या तस्मिन् देशे तददृष्टवदात्मसत्ताऽऽवश्यकीति तेषां व्यापकत्वमङ्गीकृतमित्यर्थः । एवमनूद्य दूषयन्ति । * एवञ्चेत्यादि * । भोगव्यवस्थैतत्सर्वाङ्गीकारे जीवनानात्वव्यापकत्वसाधनहेतुभूतायां भोगव्यवस्थायामेव तच्छेदकदूषणपात इत्यर्थः । अत्र हेतुमाहुः । * सर्वेषामित्यादि * । * मिथ्या ज्ञानेनेति * शरीरेऽहमित्यभिमानेन । * तत्रापि तथेति * । सर्वेषामेकस्मिन् शरीरे सम्बन्धतौल्ये कथमेकस्यैवात्मनोऽहंममेत्यभिमानः । * विरोधादिति * । श्रुतिविरोधात् । तथाचाभिमानकारणस्य निर्वक्तुमशक्यत्वे तेन शरीरेण तत्तदिन्द्रियेण तत्तन्मनसा कृतं कर्म सर्वेषां सम्बन्धतौल्यात् सर्वकृतं सत् सर्वेषामेव तद्भोजकादृष्टं जनयत् सर्वेषां तद्वस्तुभोगाय स्यात् । एवं सर्वत्रेति भोगव्यवस्थाभङ्गात् तथा जीवनानात्वव्यापकत्वयोः सिद्धिरित्यर्थः ॥ ५१ ॥

अभिसन्ध्यादिष्वपि चैवम् ॥ ५२ ॥

ननु मनःप्रभृतीनां नियामकत्वात् तेषामीश्वरेच्छया
त्वान्न दोष इतिचेन्न । पूर्ववदेव दोषप्रसक्तिः ।
च पूर्वमेव निराकृता ॥ ५२ ॥

प्रदेशादितिचेन्नान्तर्भावात् ॥ ५३ ॥

आत्मनो विभुत्वेऽपि प्रदेशभेदेन व्यवस्था ।
प्रदेशविशेषोऽस्ति येन सर्वमुपपद्यत इति चेन्न । अन्यस्यापि
शस्त्रान्तर्भवति । तस्यैव वा देहस्य देशान्तरगमने पूर्वदेशस्य

अभिसन्ध्यादिष्वपि चैवम् ॥
षस्यामाशङ्क्य परिहरतीत्याशयेन सूत्रमुपन्यस्य व्याकुर्वन्ति ।
नन्वित्यादि * । ननु विलक्षणसंयोगोत्पादकानां
माननियामकत्वात् तेषां चेश्वरेच्छया
इति चेन्न । कुत.। अभिसन्धिः पूर्वोक्तोऽभिमानस्तत्स्यादिभूतानि
णानि तेष्वपि, एवं पूर्ववदेव विभूनामात्मनां ;
गस्यापि तुल्यत्वान्नियमाऽसम्भवदोषप्रसक्तिः । नचेश्वरेच्छया
माधानम् । निमित्तभूतेश्वरकल्पनायाः पूर्वमेव निराकृतत्वात् ।
भ्युपगमेऽपि अनया प्रणाड्याऽस्यैवादृष्टमुत्पद्यतामिति यदयमेवं
कामिस्यत एवात्मयादेऽप्याकारेण तस्यास्तुल्यत्वान्न व्यापकात्मसि
द्धिरित्यर्थ. ॥ ५२ ॥

प्रदेशादितिचेन्नान्तर्भावात् ॥ आत्मनां विभुत्वेऽपि प्रदेशभे
दाङ्गीकारेण दोषसमाधिमाशङ्क्य परिहरतीत्याहुः । * आत्मन इत्या
दि * । अन्यस्येत्यादि * । तथाच पूर्ववदेव दोषप्रसक्तिरित्यर्थः । *
नन्वन्यस्य प्रदेशे स विशेषोनास्तीत्यदोष इत्यत आहुः । * तस्यै